[illegible]

[१२८]

[illegible]

मन्त्रमुक्ताकलापः

[[illegible] भागः]

[illegible]

[illegible]

[illegible]

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

SARASVATĪBHAVANA-GRANTHAMĀLĀ
[Vol. 128]

TATTVAMUKTĀKALĀPA

[Part—1]

OF

ŚRĪMADVEṄKAṬANĀTHA MAHĀDEŚIKA

With Three Commentaries

SARVĀRTHASIDDHI

BY

ŚRĪMADVEṄKAṬANĀTHA

ĀNANDADĀYINĪ

BY

NṚSIṂHADEVA

&

AKṢARĀRTHA

BY

DEVANĀTHATĀTĀCĀRYA

EDITED BY

DR. N. R. ŚRĪKṚṢṆATĀTĀCĀRYA

Reader

Dept. in "NYĀYA" Philosophy

Śrī Sadāśiva Kendrīya Sanskrit Vidyāpītha

PURI

VARANASI

1990

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

□

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi–221 002.

□

Available at—
Sales Department
Sampurnanand Sanskrit University
Varanasi–221 002.

□

First Edition, 1000 Copies
Price Rs. 120·00

□

Printed by—
VIJAYA PRESS,
Sarasauli,
Varanasi.

सरस्वतीभवन-ग्रन्थमाला

[१२८]

श्रीमद्वेङ्कटनाथमहादेशिकप्रणीतः

तत्त्वमुक्ताकलापः

[प्रथमो भागः]

श्रीमद्वेङ्कटनाथकृतया

स्वोपज्ञसर्वार्थसिद्धिव्याख्यया

नृसिंहदेवकृतया

आनन्ददायिनीव्याख्यया

देवनाथताताचार्यकृतया

अक्षरार्थव्याख्यया च

संवलितः

सम्पादकः

डॉ० ना० रा० श्रीकृष्णताताचार्यः

उपाचार्यः,

न्यायविभागस्य

श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठे

जगन्नाथपुर्य्याम्

वाराणस्याम्

२०४७ तमे वैक्रमाब्दे १९१२ तमे शकाब्दे १९९० तमे ख्रैस्ताब्दे

अनुसन्धान-प्रकाशन-पर्यवेक्षकः —
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

□

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी—२२१ ००२.

□

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी—२२१ ००२.

□

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम् —१२०=०० रूप्यकाणि

□

मुद्रकः—
विजय प्रेस,
सरसौली,
वाराणसी ·

प्ररोचना

विद्वद्वरैः श्रीकृष्णताताचार्यैर्विशिष्टाद्वैतवेदान्तनये अर्जितयशस्कैः श्रीमद्वेङ्कटनाथ-महादेशिकप्रणीतस्तत्त्वमुक्ताकलापग्रन्थः, ग्रन्थकृत्कृतस्वोपज्ञसर्वार्थसिद्धि-नृसिंहदेवकृत-आनन्ददायिनी-देवनाथताताचार्यकृत-अक्षरार्थटीकात्रयसंवलितो महता परिश्रमेण सम्पादितः, विवेचनपूर्णया प्रस्तावनया विभूषितश्चेति महते परितोषाय। अस्य ग्रन्थस्य प्रथमो भागोऽधुना प्रकाश्यतामानीयते। वेङ्कटनाथमहादेशिकानां काव्ये, दर्शने, नाट्ये सर्वत्रैव तुल्य उत्कर्षो दरीदृश्यते। विशिष्टाद्वैतनयस्य संस्थापने, दृढीकरणे तेषां समस्तं जीवनमर्पितमासीत्। वैदुष्यस्य वैदग्ध्यस्य च एतादृक् सङ्गमोऽतीव दुर्लभः। इतोऽपि दुर्लभो लोकभाषाग्रथितभक्तिवाङ्मयस्यावगाहनम्, संस्कृतभाषया तद्गततत्त्वस्य स्फुटीकरणञ्च। तत्त्वमुक्ताकलापग्रन्थस्य विशेषेण प्रौढं तर्कसङ्गुफनम्। अस्य ग्रन्थस्य भाषा छन्दोमयी, संश्लिष्टा, गभीरा च। टीकात्रयसाहाय्येनैवास्य विवृतिः सम्भवति।

श्रीमत्ताताचार्यैरनेन सम्पादनेन वेदान्तनयानुरागिणां जनानां कृते महदुपकृतम्। अस्य ग्रन्थस्य प्रथमे भागे जडद्रव्यसरः, जीवसर इति प्रकरणद्वयं निष्पन्नम्। द्वितीये भागे नायकबुद्ध्यद्रव्याणां विवेचनं प्रस्तोष्यते।

प्रस्तावनायां विशदतया श्रीताताचार्यैः प्रतिपाद्यविषयः संगृहीतः, तदतीव सुव्यवस्थितः। मन्ये, अयं ग्रन्थो विद्वद्भिर्बहोःकालात् प्रतीक्ष्यमाणः प्रकाश्यतामानीयते। सर्वेषां विदुषां परितोषाय भवत्वयं ग्रन्थ इति।

काश्याम्
आषाढकृष्णैकादश्याम्
२०४७ वैक्रमाब्दे
(१९।६।१९९० खैस्ताब्दे)

विद्यानिवासमिश्रः
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

॥ श्रीमते श्रीनिवासपरब्रह्मणे नमः ॥

॥ श्रीमते निगमान्तमहागुरवे नमः ॥

प्रस्तावना

श्रियः पतिं प्रणम्याथ निगमान्तमहागुरुम् ।
आचार्यं देवनाथं च भक्त्याऽहं भावयेऽनिशम् ॥

अथेदानीं समेषां विदुषां महतो हर्षस्य विषयः; यत्किल सर्वतन्त्रस्वतन्त्रैः श्रीमद्वेङ्कटनाथमहादेशिकैरनुगृहीतं तत्त्वमुक्ताकलापग्रन्थरत्नं आनन्ददायिनीव्याख्यासनाथीकृतस्वोपज्ञसर्वार्थसिद्धिविभूषितं, अक्षरार्थव्याख्यासहितं च संमुद्रय प्रकाशनेनास्मन्नयनसुलभतामाप्नोति ।

तत्र तत्त्वमुक्ताकलापाख्यो मूलग्रन्थः स्रग्धरावृत्तगुम्भितः ५०० पद्यमयस्सूत्रवत् रामानुजसिद्धान्तसंमतसकलवेदान्तार्थसंग्राहकः; तस्य सर्वार्थसिद्धिनामकः स्वोपज्ञवृत्तिग्रन्थो दर्शनान्तरोक्ततत्तद्युक्तिप्रमाणादिविवेचनपूर्वकं तदीयसिद्धान्तखण्डनमुखेन स्वमतसंरक्षणाय निर्धारणाय च प्रगल्भते । तथा चाहुः —

सर्वार्थसिद्धिशतदूषणी च
द्वे खेटशस्त्रे विबुधाग्रगाणाम् ।
एकेन तत्र क्रियते स्वरक्षा
प्रत्यर्थिभङ्गः कलहेऽन्यतस्स्यात् ॥ इति ।

सर्वार्थसिद्धेरप्यतीव गहनतया तत्र बौद्धादिमतान्तरनिरसनावसरे सम्यगर्थावबोधनाय प्रतिपादनावश्यकतां पर्यालोच्य श्रीमन्नृसिंहराजेन पण्डितवर्येण आनन्ददायिनी नाम्नी तद्व्याख्या रचिता ।

सूत्रतुल्यस्य तत्त्वमुक्ताकलापस्य श्लोकरूपस्य मूलग्रन्थमात्रस्यार्थमधिजिगांसूनां अक्लेशेनावगत्यर्थं अय्या श्रीदेवनाथतातयार्यमहादेशिकैः अक्षरार्थाभिधाना मूलव्याख्या प्रणीता ।

एवं निरुक्तानेकव्याख्यासहितस्य तत्त्वमुक्ताकलापस्य विपुलकायतया खण्डशस्तस्य मुद्रणं चिकीर्षितम् । अधुना तत्र जडद्रव्य—जीवसरद्वयात्मकः प्रथमखण्डः सम्मुद्रय प्रकाश्यते ।

ग्रन्थप्रतिपाद्यविषयसंग्रहः

अस्मिन् तत्त्वमुक्ताकलापग्रन्थे बौद्धाद्यनेकमतान्तरस्थैः प्रतिपादितप्रमाणप्रमेयस्वरूपादिविषये शतशः अनुपपत्त्युद्भावनपूर्वकं श्रीभगवद्रामानुजाभिमतं प्रमाणप्रमेयतत्त्वं प्रत्यपादयन् श्रीमद्वेंकटनाथार्याः। अत्र च पञ्चभिः सराभिख्यैर्भागैः यथाक्रमं जडद्रव्य–जीव-नायक-बुद्धि-अद्रव्याणां स्वरूपादिकं निर्णीतम्। तेषु आद्यसरे जडद्रव्यसरे प्रकृति-कालयोः स्वरूपं मतान्तरविवेचनपूर्वकं प्रतिपाद्यते। अव्यक्तपरिणामभूतान्येव पृथिव्यादिद्रव्याणि इति वेदान्तिनां सिद्धान्तः। तदिह पृथिव्यादिद्रव्यविषये सत्कार्यवादविषये (जगत्सृष्टिविषये) च नैयायिकैः सांख्यैश्च प्रतिपादितां प्रक्रियामनूद्य सोपपत्ति स्वमतं स्थाप्यते। बौद्धैः धर्मधर्मिभावानङ्गीकारेण रूपाद्यद्रव्यातिरिक्तद्रव्यं नाभ्युपगम्यते। अतः सर्वप्रथमं तन्मतं निरस्यते। यतो हि प्रत्यक्षादिप्रमाणसिद्धस्य धर्मधर्मिभावस्यापह्नवः सर्वथा साहसमात्रमेव। सर्वस्यापि पदार्थतत्त्वस्य तद्घटितत्वात्।

बौद्धास्तु (वैभाषिकाः) रूपरसगन्धस्पर्शशब्दपञ्चकव्यतिरेकेण धर्मिद्रव्यं किंचिन्नास्ति। नीलो घटः, मधुरं जलं, सुगन्धि पुष्पं इत्यादिप्रत्यक्षेषु चक्षुरादितत्तदिन्द्रियैः रूपरसादिगुणा एव विषयत्वेन गृह्यन्ते, न तदाश्रयत्वेन घटादिद्रव्याणि इति प्रतिपादयन्ति।

अत्रेदं समाहितं ग्रन्थकर्त्रा—योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामीति दृढतरप्रत्यभिज्ञया रूपाद्यतिरिक्तस्य घटरूपाश्रयस्यैव विषयीकरणात् तत्सिद्धिः (धर्मिद्रव्यसिद्धिः)। यद्यत्र रूपमात्रं स्पर्शमात्रं वा विषयः इत्यभ्युपगम्येत तदा द्वीन्द्रियग्रहणानुपपत्तिः। रूपं तु चक्षुरिन्द्रियेणैव गृह्यते एवं स्पर्शः त्वगिन्द्रियेणैवेति सर्वानुभवसिद्धम्। तथा च रूपादौ उभयेन्द्रियग्राह्यत्वस्य सर्वथाऽसंभवात् तदतिरिक्तस्य घटाद्याश्रयस्य सिद्धिः अवश्यमभ्युपगन्तव्येति।

न चास्तु द्रव्यसिद्धिः, किन्तु तदपि द्रव्यं सधर्मकमेवेत्यङ्गीक्रियेत तदा द्रव्यवृत्तिधर्मोऽपि सधर्मकः, सोऽपि तथेत्यनवस्था स्यात्। अथ अनवस्थापरिहाराय निर्धर्मक एवेत्यभिधीयते तदा "अन्तस्तद्धर्मोपदेशा"दित्यादिना प्रतिपादितं सधर्मकत्वं असङ्गतं स्यादिति धर्मधर्मिभावानुपपत्तिरिति वाच्यम्। धर्मिवृत्तिधर्मस्य स्वपरनिर्वाहकत्वाभ्युपगमेन प्रथमपक्षे न कोऽपि दोषः। अयमत्र भावः—यथा ज्ञानस्य परप्रकाशकस्य स्वप्रकाशः इतरानधीनः, यथा च रूपस्य द्रव्यादौ चाक्षुषत्वापादकस्य स्वचाक्षुषत्वमनन्याधीनं एवं गोशब्दस्य व्यक्तिवृत्तौ गोत्वं निमित्तं, गोत्वे तु स्वत एव व्यवहारः बुद्धिर्वा भवति न निमित्तान्तरमपेक्षते एवं नात्र धर्मेऽपि अनवस्थापादकधर्मान्तरं स्वीक्रियते।

नन्वेवं निरुक्तरीत्या धर्मधर्मिभावसिद्धावपि धर्मस्य धर्मिणि वृत्त्यनुपपत्त्या न भवदुक्तं सङ्गच्छते। तथा हि—योऽयं रूपादिः गोत्वं वा धर्मतयेष्टः स किं तादृशधर्मविशिष्टे वर्तते तच्छून्ये वा ? तत्र विशेषणविशिष्टस्यैव विशिष्टशब्दार्थत्वेन स्वविशिष्टे धर्मो वर्तत इति अभ्युपगम्यते चेत्, तदा विशेषणे सत्त्वमन्तरा विशिष्टवृत्तित्वस्यानुपप-

न्नत्वेन विशेषणरूपधर्मस्य स्वस्मिन्नपि सत्त्वापत्त्या स्वस्य धर्मस्य स्वाधारत्वप्रसङ्ग इति आत्माश्रयदोषः प्रथमपक्षे। स्वशून्ये वर्तत इति द्वितीयपक्षे व्याघातः। कोह्यनुन्मत्तः स्वशून्ये स्वयं वर्तत इति ब्रूयात्। यतो हि सर्वेषां धर्माणां स्वाश्रये विद्यमानत्वेन व्यवहारात्।

अत्रोच्यते—धर्मस्य वस्तुतः तद्विशिष्टे विशेष्ये वृत्तित्वमभ्युपगम्यते। न च तद्विशिष्टे वर्तमानस्य तस्मिन्नपि वृत्तिरिति नियमः। घटवति भूतले वर्तमानानां गुणादीनां घटेऽपि वृत्तित्वानुपलम्भात्। अतो न काचिदनुपपत्तिरिति सिद्धो धर्मधर्मिभावः।

अथोद्दिष्टेषु द्रव्येषु प्रकृतेरेव प्राथमिकतया तामधिकृत्य परीक्ष्यते। किमियं प्रकृतिः सर्वजगद्धेतुभूता प्रत्यक्षगम्या। उतानुमानवेद्या ? अथवा आगमप्रमाणैकलभ्या ? नाद्यः, प्रकृतिविकारभूतस्य घटादिस्थूलपदार्थस्य प्रत्यक्षवेद्यत्वेऽपि सूक्ष्मभूतमूलप्रकृतेरतथात्वात्। न द्वितीयः, प्रकृतिकार्यभूतं महदादि-कारणगुणात्मकं कार्यत्वात्, पटादिवत् इत्याद्यनुमानमपि न घटते। कारणगुणात्मकमिति साध्यांशस्य कोऽर्थः ? कारणगुणेन तादात्म्यमुत कारणं प्रति गुणभूतत्वं ? तत्र तन्त्वादिगुणैः शौक्ल्यादिभिः पटस्य तादात्म्यं न दृष्टम्। नापि तन्तुं प्रति पटस्य गुणभूतत्वं। अथ कारणगुणात्मकत्वं नाम स्वगुणसजातीयगुणकत्वमिति चेन्न गोमय–वृश्चिकादौ सजातीयगुणकत्वाभावेन व्यभिचारात् साध्यस्य कार्यत्वस्य च व्याप्त्यभावः। तस्मात् आगमेनैव प्रकृतिः महदादिकारणत्वेन सिद्ध्यति। सेयं प्रकृतिः परस्परसंमिश्रसत्त्वरजस्तमोगुणकत्वात् त्रिगुणमित्युच्यते। विचित्रसृष्ट्युपकारकत्वान्मायेति, महदादिविकारप्रकृतित्वान्मूलप्रकृतिरिति, विद्याविरोधित्वादविद्येति, सर्वप्रपञ्चप्रधानकारणत्वात् प्रधानमिति, अतिसूक्ष्मत्वादस्फुटत्वाच्चाव्यक्तमिति चोच्यते।

अथ सृष्टिक्रमः

गुणत्रयाश्रयात् प्रधानात् सत्त्वादिगुणोन्मेषभेदेन सात्त्विको, राजसः, तामसश्चेति त्रिधा महानुत्पद्यते। त्रिविधान्महतः तथैव त्रिविधः अहंकारः। तत्र सात्त्विकाहङ्कारस्य वैकारिक इति, तामसाहङ्कारस्य भूतादिरिति च नामान्तरम्। सात्त्विकाहङ्कारात् एकादशेन्द्रियाणि जायन्ते। तामसाहङ्कारात् शब्दतन्मात्रमुत्पद्यते। तत आकाशः। आकाशात् स्पर्शतन्मात्रं, ततो वायुः। तस्माद्रूपतन्मात्रं; ततस्तेजः तस्मात् रसतन्मात्रं, तस्मादापः, अद्भ्यो गन्धतन्मात्रं तस्मात्पृथिवीति।

सृष्टिक्रमविषये सुबालोपनिषदुक्तप्रक्रियाविरोधाशङ्का, तत्परिहारश्च

सुबालोपनिषदि 'पृथिव्यप्सु प्रलीयते, आपस्तेजसि लीयन्ते, तेजो वायौ लीयते, वायुराकाशे लीयते। आकाश इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु। तन्मात्राणि भूतादौ लीयन्ते। भूतादिर्महति लीयते, महानव्यक्ते लीयते, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते तमः परे देव एकीभवति' इति लयक्रमः श्रूयते। यत्र लयः तस्मादुत्पत्तिरिति

वस्तुस्थितिः। अन्यत्र श्रुतिवाक्ये आकाशस्य शब्दतन्मात्रे, शब्दतन्मात्रस्य केवलं तामसाहङ्कारे, इन्द्रियाणां च वैकारिकसंज्ञे सात्त्विकाहङ्कारे लय उक्तः। अत्र तु इतरप्रमाणविलक्षणतया आकास्येन्द्रियेषु, इन्द्रियाणां तन्मात्रेषु, सर्वेषां तन्मात्राणां भूतादिसंज्ञके तामसाहङ्कारे च लयः प्रतिपादितः। एतदनुरोधेन आकाशं प्रति इन्द्रियाणां प्रकृतित्वमवगम्यते, तथासति तानीन्द्रियाणि एकादश, प्रकृति-महदहङ्कार-तन्मात्राणि अष्टौ, आहृत्य एकोनविंशति प्रकृतययस्युः, विकृतयश्च पञ्चभूतान्येव भवेयुः। तर्हि अष्टौ प्रकृतयः षोडशविकृतय इति श्रुतिविरोधः स्पष्ट इति आशङ्का। यद्यपि, "आकाश इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु" इत्यन्तरालवाक्यद्वये लयपदं न श्रूयते। तदश्रवणेऽपि पूर्वोत्तरवाक्येषु लयपदश्रवणात् लयप्रकरणत्वावगमात् तद्वशेन मध्यवर्तिवाक्ययोरपि लयपदानुषङ्ग आवश्यकः। एवं सति अधोनिर्दिष्टरीत्या श्रुत्यन्तरविरोध इति शङ्कितुराशयः। अत्रेदं समाधानं प्रतिपाद्यते—आकाश इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, इति स्थलद्वये लयपदाश्रवणात् नाकाशस्य इन्द्रियेषु लयः। पूर्वं पृथिव्यप्सु प्रलीयते इत्यारभ्य लयप्रतिपादनात् अत्र लयपदाश्रवणेऽपि प्रकरणात् लयपदस्यानुषङ्गोऽभिप्रेत इति तु न वक्तुं शक्यं, तथा सति "पृथिव्यप्सु प्रलीयते" इति आदावेकत्र लयप्रदश्रवणमात्रेण अन्यत्र सर्वत्र अनुषङ्गसंभवे निरुक्तस्थलद्वयात् पूर्वोत्तरेषु अवादिवाक्येषु पृथक् लयपदाम्नानं व्यर्थं स्यात्। अतो नाकाशस्य इन्द्रियेषु लयः प्रतिपाद्यते। किन्तु तत्रत्या सप्तमी आप्यायकभूतसंबन्धस्येन्द्रियेष्वपि सत्त्वात् सम्बन्धसद्भावतोऽपि अधिकरणत्वाभिधानेनोपपद्यते। इत्थं च तत्र लयाप्रतिपादनान्नेन्द्रियोपादानकत्वप्रसक्तिरिति न पूर्वोक्तश्रुतिविरोधगन्ध इति सिद्ध्यति।

नैयायिकोक्तजगत्सृष्टिविमर्शः

नैयायिकाः परमाणुभिरेव द्व्यणुकत्र्यणुकोत्पत्तिक्रमेण जगत्सृष्टिर्भवतीति प्रतिपादयन्ति। अवयवाः स्वभागैः मिथः संयुज्य अवयविनमारभन्त इति तेषां सिद्धान्तः। द्व्यणुकारम्भे तु निरवयवाः परमाणव हेतव इति। अत्रायं विकल्पः—यदि परमाणवः स्वांशतः संयुज्य अवयविनमारभेरन् तदा परमाणोरंशस्यापि तदवयवरूपत्वात्, तस्याप्यवयवान्तरमित्यनवस्था स्यात्।

अथावयवशून्यानां परमाणूनां संयोगैरेव द्व्यणुकत्र्यणुकादिरुत्पद्यत इत्युच्येत तदा स्वाधिकदेशव्यापि कार्यारम्भो न स्यात्। यतो हि परमाणूनां परस्परं कार्त्स्न्येन संयुक्तत्वात् भागप्रयुक्ताधिकपरिमाणवत्वं न संभवतीति।

न च परिमितानां पदार्थानां यथा दिग्भेदेन भागभेदो दृश्यते तथा परमाणुष्वपि स्यादिति वाच्यम्। सावयवत्वे खलु दिग्भेदप्रयुक्तः अवयवभेदः वक्तुं शक्यते। परमाणोः भवद्भिः अनवस्थाभिया निरवयवत्वोपगमेन दिग्भेदप्रयुक्तभागभेदासम्भवात्। तस्मात्परमाणूनां समानदेशत्वे स्वाधिकदेशव्यापिकार्योत्पत्तेरसम्भवेन न तैः द्व्यणुकादिक्रमेण जगत्सृष्टिस्संभवति। इत्थमत्र परमाणुकारणतावादं भङ्क्त्वा कार्यद्रव्यस्योपादानात्मककारणद्रव्याद् भेदोऽपि नास्तीति प्रसाध्यते।

मृत्कपालादिरूपकारणद्रव्यस्य घटादिरूपकार्यद्रव्यस्य च भेदमङ्गीकुर्वन्ति नैयायिकाः। तथा सति कार्यद्रव्यस्य कारणद्रव्यस्य च मेलनेन गुरुत्वस्याधिक्यात् गुरुत्वप्रयुक्तपतनरूपकार्यापत्तिः। यथा द्विपलविशिष्टस्य वस्तुनः एकपलविशिष्टस्य वस्तुनश्च मेलने सति त्रिपलविशिष्टता वस्तुनो भवति, यथा वा पटद्वयोर्माने गुरुत्वाधिक्यं दृश्यते, एवं तन्तुतत्कार्यपटसमुदायोन्मानेऽपि गुरुत्वदर्शनापत्तिः। न तथाऽवलोक्यते, किन्तु सर्वेषु पटोपादानतन्तुषु यावद्गुरुत्वं तावत एव तन्तुसमुदायात्मकपटोन्मानेऽपि दर्शनात् कारणव्यतिरिक्तकार्यं नास्ति। तन्तुः, पटः, कपालः, घटः इत्यादिनामभेदस्तु कारणद्रव्यस्यैव कारणत्वावस्था कार्यत्वावस्था चेत्यवस्थाभेदाङ्गीकारादुपपद्यते। अतः अवयवातिरिक्तावयविवादो न युक्तः। एवं तन्तव एव पटः, मृदेव घटः इत्येवमेकत्वप्रत्यभिज्ञायास्सत्त्वाच्च कार्यकारणयोरनन्यत्वं स्थिरीकृतम्।

यदपि नैयायिकैः शरीरादिषु (घटादिषु) पृथिव्यादिभूतान्तरसमवायसत्त्वेऽपि एकमेव भूतमुपादानमन्यत् संसर्गिमात्रमित्युक्तं, शरीरस्य पांचभौतिकत्वे साङ्कर्यदोषो भवेत्। सांकर्यस्य जातिबाधकतया शरीरस्य एकभूतोपादनकत्वमेव युक्तमिति तेषामभिप्रायः। तत्रोच्यते चतुर्विधमाहारमयं शरीरं, पंचभूतात्मकं वपुरित्यादिभिः पांचभौतिकत्वं प्रतिपाद्यते श्रुतिभिः। पार्थिवघटादौ पंचभूतसमाहारसत्वेऽपि जलाद्यंशस्य न्यूनतया पार्थिवांशस्य भूयस्त्वाच्च केवलपार्थिवत्वेन व्यवहारः भवति। तदुक्तं "वैशेष्यात्तु तद्वादस्तद्वाद" इति। नैयायिकैरपि पार्थिवघटादौ जलादेस्संसर्गोङ्गीकृतः। भूतान्तरोपष्टब्धेष्वपि देहादिषु पार्थिवादिव्यवहारस्य तदंशाधिक्येनैवोपपत्तिरिति प्रतिपादितः। एवं सत्यपि पृथिव्याद्येकोपादानकत्वं यदुच्यते, तत्प्रमाणविरुद्धं अनुभवविरुद्धं च। अनुभवश्च एकस्मिन् देहादौ सर्वेषां भूतानामंशो वर्तत इति। अतः यथादर्शनमेव पदार्थसिद्धिरभ्युपगन्तव्या। पंचभूतात्मकं वपुरित्यागमप्रमाणेनापि शरीरस्य पांचभौतिकत्वमेवोद्घोषितम्।

अथ पांचभौतिकत्वे सांकर्यदोषापत्तिरिति यदाशङ्कितं, तस्य भवत्पक्षे नरसिंहादिशरीरे सांकर्यापत्तौ यादृशः परिहारः तादृशोऽत्रापि समानः। अथवा सांकर्यस्य दोषत्वमेव नास्ति। इत्थं द्रव्यस्यावस्थाभेदं स्वीकृत्य कार्यकारणयोरन्यत्वं प्रतिक्षिप्तम्।

अथ सांख्यैरप्यवस्थाभेदपूर्वकं द्रव्येषु सत्कार्यवादाभ्युपगमात् तन्मतादविशेषापत्तिरित्याशङ्कायामिदानीं सांख्योक्तसत्कार्यवादनिरसनमुखेन विशिष्टाद्वैतिसम्मतः सत्कार्यवादः स्थाप्यते। सांख्यपक्षे सदेव कार्यं भवतीति सत्कार्यवादशब्दार्थः। ईदृशसत्कार्य (वाद)साधकतया च।

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्॥

इति कारिकायां पंच हेतव उपन्यस्ताः। अत्रायमनुमानप्रयोगः—घटादिकार्यं सत् असदकरणात् इति । असदकरणादित्यस्य सदितरकरणादृष्टेरित्यर्थः। सदितरशब्देन प्रागसत्त्वमिह विवक्षितम्। मृदादेः द्रव्यस्य कारणत्वावस्था कार्यत्वावस्था चेत्यवस्थाद्वयमङ्गीक्रियते। तत्र कार्यत्वावस्थापि वस्तुनः कार्यत्वेन दर्शनात्प्रागेव तत्र वर्तते। असतः करणानुपपत्तेः। न ह्यसत् खपुष्पादि क्रियते। एवमुपादानग्रहणादिभिर्हेतुभिरपि द्रव्येऽवस्थाः प्रागेव सन्तीति वदन्ति।

न च कार्यत्वावस्थायाः प्रागेव सत्त्वे चक्रभ्रमणादिरूपकारकव्यापारस्य वैयर्थ्यमिति वाच्यम्? अवस्थायाः अभिव्यक्त्यर्थं कारकव्यापारस्यावश्यकत्वात्। एवं च कारणद्रव्ये पूर्वं सत एव कार्यस्य अभिव्यक्तिर्भवति, न त्वसत इति सिद्धयति। अयं च सत्कार्यवादः न श्रुत्यनुकूल इत्यन्यथैव सत्कार्यवादं वर्णयन्ति विशिष्टाद्वैतिनः। मृदादिरूपकारणद्रव्ये कार्यत्वावस्थाऽपि पूर्वमेव वर्तते, तस्या अभिव्यक्तिमात्रं कारकव्यापारेण भवतीति यदुक्तं तन्न संगच्छते। मृद्रूपे उपादानकारणे घटत्वावस्था पूर्वमेव वर्तत इति नाभ्युपगम्यते। मृद्रूपोपादानात् घटत्वरूपकार्यत्वावस्थाया उत्पत्तिः मृदः घटत्वार्हे सत्येव नियता। अत एवासतः निष्पत्तिश्चेत्तिलात् क्षीरमपि स्यादित्यापत्तिः न कर्तुं शक्यते। तिलस्य क्षीरोचितत्वाभावात्। उचितादेव कार्यदृष्टेः। अपि च घटनिमित्तकारणदण्डचक्रादौ घटसूक्ष्मरूपाभावेऽपि यथा निमित्तत्वं, तथा उपादानत्वमपि संगच्छते। तस्मात् कार्यत्वावस्थाया उत्पत्तिरेवाभ्युपगन्तव्या। सत्कार्यप्रवादस्तु मृदादिकारणातिरिक्तकार्यद्रव्यस्यासत्त्वेनासत्कार्यं न भवतीति रीत्या, न तु कार्यत्वरूपावस्थाया अपि नित्यत्वमभ्युपगम्य। अन्यथा या चेयमभिव्यक्तिरभिहिता साप्यभिव्यज्यत इत्युच्येत, तदा तस्या अप्यभिव्यक्तिरित्यनवस्थापरम्परा स्यात्। अभिव्यक्तेरुत्पत्तिस्तु सत्कार्यवादसिद्धान्तविरोधात् दूरापास्ता। एवं च वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिमूलकत्वेनावस्थाया उत्पत्तिमभ्युपगम्य उपदर्शितरीत्यैव सत्कार्यवादः आस्थेयः।

क्षणभङ्गनिरासः

बौद्धस्तु—जगत् क्षणिकं सत्त्वात्, यत् सत् तत् क्षणिकं यथा जलधरः, इत्यनुमानेन क्षणिकत्वं वर्णयन्ति। सोऽयं घट इत्यादिप्रत्यभिज्ञया वस्तुनः स्थैर्यसिद्धेः जगतः क्षणिकत्वं न सम्भवति।

ननु एकस्यैव बीजस्य अङ्कुरानुत्पादकत्वं, अङ्कुरोत्पादकत्वमिति मिथो विरुद्धधर्मवत्त्वासंभवात् कथं तद्विषयकप्रत्यभिज्ञायाः तदेवेदं बीजमित्याद्याकारिकायाः प्रामाण्यमिति चेन्न। पङ्कसलिलादि-सहकृतस्य बीजस्यैव अङ्कुरोत्पादकत्वेन कुसूलस्थबीजे तादृशसहकारिकारणाभावेनैव अङ्कुरोत्पादकत्वानुपपत्तेः। क्षेत्रस्थबीजस्य तु तादृशसहकारिकारणसंनिधानात् तद्युज्यते। अतश्च स्वरूपतो बीजस्याङ्कुरोत्पादकत्वशक्तिरक्षुण्णैवेति नात्र विरुद्धधर्मोपहितविषयत्वं प्रत्यभिज्ञाया वक्तुं शक्यते।

एवं सोऽयं घट इत्यत्रापि तत्त्वेदन्त्वयोः परस्परं विरुद्धत्वेऽपि देशकालादिभेदे-नैकत्र समावेशः युज्यते। अतः स इति अयमिति च गृह्यमाणस्य मिथो विरुद्धधर्म-विशिष्टत्वेन प्रत्यभिज्ञात्मकप्रत्यक्षस्याप्रामाण्यशङ्का न सम्भवति। अत्रेदं विव्रियते—अथ प्रत्यभिज्ञायाः विरुद्धानुपहितत्वेन वस्तूनां स्थिरत्वं सिद्धयतीति यदुक्तं तन्न युज्यते। सोऽयमिति प्रत्यभिज्ञायां तत्त्वमिदन्त्वं च विषयो भवति। तत्र च तत्त्वं पूर्वकाल-सम्बन्धित्वं, इदन्त्वं च वर्तमानकालसम्बन्धित्वम्। तयोः एकस्मिन् काले वस्तुनि वृत्तित्वं न सम्भवति। विभिन्नकालद्वयसम्बन्धस्यैककाले विरोधात्। एवं च सोऽयं घट इत्यादिप्रत्यभिज्ञायाः तत्त्वेदन्त्वरूपविरुद्धधर्मद्वयविषयकत्वात् न प्रामाण्यं वस्तुस्थै-र्यविषये इति चेत्। अत्रोच्यते—घटस्य देशभेदेन अतीतकालसम्बन्धे वर्तमानकाल-सम्बन्धे च सति विरोधस्याप्रतीतेः। विरोधस्तु प्रतियोगितदभावयोः युगपदवस्थाने सत्येव। अतश्च घटस्य स्ववृत्तित्वकालसम्बन्धः यदा भवति तदैव घटाभावकाल-सम्बन्धोऽपि स्यात्तदा विरोधः। न त्वेतदस्ति। एकत्रैव नैल्यस्थौल्याद्यनेकविशेषणवत् नानाकालसंबन्धा अपि भवितुमर्हन्ति, तथैवानुभवात्। एवञ्च प्रत्यभिज्ञायाः विरुद्धानुपहितविषयकत्वेन तया वस्तुनः स्थिरत्वमेव सिद्धयतीति क्षणिकत्वानु-मानबाधः।

अथ प्रत्यक्षेण क्षणिकत्वस्यैव गृह्यमाणत्वात् प्रत्यभिज्ञैव बाध्या। यतो हि अतीतानागतविषये प्रत्यक्षस्य सामर्थ्यं नास्ति। इदमिति प्रत्यक्षं तावत् वर्तमानत्वेन पदार्थं गृह्णदवर्तमानभिन्नत्वेन दर्शयति। एवं चावर्तमानमित्यनेन पूर्वोत्तरयोः क्षणयो-र्ग्रहणम्। प्रत्यक्षस्य तद्विषयत्वासंभवेन परिशेषाद्वर्तमानक्षणमात्रविषयकत्वेन क्षणिक-त्वमेव सिद्धयति, न तु स्थायित्वमिति तेन प्रत्यभिज्ञाबाधः। यद्यपि प्रत्यक्षस्य प्रत्य-भिज्ञायाश्च प्रत्यक्षत्वात्कथमेकेन इतरस्य बाधो भवतीति शङ्का जायते। परन्तु प्रत्यभिज्ञायाः संस्कारोपनीतार्थविषयत्वात् तादृशप्रत्यक्षापेक्षया साक्षादिन्द्रियसंनि-कर्षजन्य शुद्धप्रत्यक्षस्य प्रबलत्वेन तेन प्रत्यभिज्ञाया बाधः। अतो वस्तुस्थैर्ये प्रत्यभिज्ञायाः प्रामाण्यं न सम्भवतीति चेदत्र प्रतिविधीयते—प्रत्यक्षेण घटघटत्वादिरूपस्यार्थस्यैव ग्रहणं भवति, न तु कालस्य। तस्यातीन्द्रियत्वादनुमानमेवेति तार्किकाः। अन्ये तु मीमांसकादयः प्रत्यक्षे सर्वत्र कालस्य प्रकारतया भानं नियतमिति कथयन्ति। अस्तु यथा तथा वा। प्रत्यक्षे प्रकृतकालसम्बन्धित्वग्रहणेऽपि प्रकृतकालमात्रसम्बन्धीति मात्रार्थः न प्रतीयते। एवं चावर्तमानत्वव्यावृत्तत्वेन वर्तमानस्य प्रत्यक्षाविषयतया न प्रत्यक्षेण पदार्थानां क्षणिकत्वं सिद्धयति। प्रत्यभिज्ञया तु वस्तुनः तत्काले पूर्वस्मिन् काले च सत्त्वं बोध्यते। प्रत्यक्षेण तु तत्कालासत्वाभावमात्रं बोध्यते। न तु कालान्त-रासत्वविशिष्टतत्कालसत्वमित्युभयोरपि विरोधाभावान्न प्रत्यभिज्ञाबाधः प्रत्यक्षेण सम्भवति।

ननु जातस्य हि ध्रुवो मृत्युरिति गीतावचनात् उत्पन्नानां पदार्थानां हेतुनैर-पेक्ष्येण विनाशसिद्धेः सर्वेषां पदार्थानां क्षणिकत्वमेव। तथा हि भावो विनाशी उत्पन्न-

त्वात्, विनाशः हेतुनिरपेक्षः ध्रुवभावित्वात्, जगत् क्षणिकं निरपेक्षनाशप्रतियोगित्वा-दित्यनुमानपरम्परया जगतः क्षणिकत्वमेष्टव्यम्। अत्र चोदाहरणं वस्तुस्वरूपम्। यथा वस्तुनः स्वरूपं वस्तुप्रयोजकातिरिक्तहेतुसापेक्षं न दृश्यते, तथैव विनाशस्याप्युत्पन्नत्व-मात्रेण विनैव हेतुनाऽवश्यंभावेन पदार्थानां प्रतिक्षणमुत्पत्तिःविनाशश्च भवतीति क्षणिकत्वं सिद्धमिति चेत्। नैतत्सारम्। विनाशः हेतुनिरपेक्षः, ध्रुवभावित्वादित्यनु-माने भावित्वशब्देन भविष्यत्वमुच्यते चेत्तदा व्यभिचारः, घटपटादिवस्तूनां व्यवस्थि-त्यर्थं युष्माभिरेव भविष्यत्कालीनघटाद्युत्तरक्षणं प्रति पूर्ववर्तिघटक्षणस्य कारणत्वा-ङ्गीकारात् तत्र पूर्वपूर्वक्षणहेतुकत्वेन हेतुनिरपेक्षत्वरूपसाध्याभावसत्वेन भविष्यत्व-रूपहेतोः स्थित्या च व्यभिचारः। एवं कस्यचिदङ्कुरस्य सामग्रीप्रवाहवशात् यत्र पत्रं पुष्पं वा भाविनि काले दृश्यते तत्र हेतुसापेक्षत्वस्यैव दृष्टत्वेन हेतुनिरपेक्षत्वरूप-साध्यस्य अभावसत्त्वेन भविष्यत्वरूपहेतोः दर्शनाच्च व्यभिचारः। एवमुत्तरक्षणस्य पूर्वक्षणः कारणमिति वौद्धमतमपि न सिद्धयति। भवत्पक्षे सर्वस्यैव क्षणिकत्वात्कार्यो-त्पत्तिकाले कारणस्यैव नष्टत्वात्। यदि कार्यपूर्ववृत्तित्वमेव कारणत्वं तर्ह्येको घटक्षणः स्वोत्तरकालभाविगोमहिषाश्वकुड्यपाषाणादिसर्वक्षणकारणं स्यात्। तदुत्तरक्षणेभ्यः सर्वेभ्यः पूर्ववर्तित्वस्य पूर्वक्षणसाधारणत्वात्। अथैतत्परिहाराय देशकालादीनामुपाधि-त्वमभ्युपगम्य तदुपाधिककार्ये तदुपाधिकपूर्वक्षणस्य प्रतिनियततया कारणत्वसंभवेन सर्वक्षणस्य न कारणत्वापत्तिः इति चेत्, भवत्पक्षे देशाद्युपाधेरपि क्षणिकत्वेन कार्यकार-णयोरेकदेशस्थत्वैकजात्याश्रयत्वादेर्दुर्वचत्वात्केवलोत्तरत्वमात्रं वक्तव्यमिति सर्वस्यैक एव क्षणः कारणं स्यात्। तस्मात्पदार्थानामव्यवस्थापत्या उत्तरक्षणस्य पूर्वक्षणः कारणमिति कार्यकारणभावो दुर्वचः।

अपि च विगीतं जगत् क्षणिकं मेयत्वात् यथा क्षणोपाधिः। वस्तुस्थैर्यवादिना-प्यखण्डकाले क्षणत्वाद्युपपादनमुपाधिमादायैव वक्तव्यम्। तत्र च क्षणाधिककालस्था-यिनो न क्षणोपाधित्वं सम्भवति। अतस्तस्योपाधेः क्षणिकत्वं, मितिविषय-त्वरूपमेयत्वं च अस्तीति क्षणोपाधिं दृष्टान्तीकृत्य जगतोऽपि मेयत्वेन क्षणिकत्वं यत्प्रतिपादितं तन्न शोभनम्। क्षणोपाधेरपि स्थिरत्वेन दृष्टान्तस्य साध्यविकलत्वात्। घटप्रागभावविशिष्टघटकारणकलापः एकः क्षणोपाधिः। अयं च हेतुसमुदायात्मकः सामग्रीपदवाच्यः। अतश्च एकविशिष्टापररूपा, अर्थात् मृद्विशिष्टचक्रविशिष्टदण्डविशि-ष्टकुलालः घटसामग्री। तत्र च ते सर्वे प्रत्येकं स्थिरा एव। समुदायोऽपि स्थिरः, तत्र क्षणोपाधित्वमस्ति। एकविशिष्टापररूपेण तद्ग्रहणे तस्य घटोत्पत्तिप्राक्क्षणमात्र एव सुवचत्वात् मेयत्वहेतुना क्षणिकत्वसाधनमयुक्तम्। वाधदृष्टान्तहानिरूपदोषयोस्सत्वात्।

अन्यच्च वौद्धैः—दीपनिर्वाणसमये अन्तिमदीपज्वालानन्तरं सर्वथा दीपानुप-लम्भात् दीपस्य निरन्वयविनाशोऽभ्युपगन्तव्यः। वेदान्तिभिरपि प्रतिक्षणं तैलवर्त्यंशादि-सामग्रीभेदेन भिन्नायां दीपज्वालायां एकदीपद्रव्यानतुवृत्तेरभ्युपगमात् तद्दृष्टान्तेन घटादेरपि निरन्वयविनाशसंभवेन क्षणिकत्वं सिद्धयतीति यदभिहितं तदपि न मनोरमम्।

घटादिनाशानन्तरं कपाल इत्यादि प्रतीतेर्दर्शनात् न तत्र निरन्वयविनाशः शक्यते वक्तुम्। घटादिनाशे सान्वयत्वेनैव दृढमनुभवात् तेनैव न्यायेन दीपादिनाशेऽपि तदनुमानात् दीपलयकालेऽपि दीपद्रव्यमस्त्येव। परन्तु जले क्षिप्तः लवणखण्डः यथा न दृश्यते तथा द्रष्टुमशक्यावस्थां प्राप्य दीपो वर्तत इति नात्र दीपदृष्टान्तेन घटादौ निरन्वयविनाशः, तत एव च प्रतिक्षणं भिन्नभिन्नघटः उत्पद्यत इति क्षणिकत्वोपपादनं च सुलभम्।

अथ चार्वाकः प्रत्यवतिष्ठते, कपालादिरूपावयवद्रव्यादवयविद्रव्योत्पत्तिर्भवतीति अवयवावयविनोः कार्यकारणभावः तार्किकस्य, पूर्वस्थितस्यैव कार्यस्याभिव्यक्तिर्भवतीत्यभिव्यक्तेरेव कार्यत्वमभिव्यञ्जकस्य कारणत्वमिति सांख्यस्य, प्रतिक्षणं द्रव्यभेदात् पूर्वमुत्तरस्य कारणमिति बौद्धस्य, अनुवृत्तस्यैव एकद्रव्यस्य भिन्नभिन्नपूर्वोत्तरावस्थामादाय कार्यकारणभाव इति रामानुजाचार्यस्येति पक्षचतुष्टयं प्रतिपादितम्। तत्र किमिदं कार्यत्वेनाभिमतं कार्यं कारकव्यापारात्पूर्वमस्ति न वा ?। पूर्वमस्ति चेद् गगनादिवन्नित्यत्वेन साध्यत्वाभावात् कार्यत्वमेव न स्यात्। पूर्वं नास्ति चेदसतस्सत्वापादनासंभवेन खपुष्पवदकार्यत्वमेव स्यात्। तस्मात् किंचित्कार्यं प्रति किंचित्कारणमिति व्यवहारः निष्प्रमाणः। अपि च यत्कारणमित्युच्यते तदपि कार्यसंवद्धं सत्कारणं, उत तदसंवद्धं सत् ? आद्ये कार्यमुत्तरकालीनं कारणं तु पूर्वकालीनम्। (अतः) उत्तरकालीनस्य पूर्वकालीनेन संबन्धस्याप्यसम्भवात् कार्यसंबद्धं सत् कारणं भवतीति वचनं व्याहतम्। द्वितीयमपि न घटते असंबद्धत्वाविशेषात् सर्वस्मात् सर्वोत्पत्तिः स्यात्। मृदः घट इव पटादिरपि उत्पद्येतेत्यतिप्रसङ्गः। अतः कार्यकारणभाव एव न सम्भवति इति।

अत्रेदमुत्तरमभिधीयते—यदि कार्यकारणभावः नाभ्युपगम्यते, तदा पुरुषस्य बुभुक्षाशान्त्यर्थं भोजनादौ प्रवृत्त्यभावप्रसङ्गः। प्रवर्तते तु पुरुषः। तस्माद्भोजनादेः बुभुक्षानिवृत्तिं प्रति कारणत्वदर्शनेन स्वक्रियादेर्विरोधात् अनुभवानुसारेण कार्यकारणभावः अवश्यमङ्गीकर्तव्यः। एवं भवद्भिरेवार्थकामयोरेव पुरुषार्थत्वेन तत्प्राप्त्यर्थमुपायानुष्ठानं क्रियत इति कथनात् अर्थकामयोः कार्यत्वस्य उपायानुष्ठानस्य कारणत्वस्य च सिद्धत्वात् कार्यकारणभावः नापलपितुं शक्यते। मृदः सहकारिकारणैस्साकं घटोत्पत्तावेव शक्ततया न तया पटोत्पत्त्यापत्तिरूपः अतिप्रसङ्गः उद्भावयितुं शक्यते। अतः कारणं कार्यसंबद्धं सत्कारणमिति द्वितीयपक्षे न काचिदनुपपत्तिः। एवं कण्टकादीनां तीक्ष्णता पुष्पाणां सौकुमार्यञ्च यथा विनैव निमित्तं स्वभावतः दृश्यते तद्वदेव सर्वत्र तत्तद्वस्तुस्वभावस्यैव नियामकत्वं, न त्वतिरिक्तं किंचित्कारणमिति वादोऽपि न युक्तः।

अथ कोऽयं स्वभावः यद्वस्तु यथा वर्तते तदेव तस्य स्वभावः। घटस्य कदाचिदेव दर्शनात् तस्य कादाचित्कत्वं स्वभावः। गगनस्य तु नित्यत्वं स्वभावः। तथैव दर्शनात्। अर्थाद्धेतुनैरपेक्ष्यमेव तदिति चेदत्रोच्यते—घटे कादाचित्कत्वस्य स्वभावत्वाभ्युपगमे नित्यपदार्थस्वभाववत् कादाचित्कत्वस्यापि हेतुनैरपेक्ष्येण सर्वदा सत्त्वापत्त्या कादाचित्कत्वव्याघातः। हेतुनैरपेक्ष्यस्यैव स्वभावशब्दार्थत्वात्। यदि घटादेः कादाचि-

त्कत्वं न स्वभावं इत्युच्येत तदा अतत्स्वभावः कथं कारणसहस्रेणापि तत्स्वभावत्वं भजेत्। अथैतद्दोषपरिहाराय स्वभावस्यापि हेतुमत्वोपगमे निर्हेतुकं किंचिदपि न स्यात्। तस्मात् स्वभावस्य नियामकत्वं स्वीकृत्य वस्तुव्यवस्थासंपादनस्य च सर्वथाऽशक्यत्वात्कार्यकारण-भावः सिद्ध्यतीति भावः।

इन्द्रियाणां भौतिकत्वनिरासः

अथ चक्षुरादीनां ज्ञानेन्द्रियाणां भौतिकत्वं सात्त्विकाहंकारिकत्वं वेति विचार्यते। नैयायिकास्तु दीपस्य रसाद्यग्राहकत्वे सति रूपग्राहकत्वम् यथा दृश्यते, तथैव चक्षुरिन्द्रियस्यापि रूपमात्रग्राहकत्वेन तैजसत्वम्। तत्र चानुमानं प्रमाणं तथाहि–चक्षु-रिन्द्रियं तैजसं रूपरसादिषु मध्ये रसाद्यग्राहकत्वे सति रूपस्यैव ग्राहकत्वात्, एवं रसने-न्द्रियस्य जलीयत्वं त्वगिन्द्रियस्य वायवीयत्वं, घ्राणेन्द्रियस्य पार्थिवत्वं, श्रोत्रेन्द्रियस्य नाभसत्वं सिद्ध्यति।

अत्रेदं विचार्यते—रूपग्राहकत्वमित्यस्य रूपज्ञानकरणत्वमित्यर्थः, तदा सपक्षभूते दीपे रूपज्ञानकरणत्वस्याभावेन सपक्षव्यावृत्तत्वाद्धेतोरसाधारण्यं स्यात्। विपक्षव्यावृत्तत्वं तु रूपज्ञानकरणत्वरूपहेतोः नितरां स्पष्टम्। अतोऽत्र रूपग्राहकत्वरूपहेतुना न चक्षु-रिन्द्रियस्य तैजसत्वं साधयितुं शक्यम्। साधकतमत्वस्यैव करणत्वशब्दार्थतया सन्निकर्ष-विशेषविशिष्टचक्षुरिन्द्रियस्यैव तादृशत्वेन दीपस्य चक्षुरिन्द्रियजन्यरूपज्ञाने सहकारि-कारणमात्रतया करणत्वाभावात् रूपग्राहकत्वलिङ्गानुमाने रूपज्ञानकरणत्वविवक्षायां असाधारणो दृष्टान्तहानिश्च स्यात्। यदि रूपज्ञानसहकारिकारणत्वमेव रूपग्राहकत्वं तदा स्वरूपासिद्धिः। चक्षुरिन्द्रियस्य प्रधानकारणतया रूपज्ञानं प्रति तस्य सहकारिकारण-त्वासम्भवात्। एकत्राभयविधकारणत्वानुपपत्तेः। भिन्नभिन्नेष्वेव सहकारिकारणत्वमुख्य-कारणत्वयोरनुभवात्। कथंचिन्मनुष्यादीनामन्धकारस्थले दीपस्य चक्षुरिन्द्रियस्य चोप-कारकत्वविषये समत्वदर्शनेऽपि उलूकादिजन्तुविशेषस्याऽऽलोकं विनाऽपि अन्धकारस्थले प्रत्यक्षदर्शनेन तत्र दीपस्योपयोगाभावेन उपकारकत्वमपि न घटते। अतश्च रूपज्ञान-करणत्वमेव वक्तव्यम्। तथासति दीपान्तर्भावेनासाधारणरूपसव्यभिचारदोषः अपरिहार्य एव स्यादिति नात्रानुमानैः चक्षुरादीनां भौतिकत्वं वक्तुं शक्यम्। किन्तु बह्वीभिः श्रुतिभिस्तथा उपबृंहणैश्च इन्द्रियाणां सात्त्विकाहङ्कारजन्यत्वस्य प्रतिपादितत्वात् आहं-कारिकमेवेन्द्रियमिति वेदान्तिनां निष्कर्षः।

कर्मेन्द्रियनिरूपणम्

अथ ज्ञानेन्द्रियवत् श्रुत्या हस्तादीनि पञ्च कर्मेन्द्रियाण्यपि सिद्ध्यन्ति। यथा रूपादिज्ञानकरणतया चक्षुरादिज्ञानेन्द्रियाणां सत्त्वमङ्गीक्रियते तथा गति–वचनदानादि-क्रियाकरणत्वेन वागादिकर्मेन्द्रियाणामपि स्थितिरभ्युपगन्तव्या। अविशेषात्। यदि प्रत्यक्षदृष्टं यद्धस्ताद्यधिष्ठानं तदेव गत्यादिक्रियायाः कारणं न त्वधिष्ठानातिरिक्तमप्रत्यक्षं

कर्मेन्द्रियमभ्युपगम्यत इति चेत् तदा ज्ञानेन्द्रियस्थलेऽपि तेनैव न्यायेन गोलकादेरेवेन्द्रियत्वसंभवेन किमिति तदतिरिक्तचक्षुरिन्द्रियं स्वीक्रियते। एवं चोभयत्राप्यन्यथासिद्धिशङ्कापरिहारौ समानौ। जीवस्य शरीरवृत्तित्वदशायां चक्षुरादिज्ञानेन्द्रियाणामिव हस्तादिकर्मेन्द्रियाणामपि जीवोपकारकत्वस्य तुल्यत्वात् "इन्द्रियाणि दशैकं मन" इति श्रुत्या एकादशेन्द्रियाणि ज्ञानकर्मसाधनतया सिद्ध्यन्ति। प्रपञ्चितश्चायमर्थः "सप्त गतेर्विशेषितत्वाच्च" 'हस्तादयस्तु स्थितेऽतो नैवम्' इति सूत्रार्थविचारावसरे भगवता भाष्यकारेण। 'मनष्षष्ठान्येवेन्द्रियाणी'ति गीतावचने तु एवकारेण न कर्मेन्द्रियव्यावृत्तिरभिधीयते। किन्तु ज्ञानेन्द्रियाणामनुगमपूर्वकमियत्ता प्रतिपाद्यत इति न विरोधः। सर्वेषामिन्द्रियाणां सात्त्विकाहङ्कारोपात्तत्वमेवानुगतं लक्षणम्।

मनस अन्तःकरणत्वादिवाचित्वप्रतिपादनम्

इन्द्रियेषु मनस एवान्तःकरणत्वं बुद्ध्यहङ्कारचित्तानां तु मनोवृत्तिविशेषत्वमेव। तच्च अन्तःकरणमिति रामानुजीयाः। अद्वैतिनस्तु मनोबुद्ध्यहङ्काराणां यथाऽन्तःकरणत्वं तथा चित्तस्याप्यन्तःकरणत्वं मन्यन्ते। तन्मतमधिकृत्य विचार्यते—

किमत्र श्रुत्या बुद्ध्यहङ्कारचित्तानामन्तःकरणत्वं, उत कल्पनया वा? नाद्यः, तथाऽनुपलम्भात्।

न द्वितीयः एकमेवान्तःकरणं इतरे बुद्ध्यादयस्तु तस्यैवावस्थाविशेषा इत्युच्येत तदानेन न्यायेन सर्वदेहव्यापितया बाह्येन्द्रियाणामपि ऐक्यं कुतो न स्यात्। एकस्यैव देहव्यापिन इन्द्रियस्य चक्षुःश्रोत्रपाणिपादादिप्रदेशभेदेन संसर्गवशात् विचित्रज्ञानक्रियाजननशक्तिमङ्गीकृत्य तयैव भिन्नकार्योपपत्तेः अनेकेन्द्रियवादो न घटत इति चेन्न। सर्वशरीरिसंबन्ध्यपि एकमेवेन्द्रियमिति कुतो न स्यात्। एकस्यैव देहभेदेन संसर्गवशात्प्रतिनियतशक्तिकल्पनासम्भवात्। अतो यथानुभवं यथाप्रमाणमेव सर्वमङ्गीकर्तव्यम्। "इन्द्रियाणि दशैकं मनश्चे'त्याद्यागमेन एकादशत्वाभिधानात् अनुभवबलाच्च एकादशैवेन्दियाणीति निष्कर्षः। एवं देहस्यैवेन्द्रियत्वमिति पक्षोऽपि देहस्य तामसाहङ्कारिकत्त्वेनेन्द्रियस्य सात्त्विकाहङ्कारिकत्वेन उपदानभेदश्रवणात्प्रत्युक्त इति ध्येयम्।

इन्द्रियपरिमाणविचारः

अथ इन्द्रियाणां विभुत्वमुताणुत्वं वेति विषये अणुत्वमेवेति विशिष्टाद्वैतिनः संगिरन्ते। अणुत्वं चात्र परिच्छिन्नत्वम्। चक्षुःश्रोत्रादीनामनेकेषामिन्द्रियाणां स्वस्वविषयसम्बन्धयौगपद्येऽपि क्रमेणैव ज्ञानोत्पत्तिः तादृशस्थले दृश्यते, न तु युगपत्। यदि मनसः विभुत्वं तर्हि युगपदेव सर्वविषयज्ञानापत्तिः। चक्षुरिन्द्रियवन्मनसोऽपि संबन्धस्य विद्यमानत्वात्। अतः अणुत्वमेव। तथासति क्रमेणैव मनसः संबन्धस्य वक्तव्यतया धीक्रमो युज्यत इति। एवं "प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति श्रुत्या इन्द्रियाणां देहात् निष्क्रमणमभिधीयते। तच्च विभुत्वपक्षेऽनुपपन्नम्। अत्र प्राणशब्दः इन्द्रियवाची।

ननु देहे स्थितस्य चक्षुरिन्द्रियस्य परिच्छिन्नत्वे दूरतरविषयप्रत्यक्षं न स्यात् । विषयस्यासन्निकृष्टत्वादिति चेन्न । वृत्तिद्वारा विषयसंबन्धसम्भवेनानुपपत्त्यभावात् । न चैवमपि "त एते सर्व एव समाः सर्वे अनन्ता" इति श्रुत्या अनन्तत्वरूपविभुत्वश्रवणात् कथमिन्द्रियाणां परिच्छिन्नत्वमिति वाच्यम् । इन्द्रियकार्याणामसंख्येयतया अनन्ता इत्युक्तम् । न त्विन्द्रियस्य विभुत्वाभिप्रायेण । तथा चोक्तं श्रीभाष्ये- "आनन्त्यश्रुतिस्तु उपास्यप्राणविशेषणकार्यबाहुल्याभिप्राया" इति । अतो न कश्चिद्विरोधः ।

यदुक्तमिन्द्रियस्य वृत्तिद्वारा वाह्यार्थसंबन्धः [दूरतरार्थसंबन्धः] संभवतीति । तदपि न युज्यते । जलेऽपि वस्तुनः प्रत्यक्षमनुभूयते । तत्र जलस्य वृत्तिनिरोधकत्वेन तदसंभवापत्तेः । तस्मात् विमतं चक्षुरादीन्द्रियं प्राप्यग्राहीन्द्रियत्वादितरवदित्यनुमानेन साक्षात्संबन्धे सत्येव इन्द्रियाणां प्रत्यक्षजनकत्वं सम्भवति इति पूर्वपक्षिणामाशयः । जलस्य स्वच्छद्रव्यत्वेन वृत्तिरोधकत्वाभावेन विरलपटन्यायेन वृत्तेः प्रवेशसंभवेन तद्द्वारा चक्षुरिन्द्रियेण प्रत्यक्षमुत्पद्यत एवेति न काचिदनुपपत्तिः ।

शब्दग्रहणविषये मतभेदः

इन्द्रियाणां प्राप्यग्राहित्वं पूर्वमुपापादि । तत्र शब्दग्रहणविषये मतभेदः प्रदर्श्यते । इन्द्रियाणां प्राप्यग्राहित्वेऽपि श्रोत्रेन्द्रियं स्ववृत्तिद्वारा दूरदेशस्थमन्तिकदेशस्थं च शब्दं गृह्णाति-शब्ददेशं गत्वा । अत एवास्या दिशः अमुकशब्द आगच्छतीति दिग्भेदग्रहणं, तथा आसन्नत्वानासन्नत्वादिज्ञानं च भवतीति सांख्याः कथयन्ति । न चास्मिन् पक्षे दूरासन्नदेशोत्पन्नशब्देषु विशदाविशदबुद्ध्यनुपपत्तिः । श्रोत्रगतेरविशेषादिति वाच्यम् । चक्षुर्वृत्तिनयवत् श्रोत्रवृत्तेरप्यासत्तितारतम्यानुरोधेन शब्दे विशदाविशदावभासोपपत्तेः ।

अन्ये तु श्रोत्रेन्द्रियदेशायातस्यैव शब्दस्य ग्रहणं, न तु शब्ददेशं प्रति गतेन श्रोत्रेन्द्रियेणेति कथयन्ति । तेषामयमाशयः—दूरस्थो जनः ताड्यमानभेर्याः दशकोणाभिघातात्पश्चाच्छब्दं शृणोति । वादकाः भेर्यासन्नपुरुषाश्च अविलम्बितमेव शब्दं शृण्वन्ति । एवमनुवातप्रतिवातयोरतिदूरानतिदूरं च शब्दो गृह्यते, बहिरन्तर्गृहगतानां च स्फुटास्फुटघोषश्च दृश्यते । तस्मात् श्रोत्रप्रदेशायातस्य भूतधर्मस्य शब्दस्यैव ग्रहणमिति । शब्दस्य च वाय्वादिरूपाश्रयद्वारैव गतिमत्त्वम् । उक्तं च श्रीयामुनाचार्यैः आत्मसिद्धौ "शब्दगन्धसूर्यालोकरत्नप्रभादयो धर्म्यतिवर्तिनो गतिमन्तश्चे"ति । अयं पक्षः विशिष्टाद्वैत्येकदेशिनां पक्ष इत्यवधातव्यः । इत्थमत्र सात्विकाहङ्कारजन्यस्येन्द्रियस्य विचारः उपन्यस्तः ।

आकाशस्य प्रत्यक्षत्वसाधनम्

अथ तामसाहङ्कारजन्यभूतचिन्ता प्रस्तूयते । तत्र सृष्टिक्रमे आकाशस्य प्राथमिकत्वात् तदधिकृत्य आदौ विमृश्यते ।

नैयायिकाः आकाशो न प्रत्यक्षः किन्तु अनुमेय एवेति संगिरन्ते। तदेतन्न संगच्छत इति प्रतिपाद्यते। किमाकाशे प्रत्यक्षप्रतीतेः भ्रमत्वादनुमेयत्वमुच्यते ? आहोस्वित् प्रत्यक्षकारणस्य रूपस्यासत्वाद्वा ? नाद्यः, नीलं नभ इत्यबाधितचाक्षुषप्रतीतेस्सत्वात्। न चेयं भ्रान्तिः, तलत्वादिवदारोपितस्य नीलत्वस्यैव प्रतीतेरिति वाच्यम्। किमसावारोपः चाक्षुषः उताचाक्षुषः। आद्ये अधिष्ठानस्याकाशस्य चाक्षुषत्वमन्तरा अधिष्ठितस्य नीलत्वादेश्चाक्षुषत्वानुपपत्तेः। यद्यत्र अधिष्ठानचाक्षुषत्वमन्तराऽपि आरोपितस्य धर्मस्य चाक्षुषत्वमिष्यते तदा वाय्वादावपि रूपवत्ताबुद्धिप्रसङ्गः। भवत्पक्षे वायोरप्रत्यक्षत्वस्वीकारात्।

किञ्च नेदं रजतमितिवत् न नीलं नभ इति बाधितप्रतीतेरभावान्नात्र भ्रान्तित्वं युज्यते। एवमिह खगः पततीति प्रतीतौ इहेत्यनेनाधिकरणतया आकाशस्यैव प्रतीतेस्तस्य प्रत्यक्षत्वम्। न चात्र आतपादेरेव विषयत्वमिति वाच्यम्। खगादिवदेव आतपादेरप्याधेयतया तस्य इहेत्यनेनाधिकरणतया बोधयितुमशक्यत्वात् न चासावाकाश आतपादिपदवाच्यः। तथा कुत्राप्यननुभवात्। प्रत्युत इह व्योम्नि खगः, आतपः, तमः, मेघः, वायुरित्येवं सर्वेषामेव पदार्थानामाकाशाधिकरणकतयैवानुभवदर्शनाच्चाकाशस्यास्मदादिप्रत्यक्षविषयत्वं निराबाधम्।

अथ द्वितीयः रूपाभावप्रयुक्तः प्रत्यक्षत्वाभाव इति पक्षो निरस्यते। नीलं नभ इति प्रतीतेरापरोक्ष्यात् प्रत्यक्षत्वमवश्यमेष्टव्यम्। यथादर्शनमेव पदार्थानां व्यवस्थास्वीकारात्। अन्यथा रूपस्याप्यप्रत्यक्षत्वापत्तिः ! रूपे रूपाभावात्। एवं च प्रत्यक्षसामान्ये रूपं कारणमिति कार्यकारणभावस्य निर्बीजत्वात्। अथ रूपप्रत्यक्षे व्यभिचारवारणाय चाक्षुषद्रव्यप्रत्यक्ष एव रूपस्य कारणत्वमुच्यते तदा तेनैव न्यायेनास्माभिः प्रत्यक्षयोग्यताया एव वस्तुनि प्रत्यक्षत्वनियामकत्वमुपगम्य रूपवत् रूपिद्रव्यसंसर्गस्यापि प्रत्यक्षे कारणत्वस्य सुवचत्वेन प्रकृते आकाशे पंचीकरणप्रक्रियया रूपिद्रव्यपार्थिवादेः संसर्गस्याक्षुण्णतया प्रत्यक्षत्वं सुलभमिति न किंचिदेतत्। अतश्च परम्परया आकाशेऽपि नीलरूपसत्वात् द्रव्यप्रत्यक्षे रूपस्य नियमेन कारणत्वपक्षेऽपि न काचिदनुपपत्तिः।

आकाशस्यानुमेयत्वनिरासः

अथ निष्क्रमणादिहेतुना आकाशोऽनुमीयत इति सांख्यपक्षं तथा परिशेषानुमानेन आकाशस्य सिद्धिं वदतां कणादानां पक्षं चानूद्य निरस्यते। तथाहि—पृथिव्यादिचतुष्टयस्य शब्दाश्रयत्वं न संभवति मूर्तत्वात्, मनोवदित्यनुमानेन शब्दाश्रयतया पृथिव्यादिचतुष्टयव्यावृत्तिः। एवं शब्दः न दिक्कालमनसां गुणः विशेषगुणत्वादित्यनुमानेन, रूपादिविशेषगुणाश्रयत्वं यथा कालादीनां न सम्भवति तथा शब्दाश्रयत्वमपि न युज्यत इति त्रयाणां दिक्कालमनसां शब्दाश्रयत्वानुपपत्तिः। तथा शब्दः आत्मगुणो न

भवति बाह्येन्द्रियग्राह्यत्वात् रूपादिवदित्यनुमानेनात्मव्यावृत्तिः। तस्मात्परिशेषात् शब्दः किञ्चिदाश्रितः गुणत्वादित्यनुमानेन पृथिव्याद्यष्टद्रव्यातिरिक्तस्य आकाशस्य शब्दाश्रयत्वेन सिद्धिर्वाच्येत्युपदर्शितरीत्या परिशेषानुमानेन आकाशोऽनुमेय एव न तु चाक्षुषप्रत्यक्षविषय इति काणादाः।

अयं च निर्वाहो न समीचीनः। उक्तानुमानेषु विपक्षे बाधकतर्काभावात् नात्र परिशेषानुमानेनाकाशस्सिद्ध्यति। यतो हि मूर्तत्वरूपहेतुरस्तु शब्दाश्रयत्वाभावरूपसाध्यो मास्त्वित्यप्रयोजकत्वशङ्कायां युष्माभिः पृथिव्यादेः शब्दाश्रयत्वेनोपलम्भापत्तिरिति बाधकतर्क उद्भावनीयः। स च न संगच्छते। पञ्चीकरणप्रक्रियया समेषु भूतेषु सर्वस्यापि भूतस्यांशतो वृत्तित्वाभ्युपगमात् शब्दाश्रयत्वेनोभयसंप्रतिपन्ने आकाशेऽपि अस्माभिः पृथिव्याद्यंशस्य स्वीकारात् शब्दस्य पृथिव्याद्याश्रितत्वाभ्युपगमे बाधकाभावात्। प्रत्युत भवद्भिरुक्तरीत्यैव स्पर्शः न पृथिव्यादिधर्मः नीरूपेन्द्रियग्राह्यत्वात् इत्यनुमानेन पृथिव्याद्यतिरिक्तस्य स्पर्शाधारत्वकल्पनापत्तिः। अयमाशयः—नैयायिकैः स्पर्शग्राहकस्य त्वगिन्द्रियस्य वायवीयत्वाङ्गीकारात् वायोश्च नीरूपत्वेन विलक्षणत्वात् स्पर्शस्य नीरूपत्वगिन्द्रियग्राह्यत्वेन तदाश्रयत्वेन पृथिव्यादिविलक्षणस्य (वायुमात्रस्य) स्वीकारापत्तिः। न चेष्टापत्तिः स्पर्शस्य पृथिव्यादिचतुष्टयवृत्तित्वस्य भवताऽप्यभ्युपगमात्। एवं शब्दस्य बाह्येन्द्रियग्राह्यगुणत्वेन आकाशरूपविभुगुणत्वमपि न संभवति रूपादिवत्। रूपादीनां बाह्येन्द्रियग्राह्यत्वेन दृष्टानां अविभुगुणत्वेन दर्शनात्। ततश्च शब्दः न विभुगुणः बाह्येन्द्रियग्राह्यगुणत्वादिति विपरीतानुमानस्यापि सुवचत्वात् न त्वदुक्तानुमानेनाकाशसिद्धिः, किन्तु प्रत्यक्षेणैव।

अथ पुरुषस्य गृहादन्यस्माद्वा निष्क्रमणं प्रवेशनमित्यादिकमनुभूयते। तच्चाकाशसत्त्व एवोपपद्यते न त्वन्यथा। अतश्च निष्क्रमणादिलिङ्गेनाकाशः अनुमीयत इति वदतां मतमनूद्य निरस्यते। यद्यत्र निष्क्रमणादिना आकाशः स्वीक्रियेत तदा यत्राकाशः तत्र सर्वत्र निष्क्रमणादिकमिति वक्तव्यम्। तत्तु न सिद्ध्यति। आकाशव्याप्ते कुड्यादौ निष्क्रमणादेरशक्यत्वात्। न च कुड्यादिषु आकाशस्य सत्त्वेऽपि कुड्यस्य निष्क्रमणादिकं प्रति प्रतिबन्धकत्वात् न निष्क्रमणादिकार्यमिति वाच्यम्। तर्हि कुड्याभावात्मकप्रतिबन्धकाभावरूपकारणवशादेव निष्क्रमणादेरन्यथासिद्धत्वेन आकाशकल्पनाया अनावश्यकत्वात्तादृशहेतुना नभसः अनुमेयत्वं न युक्तम्। अपि चाकाशस्य विभुत्वेन कुड्यादावपि तत्सत्त्वमवर्जनीयम्। कुड्यादावाकाशानभ्युपगमे आकाशस्य सच्छिद्रत्वापत्तिः। सच्छिद्रत्वापत्त्या सावयवत्वापत्तिः। सावयवत्वापत्त्या अनित्यत्वापत्तिश्चेति दोषप्रसङ्गोऽपि दुष्परिहरः।

यश्चाकाश अवकाशप्रद इति लौकिकवैदिकव्यवहारः, स च पृथिव्यादिभूतचतुष्टयं प्रतिघातकत्वेनावकाशप्रदं यथा न भवति न तथाऽऽकाशः, किन्तु प्राणिसञ्चारादिप्रतिघातकत्वाभावेनोपकारकतयाऽवकाशप्रद इति रीत्या उपपादनीयः। न तावता आकाशेन देयं अवकाशाख्यं द्रव्यान्तरमस्तीति भावः।

आवरणाभाव आकाश इत्याशङ्का तन्निरासश्च

अथ आवरणाभाव एवाकाशः, न तु पृथिव्यादिभूतचतुष्टयादतिरिक्तः पदार्थोऽस्तीति वदतां चार्वाकानां मतमपनुद्यते। नञ्-सत्वे एव अभावप्रतीतेरानुभाविकतया प्रकृते आकाश-आकाश इत्येवं नञुपश्लेषं विना नभसस्सद्रूपेणैव भानान्नात्र आवरणाभावस्याकाशपदवाच्यत्वम्। किं चावरणाभावशब्देनावरणात्यन्ताभावः ? उत आवरणप्रागभावप्रध्वंसाभावौ ? आहोस्विदावरणान्योन्याभावो वा विवक्षितः ? नाद्यः अश्वे गोत्वस्य, शशे शृङ्गस्य त्रैकालिकस्याभावस्यैवात्यन्ताभावत्वेन कदाचिदावरणे सत्वे तत्र तादृशस्यासम्भवात्। न द्वितीयः आवरणेषु विद्यमानेषु आवरणप्रध्वंसस्य, आवरणप्रागभावस्य वा वक्तुमशक्यत्वात् नात्रावरणप्रध्वंसाभावरूपत्वं, आवरणप्रागभावत्वं वा नभसो युज्यते। यद्यत्र स्थलान्तरे उत्पद्य वर्तमाने आवरणे स्थलान्तरीयावरणप्रध्वंसप्रागभावयोर्नासम्भव इत्युच्येत तदा तादृशस्थलान्तरीयावरणप्रध्वंसप्रागभावयोस्तत्र स्वप्रतियोग्यावरणस्थले वक्तुमयोग्यत्वादावरणसामान्यप्रागभावः प्रध्वंसाभावश्च न सम्भवति। यत्किञ्चिदावरणध्वंसप्रागभावयोस्तु सुतरामसम्भवः। यत्किंचिदावरणे स्थिते तत्र तद्व्यक्त्यावरणध्वंसप्रागभावयोरप्रामाणिकत्वादिति भावः।

आवरणान्योन्याभावात्मकस्स इति पक्षोऽपि न संगच्छते। किमस्मिन्नावरणे स्वस्मिन् स्वतादात्म्यं निषिध्यते ? उतानावरणे आवरणतादात्म्यं वा ? आद्ये स्वस्मिन् स्वतादात्म्यस्यैव सर्वत्रानुभवात्तस्य निषेधे अनुभवविरोधो दोषः। द्वितीये आवणान्यद्रव्यस्यैव भावात्मकस्यास्माभिरप्याकाशपदवाच्यत्वाभ्युपगमान्न भवदभिमतस्य आवरणाभावस्याकाशरूपत्वमिति नानिष्टं किंचित्। किञ्चावरणतादात्म्याभावस्य आवरणान्यत्वं बुद्ध्वा न कश्चित् नभःपर्यायान् प्रयुङ्क्ते। तस्मान्नात्रावरणाभावस्य आकाशत्वं, किन्तु आवरणाभावातिरिक्तो भावात्मक एवाकाशः।

आकाशस्य नित्यत्व-विभुत्वनिरासः

अथाकाशो नित्यो विभुश्च निरवयवद्रव्यत्वादित्याद्यनुमानेनाकाशस्य नित्यत्वादिकं साधितं तार्किकैः। अयमाशयः—पृथिव्यादेस्सावयवद्रव्यत्वादनित्यत्वं, आकाशस्य तु तथाऽभावान्नित्यत्वमिति। तदिदमशोभनम्। "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुतिभिः आकाशस्योत्पत्तेः प्रतिपादितत्वान्नात्र श्रुतिविरुद्धानुमानेन नित्यत्वं सिद्ध्यति। प्रमाणेषु श्रुतेः प्रबलत्वात्। तस्मादाकाशः अनित्यः अविभुश्चेति विशिष्टाद्वैतिनामभिप्रायः।

दिश आकाशान्तर्भावः

अथ दिशः व्योमातिरिक्तत्वाभावे (व्योमस्वरूपत्वे) अनुपपत्तिपरिहारपूर्वकं श्रुत्यविरोधप्रदर्शनपूर्वकं च आकाशभिन्नतत्त्वाभावत्वं साध्यते। तथा हि—इयं प्राची-

त्यादिव्यवहारहेतुत्वेन दिक्तत्त्वं नैयायिकैरङ्गीक्रियते। अयं पक्षः न समञ्जसः। प्राक्त्वं च सूर्योदयगिरिसंयुक्तसंयोगपरम्पराविशेषवत्वम्। संयुक्तसंयोगपरम्परा नाम संप्रति प्राक्त्वेन व्यवह्रियमाणस्येदंपदार्थस्य उदयगिरेश्च मध्ये यावन्ति द्रव्याणि पङ्क्तिरूपेण निविष्टानि तावद्वस्तुमिथस्संयोगकूटम्। तस्य कूटस्य इदंपदार्थेऽस्मिन् साक्षादसम्भवात् तावत्संयोगावच्छिन्नदिक्प्रदेशसंयुक्तत्वमेव वक्तव्यम्। एवं च दिक् तादृशसंयोगकूटस्य प्रकृतेदंपदार्थे उपनायिका भवतीति तदुपनायकतया दिक् सिद्धयतीति खलु भवतामभिप्रायः। तच्चान्यथैवोपपद्यते। दिश इवाकाशस्यैव तादृशसंयोग-कूटोपनायकत्वसम्भवान्नातिरिक्तदिक्तत्त्वसिद्धिः। अयमाशयः सूर्योदयकालीनातपः यस्मिन्नाकाशे दृश्यते तत्र प्रागिति व्यवहारः। एवं सूर्यास्तमयकालीनातपः यस्मि-न्नाकाशे दृश्यते तत्र प्रतीचीति व्यवहार इत्यादिरीत्या आकाशस्यैव तत्तदुपाधियोगात् प्रागादिभेदकत्वसंभवेन न तदतिरिक्ता दिक् सिद्धयति। न चाकाशस्य दिक्त्वे उभयोः पर्यायता स्यादिति वाच्यम्। उपाधिविशिष्टस्याकाशस्य दिक्शब्दार्थत्वेन अनुपहिता-काशस्य व्योमशब्दार्थत्वेन च तयोर्भेदादपर्यायत्वोपपत्तेः। इत्थं च धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायेन दिग्रूपधर्मिकल्पनापेक्षया क्लृप्ताकाशरूपधर्मिण्येव तादृशसंयोगो-पनायकत्वस्य (धर्मस्य) कल्पने लाघवात् दिशः आकाशानन्यत्वम्।

नन्वेवं क्लृप्तस्य वियतः उपनायकत्वकल्पने अतिप्रसङ्गः। तथा हि यदि आकाशो मिथस्संयुक्तवस्तुगतसंयोगकूटं तत्तद्वस्तुसंयुक्तस्वसंयुक्तत्वसंबन्धेन प्राक्-प्रत्यगादिवस्तुनि उपनयेत्, तदा देशान्तरस्थं जपाकुसुममपि तत्संयुक्तस्वसंयुक्तत्व-संसर्गेणान्यदेशीयस्फटिके उपनयेत्। तथासति देशान्तरवृत्तिस्फटिकेऽपि लोहित-प्रतीतिर्भवेदित्यतिप्रसङ्गस्स्यात्। अत आकाशस्योपनायकत्वानुपपत्तिरिति चेन्न। सर्वत्र कारणशक्तिः कार्यानुसारेणैव यथानुभवं कल्प्यते। एवं चोपनायकद्रव्यमुखेनान्यदीय-धर्मस्य अन्यत्र कार्यकरत्वं यत्र-यत्र दृष्टं तत्र-तत्र तदुपनायकत्वशक्तिरस्तीत्यभ्युपग म्यते। अन्यथा व्योमातिरिक्तदिग्तत्त्वाभ्युपगमेऽपि उपदर्शितातिप्रसङ्गस्य दुर्वारत्वात्। विदेशीयस्फटिके स्थलान्तरीयजपाकुसुमप्रयुक्तलौहित्यानुभवान्न तत्रातिप्रसङ्गः। अत एव तत्र जपाकुसुमे विदेशस्थस्फटिके लौहित्याधायकशक्तिर्नाङ्गीक्रियते। इत्थं च नभसः उपाधियोगात् दिग्रूपत्वस्वीकारे न काचिदनुपपत्तिः।

एवं "रूपान्तरं तत् द्विज कालसंज्ञ" मित्यादिना कालस्य पृथक्तत्त्वोपदेशवदागमे तत्त्वसृष्टिप्रकरणे दिशः पृथक् पाठादर्शनादपि नभसोऽनन्यत्वं सिद्धयति। न च पुरुषसूक्ते "पद्भ्यां भूमिर्दिशः श्रोत्रादि"ति मन्त्रेण भगवतश्श्रोत्राद्दिशः उद्भवस्य तथा व्याकरणे "दिग्देशकालेष्वस्ताति:" इति सूत्रे देशकालव्यतिरिक्तदिङ्निर्देशस्य दिशः श्रोत्रमित्यनेन दिशः श्रोत्रे लयस्य च दर्शनात् दिशो नभोरूपत्वं न संभवतीति वाच्यम्। पुरुषसूक्ते दिगुणाधीनां दिगधिष्ठानदेवतानां वा भगवतः श्रोत्रादुत्पत्तिः प्रतिपाद्यते न त्वतिरिक्तदिशः। श्रोत्रस्येन्द्रियत्वेन अष्टौ प्रकृतयः षोडशविकारा इत्यनेन

तस्य विकृतावेवान्तर्भावकथनेन उपादानत्वासंभवेन उपदर्शितश्रुतीनां सृष्टिविषये लयविषये वा ऐदम्पर्याभावात्। अन्यथा "नाभ्या आसीदन्तरिक्ष"मिति श्रवणादन्तरिक्षलोकादेरपि तत्त्वान्तरत्वापत्तिः। अतश्च पुरुषसूक्ते ब्राह्मण-क्षत्रिय-चन्द्र-सूर्यादिव्यष्टि-सृष्टिप्रकरणे अन्तरिक्षस्वर्गादिकल्पनाश्रवणात् दिक्सृष्टेरपि व्यष्टिविषयकत्वेन दिशः न तत्त्वान्तरत्वं वक्तुं शक्यत इति भावः। एवं व्याकरणस्यापि दिशः स्वरूपनिष्कर्षे न तात्पर्यम्। किन्तु आगमादिप्रमाणसिद्धदिक्तत्त्वानुसारेण कार्यविशेषणविधान एव तात्पर्यान्न तेन अतिरिक्तदिक्तत्त्वसिद्धिरिति।

वायुनिरूपणम्

अथ वायुः निरूप्यते—नैयायिकास्तावत् योऽयं रूपवद्द्रव्यासमवेतस्पर्शः स क्वचिदाश्रितः स्पर्शत्वात्, पृथिवीसमवेतस्पर्शवदित्यनुमानेन वायोः सिद्धिं प्रतिपादयन्ति। अत्रायं घट इत्यादिप्रत्यक्षधीवत् त्वगिन्द्रियपवनसंयोगे सति सावधानस्य पुरुषस्य वातो वातीति प्रत्यक्षबुद्धेरानुभाविकतया वायुः प्रत्यक्ष एव न त्वनुमेय इति विशिष्टाद्वैतिनः। अयमाशयः यदि वायुरप्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यनुमानेन वायोरनुमेयत्वं ब्रूयात् तदा—प्रत्यक्षस्पर्शाश्रयत्वरूपहेतोः पृथिव्यादिभूतेष्वपि विद्यमानतया अन्धस्य निमीलितचक्षुषो वा पुरुषस्य तादृशहेतुना घटादीनामपि अनुमित्यैव भानापत्तिः। यतो हि अन्धादीनां पृथिव्यादिभूतेषु त्वगिन्द्रियेण या स्पर्शधीर्भवति तस्याः स्पर्शमात्रविषयकत्वात्। एवं चान्धस्य पृथिव्यादिविषयकत्वगिन्द्रियजन्यप्रत्यक्षानुपपत्तिः। तत्राप्यन्धस्य त्वाचप्रत्यक्षत्वमिष्टमेवेति नात्रेष्टापत्तिः कर्तुं शक्यते। न च बाह्येन्द्रियजन्यज्ञानमात्रे रूपापेक्षणात् वायोश्च नीरूपत्वेन प्रत्यक्षत्वानुपपत्तिरिति वाच्यम्। रूपस्य स्पर्शस्य च नीरूपत्वेन तयोः यथायथं प्रत्यक्षत्वानुपपत्तेः। तस्मात् चाक्षुषद्रव्यप्रत्यक्षे एव रूपस्य कारणत्वं, न तु त्वगिन्द्रियजन्यप्रत्यक्ष इत्यङ्गीकार्यम्। यद्यत्र चक्षुरिन्द्रियग्राह्यरूपात्मकगुणविरहात् वायोरप्रत्यक्षत्वमुच्यते तदा रसनेन्द्रियघ्राणेन्द्रियाभ्यां ग्राह्ययोर्गन्धरसयोः अनले तेजसि असत्वात् तस्यापि दर्शनस्पर्शनाभ्यां प्रत्यक्षत्वानुपपत्तिः। अतोऽत्र इन्द्रियान्तरग्राह्यविशेषगुणविरहः नेन्द्रियान्तरवेद्यत्वविरोधीति वायौ चक्षुरिन्द्रियग्राह्यरूपाभावेऽपि त्वगिन्द्रियग्राह्यस्पर्शस्य सत्वेन तस्य त्वाच-प्रत्यक्षविषयत्वं निराबाधमिति निष्कर्षः।

नन्वेवं वायोः प्रत्यक्षत्वे तन्निष्ठसंख्यापरिमाणादीनामपि स्पार्शनप्रत्यक्षत्वापत्तिः। तेषामध्यक्षयोग्यतायाः द्रव्योपलम्भप्रतिनियतत्वात्। संख्यादिप्रत्यक्षं प्रति योग्यतदाश्रयसन्निकर्षस्यैव कारणत्वादिति वायोः न प्रत्यक्षत्वमिति चेन्न। एका वह्निशिखा, एका वारिधारेत्यादिवदेकोऽयं वायुरिति व्यवहारात् वायुगतसंख्यादीनामप्यंशतः प्रत्यक्षत्वमिष्यत एवेति न विरोधः।

वस्तुतस्तु आश्रयद्रव्यप्रत्यक्षे सति तन्निष्ठसंख्यापरिमाणादीनामपि प्रत्यक्षत्वं भाव्यमिति नियमो न संगच्छते। यतो हि मानसप्रत्यक्षवेद्ये आत्मनि तेषामप्रत्यक्षत्वात्

व्यभिचारापत्तेः। यद्यपि आत्मनि अहमेक इति संख्याधीः वर्तते। तथापि तत्परिमाणं न गृह्यते। अत एवाणुत्वविभुत्वदेहपरिमाणत्वसन्देहो भवति। अथ यदि आत्मव्यतिरिक्ते वाह्येन्द्रियजन्यद्रव्यप्रत्यक्ष एवेयं व्याप्तिः स्वीक्रियत इत्युच्यते तदा आत्मवायूभयभिन्न एवेयं व्याप्तिरित्येवंरीत्यापि संकोचस्य कर्तुं शक्यतया न वायोः तद्गतानां संख्यादीनामप्रत्यक्षत्वेनाप्रत्यक्षत्वं वक्तुं युज्यते। तस्माद्वायोः प्रत्यक्षत्वमेवेति निगूढाभिसन्धिः।

प्राणो वायुविशेष एव, न क्रियाविशेषः, नवेन्द्रियम्

अथ वायुविशेषः प्राणो वा? उत वायुसामान्यं प्राणपदवाच्यं? आहोस्वित् वायोरुत्पन्नत्वात् प्राणस्य "वायोरग्निः" इति श्रुत्या तेजसः तत्त्वान्तरत्वत् तत्त्वान्तरत्वं वेति सन्देहे सयुक्तिकं प्राणस्य वायुविशेषरूपत्वमभिधीयते। तथाहि—एतस्माज्जायते प्राणः खं वायुरिति श्रुतौ प्राणेन सह वायोः पृथक्पाठदर्शनान्नात्र प्राणस्य वायुसामान्यरूपत्वं युज्यते। तथात्वे वायुप्राणयोरैक्येन पृथक्पाठायोगात्। नापि तेजोवत् तत्त्वान्तरत्वम्। तत्त्वसृष्टिप्रकरणे पृथक् तत्त्वतयाऽगणनात्, वायुत्वानपायाच्च। यद्यत्र वायुभिन्नतत्त्वान्तरत्वमुच्यते तदा प्राणस्य वायुविशेषत्वेनोपलम्भानुपपत्तिः। तस्मात् यथा घनीभूतजलाभिन्नकरकायाः जलत्वेन प्रत्यभिज्ञानात् जलविशेषरूपत्वं तथैव प्राणस्यापि वायुविशेषत्वेन प्रत्यभिज्ञानात् प्राणापाननागकूर्मादिदशविधवृत्तिभेदैः शरीरेऽनेककार्योपकारकः "यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः", "अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः", प्राणापानसमायुक्त इत्यादि श्रुतिस्मृतिसिद्धः वायुविशेष एव प्राणपदवाच्यः। न च स्तिमितवायौ प्राणशब्दप्रयोगाभावात् उच्छ्वासादौ प्रयोगाच्च वायोः क्रियाविशेष एव प्राण इति वाच्यम्। प्राणनापाननाद्यवस्थाश्रयत्व-शरीरसंयोगप्रवेश-निष्क्रमणरूपावस्थाश्रयत्वादिलक्षणद्रव्यत्वश्रवणात् क्रियाविशेषत्वानुपपत्तेः। तस्माद्वायुविशेष एव प्राण इति निष्कर्षः।

ननु "सप्त इमे लोका येषु चरन्ति प्राणाः", "सप्त वै शीर्षण्याः प्राणाः" इत्यादिश्रुतिषु प्राणस्य इन्द्रियैस्सहपाठात् इन्द्रियवदेव प्राणस्यापि जीवोपकरणत्वदर्शनाच्च चक्षुरादिवत् प्राणस्यापि इन्द्रियत्वं स्यादिति चेन्न। जीवोपकरणत्वस्य देहेऽपि दर्शनात् तस्य चेन्द्रियत्व-व्यवहाराभावेन नात्र प्राणस्य जीवोपकरणत्वमात्रेण इन्द्रियत्वं वक्तुं शक्यते। जीवोपकरणत्वस्येन्द्रियलक्षणत्वं न संगच्छते। देहेऽतिव्याप्तेरिति भावः।

किं च गोशब्दादेः भू-किरणेन्द्रियप्राणिविशेषादिरूपानेकार्थवाचकत्वेऽपि यथा एकस्मिन्नर्थ एव मुख्यत्वमर्थान्तरे चामुख्यत्वं तथैव प्रकृते प्राणशब्दस्येन्द्रियादिष्वमुख्यः प्रयोगः वायुविशेषे तु मुख्यप्रयोग इति रीत्या निर्वोढुं शक्यत्वेन अनेकार्थेषु शब्दैक्यस्याप्रयोजकत्वात्। एवं सात्त्विकाहङ्कारजन्यत्वरूपेन्द्रियलक्षणस्य प्राणेऽभावादपि न तस्येन्द्रियत्वम्। तस्मात् प्राणो वायुविशेष एवेति विशिष्टाद्वैतवेदान्तिनां परमाभिप्रायः।

तेजस्स्वरूपविमर्शः

तेजसः स्वरूपमधिकृत्य विचार्यते। तत्रादौ तेजोविशेषस्य जाठराग्नेः स्वरूपं तस्य जीवोपकारकत्वं तथा प्रभायाः तेजसो विशीर्णावयवत्वप्रत्याख्यानपूर्वकं तेजोविशेषरूपत्वं श्रीभाष्यादिग्रन्थतात्पर्यविरोधपरिहारमुखेन प्रतिपाद्यते। तथाहि— प्रतर्दनविद्यायां प्राणशरीरकपरमात्मोपासनाभिधानवत् वैश्वानरविद्यायां वैश्वानराग्निशरीरकपरमात्मोपासनाया अभिधानात् वैश्वानरशब्दवाच्यार्थः क इति जिज्ञास्यते। शरीरमध्ये प्राणापानाख्यो यो वेगयुक्तो वायुविशेषः तेन परितः प्रसरणशीलः जाठराग्निः वैश्वानरसंज्ञां प्राप्य जीवस्य सर्वभक्ष्यमाणपचनोपकारकस्सन् आमरणमस्ति, समुद्रमध्ये बडवाग्निवत्। न च प्राणवैश्वानरावात्मानौ। तयोः जडत्वात् घटादिवदुत्पत्तिनाशयोः श्रवणात् जीवपरापेक्षया भेदस्य श्रुतावभिधानाच्च। अतस्तौ परमात्मशरीरे एवेति तच्छरीरकतया परमात्मोपासनमेव विधित्सितमिति वैश्वानरशब्दवाच्यः जाठराग्निः तेजोविशेष एवेति सिद्धान्तः।

प्रभा-तेजोविशेषः

तेजसो या प्रभा विद्यते सा तेजोधर्मभूता एका च। तथैव सर्वजनस्यापि प्रतीतेः। अतोऽत्र तेजोधर्मत्वमेकत्वं चावश्यमेष्टव्यम्, प्रत्यक्षप्रमाणसिद्धत्वात्। अत एव "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा", अनन्या राघवेण भास्करेण प्रभा यथा" इति स्मृत्यादौ प्रभायाः एकत्वं तेजोधर्मत्वं चोक्तं संगच्छते। न च प्रभायाः मूलाग्रयोः विशदतमत्वाविशदतमत्वोष्णत्वानुष्णत्वयोश्च विरुद्धधर्मयोरुपलम्भान्न तेजोविशेषत्वं, किन्तु तदतिरिक्तत्वमेवेति वाच्यम्। वृक्षे मूलाग्रयोः संयोगतदभावयोरवच्छेदकभेदेनोपलब्धिवत् प्रभायामपि उष्णत्वानुष्णत्वादिविरुद्धधर्माणामवच्छेदकभेदेनोपपत्तेः, नात्र तेजसोऽतिरिक्तत्वं प्रभाया युज्यते। अन्यथा दीपेषु स्थिरेष्वपि मूलाग्रयोः स्थूलत्वकृशत्वयोर्दर्शनात्तत्रापि ऐक्यानुभवानुपपत्तिस्स्यात्। न च दीपस्य विशीर्णा अवयवा एव प्रभापदवाच्या इति वाच्यम्। तथा सति रत्नादीनां निष्प्रभत्वापत्तिः। तत्र प्रतिक्षणं रत्नोत्पादकसामग्र्या अभावेन रत्ने स्वावयवविशरणस्य दुर्वचत्वात्। किं च दीपस्य विशीर्णावयवस्य प्रभापदवाच्यत्वे विशरणक्रियातत्स्वभावानां वेगवतां तेजोऽवयवानां अनुपशान्तवेगानामेव संभूय किञ्चिदुद्गमनेन दीपाद्यवयव्यारम्भणं घनीभूतानामनन्तरक्षणे विशरणं ऊर्ध्वगमनशीलानां च तेषां तत्तदंशतश्च तिर्यगूर्ध्वमधश्च प्रसरणं तादृशप्रसरणहेतुवैचित्र्यमित्याद्यनुपलब्धविविधार्थकल्पनागौरवं प्रसज्यते। तस्मात् प्रभा तेजः तिमिरापहारित्वादित्यनुमानेन प्रभायाः तेजोविशेषत्वमनुभवसिद्धमप्रकम्प्यमिति भावः।

ननु श्रीभाष्ये जिज्ञासाधिकरणे क्वचित् "प्रभा प्रभावद्द्रव्यगुणभूते" त्युक्तम्। क्वचित्तु "करतलप्रतिहतगतयो हि रश्मयः बहुलाः स्वयमेव स्फुटतरमुपलभ्यन्ते"

इति कथितम्। प्रभायास्तेजसा सहैवोत्पत्तिविनाशयोस्तथा तेजोविशेषरूपत्वस्य चाङ्गीकारे प्रभायाः युगपदेव करतलादिदेशव्याप्युत्पत्तिमत्वेन गत्यादीनामसङ्गततया गतिप्रतिबन्धकपरकरतलप्रतिहतेत्यादिश्रीभाष्यग्रन्थविरोधो भवति। तेजसः विशीर्णावयवत्वस्वीकारे नात्र करतलेत्यादिग्रन्थानुपपत्तिः। किं च प्रभायास्तेजसा सहोत्पत्तिविनाशपक्षे आतपे निवृत्तेऽपि क्षितिजलयोरौष्ण्योपलम्भानुपपत्तिः। तेजोरूपप्रभाया नष्टत्वात्। विशीर्णावयवरूपत्वे नेयमनुपपत्तिः। तेजसो नष्टत्वेऽपि तदीयविशरणावयवसंक्रमणेन क्षित्यादिषु औष्ण्योपपत्तेः। एवं च करतलेत्यादिग्रन्थानुसारेण विशीर्णावयवपक्ष एव युक्त इति प्रतिभाति। परन्तु प्रभाप्रभावद्द्रव्यगुणभूतेत्यादिग्रन्थानुसारेण तु विशीर्णावयवपक्षनिराकरणमेवोपपन्नमिति ग्रन्थद्वयविरोधस्य स्फुटत्वात् कथमत्र प्रभायाः तेजोविशेषत्वं वक्तुं शक्यत इति चेदत्र ब्रूमः। प्रभाप्रभावद्द्रव्यगुणभूतेत्यादिग्रन्थः सांख्यमतानुसारेणैव प्रवृत्तः, न तु स्वमतानुसारेण। सांख्यैः—

दीपप्रभा यथा तस्मिन् विनश्यति विनश्यति।
तथा बहिर्गताप्येषा मूलच्छेदाद्विनश्यति॥

इति ग्रन्थेन इन्द्रियवृत्तेः उत्पत्तिविनाशौ इन्द्रियोत्पत्तिनाशाधीनौ। तत्र च दृष्टान्तः दीपप्रभेति प्रतिपादितत्वात्। एवं च प्रभाविषये पक्षद्वये नैर्भर्याभावान्न विशीर्णावयवत्वपक्षे भाष्यग्रन्थविरोध इति केचित् समादधिरे।

वस्तुतस्तु प्रभायाः तेजोविशीर्णावयवत्वपक्षे प्रत्यक्षप्रमाणविरोधस्य बहुविधकल्पनागौरवस्य च प्रदर्शितत्वान्नायं पक्षः भाष्यकाराभिमतः। किन्तु प्रभायाः तेजोधर्मत्वे सति तेजोविशेषत्वमेवेति यश्च पक्षः स एव। करतलेत्यादिग्रन्थविरोधोऽप्यस्मिन् पक्षे न घटते, अस्माभिः पदार्थानां स्थायित्वाभ्युपगमात् करतलादिस्थलेषु प्रभायाः कंचित्कालमवस्थाने विरोधाभावात् बहुलीभावादीनामुपपत्तेः। किं च बौद्धमतनिराकरणावसरे दीपादीनां निरन्वयविनाशस्य निराकृततया निवृत्तातपस्थलेऽपि क्षित्यादिषु सूक्ष्मतः प्रभावयवसत्वेनैव औष्ण्यप्रतीतेः निर्वाहसंभवेन विरोधाभावात्। एवं च प्रभायाः करतलादिषु तेजोनिरोधे सति ह्रासः, तदभावे विकासः तथाऽस्थिरदीपादौ च तत्समानकालीनप्रभागतिमत्वाङ्गीकाराच्च वारणादिकं युज्यत इति पूर्वोक्तः तेजोविशेषपक्षः भाष्यग्रन्थाविरुद्धः विद्वद्धृदयंगमश्चेति आनन्ददायिनीकारैः निगमान्तमहादेशिकैरनुगृहीतपक्षे स्वारस्यं सयुक्तिकं प्रत्यपादि।

अथ स्थिरतया गृहीते दीपे स्वावयवस्य विशरणमन्तरा क्षिप्रविनाशित्वानुपपत्तेः प्रभाया अपि तेजोविशरणरूपत्वमवश्यमङ्गीकार्यमिति पूर्वपक्षं निरस्यति। तथाहि— प्राच्यस्नेहदशादिनाशः स्वानन्तरभाविस्वजनकदीपनाशवान् दीपारम्भकस्नेहादिनाशत्वात् अन्त्यवदित्यनुमानेन दीपे क्षिप्रविनाशित्वसिद्धेः दीपस्य विशरणमवश्यमभ्युपगन्तव्यम्। तथा प्रतिक्षणं दीपवर्त्यादिनाशोऽपि प्रतिक्षणं चक्षुषा स्फुटं निरीक्ष्यते, अतः

प्रत्यक्षप्रमाणादपि दीपस्य विशरणं सिद्धयतीति पूर्वपक्षः। अत्रायं परिहारः—यथा स्नेहनाशात्प्रतिक्षणं दीपनाशः तथैव भिन्नभिन्नस्नेहादिसामाग्र्या अप्यनुभवात् प्रतिक्षणं दीपस्योत्पत्तिरपि स्वीकार्या। एवं च भिन्नभिन्नस्नेहादिसामाग्र्या भिन्नभिन्नदीपोत्पत्तेः नात्र विशरणस्यावश्यकता। सेयं दीपज्वालेत्यादिबुद्धिस्तु पूर्वदीपज्वालासादृश्यमात्रेण भवति। वस्तुतस्तस्या भ्रान्तिरूपत्वात्। यत्र भास्करे रत्नादौ सामग्र्यनुवृत्यादिहेतुविरहो दृश्यते तत्र तादृशस्य तेजोविशेषस्य स्थिरत्वात् तदीयप्रभाया अपि स्थिरत्वम्। दीपे स्थिरत्वबुद्धिस्तु भिन्नभिन्नसामग्रीबलात् बाधितेति भावः।

इत्थं तेजसि विशेषविचारं वर्तयन् तत्र प्रथममुदर्यमग्निं प्राणसाहचर्यान्निरूप्य ततोऽग्नित्वसाम्यात् दीपादिके उपस्थिते तत्र प्रभाप्रभावद्रूपेण भेदं, प्रभायाः तेजोविशेषत्वं च प्रत्यपादि।

सुवर्णादेः पार्थिवत्वम्

अथ तेजसः भौमदिव्योदर्याकरजभेदात् चातुर्विध्ये तार्किकोक्ते आकरजस्य सुवर्णस्य तैजसत्वनिराकरणपूर्वकं पार्थिवत्वं साधयति। सुवर्णाद्याः लोहविशेषाः पार्थिवाः पार्थिवद्रव्यहरिद्रावर्णसदृशवर्णवत्वात्, अतिकठिनत्वात् अतिशयितगुरुत्वाश्रयत्वाच्चेत्यनुमानेन सुवर्णस्य पार्थिवत्वं सिद्धयति। अत्र हेतौ केवलकठिनत्वं साधारणगुरुत्वं च करकादिरूपजलेऽप्यस्तीति पार्थिवत्वसाधनायोगात् तद्व्यावृत्तये अतीति अतिशयितेति च विशेषणम्। करकादिकाठिन्यस्य अस्थिरत्वान्नातिव्याप्तिस्तत्र। न च जले सांसिद्धिकद्रवत्वमेवास्ति, न तु नैमित्तिकद्रवत्वमिति तोयभिन्नत्वं सुवर्णस्य सिद्धयतीति वाच्यम्। तथासति पाकेन पार्थिवेऽपि वस्तुनि द्रवत्वदर्शनात् तत्रापि नैमित्तिकद्रवत्वस्याक्षुण्णतया पार्थिवे व्यभिचारापत्तेः। इत्थं च पार्थिवानां सर्पिरादीनां अत्यन्तानलसंयोगे उच्छिद्यमानद्रवत्वकत्वात् सुवर्णप्रभृतीनां च द्रवत्वस्यानुच्छिद्यमानत्वात् तादृशद्रवत्वाश्रयभागं पक्षीकृत्य सुवर्णस्य तैजसत्वं यत्परैस्साधितं तन्न समीचीनम्। तत्र पार्थिवभागस्यापि द्रवीभावात् तद्द्रवत्वमपि नोच्छिद्येतेति शंकायां अनुच्छिद्यमानद्रवत्वाश्रयद्रव्यान्तरमध्यनिर्विष्टत्वात् जलमध्यस्थघृतन्यायेन पार्थिवद्रवत्वमपि नोच्छिद्यत इति समाहितम्। तथासति तत्र दृष्टान्ते तोयस्य घृतचूर्णाधारतया कथनात्, तद्वदत्रापि सुवर्णाद्यंशस्तोयमेव किं न स्यात्, विनिगमकाभावात्। अनुच्छिद्यमानद्रवत्वविशेषस्य विनिगमकत्वन्तु दृष्टान्ताभावात् न संगच्छते। तस्मात् सुवर्णं पार्थिवमेवेति भावः।

तमसः पार्थिवद्रव्यत्वम्

अथ सुवर्णस्येव तमसोऽपि पार्थिवत्वं सयुक्तिकं साधयति। तमः पार्थिवं नीलरूपवत्वात् नीलघटवदित्यनुमानेन तमसः पार्थिवत्वं सिद्धयति। न च तमसः स्वरूपस्यैव नीलत्वात् नीले नीलासम्भवेन नीलरूपगुणाश्रयतया पार्थिवत्वस्य वक्तुमशक्यत्वात्

वियतिविततानां सूक्ष्माणां पृथिव्यवयवानां कृष्णो गुण एव तम इति वाच्यम्। बहुलत्व-चटुलत्वादिधर्माणामनुपपत्तेः। निबिडं तमश्चलति विरलं तम इत्यादिप्रतीत्या निबिडत्व-चलत्वादेस्तत्र दर्शनात् तादृशधर्माणां च द्रव्यधर्मत्वेन तमसो गुणत्वाभ्युपगमे तदनुप-पत्तेः। अतश्च नीलरूपगुणाश्रयतया तमसः पार्थिवत्वं निराबाधं सिद्धयतीति भावः।

ननु नैल्यादिना पार्थिवत्वसाधनं कं प्रति ? तार्किकैः तमसि नीलरूपवत्वस्य भ्रान्तित्वेन कथनात् तत्पक्षे हेत्वसिद्धेरिति चेत्—

तमः खलु चलं नीलं परापरविभागवत्।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति॥ इत्यादिना।

भाट्टैरतिरिक्तद्रव्यत्वप्रतिपादनात् तान् प्रत्येवेति नात्र हेतोरसिद्धिः। न चालोकाभावस्तम इति युक्तम्। यतो हि च्छायायां पुरुषादिगत्यागत्योरिव प्रदीपालोकगत्या-गत्योः तत्रारोपादनुगत्युपपत्तेः। पृथक्द्रव्यत्वे तु तदनुपपत्तेरिति वाच्यम्। पृथक्द्रव्य-त्वेऽपि यथा अयस्कान्तेन अयसो गत्यागत्यनुविधानरूपं पारतन्त्र्यं तथैव तमसोऽपि गत्यागत्योस्सम्भवात्। यथादर्शनमेव पदार्थानां व्यवस्थायाः वक्तव्यत्वात्। न च तमो न रूपवत् अस्पर्शत्वादिति वाच्यम्। इन्द्रनीलप्रभायां स्पर्शाभावेऽपि रूपदर्शनेन व्यभिचारात्।

किं चास्पर्शत्वमप्यसिद्धम्। प्रभायामिव तमस्यपि अनुद्भूतस्पर्शाङ्गीकारात्। अतश्च स्पर्शाज्ञानं न रूपात्मकविषयापहारकम्। अत एव तमो न पार्थिवमस्पर्शत्वा-दित्यपि निरस्तम्। न च रूपप्रत्यक्षे आलोकस्य कारणत्वेन तमसि च तदभावात् कथं नीलप्रत्यक्षमिति वाच्यम्। आलोकाभावेऽपि सिद्धाञ्जनसहितया दृष्ट्या असहायोलूक-दृष्ट्या च प्रत्यक्षोत्पत्तेर्दर्शनेन व्यभिचारात् रूपप्रत्यक्षसामान्ये आलोकस्य तन्त्रता-संभवात्। तस्मात्तमसः पार्थिवत्वं निराबाधम्। आलोकमध्ये तमसोऽनुपलब्धिस्तु तमसः आलोकनाश्यत्वात् मध्यन्दिनालोकाप्रकाशादिवदभिभवाद्वा भवतीति यथायथं वर्णयन्ति।

अथ अज्ञानस्य ज्ञानाभावमात्रेणैव निर्वाहसम्भवेन यथा भवद्भिः भावरूपमज्ञानं न कल्प्यते तथा लाघवात् आलोकाभावेनैव निर्वाहे सति तमः अन्यद्द्रव्यमिति न कल्प्यमित्याशंकायां समाधीयते। आलोकाभावमात्रं न तमः। तमः प्रतीतिकाले सर्वदैव नीलं तम इत्येव प्रतीतेः। न च सा प्रतीतिरारोपितनीलविषयिणीति वाच्यम्। शुक्ति-रजतस्थले पश्चात् नेदं रजतमिति बाधप्रतीतिवत् अत्र बाधादर्शनात् न नैल्यारोपो वक्तुं शक्यते। आरोपितस्थले सर्वत्र नियमेन पश्चाद्बाधदर्शनात्। किं च नैल्यमारोपित-मिति पक्षे शुक्लवर्णान्यत्वसाम्यात् कदाचित् पीतादिवर्णवत्वेनाऽपि उपलम्भापत्तिः। उपलम्भस्तु नियमेन कृष्णवर्णत्वेनैव, न तु पीतादिवर्णत्वेन। तस्मात् कथमपि नीलस्या-रोपासम्भवात् तमसो वस्तुतः नीलरूपाश्रयतया आलोकाभावातिरिक्तद्रव्यत्वं सर्वथा दुरपह्नवम्।

एवं प्रलयकाले "नासीत्तमो ज्योतिरभूत् न चान्यत्" इत्यादिना ग्रन्थेन विष्णुपुराणादिषु महर्षिभिः तमसः तेजसश्चासत्वप्रतिपादनान्नात्र आलोकाभावरूपत्वं तमसो युज्यते। प्रतियोगितदभावयोरेकत्र विरोधात् स्थित्यभाववत् तमसः आलोकाभावरूपत्वे उभयोर्निषेधस्यापि व्याहतत्वेन अशक्यत्वात्। अत्रेदमाकूतम्। आलोकाभावः अत्र नास्तीत्युक्ते आलोकः अस्तीति ज्ञायते। एवमालोको नास्तीत्यभिहिते आलोकाभावः अस्तीति वस्तुस्थितिः। तत्र तमसः आलोकाभावरूपत्वे उभयं नास्तीति निषेधो न संगच्छते, कालविशेषे नियमेन एकस्योपलम्भात्। यद्यत्र आलोकाभावातिरिक्तत्वं तमस इष्यते तदा नेयमनुपपत्तिः। घटपटवत् तमसः तेजसश्च परस्परं भिन्नत्वेन प्रलयकाले तदुभयनिषेधोपपत्तेः। किं च अन्तर्यामिब्राह्मणे "यस्य तेजश्शरीरं" यस्य तमश्शरीरमित्यादिश्रुत्या तेजसा सहातिरिक्ततया तमसोऽपि भगवच्छरीरतया पाठदर्शनात् अस्माभिः अभावस्य भावान्तररूपत्वाङ्गीकाराच्च नात्र तमसः आलोकाभावरूपत्वमुपपद्यते। अभावस्य भावान्तररूपत्ववादिनामस्माकं पक्षे भवदुक्तरीत्या तमसः आलोकाभावरूपत्वाभ्युपगमेऽपि न तस्य तेजोभावत्वं सिद्ध्यति। किन्तु अभावातिरिक्तं भावरूपत्वमेवेति अतिरिक्तत्वमक्षुण्णमित्याशयः। इत्थमत्र चलस्य तमसः पृथिव्यामन्तर्भावो न्यरूपि।

भूभ्रमणादिनिरूपणम्

अथ महापृथिवी अचलैवेति सयुक्तिकं निरूपयन् तस्याः भ्रमणं वदतां केषांचित्पक्षं जैनीयं पक्षञ्च निरस्यति। भुवः भ्रमणपक्षे "हिरण्मयेन सविता रथेने" त्यादिश्रुत्या प्रतिपादितसूर्यगत्यनुपपत्तिः। तस्मादनेकपुराणेषु श्रुतिषु च प्रतिपादितरीत्या भूः स्थिरा, ग्रहनक्षत्राणि पवनरथवशात् भ्रमन्ति इत्येवं वैदिकसिद्धान्त एव युक्तः। न च "उत्ताना ह वै देवगवा वहन्ति" इति श्रुतिसार्थक्याय यथा स्वर्लोकस्य भ्रमणं तद्वदेव भूलोकस्यापि भ्रमणमङ्गीकार्यम्। देवलोकस्य भ्रमणस्वीकारे सत्येव तत्रत्यानां गवां तल्लोकोपरितनभागस्य भ्रमणवशादधोदेशप्राप्तिदशायां देशान्तरस्थैरुत्तानतया गमनं लक्ष्येतेति वाच्यम्। "उत्ताना ह वै देवगवा" इत्यादिवाक्यानां "आदित्यो यूप" इतिवत् अर्थवादपरत्वेन स्वार्थे तात्पर्याभावान्न तादृशश्रुत्यर्थोपपत्त्यर्थं देवलोकभ्रमणं युज्यते। तस्मात् यथा स्वयं भ्राम्यन्तो बालिशाः भुवं भ्राम्यन्तीमभिमन्यन्ते तथैव भ्रान्तैरेव त्रिलोकीभ्रमणं कल्प्यते न त्वभ्रान्तैरिति। न च यथा नौकास्थः पुरुषः जलप्रवाहानुलोमगतिः तीरस्थान् निश्चलान् वृक्षादीन् प्रतिलोमगतिमतः पश्यति तथा भूमौ बम्भ्रम्यमाणायां वियत्स्थान् निश्चलानपि गृहादीन् बम्भ्रम्यमाणान् पश्यन्ति इति वक्तुं शक्यत्वेन भूमेरेव भ्रमणं युक्तमिति वाच्यम्। तथासति भूमौ धनुरादितो मुक्ता नभोगताः शर–शिलाशकलादयः कथं स्वदेशे तदासन्नदेशे वा निपतेयुः। भुवः भ्रमणाभ्युपगमे तेषां नित्यं स्वदेशपश्चिमभागे एव निपातस्स्यात्। एवमाकाशे उड्डीनानां पक्षिणां उपरिगमनावसरे तारतम्यानुपपत्तिश्च। तस्मात् भुवः भ्रमणपक्षः न शोभनः। एवं भूपतनपक्षोऽपि न घटते। यतः उर्व्याः गुरुत्वेन अतिवेगेन अधःपातात् तावत्पर्यन्तावस्थाना-

संभवात् आकाशे प्रक्षिप्तस्य लघुभूतवस्तुनः भूप्रदेशे गमनानुपपत्तेः। अनुभूयते तु तादृशवस्तुनः भूम्यामवस्थानम्। तस्मात् भूम्याः पतनं भ्रमणं वा न युज्यते, किन्तु स्थिरैव भूरिति निष्कर्षः।

एतावता प्रबन्धेन द्रव्यं द्वेधा विभक्तं जडमजडमिति, प्राच्यमव्यक्तकालाविति प्रतिश्रुतरीत्या प्रकृतेः तद्विकाराणां भूतादीनां च स्वरूपं भगवद्रामानुजाचार्यमतरीत्या निष्कृष्य प्रतिपादितम्।

कालस्याकाशातिरिक्तत्व, नित्यत्व, प्रत्यक्षत्वादि

अथ क्रमप्राप्तत्वात् कालस्य स्वरूपमिदानीमुपवर्ण्यते। अत्र केचन पूर्वपक्षिण आचक्षते। सूर्यास्तमयादिरूपोपाधिविशिष्टः आकाश एव कालपदवाच्यः। तत्र अस्तमयोदयादिरूपोपाधीनां सूर्यनिष्ठत्वेन तद्वत्वं पुरुषे कथं सम्भवतीत्याशंका जायते। अधिकदिनवान् अधिकसूर्यपरिस्पन्दवान्वा पुरुषः स्थविर इति तथा न्यूनोपाधिमान् पुरुषः युवेति च व्यवहारदर्शनात् स्पन्दादेः स्वाश्रयसूर्यसंयुक्ताकाशसंयुक्तत्वरूपसम्बन्धेन पुरुषे सत्वात् आकाशस्यैव सूर्यनिष्ठधर्मोपनायकत्वसंभवादाकाश एव कालः, न तु तदतिरिक्तः। अन्यस्य अन्यधर्मोपनायकत्वं संभवतीति भवद्भिरेव दिशः आकाशानन्यत्वप्रतिपादनावसरे अभिहितत्वादिति, अत्रायं सिद्धान्तः। अष्टादशपुराणेषु-प्रमाणतयामूर्धन्यभूते श्रीविष्णुपुराणे "विष्णोः स्वरूपात्परतो दिते द्वे" इत्यारभ्य "रूपान्तरं तत् द्विज कालसंज्ञ" मित्यादिना तथा "अनादिर्भगवान् काल" इत्यादिना च प्रकृतिपुरुषवत् भगवच्छरीरत्वस्य अनादित्वादेश्च प्रतिपादनात् आकाशस्य च श्रुतिषु उत्पत्तिश्रवणात् तत्स्वरूपत्वायोगात्। दिशस्तु न पृथक्पाठः न वा भगवच्छरीरत्वं कुत्रचिच्छ्रूयते। अतस्तस्याकाशानन्यत्वं युक्त्या साध्यत इति नात्र तन्न्यायेन कालस्य वियदनन्यत्वं वक्तुं शक्यते। अनादित्वानन्तत्वादेः श्रवणादेव कालस्य एकत्वं कार्यत्वाभावरूपं नित्यत्वं चाव्याहतम्।

ननु "कालोऽस्मि लोकक्षयकृत्प्रवृद्ध" इति गीतायां भगवता श्रीकृष्णेन स्वस्यैव कालरूपत्वाभिधानान्नात्र परमात्मातिरिक्तः कालस्सिद्ध्यति। परमात्मनः सर्वकारणत्व-सर्वव्यापित्वनित्यत्वादीनामपि निराबाधतया कालस्य तादृशधर्मवत्वप्रतिपादकस्मृतीनामपि नानुपपत्तिः। अतोऽत्र ब्रह्मैव कालपदवाच्यः न तु तदतिरिक्त इति चेन्न। स्थूलोऽहमित्यादिवदनादिर्भगवान् काल इत्यत्रापि शरीरशरीरिभावप्रतिपादकतया सामानाधिकरण्योपपत्तेः नात्र सामानाधिकरण्यं कालपरमात्मनोरैक्यं प्रतिपादयति। किं च रूपान्तरं तत् द्विजकालसंज्ञमित्यत्र रूपान्तरमित्यनेन स्पष्टतया परमात्मभिन्नत्वं श्रूयते। तस्मात् प्रकृत्यादिवत् कालोऽपि परमात्मव्यतिरिक्तः तच्छरीरभूत इत्याशयः।

अथ कालस्योत्पत्तिं निरस्य नित्यत्व-विभुत्वादिकं प्रसाध्यते। तथाहि—"कालो नियतिश्च तथा कला च विद्या च रागश्च अव्यक्तं मायातः" इति ग्रन्थेन कालस्यापि मायानन्यत्वं प्रतिपाद्य अनित्यत्वादिकं प्रत्यपादि। तत्रेदं विमृश्यते—किमयं

कालः स्वोत्पत्तेः पूर्वं नास्ति, पश्चाच्च नाशात् न भवितुमर्हतीत्यभिसन्धिः? उत भूतादिपदार्थवत् कालोऽपि उत्पद्यत इत्यभिसन्धिर्वा? नाद्यः, उत्पत्तेः पूर्वं नास्तीति कथनवेलायां पूर्वशब्देन किं पूर्वकालरूपार्थः बोध्यते? उत पूर्वशब्दः निरर्थकः? पूर्वशब्दस्य निरर्थकत्वे तदा निरर्थकत्वरूपनिग्रहस्थानदोषः। तस्य सार्थकत्वे तदा कालस्यैव पूर्वशब्दार्थतया उत्पत्तेः पूर्वं नास्तीति स्ववचनव्याघातः। प्रागिति परमिति च प्रयुञ्जान एव कथं तदा तदा कालाभावं वदेत्? तस्मात् कालस्यासत्वं न सिद्धयति। एवं काल उत्पद्यत इति पक्षेऽपि स्ववचनव्याघातदोषः। उत्पत्तिशब्दः प्रागस्थितस्य कालस्य जननं बोधयति। तत्र प्राक्शब्देन कालस्यैवाभिधानात् तस्यानादित्वे सत्येव तथा-ववतुं शक्यत्वात्।

एवं नासदासीन्नो सदासीत्तदानीमिति श्रुतौ तदानीमितिशब्दप्रतिपाद्यकालस्य सदसत्पदार्थवत् स्पष्टं नाशाप्रतिपादनात् कालस्यानादित्वं व्यक्तम्। तस्य चोत्पत्यभ्युपगमे उपदर्शितश्रुतिविरोधश्च स्यात्। न च विद्या-कालौ भवत्कृतावित्यादिस्मृतिषु कालस्योत्पत्तेः स्पष्टं श्रवणात् कालोत्पत्तिः सिद्धयतीति वाच्यम्। कालोपाधिभूतानां निमेषाब्दमासादीनां "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि, कला मुहूर्ताः" इत्यादिश्रुत्या उत्पत्तिवत् प्रकृतवाक्येऽपि कालोपाधिभूतानां तदभिमानिदेवतानां वा उत्पत्त्यङ्गीकारेण निर्वाहोपपत्तेः।

अथ क्षणादिकालोपाधीनां सूर्यपरिस्पन्दादीनामप्रत्यक्षतया तादृशोपाधिविशिष्टकालस्याप्यप्रत्यक्षत्वमेव वक्तव्यम्। एवं प्रत्यक्षे रूपस्य कारणत्वात् काले च तदभावादप्रत्यक्षत्वमेवेत्याशंकायां सयुक्तिकं कालस्य प्रत्यक्षत्वं निरूप्यते। अयं घटोऽत्र वर्तत इति प्रतीत्या क्षणादिकालस्य पूर्वकालवृत्तिघटाद्यर्थव्यावर्तकत्वदर्शनात् घटाद्यर्थवदेव तद्विशेषणीभूतस्य कालस्यापि प्रत्यक्षत्वमनुभवसिद्धम्। तत्र च क्षणादिकालस्य साक्षात् प्रत्यक्षविषयत्वं दिवसस्य तु प्रत्यभिज्ञाप्रत्यक्षविषयत्वमिति भेदः। दिवसस्य अनेकक्षणसमुदायात्मकत्वेन तद्घटकक्षणानां सर्वेषां वर्तमानत्वाभावात्। एवं नीरूपद्रव्यस्याप्याकाशस्य प्रत्यक्षत्वं रूपप्रत्यक्षवदुपपन्नमिति प्रतिपादितत्वात् तन्न्यायेन काले रूपाभावेऽपि प्रत्यक्षत्वमविरुद्धम्। किञ्च क्षणमयं तिष्ठतीत्यादिप्रतीत्या सूर्यपरिस्पन्दादीनामप्रत्यक्षत्वेऽपि क्षणादिकालप्रत्यक्षस्य सर्वानुभवसिद्धतया कालः प्रत्यक्ष एव। अन्यथा सूक्ष्मप्रकृतिवत्कालस्यापि लोकव्यवहारविषयत्वं कुत्रापि न स्यात्।

"नन्वेवमनादिर्भगवान् कालः" इत्यादिप्रमाणानुसारेण कालस्य नित्यत्व-एकत्वादिधर्मवत्वाभ्युपगमे अब्दमासादीनामनेकधा व्यवहारानुपपत्तिरिति चेन्न। उपाधिभेदादब्दमासादिभेदः उपपद्यते। यथा मृदादिद्रव्याणां स्वरूपतः एकत्वेऽपि घटत्वाद्यवस्थाभेदमङ्गीकृत्य घटादिव्यवहारो भवति, तथैव कालस्यापि अब्दमासादिव्यवहारः तादृशावस्थाभेदेनोपपद्यत इति नात्र अखण्डकालस्य एकत्वानुपपत्तिरिति केचित्समादधिरे।

यादवप्रकाशाचार्यास्तु "कालोऽनाद्यनन्तः अजस्रक्षणपरिणामी"त्यादिना ग्रन्थेन

क्षणादिकालस्य महाकालपरिणामरूपत्वं स्वीकृत्य कालस्य एकत्वादिकं प्रतिपादयन्ति। उभयथा च दोषाभावात् कालो नित्यो विभुश्चेति प्रमाणानुसारं सिद्धयति।

अथ प्रकृत्यादि-जडद्रव्यं निरूप्य अजडान्तर्गतं जीवस्वरूपं द्वितीयसरे आदौ निरूप्यते। जीवस्वरूपे च तीर्थकारा अपि बहवो विवदन्ते। केचन देह एवात्मेति, केचिदिन्द्रियाणीति, अपरे मन इति, अन्ये प्राण इति, इतरे ज्ञानमिति। एवं तत्परिमाणेऽपि केचिद्विभुरिति इतरे तत्तज्जीवशरीरानुगुणपरिणाम इति, परे अणुरिति। इत्थं नानाप्रकारेण व्यवह्रियमाणस्य जीवपदार्थस्य विशिष्टाद्वैतवेदान्तिनां मते निष्कृष्टस्वरूपं किमिति यथाग्रन्थं विविच्य दर्शयिष्यते।

तत्र पामरसाधारण्येनानुभवसिद्धं देहात्मवादम् आदौ निरस्यति। स्थूलोऽहं जानामि, कृशोऽहं करोमि, देवदत्तोऽहं यज्ञदत्तोऽहमित्यादिप्रतीतौ स्थौल्यादिगुणविशिष्टाहमर्थो भासते। स्थौल्यादिगुणश्च देहस्यैव, न तु तदतिरिक्तस्य कस्यचिदिति प्रत्यक्षसिद्धम्। अतः प्रमाणमर्धन्येन प्रत्यक्षेण देह एवात्मेति सिद्धयतीति चार्वाका वदन्ति। अत्रेदमाक्षिप्यते—देहात्मवादिना किं हस्तपादादीनाम् अवयवानां प्रत्येकं चैतन्यमङ्गीक्रियते, तत्समूहस्य वा, अथ तद्भिन्नस्य कस्यचिदवयवातिरिक्तावयविनो वा? नाद्यः, शिरःपाण्यादीनां प्रत्येकं चेतनत्वे चैत्रमैत्रादिशरीरावच्छिन्नेषु विभिन्नेष्वात्मसु यथाऽन्योन्यमीर्ष्यासूयादिभिः कलहो भवति, तथा बहूनामवयवानां प्रायेण परस्परमीर्ष्यासूयादिभिरैकमत्यासम्भवात् कलहप्रसङ्ग इति।

अथैककुटुम्बिन इवैकशरीरावयवाः परस्परमीर्ष्यादिरहिताः। अतो न मिथः कलहप्रसङ्ग इति चेन्न। जातमात्रस्य चेतनस्य प्रवृत्तिनिवृत्त्योरन्वयव्यतिरेकाभ्यां रागद्वेषमूलकत्वावगमात् रागद्वेषादिरहितः कश्चिदपि चेतनो नास्ति। रागादिसत्त्वे चेर्ष्यादिराहित्यासम्भवादैकमत्यानुपपत्तेरन्तरङ्गाणामेककुटुम्बवर्तिनामपि कदाचिदवर्जनीयः कलहस्स्यात्। शिरः पाण्याद्यवयवेषु च मिथःकलहो न दृश्यते। अतोऽननुभूयमानस्य तस्यापादनेनानिष्टापादनरूपतर्केणावयवानां प्रत्येकं न चैतन्याश्रयत्वमिति सिद्धयति।

अपि चावयवानामुपचयापचयविनाशादिकालेष्वपि स एवाहमिति प्रत्यभिज्ञायास्सत्त्वात् तद्विषयः कश्चिदवयवातिरिक्तः पूर्वापरकालवर्ती स्थायी अहमर्थ अवश्यमभ्युपगन्तव्यः। अन्यथा पादाद्यवयवच्छेदे सति तदनुभूतस्मरणं न स्यात्। अन्यदृष्टस्यान्येन स्मरणायोगात्।

सङ्घातस्य चैतन्यमिति द्वितीयपक्षोऽपि न युक्तः, हस्तपादाद्यवयवसङ्घाताः न चैतन्याश्रयाः सङ्घातत्वात्, बाह्येन्द्रियग्राह्यत्वात्, चाक्षुषत्वात्, भूतत्वात्, रूपवत्वात्, घटवदिति नैकानुमानेन बाधात्।

सङ्घातातिरिक्तावयवी चेतन इति पक्षोऽपि न समीचीनः। अवयवी देहश्चानित्यत्वेन कार्यः; कार्यद्रव्यवर्तिनो विशेषगुणस्य कारणगुणपूर्वकत्वनियमः क्लृप्तः; देहावयवेषु च प्रत्येकं चैतन्यासम्भवः प्रदर्शितः; अतस्तत्र कारणेऽसिद्धस्य चैतन्यस्यावयविनि कार्ये वृत्तित्वं कथं सिद्ध्येत् ? अतो न चैतन्याश्रयोऽवयवी इति।

किञ्च ममेदं शरीरं मम हस्त इति व्यतिरेकप्रतीतिस्सर्वसंप्रतिपन्ना। अत्र चाहमर्थः शरीरादिकं ममेत्यभिमन्यते, अभिमन्तव्याभिमानिनोर्भेदस्य च सर्वानुभवसिद्धत्वात् शरीरहस्तादिभेदः अहमर्थस्य सिद्ध्यति।

यदि हस्तादिष्वेव कश्चिदेकोऽवयवः स्वभिन्नान्यवयवानि ममेत्यभिमन्यते, तदा को वा अवयवः, किं वा अवयवान्तरमभिमन्यत इत्यत्र किं नियामकम् ? हस्तादिषु नियतस्य कस्यचिदभिमन्तुरयमित्युपलम्भाभावात् मम हस्तो मुखं पादः शिरः उदरमिति सर्वस्याभिमन्तुर्भेदभानात्, स्वस्य स्वं प्रत्यभिमन्तृत्वायोगाच्च न तेष्वन्यतमः अभिमन्ता। किन्तु तदतिरिक्त एव।

अपि च तदतिरिक्तस्यावयविन एवायमभिमान इत्यपि न वक्तुं शक्यम्। अवयवातिरिक्तावयविनो निरस्तत्वात्। अतो हस्तादिष्वभिमन्तव्येषु सर्वेष्वबाधितैकप्रत्ययविषयोऽभिमन्ता तद्व्यतिरिक्तः कश्चिदहमर्थोऽवश्यमङ्गीकर्तव्यः।

अथ ममेति प्रतीतिः व्यतिरेकस्थल एव जायत इति नियमो नास्ति। ममात्मेति क्वचिदभेदेऽपि दृश्यते। अतस्तद्बलात् मम हस्तादिरित्यादौ शरीरादिभेद एव सिद्ध्यतीति नेत्याशङ्कायामभिधीयते। मम हस्तो मम शरीरमित्यादिप्रत्ययाः मम गृहं मम पशुरित्यादिवत् व्यक्तव्यतिरेकाः। ममात्मेति तु घटस्य स्वरूपमितिवत्। अत्र ममेत्युल्लेखेन शरीरादिविशिष्ट आत्मा; आत्मेति निष्कृष्टात्मस्वरूपम्; तयोर्विशिष्टकेवलयोरमुख्यो भेदोऽगत्या अङ्गीक्रियते। देहे आत्मसंसर्गरूपदोषात् अहमिति मतिः, लोहपिण्डे हुतवहबुद्धिवत् भेदाग्रहनिबन्धना।

इन्द्रियात्मवादनिरासः

घटादिप्रत्यक्षं रूपादिप्रत्यक्षं च चक्षुरादीन्द्रिये सति जायते, तदभावे न जायत इत्यन्वयव्यतिरेकाभ्यां चक्षुरादिवृत्तित्वमेव ज्ञानस्योचितम्। व्यवहारोऽपि चक्षुः पश्यति, स्पर्शनसुखो वायुः, श्रवणकटुश्शब्द इत्यादिरस्ति। इन्द्रियेषु च विकलेषु विकलोऽहमिति बुद्धिः जायते। परस्परमनुभूतार्थस्मरणमपि एकशरीरानुप्रवेशाधीनसंस्कारवैचित्र्यात् युज्यते। अत इन्द्रियाण्येवात्मेति।

अत्रोच्यते—घटादिज्ञानं प्रति चक्षुरादीनामिन्द्रियाणामन्वयव्यतिरेकानुविधानं तत्करणत्वेनाप्युपपद्यते। तथा च चक्षुषा घटं पश्यामीति संप्रतिपन्नो मुख्यो व्यवहारः,

चक्षुः पश्यतीति तु भाक्तः। अपि च चक्षुषा विकलोऽहमित्येव वैकल्यानुसन्धानम्, न तु चक्षुरहं नास्मीति, नष्टस्येन्द्रियस्य स्ववैकल्यानुसन्धानायोगात्। औदरकृम्यादीनामपि एकशरीरानुप्रवेशस्य समानत्वात् तेषामपि इतरानुभूतार्थप्रतिसन्धानापत्तेः न निरुक्त-संस्कारवैचित्र्यस्य हेतुत्वं युक्तम्। अपि च चक्षुरादीनां रूपादिप्रतिनियतविषयग्राहक-त्वात् सर्वेषां प्रतिसन्धातृत्वेन योऽहं रूपादिद्रष्टा, स एव शब्दं शृणोमि इत्यादि-प्रत्यभिज्ञाविषयः इन्द्रियव्यतिरिक्त आत्मा अङ्गीकर्तव्यः। देहात्मवादे प्रत्येकसङ्घाता-दिविकल्पमभिप्रेत्य ये दोषा उक्तास्ते सर्वेऽत्र समाना इति विभावनीयम्।

मनस आत्मत्वनिरासः

ननु उक्तयुक्त्या देहेन्द्रियव्यतिरिक्ततया सिद्ध्यन्नात्मा मन एव स्यात्, तस्यैकत्वेन रूपादिसकलप्रतिसन्धानमुपपद्यते, निरवयवत्वेनासङ्घातरूपत्वात् प्रत्येकसमुदा-यादिविकल्पानवकाशात् न पूर्वोक्तदोषगन्धः। मम मन इति व्यतिरेकप्रत्ययस्तु राहोश्शिर इतिवदभेदेऽपि संभवति। मनोव्यतिरिक्तात्मकल्पने तु गौरवम्, अतोऽहमर्थो मन एवेति केचित्।

अत्रोच्यते—यद्यपि निरवयवत्वेनैकत्वेन च न पूर्वोक्तदोषावसरः, तथाऽपि रूपादिज्ञानकरणतया यथा चक्षुरादीन्द्रियसिद्धिस्तद्वन्मनसोऽपि घटादिस्मरणं करण-साध्यं क्रियात्वात् इत्यनुमानेन स्मृतिकरणतया सिद्धिः। आत्मा तु ज्ञानाश्रयत्वेन (ज्ञानक्रियाकर्तृत्वेन) प्रत्यक्षसिद्धः। करणस्य च कर्तृभिन्नतया सर्वत्रोपलम्भात् ज्ञान-क्रियाकर्तृत्वरूपज्ञातृत्वं मनसो दुर्घटमेवेति न मन आत्मेति।

प्राणात्मवादनिरासः

केचित् "प्राणोऽस्मि प्रज्ञात्मा" इत्यात्मशब्दस्य प्राणे "प्राणोऽहपिता" इति प्राणशब्दस्यात्मनि च प्रयोगः श्रुतौ दृश्यते। प्राणे सति जीवतीति असति च म्रियत इति व्यवहारश्च सर्वैः क्रियते। देहेन्द्रियमनसां प्रवृत्तिरपि प्राणाधीना। अतः प्राण एवात्मेति ब्रुवन्ति। तदप्ययुक्तम्। प्राणानां वायुसङ्घातत्वेन संप्रतिपन्नत्वात् शरीरं यथा (अवयव) सङ्घातत्वादचेतनं तथा प्राणा अपि न चेतयन्ते। प्राणोऽस्मीति प्राण-शब्दः प्राणविशिष्टार्थकः। जीवतीत्यादिव्यवहारस्तु प्राणस्यात्मभिन्नत्वेऽपि संगच्छते। देहेन्द्रियमनसां प्रवृत्तिरपि प्राणविशिष्टात्माधीनैव। न तु प्राणमात्राधीना। मम प्राणा इति व्यतिरेकप्रत्ययेन तयोर्भेदश्च स्पष्टः।

ज्ञानात्मवादशङ्का, तन्निरासश्च

चार्वाकैकदेशिनस्तु ज्ञानशून्यदशायां भोगाभावेन ज्ञानसन्ततेरेव भोक्तृत्वं यस्य भोक्तृत्वं तस्यैवात्मत्वमितिव्याप्त्या ज्ञानस्यैवात्मत्वमिति प्रतिपादयन्ति। अथ भोक्तृत्वं

नामानुभवितृत्वविशेषः। स च ज्ञानानाश्रयस्य ज्ञानमात्रस्य न सम्भवति। अतो ज्ञानाश्रयः कश्चिदात्मा ज्ञानव्यतिरिक्तः अवश्यमभ्युपगन्तव्य इति चेदुच्यते—अनुकूलप्रतिकूलविषयावगाहित्वमेव भोक्तृत्वम्, न त्वनुकूलप्रतिकूलविषयावगाहिज्ञानाश्रयत्वम्, गौरवात्। अतो धीसन्ततिरेवात्मेति।

बौद्धास्तु आलयविज्ञानं प्रवृत्तिविज्ञानं चेति काल्पनिकं ज्ञानभेदमङ्गीकृत्य आलयविज्ञाने ज्ञातृत्वमभ्युपयन्ति। तदेतन्मतद्वयं निरस्यते—

सर्वस्यापि वस्तुनो व्यवस्था ज्ञानाधीनैव। अहं जानामीति प्रत्यक्षे ज्ञानस्य क्रियात्मकस्य ज्ञातृरूपकर्तृधर्मतयैव भानात् ज्ञानं नात्मा। ज्ञानस्यानुकूलप्रतिकूलविषयकत्वमेव भोगः। तदाश्रयत्वं च ज्ञातुः। अत एव मम भोग इति प्रतीतिश्चोपपद्यते। सर्वं क्षणिकमिति वदतो बौद्धस्य ज्ञानस्यापि क्षणिकत्वात् तन्मते योऽहमद्राक्षं स एवाहं स्पृशामीति प्रत्यभिज्ञया आत्मनः प्रतिसन्धानानुपपत्तिः। अतो ज्ञानव्यतिरिक्तः नित्यो ज्ञाता कश्चिदेष्टव्यः।

नित्यज्ञानेनात्मान्यथासिद्धिशङ्का; तन्निरासश्च

अथ ज्ञानस्य क्षणिकत्वे हि प्रतिसन्धानानुपपत्तिः, नित्यत्वे तु तदभावात्। यस्य मते आत्मवत् तद्धर्मभूतं ज्ञानमपि नित्यम्, तन्मत नित्येन धर्मभूतज्ञानेनैव प्रसरणभेदेन सर्वव्यवहारनिर्वाहे सति किमर्थं तदाश्रयभूतात्मकल्पनमिति चेदभिधीयते—यदि वयं प्रतिसन्धानानुपपत्त्या धर्मभूतज्ञानं तदाश्रयमात्मानं च साधयामः, तदा चाद्यस्यास्यावसरः। अस्माभिस्तु यथाश्रुति पदार्थः स्वीक्रियते, "न हि विज्ञातुर्विज्ञातेर्विपरिलोपा विद्यते" इति श्रुतौ विज्ञातुर्विज्ञातेरित्यनेन आत्मनः ज्ञानाश्रयत्वं षष्ठ्या च ज्ञानज्ञात्रार्व्यतिरेकः विपरिलोपो न विद्यत इत्यनेन धर्मभूतज्ञानस्य नित्यत्वं च प्रत्यपादि। 'अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा:" इत्यात्मनो नित्यत्वं चोपपादि। अतः यथाप्रमाणं ज्ञानं तदाश्रय आत्मा च नित्यतयाऽङ्गीक्रियत इति न श्रुतिसिद्धार्थे लाघवगौरवविचारावसरः।

ननु श्रुतावपि विज्ञानात्मा पुरुष इति जीवस्य ज्ञानरूपत्वाभिधानात् आत्मनो ज्ञानातिरेकसिद्धिः कथमिति चेन्न। अत्र अहमर्थं पुरुषमुद्दिश्य ज्ञानत्वं विधीयते—न तु ज्ञानमुद्दिश्यात्मत्वम्। अहं जानामीति प्रत्यक्षे अहमर्थस्य पुरुषस्य ज्ञानाश्रयतया धर्मभूतज्ञानभिन्नत्वेन च भानात् जानात्येवायं पुरुष इति श्रुतावपि कण्ठतः पुरुषस्य ज्ञानाश्रयत्वप्रतिपादनात्; धीः नात्मा तद्धर्मतया प्रतीयमानत्वादित्यनुमानेनापि आत्मभेदसाधनाच्च। इदं चात्मनि विधीयमानं ज्ञानत्वं धर्मभूतज्ञानमिव धर्मान्तरम्। ज्ञानत्वं नामार्थप्रकाशकत्वम्, तच्च धर्मधर्मिणोरुभयोः ज्ञानात्मनोरनुगतम्। तत्र धर्मिरूपं ज्ञानं प्रत्यक्त्वानुकूलत्वादिस्वासाधारणधर्मविशिष्टात्मप्रकाशकम्। धर्मभूतज्ञानं तु स्वप्रकाशकं सत् स्वान्यघटादिपदार्थस्यापि प्रकाशकमिति विवेकः। विज्ञानघन एवे-

त्यादिश्रुतौ एवकारेण आत्मनो ज्ञातृत्वादिनिषेधात् कथं ज्ञातृज्ञानोभयरूपत्वं तस्येति न शङ्क्यम्। एवकारेण किञ्चिदंशेऽपि ज्ञातुरात्मनः ज्ञानत्वायोगरूपं जडत्वं नास्तीति बोध्यते। तेन न ज्ञातृत्वनिषेधरूपान्ययोगव्यवच्छेदकत्वम्, किन्त्वयोगव्यवछेदकत्वमेवेति पर्यवस्यति। एवं च सति ज्ञातृत्वमभ्युपगम्य जडत्वं मन्यमानानां नैयायिकादीनां मतव्यावृत्तिरस्य प्रयोजनमिति सिद्धम्। एतावता देहेन्द्रियमनःप्राणधीभ्योऽन्यः आत्मेति निरूपितः।

जीवब्रह्मभेदः

अथ जीवानां मिथो भेदः; ब्रह्मणो जीवभेदश्च निरूप्यते। तत्र केचित् "अयमात्मा ब्रह्म, तत्त्वमसि" इत्यादिश्रुत्या जीवब्रह्मतादात्म्यप्रतिपादनात् जीवस्तु परस्य ब्रह्मण औपाधिकांशः, घटाकाशमहाकाशवत्तयोर्भेदः, जीवानां मिथो भेदश्च घटाकाशकरकाकाशवत् इति। अन्ये तु सन्मात्रं ब्रह्म, तस्य अंशा जीवाः। एते च जीवाः पृथिव्यादिभूतपरमाणव इव स्वतः परस्परं भिन्नाः। यथा पृथिव्याद्यंशानां परमाणूनां प्रतिनियतरूपपरिमाणादिमत्वं तथा सद् ब्रह्मांशानां स्वतो भिन्नानां जीवानां प्रतिनियतानुभवजन्यस्मृत्यादिप्रतिसन्धानमुपपद्यते। अस्मिन्मते ब्रह्मणा सह जीवानां भेदः स्वाभाविकः, अभेदोऽपि स्वाभाविकः, अंशांशित्वेन भेदाभेदश्रुतीनां निर्वाह इति। अपरे तु अविद्यापहितं ब्रह्मैव जीवः, स च सर्वशरीरेष्वेक इति। अत्र "यद्यन्योऽस्ति", "एको ऽहं देवः", 'पण्डितास्समदर्शिनः", "मित्रामित्रकथा कुतः" इत्यादयः प्रमाणमिति वदन्ति। तदेतन्मतत्रये यथाक्रममनुपपत्तिः प्रदर्श्यते—

जीवाः मिथः स्वाभाविकभेदवन्तः, धीस्मृतीच्छादीनां प्रतिनियतत्वात्। यथा घटत्वादिधर्माणां पटाद्यवृत्तित्वे सति नियमेन घटादवृत्तित्वात् घटादीतरपदार्थव्यावर्तकत्वम्, तथैव तत्तदनुभवजन्यस्मृतेः तत्तन्मात्रवृत्तित्वनियमात् तदितरव्यावर्तकत्वम्। तथा चैकैकशरीरावच्छिन्नानां अनुभवस्मृत्यादीनामेकाश्रयतया प्रतिसन्धानवत् शरीरान्तरावच्छिन्नानामेकाश्रयतया प्रतिसन्धानविरहात् तत्तदनुभवजन्यस्मृत्यादयः तन्मात्रवृत्तय इति नियम उपपद्यते। अन्यथा भेदस्यौपाधिकत्वे अभेदस्य स्वाभाविकत्वेनात्मक्ये सति सौभर्यादिरनेकशरीरावच्छिन्नभोगानामेकाश्रयत्वप्रतिसन्धानवत् चैत्रमैत्राद्यनुभवानामप्येकाश्रयत्वेनानुसन्धानं स्यात्, न चैवं प्रतिसन्दधाति कश्चित्, अतो भिन्ना एवात्मानः। अत्रायमनुमानप्रयोगश्च—चैत्रात्मा मैत्रतादात्म्यरहितः, मैत्रानुभवजन्यस्मृत्यनाधारत्वात् कदाचिदपि मैत्रगतसुखादिप्रतिसन्धानराहित्यादित्यादिः।

अथात्मन एकत्वेऽपि शरीरभेदेन मनोभेद अङ्गीक्रियते, अतश्च चैत्रमैत्रादिशरीरभेदेन सम्भूतानामनुभवादीनां तदन्यत्राप्रतिसन्धानमुपपद्यत इति चेन्न। स्वयमागतविज्ञाना इत्यादौ जातिस्मराणां केषाञ्चित् कल्पभेदेन मनोभेदसत्त्वेऽपि पूर्वानुभूतप्रति-

सन्धानदर्शनात् चेतोभेदस्य व्यवस्थापकत्वासम्भवात् । एवं शरीरबाह्येन्द्रियभेदात् यथा व्यवस्था न भवति, तथैव चेतोभेदादपि । अपि च ईश्वरात् मिथश्च जीवानां निरुपाधिकभेदः पृथगात्मानं प्रेरितारं च मत्वा "जुष्टं यदा पश्यत्यन्यमीशम्" इत्यादि-श्रुतिसिद्धिः । निरुक्तश्रुतिषु औपाधिकभेद एव प्रतिपाद्यत इति न वक्तुं शक्यम्, तत्र प्रमाणाभावात् । 'अयमात्मा ब्रह्म' तत्त्वमसीत्यादौ तादात्म्यव्यपदेश एव तत्र मान-मिति चेन्न । "आदित्यो यूपः" इत्यत्र यूपस्य यथाऽऽदित्याभेदः प्रत्यक्षविरुद्धः, तथा अज्ञत्वसर्वज्ञत्वयोः विरुद्धत्वेन तयोस्स्वरूपैक्यं न वक्तुं शक्यत इति तत्र शरीरशरीरि-भावादिद्वारा सामानाधिकरण्यं समर्थनीयम् । अतश्च निरुपाधिकभेद एव श्रुत्या प्रतिपाद्यते ।

द्वितीयपक्षे भेद इव अभेदस्यापि स्वाभाविकत्वे निखिलजीवगतदोषजातमनव-धिकं सद्रूपे ब्रह्मणि प्रसज्यत इति दोषो दुरुद्धरः । अतो भेद एव स्वाभाविकः । पूर्वोक्त-रीत्या सामानाधिकरण्यनिर्वाहः ।

तृतीये यानि प्रमाणानि उदाहृत्य भेदोऽपारमार्थिकः, अविद्योपहितं ब्रह्मैव जीवः, स च सर्वशरीरेष्वेक इति यन्निरूपितं तत्रोच्यते—जीवैक्यं तावत् साजात्यमवलम्ब्योक्तम् । यथा कौसलो मथुरायां व्रीहिं दृष्ट्वा कौसलव्रीहिणा एक एवायं मथुरायां व्रीहिः, यः कौसले दृष्ट इति वदति । तत्र एक एवायमिति न स्वरूपैक्यं बोधयति, प्रत्यक्षबाधात्; किन्तु सादृश्यम् । तथा जीवेऽपि । ज्ञानानन्दत्वादिसजातीयधर्मवत्वात् पण्डितास्सम-दर्शिन इत्यत्र साजात्यमादाय साम्यं प्रतिपादितम्, न त्वैक्यमादाय । एकत्वे साम्यानु-पपत्तेः । एको देवस्सर्वभूतेषु गूढ इति वचनं तु ईश्वरविषयकम् । मित्रामित्रकथा कुत इति ज्ञानिनो मित्रामित्राद्यभाववचनात् सर्वेषामैक्यं वाच्यम् । अन्यथा स्वव्यतिरिक्त-वस्तुसत्त्वे तद्वचनमसंगतं स्यादिति यदुक्तम्, तन्न समीचीनम् । रागद्वेषादिपरिहारपर-त्वादस्य वचनस्य । रागद्वेषप्रयुक्त एव हि मित्रामित्रभावः, ज्ञानिनां तु ज्ञानानन्दत्वाद्या-कारेण समानत्वात् रागद्वेषाभावात् तत्प्रयुक्तमित्रामित्रकथैव नास्तीति भावः । अपि च निखिलं शरीरं (मयैवात्मवत्) मद्भिन्नात्मरहितं शरीरत्वात् मच्छरीरवत्, सर्वे जीवा (अहमेव) न मद्भिन्नाः पुरुषत्वात्, यथाऽहमित्याद्यनुमानं सर्वशरीरेष्वेक एव जीव इत्यर्थसाधकं यदुक्तम्, तदपि न साधु । नाहं देवदत्त इति प्रत्यक्षेण, नाहं देवदत्तः तदनुभूतप्रतिसन्धानाभावादित्यनुमानेन; नित्यो नित्यानामित्यादिजीवबहुत्वप्रतिपादक-श्रुत्या च बाधितत्वात् । किञ्च देशान्तराण्यपि एतद्घटेनैव घटवन्ति देशत्वादेतद्देशवत्, अन्येऽपि घटा एतद्घटात्मान घटत्वात् एतद्घटवदित्यादिप्रतिबन्धकानुमानमपि प्रयोक्तुं शक्यम् । यदि निरुक्तघटविषयकानुमानस्य प्रत्यक्षविरुद्धत्वं मन्यसे, तर्हि सर्वशरीरेषु

जीवैक्यानुमानस्यापि पूर्वोक्तप्रत्यक्षादिप्रमाणविरोधः तुल्य एव। अतो न जीवैक्यं ब्रह्मणो मिथश्च वक्तुं शक्यमिति भावः।

आत्मनो नित्यत्वम्

आत्मानित्यत्ववादिनः चत्वारः। तेषु बौद्धाः ज्ञानात्मवादिनः सर्वस्यापि पदार्थस्य क्षणिकत्वादेकस्मिन्नपि शरीरे आत्मनानात्वं वदन्ति। प्राणेन्द्रियात्मवादिनः आशरीरस्थायी आत्मेति। पौराणिकैकदेशिनः प्रलयान्तमात्मा वर्तते, तदनु विनश्यतीति। औपनिषदाभासास्तु मोक्षावधिरात्माऽवतिष्ठत इति।

तत्र प्रथमपक्षे आत्मनः क्षणिकत्वे भाविदृष्टफलमुद्दिश्यापि न कश्चित्प्रवर्तेत, फलकाले स्वस्यैवाभावादित्युनुपपत्तिः। द्वितीये ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिविधिविहितयागदानादिवैदिककर्मसु कोऽपि न प्रवर्तेत। एतच्छरीरगतप्राणेन्द्रियादिनाशानन्तरमेव तत्फलावाप्तेः। तृतीये सर्वदुःखनिवृत्तिसहित आत्मनाश एव यदि मोक्षः, तर्हि तादृशस्यात्मनाशस्य प्रलयान्ते स्वयमेवावश्यंभावितया मोक्षार्थं तदुपाये कोऽपि न प्रवर्तेत। तदर्थं श्रुतावुपायोपदेशश्च व्यर्थस्स्यात्। आत्मनाशस्यानिष्टत्वेनापुरुषार्थत्वात् तदुपायं न कश्चिदपि शृणुयादित्यादिदोषः। चतुर्थे तोयेन जीवान् व्यससर्जेति जीवानां सृष्टिः, "पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि" इति लयश्च श्रूयते। एवं "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति" इति वेदवाक्यादपि उत्पत्तिलयौ प्रतिपाद्येते। अतो ब्रह्म एकमेव नित्यम्, तद्भिन्नमखिलं तत एव जनिमत्, तत्रैव विनाशि चेति श्रुतिर्वदतीति स्वनाशरूपमोक्षस्सिद्ध्यतीति।

अत्राभिधीयते–'नित्यो नित्यानाम्', 'अजो नित्यः शाश्वतोऽयं पुराणः', 'न हन्यते हन्यमानेशरीरे','न जायते म्रियते वा' इत्यादिश्रुतिशतेन जीवनित्यत्वमभिहितम्, अतस्तदनुरोधेन क्वचित् सृष्टिलयवादाभ्यां ब्राह्मणो जातः, क्षत्रियो जातः, ब्राह्मणो मृतः, क्षत्रियो मृत इत्यादौ यथा देहसम्बन्धः, तद्विच्छेदद्वारा तदुत्पत्तिविनाशव्यवहारस्तथैव (प्राकृतनैमित्तिकसृष्ट्यादावपि) अचित्संश्लेष-विश्लेषरूपोत्पत्तिविनाशावुच्येते। तोयेनेति, भूतेभ्यस्समुत्थायेति च भूतसूक्ष्मसाहित्योत्थित्योः प्रतिपादनात्, तथात्वावधारणं सुशकमिति भावः। "विज्ञानघन एवैतेभ्यो भूतेभ्यः··· ··· ···· ····· अनुविनश्यति" इत्यत्र विनाशपदं 'णश अदर्शने' इति धातोरदर्शनपरम्, न तु ध्वंसपरम्; 'अविनाशीवारेऽयमात्मा' इति श्रुतेः।

अपि च 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते, स तत्र पर्येति जक्षत्क्रीडन्' इत्यादिना परं ज्योतिरुपसम्पन्नस्य भोगविशेषश्चाभिधीयते। स च आत्मनाशाभ्युपगमे नोपपद्येत। अतो नात्माऽनित्यः।

आत्मपरिमाणविचारः

यो यद्भोगायतनवर्ती, स तत्समपरिमाण इति व्याप्त्या आत्मा देहानुरूपस्थूलत्वाणत्वादिरूपविविधपरिणतिमान्, तथा च अस्मिन् देहेऽहं वर्ते, पादे मे वेदना, शिरसि मे सुखमित्यादिप्रतीतिश्च संगच्छत इति जैना आत्मनो तत्तद्देहानुरूपपरिमाणवत्वं वदन्ति, तन्न युक्तम्, भोगायतनं शरीरवत् गृहादिकमपि, तद्वर्तिनः पुरुषस्य गृहादिसमपरिमाणत्वं नास्ति इति सर्वेषां प्रत्यक्षसिद्धम्; अतो यो यद्भोगायतनवर्ती स तत्समपरिमाण इति नियमस्य व्यभिचरितत्वात् न तया व्याप्त्या देहपरिमाणवत्वं वक्तुं शक्यम् ।

किञ्च मध्यम(देहादि)परिमाणवत्त्वे घटादिवदनित्यत्वापत्तिः, सौभर्यादिवत् नानादेहस्य योगिनो देहभेदेनात्मभेदश्च स्यात् । भवन्मते मुक्तावात्मनो देहपरित्यागाङ्गीकारात् देहप्रयुक्तपरिमाणस्याप्यभावः प्रसज्यते, परिमाणाभावे (पर्यायवत्त्वं) च अवस्थावत्वरूपं द्रव्यत्वमेव न स्यात्, अपरिमितस्यापि द्रव्यत्वे विभुत्वमेव स्यात्, मुक्तो विभुरेव भवतु को दोष इति चेत्, पृथिव्या नित्यपतनवत् मुक्तस्य नित्योर्ध्वगमनं भवद्भिरुच्यते, तच्चापरिमितस्य विभोः न सिद्ध्येत् । अतो मुक्तावशरीरस्य शरीरसमपरिमाणाभावेनान्यादृशस्य कस्यचित्परिमाणस्यावश्यंभावे तदेव परिमाणमात्मनः स्वाभाविकम्; आत्मनस्तत्परिमाणस्य चोभयोर्नित्यत्वात् । तच्च परिमाणं श्रुतिसिद्धमणुपरिमाणमेव ।

नैयायिकास्तु—पादे मे वेदना, शिरसि मे सुखमित्यादिप्रतीतेः काश्यां काञ्च्यां वाऽन्यत्र सर्वत्र सुखदुःखाद्युपलम्भाच्चात्मनः विभुत्वमङ्गीकर्तव्यम् । अणुत्वे च तत्तत्प्रदेशावच्छेदेन शरीरस्यात्मनश्चोभयोरपि गतिः कल्पनीया । विभुत्वे तु देहगतिमात्रस्य कल्पनमिति लाघवम् । नन्वेकस्मिन्देहे जीवे तिष्ठति देशान्तरेषु बहुषु क्षेत्रवित्तसमृद्ध्यादिरूपमेतदीयं कार्यमेतददृष्टबलात् भवतीतोऽष्टम् । आत्मनिष्ठस्यादृष्टस्य कथं देशान्तरे सम्बन्ध इति चेत्, देशान्तरीयवस्तुनस्साक्षाददृष्टाश्रयत्वाभावेऽपि स्वाश्रयात्मसंयुक्तत्वसम्बन्धेन सम्बन्धित्वात् । गुरुत्वं यथा स्वाश्रय इव स्वाश्रयसंयुक्तेऽपि क्रियां जनयति, तद्वददृष्टमपि, पित्रादिकृतसुकृतेनापि पुत्रादेश्शुभक्रियाजननात् । अदृष्टस्य समवायसमवायिसंयोगान्यतरसम्बन्धेन क्रियां प्रति कारणत्वं कल्पनीयमिति स्वाश्रयान्तरसंयोगाय विभुत्वं स्वीक्रियते । तथा च धर्माधर्मौ स्वाश्रयसंयुक्त एवाश्रयान्तरे क्रियां जनयतः, क्रियाहेतुगुणत्वात्; गुरुत्ववदित्यनुमानमप्यस्मिन्नर्थे प्रमाणम् ।

अथ विभोः जीवस्य सर्वैश्शरीरैस्सह सम्बन्धादेकस्य यदा सुखोपलब्धिः, तस्यैव सुखस्य तदेवान्यस्याप्युपलब्धिप्रसङ्ग इति चेन्न । यच्छरीरं यददृष्टोपार्जितम्, तत्तस्य

भोगायतनमिति व्याप्त्या सर्वेषां सर्वशरीरसम्बन्धे सत्यपि न सर्वत्रैकभोगप्रसक्तिः। अपि च सौभर्यादिषु एकस्य जीवस्यानेवशरीराधिष्ठातृत्वं चाणुत्वे नोपपद्यते। नित्यस्सर्वगत इति श्रुतौ सर्वगतत्वोक्त्या च विभुर्जीव इति।

अत्रोच्यते—"तेन प्रद्योतेनैष आत्मा निष्क्रामति..........शरीरदेशेभ्यः", "ये वै केचनास्माल्लोकात्प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ति", "तस्माल्लोकात् पुनरेति" इत्यादिश्रुतौ प्रतिपादिता उत्क्रान्तिगत्यागतयो विभुत्वे नोपपद्यन्ते। "एषोऽणुरात्मा", "वालाग्रशतभागस्य", "आराग्रमात्रः" इत्याद्याः अणुत्वप्रतिपादिकाश्च बहवः श्रुतयः। देहगत्यैवोपपत्तौ आत्मनो गतिकल्पनं गौरवग्रस्तमिति यदभिहितम्, तन्न युक्तम्। यदि वयमनुमानेन प्रकारान्तरेण वा गतिं कल्पयामस्तदा गौरवचोद्यस्यावसरः। यथाश्रुति पदार्थाङ्गीकारे च कल्पनाया अनवकाशात् नायं दोषः। श्रुतौ च जीवस्याणुत्वं गत्यगती च स्पष्टमभिहिताः। अतो न विभूरात्मा। किञ्च धर्माधर्मौ स्वाश्रयसंयुक्त एवाश्रयान्तरे क्रियां जनयतः क्रियाहेतुगुणत्वादिति यदनुमानम्, तत्र सिद्धसाधनमुच्यते—स्वकर्मजन्यौ धर्माधर्मौ न ईश्वरीयप्रीतिकोपाद्भिन्नौ। ईश्वरप्रीतिकोपौ स्वाश्रयभगवत्संयुक्तत्वसम्बन्धेन देशान्तरीयवस्तुष्वपि वर्तेते। तद्वशात्तत्र तत्र सुखदुःखोपलब्धिश्च जीवस्य सम्भवति। नित्यस्सर्वगत इत्यादिश्रुतिः "अग्निर्यथैको भुवनं प्रविष्टः", "वायुस्सर्वत्रगो महान्" इत्यादिवत् अतिसूक्ष्मतया सर्वत्र प्रवेष्टुं योग्य इत्यर्थपरा। आत्मनोऽणुत्वेऽपि सौभर्यादिषु युगपदनेकशरीराधिष्ठानं स्वधर्मभूतज्ञानव्याप्त्या उपपद्यते। एकशरीरावयवेषु बहुष्वपि शिरःकरपादादिषु ज्ञानव्याप्त्यैव युगपत्प्रेरणानिर्वाहः। तथा चायमत्र संग्रहः—अणुश्चेतनो जीवः। अहमिति प्रतीतिसिद्धः, स्वयंप्रकाशः, नित्यो, नाना च। तस्य स्वयंप्रकाशत्वात् ज्ञानत्वव्यपदेशोऽपि। सौभरिप्रभृतीनां शरीरेषु एकमेव शरीरं जीववत्, अन्यानि तु धर्मभूतज्ञानव्याप्ततया सुखाद्युपलब्धिसाधनानि भवन्ति। धर्मभूतज्ञानस्य शास्त्रप्रमाणेन कर्मकृतसंकोचाभ्युगमात् बद्धदशायां संकुचितत्वम्, मुक्तदशायां तु कर्माभावात् विकसितत्वात् सर्वविषयकत्वम्। जीवस्य नित्यत्वेऽपि देहसम्बन्धोत्पत्तिविनाशप्रयुक्त उत्पन्नो जीवः; नष्टो जीव इत्यादिव्यवहारः। स च जीवः त्रिविधः बद्धमुक्तनित्यभेदात्। तत्र बद्धास्संसारिणः कर्मपरवशाः ब्रह्मादिस्तम्बपर्यन्ताः। मुक्ताः कञ्चित्कालं संसारिणो भूत्वा भक्तिप्रपत्तिभ्यां निवृत्तसंसाराः। नित्याः कदाचिदप्यसंसारिणः भगवदनुभवतत्कैङ्कर्यपरा अनन्तगरुडादय इति।

मोक्षस्वरूपं तदुपायादिकं चाग्रिमखण्डे यथाऽवसरं प्रतिपादयिष्यते।

ग्रन्थकर्तृकालदेशादि

मूलग्रन्थकर्तुः श्रीमद्वेङ्कटनाथदेशिकस्य जनककूटस्थाः विश्रुतविभवाः काञ्चीनगरमधिवसन्तो विश्वामित्रगोत्राः अनन्तसोमयाजिनः। तेषां तनूजाः पुण्डरीकाक्षयज्वानः। तत्पुत्रोऽनन्तसूरिः। अनन्तसूरिश्च वेङ्कटनाथजनकः। वेङ्कटनाथस्य माता तोतारम्बेत्याख्या। तदाह—

पिता यस्यानन्तसूरिः पुण्डरीकाक्षयज्वनः।
पौत्रो यस्तनयस्तोतारम्बायास्तस्य मङ्गलम्॥ इति।

एतेषां जननकालः कल्यब्दे ४३६९ (A.D. 1268) विभवनामवत्सरे श्रवणनक्षत्रयुक्ता भाद्रपदशुक्लदशमीति प्रसिद्धः। एते भगवतः श्रीवेङ्कटेश्वरस्य प्रसादात् तदीयावभृथोत्सवदिने तद्घण्टावतारत्वेनावतीर्णा इति कृत्वा वेङ्कटनाथ इत्येव नामकरणं तत्पिताऽकरोत्।

वेङ्कटनाथोऽयं यथाकालं स्वजनकेनानन्तसूरिणोपनीतः स्वमातुलादात्रेयरामानुजाचार्यात् वयसो विंशतिवर्षेभ्यः प्रागेव साङ्गवेदम्, काव्यनाटकालङ्कारान्, पद-वाक्य-प्रमाणानि, उभयवेदान्तं चाधिजगे। तथा चोक्तम्—

रामानुजार्यादात्रेयान्मातुलात् सकलाः कलाः।
अवाप विंशत्यब्दे यस्तस्मै प्राज्ञाय मङ्गलम्॥ इति।

एतेषां जननविषये किञ्चिद्वैशिष्ट्यमैतिह्यविदो महान्तो वदन्ति—भगवान् वेङ्कटेश्वर एकस्यां रात्रौ अनन्तसूरेः स्वप्ने आविर्भूय स्वधर्मपत्न्या तोतारम्बया सह स्वसेवनार्थं वेङ्कटाद्रिमागन्तुमन्वशिषत्। तौ दम्पती प्रातरेव काञ्चीतः प्रस्थायाचिरादेव वेङ्कटाद्रिमासाद्य भगवन्तं श्रीनिवासमासेव्य तत्रैव दिनमेकं क्षेत्रवासमकुरुताम्। तदा श्रीवेङ्कटेशस्तयोः स्वप्ने आविर्भूय स्वीयां मणिमयीं दिव्यघण्टां तोतारम्बाया हस्ते प्रदाय 'घण्टेयं युवयोः पुत्रतामापत्स्यत' इत्यनुगृह्यान्तरधात्। अनन्तसूरेर्धर्मपत्नी च सद्य एव तां मणिमयीं घण्टां तेजोरूपेण स्वगर्भमाविशन्तीमद्राक्षीत्। तदनु प्रभाते एतौ दम्पती मुदितमानसौ काञ्चीमागत्य पुत्रजननकालं प्रतीक्षाञ्चक्राते। ततो द्वादशवर्षावसाने सर्वलक्षणसम्पन्नं पुत्ररत्नं सा सुषुवे चेति।

एवमेतेषां प्रतिभातिशयविषयेऽपि किञ्चिदैतिह्यं सप्रमाणं निरूपयन्ति। तच्चेत्थम्—

भगवद्रामानुजाचार्याणां श्रीभाष्यकाराणामन्तेवासिनः चतुस्सप्ततिसंख्याकास्तन्मतस्थापनधुरन्धरतया परिगणिताः। तेषु कुरुकाधीशापरनामधेयश्शठकोपसूरिरन्यतमः। तेषां प्रशिष्याः विष्णुचित्तगुरोश्शिष्याश्च वात्स्यवरदगुरुः (नडादूरम्माल्) इति विख्याताः काञ्च्यां श्रीभाष्यप्रवचनादिकं कुर्वन्त आसन्। तदानीमेते षड्वर्षीया वेङ्कटनाथदेशिकाः स्वमातुलैरात्रेयरामानुजाचार्यैस्सह श्रीभाष्यगोष्ठीं सेवितुं तत्र गताः। तदा तद्गोष्ठीस्था विद्वांस आजानसिद्धदिव्यब्रह्मवर्चससंयुतं बालकमेनं दृष्ट्वा तदीयावतारवैभवातिशयं परस्परं श्रावयन्तस्सर्व एव श्रीभाष्यव्याख्यानविच्छेदप्रकरणं

तदा विसस्मेरुः। तस्यामवस्थायां बालकस्सन्नपि वेङ्कटनाथोऽयं विच्छिन्नं तत्प्रकरणं तेभ्यः स्मारयामास। तेन चाचार्या विस्मयाविष्टचेतसो वरदगुरव एतस्य मेधाविशेषं प्रशस्य 'वत्स ! —

'प्रतिष्ठापितवेदान्तः प्रतिक्षिप्तबहिर्मतः।
भूयास्त्रैविद्यमान्यस्त्वं भूरिकल्याणभाजनम्' ॥

इत्यन्वगृह्णन्। तदेतन्निखिलं ग्रन्थकृता सूचितम्—

नानासिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेस्तनूजः
वैश्वामित्रस्य पौत्रो विततमखविधेः पुण्डरीकाक्षसूरेः।
श्रुत्वा रामानुजार्यात् सदसदपि ततस्तत्त्वमुक्ताकलापं
व्यतानीत् वरदगुरुकृपालम्भितोद्दामभूमा ॥ इति।

एते वेङ्कटनाथार्याः स्वमातुलादधीतसकलविद्याः मातुलकालानन्तरं तत्रैव काञ्चीक्षेत्रे ग्रन्थप्रवचनपरास्सन्तो न्याय–व्याकरण–मीमांसादीनि सामान्यशास्त्राणि, श्रीभाष्यादिकं शारीरकं च शिष्यगणानध्यापयामासुः।

अपि च नैकशास्त्रेषु बहवो ग्रन्था विनिर्मिताः। ते च यथा—

मीमांसापादुका–सेश्वरमीमांसा चेति पूर्वमीमांसायाम्।

वेदान्ते

१. तत्त्वमुक्ताकलापः
२. सर्वार्थसिद्धिः (तत्त्वमुक्ताकलापव्याख्या)
३. शतदूषणी
४. तत्त्वटीका
५. न्यायपरिशुद्धिः
६. न्यायसिद्धाञ्जनम्
७. परमतभङ्गः
८. अधिकरणसारावलिः
९. अधिकरणदर्पणः
१०. चकारसमर्थनम्
११. ईशावास्योपनिषद्भाष्यम्
१२. गीतार्थसंग्रहरक्षा
१३. तात्पर्यचन्द्रिका, इत्याद्याः।

धर्मशास्त्रे

१. यज्ञोपवीतप्रतिष्ठा
२. आराधनक्रमः
३. सच्चरित्ररक्षा
४. श्रीपाञ्चरात्ररक्षा
५. निक्षेपरक्षा
६. वैश्वदेवकारिका, इत्याद्याः।

वैद्यकशास्त्रे

१. रसभौमामृतम्
२. वृक्षभौमामृतम्

शिल्पशास्त्रे

१. शिल्पार्थसारः

ज्योतिषशास्त्रे

१. भूगोलनिर्णयः

काव्ये

१. यादवाभ्युदयः
२. हंससंदेशः
३. सुभाषितनीवी
४. पादुकासहस्रम्

नाटके

१. संकल्पसूर्योदयः

स्तोत्रे

१. हयग्रीवस्तोत्रम्
२. दयाशतकम्
३. वरदराजपञ्चाशत्
४. अच्युतशतकम्
५. देवनायकपञ्चाशत्
६. अभीतिस्तवः
७. गरुडपञ्चाशत्
८. श्रीस्तुतिः
९. भूस्तुतिः
१०. रघुवीरगद्यम्
११. गोदास्तुतिः, इत्याद्याः।

संस्कृत-द्राविडमणिप्रवालमयाः—रहस्यत्रयसारः, संप्रदायपरिशुद्धिः, तत्त्वपदवी, रहस्यपदवी इत्याद्याः द्वात्रिंशत् रहस्यग्रन्थाः।

अनुवादग्रन्थाः—

द्रमिडोपनिषत्सारः, तात्पर्यरत्नावली इत्याद्याः दिव्यप्रबन्धविवरणपराः संस्कृतभाषानुवादरूपाः। इताऽन्येऽपि बहव एतद्विरचिताः। तेष्वपि केचन नोपलभ्यन्ते।

कदाचित् केचिन्मतान्तरस्थाः पण्डिताः श्रीरङ्गक्षेत्रमागत्य रामानुजसिद्धान्तप्रवर्तनपरान् सुदर्शनसूरिप्रभृतीन् विद्वद्वरेण्यान् शास्त्रार्थविषये वादाहवाय आहूयास्मान-विजित्य भगवतः श्रीरङ्गनाथस्य श्रीपाञ्चरात्रोक्तागमप्रक्रियया नित्याराधनादिकं न कर्तव्यमित्युपप्लवं चक्रुः। श्रीसुदर्शनसूर्यादय अतीववार्धक्यवशात् चिरकालं वादाहवं सोढुमशक्नुवन्तो वेङ्कटनाथाय तां धुरं नियोजयामासुः। वेङ्कटनाथोऽपि तेषामादेशं शिरसा प्रतिगृह्य श्रीरङ्गमागत्य वादे प्रतिवादिनो निर्जित्य भगवदाराधनं यथापूर्वं निरवर्तयत्। तेन च भगवान् श्रीरङ्गनाथः अतीव प्रसन्नो भूत्वा 'वेदान्ताचार्यः' इति बिरुदमस्मै प्रदाय भागवतविद्वद्गोष्ठ्यामाचार्यं श्रीमद्वेङ्कटनाथं तन्नाम्ना ख्यापयामास। श्रीरङ्गनाथस्य महिषी श्रीरङ्गनायकीदेवी च तं वेङ्कटनाथं 'सर्वतन्त्रस्वतन्त्र' इति बिरुदेन बहुमन्यते स्म। तदनु साक्षिणो विद्वांसो मिलित्वा तं वादक्रमं ग्रन्थरूपेण विलिख्य तस्य 'शतदूषणी' इति नाम च चक्रुः। यतस्तत्र शतं दूषणानि प्रतिपादितानि, ततश्शतदूषणीति नाम्ना प्रसिद्धिमवाप।

अथ कदाचिदहीन्द्रपुरे भगवन्तं श्रीदेवनाथं संसेवमानो ग्रन्थप्रवचनपरश्चासीद् वेङ्कटनाथः। तत्र भूयोऽपि श्रीरङ्गे पूर्वं पराजिता वावदूकास्स्वेतरान् बाह्यानबाह्यांश्चामन्त्र्य तैर्मिलितास्सन्त आचार्यवर्यं वेङ्कटनाथं वादार्थमचोदयन्। तदानीं वादाहवे तान् सर्वानपि प्रतिवादिनः प्रत्येकं जिगाय। तस्मिन् काले भगवान् श्रीदेवनाथोऽनेन नितरां प्रीतः "**कवितार्किक सिंह**" इति बिरुदेनाहूय वेङ्कटनाथं स्वकटाक्षपात्रमकरोत्। तमेव वादक्रमम् आनुपूर्वीक्रमेण विलिख्य **परमतभङ्ग** इति नाम्ना ग्रन्थमिमं विद्वांसो व्यवहरन्ति। अतस्तेषां मङ्गलाशासनकाले गुरुपरम्परानुसन्धानकाले च श्लोकानिमानद्यापि सर्वेऽनुसंदधति च यथाप्रकरणम्—

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥
सर्वतन्त्रस्वतन्त्राय सिंहाय कविवादिनाम्।
वेदान्ताचार्यवर्याय वेङ्कटेशाय मङ्गलम्॥
कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥ इति।

एते चाचार्यवरास्सदाचार्योपदिष्टेन गारुत्मतेन मन्त्रेण गरुत्मन्तमाराधयितुकामा अहीन्द्रपुरक्षेत्रे ओषधिगिरौ गरुडमन्त्रमनवरतं जपन्ति स्म। ततः प्रसन्नेन गरुत्मता हयग्रीवमन्त्र उपदिष्टः। स च मन्त्रोऽसकृदनुसंहितः। तदनु एकदा प्रसन्नो हयग्रीवोऽस्मै वेङ्कटनाथाय प्रतिवादिनिरसनसामर्थ्यम्, सर्वतन्त्रनिष्णातत्वम्, वादाहवशूरत्वं चानुजग्राह। तत्प्रसादेन हयग्रीवः स्तोत्रादीन् बहून् ग्रन्थान् रचयामासु.।

आचार्यस्य वैराग्यविशेषः; आत्मगुणाश्च

विजयनगरराजसदसि लब्धप्रतिष्ठेनैतेषां विषये नितरां सम्मान्यताबुद्धिमाबिभ्राणेनैतत्समकालिकेनानितरसाधारणं सम्मानं कारयितुं राजसकाशात् विशिष्टाह्वानपत्रप्रेषणपूर्वकमभ्यर्थिता अप्येते वेदान्तगुरवः ख्यातिलाभपूजासु आत्मनो वैमुख्यम्, 'न राज्ञः प्रतिगृह्णीयात्' इति निषेधात् राजद्रव्यस्य चाग्राह्यतामाविश्चक्रुः। वैराग्यपञ्चकमिति यस्य राज्ञः प्रत्युत्तररूपं ग्रन्थरत्नमेतैर्व्यधायि। यत्रैतदर्थकश्लोका उपलभ्यन्ते।

अपि चैते सर्वातिशयितवैदुष्यपूर्णास्सन्तोऽपि मनागपि गर्व-मात्सर्यादिहेयगुणरहिताः। अथाष्टावात्मगुणाः—दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलम-

कार्पण्यमस्पृहेति। 'यस्यैते चत्वारिंशत्संस्कारा न चाष्टावात्मगुणाः, न स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति' इति महर्षिगौतमोपदिष्टात्मगुणपरिपूर्णाः, सर्वेषामादर्शपुरुषाश्चाभूवन् ।

वस्तुतस्तु ज्ञानानुष्ठानवैराग्यशेवधीनामेतेषामाचार्यसार्वभौमानां तपस्विनां जीवनचरित्रादिवैभवमधिकृत्य बहुभिर्विद्वद्भिः प्रतिविषयं तदीयग्रन्थप्रमाणोदाहरणपूर्वकं नानाभाषासु नैके प्रबन्धाः प्रणीताः। तावद्भिरपि न निःशेषेण प्रतिपादिता इव । तादृशां महतां महनीयगुणानां कथनेन अस्माकं जन्मसाफल्यं स्मृत्वा, संभाष्य पुण्यकृतो मनसा ध्यायेत् इति वचनार्थं मनसि निधाय तेषां ज्ञान-वैराग्यादिगुणविशेषानधिकृत्य दिङ्मात्रेण केचनैव विषया अत्र लिखिताः। इतोऽन्यस्मात् ग्रन्थविस्तरभिया विरम्यते ।

व्याख्यातुरानन्ददायिनीप्रणेतुः परिचयः

आनन्ददायिनीरचयितारः कदा कं देशमलञ्चक्रुरित्यादिविषये तदीयमङ्गलश्लोकान्तर्गतकतिपयपद्यैरित्थमवगम्यते—

इमे नृसिंहदेव इति सुगृहीतनामानः श्रीवत्सगोत्राः नरसिंहसूरेः पुत्राः। तोतारम्बेत्येतेषां मातृनाम। देवराज इति पितामहः, श्रीभाष्यश्रीनिवास इति मातामहश्च। तदेतत्—

श्रीवत्सगोत्राम्बुधिमध्यदेशात्
बभूव चन्द्रो नरसिंहनामा ।
तस्यात्मजः साधु जनैकसेवी
नृसिंहदेवः प्रथितो धरायाम् ॥
तोतारम्बातनयः पौत्रः श्रीदेवराजस्य ।
दौहित्रः कुशिककुलश्रीभाष्यश्रीनिवासस्य ॥

इति पद्यद्वयेन स्पष्टमभिहितम्। एतेषां सामान्यशास्त्रगुरुः अप्पलाचार्य इति प्रतीयते। पञ्चमपद्ये—'कुशककुलजलधिचन्द्रो निगमान्तगुरुः श्रीनिवासो नः" इति कौशिकश्रीनिवासस्य वेदान्तगुरुत्वाभिधानात्; षष्ठपद्योत्तरार्धे—'अप्पलाचार्यवर्यं तं भजे विद्यागुरुं मम' इति पाठान्तरोपलम्भाच्च ।

अथ यो वेदान्तगुरुः श्रीनिवासः, स एव मातामहश्रीभाष्यश्रीनिवासः ? उत भिन्न इति शङ्का समुदेति। तत्र मातामहनाम्नि श्रीभाष्येति उपपदस्याधिक्येन श्रवणात्

तयोर्भेदो न सिद्ध्येत्, प्रत्युत उभयत्र कौशिकगोत्रत्वाभिधानेनैक्यमेव प्रतीयत इति चेत्, सत्यं श्रीभाष्येत्युपपदमात्रं न भेदप्रयोजकं मन्यते; किन्तु प्रतिपद्यं कुशिककुलेति श्रवणात् तस्य द्विवारमावृत्त्या भेद इष्यते, अन्यथा एकत्रैव कुशिककुलेत्यभिधानेन तस्य कौशिकगोत्रत्वं ख्यापितं स्यात्, तथा च द्विवारमावृत्तिरनुपपन्ना। अपि च यदि मातामह एव वेदान्तगुरुस्तदा तथैवावश्यं निरवेक्ष्येत, तथाऽभावात् भिन्न इत्येव प्रतिभाति।

अन्या च शङ्का प्रतिसरमन्ते कुशिककुल .... वेदान्ताचार्यस्य भागिनेयेन नृसिंहदेवेन विरचितायामानन्ददायिन्यां 'प्रथमसरस्समाप्तः' इति वाक्ये वेदान्ताचार्यस्य भागिनेयेनेत्युल्लेखात् कदाचित् तत्त्वमुक्ताकलापग्रन्थकर्ता आनन्ददायिनोः रचयितुर्मातुलो वेति समुन्मिषति, सापि "दौहित्रः श्रीभाष्यश्रीनिवासस्य" इति तदीयस्पष्टवचसैवापाकृता। यदि तत्त्वमुक्ताकलापग्रन्थकृदस्य मातुलोऽभविष्यत्, तदा तदीयपिताऽनन्तसूरिरेव मातामहस्स्यात्; तथा चानन्तसूरेर्दौहित्रत्वेनैव आत्मानं कथयेत्। अतो भिन्ना एवेमे वेदान्ताचार्याः।

एतेषां नाम नृसिंहदेव इति, एतत्पितॄणामपि नाम नरसिंह इति, स्वाराध्यदेवस्यापि "मृगपतिनराकारघटितः..... ....अमृतफलवल्लीसहचरः" इत्यनेन नरसिंहत्वकथनात् वंशपरम्परया सर्वोऽपि नरसिंहभक्तस्सन् काञ्चीमण्डलान्तर्गत**चोलसिंहपुरवास्तव्यः** स्यादित्यभ्यूहितुं शक्यते।

कालविषये एतेषां पितामहेन देवराजेन विम्बप्रकाशनाम्नि स्वकीयग्रन्थे न्यायामृतग्रन्थस्यानुवादकरणात् न्यायामृतग्रन्थकर्तुः व्यासतीर्थस्य कालः खैस्तषोडशशतक इति प्रसिद्धत्वात् ततोऽप्यर्वाचीनत्वं सामान्यतः प्रतीयते।

एतैः प्रणीता अन्ये च ग्रन्थाः—१—भेदधिक्कारन्यक्कारः, २—मणिसारधिक्कारः ३—सिद्धान्तनिर्णयः ४—परतत्त्वदीपिका इत्याद्याः।

एतेषां नृसिंहराज इति नामान्तरेणापि व्यवहारः। अत एवास्य व्याख्यानस्य नृसिंहराजीयमित्यपि नामान्तरं प्रथते। अस्यां व्याख्यायामिदमसाधारणं यत्—बौद्धादिमतस्यानुवादावसरे प्रतिपङ्क्ति हृदयङ्गमामवतारिकां प्रदाय तत्तन्मतप्रतिपाद्यार्थविशेषो निरूपित इति। तदेतत् स्वयमेव चादौ प्रतिज्ञातवान्

अप्रसिद्धस्य पक्षस्य विस्तरेण प्रकाशिकाम्।
सर्वार्थसिद्धि सट्टीकां करोम्यानन्ददायिनीम्॥ इति।

अक्षरार्थव्याख्याकारपरिचयः

अक्षरार्थव्याख्यातारः देशिकदर्शनधुरन्धर, रामानुजसिद्धान्तभास्करेत्यादि-विरुदभूषिताः तिरुमलैचतुर्वेद-शतक्रतु-नावल्पाक्कं अय्या श्रीदेवनाथताताचार्याः श्रीमन्नाथयामुनश्रीशैलपूर्णप्रमुखवहुतरवेदान्तस्थापकदिव्यसूर्यवितारचारुत्तरे सद्वंशे ज्ञानानुष्ठानवैराग्यशेवधीनां ति-च श-ना अय्या श्रीनरसिंहताताचार्यस्वामिनां आत्मजत्वेन (A. D 1896) दुर्मुखिसंवत्सरे कटकमासे आर्द्रानक्षत्रे प्रादुरभूवन् । स्वपितृचरणैरेव बाल्ये वयसि यथाकालमुपनयनादिभिस्संस्कारिताः । वयसो विंशतिवर्ष एव साङ्गवेदं न्यायमीमांसादिसामान्यशास्त्रं, वेदान्तशास्त्रं चाधीत्य धर्मशास्त्रोक्तरीत्या पाञ्चकालिकवर्त्मना काञ्चीमण्डलान्तर्गतनावल्पाक्काग्रहारे भगवदाराधनैकवेषेण नित्यकर्मादिकमनुतिष्ठन्तश्चिरं विरेजिरे । त्रिंशद्वारं श्रावितवेदान्त इतिवदेतेऽपि अनेकवारं स्वान्तेवासिगणेभ्यः शारीरकशास्त्राध्यापनं भगवद्रामानुजाचार्येण नियमितकैङ्कर्येषु प्रथमकैङ्कर्यत्वेन परिगणितं श्रीभाष्यप्रवर्तनमकुर्वन् । एते च विभवनामसंवत्सरे तुलाकृष्णतृतीयां (२७-१०-८८) श्रीवैकुण्ठमलञ्चक्रुः । एतैश्च कदापि विना वेतनादिभृतिं यथाशास्त्रं बहुभ्यश्छात्रेभ्यो न्यायादिसामान्यशास्त्रं तथा वेदान्तशास्त्रं चोपदिष्टमित्ययं विषयो नितरां महनीयः । वस्तुत एतैराचार्यैरेकाकिभिः स्वगृह एव स्थित्वा विद्याविषये यन्महायोगदानं कृतं यादृशी साधना च व्यरचिता, सा विश्वविद्यालयेनापि न समपादि । तथा विद्यासंरक्षणायात्मत्यागोऽकारि । एतैराचार्यवर्यैः अनेके ग्रन्थाः प्रणीताः । ते यथा—१-वेदान्तवैजयन्ती, २-न्यायकुसुमाञ्जलिव्याख्या न्यायवासना, ३-तत्त्वमुक्ताकलापव्याख्या अक्षरार्थः, ४-सूत्रानुगुण्यसिद्धिविमर्श इत्यादयः । तेषामितिहासविषये इतोऽन्ये विशेषाः वेदान्तवैजयन्ती—न्यायकुसुमाञ्जलि—यज्ञोपवीततत्त्वविमर्शग्रन्थभूमिकायां जिज्ञासुभिरवगन्तव्याः ।

यद्यपि तत्त्वमुक्ताकलापस्य स्वोपज्ञसर्वार्थसिद्धिव्याख्या विद्यते । तत्र प्रासङ्गिकतया मतान्तरविषयविचाराः गम्भीरा बहवः कृताः । अतस्तस्याः गहनत्वाद्विस्तृतत्वाच्च मूलार्थो गवेषणीयो भवतीत्यक्लेशेन मूलार्थबोधाय सरलशैल्या व्याख्येयं व्यरचि ।

अक्षरार्थव्याख्यानस्था विशेषाः

तत्त्वमुक्ताकलापस्य (आद्य) मङ्गलश्लोके सर्वविद्यानां लक्ष्म्यधीनत्वेनादौ लक्ष्मीः सङ्कीर्त्यत इति सर्वार्थसिद्धौ व्याख्यातम् । एते आचार्याः तच्छैलीमनुसन्धाय अक्षरार्थे सर्वविद्याप्रवर्तकत्वात् लक्ष्म्याः यथा आदौ सङ्कीर्तनम्, तथैव हयवदनमूर्तेः वेदापहारिमधुकैटभसंहारेण पुनः ब्रह्मणो वेदोपदेशद्वारा सर्वविद्याप्रवर्तकत्वात् कैटभारेरिति पदस्य श्लोकान्ते सन्निवेशः कृतः । एवञ्च विद्याप्रवर्तकत्वसामान्यधर्मपुरस्कारेण

लक्ष्मीत्युपक्रम्य कैटभारेरित्युपसंहारात् लक्ष्मीहयवदनरूपभगवदवतारमूर्तिरत्रानुसन्धीयत इति प्रतीयते। लक्ष्मीहयवदनवपुषः शुद्धस्फटिकसङ्काशत्वेन प्रसिद्धत्वात् कालिमा कैटभारेरिति मूलोक्तं कथं घटत इत्याशङ्क्य जपासन्निधिना स्फटिके लौहित्यप्रतीतिवद् भगवद्विग्रहे लक्ष्म्या नित्ययोगात् तदीयनेत्रकान्तिसन्ततिसन्निधानात् कालिमाऽनुसन्धानमपि नानुपपन्नमिति प्रत्यपादयन्।

जीवसरे "कश्चिद्धीरः प्रत्यगात्मानमैक्षत्" इति श्रुतौ आत्मविशेषणतया प्रतीयमानं प्रत्यक्त्वं किं रूपमिति विचारे उदयनाचार्याः "प्रत्येतुः प्रत्येतव्यादव्यतिरेकः" इत्याहुः। प्रत्येतव्यः—ज्ञानविषयः तस्मात् प्रत्येतुः—ज्ञातुरव्यतिरेकः—अभेद इत्यर्थः। तन्मते आत्मनो जडत्वान्मानसप्रत्यक्षवेद्यत्वमेव। अर्थात् अहं जानामीति ज्ञाने आत्मनो विषयत्वेन कर्तृतया च भानात् ज्ञेयज्ञात्रोरभिन्नत्वात् स्वविषयकज्ञानाश्रयत्वमेव प्रत्यक्त्वमिति पर्यवस्यति। अस्मन्मते अहं जानामीत्यत्र घटाद्यवभास इव स्वावभासेऽपि प्रतिसम्बन्धितया अञ्चति भासत इति व्युत्पत्त्या "घटादिपरागर्थविलक्षणतया स्वेतरनिरपेक्षमेव स्वभानात् प्रतीपमञ्चतीति व्युत्पत्त्या वा स्वस्मै भासमानत्वरूपं स्वप्रकाशफलित्वं अन्यानधीनप्रकाशवत्वं वा प्रत्यक्-शब्दस्य प्रवृत्तिनिमित्तम्। तच्च अहमिति अहंत्वेनात्मनो भाने भासते। तथा च स्वस्मै भासमानत्वम्, स्वेनैव भासमानत्वमिति द्विविधं प्रत्यक्त्वम्।

अस्य प्रत्यक्त्वस्य प्रकाशविषये धर्मिभास्यं स्वयंप्रकाशमिति पक्षद्वयं वर्तते। स्वस्यैवात्मा तु सिद्धिमित्यत्र सर्वार्थसिद्धौ स्वासाधारणेन केनचित्स्वभावेन विशिष्ट इह स्वशब्दार्थ इति स्वपदस्य विशिष्टपरतया व्याख्यातत्वादात्मप्रकाशेनैव प्रत्यक्त्वं भासत इति प्रथमः पक्षः। शतदूषण्यां संविदनुत्पत्तिदूषणभङ्गवादे स्वमात्रप्रकाशस्याप्यहमर्थस्वरूपस्य अस्माभिः प्रत्यक्त्वानन्दत्वादिविशेषवत्तयैव स्वतःप्रकाशत्वाभ्युपगमेन" इत्यादिग्रन्थेन आत्मनः स्वमात्रप्रकाशमभ्युपगम्य प्रत्यक्त्वादिविशेषवत्तया प्रतीतेरुक्तत्वात् अहं जानामीत्यत्र स्वयंप्रकाशस्यापि धर्मभूतज्ञानस्य विशेषणतया भानवत् प्रत्यक्त्वस्याप्यात्मनि विशेषणतया स्वयंप्रकाशत्वमिति द्वितीयः पक्षः। पक्षद्वयस्यापि श्रीमद्वेङ्कटनाथाभिमतत्वादुपदर्शितप्रमाणवलेन मतद्वयमपि साध्विति न्यरूपयन्।

जीवसरे २८ तमे श्लोके नित्यसंसारिणस्सत्वे असत्वे च भगवति प्रसक्तं दोषमाशङ्क्य परिहारोऽभिहितः। सृष्ट्यादिः भगवतो लीलैव। तस्याप्तकामत्वात्। नित्यसंसारी कश्चिदपि नास्तीति पक्षे सर्वेषामात्मनां मोक्षे सति सृज्यस्यैवाभावात् सृष्ट्यादिविहृतेरुपरमावश्यंभावात् विश्वकर्ता भगवान् प्रतिहतसृष्ट्यादिलीलासंकल्पस्यादिति दोषः।

नित्यसंसारी वर्तत इति पक्षे भगवतो निरुपधिकदयावत्वेन प्रसिद्धस्य तदीय-दुःखानिवारणात् तद्विषयदयाहीनतया निरुपाधिकदयाहानिरिति दोषः।

प्रथमपक्षे परप्रतिरोधाल्लीलां सम्पादयितुमशक्ततया तदुपरतिस्स्यात्तदा प्रतिहत-दोषस्स्यादिति दोषः सम्भवेत्। भगवल्लीलायाः न परप्रतिवन्धादुपरतिः; किन्तु स्वेच्छ-यैव। तदीयप्रवृत्तिवन्निवृत्तेरप्यैच्छत्वात्। तथासत्यप्रतिहतसंकल्प एव स इति नेयमापत्तिः। द्वितीयपक्षे आसुरप्रकृतिषु तत्तज्जीवकर्मवशान्नित्यं दयावरोधः, तावता न निरुपाधिकदयाहानिप्रसङ्गः। तद्विषये कृपारूपेच्छायोग्यतायास्सत्वात् यथा वदान्ये कश्चिद्गर्वादिना न प्रतिगृह्णाति, समीपं वा नायाति, तावता वदान्यस्य का हानिः? तथा यदि कश्चिद्दुष्कर्मवशात् भगवन्तं शरणं न व्रजेत्, तर्हि भगवतो निरुपाधिक-दयायाः कथं हानिः ? सत्सु दैवप्रकृतिषु सा दया सावकाशा।

अयं भावः—नित्यसंसारिविषये कृपायोग्यता वर्तते; परन्त्वेषः संसारी यदि भगवन्तं शरणं गच्छेत्तदा भगवतोऽपि एतद्विषये मोक्षयिष्यामीत्याकारिका इच्छारूपा कृपा जायते। यदैतस्य तच्छरणव्रज्यायां दुष्कर्म प्रतिबन्धकं भवति, तदा भगवतः एतद्विषये सत्यामपि योग्यतायां कृपा नोदेति। न तावता तस्य निरुपाधिकदयाहानि-प्रसङ्ग इति। अत्र (१) विरतिविहरणः, (२) विहृतविहरणः, (३) विरतविहरण इति त्रेधा पाठस्समुपलभ्यते। व्याख्यानान्तरे विहरणप्रवृत्तस्येश्वरस्येष्टा लीला विहन्येतेति शङ्का-स्वारस्यात् प्रथमपादे विरतविहरण इति प्राच्यः पाठः साधीयान्। तृतीयपादे तु विहरणविरतिरिति कृतकृत्यः स्वयमेव विहरणाद्विरमतीति समाधानौचित्यादिति दर्शितम्। यद्यप्यानन्ददायिन्यां विहृतं त्यक्तं विहारो यस्येति व्याख्यातत्वात् विहृत-विहरणस्तदभिमत इति प्रतीयते। तृतीयपादे विहरणविरतिरिति पाठे कस्यापि विवादो नास्ति; परन्तु शङ्कासमाधानयोस्समानविषयकत्वावश्यंभावात् तृतीयपादगतस्य समाधानरूपत्वात् तत्स्वारस्यात्तदनुरोधेनाक्षरार्थव्याख्यातृभिः यस्या एव दोषत्व-माशङ्कितम्, तस्या एव तत्परिहर्तव्यतया उत्तरार्धे विहरणविरतिर्नैव दोष इति कथनात् पूर्वार्धे विरतिविहरण इति प्राचीनपाठ एव साधीयान् इति सोपपत्ति न्यरूपि।

इत्थं जडद्रव्यसरे विंशतितमे श्लोके उपादानव्यतिरिक्तं कार्यद्रव्यं (अवयवा-तिरिक्तावयवी) सोपपत्ति निरस्यते। यदि कार्योपादानयोः (कपालघटयोः) भेदोऽ-ङ्गीक्रियेत, तर्हि तुलायां कपालद्वयनिक्षेपे सति यावदवनमनं भवति, तदपेक्षया एकघट-निक्षेपे उपादानातिरिक्तकार्यमेलनेन गौरवाधिक्यावश्यंभावेन अवनमनातिरेकस्स्यात्। नैवं कुतो दृश्यत इत्यापत्तिः दर्शिता। तदेतदर्थं कार्योपादानभेदे न कथमधिकतद्गौरवा-देस्स्वकार्य"मिति प्रथमपादः। अत्र मैसूरनगरमुद्रितकोशे "न कथमधिकता" इति पाठः प्रकाशितः। उत्तमूर अभिनवदेशिकवीरराघवप्राचार्यस्वामिप्रकाशिते अधिकतो गौरवा-

देरिति। अस्मद्गुरुचरणैस्तु स्वव्याख्यायां विशेषोपपत्तिप्रदर्शनपूर्वकं अधिकतद्गौरवादेरिति पाठः समादृतः। इत्थं व्याख्याने केचन विशेषाः स्थालीपुलाकन्यायेन प्रदर्शिताः। इतोऽन्ये विशेषाः तत एवावधेया इति विद्वांसः प्रार्थ्यन्ते।

तत्त्वमुक्ताकलापस्य विषयश्च सरद्वये।
श्रीकृष्णतातयार्येण संग्रहेणोपपादितः॥

सव्याख्यतत्त्वमुक्ताकलापप्रकाशनस्य मुख्यमुद्देश्यम्, मातृकादिसामग्री-विवरणं च

वह्वोः कालात्प्राक् मूलमात्रं ग्रन्थाक्षरैः मुद्रितम्। तदनु काञ्च्यामणङ्गराचार्येण सर्वार्थसिद्धिवृत्तिमात्रोपेतं मूलं प्राकाशि। अनन्तरं मैसूरनगरे सर्वार्थसिद्धिव्याख्यामानन्ददायिनीं च संयुज्य मुद्रापितम्। परन्तु तत्र जीवसरे त्रिंशत्श्लोकपर्यन्तमेवासीत्। वहूनां विदुषां तु आनन्ददायिन्यास्सम्पूर्णभागस्यावलोकने उत्कटेच्छा वरोवर्ति। अधुना तु समग्रस्यापि प्रकाशनं भवतीति सापि इच्छा पूरिता भविष्यति, अस्य प्रकाशनस्य प्राचीनप्रकाशनैरगतार्थता च। अपि चेतः पूर्वमप्रकाशिता अस्मद्गुरुवर्यप्रणीता अक्षरार्थव्याख्या च मूलार्थमात्रमधिजिगांसूनां महते उपकाराय कल्पिष्यत इत्येतादृशविशिष्टप्रयोजनमुद्दिश्यैतत्प्रकाशनं चिकीर्षितमस्माभिः।

चिरादस्य ग्रन्थस्य प्रकाशनेच्छा अस्मदाचार्याणामासीत्; परन्तु मुद्रणादिकार्ये भूयसोऽर्थव्ययस्यावर्जनीयतया तद्भरणे वयमशक्ता इति विचिन्त्य ते शिथिलितमनसोऽभूवन्। कदाचिदस्माभिः ग्रन्थोऽयं विश्वविद्यालये रामानुजवेदान्ते आचार्यकक्षायां पाठ्यग्रन्थत्वेन निर्धारितः, अस्य च एतावत्पर्यन्तमप्रकाशितं व्याख्यानं अस्मदाचार्यविरचितं वर्तते। प्रौढस्यास्य ग्रन्थस्य सरलव्याख्यानसहितस्य मुद्रणं भवति चेत्, अध्येतॄणां छात्राणां विदुषां च महते उपकाराय भवेदिति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयाधिकारिभ्यः निवेदितम्। तदनु तत्रत्यैरधिकारिभिरेतत्प्रकाशनं सहर्षमनुमोदितम्। विषयमिमं श्रुत्वा आचार्यवर्याः अमन्दानन्दभरितास्सन्तः मयि "आनन्ददायिनीमातृका तालपत्रमयी ग्रन्थाक्षरैर्लिखिता, स्वप्रणीताक्षरार्थनाम्नी मूलव्याख्या ग्रन्थाक्षरमयी स्वहस्तलिखिता चास्ति" इति मातृकाद्वयं प्रदाय एतत्प्रकाशनं विदधत्विति महत्या कृपया अस्मभ्यमन्वगृह्णन्। तदीयमातृकात एवाक्षरार्थस्य, आनन्ददायिन्याः जीवसरे द्वात्रिंशत् श्लोकादारभ्य तत्सरान्तभागस्य च मुद्रणौपयिकतया प्रतिलिपिः कृता। जीवसरे मैसूरनगरे मुद्रितपाठभेदाश्च कतिपयार्थविशेषप्रतिपादने उपयुक्ततमा भवन्तीति विचिन्त्य संयोजिताः। एवमेतेषां कोशानां साहाय्येन यथामति संशोध्य प्रकाश्यते।

समर्पणम्

त्रयीविद्यामध्यात्मशास्त्रं न्यायादि-सामान्यशास्त्रं च कृपयाऽस्मभ्यमुपदिष्टवतां प्रातःस्मरणीयानां आपस्तम्बोत्कर्षिलक्षणसम्पन्नानां ज्ञानानुष्ठानवैराग्यशेवधीनां रामानुजसिद्धान्तभास्कर-दैशिकदर्शनधुरन्धरेत्यादिबिरुदभूषितानां तिरुमलैचतुर्वेद-शतक्रतु-नावल्पाक्कं अय्या श्रीदेवनाथताताचार्यस्वामिपादानां चरणारविन्दयोः सर्वप्रथमं सहस्रशो वन्दनानि समर्प्यन्ते। इमे पूज्यपादा अस्य ग्रन्थस्य प्रकाशनाय स्वकीयनवतितमे वर्षेऽस्मानादिशन्ति स्म। सम्प्रति सत्यसङ्कल्पास्ते—

लौकिकानां च साधूनामर्थं वागनुधावति।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥

इति वचनमस्मान् स्मारयन्ति।

कृतज्ञतानिवेदनम्

बहुषु कार्येषु सत्स्वपि ग्रन्थमिममवलोक्य प्रस्तावनालेखनेनानुगृहीतवतां प्राच्यप्रतीच्यविद्यानिष्णातानां वेङ्कटनाथप्रणीतग्रन्थेषु मान्यताप्रतिपत्तिमाबिभ्रतां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिमहोदयानां पण्डितवर्याणां 'पद्मश्री' प्राचार्य-वि० वेङ्कटाचलमहाभागानां सविधे अनन्ताः प्रणामाः निवेद्यन्ते।

निवेदयामश्च सबहुमानमेतस्य सव्याख्यतत्त्वमुक्ताकलापस्य प्रकाशनावश्यकतां समितौ सम्यगुपपाद्यास्मान्नितरामनुगृहीतवद्भ्य एतद्ग्रन्थगौरवाभिज्ञेभ्यः न्यायवेदान्ताद्यनेकशास्त्रनिष्णातेभ्यः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य दर्शनसंकायवेदान्त-विभागाध्यक्षवर्येभ्यः डॉ० देवस्वरूपमिश्रमहाभागेभ्यो विशेषतो नतिततीः।

एतस्य ग्रन्थरत्नस्य प्रकाशनार्थमनुमतिं प्रदाय सम्पादनकार्ये अस्माकमुत्साहं वर्धितवद्भ्यः प्रकाशनसमितिसदस्येभ्यः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्यानुसन्धान-संस्थाननिदेशक डॉ० वागीशशास्त्रिप्रभृतिभ्यश्च हार्दिकं कार्तज्ञ्यं प्रकटीकरोमि।

एतादृशोत्तमग्रन्थप्रकाशनकर्मणि बद्धदीक्षेभ्यः अस्य ग्रन्थस्य प्रकाशनार्थं प्रयासं स्वीकृत्य तदा तदा प्रूफसंशोधनादितत्तत्कर्मसु प्रतिपुरुषं यथार्हं त्वरापादनद्वारा सुचारु-रूपेण प्रकाशनकार्यमिदं निर्व्यूढवद्भ्यः पण्डितवर्येभ्यः सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयस्य प्रकाशनाधिकारिभ्यः डॉ० हरिश्चन्द्रमणित्रिपाठिमहाभागेभ्यः विशेषतो धन्यवादास्समर्प्यन्ते।

उपयुक्तानां शुद्धाशुद्धप्रमाणाकरादिसूचीनां निर्माणे उपकृतवतां न्यायशिरोमणि-डॉ० के० इ० गोविन्दाचार्याणां सविधे कृतज्ञो भवामि। मुद्रणविषये कदाचिदनिवार्य-तया समुपनतेष्वपि कतिपयक्लेशेषु स्वयमनिर्विद्य निरवद्यमेव मुद्रणकार्यमतीवश्रद्धया च सुष्ठु विहितवद्भ्यः विजयप्रेस-अधिकारिभ्यः श्रीगिरीशचन्द्रमहाशयेभ्यो भगवान् सर्वेश्वरः मङ्गलानि अनुगृह्णात्वित्यर्थये।

यद्यत्रावधानतोऽनवधानतः प्रकारान्तरेण वा दोषाः संवृत्ताः, तान् क्षमन्तां गुणैकपक्षपातिनो विद्वांस इति प्रार्थये।

विद्वज्जनविधेयः
एन्० आर्० कण्णन्
(ना० रा० श्रीकृष्णताताचार्यः)
न्यायमीमांसावेदान्तशिरोमणिः, विद्यावारिधिः

पुरी
१५-९-८९,

तत्त्वमुक्ताकलापे

जडद्रव्यसरः

लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादेष संवर्धमानो
नाभीनालीकरि[ङ्ग]ङ्खन्मधुकरपटलीदत्तहस्तावलम्बः ।
अस्माकं संपदोद्यानविरलतुलसीदामसञ्जात भूमा
कालिन्दी कान्तिहारी कलयतु वपुषः कालिमा कैटभारेः ॥ १ ॥

नानासिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेस्तनूजो
वैश्वामित्रस्य पौत्रो विततमखविधेः पुण्डरीकाक्षसूरेः ।
श्रुत्वा रामानुजार्यात्सदसदपि ततस्तत्त्वमुक्ताकलापं
व्यातानीद्वेङ्कटेशो वरदगुरुकृपालम्भितोद्दामभूमा ॥ २ ॥

प्रज्ञासूच्याऽनुविद्धः क्षतिमनधिगतः कर्कशात्तर्कशाणा-
च्छुद्धो नानापरीक्षास्वशिथिलविहिते मानसूत्रे निबद्धः ।
आतन्वानः प्रकाशं बहुमुखमखिलत्रासवैधुर्यधुर्यो
धार्यो हेतुर्जयादेः स्वहृदि सहृदयैस्तत्त्वमुक्ताकलापः ॥ ३ ॥

शिष्टा जीवेशतत्त्वप्रमितियुतपरोपासनामुक्तिहेतुः
शक्यस्तत्तत्प्रकारावगतिविरहिभिर्नैव याथात्म्यबोधः ।
ते ते चार्था विदध्युः कुमतिविरचितास्तत्त्वबोधोपरोधं
तस्मान्निर्धूतसर्वप्रतिमतविमतिं साधये सर्वमर्थम् ॥ ४ ॥

आवापोद्वापतस्स्युः कतिकति कविधीचित्रवत्तत्तदर्थे-
ष्वानन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः ।
तत्त्वालोकस्तु लोप्तुं प्रभवति सहसा निस्समस्तान्समस्तान्
पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुतादिः ॥ ५ ॥

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहु-
र्द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयधा तत्र जीवेशभेदा-
न्नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥ ६ ॥

तत्र द्रव्यं दशावस्थप्रकृतिरिह गुणैस्सत्त्वपूर्वैरुपेता
कालोऽब्दाद्याकृतिस्स्यादणुरवगतिमान् जीव ईशोऽन्य आत्मा ।
संप्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव
ज्ञातुर्ज्ञेयावभासो मतिरिति कथितं संग्रहाद् द्रव्यलक्ष्म ॥ ७ ॥

एकार्थप्रत्यभिज्ञा भवति दृढतरा दर्शनस्पर्शनाभ्यां
संघातादेरयोगादवगमयति सा वस्तुरूपादतोऽन्यत् ।
एकस्मिन् दूरतादेरविशदविशदप्रत्यभिज्ञादि तद्वत्
नैकत्वेऽप्यक्षभेदाद्ध्रिदुरमिव मिथस्संश्रयादिप्रसङ्गात् ॥ ८ ॥

धर्मो निर्धर्मकश्चेत्कथमिव भविता सोऽभिलापादियोग्यो
धर्मेणान्येन योगे स च भवति तथेत्यव्यवस्थेति चेन्न ।
कश्चिद्धर्मोऽपि धर्मी स्फुटमतिमथने स्वान्यनिर्वाहकत्वं
तन्निष्कर्षप्रयोगेष्वपि भवति पुनस्तस्य धर्मी विशेषः ॥ ९ ॥

तच्छून्ये तस्य वृत्तिः कथमिव घटते तद्विशिष्टे तु वृत्तौ
स्वाधारत्वप्रसङ्गस्तत इह न गुणो नापि धर्मीत्ययुक्तम् ।
तद्वृत्तिर्धर्मिमात्रे न भवति तत एवास्य तच्छून्यताऽतो
नोक्तौ दोषौ स्वधीवाग्विहतिरितरथा तद्वदन्येऽपि जल्पाः ॥ १० ॥

स्वच्छन्देनागमेन प्रकृतिमहदहङ्कारमात्राक्षसिद्धि-
र्नाध्यक्षेणाप्रतीतेर्न पुनरनुमया व्याप्तिलिङ्गाद्यसिद्धेः ।
सत्त्वाद्युन्मेषभिन्नान्महत इह तथा स्यादहङ्कारभेदः
प्राच्यादक्षाणि मात्राः प्रजनयति परो मध्यमस्तूभयार्थं ॥ ११ ॥

तत्राहङ्कारजन्यं भजति परिणतैः शब्दमात्रं नभस्त्वं
तद्वत्तन्मात्रपूर्वास्तदुपरि मरुदग्न्यम्बुभूम्यः क्रमात्स्युः ।
सूक्ष्मस्थूलस्वभावस्वगुणसमुदयप्रक्रियातारतम्यात्
तन्मात्राभूतभेदः कललदधिनयात् कल्पितस्तत्त्वविद्भिः ॥ १२ ॥

अद्भ्योऽग्निस्तेजसस्ता इति न हि वचसोर्बाधितुं युक्तमेकं
निर्वाहः कल्पभेदाद्यदि न दृढमितात्तत्त्वसृष्टयैकरूप्यात् ।
व्यष्टौ ताभ्यः कदाचित्तदुपजनिरतो व्यत्ययस्तत्समष्टौ
आदावप्सृष्टिवादश्श्रुतिमितमितरन्न प्रतिक्षेप्तुमीष्टे ॥ १३ ॥

पृथ्व्यास्स्पर्शादिभेदो द्रवमृदुकठिनीभावभेदश्च दृष्ट-
स्तद्वत्पृथ्वीजलाग्निश्वसनपरिणतिर्लाघवायेति जैनाः ।
तत्र द्रव्यैक्यमिष्टं क्रमजनिविलयौ त्वागमादप्रकम्प्यौ
तर्कैकालम्बिगोष्ठ्यां भजतु बहुमतिं तादृशी लाघवोक्तिः ॥१४॥

तत्त्वेष्वाथर्वणेऽष्टौ प्रकृतय उदिताः षोडशान्ये विकारा
निष्कर्षेदंपरेऽस्मिन् वचसि तदितरत्सर्वमावर्जनीयम् ।
दृष्ट्वा सांख्यं पुराणादिकमपि बहुधा निर्वहन्त्येतदेके
चिन्तासाफल्यमान्द्याच्छ्रमबहुलतयाऽप्यत्र तज्ज्ञैरुदासि ॥ १५ ॥

निश्शेषं कार्यतत्त्वं जनयति स परो हेतुतत्त्वैश्शरीरी
तत्तत्कार्यान्तरात्मा भवति च तदसौ विश्रुतो विश्वरूपः ।
तेजोवन्नाभिधेये बहुभवनमभिध्यानलिङ्गं च दृष्टं
तस्मादीशाननिघ्नाः प्रकृतिविकृतयस्स्वस्वकार्यप्रसूतौ ॥ १६ ॥

द्वेधा भूतानि भित्त्वा पुनरपि च भिनत्त्यर्धमेकं चतुर्धा
तैरेकैकस्य भागैः परमनुकलयत्यर्धमर्धं चतुर्भिः ।
इत्थं पञ्चीकृतैस्तैर्जनयति स जगद्धेतुरण्डादिकार्या-
ण्यैदंपर्यं त्रिवृत्त्वश्रुतिरधिकगिरामक्षमैका निरोद्धुम् ॥ १७ ॥

कार्यं नैवारभेरन्समधिकमणवस्सर्वतस्संप्रयुक्ता
दिक्संयोगैकदेश्यान्न घटत इह ते दिक्कृतोऽप्यंशभेदः ।
बुद्धेस्त्वंशानपेक्षा स्फुरति विषयिता विश्वमस्त्वस्तु दृष्टे
नो चेदारम्भकांशप्रभृतिषु नियता दुर्निवाराः प्रसङ्गाः ॥ १८ ॥

स्याद्भागानन्त्यसाम्ये परिमितिसमता सर्षपक्ष्माभृतोश्चे-
न्मैवं भागेष्वनन्तेष्वपि समधिकता स्थौल्यहेतुर्गिरेः स्यात् ।
व्यक्त्यानन्त्येऽपि जात्योः परतदितरता पक्षमासाद्यनन्तं
श्रौतोपादानसौक्ष्म्यं न भवदभिमतं तत्प्रथिम्नश्श्रुतत्वात् ॥ १९ ॥

कार्योपादानभेदे न कथमधिकतो गौरवादेस्स्वकार्यं
नान्यत्वं नामसंख्याव्यवहृतिधिषणाकारकालादिभेदैः ।
द्रव्याभेदेऽप्यवस्थान्तरत इह तु ते पत्रताटङ्कवत्स्युः
नोचेदंशांशिनोस्स्यात्प्रतिहतिरुभयोः स्पर्शवत्त्वाविशेषात् ॥ २० ॥

इत्थं वृत्त्यादिखेदो न भवति न च नः कल्पनागौरवं स्या-
द्वस्त्रे दीर्घैकतन्तुभ्रमणविरचिते वस्त्रधीर्नापि बाध्या ।
देशाधिक्यं समेतेष्वणुषु न हि ततः स्थूलधीबाधशङ्का
संसर्गैर्दविशेषादवयविपरिषद्राशिवन्यादिवादः ॥ २१ ॥

द्रव्यैक्यं प्रत्यभिज्ञा प्रथयति परिमित्यन्तरेऽन्याप्रतीते-
रंशूत्कर्षक्षयादिक्षममपि च ततो राशिवत्स्थूलमेकम् ।
नो चेदश्रान्तचण्डानिलजलधिधुनीदन्तिदावानलाद्यैः
क्षोणीयं क्षुद्यमाना क्षणमपि चरमामण्ववस्थां न जह्यात् ॥ २२ ॥

संघातोऽनेकभूतैरपि भवति यथा ह्येकभूतस्य भागै-
र्देहादिः पञ्चभूतात्मक इति निगमाद्युक्तिभिश्च प्रसिद्धम् ।
न त्वेवं संकरः स्याद्व्यवहृतिनियमस्सूत्रितस्तारतम्या-
द्देहादौ येन भूतान्तरयुजि भवतो भौमतादिव्यवस्था ॥ २३ ॥

सन्ति प्रागप्यवस्थास्सदितरकरणाप्राप्तनिष्पत्त्यदृष्टेः
शक्ताशक्तप्रभेदादिभिरपि यदि न स्वोचितात्कार्यदृष्टेः ।
तस्मिन्सत्येव तस्माज्जनिरपि नियता तन्निमित्तादिनीते-
र्व्यक्तिर्व्यक्ताऽनवस्थां भजति न च कृतामात्थ नैवं कृतो नः ॥ २४ ॥

वस्तुस्थैर्यं विरुद्धानुपहितविषया साधयेत् प्रत्यभिज्ञा
नैकस्मिन् शक्त्यशक्ती कृतितदितरयोः साध्यभेदेन सिद्धेः ।
एकस्मिन् कालभेदाद्भवति च सहकार्यन्वयानन्वयादि-
र्नैचिन्नो देशभेदादपि सुपरिहरस्तेन नैकं क्वचित्स्यात् ॥ २५ ॥

तत्त्वेदंत्वे हि कालान्तरघटनमये नैककाले घटेतां
कालद्वैतेऽनवस्थाद्यत इह न मितिः प्रत्यभिज्ञेति चेन्न ।
स्वस्य स्वाभावकाले विहृतिनियमनात्स्वेन चात्रैककाल्यात्
काले कालानपेक्षे कथमपि सुवचो नानवस्थाविरोधौ ॥ २६ ॥

प्रत्यक्षम् वर्तमानं प्रथयति यदिहावर्तमानाद्विभक्तं
तस्मात्तेनैव सिद्धं क्षणिकमिति न सत्तावदित्यप्रतीतेः ।
तत्कालासत्त्वमेव ह्यपनयति सतो वर्तमानत्वबोधः
कालेऽन्यत्रापि सत्त्वं प्रमितमिति कथं तद्विरोधप्रसङ्गः ॥ २७ ॥

उत्पन्नानां विनाशे ध्रुवभवितृतया हेत्वपेक्षाविहीने
जन्मन्येवोपरोधात्क्षणिकमिह जगत्सर्वमित्यप्यसारम् ।
लिङ्गं ह्येष्यत्त्वमात्रं जननविधुरता तत्क्षणानुक्षणत्वे
तत्त्वं तज्जन्यता वा तदिदमनियमासिद्धिबाधादिदूष्यम् ॥ २८ ॥

कालानन्तर्यसाम्ये क्षणिकवपुषि ते देशकालाद्युपाधौ
सर्वे पूर्वे भवेयुस्तदुपरि भवतां कारणानि क्षणानाम् ।
सन्तानैक्यव्यवस्था निजफलनियतिर्वासनानां च न स्यात्
कार्पासे रक्ततादिक्रमविपरिणमत्संस्कृतद्रव्यतस्स्यात् ॥ २९ ॥

मेयत्वाद्यैर्विगीतं क्षणिकमिह जगत्स्यात्क्षणोपाधिवच्चेद्
बाधो दृष्टान्तहानिः स्थिर इति विदितो यत्क्षणस्याप्युपाधिः ।
सामग्री कार्यशून्या क्षण इयमपि तद्धेतुसंघो न चासौ
हेतुर्नान्यः स्थिरास्ते क्रमवदुपधिवत्स्यात्क्षणत्वं स्थिरेऽपि ॥ ३० ॥

दीपादीनां कदाचित्सदृशविसदृशाशेषसन्तत्यपेते
ध्वंसे दृष्टेऽप्यशक्या तदितरविषयेऽनन्वयध्वंसक्लृप्तिः ।
बाधादेर्दर्शितत्वादपि च दृढमिते सान्वयेऽस्मिन्घटादौ
दुर्दर्शावस्थया स्युः पयसि लवणवल्लीनदीपादिभागाः ॥ ३१ ॥

सत्त्वेऽसत्त्वेऽपि पूर्वं किमपि गगनतत्पुष्पवन्नैव साध्यं
हेतुप्राप्तिर्न पश्चाद्भवितुरघटितोत्पादनेऽतिप्रसङ्गः ।
जन्यं जन्मान्यथा वा द्वयमसदनवस्थानकार्यक्षतिभ्या-
मित्याद्यैर्हेतुसाध्यं न किमपि यदि न स्वक्रियादेर्विरोधात् ॥ ३२ ॥

कादाचित्कस्य कालावधिनियतिकरं पूर्वसत्कारणं स्यात्
भावोपष्टम्भशून्यो न खलु तदवधि प्रागभावोऽपि कुर्यात् ।
कार्यं निर्हेतुकं चेत्कथमिव न भवेन्नित्यता तुच्छता वा
कादाचित्कस्वभावाद्यदि न नियमनादन्यथाऽतिप्रसङ्गात् ॥ ३३ ॥

नेत्रादेर्दीपिकादेरिव नियमयुतं तैजसत्वादिसाध्ये
रूपादिग्राहकत्वं यदि करणतया स्यादसाधारणत्वम् ।
तत्साहाय्यं त्वसिद्धं भवति गमकतामात्रमप्यञ्जनादा-
वक्षाहङ्कारिकत्वं श्रुतिपथनिपुणैर्घोषितं नैव बाध्यम् ॥ ३४ ॥

तन्मात्रेष्विन्द्रियाणां श्रुतिरिह न लयं वक्ति किंतु प्रवेशं
नो चेत्पृथ्व्यादिवाक्येष्विव हि लयपदं व्योम्नि चाक्षेषु च स्यात् ।
भूतैराप्यायितत्वात्क्वचिदुपचरिता भौतिकत्वोक्तिरेषा-
मन्नाप्तेजोमयत्वं श्रुतिरपि हि मनःप्राणवाचामुवाच ॥ ३५ ॥

रूपादिज्ञानसिद्धौ यदि करणतया कल्पनं धीन्द्रियाणां
तद्वद्गत्यादिकर्मस्वपि करणतया सन्तु कर्मेन्द्रियाणि ।
कर्मज्ञानाक्षहेत्वोस्समपरिहरणा ह्यन्यथासिद्धिशङ्का
तस्मादेकादशाक्षाण्यपि निगमविदो मन्वते न्याययूर्वम् ॥ ३६ ॥

सांख्यैस्त्रेधोक्तमन्तःकरणमिह मनोबुद्ध्यहङ्कारभेदा-
च्चित्तं चान्ये चतुर्थं विदुरुभयमसत्तादशश्रुत्यभावात् ।
तत्तत्त्वोक्तिमात्रं न हि करणभिदामाह क्लृप्तिस्तु गुर्वी
बुद्ध्याद्याख्या निरूढा क्वचिदिह मनसो वृत्तिवैचित्र्य[मात्रा]योगात् ।३७

एकं तत्तत्प्रदेशप्रतिनियततया शक्तिभेदं प्रपन्नं
देहव्यापीन्द्रियं चेत्प्रथममिह भवेदागमेनैव बाधः ।
नो चेत्स्याद्देहभेदप्रतिनियततया सर्वजन्तोस्तदेकं
भेदाम्नानादक्लृप्तेरपि न च भजते देह एवेन्द्रियत्वम् ॥ ३८ ॥

सूक्ष्माण्येकादशाक्षाण्यपि न यदि कथं देहतो निष्क्रमादि-
श्चित्ताणुत्वे तु सर्वेन्द्रियसमुदयने धीक्रमोऽप्यस्तु मानम् ।
वृत्त्याऽक्ष्यादेर्दवीयः प्रमितिजनकता वृत्तिराप्यायनार्थैः
भूतैर्जातः प्रसर्पः श्रुतिमितमपि चानन्त्यमेषां स्वकार्ये ॥ ३९ ॥

प्राप्यग्राहीन्द्रियत्वाद्धिमतमितरवत्प्राप्तिरुक्तप्रकारा
वृत्तिं दृष्टेर्निरुन्धे विरलपटनयादम्बुकाचादिरच्छः ।
नो चेद्गृह्येत योग्यं सममिह निखिलं निष्फले छादकादौ
स्थैर्ये तद्योग्यभावो न हि गलति समा सन्ततिस्त्वन्मतेऽपि ॥ ४० ॥

शब्दं गृह्णाति दूराभ्युदितमपि बहिस्सन्तता श्रोत्रवृत्ति-
र्दिग्भेदासन्नतादिग्रहणमपि तदा तत्र तत्सन्निधानात् ।
इत्येकेऽन्ये तु दूरान्तिकगतजनताशब्दधीकालभेदात्
श्रोत्रायातस्य तस्य ग्रहमनुमितिमप्याहुरस्मिन्दिगादेः ॥ ४१ ॥

प्रत्यक्षं व्योम नीलं नभ इति हि मतिश्चक्षुषैवास्मदादेः
कूपोऽसौ रन्ध्रमेतत्पतति खग इहेत्यादिधीश्चात्र मानम् ।
आधारोऽत्रातपादिर्यदि भवति कथं तस्य चेहेति बोध-
स्तस्यांशैश्चेत् त्र्यणौ तच्छिथिलगति न च व्योमवागातपादौ ॥ ४२ ॥

रूपस्पर्शोज्झितत्वान्न भवति गगनं दर्शनस्पर्शनार्हं
घ्राणश्रोत्रे रसज्ञाऽप्यवगमयति न द्रव्यमन्यत्त्वबाह्यम् ।
तस्मान्नाध्यक्षवेद्यं वियदिति यदि न प्रत्ययस्यापरोक्ष्यात्
पञ्चीकारेण नैल्यं पटमलिनिमवद्भाषितं वोपकुर्यात् ॥ ४३ ॥

शब्दस्याधारभूतं कथमपि गगनं शक्यते नानुमातुं
स्वेच्छातः पारिशेष्यक्रम इह कथितोऽतिप्रसङ्गादिदुःस्थः ।
निष्क्रान्त्यादेर्न तद्धीस्सति नभसि यतो नास्ति कुड्यादिकेऽसौ
रोधस्त्वावारकैश्चेत्तदभवनवशान्निष्क्रमादिश्च सिध्येत् ॥ ४४ ॥

यत्त्वाकाशोऽवकाशप्रद इति कथितं शास्त्रतस्तत्र याऽसा-
वन्योन्यं स्पर्शभाजां विहतिरिह न सा प्राच्यतत्त्वेष्विव स्यात् ।
इत्यैदंपर्यमूह्यं न यदि कथमिवान्येषु लभ्योऽवकाशः
सिद्धादेः स्वप्रभावाज्जल इव कथितो युज्यते मज्जनादिः ॥ ४५ ॥

सद्रूपेणैव भानान्न भवति वरणाभावमात्रं विहायः
संसर्गाभावमात्रं न च भवति यतो नास्ति संसर्गिबोधः ।
अत्यन्ताभावनाशावजननिरपि वा सत्सु तेष्वेव न स्यु-
स्तादात्म्याभावसिद्धिः कथ[मिव]मपि च भवेत्तंतमर्थं विहाय ॥ ४६ ॥

नित्यत्वाद्यम्बरादेर्यदि निरवयवद्रव्यताद्यैः प्रसाध्यं
कः स्याद्बाधो विपक्षे कथमिव निगमे बाधकेऽत्रानुमा स्यात् ।
बाधस्सामान्यदृष्टचा श्रुतिसमधिगते नैव कुत्रापि शक्य-
स्तेनामूर्तत्वलिङ्गान्न सृजति विमतो मूर्तमित्याद्यपास्तम् ॥ ४७ ॥

प्राक्प्रत्यक्त्वादिभेदं भजतु वियदिदं भानुयोगादिभेदा-
दस्यैवोपाधिभेदादधिकदिश इव स्तां परत्वापरत्वे ।
व्योमोत्तीर्णेऽपि देशे प्रभवतु तदुपाध्यन्वितैस्तत्तदर्थे-
र्दूरत्वादिव्यवस्था स्वयमुत विभुना ब्रह्मणा किं परैर्नः ॥ ४८ ॥

अन्यस्मिन्नन्यधर्मान् घटयतु वियदाद्यत्र नातिप्रसक्तिः
सिध्यत्कार्योपयुक्तोपनयननियमोपेततच्छक्तिक्लृप्तेः ।
एवं ह्येवाधिकायामपि दिशि भवतोऽतिप्रसङ्गो निषेध्यो
धर्मी धर्मश्च कल्प्यौ तव तदितरता स्यात्तु काले स्वमानात् ॥ ४९ ॥

संख्यानं तत्त्वपङ्क्तौ क्वचिदपि न दिशः कालवद्वा न भेदः
कण्ठोक्तो व्याक्रियादिव्यवहरणमपि ह्यन्यथैवोपपन्नम् ।
श्रोत्रादुक्तस्तु लोकप्रभृतिवदुदयस्तस्य तत्राप्ययो वा
नैतावत्तत्त्वभेदं गमयति न च तच्छ्रौत्रतामान्यपर्यात् ॥ ५० ॥

वातो वातीति साक्षान्मतिरितरसमा स्पर्शतो नानुमाऽसा-
वन्धेऽन्येषु प्रसङ्गान्न पुनरगमकं स्पर्शनं रूपशून्ये ।
अन्याक्षग्राह्यतादृग्विधगुणविरहो ह्यन्यदक्ष न रुन्धे
निर्गन्धो नीरसोऽपि स्फुरति यदनलो दर्शनस्पर्शनाभ्याम् ॥ ५१ ॥

संख्याद्यास्स्पर्शनास्स्युस्तदधिकरणकास्स्पर्शने गन्धवाहे
तेषां द्रव्योपलम्भप्रतिनियतनिजाध्यक्षयोग्यत्वतश्चेत् ।
इ[ष्टंत्वं]ष्टस्त्वंशेन चात्मप्रभृतिषु सहते तैः प्रसिद्ध्यन्ति सर्वे
तद्ग्राह्ये व्याप्तिरिष्टा यदि सततगतेरप्यसावस्तु बाह्ये ॥ ५२

न प्राणो वायुमात्रं सह परिपठनान्न क्रिया द्रव्यतोक्ते-
स्तेजोवद्वा न तत्त्वान्तरमगणनतो वायुतानुज्झनाच्च ।
तस्माद्वातो विशेषं घनजलकरकान्यायतः प्राप्य कंचि-
द्देहान्तर्दाशविध्यं भजति बहुविधोपक्रियो वृत्तिभेदैः ॥ ५३ ॥

प्राणोऽक्षं प्राणशब्दादुपकरणतया क्षेत्रिणश्चेत्ययुक्तं
शब्दैक्यं ह्येकजात्यं व्यभिचरति न च प्राणताऽक्षेषु मुख्या ।
देहस्यानक्षभावेऽप्युपकृतिरधिका तत्समाक्षोक्त्यदृष्टि-
र्न प्राणे सात्त्विकाहंकरणविकृतितालक्षणं तद्धि तेषाम् ॥ ५४ ॥

प्राणापानाख्यभस्त्रारभसविसृमरः प्राप्य वैश्वानराख्यां
मध्येदेहं हुताशो वसति जलनिधावौर्वंवत्सर्वभक्षः।
तत्तद्विद्यासु वे[द्यस्त्वन]द्यं त्वन इव हि परज्योतिषः सोऽपि रूपं
नात्मानौ तौ जडत्वाज्जनिविलयमुखैर्भेदकण्ठोक्तिभिश्च ॥ ५५ ॥

धर्मो भाति प्रभैका बहलविरलताद्यत्र दृष्टानुसारात्
सा दीपांशा विशीर्णा इति यदि बहुधा कल्पनागौरवादि।
रत्नादीनां स्थिराणां विशरणविहतेर्निष्प्रभत्वादि च स्यात्
तेजस्तत्सप्रभाकं तिमिरहरतया साऽपि तेजोविशेषः ॥ ५६ ॥

भाष्ये भास्वत्प्रभादौ प्रतिहतिबहलीभावपूर्वं यदुक्तं
तेन स्रोतस्समाधिं परमतनयतः प्राहुरेके प्रभायाम्।
वस्तुन्यस्ते विकल्पे स्फुटविघटनयोर्वक्तुराप्तस्य वाचो-
स्तात्पर्यं तर्कमानानुगुणमधिगुणैश्चिन्त्यमन्तेवसद्भिः ॥ ५७ ॥

प्राच्ये स्नेहादिनाशे चरम इव दृढोऽनन्तरं दीपनाशः
सामग्र्यन्यान्यकार्यं जनयति च न चानेकदीपप्रतीतिः।
साम्यादेः स्यात्तु तद्धीः प्रवहणभिदुरास्सप्रभास्तत्प्रदीपा
निर्बाधा भास्करादौ प्रथयति नियत प्रत्यभिज्ञा स्थिरत्वम् ॥ ५८ ॥

वर्णानां तादृशत्वादतिकठिनतया गौरवस्यापि भूम्ना
धात्रीभागैः प्रभूतैस्स्फुटमिह घटिता धातवो हाटकाद्याः।
तादृक्त्वेपि स्फुरत्ताद्यनितरसुलभं किंचिदन्वीक्ष्य तज्ज्ञैः
व्याख्यात तैजसत्वं विधितादतरयोस्तन्त्रसौकर्यसिद्ध्यै । ५९ ॥

नैल्याद्व्योमं तमिस्रं चटुलवहलताद्यन्वयात्तन्न नैल्य
छायावत्पारतन्त्र्यं त्वयस इव मणौ दृष्टिसिद्धास्स्वभावात्।
स्पर्शाख्यातिर्न रूप हरति हरिशिलालोकवत्तत्र चाक्ष्णो-
र्नालोकोऽध्यंस्ससिद्धाञ्जननयनदिवाभीतदृष्ट्यादिनीतेः ॥ ६० ॥

नालोकाभावमात्रं तिमिरमविरतं नीलमित्येव दृष्टे-
र्नैल्यं त्वारोपितं चेत्कथमिव न भवेत्क्वापि कस्यापि बाधः।
आरोपे चात्र नैल्य न भवति नियत भास्वरान्यत्वसाम्या
न्मात्रादृष्टं नियन्तृप्रतिनियतगुणारोपक्लृप्तेर्गुरुत्वात् ॥ ६१

ध्वान्तं तेजश्च नासीदिति मुनिभिरुपाख्यायि संवर्तवार्ता
भावाभावौ निषेद्धुं तदुभयविधिवद्व्याहतत्वादशक्यम्।
अन्तर्यन्तुश्च तेजः सहपठिततमो देह इत्यामनन्ति
स्याच्चाभावोऽपि भावान्तरमतिमथने वक्ष्यमाणक्रमेण ॥ ६२ ॥

तिष्ठत्युर्वीभचक्रं पवनरयवशाद्भ्राम्यतीत्युक्तमाप्तै-
र्भ्रान्तैः क्लृप्तं त्रिलोकीभ्रमणमिह तथा मेदिनीभ्रान्तिपातौ ।
तद्भ्रान्तौ प्राक्प्रतीचोः प्रसजति पतने पत्रिणोस्तारतम्यं
पाते गुर्व्यास्तु तस्याः प्रलघु दिवि समुत्क्षिप्तमेनां न यायात् ॥ ६३ ॥

ज्योतिश्शास्त्रं पुराणाद्यपि न हि निगमग्राह्यमन्योन्यबाध्यं
विद्यास्थानं 'तु सर्वं प्रतिनियतनिजोपक्रियांशे प्रमाणम् ।
तात्पर्यं तर्कणीयं तदिह वहुविदा भूपरिध्यादिभे[दे दैः
दुर्ज्ञानं सर्वथा यन्मुनिभिरपि परैस्तत्र तूदासितव्यम् ॥ ६४ ॥

सूर्यावृत्त्याद्युपाधिव्यतिकरवशतः कालताऽस्त्वम्बरादे-
रन्यस्मिन्नन्यधर्मोपनयननियमः प्राग्वदत्रेति चेन्न ।
कल्पान्तेऽप्येककालः प्रकृतिपुरुषवद्ब्रह्मणो रूपमन्य-
न्निर्दिष्टोऽनाद्यनन्तो मुनिभिरिति ततः कार्यता चास्य भग्ना ॥ ६५ ॥

कालोऽस्मीति स्वगीता कथयति भगवान्काल इत्याप्तवर्यो
हेतुः सर्वस्य नित्यो विभुरपि च परः किं परेणेति चेन्न ।
कालान्तर्यामितादेः स खलु समुदितः संप्रतीते तु भेदे
साधर्म्यं नैक्यहेतुः स हि तदितरवद्घोषितस्तद्विभूतिः ॥ ६६ ॥

कालस्योत्पत्तितः प्राक् परमपि च लयात् कालनास्तित्ववादी
स्वोक्तिव्याघातभग्नो न वदति यदि यत्को वदेत्कालसृष्टिम् ।
आप्तस्तत्सृष्टिवादस्तदुपधिपरिणत्यादिभिस्सार्थकस्स्या-
न्नोचेत्तत्रापि पूर्वापरवचनहतिर्दुर्निवारप्रसङ्गा ॥ ६७ ॥

कालोऽध्यक्षावसेयः क्षणलवदिवसाद्यंशतोऽर्थान्विशिंषन्
साक्षाद्धीस्तत्तदर्थेष्विव भवति हि नः क्वापि कालान्वयेऽपि ।
तत्संयोगाः परत्वादय इति च ततोऽप्येष नैवानुमेयो
नो चेन्न क्वापि लोकव्यवहृतिविषयोऽव्यक्तवत्स्यादनेहा ॥ ६८ ॥

कालस्योपाधिभेदात्कतिचिदभिदधत्यब्दमासादिभेदं
तत्तद्रूपेण कालः परिणमत इति प्राहुरेके तदा तु ।
ये तत्रोपाधयः स्युस्त इह परिणतिं प्राप्नुयुस्सानुबन्धाः
नित्यो व्यापी च तादृक्परिणतिभिरसौ सर्वकार्ये निमित्तम् ॥ ६९ ॥

वायुर्दोधूयते यद्यदयमुडुगणो बम्भ्रमीति द्रुतं खे
तेजो जाज्वल्यते यद्यदपि [जलनिधि] न जलधिर्माधवीं दोधवीति ।
भूर्यद्वा बोभवीति स्थिरचरधृतये तच्च तादृक्च सर्वं
स्वायत्ताशेषसत्तास्थितियतनपरब्रह्मलीलोर्मिचक्रम् ॥ ७० ॥

जीवसरः

यो मे हस्तादिवर्ष्मेत्यवयवनिवहाद्भाति भिन्नस्स एकः
प्रत्येकं चेतनत्वे बहुरिह कलहो वीतरागो न जातः ।
तत्सङ्घातातिरिक्तेऽप्यवयविनि कथं तेष्वसिद्धा मतिस्स्यात्
सङ्घातत्वादिभिर्वा घट इव तदचित्स्यान्ममात्मेत्यगत्या ॥ १ ॥

स्याद्वाऽसौ चर्मदृष्टेरयमहमिति धीर्देह एवात्मजुष्टे
निष्टप्ते लोहपिण्डे हुतवहमतिवद्भेदकाख्यातिमूला ।
श्रुत्यर्थापत्तिभिश्च श्रुतिभिरपि च नस्सर्वदोषोज्झिताभिः
देही देहान्तराप्तिक्षम इह विदितस्संविदानन्दरूपः ॥ २ ॥

बाह्याक्षेभ्योऽन्य आत्मा तदखिलविषयप्रत्यभिज्ञातुरैक्यात्
कर्तुः स्मृत्यादिकार्ये करणमिति मनो मानसिद्धं ततोऽन्यत् ।
प्राणास्सङ्घातरूपा वपुरुदितनयान्न ध्रुवं चेतयन्ते
ज्ञानं च ज्ञातृधर्मः क्षणिकमपि च वस्तेन नास्यात्मभावः ॥ ३ ॥

धीर्नित्या यस्य पक्षे प्रसरति बहुधाऽर्थेषु सर्वेन्द्रियाद्यैः-
स्तेनात्माऽजागलस्थस्तन इव किमिह स्वीक्रियेतेति चेन्न ।
कल्प्यं चेदात्मतत्त्वं कथयितुमुचितं लाघवं तत्र युक्त्या
नित्या सा यस्य तद्वानपि निगममितो गौरवं नास्य भारः ॥ ४ ॥

ज्ञानत्वं वक्ति पुंसः श्रुतिरिह न पुनर्बुद्धिमात्रस्य पुंस्त्वं
प्रत्यक्षादेः प्रकोपादनुगतकथने ज्ञानमर्थप्रकाशः ।
स्वस्यैवात्मा तु सिद्धिं मतिरनुभवति स्वान्ययोस्सिद्धिभावं
ज्ञातुर्जाड्यप्रसङ्गव्युदसनविषया ज्ञानमात्रोक्तयोऽपि ॥ ५ ॥

आत्मा स्वेनैव सिध्यत्यहमिति निगमैर्यत्स्वयंज्योतिरुक्तः
स्वापेऽप्यस्य स्वसिद्धावशयिषि सुखमित्यक्षता प्रत्यभिज्ञा ।
चेतश्चान्यानपेक्षं मतिषु न हि भवेत्किं च वेदान्तदृष्ट्या
ज्ञानत्वादेष धीवत् स्वविषयधिषणानिर्व्यपेक्षस्वसिद्धिः ॥ ६ ॥

प्रत्यक्त्वं पुंसि केचित् स्वविषयधिषणाधारतामात्रमाहुः
स्वस्मै स्वेनैव भानं तदिति समुचितं तत्स्वतस्सिद्धिसिद्धेः ।
प्रत्यङ् स्वापेक्षयाऽसौ त्वमयमिति मितः स्वेतरैः स्वस्य बुद्ध्या
भातं नित्यं परस्मै जडमजडमपि स्यात्परार्थं एव ॥ ७ ॥

बोद्धा कर्ता च भोक्ता दृढमवगमितः प्रत्यगर्थः प्रमाणैः
कर्तृत्वाभाववादे स्वयमिह भगवानान्यपर्यं त्वगायत् ।
कर्ता शास्त्रार्थवत्त्वात्कृतिषु च स पराधीन आभाषि सूत्रै-
श्चित्रैः कर्मप्रवाहैर्यतनविषमता सर्वतन्त्राविगीता ॥ ८ ॥

यद्भव्यं तन्न न स्याद्यदभवितृ न तद्यत्नकोट्यापि सिद्ध्येद्
द्वेधाऽपि व्यर्थयत्ना नर इति यदि न स्वोक्तियत्नादिबाधात् ।
यद्यत्नेनैव भव्यं भवति यतनतस्तत्स्वहेतूपनीता-
द्दुस्साधा यत्नलभ्ये प्रति यदि यतते तत्र नैष्फल्यमिष्टम् ॥ ९ ॥

भिन्ना जीवाः स्वतस्स्युः प्रतिनियततया धीस्मृतीच्छासुखादेः
चेतोभेदाद्व्यवस्था न तु भवति यथा देहबाह्याक्षभेदात् ।
नित्यान् भिन्नांश्च जीवान्कथयति निगमस्तद्धि नोपाधितस्स्यात्
आत्माद्वैतश्रुतीनामितरहृदयता तत्रतत्रैव सिद्धा ॥ १० ॥

जीवाः पृथ्व्यादिभूतेष्वणव इव मिथो भेदवन्तः स्वतोऽमी
सन्मात्रब्रह्मभागास्तदिह नियतयस्सुस्थिता इत्ययुक्तम् ।
ऐक्यस्याप्यक्षतत्वादनवधि च सति ब्रह्मणि स्यादवद्यं
सत्यं तच्चेत्यभिज्ञैर्बहिरगणि मृषावादतोऽप्येष पक्षः ॥ ११ ॥

देहत्वाद्यैर्विगीतं निखिलमपि मया ह्यात्मवत्किं च पुंस्त्वात्
सर्वे जीवा अहं स्युर्न यदि भवति ते गौरवादीत्यसारम् ।
श्रुत्यध्यक्षादिबाधात्प्रसजति च तदा तत्तदैक्यं घटादेः
पक्षादेर्वादिनोश्चेत्यलमिह कलहैस्तज्जिगीषादिमूलैः ॥ १२ ॥

साविद्यं ब्रह्म जीवस्स च न बहुतनुर्नेतरे सन्ति जीवाः
स्वप्नादेकस्य लोके बहुविधपुरुषाध्यासवद्विश्वक्लृप्तिः ।
नेतः प्राक्कोऽपि मुक्तो न परमपि स तु प्राप्स्यति श्रेय एको
मायोत्थौ बन्धमोक्षाविति च मतमसत्सर्वमानोपरोधात् ॥ १३ ॥

स्वस्य स्वेनोपदेशो न भवति न परब्रह्मणा निष्कलत्वा-
न्नाविद्या चेतयित्री स्वतनुसमधिकं वर्ष्म निर्जीवमात्थ ।
कश्चित्तत्त्वं ब्रवीतीत्ययमुपनिपतत्भ्रान्तिरुन्मुच्यते चेत्
तादृग्भ्रान्तिः पुराऽपि ह्यभवदिति न ते किं तदैवैष मुक्तः ॥ १४ ॥

तोयाधारेषु दोषाकर इव बहुधोपाधिषु ब्रह्म शुद्धं
छायापन्नं विशेषान् भजति तनुभृतस्तत्प्रतिच्छन्दभूताः ।
इत्यप्यत्यन्तदुःस्थं प्रसजति च तदा जीवनाशोऽपवर्ग-
श्छायाच्छायावदैक्यं न भजति न च तद्दर्शनं ब्रह्मणस्ते ॥ १५ ॥

एकं ब्रह्मैव नित्यं तदितरदखिलं तत्र जन्मादिभागि-
त्याम्नातं तेन जीवोऽप्यचिदिव जनिमानित्यनध्येतृचोद्यम् ।
तन्नित्यत्वं हि साङ्गश्रुतिशतपठितं सृष्टिवादः पुनः स्यात्
देहाद्यद्वारतोऽस्येत्यवहितमनसामाविरस्त्यैकरस्यम् ॥ १६ ॥

स्थैर्यं चेन्नाभ्युपेतं भवभृति न भवेदैहिकार्थप्रवृत्तिः
देहान्तत्वे तु धर्म्ये पथि निरुपधिका विश्ववृत्तिर्न सिध्येत् ।
आकल्पस्थायिपक्षे कृतमफलतया मुक्तिमार्गोपदेशैः
आमोक्षस्थायितायां श्रुतिरनभिमुखी पूरुषार्थे चतुर्थे ॥ १७ ॥

व्याप्तास्सर्वत्र जीवास्सुखतदितरयोस्तत्रतत्रोपलम्भा-
न्निर्वाह्ये देहगत्यागतिरिह वितथा तद्वतोऽपीति चेन्न ।
वक्त्री पञ्चाग्निविद्याप्रभृतिषु भविनां स्वस्वरूपेण सिद्धं
यातायातप्रकारं श्रुतिरगतिरिमां लाघवोक्तिं शृणोतु ॥ १८ ॥

अव्यापित्वेऽपि पुंसोऽभिमतबहुवपुःप्रेरणे यौगपद्यं
ज्ञानव्याप्त्योपपन्नम् बहुषु च वपुषोंऽशेषु निर्वाह एषः ।
यच्चादृष्टं क्रियां स्वाश्रययुजि तनुतेऽन्यत्र तत्कृद्गुणत्वा-
दित्येतत्सिद्धसाध्यं विभुन इह हि ब्रह्मणः प्रीतिकोपौ ॥ १९ ॥

इष्टं प्रादेशिकत्वं विभुषु जनिमतां बुद्धिशब्दादिकानां
तेनादृष्टं च तादृङ् न यदि तव सुखाद्याश्रयव्यापकं स्यात् ।
तस्मात्तत्स्वप्रदेशान्वयवति जनयेत्स्वं फलं यत्ननीत्या
भ्रातृव्यादौ च पीडां न घटयितुमलं किं विभुत्वेन भोक्तुः ॥ २० ॥

स्वादृष्टोपार्जितत्वाद्विभुषु यदवदन्विग्रहादेर्व्यवस्थां
तच्चैवं निर्निमित्तं तत इह न कथं सर्वतस्सर्वभोगः ।
आराध्ये विश्वसाक्षिण्यनुगुणफलदे त्वस्ति राजादिनीति-
स्तत्साम्ये भोगसाम्यं न हि भवति यथाकर्म भोगप्रदानात् ॥ २१ ॥

देहान्तर्मात्रदृष्टेः पृथगिह विषयिप्राणजीवोत्क्रमोक्ते-
र्भूयोवाक्यानुसारादणुरिति वचने तादृशोपाध्यनुक्तेः ।
ईशादाराग्रमात्रो ह्यवर इति भिदावर्णनात्स्पन्दवाक्या-
द्व्याप्त्युक्तिर्जातिधर्मप्रतिहतिविनिवृत्त्यादिमात्रेण जीवे ॥ २२ ॥

नात्मा देहानुरूपं विविधपरिणतिर्निर्विकारोक्तिबाधात्
स्थूलोऽहं मूर्ध्नि जातं सुखमिति च मतिस्तस्य देहात्ममोहात् ।
नानादेहश्च योगो प्रसजति भिदुरः पुंसि देहप्रमाणे
मुक्तौ देहात्ययात्स्यात्परिमितिविरहस्तत्प्रयुक्तेऽस्य माने ॥ २३ ॥

निर्मुक्तस्त्वन्मते स्यात्कथमपरिमितो नित्यमूर्ध्वं प्रधावन्
देहः कश्चित्तदानीमपि यदि नियतस्स्यात्तु तन्निघ्नताऽस्य ।
इच्छातो देहमेकं विशति स परिमित्यर्थमेवेति हास्यं
तस्मादास्माकनीत्या परिमितिरिह सा स्थायिनी या विमुक्तौ ॥ २४ ॥

कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्
मुक्तैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥ २५ ॥

कृच्छ्रात्संवर्तकष्टाद्यपगमजनितस्थूलदेहस्य जन्तो-
र्जाग्रत्स्वप्नस्सुषुप्तिर्मरणमथ मृतेरर्धसंपद्दशास्स्युः ।
सर्वं दुःखान्धकारस्थगितमिह सुखं त्वत्र खद्योतकल्पं
त्यक्त्वा शुद्धाशयास्तन्निरवधिकसुखां निर्विविक्षन्ति मुक्तिम् ॥ २६ ॥

कश्चिच्चेन्नित्यबद्धः किमयमहमिति स्यान्मुमुक्षोरुपेक्षा
मैवं युक्तस्य मुक्तिर्भवति दृढमिति प्रत्ययात्तत्प्रवृत्तेः ।
नो चेत्स्यामन्त्यमुक्तः किमहमिति न केऽप्यद्य मुक्तौ यतेरन्
सर्गस्थित्यादिसन्तत्यविरतिरत इत्येवमेकेऽन्यथाऽन्ये ॥ २७ ॥

निःशेषात्मापवर्गे विरतविहरणो विश्वकर्ता तदा स्यात्
नित्यं चेत्कोऽपि दुःख्येन्निरुपधिकदयाहानिरस्येति चेन्न ।
पक्षः पूर्वो यदि स्याद्विहरणविरतिः स्वेच्छया नैव दोषः
शिष्टे पक्षे निरुद्धा निरुपधिकदया कुत्रचिन्नित्यमस्तु ॥ २८ ॥

भक्तिर्मुक्तेरुपायः श्रुतिशतविहितस्सा च धीः प्रीतिरूपा
तन्निष्पत्त्यै फलेच्छाद्युपधिविरहितं कर्म वर्णाश्रमादेः ।
ज्ञानध्यानादिवाचां समफलविषया सैव युक्ता प्रतिष्ठा
सामान्योक्तिस्समानप्रकरणपठिता पर्यवस्येद्विशेषे ॥ २९ ॥

ध्यानाद्युक्त्या ध्रुवानुस्मृतिरिह विहिता ग्रन्थिमोक्षाय सैव
स्पष्टा दृष्टिस्तथैव श्रुतफलविषया सेवनत्वादुपास्तिः ।
वक्त्राऽप्यैक्यं त्रिद्युपास्त्योर्व्यतिकरितगिरा भक्तिमेवाह गीता
सर्वं तद्वित्तिमात्रे फलवति विफलं तेन सैवं विशिष्टा ॥ ३० ॥

विद्याः पञ्चाग्निवैश्वानरदहरमधुन्याससत्पूर्वसंज्ञाः
नाना शब्दादिभेदात्तुलितफलतया तद्विकल्पश्च शिष्टः ।
कर्मज्ञानाख्ययोगौ त्विह परभजनाधिक्रियार्थौ स्वदृष्ट्या
धर्मैर्वर्णाश्रमाणां त्रयमिदमवदन् सेतिकर्तव्यताकम् ॥ ३१ ॥

विश्वान्तर्यामि तत्त्वं स्वयमिह चिदचिद्विग्रहैर्वा विशिष्टं
यस्यामालम्बनं सा भवभयशमनी वीतरागस्य विद्या ।
यस्तूपास्ते यथोक्तं तदितरदखिलं ब्रह्मदृष्ट्या स्वतो वा
नैतस्य ब्रह्मनाड्योद्गतिरपि न पदव्यर्चिरादिर्न मोक्षः ॥ ३२ ॥

स्वान्तध्वान्तप्रसूतं दुरितमपनुदन् योगिनस्सत्त्वशुद्ध्यै
सर्वो वर्णादिधर्मश्शमदममुखवत्सन्निपत्योपकारी ।
विद्यां चेत्यादिवाक्येऽप्यनुकथितमिदं नैकवाक्यानुरोधात्
कर्मापेक्षाभिसन्धिं क्वचन विवृणुते तत्समुच्चित्यवादः ॥ ३३ ॥

संस्कारः कर्मकर्तुर्न भवति विहितं मुक्तये ज्ञानमन्य-
न्नाप्येतत्कर्मणोऽङ्गम् न च सकृदसकृत्त्वाप्रयाणानुवृत्तम् ।
अङ्गं तस्यासनाद्यं प्रणिधिसमुचितौ देशकालप्रभेदा-
वित्याद्यं साङ्ख्ययोगप्रकरणविततं सूत्रभाष्यादिषूक्तम् ॥ ३४ ॥

ब्रह्मण्यैकान्त्यभाजां मुहुरनुकथितो मोक्षधर्मेऽपवर्ग-
स्तस्मान्नानाऽमरेज्या न भवति परभक्त्यङ्गमित्यप्ययुक्तम् ।
ऐन्द्रीप्रातर्दनादिप्रथितनयविदामन्तरात्मैकलक्ष्ये-
ष्वग्नीन्द्रादिप्रयोगेष्वखिलमपि विभुः कर्म भुङ्क्ते स एकः ॥ ३५ ॥

त्यागत्रैविध्यमुक्त्वा स्वमतमिह जगौ सात्त्विकं त्यागमीश-
स्तस्माद्वर्णाश्रमादित्यजनमपदृशां तामसं मोहमूलम् ।
योगारूढस्य कर्मच्यवनमपि तदा सह्यमङ्गत्वथंवाक्यै-
र्योगं त्वत्याश्रमिभ्यः परममिति वचो वक्ति मोक्षाश्रमेण ॥ ३६ ॥

तुर्यो निष्कृष्य मोक्षाश्रम इति कथितस्तेन नान्येषु विद्या
शान्त्यादिव्याहतेश्च्रत्यसदिह गुणिनां सर्वतोमुक्त्यधीतेः ।
यावजीवं द्वितीयाश्रमवति पुनरावृत्त्यभावोऽप्यधीतः
स्मृत्याद्यैश्चैवमुक्तं भवति तु चरमे योग्यताधिक्यमात्रम् ॥ ३७ ॥

यन्नित्यं तन्न काम्यं तदपि न तदिति स्थापिते कर्मभेदे-
ऽप्येकं विद्याश्रमाङ्गम् भवति हि विनियुक्त्यन्तरेणोपपत्तेः ।
तत्रानुष्ठानतन्त्रं विदुषि तु घटते कर्तृकालाद्यभेदात्
प्राजापत्यादिलोकार्थिनि च तदितरोऽनर्थरोधाय तद्वान् ॥ ३८ ॥

मन्दस्यापि प्रवृत्तिः किमपि फलमनुद्दिश्य कस्यापि न स्यात्
नित्येऽनर्थोपरोधप्रभृति फलमतः काम्यतैवेति चेन्न ।
नित्येष्टोऽनर्थरोधस्तदितरदतथा किंच शिष्टो विधीना-
माज्ञानुज्ञाविभागस्सुगम इह निरुक्त्यैव नैमित्तिकांशः ॥ ३९ ॥

कर्तव्यं यन्निमित्ते सति तदुभयधा पापशान्त्यर्थमेकं
तत्स्यात्काम्येन तुल्यं परमकरणतो दोषकृन्नित्यतुल्यम् ।
सत्यां कामश्रुतौ संवलितमपि भवेत्तद्बलादेतदेव
त्यागे च प्रत्यवायस्त्वनधिकृतिमुखस्तत्रतत्रावसेयः ॥ ४० ॥

निष्कामं चेन्निवृत्तं तदिह न घटते मुक्तिकामाधिकारात्
स्वप्रीतिस्पर्शहीना न च भवति परप्रीतिरिष्टेति चेन्न ।
युक्ता यस्मान्निवृत्तिर्बहुभयशवलात्तन्निवृत्तं निवृत्तं
सूते यत्र प्रवृत्तिस्त्वभिमतमहितं तत्प्रवृत्तं प्रवृत्तम् ।। ४१ ।।

पुंभिः सिद्धाधिकारैः क्रतव इव निराकाङ्क्षभावं भजन्त्यः
प्रोक्तास्त्रैवर्णिकाहाश्रुतिनयवशतो यद्यपि ब्रह्मविद्याः ।
अस्तेयाद्यैः प्रपत्त्या परिचरणमुखैरप्यधीतैः स्वजातेः
सर्वेऽपि प्राप्नुयुस्तां परगतिमिति तु ब्राह्मगीतादिसिद्धम् ।। ४२ ।।

ध्यानादृष्टेन साक्षात्कृतिरुपजनिता बाधते चेत्प्रपञ्चं
तत्तुल्यार्थैव शाब्दी प्रमितिरपि न किं बाधते पूर्वमेव ।
ज्वालैक्यादौ परोक्षादपि हि निजगदुर्बाधमध्यक्षबुद्धे-
र्न्यत्रादृष्टरूपामहितविमथनीं शक्तिमङ्गीकरोषि ।। ४३ ।।

निर्दिष्टो निष्प्रपञ्चीकरणविधिरसौ गौडमीमांसकाप्तै-
र्दृष्टो न क्वापि दुर्निर्वहमपि करणाद्यत्र साध्याविशेषात् ।
मुक्तिर्नैयोगिकी चेज्जगदपि न मृषा नश्वरी सापि ते स्यात्
ध्वंसात्मत्वेऽपि तस्या न च वदसि भिदां ब्रह्मणस्तच्च नित्यम् ।। ४४ ।।

वाक्यार्थज्ञानमात्रादमृतमिति वदन्मुच्यते किं श्रुतेऽस्मिन्
बाढं चेन्मानबाधस्स यदनुभवति प्रागिवाद्यापि दुःखम् ।
ध्यानादीनां विधानं भवति च वितथं तन्न युक्तं न चेष्टं
ध्यानाद्यङ्गाढ्यशब्दोदितचरममतेर्नाधिकं वः प्रकाश्यम् ।। ४५ ।।

उद्देश्यांशं त्वमाद्यं स्फुटमनुभवतां सम्यगध्यक्षवित्त्या
प्रत्यक्षत्वभ्रमोऽस्य त्वमसि दशम इत्यादिवाक्यार्थबोधे ।
शब्दात्प्रत्यक्षबोधं प्रसजति शिथिला तद्व्यवस्था ततोऽर्थे
साक्षात्कारं न शब्दो जनयति विमतस्सिद्धवच्छब्दभावात् ।। ४६ ।।

शिष्यो जीवस्त्वसिद्धः किमु तव यदि वा भ्रान्तिसिद्धो मितो वा
नासिद्धायोपदेशो भ्रमविषयमितौ नोपदेशार्हताऽस्य ।
भेदेनैक्येन वाऽन्यः कथमुपदिशतु ज्ञातभेदोऽप्यभेदं
तादात्म्ये जागरूके सति किमुपदिशेत्स्वात्मने तद्विदे सः ।। ४७ ।।

नैवालं भ्रान्तिबाधे परमपि तदिदं तत्त्वमस्यादिवाक्यं
भ्रान्तोक्तिर्यद्वदादौ श्रुतिकृतनिखिलभ्रान्तिमूलत्वबोधात् ।
रज्जौ सर्पभ्रमे किं जनयति विदितभ्रान्तवाक्सर्पबाधं
स्वप्नेऽहिः स्वप्नबुद्ध्या किमु गलति यदा तत्र च स्वाप्नताधीः ।।४८।।

छायादिर्नं त्वसत्यस्सदवगतिकरस्तत्र हेतुर्हि तद्धी-
स्साध्यज्ञप्त्यादिवत्सा स्वयमिह न मृषा नास्ति धीरित्यबाधात् ।
सत्येनैव प्रसूता घट इव विमता शेमुषी कार्यभावा-
द्धेतुत्वालीकभावौ कथमिव विहतावेकमेवाश्रयेताम् ॥ ४९ ॥

ज्ञानस्याशेषभेदोदयविहतिकृतो न स्वनाश्यत्वयुक्ति-
र्वाताद्यैरेव सद्यश्शममधिकुरुते दग्धदाह्योऽपि वह्निः ।
तस्मात्तस्यान्यदेव प्रशमकमपरं तस्य चेत्यव्यवस्था
तच्चेच्छान्ति न गच्छेत्कथमिव भविता सर्वभेदोपमर्दः ॥ ५० ॥

बोधस्यान्त्यस्य वेद्यं किमु तव विशदं ब्रह्म मायान्वितं वा
किं वा भेदप्रपञ्चः किमु तदनृतता किन्नु वेद्यं न किञ्चित् ।
आद्ये स्याद्ब्रह्म दृश्यं तदुपरि युगले मोहसत्ताऽथ तुर्ये
सूते द्वैतं सती सा स्वविहतिमनृता पञ्चमे स्यान्न धीत्वम् ॥ ५१ ॥

साध्या वस्सर्वमायाविरतिरपि परं ब्रह्म तस्मात्परा वा
पूर्वत्र प्रागपि स्यात्परमपि न भवेदुत्तरत्राभ्युपेते ।
साऽपि स्याच्चेन्निवर्त्या पुनरपि विलगेत्पूर्व एव प्रपञ्चो
नो चेत्सत्यैव सा स्यात्प्रसजति च ततो ब्रह्म तत्सद्वितीयम् ॥ ५२ ॥

अन्त्यज्ञानस्य जीवः स्थितिपदमथवा केवलं ब्रह्म ते स्या-
दाद्ये तेनैव बाध्यो न तदुपजनयेद्धीस्थितो किं ततोऽस्य ।
अन्त्ये सत्याऽनृता वा तदधिकरणता नाद्य इष्टः परस्मिन्
तत्क्लृप्त्यादेरयोगस्तदिह विमृशतां किं न दुष्टं त्वदिष्टम् ॥ ५३ ॥

नाभुक्तं कल्पकोटयाऽप्युपशमनमियात्कर्म निष्कृत्यभावे
विद्यातस्तद्विनाशश्रुतिरिह तदसौ तत्प्रशंसेति चेन्न ।
तादृग्विद्यैव तन्निष्कृतिरिति हि विदांचक्रुराम्नायवृद्धा
नान्यद्ब्रह्मानुभूतिप्रतिभटदुरितध्वंसतस्साध्यमत्र ॥ ५४ ॥

प्रायश्चित्तं न पुण्ये न च सुकृतमनुश्रूयते धर्मबाध्यं
नाधर्मत्वं विधानान्न यदि सुचरितं त्वङ्गमस्याश्च न स्यात् ।
मैवं धर्मोऽप्यधर्मो भवति हि बहुधाऽधिक्रियादेर्विशेषात्
धर्मं त्रैवर्गिकं तु स्वयमिह निगमः पाप्मकोटौ पपाठ ॥ ५५ ॥

अश्लेषः पाप्मभिश्चेत्प्रसजति वितथा दुश्चरित्रान्निवृत्ति-
स्तेषु प्रामादिकेष्वप्यमतिकनिपतद्बीजवत्स्यात्प्ररोहः ।
मैवं शास्त्रैकवेद्ये फलफलिविषये युक्तयो ह्यस्वतन्त्राः
शास्त्राद्बाधस्तु तिष्ठेन्मतिकृतविषये शब्दशक्त्यादिभिर्नः ॥ ५६ ॥

श्लिष्टं विद्याङ्गपुण्यं स्वफलवितरणान्नेतरार्थं विरागे
रागादारभ्यमाणं फलवदमतिकं संभवेन्नैव पुण्यम् ।
पुण्याश्लेषस्ततोऽस्मिन्न घटत इति चेन्नोपयुक्तातिरिक्तै-
र्विद्याङ्गैस्तस्य योगादमतिकृतमपि ह्यामनन्त्येव पुण्यम् ॥ ५७ ॥

कर्माश्लेषप्रणाशौ तदुपधिभगवन्निग्रहादेर्निवृत्ति-
र्नष्टाश्लिष्टातिरिक्तं न च किमपि तत। संक्रमः कस्य मैवम् ।
तत्तत्कर्मप्रसूतौ स्वभजनशमितौ निग्रहानुग्रहौ यौ
तत्तुल्यावेव देवः प्रयति विदुषि तच्छत्रुमित्रेषु धत्ते ॥ ५८ ॥

अन्यश्चेदन्यकर्मप्रजनितफलभुक् शास्त्रवैयाकुली स्या-
द्ब्रह्मज्ञैरुज्झितानां क्वचिदपि न ततः कर्मणां संक्रमः स्यात् ।
उद्वेलस्स्याच्च धातेत्यसदविषमताद्यन्वितेनैव धात्रा
विद्यानिष्ठोपकाराद्युचितफलमिदं दीयते वर्गयुग्मे ॥ ५९ ॥

अर्चिर्घस्रोऽथ पक्षस्सित उदगयनं वत्सरो मातरिश्वा
मार्तण्डस्तारकेशस्तडिदपि वरुणामर्त्यनाथप्रजेशैः
आदिष्टो विश्वनेत्रा स्वयमतिवहने देवयानाध्वगानां
यः प्रोक्तोऽमानवाख्यस्स तटिदधिपतिर्विश्रुतो मानसोऽपि ॥ ६० ॥

बुद्धेर्योऽसौ विकासः कबलितनिखिलोपस्कृतब्रह्मतत्त्वः
स प्राक्चेन्नित्यमुक्तिर्न यदि कथमसौ नश्वरत्वं न गच्छेत् ।
मैवं प्रध्वंसवत्ते स खलु मम तथा शौनकाद्युक्तनीत्या
शान्ताशेषापराधे न च भवति पुनस्तत्र सङ्कोचहेतुः ॥ ६१ ॥

मुक्तौ देहाद्यभावे मुकुलितविषयो जक्षदादिप्रवाद-
स्तत्सत्त्वे चाशरीरश्रुतिविहतिरतः का चिकित्सेति चेन्न ।
इच्छातस्स्यादवस्थाद्वयमुभयविधश्रुत्यबाधाद्विमुक्तौ
कर्मायत्तैर्वियोग। परमिह कथितस्तस्य देवोपमस्य ॥ ६२ ॥

स्यान्मुक्तो विश्वदेही यदि भवति जगद्व्यापृतौ तस्य शक्तिः
स्वातन्त्र्यं क्वाप्यशक्तौ विगलति स च नः स स्वराडित्यधीतः ।
धत्तेऽनुच्छेद्यसारा तदियमुभयतः पाशतां तर्करज्जु-
र्मैवं देवस्तदिच्छां क्वचिदपि न विहन्त्येवमस्तु स्वराट् सः ॥ ६३ ॥

आविर्भूतस्वरूपा निरवधिकसुखब्रह्मभुक्तिस्तु मुक्तिः
सेवात्वाद्दुःखकृत्सा भवति यदि न तद्धर्मिमानेन बाधात् ।
पाप्मा चास्मिन्नुपाधिस्स च न खलु तदा पुण्यपापव्यपाया-
दात्मानो विष्णुशेषा इति च सुखमयी सा स्वरूपानुरूप्यात् ॥ ६४ ॥

सर्वस्याप्यानुकूल्यं स्वत इह जगतो वासुदेवात्मकस्य
व्यक्तिं तन्मुक्तिकाले भजति भवकृतज्ञानसङ्कोचहानेः ।
प्राचीनप्रातिकूल्यक्रमविषयधिया नैष दुःख्येत्तदानीं
प्रागप्येतत्स्वकर्मोपधिकृतभगवन्निग्रहैकप्रयुक्तम् ॥ ६५ ॥

अन्ये चानादिशुद्धाः श्रुतिसमधिगतास्सूरयस्सन्त्यसङ्ख्याः
कर्माभावादनदेनं तु भवति कदाऽप्येषु संसारबन्धः ।
शेषाणां शेषिणश्च स्फुरति सुखतया सर्वदा सर्वतत्त्वे
नित्यानां मुक्तिभाजामपि भुवनकृता भोगमात्रं समानम् ॥ ६६ ॥

सालोक्याद्याः प्रभेदा ननु परिपठिताः क्वापि मोक्षस्य मैवं
सायुज्यस्यैव तत्त्वात्तदितरविषये मुक्तिशब्दस्तु भाक्तः ।
तस्मिंस्ते च त्रयस्स्युस्तदपि च सयुजोर्भाव इत्यैकरस्यं
युक्सास्यं [लोक] योगसाम्यादिवदपटुधियां तावतैवैक्यमोहः ॥ ६७ ॥

विश्वाधारस्य लक्ष्मेत्यभिहितमखिलं संभवेन्नापवृक्ते
तन्निष्ठत्वादि सर्वं न हि विलयमियात्तच्छरीरस्य तस्य ।
तन्निघ्नत्वेऽपि मुक्तो न भवति पुनरावृत्तिशङ्काकलङ्की
तादृक्सौहार्ददृष्टेर्वयमिह तदनावृत्तिशास्त्रेण विघ्नः ॥ ६८ ॥

विश्वैर्वैशेषिकैस्तैर्भवति विरहितो नरशितादृग्गुणत्वा-
ज्जीवात्मा जन्मकाले घटवदिति यदि स्यादिहाम्नायबाधः ।
दृष्टान्तस्साध्यहीनः क इव निगमविल्लिप्सते मुक्तिमेतां
धीर्नित्येच्छादयस्तत्परिणतय इति स्याच्च हेतोरसिद्धिः ॥ ६९ ॥

आत्मा चिन्मात्ररूपो विकृतिमति जडे बिम्बितो बुद्धितत्त्वे
तच्चास्मिँस्तद्विवेकाग्रहणविरचितः पुंसि संसारमोहः ।
अन्त्या विज्ञानवृत्तिः प्रकृतिपुरुषयोरन्यतां गाहमाना
तादृक्संसारभेत्त्री पुरुष इह सदा मुक्त एवेति साङ्ख्याः ॥ ७० ॥

नीरूपे बिम्बितत्वं क्वनु भवति कथं रूपशून्यस्य तत्स्या-
न्निर्लेपे संसृतिः का कथमतिविशदो निष्क्रियश्चैष मुह्येत् ।
नित्यं वा किं न मुह्येदुपधिभिरितरैर्वेत्तु भेदं कथं वा
को वा मोक्षोऽद्य पुंसः प्रथममपि न खल्वस्य दुःखादिगन्धः ॥ ७१ ॥

व्यापिन्येकाऽपि सांख्यैः प्रकृतिरभिहिता सर्वसाधारणी सा
व्याप्ता जीवाश्च सर्वे प्रकृतिपरिणतिर्भोग एषामभीष्टः ।
सर्वे सर्वस्य भोगाः स्युरिह तत इमे संनिधानादिसाम्यात्
बुद्धीच्छाद्यं च सर्वं प्रकृतिगतमतो न व्यवस्था ततोऽपि ॥ ७२ ॥

मुक्तिः प्राणाक्षदेहादिभिरुपधिभिरत्यन्तविश्लेषरूपा
जीवद्भावोऽपि तैस्सङ्गम इति विहतेर्जीवतस्सा कथं स्यात् ।
आपस्तम्बादयश्च श्रुतिगतिभिरिमां युक्तिभिश्च व्युदासु-
र्जीवन्मुक्तादिशब्दः क्वचिदुपचरितस्तत्समावस्थयैव ॥ ७३ ॥

चन्द्रैकत्वादिबुद्ध्या न हि विलयमियाच्चक्षुरर्थादिदोषः
स्याद्बाधेऽपि द्विचन्द्रप्रभृतिषु हि ततो भ्रान्तिमात्रानुवृत्तिः ।
विस्रम्भाभावतः स्यात् फलमपि न तु ते जाघटीति द्वयं तद्
ब्रह्मान्याशेषबाधादनतिबलतया बाध्यतो बाधकस्य ॥७४ ॥

स्वातन्त्र्यं ब्रह्मणैक्यं पशुपतिसमतां वासनोच्छेदमात्रं
धीसन्तानप्रणाशं निजमतिसुखयोर्नित्ययोस्सन्निकर्षम् ।
चित्तेन स्वात्मसौख्यानुभवमुपलवद्भावमूर्ध्वंप्रयाणं
शून्याद्वैतं च मुक्तौ श्रुतिरुपकृतये कल्पतां जल्पतां वः ॥ ७५ ॥

सव्याख्यतत्त्वमुक्ताकलापविषयसूची

॥ श्रीः ॥

॥ श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः ॥

कवितार्किकसिंह-सर्वतन्त्रस्वतन्त्र-श्रीमन्निगमान्तमहादेशिकप्रणीतः

तत्त्वमुक्ताकलापः

जडद्रव्यसरः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादेष संवर्धमानो
नाभीनालीकरि[ङ्ग]ङ्गन्मधुकरपटलीदत्तहस्तावलम्बः ।
अस्माकं संपदोघानविरलतुलसीदामसंजातभूमा
कालिन्दीकान्तिहारी कलयतु वपुषः कालिमा कैटभारेः ॥ १ ॥

सर्वार्थसिद्धिः

जयति सकलविद्यावाहिनीजन्मशैली जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरीबालसूर्यो निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥

ताराकल्पे स्फुरति सुधियां तत्त्वमुक्ताकलापे
दूराद्वृत्त्या दुरधिगमतां पश्यतां सर्वसिद्ध्यै ।
नातिव्यासव्यतिकरवती नातिसंकोचखेदा
वृत्तिस्सेयं विशदरुचिरा कल्प्यतेऽस्माभिरेव ॥

आरिप्सितस्य प्रबन्धस्याविघ्नपरिसमाप्त्यादिसिद्ध्यर्थं मङ्गलमाचरन्नर्था द्वक्ष्यमाणं द्रव्याद्रव्यविभागं प्रतितन्त्रविशेषांश्च संग्रहेण सूचयति—लक्ष्मीति । *यज्ञविद्येत्यादिना सर्वविद्यानां तादधीन्योक्त्या सा ख्याप्येति लक्ष्मीरादौ संकीर्त्यते । नित्ययुक्तत्वसूचनाय सततपरिचयोक्तिः, नाभीत्यादिना पद्मभुवः कार्यत्वकर्मवश्यत्वसूचनात्ततोऽर्वाचामनीश्वरत्वं कैमु[तिक] त्यसिद्धम् । अस्माकमिति । जीवानामीश्वरादन्योन्यं च भेदः, प्रत्यक्त्वमहंशब्दार्थत्वं च प्रख्याप्यते । तेन स्थालीपुलाकन्यायेन परमतनिरासमप्युदाहरति—संपदोघानिति । तत्त्वज्ञानादिकाः स्वप्राप्तिपर्यन्तास्सिद्धिपरम्पराः । अविरलेत्यादिना सत्त्वाधिकप्रशस्ततमद्रव्यार्च-

नीयतयाऽन्येभ्यो व्यावर्तनीयत्वमनुवर्ण्यते। कालिन्दीकान्तिहारीत्यनेन तद्गुणानां परगुणतिरस्कारकत्वमुपलक्ष्यते। कैटभारेर्वपुष इति व्यतिरेकविभक्त्या शुद्धसत्त्वमयविग्रहयोगस्त[स्यस्व] त्स्वरूपादन्यत्त्वं च स्थाप्यते। वपुषः कालिमेति द्रव्याद्रव्यविभागप्रदर्शनार्थम्। एवं जडाजडाद्यपि यथास्थानमूह्यम्॥ १॥

॥ श्रीमते हयग्रीवाय नमः॥

श्रीसर्वार्थसिद्धिव्याख्या आनन्ददायिनी

श्रीमान् वेदान्तवेद्यः शुभगुणनिलयो निस्समस्सर्वदोष-
प्रत्यर्थीभूतमूर्तिः चिदमितमहिमानन्दसत्यस्वरूपः।
सृष्टिस्थित्यन्तलीलः सकलचिदचितां मोक्षदस्सर्वविद्या-
वेद्यो वागीशमूर्तिः वृषभगिरिपतिः श्रेयसे स्यात्सदा नः॥ १॥

जरीजृम्भत् स्तन्भादुदयगिरिश्रृङ्गादिव रविः
विभिन्दानो रक्षस्तिमिरपटलीं यः कररुहैः।
वितन्वन्नानन्दं मृगपतिनराकारघटितः
स नश्श्रेयो देयादमृतफलवल्लीसहचरः॥ २॥

आराधनार्थं वृषशैलभर्तुः घण्टा मुदा पद्मभुवा प्रयुक्ता।
यद्रूपमास्थाय जगन्त्यरक्षत्तमेव वेदान्तगुरुं नमामि॥ ३॥

प्रतिमतकथकधुरन्धरविद्याहङ्कारतूलवातूलः।
सकलजनवन्दनीयो भवतु मुदे मे महागुरुर्नित्यम्॥ ४॥

कुशिककुलजलधिचन्द्रो निगमान्तगुरुश्श्रीनिवासो नः।
जयति यतिराजदर्शितसिद्धान्ताम्भोजमोदकरभानुः॥ ५॥

आत्रेयवंशदुग्धाब्धिप्रालेयांशुं कलानिधिम्।
सुराचार्यसमप्रज्ञमप्पलाचार्यमाश्रये॥ ६॥

श्रीवत्सगोत्राम्बुधिमध्यदेशात् बभूव चन्द्रो नरसिंहनामा।
तस्यात्मजः साधुजनैकसेवी नृसिंहदेवः प्रथितो धरायाम्॥ ७॥

तोतारम्बातनयः पौत्रश्श्रीदेवराजस्य।
दौहित्रः कुशिककुलश्रीभाष्यश्रीनिवासस्य॥ ८॥

अप्रसिद्धस्य पक्षस्य विस्तरेण प्रकाशिकाम्।
सर्वार्थसिद्धिसट्टीकां करोम्यानन्दवल्लिकाम्॥ ९॥

इह खलु कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो वेदान्ताचार्यपरनाम। श्रीमान् वेङ्कटनाथार्यः तत्वहितपुरुषार्थज्ञानहीनानवलोक्य सञ्जातकारुण्यः तद्रक्षणाय प्राचीनप्रबन्धेषु संक्षिप्तान् विप्रकीर्णांश्च सङ्कलय्य तत्वमुक्ताकला-

पाख्यपद्यरूपप्रबन्धेन निरूप्य तस्य दुरधिगमतामवलोक्य स्वयमेव व्याख्यास्यन् निर्विघ्नपरिसमाप्तिप्रचयगमनाय शिष्टाचारपरिप्राप्तं गुरुप्रकाशनरूपं मङ्गलमारचय्य शिष्यशिक्षार्थं निबध्नाति—जयतीति ॥

ताराकल्पे—नक्षत्रसदृशे। दूराद्वृत्या—नक्षत्रपक्षे दूरस्थित्येत्यर्थः। 'दूरान्तिकार्थेभ्यो द्वितीया च' इति सप्तम्यर्थे पञ्चमी। ग्रन्थपक्षे वृत्तिः—व्याख्या वृत्त्या इति षष्ठी; वृत्तेर्दूराद्धेतोः—वृत्त्यभावादिति यावत्। यद्वा कर्तरि तृतीया। वृत्त्या—क्रमदूरत्वादित्यर्थः। दुरधिगमत्वं एकत्र अप्राप्तिः अपरत्राज्ञानम्। व्यासो—विस्तरः। व्यतिकरः—सङ्कीर्णता। खेदा—खिद्यमाना कर्मणि घञ्। स्थानमिति—अविरलतुलसीत्यादौ ॥ १ ॥

तत्त्वमुक्ताकलापव्याख्या अक्षरार्थः

श्रीमते श्रीनिवासपरब्रह्मणे नमः

श्रीमते रामानुजाय नमः

श्रीमते वेदान्तगुरवे नमः

अजायत यतस्सर्वं प्रजापतिमुखं जगत्।
अजाश्वमेधेऽभिव्यक्तं गजाद्रौ भाति तन्महः ॥ १ ॥

अम्बुजभुवा समर्पितमम्बु यदङ्घ्रेश्शिवो दधे मूर्ध्ना।
अम्बुधिकन्याध्युषितं जम्बुपुरीशं तमाश्रये देवम् ॥ २ ॥

यदपाङ्गतरङ्गसङ्गताङ्गस्तुलनामाङ्गिरसेन याति लोकः।
तमभङ्गुरमानने तुरङ्गं कमलोत्सङ्गमुपैमि वागधीशम् ॥ ३ ॥

रामानुजाय मुनये सीमातीतानतीरहं विदधे।
क्षेमाय यो जनानां भूगावाविश्चकार परमार्थम् ॥ ४ ॥

त्र्य्यन्तरङ्गसूक्तिस्त्रय्यन्तगुरुस्तुरङ्गवदनोऽन्यः ।
मय्यन्तराविशन्नक्षय्यं तम आन्तरं शमं नयतु ॥ ५ ॥

नत्वा नृसिंहसूरीन्द्रं मत्वा तन्मुखतः श्रुतम्।
तत्त्वमुक्ताकलापार्थं तत्त्वमत्र प्रकाश्यते ॥ ६ ॥

सर्वार्थसिद्धिग्रहणेऽलसाये
मूलाक्षरार्थाधिगमोत्सुकास्स्युः ।
तेषां मुदे सिद्धिमवेक्ष्यतत्त्व-
मुक्ताकलापस्य लिखामि टीकाम् ॥ ७ ॥

श्रीमान् वेङ्कटनाथार्यः प्रारिप्सितस्य प्रबन्धस्य निर्विघ्नपरिपूर्तिसिद्धये स्वेष्टदेवतां स्तुवन् तत्र तत्वज्ञानादिसंपदमभ्यर्थयते—**लक्ष्मीति**। अत्र लक्ष्मीत्युपक्रम्य कैटभारेरित्युपसंहारात् लक्ष्मीहयवदनरूपभगवदवतारमूर्तेरनुस्मरणं कृतमित्यपि गम्यते। यथा "यज्ञविद्या महाविद्ये" त्यादिना सर्वविद्याप्रवर्तकत्वोक्त्या लक्ष्म्या इह सङ्कीर्तनं तथा वेदापहारिमधुकैटभसंहारेण तदपहृतनिखिलवेदप्रत्यानयनपूर्वकं ब्रह्मणः पुनस्तदुपदेशेन सर्वविद्याप्रवर्तकतया हयवदनमूर्तेरनुस्मरणमप्यावश्यकमित्याशयः।

विरोधि निरसनाय लक्ष्मीरादौ संकीर्त्यते तस्य तदधीनत्वश्रवणात्। अतएव "यज्ञविद्या महाविद्ये" त्यादिना पुराणरत्ने सर्वविद्यारूपतोक्तिः नित्ययुक्तायास्तस्या **नेत्रोत्पलश्रीसततपरिचयः** सदासंदर्शानात् नेत्रनीलकान्तिसंक्रमः **तत एष संवर्धमान** इत्युक्त्या प्रागेव उपादानपरादिविग्रहरूपस्य कालिम्नः—मात्रयाऽनुवृत्ति रस्तीति गम्यते।

शुद्धस्फटिकसङ्काशेऽपि तद्वपुषि मात्रया तदुपादानपरविग्रहादिरूपानुवृत्तिसंभावनया स्फटिके जपासन्निधिना लौहित्यप्रत्ययवत् लक्ष्मीनेत्रकान्ति सन्ततिसन्ततानुवृत्या कालिमानुसन्धानमपि नानुपपन्नम्॥

तत्रादिमे पदे सततपरिचयेत्युक्त्या लक्ष्म्याः नित्ययोगस्सूचितः। एष संवर्धमान इत्युक्त्या स्वतएव मात्रया विद्यमान इति गम्यते। **नाभीनालीकेत्यनेन** नाभिकमलोत्पन्नब्रह्मादिस्तम्बपर्यन्तजगत्कारणत्वं सूचितम्। तत्र रिङ्खन्मधुकरपटली—तदवकाशापर्याप्त्या—तदुपरि भ्रमतां अमितानां मधुव्रतानां मण्डली। तया **दत्तहस्तावलम्बः**—यथा रूपान्तरे निमग्नो न भवेत् तथा समुद्धृत इति भावः।

अस्माकमित्यनुबन्धिनोऽप्यन्तर्भाव्य बहुवचनम्। **संपदोघानिति**। तत्वज्ञानादिमोक्षार्थपर्यन्तसंपत्परम्परोत्कीर्तनं। **कलयत्वित्यनेन** तदन्वयः। **अविरलेति** पादादिमौलिपर्यन्ततुलसीमालालङ्कारेण लब्धातिशय इत्यर्थः। अलङ्कारवैलक्षण्यादलङ्कार्यवैलक्षण्यस्यापि लाभः। उक्तातिशयलाभेन सर्वतेजसां छादकतामाह—**कालिन्दीति कलयतु**—तनोतु **वपुषः** अप्राकृतविग्रहस्य **कालिमा** नीलवर्णः।

कैटभारेरिति! मधुकैटभदैत्यसंहारेण तदपहृतनिखिलवेदप्रत्यानयन पूर्वकं ब्रह्मणः—पुनस्तदुपदेशादिना महोपकारिणः हयवदनरूपेणावतीर्णस्य विष्णोरिहानुस्मरणं क्रियते।

अत्र भगवतः श्रीनित्ययोगः निषेव्यत्वं सर्वकारणत्वम् सर्वस्मादुत्तमत्वं बहुभ्यो—जीवेभ्यो भेदः मोक्षपर्यन्त (संपत्) फलप्रदत्वं सत्वाधिकद्रव्याचंनीयतया सर्वाधिकत्वं परगुणतिरस्कारकगुणबहुलदिव्यमङ्गलविग्रहादियोगः तत एव द्रव्याद्रव्य जडाजडादिभेदाः इत्यादयः वक्ष्यमाणाः बहवोविषयास्संग्रहेण सूचिता भवन्ति॥ १॥

नानासिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेस्तनूजो
वैश्वामित्रस्य पौत्रो विततमखविधेः पुण्डरीकाक्षसूरेः ।
श्रुत्वा रामानुजार्यात्सदसदपि ततस्तत्त्वमुक्ताकलापं
व्यातानीद्वेङ्कटेशो वरदगुरुकृपालम्भितोद्दामभूमा ॥ २ ॥

सर्वा० । चिकीर्षितस्य श्रद्धेयत्वाय वक्तृसंप्रदायवैलक्षण्यं दर्शयति **नानेति** । सत्—प्रामाणिकं मुमुक्षोरुपादेयं च; तदन्यदसत् । सतस्सत्त्वेनासतश्चासत्त्वेन श्रवणमिहेष्टम्, ततः—श्रवणादेव हेतोः ॥ २ ॥

आनन्द० । ननु प्रारिप्सितं विहाय नानासिद्धान्तेत्यादिना स्वमहिमवर्णनमनुचितमित्यत्राह —**चिकीर्षितस्येति** । सदसतोर्वैपरीत्येन श्रवणे श्रद्धेयत्वं न स्यादित्यत्राह —**सत** । **व्यातानीदिति**—आशंसायाम्; कर्तुमाशंसत इत्यर्थः । सङ्कल्पमात्रेण ग्रन्थस्य सिद्धत्वं मत्वा भूतनिर्देशः ॥ २ ॥

अक्ष० । अत्र प्रेक्षावतां श्रद्धेयत्वाय वक्तृसंप्रदायवैलक्षण्यं दर्शयन् चिकीर्षितं प्रतिजानीते **नानेति**–नानाभूता ये सिद्धान्ताः तेषां नीतयः यथा—नानाभूताश्च याः सिद्धान्तनीतयः तासु परिश्रमेण परिचयेन विमला संशयविपर्ययादिरहिता धीर्यस्य । **अनन्तसूरेस्तनूजः** । **वैश्वामित्रस्य**—विश्वामित्रकुलोद्भूतस्य । **विततमखविधेः** विस्तृतयज्ञानुष्ठानस्य । **पुण्डरीकाक्षसूरेः पौत्रः** । एतावता ज्ञानानुष्ठानविख्यातपितृपितामहवत् स्वस्याऽपि यथावस्थिततत्वज्ञानार्हता निर्दशिता ।

अथ मातुलकुलवासात् विशेषज्ञतामाह **श्रुत्वेति** । **रामानुजार्यात्**—वादिहंसाम्बुवाहार्यात् । **सदसदपि** सत् प्रामाणिकं असत् अप्रामाणिकञ्च **श्रुत्वा** आकर्ण्य । सतः तेन रूपेण श्रवणं उपादानाय कल्पते असतः तेन रूपेण श्रवणमपि हानार्थमुपयुज्यतएवेतिभावः । **ततः** श्रवणादेवहेतोः । **तत्वमुक्ताकलाप**—तत्वानां जडजीवेश्वरबुद्ध्यद्रव्याणां यथावस्थितानामेव निर्दोषाणां मुक्तामणीनामिव धारणार्हतया सुसंगतं संग्रथनात् तन्नामकं ग्रन्थरूपं भूषणं । **व्यातानीत्**—कर्तुमाशंसत इत्यर्थः । **वेङ्कटेशः**—वेङ्कटाद्रीशावताररूपतया तन्नामधेयः । प्राचार्यानुग्रहेण लब्धातिशयमप्याह—**वरदेति वरदगुरोः** वात्स्यवरदार्यस्य । तथा भगवतो वरदस्य क्षीरदाननिबन्धनेन मातृत्वेन गुरुभूतस्य । **कृपया लम्भितः** प्रापितः । **उद्दामभूमा** बालभावादेव ग्रहणधारणातिशयदर्शनविस्मितेन "प्रतिष्ठापितवेदान्त" इत्याद्यनुग्रहकरणात् निस्सीममहिमा यस्य तथोक्त इत्यर्थः ।

एवमाजानसिद्धतत्वाधिगमनैपुण्यस्यापि प्रबन्धुः आचार्यप्राचार्यप्रसादातिशयेन पुलस्त्यवसिष्ठवरप्रदानेन पराशरस्येव श्रद्धेयतद्वाग्विलासत्वं सिद्धमिति भावः ॥ २ ॥

प्रज्ञासूच्याऽनुविद्धः क्षतिमनधिगतः कर्कशात्तर्कशाणा-
च्छुद्धो नानापरीक्षास्वशिथिलविहितो मानसूत्रे निबद्धः।
आतन्वानः प्रकाशं बहुमुखमखिलत्रासवैधुर्यधुर्यो
धार्यो हेतुर्जयादेः स्वहृदि सहृदयैस्तत्त्वमुक्ताकलापः ॥ ३ ॥

सर्वा० । प्रबन्धस्य स्वरूपातिशयादपि सुधीभिस्स्वीकार्यत्वमाह प्रज्ञेति । ज्ञातस्यातिशयाधायिनी धीः प्रज्ञा। कलापस्यानुविद्धत्वादि प्रत्येकद्वारा । तत्त्वानां प्रज्ञया अनुविद्धत्वं सम्यङ्निर्धारितत्वम् । रत्नान्तरेषु शाणक्षतिसंभवो न मुक्तासु । प्रमाणतर्कैर्याथात्म्यान्वेषणं परीक्षा । तन्नानात्वं तर्कादिभेदात् । मुक्तासु स्वानुगुणपरिमाणयुक्तं सूत्रं मानसूत्रम् । अन्यत्र प्रमाणमेव सूत्रं तस्याशिथिलविहितिः—निर्बाधत्वेन विशेषतो धीस्थत्वम् । प्रकाशम्—आलोकं बोधं च । बहुमुखम्—सर्वतोदिक्कं सर्वविषयं च । त्रासो मणिदोषः प्रतिपक्षाद्भीतिश्च । जयादेरित्यादिशब्देन क्वचिदैश्वर्यादेरन्यत्र तत्त्वनिर्णयस्य च संग्रहः । हृच्छब्दो वक्षश्चित्तं च वदति । सहृदयैः—सारासारविवेचनार्हहृदयवद्भिः । धार्यः—क्वचिदाभरणतयाऽन्यत्राप्रमोषेण ॥ ३ ॥

आनन्द० । प्रबन्धातिशयवर्णनमपि प्रारिप्सताननुगुणमित्यत्राह—प्रबन्धस्येति-शुद्धो नानापरीक्षास्वित्यत्र 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा' इति स्रग्धरालक्षणे मुनियतिमत्त्वमुक्तमिति तदभावो नाशङ्क्यः; तद्व्याख्याने—'स्वरसन्ध्याप्तसौन्दर्ये यतिभङ्गो न दोषभाक्' इत्यभिधानात् । अत्र स्वरसन्धिलब्धसौन्दर्यंसत्त्वान्न दोष इति भावः ॥ ३ ॥

अक्ष० । अथास्य प्रबन्धस्य स्वरूपतोपि वैलक्षण्यमाह—प्रज्ञेति । अत्र तत्वमुक्ताकलाप इत्यनेनायं प्रबन्धो मुक्ताहारश्चोच्यते । उभयत्र योजनीयानि विशेषणानि । प्रकृष्टा ज्ञप्तिः मेयस्यातिशयावहा धीः । सैव सूची तया । अनुविद्धः तत्वानामनुवेधनं प्रत्येकं सम्यङ्निर्धारणं । मुक्तानान्तु सरंध्रीकरणं अन्यथा निबन्धनानुपपत्तेः । यथा तत्वानां तर्केण न बाधप्रसक्तिः तथा मुक्तानामपि न शाणेन क्षतिर्भवितु मर्हति स्वत एवमसृणीभूतत्वादित्याह—क्षतिमनधिगत इति प्रमाणतत्वादिना निर्दोषत्वान्वेषणं परीक्षा—तथाऽन्वेष्षणेऽपि दोषस्याऽनुपलम्भात् निर्दोषस्सिद्ध इत्याह—शुद्ध इति । अशिथिलविहिते बाधप्रसङ्गरहिते क्लेदनानर्हे । मानं प्रमाणमेव सूत्रं स्वानुगुणपरिमाणवत् । तत्र । निबद्धः परस्परसंकरानर्हतया निवेशित इत्यर्थः । प्रकाशं बोधं आलोकञ्च । बहुमुखं सर्वविषयं बहु देशव्यापिनं । आतन्वानः विस्तृतं विदधानः । अखिलानां त्रासानां प्रतिपक्षेभ्यो भयानां मणिदोषाणाञ्च । वैधुर्यस्य अत्यन्ताभावस्य । धुर्यः उद्वहनसमर्थः । जयादेः प्रतिपक्षविजयादेः । आदिशब्देन तत्वस्फुरणस्य ऐश्वर्यस्य च संग्रहः । हेतुः संपादकः । स्वहृदि—आत्मनो-

मनसि वक्षसि च । सहृदयैः सारासारविवेकार्हहृदयैः । धार्यः न विस्मरणीयः सर्वदा भूषयितव्यः धारणीयश्चेत्यर्थः ॥ ३ ॥

शिष्टा जीवेशतत्त्वप्रमितियुतपरोपासना मुक्तिहेतुः
शक्यस्तत्तत्प्रकारावगतिविरहिभिर्नैव याथात्म्यबोधः ।
ते ते चार्था विदध्युः कुमतिविरचितास्तत्त्वबोधोपरोधं
तस्मान्निर्धूतसर्वप्रतिमतविमतिं साधये सर्वमर्थम् ॥ ४ ॥

सर्वा० । नन्वपवर्गसिद्धौ यदन्तरङ्गं तदेव विशदं तदर्थिभिरवगन्तव्यम्, तावदेव शिष्यादिभ्योऽपि प्रवर्तितव्यम्, किमन्यैरिह कीर्त्यमानैरित्यत्राह शिष्टेति । शिष्टा—चोदितेत्यर्थः । जीवेशावेव तत्त्वे जीवेशतत्त्वे; तयोः प्रमितिरिहागमजन्या । परोपास्तेस्तत्त्वज्ञानमितिकर्तव्यता, नतु स्वयं साधनम् । प्रमितियुता—प्रमितिजनितानुस्मृतिपूर्विकेत्यर्थः । तदभिप्रायेणोक्तं जीवपरमात्मयाथात्म्यज्ञानपूर्विकेत्यादि । परोपासनेति सर्वविद्याभिप्रायं, परस्य ब्रह्मण उपासनेति वा । शक्य इत्यादि— न हि द्रव्याद्रव्यविभागाभावे शिष्टोपासनमूलकतत्त्वप्रतीतिसिद्धिः । तत्त्वनिरूपणाभावे च तत्त्वनिर्णयोपयुक्तयोस्तर्कानुमानयोर्व्याप्तिः शङ्काकलङ्किता स्यात् । परोक्तानुमानानामन्यतरासिद्ध्यनैकान्तिकत्वाद्युद्भावनं च कथं स्यात् ? परो वा कथमस्मत्सिद्धान्तानभिज्ञः कथायामस्माभिरधिकुर्यात् ? परकल्पितार्थभङ्गेन तदहङ्कारखण्डनं च तत्त्वाध्यवसायसंरक्षणार्थम् । तत्तदिति प्रस्तुतौ जीवेशौ गृह्येते । अथवा तत्तत्प्रकृत्यादिप्रकारबोधाभावे तत्तत्प्रतिसंबन्धिकं तयोरपि याथात्म्यं नावगम्येत । ते ते चार्थाः ब्रह्मविवर्तपरिणामभिन्नाभिन्नत्वादयः । कुमतिविरचिताः—कुदृष्टिभिः, कल्पिताः, भ्रान्तिविजृम्भिता इति वा । अत एव कुमतिभिरर्थ्यन्त इत्यर्थाः न तु परमार्थाः । प्रतिमतविमतिः—विवादः, तत्प्रसूता वा विरुद्धबुद्धिः । सर्वमर्थं—मुमुक्षुभिर्ज्ञातव्यम् । परम्परयेत्यर्थः ॥ ४ ॥

आनन्द० । ननु तत्वमुक्ताकलापं व्यातानीत् इति वदता तत्वनिरूपणं विहाय जीवेशज्ञानपूर्वकोपासनाया मुक्तिहेतुत्वप्रतिपादनमनुपपन्नं इत्यत्राह—ननु अपवर्गसिद्धाविति ॥

शिष्टेति—शासेः रूपं न तु शिषेरित्याह—चोदितेत्यर्थ इति तत्वप्रमितेर्विनष्टत्वात् तद्युक्तत्वं तज्जन्यत्वं वा न संभवतीत्यत्राह प्रमितिजन्यानुस्मृतिपूर्विकेति । परविद्यापरत्वं परोपासनाशब्दस्याभिप्रेत्याह— सर्वविद्याभिप्रायमिति— 'स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्' इति परविद्याप्रकरणाम्नानमुपलक्षणमिति भावः ॥

योगवृत्त्या सर्वविद्यापरत्वमाह—परस्येति । तत्तदिति—जीवेशपरत्वे वीप्साया अभावात् द्वन्द्वो वाच्यः; स न युक्तः एकशेषप्रसङ्गादित्यभिप्रायेणाह—अथवा इति—केचित्तु 'तत्तदिति प्रकृतौ जीवेशौ गृह्येते' इत्यस्यायमर्थः—तत्त-

दित्यत्र प्रथम तच्छब्देन जीवेशौ गृह्येते। तयोः तत्प्रकारः—तत्तत्प्रकारः; व्यावर्तकत्वेन श्रुतिप्रतिपन्नप्रकारः इति न वीप्साद्वन्द्वौ; अपि तु षष्ठीतत्पुरुषः इत्याहुः। मायिनो विवर्तपक्षः। भास्करस्य परिणामः। यादवस्य भेदाभेदौ। आदिशब्देनासत्कार्यवादाभिव्यक्तिवादक्षणिकत्ववादादयोऽभिमताः। तत्त्वबोधोपरोधकत्वमर्थानां न युक्तं इत्यत्राह प्रतिमतैरिति॥ ४॥

अक्ष०। जयादिसाधनत्वेऽपि मुमुक्षूणामनेन किम्प्रयोजनमित्यत्राह—**शिष्टेति** विहितेत्यर्थः।

जीवेति जीवेशावेव तत्वे तयोः प्रमितिः यथावस्थितयाथात्म्यज्ञानं तेन युतं तज्जनितानुस्मृतिपूर्विका। **परोपासना** परस्य ब्रह्मणः उपासनं। मुक्तेः हेतुः साधनमित्यर्थः। तथाच मुमुक्षूणामपि मोक्षसाधनोपासनानिष्पादनाय जीवेश्वरनिरूपणमतीवोपकारकमिति भावः। तथापि तत्र द्रव्याद्रव्यनिरूपणं कथमुपयुज्यत इत्यत्राह **शक्य इति** तत्तदिति जीवेश्वरावुच्येते। तयोः प्रकारः। तत्र जीवस्य ज्ञातृत्व स्वयंप्रकाशत्व प्रत्यक्त्व नित्यत्वानन्दत्वादयः ईश्वरस्य तु ततोप्यधिकाः सत्यत्व ज्ञानत्वानन्तत्वानन्दत्वविमलत्व–श्रीपतित्व जगत्कारणत्वादयः तेषां। **अवगतिविरहिभिः** ज्ञानशून्यैः। **याथात्म्यबोधः** जीवेश्वरयोः यथावस्थित प्रकार विशिष्टनिर्णयो नैव संपादयितुं शक्य-इत्यर्थः।

कार्यद्रव्यवर्ग-तत्तद्द्रव्यादिभेदनिरूपणस्य तदुपयोगेऽपि प्रमाणतर्कतदाभास सांख्यसौगतादि परमतनिरसनादीनां क्वोपयोगइत्यत्राह–**तैत इति**। **कुमतिविरचिताः** कुदृष्टिकल्पिताः। भ्रान्तिभिरारोपिता वा सर्वनित्यत्व क्षणिकत्वाकस्मिकत्व मिथ्यात्वादिरूपाः अर्थाः। **तत्त्वबोधोपरोधं** पूर्वोक्तयाथात्म्यज्ञानप्रतिबन्धं। **विदध्युः** कुर्युः। तस्मात् कुमतिकल्पनानामपि तत्वज्ञानविरोधकरणार्हत्वात्-तन्निरसनावश्यम्भावे सति कथाप्रसक्तौ स्वपरोक्तसाधनदूषणस्थेम्ने प्रमाण तर्क तदाभासादि बोधनमप्युपयुक्तमेव। अतः **निर्धूतसर्वप्रतिमतविमतिः** निर्धूता-निरस्ता सर्वप्रतिमतविमतिः सांख्यगसौतादिप्रतिवादिविवादः तदधीन विपरीतत्वादिधीः यस्मिन् तथाभूतमेव। **सर्वमर्थं साधये** मुमुक्षुभिः परमपरया—ज्ञातव्यमपि निर्धारयामीत्यर्थः।

अतो मुमुक्षूणामपीह न किञ्चन निरर्थकं वचनमस्तीतिभावः। अतएव एतद्व्याख्यायाः सर्वार्थसिद्धिरिति नामापि सिद्ध्यतीति हृदयम्॥ ४॥

आवापोद्वापतस्स्युः कतिकति कविधीचित्रवत्तत्तदर्थे
ष्वानन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः।
तत्त्वालोकस्तु लोप्तुं प्रभवति सहसा निस्समस्तान्समस्तान्
पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुतादिः॥ ५॥

सर्वा० तथाऽपि निर्धूतसर्वप्रतिमतविमतिं सर्वमर्थं साधये इत्यशक्योक्तिः, त्रैकालिकसिद्धान्तभेदानन्त्यादित्याशङ्कोद्घाटनपूर्वकं प्रयोजकशिक्षया कृत्स्नाभीष्ट-

साधनं च शक्यमिति स्थापयति–आवापेति– । एकस्मिन्नेव हि दर्शने व्याख्यातृभेदात्केषांचित्प्रमेयानामावापोद्वापौ दृश्येते, यत एकदेशिव्यपदेशः । कविधीचित्रवत्–कवीनां धीभिः कृतं काव्यादिकं कविधीचित्रम्; तद्वन्मतभेदा अप्यनन्तास्संभवन्ति । तत्तदर्थेष्वस्तिनास्त्योरानन्त्यादित्यन्वयः । अस्तिनास्त्योरिति प्रयोगपरम् । कुहना–छद्म । तत्संबन्धिन्यो युक्तयः कुहनायुक्तयो हेत्वाभासच्छलजातिरूपाः ताभिः कान्ताः सम्यक्त्वेनैव भाताः । तत्त्वालोकः—यथार्थाध्यवसायः । प्र [कृ] स्तुतशङ्कानिरासार्थमपेक्षणीयान्तराभावात्सहसेत्युक्तम् । निस्सम इति निरधिकत्वोपलक्षणम् । प्रतिरोधबाधरहित इत्यर्थः । उक्तस्थापकं त्र्यन्तार्थविशेषव्यञ्जकमप्यर्थान्तरं न्यस्यति–पुंस्त्व इति । पुनर्न प्राणिता–संशयविपर्ययसामग्रीलोपान्न भासेतेत्यर्थः ।। ५ ।। **इति तत्त्वज्ञान प्रयोजनम् ।।**

आनन्द० । ननु तत्त्वनिरूपणं प्रस्तुत्य विशेषदर्शनस्य संशयादिनिवर्तकत्वबोधस्य तत्तत्कल्पनाधीनभ्रमनिवर्तकत्वोक्तिरनवसरग्रस्तेत्यत्राह—**तथा पीति** । ननु अस्तिनास्तीत्यस्तिनास्तिशब्दावुच्येते । तयोर्द्वैरूप्येणानन्त्याभावादित्यत आह—**अस्तिनास्त्योरिति** प्रयोगाणां बहुत्वाद्विषयविषयिभावसंबन्धेनार्थगतत्वमिति-भावः ।। ५ ।।

अक्ष० । एवं निर्धूतसर्वप्रतिमतविमर्तिं साधये सर्वमर्थमित्युक्तमशक्यमेव त्रैकालिकानां प्रतिमतानामानन्त्येन ज्ञातुमशक्यत्वादित्याशंकामुद्घाटयति-**आवापेति** तत्वानां तत्स्वभावभेदानां वा सत्वासत्वाद्युपगमभेदेन कियन्तस्सिद्धान्तभेदा भविष्यन्तीत्यत्राह **आवापोद्वापेति** । तत्र अविद्यमानानां संग्रह आवापः । विद्यमानानां परित्याग उद्वापः । तद्भेदात् एकस्मिन्नेव दर्शने तत्राविद्यमानस्याप्यन्यत्र दर्शने विद्यमानस्य कस्यचित् परिग्रहात्तत्र विद्यमानस्यापि कस्यचिदंशस्य परिवर्तनाय परसिद्धान्तभेदानां अन्यान्यसिद्धान्तपरिकल्पनया बहूनां संभवास्स्युः ।

अतएव तत्र एकदेशिव्यपदेशः **कतिकतीति** असंख्याता इति भावः । अत्र दृष्टान्तं दर्शयति **कविधीचित्रवत्** 'एकविषयेऽपि कविधीकल्पितं काव्यादिरूपं बहुरूपं चित्रं' तद्वदिति भावः ।

तत्तदर्थेषु जीवेश्वरद्रव्याद्रव्यादिष्वर्थेषु । अस्ति नास्तीति प्रयोगयोरानन्त्यात् । "सर्वमेव नास्तीति केचित" "चिन्मात्रमस्ति नेतरदि" त्यन्ये । "रूपादिकमस्ति नतु तदधिकरणं द्रव्य" मित्यपरे । "शरीरमस्ति नतु तदतिरिक्त आत्मे" ति च । "आत्मा परमस्ति नतु ततोन्य ईश्वर इति **कतिचित्** एवंप्रकारेण अस्ति नास्ति प्रयोगानन्त्यात्—अनवधयः अवधिरहिताः कुहनायुक्तयः कपटयुक्तयः उक्त छलजात्यादिवञ्चनोक्तयः ताभिः कान्ताः समीचीना इव भासमानाः । **कृतान्ताः** सिद्धान्ताः असंख्यातास्स्युरितिपूर्वेणान्वयः । इत्थमनन्तानां विधूननमशक्यमित्याशंकां—परिहरति—**तत्वालोकस्त्वित्यादिना** । तुशब्दः शंकितव्यावृत्यर्थः ।

२

तत्त्वालोकः यथार्थतत्त्वावबोधः। अशेषानपि **तान्** प्रतिसिद्धान्तान् **लोप्तुं** बाधितुं। **सहसा** इतरापेक्षाविरहादविलंबेन। **प्रभवति** समर्थो भवति। तत्रहेतुगर्भंविशेषणं— **निस्सम इति**। निरधिकत्वस्याप्युपलक्षणम्। निस्समाधिकत्वात् तत्र समः सत्प्रतिपक्षः अधिकः बाधः' तयोरन्यतरस्याप्यभावात् विरोधिराहित्येन प्रबल इति भावः। अथ अर्थान्तरन्यासेन उक्तमेवार्थं समर्थयति - **पुंस्त्व इति** पुरोवर्तिनि पुरुषत्वे। **तत्वेन** परमार्थत्वेन। **दृष्टे पुनरपि** पश्चादपि। **पूर्ववत् स्थाणुतादिः** आदिना स्तंभत्वादिपरिग्रहः।

"**न खलु प्राणिता** नैव जीविष्यति ज्ञानविषयो न भविष्यतीत्यर्थः"। एवं पुरुषसूक्तादिना कारणवस्तुनः पुरुषोत्तमत्वे परमार्थतया निश्चिते रुद्रत्व-विधित्वादि--संशयो नैव भवितुमर्हतीत्यपि गम्यते। बलीयसि यथार्थाध्यवसाये सति— आगामिनामनन्तानामपि विपरीतसिद्धान्तानां अतीतवर्तमान—प्रतिसिद्धान्त-न्यायेन अबाधितस्थितिर्न सम्भवतीत्युक्तं भवति ॥ ५ ॥

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहु-
र्द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयधा तत्र जीवेशभेदा-
न्नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥ ६ ॥

सर्वा०। अथ निरूप्यमर्थजातं साधर्म्यवैधर्म्यभेदैस्संगृह्य विभज्य च निर्दिशति **द्रव्येति**। अत्र तत्त्वमिति पदार्थमात्रोक्तिः। मितं—प्रमितम्। तथात्वं च सर्वसाधारणम्। तदपि हि सामान्यतः प्रमितम्। अन्ततस्स्वपरनिर्वाहान्नानवस्था। इदं च साधर्म्योक्तिमात्रं व्यवच्छेद्याभावेन लक्षणत्वासिद्धेरित्येके। निर्दिष्टव्यापित्वे सति तदन्यवृत्ति [रहितत्त्वा] विरहाल्लक्षणमपि स्यादित्यन्ये। बाह्यकुदृष्टिव्यावृत्तास्तद्विदः। अत्र तत्तदन्यरूपेण विभागेषु न नीलपीतादिवत्कोटचन्तरावकाशः। द्रव्यत्वात्यन्ताभाववत्त्वरूपेण तदन्यत्वस्य विवक्षितत्वाद्द्रव्यलक्षणं वक्ष्यति। जडमिह स्वगोचरज्ञानत एव प्रकाशनम्। अव्यक्तशब्देन व्यक्तमपि लक्ष्यते तदनन्यद्रव्यत्वज्ञापनार्थम्। प्रत्यक्—स्वस्मै भासमानम्। पराक्—परस्मा एव भासमानम्। भूतिर्विभूतिः, स्वातिशयाधानार्थं नियन्तव्यद्रव्यम्। नित्या भूतिरिति नित्यप्राचुर्यंतश्शुद्धसत्त्वमुपलक्ष्यते। इहादिमां—नित्यभूतिम्। केचिज्जडामाहुरिति सयूथ्यमतभेदोक्तिः ॥ ६ ॥ **इति द्रव्यविभागः ॥**

आनन्द० ननु निरूपणे प्रवृत्तस्य तत्वविभागकरणमसङ्गतमित्यत्राह—**अथ निरूप्यमिति**। निरूपणसौकर्याय विभागः कृत इति भावः। **तदपीति** प्रमितत्वमित्यर्थः। ननु प्रमितत्वेऽपि प्रमितत्वे अनवस्थेत्यत्राह—**अन्तत इति**। ननु प्रमितत्वस्य लक्षणत्वं नोपपद्यते इतराप्रसिद्धावितरभेदासाधकत्वादित्यत्राह—**इदं चेति**। व्यावर्तकत्वाभावेऽपि व्यवहारप्रयोजकत्वाभिप्रायेणाह—**निर्दिष्टेति**—निर्दिष्टं लक्ष्यम्।

लक्ष्यनिष्ठात्यन्ताभावाप्रतियोगित्वं तद्व्यापित्वम् । तदन्यवृत्तित्वनिषेधश्च निर्दिष्टत्वरूपलक्ष्यतावच्छेदकव्याप्यत्वम् । तेन तदन्यस्याप्रसिद्ध्या तत्प्रयुक्तदोषानवकाशः । केचित्तु—निर्दिष्टं—स्वलक्ष्यम् । स्वलक्ष्यव्यापकत्वे सति तदन्यनिष्ठत्वं तत्तदतिव्यापकेषु प्रसिद्धं प्रकृते निषिध्यते; यथा स्वोपादानगोचरजन्यकृतिजन्यान्यत्वमित्यत्रेत्याहुः ॥

ननु द्रव्यान्यत्वं द्रव्यस्याप्यस्ति घटस्य पटादन्यत्वात् । यथाच तदन्यरूपेण विभागे नीलपीतादिवत् कोटचन्तरमस्त्येवेत्यत आह—**द्रव्यत्वात्यन्ताभाववत्स्वरूपेणेति** । स्वगोचरं स्वभिन्नमेव; भेदनिबन्धनत्वाद्विषयविषयिभावस्येति भावः ॥ ६ ॥

अक्ष० । अथ तत्वं निरूप्यते—**द्रव्याद्रव्येति** । तत्र तत्वमिति **निरूप्यपदार्थ**जातस्योद्देशः । मितमिति तल्लक्षणम् प्रमितमिति तदर्थः । प्रमितत्वं पदार्थसामान्यवृत्ति । प्रमितत्वस्यापि सामान्यतः प्रमितत्वमस्त्येव । क्वचित्स्वपरनिर्वाहक्लृप्त्याच नानवस्थितिः । लक्ष्यतावछेदकसमनियतत्वञ्च लक्षणस्य लक्षणम् । तच्च स्वव्यापकलक्ष्यतावछेदकव्यापकत्वं । स्वपदं लक्षणपरं अतो लक्ष्येतराप्रसिद्धावपि न क्षतिः । व्यावर्तकस्यैव लक्षणत्वे साधर्म्यमात्रपरमित्युक्तम् । एवं साधारणधर्मवत्तया ज्ञातस्य विभाग उच्यते—**द्रव्याद्रव्यप्रभेदाद्रुभयविधमिति**—द्रव्यत्व द्रव्यान्यत्वे विभाजकधर्मौ तत्र द्रव्यान्यत्वस्य द्रव्यत्वरूप सामान्यधर्मावछिन्नप्रतियोगिताकभेदस्यातिरिक्तस्यानङ्गीकारे द्रव्यत्वात्यन्ताभावरूपत्वेन विभाजकत्वं बोध्यम् अतोऽस्याजडत्वेन यत्किञ्चिद्द्रव्यान्य द्रव्यान्तरसाधारणतया द्रव्यत्वविरुद्ध त्वाभावान्नविभाजकत्वानुपपत्तिः ।

तद्विदः तत्वविदः । आहुरित्यन्वयः । द्रव्यस्य लक्षणमनन्तरं वक्ष्यते—इदानीं विभाग माह **द्रव्यमिति** जडमजडमिति द्वेधा विभक्तं द्विविधमित्यर्थः । जडत्वाजडत्वे विभाजकधर्मौ—तत्र जडत्वं स्वविषयकज्ञानादेव प्रकाशमानत्वं अजडत्वं स्वयंप्रकाशमानत्वं । जडं विभजते—**प्राच्यमिति** अव्यवहितपूर्वविभजने प्रथमनिर्दिष्टं जडमित्यर्थः । **अव्यक्तकालौ**—अव्यक्तं प्रकृतिः कालश्चेति जडं द्विविधमित्यर्थः । अत्र अव्यक्तपदेन त्रिगुणद्रव्यं विवक्षितं तेन व्यक्तानामपि संग्रहः । अजडं विभजते—**अन्यमिति** जडाजडविभागे चरमनिर्दिष्टमजडमित्यर्थः । तच्च प्रत्यक पराक् चेतिद्विविधमित्यर्थः । तत्र प्रत्यक्त्वं स्वस्मै भासमानत्वं, पराक्त्वं—परस्माएव भासमानत्वं । तत्र प्रत्यगर्थं विभजते—**प्रथममिति** । तत्र प्रत्यक्परागर्थयोर्मध्ये । पूर्वं विभागवाक्ये प्रथमनिर्दिष्टं प्रत्यक् । **जीवेशभेदात् उभयथा**—जीवो ईश्वरश्चेति उभयविधमित्यर्थः । **अपरं**—अजडं । परागर्थं विभजते—नित्येति—नित्या । **भूतिः** विभूतिः **मतिश्चेति** उभयथा द्विविधमित्यर्थः इह सयूथ्यमतभेदः प्रदर्श्यते—**जडामादिमामिति** आदिमां-अत्र नित्या भूति रिति प्रथमोक्तां नित्यविभूतिं । **जडां**—परेणैव प्रकाश्यामाहुः । तन्मते जडद्रव्यमेव त्रेधा विभजनीयमिति भावः ॥ ६ ॥

तत्र द्रव्यं दशावत्प्रकृतिरिह गुणैस्सत्त्वपूर्वैरुपेता
कालोऽब्दाद्याकृतिस्स्यादणुरवगतिमान् जीव ईशोऽन्य आत्मा ।
संप्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव
ज्ञातुर्ज्ञेयावभासो मतिरिति कथितं संग्रहाद् द्रव्यलक्ष्म ॥ ७ ॥

सर्वा० । प्रस्तुतस्य द्रव्यस्य तदवान्तरभेदानां च लक्षणमाह–तत्रेति ॥ तत्र-द्रव्याद्रव्ययोर्मध्ये । द्रव्यं दशावत्–विकारधर्मवदित्यर्थः । ईश्वरादावपि मूर्तसंयोगा आगन्तुकास्सन्ति । संचरति हि मूर्ते तस्य विभुनश्च संयोगा विद्यन्त एव । प्रकृतिशब्दः प्राग्वद्विकृतीनामप्युपलक्षकः; त्रिगुणशब्दाभिलप्यद्रव्यमित्यर्थः । तत् स्वगुणैरेव लक्षयति–गुणैरित्यादिना । इह अव्यक्तकालयोर्मध्ये । त्रिगुणस्य रजस्तमसी पृथग् लक्षणे; सत्त्वं तु बन्धकत्त्वेन विशेषितम् । कालोऽब्दाद्याकृतिरिति । उपाधिकृतविभागैरब्दादिव्यवहारविषय इत्यर्थः । तत्तत्परिणामवान्काल इति पक्षोऽपि वक्ष्यते । ईश्वरादचेतनादणोश्च व्यवच्छेदायाणुरवगतिमानित्युक्तम् । ईशोऽन्य आत्मा-अणुव्यतिरिक्तश्चेतन इत्यर्थः । जीवे विभुत्वोक्तिरीश्वरेऽणुत्वोक्तिश्चान्यपरेति सूत्राद्युक्तम् । संप्रोक्ता, तत्परैश्शास्त्रैरिति शेषः । त्रिगुणसमधिका–त्रिगुणद्रव्यादन्या । सत्त्वयुक्ता सत्त्वाख्यगुणविशेषवती । त्रिगुणान्यत्वं कालादेरप्यस्तीति तद्व्यवच्छेदोऽनेन कृतः । एतावन्मात्रेण त्रिगुणसाधर्म्यमित्यभिप्रायेण तथैवेत्युक्तम् । रजस्तमस्समानाधिकरणसत्त्वस्यापि तत्र सत्त्वात्; * सत्त्वं निर्मलत्वात्प्रकाशकमित्यादि समानमिति वा । ज्ञातुर्ज्ञेयावभासो मतिः–अहमिदं जानामीत्यहमर्थाश्रयतया सिध्यन्सकर्मकः प्रकाशो मतिरित्यर्थः । तादृशावस्थयाऽपि तद्विशिष्टं गृह्यते । द्रव्यलक्ष्म–सामान्यतो विशेषतश्चे ति शेषः ॥ ७ ॥ इति द्रव्यतद्विशेषलक्षणम् ॥

आनन्द० ननु द्रव्यस्यावस्थायोगित्वकथनमयुक्तं द्रव्यादिनिरूपणस्यैव कर्तव्यत्वादित्यभिप्रायेणाह–प्रस्तुतस्येति—। दशाशब्दस्यावयवार्थत्वे नित्येष्वव्याप्तिरित्यत्राह–विकारधर्मवदित्यर्थ इति–धर्मवत्त्वं लक्षणमित्युक्ते अभावरूपधर्मवति गुणेऽतिव्याप्तिः । भावरूपधर्मवत्त्वमित्युक्ते रूपत्वादिजातिमति पुनरप्यतिव्याप्तिः । अत उक्तं विकारधर्मवत्त्वमिति ।

ननु ज्ञाततावादिमते पुनरप्यतिव्याप्तिः; एकदेशिभिः; शब्दादावपि संख्याङ्गीकाराच्छक्त्यङ्गीकाराच्चातिव्याप्तिः । न च गुणादौ शक्त्यभावः; कारणत्वानुरोधेन तदावश्यकत्वादिति चेदुच्यते— आगन्तुकधर्मवत्त्वमित्यर्थः । ज्ञाततातिरिक्तधर्म्यनन्तरकालीनोत्पत्तिकधर्मत्वमागन्तुकत्वं विवक्षितं । यद्यपि द्वित्वरूपा संख्या तादृशी; तथाऽपि सा सिद्धान्ते नास्त्येव । तथा शक्तिरपि सहजा; आधेया तु गुणे न; मानाभावात् । सहजाऽपि प्रतिबन्धे गुणादौ न विद्यते; तदपगमे धर्म्यनन्तरमुत्पद्यते इति तथेति शङ्का गुणस्यैवापगमोत्पत्तिभ्यां परिहार्या । यद्यपि–यादृशादेव करतलानलसंयोगाद्दाहः तादृशादेव मणिसमवधाने न दाह इति शक्तेरेवोत्पत्त्यपगमौ;

तथापि प्रतिबन्धकाभावधर्म्यतिरिक्त विशेषकारणतावच्छेदकावच्छिन्नकारणता-प्रतियोगिककार्यतावच्छेदकावच्छिन्नधर्म्यसमानकालीनस्ववर्तमानव्यवहारविषयता-प्रयोजकधर्मानवच्छिन्नधर्मत्वं विवक्षितमिति न दोषः। प्रतिबन्धकाभावश्च धर्मी च प्रतिबन्धकाभावधर्मिणौ ताभ्यामतिरिक्ते वस्तुनि विशेषकारणतावच्छेदकावच्छिन्ना कारणता तत्प्रतियोगिककार्यतावच्छेदकावच्छिन्न इति धर्मविशेषणं। धर्म्यसमाने-त्यारभ्यावच्छिन्नेत्यन्तमपि धर्मविशेषणं। आद्येन शक्तिमादायातिप्रसङ्गनिरासः; धर्म्यनन्तरकालोत्पन्नशक्तेः प्रतिबन्धकाभावधर्मिभ्यां विशेषकारणाभ्यामुत्पन्नत्वात्। द्वितीयेन ज्ञाततामादायातिप्रसङ्गनिरासः; ज्ञाततायाः अतीतधर्म्यादौ स्ववर्तमान-व्यवहारप्रयोजकधर्मावच्छिन्नत्वात्। केचित्तु संयोग एव विकार इत्याहुः। अन्यतर-कर्म संयोगहेतुरस्तीत्याह—**संचरति हीति**। लक्ष्यतावच्छेदकमाह—**त्रिगुणशब्दा-भिलप्येति**। ननु सत्वपूर्वैरित्यत्र सत्वविशिष्टरजस्तमोवत्वं लक्षणमिति भाति; तच्चायुक्तं; रजस्तमसोरेव प्रत्येकं लक्षणत्वसंभवात्। नापि प्रत्येकं सत्वस्य; शुद्धसत्वेऽ-तिव्याप्तेः। किञ्च सत्वपूर्वैरिति बहुवचनानुपपत्तिः अन्यपदार्थबहुत्वाभावात् इति चेत्; तत्राह—**त्रिगुणस्येत्यादिना**। 'सर्वादीनि सर्वनामानि' इत्यत्रेव सत्वस्याप्यन्य-पदार्थान्तर्भावान्न बहुवचनानुपपत्तिरिति भावः। कालस्य विकाराभावपक्ष आह—**उपाधीति**। आकृतिशब्दस्य 'हूतिराकारणाह्वाने' इत्यादौ व्यवहारे आङ्पूर्वस्य कृञोऽनुशासनाद्व्यवहारार्थत्वं वक्तुं युक्तं व्यवहारविषयत्वमब्दत्वाद्युपाधेरप्यस्ती-त्याह—**तत्तदिति ईश्वरादिति**—अणुत्वेनेश्वरव्यावृत्तिः। अवगतिमानित्यचेतन-व्यावृत्तिः। लक्ष्म्या ईश्वरकोटित्वान्नाव्याप्तिः। अन्य इत्यस्य जीवलक्षणलक्षिता-दन्यत्वोक्तौ तदन्तर्गतावगतिमद्विशेषणवैयर्थ्यमित्याह—**अणुव्यतिरिक्तश्चेतन इति**। **जीवे इति**—अणोरणीयान् महतो महीयान्' 'स चानन्त्याय कल्पते' इत्यादेः;। 'हृद्यपेक्षया तु मनुष्याधिकारत्वात्' 'निचाय्यत्वादेवं व्योमवच्च' 'उत्क्रान्तिगत्या-गतीनां' इत्यादौ उपासनार्थमौपाधिकाणुत्वादिकमुक्तमिति भावः। **अहमर्थाश्रयतया इति**—**सकर्मकःप्रकाशो** मतिरिति लक्षणं। तदर्थस्तु स्वव्यतिरिक्तप्रकाशनियतत्कत्वं नचात्मादौ स्वव्यतिरिक्तप्रत्यक्तादिप्रकाशकत्वादतिव्याप्तिः; आत्मवदेव तस्यापि स्वेनैव प्रकाशात्। अत एव शतदूषण्यां तेषां धर्माणां ज्ञानदृष्टान्तेन स्वप्रकाश-तोक्तिः ॥ ७ ॥

अक्ष०। पूर्वं विभक्तानां द्रव्याणां सामान्यतो विशेषतश्च लक्षणमाह—**तत्रेति** तत्र द्रव्ययोर्मध्ये। द्रव्यसामान्यं दशावत्। दशा नाम अवस्था, आगन्तुः अपृथक्सिद्धो धर्मोऽत्रस्थेति कीर्त्यते। आगन्तुः अनित्यः आश्रयकालीनप्रागभावप्रतियोगी अपृथक्सिद्धः—पृथक्स्थित्यनर्हः। धर्मः पृथुबुध्नोदरत्वादिः तद्वत्वं द्रव्य सामान्य-लक्षणमित्यर्थः। नित्यद्रव्येष्वपि अनित्यसंयोगादिसत्वान्नाव्याप्तिः।

अव्यक्तपदोक्तस्य लक्षणमाह-**प्रकृतिरिहेति** इह-द्रव्येषुमध्ये। प्रकृतिः त्रिगुण-द्रव्यसामान्यम् **गुणैस्सत्वपूर्वैरिति**-तद्गुणसंविज्ञानोबहुव्रीहिः सत्त्व रजस्तमोगुणैरु-

पेतेत्यर्थः ।..अत्र गुणानां प्रत्येकमेवलक्षणत्वं-सत्वस्य बन्धकत्वेन विशेषणात् नित्यविभूतौ नातिव्याप्तिः। कालं लक्षयति-कालइति । अब्दादीति आदिना मासपक्षादि परिग्रहः औपाधिकविभागैः अब्दादिव्यवहारविषयत्वं अब्दादिपरिणामवत्वं वा तल्लक्षणमिति भावः। जीवलक्षणमाह अणुरिति अणुत्वेसत्यवगतिमत्वं ज्ञानवत्वं तल्लक्षणं तत्राद्यं ईश्वरवारणाय, अन्त्यमचेतनवारणायेति बोध्यम्। ईश्वरं लक्षयति ईशइति अन्य आत्मेति जीवान्यत्वे सति चेतनत्व मीश्वरलक्षणमिति भावः। तत्र जीववारणाय आद्यं अचेतनवारणाय अन्त्यमितिध्येयम्। नित्यविभूतेर्लक्षणमाह—संप्रोक्तेति–तत्परैश्शास्त्रैरिति शेषः। त्रिगुणसमधिकेति त्रिगुणभिन्नेत्यर्थः।

सत्वयुक्ता तथैवेति त्रिगुणद्रव्यवदेव सत्वयुक्तेत्यर्थः। त्रिगुणद्रव्यभिन्नत्वेसति सत्वगुणवत्त्वं तल्लक्षणमिति भावः। तत्र त्रिगुणवारणायाद्यं। कालादिवारणायान्त्यमिति भाव्यम्। मतिं लक्षयति--ज्ञातुरिति स्वाश्रयस्यात्मनः। ज्ञेयावभासः इदमहं जानामींत्याकारः विषयप्रकाशः। विषयगतव्यवहारानुगुण्यापादनं तद्विशिष्ट इत्यर्थः। स्वाश्रयकर्तृक स्वभिन्नविषयव्यवहारानुगुण्यापादकत्वं मतेर्लक्षणमिति भावः।

तथा च भगवता भाषितं "अनुभूतिरिति स्वाश्रयं प्रति स्वसद्भावेनैव कस्यचिद्वस्तुनः व्यवहारानुगुण्यापादनस्वभावः ज्ञानावगतिसंविदाद्यपरनामा सकर्मकोऽनुभवितुरात्मनो धर्म विशेषः" इति। अत्र स्वाश्रयं प्रतीति वस्तुस्थितिकथनं—ज्ञातुरवश्यमङ्गीकरणाय। लक्षणे तदप्रवेशेऽपि नानुपपत्तिः। विषयव्यवहारानुगुण्यापादकत्वमेव पर्याप्तम्। इति द्रव्यलक्षणं संग्रहादिहोक्तमित्याह—संग्रहादिति। विस्तरस्तु अग्रे तत्तन्निरूपणे भविष्यतीति भावः ॥ ७ ॥

एकार्थप्रत्यभिज्ञा भवति दृढतरा दर्शनस्पर्शनाभ्यां
संघातादेरयोगादवगमयति सा वस्तुरूपादतोऽन्यत ।
एकस्मिन् दूरतादेरविशदविशदप्रत्यभिज्ञादि तद्वत्
नैकत्वेऽप्यक्षभेदाद्धुरमिव मिथस्संश्रयादिप्रसङ्गात् ॥ ८ ॥

सर्वा०। ननु द्रव्यमद्रव्यमित्युभयमसिद्धं रूपादेराश्रयाभावात्, रूपादितया विकल्प्यमानस्यैकस्यैव वा सत्त्वादिति पक्षद्वयमेकेनैव प्रतिक्षिपति एकार्थेति ॥ एवमाहु-वैभाषिकाः-निराधारा निर्धर्मकाश्च रूपादयश्चत्वारः पदार्थाः। ते चक्षुराद्येकैकेन्द्रिय ग्राह्या इति।

वात्सीपुत्रास्तु शब्दादीन् पञ्च वैभाषिका विदुः ।
शब्दात्मानश्चतुर्ष्वेव केचिदित्यपरेऽब्रुवन् ॥

तत्र निराधारत्वं तावत्प्रतिसन्धानविशेषेण निरस्यति। अस्ति हि दृष्टमेव स्पृशामीति द्वीन्द्रियग्राह्यवस्तुविषया धीः। सा तावन्न संशयात्मा विरुद्धानियतकोटच

[नवलम्बात्] नुपलम्भात्। न च विपर्ययः स्वारसिकबाधादृष्टेरन्यथासिद्धेश्च। तदेतदुभयं दृढ़तरेति संगृहीतम्। ग्रहणमिति वक्तव्ये प्रत्यभिज्ञेत्युक्तिर्ज्ञातृज्ञेयस्थैर्यस्यापि व्यक्त्यर्था। सेयं न रूपमात्रगोचरा, तस्य स्पर्शनविषयत्वाभावात्, अन्यथाऽन्धस्यापि स्पर्शनेन रूपोपलम्भनप्रसङ्गात्। न च स्पर्शमात्रगोचरा, तस्यापि दृग्विषयत्वाभावात्। तथात्वे चास्पृशतोऽपि दृशा स्पर्शधीप्रसङ्गात्। न चोभयविषया, दर्शनस्पर्शनयोः प्रत्येकविषयत्वादेव। अत इयं प्रत्यभिज्ञा रूपाद्यतिरिक्तं तदाश्रयभूतं वस्तु प्रकाशयति इदं रूपस्पर्शवदिति। ननु रूपस्पर्शयोर्नियताक्षवेद्यत्वेऽप्यवस्थाभेदात् प्रतिसन्धानं स्यात्; न ह्यस्माकमिव स्थिरमवस्थान्तरभाक्किंचित् त्वन्मते। विभज्यवैभाषिकपक्षस्त्वतिमन्दः। तदिह संहतासंहतस्वलक्षणभेदमात्रं तु स्यात्; तत्र संघातस्वरूपं तस्य प्रतिसन्धानविषयत्वं च न युज्यते इत्याह—सङ्घातादेरयोगादिति। सङ्घातोऽपि सङ्घातिस्वरूपः तदन्यो वा; पूर्वत्र न प्रतिसन्धानपदम्, द्वितीये सत्योऽसत्यो वा ? आद्ये द्रव्यवाद एव वरं, संसर्गाख्यधर्मस्वीकारो वा; तेन परस्परविशिष्टस्वरूपमेवेत्यपि निरस्तं विशेषणविशेष्यतत्संम्बन्धातिरिक्तविशिष्टायोगात्। द्वितीये कथं प्रत्यभिज्ञात्मकार्थक्रियाकारित्वम् ? निरन्तरस्वरूपं सङ्घात इति पक्षोऽपि प्रत्येकपक्षवन्नेन्द्रियान्तरेण प्रतिसन्धिः स्यात्। अन्यथा रसादिष्वपि संहतेतु तत्प्रसङ्गात्। एतेन देशैक्यमेव संघात इत्यपास्तम्; एकदेशान्वयिनां त्रैकालिकानामेकसंघातत्वप्रसङ्गात्। देशोऽपि तदातदा भिन्न एवेति चेन्न, क्षणभङ्गस्य निरसिष्यमाणत्वात्। न च ते देश आकाशादिरूपः; तस्य युष्माभिरावरणाभावादिमात्रत्वज्ञापनात्। न चोपादानरूपः, स्पर्शरूपादीनां भिन्नभिन्नक्षणोपादानत्वाभ्युपगमात्। एकोपादानत्वे तु तदेव द्रव्यं पृथिव्यादिदेशैक्यात्सङ्घातस्यापि संघातान्तरापेक्षायामनवस्था, अन्योन्याश्रयो वा। त्वन्मते पृथिव्यादिः रूपादिसङ्घातातिरिक्तो न; तथा पृथिव्यादेरपि देशैक्यं पृथिव्यादिसङ्घातातिरिक्तं न। अतिरिक्तं चेत्पृथिव्यादेर्देशैक्येऽपि तद्देशसङ्घातातिरिक्तं पृथिव्यादिदेशानां देशान्तरैक्यमेव प्रयोजकं स्यात्। एवं सत्यनवस्थेत्यर्थः। एवं च पृथिव्यादिसङ्घातप्रयोजकैकदेशानपेक्षयां तु रूपादेस्संहतत्त्वे पृथिव्यादिसंहतत्त्वमेव प्रयोजकं स्यात्, पृथिव्यादेस्संहतत्वे तु रूपादेस्संहतत्वमेवेत्यन्योन्याश्रय इत्यर्थः।

अथ स्यात् गृहीतेन रूपेण पूर्वमेव स्पर्शोऽनुमितः, तत्र दृष्टरूपानुमितमेव स्पृशामीत्येव प्रतिसन्धानमिति चेन्न; द्वयोरेकाश्रयत्वग्रहणमन्तरेण व्याप्तिग्रहणासम्भवादनुमानासिद्धेः। दृष्टे रूपे स्पृष्टे च स्पर्शे भेदाग्रहात्। दृष्टमेव स्पृशामीति बुद्धिशब्दाविति चेन्न, भेदेनैव तयोर्गृह्यमाणत्वात्, रसादिष्वपि प्रसङ्गाच्च। ननु निर्विषयैवेयं प्रत्यभिज्ञा वासनावशात्स्यादिति चेन्न; योगाचारनीत्या रूपादेरपि निह्नवप्रसङ्गात्। बाधाबाधाभ्यां विशेष इति चेन्न; स्वारसिकबाधादृष्टेर्यौक्तिकबाधस्य समत्वाच्च। अतो रूपस्पर्शवदिदमिति मिथो भिन्नविशेषणमेकं विशेष्यं सर्वलोकसिद्धं दुरपह्नवम्।

यत्तु मतान्तरं स्पर्शमात्रस्वरूपो वायुः स्वलक्षणः, तैजसादयस्तु द्वित्रिचतुस्स्वभावाः, अतस्तेजःप्रभृतीनां द्वीन्द्रियग्राह्यत्वमिति, तदप्यसत् एकस्यानेकस्वभावत्वायोगात्; तदभ्युपगमे च जैनमतावतारात्। अनेकधर्मत्वे त्वस्मन्मतसिद्धेः। एकस्मिन्नेव रूपादिस्वभावभेदकल्पनेति चेन्न; सर्वत्रासिद्धस्य कल्पनायोगात, क्वचित्सिद्धौ द्रव्यवादसिद्धेश्च। एतेन भेदोपलम्भाभावादभेदसिद्धिरिति प्रत्युक्तम्, विपरिवर्तस्यैव सुवचत्वात्। न हि रूपमिदमिति घटादीन् कश्चित्क्वचित्प्रत्येति! किंतु तद्वदिति। सहोपलम्भनियमादिति हेतुचतुष्टयं च निरसिष्याम [हे]। न च रूपादेर्धर्मिणश्च सहोपलम्भनियमः, पीतशङ्खादिभ्रमे रूपमन्तरेण रूपिणस्तमन्तरेण तस्य चोपलब्धेः। न चात्रान्यश्शङ्खस्तदानीमुत्पन्नः; नापि शङ्खरूपोऽयं पित्तविवर्तः, स्पर्शनेन स एवायं शङ्ख इति गृहीतेः। एवं स्पर्शादावपि। यदि चासौ हेतुरङ्गीक्रियते किमपराद्धं *सहोपलम्भनियमादभेदो नीलतद्धियोरिति वदद्भिः? अतस्सहोपलम्भनियमाद्धर्मधर्मिभेद एव सिध्यति। किंच रूपस्पर्शयोस्सहधीनियमस्त्वयाऽपि दुस्साधः; अतस्तयोरयुगपदुपलम्भादभेदासिद्धावेकस्य प्रत्यभिज्ञाविषयस्य ततोऽन्यत्वं [प्र] स्पष्टम्। यत्तदन्यत्र युष्माभिरुक्तम्—

* अनुपप्लवभूतार्थस्वभावस्य विपर्ययैः। न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः॥

तदिह प्रतिसन्धेयम्। बुद्ध्यन्तराणि च तद्बाधकान्यभिन्नेन्द्रियजन्यान्याह—एकस्मिन्निति। आसन्नदेशे दृष्ट्वा दूरं गतस्याविशदा प्रत्यभिज्ञा, दूरे दृष्ट्वा समीपं गतस्य तु विशदा; एवं क्रमात् वहलविरलालोकादिवशादप्युभयधा ग्राह्या। अल्पधर्मविशिष्टतया ग्रहणम् अविशदग्रहणम्; भूयोधर्मविशिष्टतया तु विशदग्रहणम्; नतु न्यूनाधिकदर्शनमात्रम्; तथा सति घटपटदर्शने घटमात्रदर्शने च विशदाविशदव्यवहारप्रसङ्गात्। न चात्र रूपमेवाविशदं विशदं च भाति, पीतशङ्खादिभ्रमे रूपान्तरवत्तया भातस्यापि तथा प्रत्यभिज्ञानात्। नापि परिमाणं, तस्य परमार्थस्य त्वयाऽनभ्युपगमात्। दूरे च परिमाणान्तरवत्तया वस्तुनः स्फुरणात्। अत एव नैकत्वसंख्या; दूरासन्नयोरेकानेकत्वबोधे तदेवेति दर्शनात्। अत्रोत्तरेणादिशब्देन संशयविपर्यय [धि] योर्ग्रहणम्। संशयविपर्ययौ तावदधिष्ठानग्रहे विशेषाग्रहात् समानधर्मग्रहाच्च भवतः। तथादृष्टिनियमश्च नान्यथयितुं शक्यः।

अधिष्ठानस्य कात्स्न्र्येन भानेऽभाने च न भ्रमः।
भाताभाताकृतिभिदा कथं निर्धर्मके भवेत्॥

वाधकधीश्चाधिष्ठानातिरिक्ततदसाधारणधर्मविषया, तत्स्वरूपग्रहस्यारोपसहत्वात्। जिज्ञासा च नात्यन्तानुपलब्धे, अदर्शनात्। न च निश्शेषविदिते, वेद्याभावात्। अतस्तद्विषये विदिताविदिताकारत्वं सिद्धम्। तदिदं सर्वमभिप्रेत्य भिन्नाभिन्नवादिभिरप्युक्तम्—

* आविर्भावतिरोभावधर्मकेष्वनुयायि यत्।
तद्धर्मि यत्र वा ज्ञानं प्राग्धर्मग्रहणाद्भवेत्॥ इति।

अत्रागृहीताशेषधर्मधर्मिग्रहणं तु न मृष्यामहे। यत्तु बौद्धैरुक्तम्—

* धर्मोपकारशक्तीनां भेदे तास्तस्य किं यदि।
नोपकारस्ततस्तासां तथा स्यादनवस्थितिः ॥

नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे।
सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चितः ॥ इति।

तदपि मन्दम्, अन्वयव्यतिरेकसिद्धकारण [ादि] वैचित्र्यनिबन्धनस्वभावभेदवतामुपाधीनां परस्परव्यभिचारिवृत्तिनियतसामग्रीबोध्यत्वेन ग्रहणाग्रहणयोरुपपत्तेरिति। नन्वस्तु प्रतिसन्धानबलात् द्वीन्द्रियाह्यं किञ्चित्, तत्तु रूपरसाद्यात्मकमिति वा तदाश्रय इति वा न मृष्यामहे। तेषामेवाभावात् एकस्मिन्नेव ग्राहकभेदात्तत्तद्धर्मधीः, यथा मणिकृपाणदर्पणादिव्यञ्जकभेदान्मुखादेरणुत्वपृथुत्वमलिनत्वविमलत्वादिधीः, सव्यदक्षिणविपर्यासश्चेति। तमिमं पक्षं प्रतिक्षिपति नैकत्वेऽप्यक्षभेदाद्धिदुरमिवेति। इह तावत्सर्वत्रासिद्धस्य कल्पनानुपपत्तिरुक्ता बाधकान्तर माह—मिथ इति। चक्षुरादिग्राहकवैजात्यं हि ग्राह्याकारभेदात्कल्प्यते। तदसिद्धौ कथं तद्ग्राहकभेदक्लृप्तिः, तदभावे च कथं तत एव ग्राह्याकारभेदक्लृप्तिरिति। इह तु मध्ये बुद्धिभेदप्रवेशे चक्रकम्। अस्तु कारणभेदादिन्द्रियभेदक्लृप्तिरिति चेन्न; इन्द्रियवैजात्यव्यवस्थापकस्य तस्यानुपलम्भात्, तत एव तत्क्लृप्तौ तत्रापि मिथस्संश्रयात्। ननु दर्पणादिग्राहकभेदाद् ग्राह्ये सव्यदक्षिणविपर्यासः, पृथुत्वाणुत्वविमलत्वमलिनत्वकल्पना च दृष्टेति चेत्सत्यम्, दर्पणादेस्तद्धर्माणां च भेदेन दृष्टत्वात्तदधीनाध्यासभेदो यथादर्शनमङ्गीक्रियते। अत्र तु न तथा। अक्षेषु च ते बहिः कल्पनीयानां रूपादीनामसंभवात्। उपाधिज्ञाननिरपेक्षेयमौपाधिकभेदधीरस्तु मण्डूकवसाक्तदृष्टेर्वंशेषूरगबुद्धिवदिति चेन्न; तत्तद्दोषशक्त्या तत्तद्भ्रान्तिभेदसिद्धेः कल्प्याकारस्य क्वचित्सम्भवाच्च। चक्षुरादिस्वभावा एवात्रापि रूपादिभ्रान्तिहेतवो दोषा इति चेन्न; सर्वकल्पनाधारे स्वलक्षणेऽप्यनाश्वासप्रसङ्गात्। ततश्चेन्द्रियस्वभावभेदोऽपि दुर्वचः; अधिष्ठानाकाङ्क्षायामपि बुद्ध्यैव चरितार्थत्वात्। तथा चेन्द्रियस्वभावभेदोऽपि नावेक्ष्यः; पूर्वपूर्वबुद्धिशक्तिभेदादेवोत्तरोत्तरविचित्रभेदोपपत्तेः। ननु स्पर्शनेन्द्रियस्याज्ञातैर्भागभेदैः करतलप्रकोष्ठादिवर्तिभिरेकस्यैव दुरालभास्पर्शस्योल्लेखभेदा भवन्तीति चेन्न। स्पर्शस्यात्र भेदेनानुल्लेखात् दुरालभावयवानां तु वह्निकणवच्छरीरमाविशतां तद्विकृतिजनकत्वमात्रम्; प्रदेशभेदेन विकृतितारतम्यं च वह्न्यादिभिरिव नानुपपन्नम्। ननु मनुष्यपशुमृगादीन्द्रियभेदाद्भक्ष्यादिष्वानुकूल्यादिवैपरीत्यं तत्तारतम्यं च दृश्यते। न च वस्त्वेवानुकूलप्रतिकूलस्वभावम्; विरोधात्, सर्वेषामविशेषेण सर्वदोभयविधानुपलम्भात्, अनेकान्तवादानभ्युपगमाच्च। एवं

चक्षुरादिभेदाद्रूपादिभेदभ्रमस्स्यादिति; तदपि न, तत्तत्कर्मशक्तिवैचित्र्यात्तत्तदनुकूलत्वादिव्यवस्थोपपत्तेः। वस्तुषु चानुकूलत्वप्रतिकूलत्वे सुखदुःखजनकत्वे एव; तथाऽपि सुखदुःखे बुद्धिभेदावेव भवद्भिरपि स्वीक्रियेते। ततश्चात्र विषयभेदाद्धीभेदः। तस्मादेव च स इति प्रसङ्गस्स्यादिति चेन्न; विषयभेदस्य स्वकारणाद्यधीनत्वात्, तदुत्पाद्यबुद्धिभेदस्य तत्कारणत्वाभावात्, द्वयोरपि परस्परप्रतीतिनिरपेक्षप्रमाणसिद्धत्वाच्च। एवमुपाधिभेदैरेकस्मिन्नेव ह्रस्वत्वदीर्घत्वधीनिदर्शनान्यपि नेतव्यानीति। अत्रादिशब्देन पूर्ववत् संशयाद्यसम्भवो नीलपीतशीतोष्णमधुराम्लादिभेदासम्भवश्च गृह्यते। न हि नीलादिभेदेष्विन्द्रियभेदोपाधिकत्वं शक्यं वक्तुं, रूपादिभेदमिथ्यात्वे तदन्तःपातिनीलादिभेदोऽपि मरीचिकावीचिकान्यायेन मिथ्यैव स्यादिति चेन्न; असिद्धस्यासिद्धेन दुस्साधत्वात्। मिथो निदर्शनेन साधने मिथस्संश्रयात् निदर्शनमात्रेण निश्शेषनिह्नवप्रसङ्गाच्चेति। तथाऽप्येकमनेकस्वभावमिति चेन्न। स्वरूपभेदस्यानभ्युपगमात् धर्मभेदस्याविरुद्धत्वात्।

वेद्यहेतुफलाकारैर्भिन्नैरेका समेति धीः।
तथा बाह्येऽपि दृष्टत्वाद्युगपत्क्रमशोऽपि नः॥
प्रतिसंबन्ध्यनेकत्वं यथा नैकस्य बाधकम्।
तथा संबन्ध्यनेकत्वं स्वाभीष्टे च समत्वतः॥ ८॥

॥ इति द्रव्यसिद्धिद्रव्याद्वैतभङ्गौ ॥

आनन्द०। नन्ववस्थाश्रयो द्रव्यमिति लक्षणमसंगतं; धर्मधर्म्यभावात् इत्याक्षेपसंगतिं दर्शयति—नन्विति—चत्वारो हि बौद्धाः—वैभाषिकसौत्रान्तिकयोगाचारमाध्यमिकभेदात्। तत्र वैभाषिका अपि द्विविधाः— वात्सीपुत्राः अन्ये च। तत्र वात्सीपुत्राः— रूपरसगन्धस्पर्शशब्दपञ्चकव्यतिरेकेण धर्मी नास्ति। ते च चक्षुराद्येकैकेन्द्रियग्राह्याः। त एव समुदिताः पृथिवीत्वेन एकैकह्रासेन जलादित्वेन व्यवह्रियन्त इति वदन्ति। अन्ये वैभाषिकाः—शब्दस्तावन्न तत्वान्तरं। अपि तु रूपादिष्वेव केचन शब्दात्मानः इति वदन्ति। अपरे वैभाषिकाः सौत्रान्तिकैकदेशिनश्च एकस्य रूपादेः शब्दात्मकत्वे श्रोत्रग्राह्यत्वं चक्षुर्ग्राह्यत्वं चेति ग्राहकभेदाधीनभेदव्यवहार आवश्यकः। नच केचन रूपादयः श्रोत्रग्राह्याः शब्दात्मानः; तथा सति सर्वेषां रूपाद्यन्यतमत्वप्रसङ्गेन चत्वार इत्यस्याभावप्रसङ्गात्। नच पञ्चाप्यङ्गीकार्याः। तथा सत्यपि ग्राहकभेदं विना निर्वाहासंभवात्तदावश्यकत्वे दर्पणकृपाणादिव्यञ्जकभेदाद्यथा मुखं नीलत्वदीर्घत्वारोपवद्भासते तथा धर्म्येव रूपरसादिरूपेण भासते इति धर्मा न सन्ति धर्म्येक एवेत्याहुः॥ सौत्रान्तिकमते धर्मिणोऽनुमेयत्वेऽपि इन्द्रियजन्यवृत्तौ तदाकारार्पणात् ग्राहकभदेन तद्भेद इत्यवगन्तव्यम्। 'योगाचारस्य तु बुद्धिव्यतिरेकेण किमपि नास्तीति मतं। माध्यमिकस्य तु सर्वं शून्य-मिति मतम्॥ तत्र वैभाषिकसौत्रान्त्रिकमतद्वयमनुवदति **रूपादेरिति**। **निराधाराः** धर्मा इत्यर्थः। **रूपादितयेति** धर्म्येक एवेति पक्षः।

रूपत्वेन रसत्वेन च विकल्प्यमानस्य गृह्यमाणस्येत्यर्थः। एवमाहुरिति तत्वसा (ग)रादिग्रन्थ इति शेषः। निराधारा इति धर्मपक्षः। निर्द्धर्मका इति धर्मिपक्षः। केचित्तु–रूपादय इत्युक्त्या धर्मपक्षः एव। धर्मिपक्षस्तु–

अत्थि रूआइएण एअं घयत्ति, अक्खभेआदो।

इत्यादिभिरुक्त उपलक्ष्य इत्याहुः।

अस्ति रूपादिकेन एकं गृह्यते अक्षभेदात्। इति तदर्थः॥
वत्सी वैभाषिकमाता। वत्सीपुत्र (छात्राः) संबन्धिनो वात्सीपुत्राः।

निराधारत्वं तावदिति—निर्द्धर्मकत्वं 'धर्मोनिर्धर्मकश्चेत्' इत्युत्तरत्र निरसिष्यते। अनन्यथासिद्ध(प्रमाणभूत)प्रतीतेरेवार्थसाधकत्वात् तामुपन्यस्यति—**अस्तिहीति**। प्रामाण्यानन्यथासिद्धिं दर्शयति—सा तावदिति। **ग्रहणमिति वक्तव्ये** इति—उभयेन्द्रियजन्यैकविषयज्ञानमात्रेणापि धर्मिसिद्धिसंभवात् प्रत्यभिज्ञाग्रहणस्य प्रयोजनं वक्तव्यमित्यर्थः। पूर्वं स्पृष्टवत इदानीं पश्यतश्चैक्यात् ज्ञातृस्थैर्यं, पूर्वं स्पृष्टस्येदानी दृश्यस्य चैक्यात् ज्ञेयस्थैर्यमिति बोध्यम्। नन्वेवमपि प्रत्यभिज्ञया रूपाद्यतिरिक्तं द्रव्यं साधयितुं न शक्यते। रूपस्पर्शैक्यबोधनेनैव तस्याश्चरितार्थत्वात् इत्यन्यथासिद्धिमाशङ्क्य परिहरति-सेयं इत्यादिना। **न रूपमात्रगोचरा**—न रूपमात्रैक्यविषयिणी। **दर्शनस्पर्शनयोरिति**—चक्षुरिन्द्रियत्वगिन्द्रिययोः एकैकमात्रविषयत्वेन कस्यापीन्द्रियस्योभयग्राहकत्वं न संभवति। न च मिलितं गृह्णाति, पूर्वापरकालव्यापारत्वेन युगपद्व्यापाराभावात्। भावेऽप्येकस्योभयगोचरत्वाभावेन वायौ स्पर्शं घटे रूपं च गृह्णतोः दर्शनस्पर्शनयोरिव प्रत्यभिज्ञापकत्वायोगादिति भावः।

इदं रूपस्पर्शवदिति—यदेव रूपवत् तदेव स्पर्शवदित्यर्थः। ननु रूपादेः प्रतिनियतेन्द्रियग्राह्यत्वं न स्वरूपेण, अपितु रूपत्वाद्यवस्थाविशिष्टतया, तथाच रुपत्वविशिष्टस्यैव स्पर्शत्वाद्यवस्थस्य त्वगिन्द्रियेण ग्रहसंभवात् न प्रत्यभिज्ञान्यथानुपपत्त्या तदतिरिक्तधर्मिसिद्धिरिति शङ्कते—**नन्विति**–इयं शङ्का भवत्पक्षे (नोदेति) नोपपद्यते इत्याह—**न स्यादिति**। ननु विभज्यवैभाषिकेण—'अत्थिहि भिक्खवे अकदयं' इत्यागमबलेन नित्यस्यापि तत्वस्याङ्गीकारात् कथमवस्थान्तरभाजो वस्तुनो राहित्यमित्यत्राह-**विभज्येति**—अस्तिहि भिक्षोरकृतकं इति तदर्थः। विभज्य-विभागेन नित्यवस्त्वङ्गीकारात् विभज्यवैभाषिक इति नाम। वैभाषिकैकदेशीति यावत्।

अतिमन्द इति—बौद्धसमयप्रसिद्धसत्वक्षणिकत्वव्याप्तिभङ्गप्रसङ्गात् तेनैव न्यायेन सर्ववस्तुस्थायित्वस्यापि प्रसंगादिति भावः।

केचित्तु—

णाणम्मि अप्पऊणिअ आआरं वत्तु अप्पाणं।
णिब्भाइ सोसरूवं धम्मो वा कोवि तस्सव्व॥

इत्यादिसौत्रान्तिकपक्षे धर्मभ्यनुज्ञानात् कथंचिदवस्थामादाय शङ्कासंभवेऽपि वैभाषिकपक्षो विशिष्यासंगत इत्याह विभज्येति इत्याहुः।

{ ज्ञानेऽर्पयित्वा आकारं वस्त्वात्मनः।
निर्भाति सस्वरूपं धर्मो वा कोऽपि तस्यैव॥ }

इति तदर्थः। विभज्य विशिष्येत्यर्थः। धर्मिवादिसौत्रान्तिकापेक्षयेति शेषः।

ननु रूपादौ रूपत्वाद्यवस्था अतिरिक्ता माभूत्। किंतु रूपादिकमेव संहतावस्थं द्वीन्द्रियग्राह्यं; तदेवासंहतस्वरूपं प्रतिनियतेन्द्रियग्राह्यं भवत्वित्यनूद्य परिहरति—**तदिहेति**—

न प्रतिसन्धानपदमिति—न प्रत्यभिज्ञाविषय इत्यर्थः। संघातिस्वरूपाणां प्रतिनियतेन्द्रियग्राह्यत्वादिति भावः। **द्रव्यवाद एव वरमिति**—अवयव्यादिवद्वृत्तिविकल्पदुष्टाप्रामाणिकसंघाताश्रयणा(द्रूपी) दपि घट इति प्रतीत्यनुसारेण द्रव्यस्याङ्गीकारो न्याय्य इति भावः।

ननु भवद्भिरपि तन्तुसंघातः पट इति स्वीकारात् स एवाङ्गीकर्तुं युक्त इत्यत्राह—**संसर्गाख्येति**—तथाऽपि तवापसिद्धान्त इति भावः।

विशेषणविशेष्येति—तथा च द्रव्यवादसधर्मकत्वयोः प्रसङ्ग इति भावः। **द्वितीय इति**—यद्यपि शुक्तिरूप्यस्यापि तदिदमिति प्रत्यभिज्ञाविषयत्वमस्ति; तथाऽपि प्रत्यभिज्ञाया अबाधितत्वेन प्रमात्वात् तन्मते अर्थजत्वस्यावश्यकत्वे तज्जनकत्वेनार्थस्यार्थक्रियाकारित्वादसत्वं न स्यादिति भावः। नन्वस्मिन् पक्षे व्यवधानाभावसहितं स्वरूपं संघातः संयोगस्य नैरन्तर्यरूपत्वाङ्गीकारात्। अतो न संसर्गाख्यधर्मस्वीकार इति पक्षमनूद्य दूषयति—**निरन्तरेति**—**प्रत्येकपक्षवदिति**—उभयेन्द्रियग्राह्यस्यैकस्याभावात्। न च नैरन्तर्यरूपाभावस्यैवोभयेन्द्रियवेद्यता; तथाऽप्युभयोर्निरूपकयोरग्रहणे उभयनैरन्तर्यस्यापि ग्रहणासंभवात्। वस्तुतस्तस्य तुच्छतया प्रत्यभिज्ञाक्रियार्थक्रियाकारित्वं न युक्तं; अन्यथा तदादाय सधर्मकत्वप्रसङ्ग इति भावः। नैरन्तर्यमात्रेणेन्द्रियान्तरग्राह्यत्वाङ्गीकारे बाधकमाह—**अन्यथेति**—अविशेषादिति भावः। ननु दृष्टमेव जिघ्रामि मधुरमेव पश्यामि इति प्रत्यभिज्ञानदर्शनादिष्टापत्तिरिति चेन्न, रसादीनामपि चक्षुरादिग्राह्यत्वे दर्शनमात्रेण रसादिग्रहणात् संशयाभावप्रसङ्गेन प्रत्यभिज्ञायास्तदनुमितधर्मिविषयत्वात्। ननु वनादौ देशैक्यस्य संघातत्वदर्शनादत्रापि तथास्त्वित्याशङ्क्य निराकरोति—**एतेनेति**—देशस्यापि रूपादिस्वलक्षणमात्रत्वे द्वीन्द्रियग्राह्यत्वाभावात् प्रत्यभिज्ञानुपपत्तिः। रूपादेराश्रयतयाऽभ्युपगतस्य एकस्य वस्तुनः संघातत्वे द्वीन्द्रियग्राह्यत्वे च तस्यैव द्रव्यत्वापत्तिः सधर्मकत्वापत्तिरित्यादिनेत्यर्थः। एतेनेत्यस्य रसादिष्वपि प्रसङ्गेनेत्यर्थमप्याहुः॥ दूषणान्तरमप्याह—**एकदेशान्वयिनामिति**—अतिप्रसङ्गपरिहारं शङ्कते। **देशोऽपीति**—अभिन्नदेशकालं स्वलक्षणं संघात इति भावः।

तस्य युष्माभिरिति—'आकाशे हि पदार्थानामवस्थानं आकाश एव ह्यवकाशः स चावरणाभावः' इति भावत्कवचनात्। तस्य शून्यतया रूपाद्यनाधारस्य संघातव्यवहारनिमित्तत्वाभावादिति भावः। **भिन्नभिन्नक्षणेति**—पूर्वपूर्वरूपस्पर्शोपादानत्वादुत्तरोत्तररूपस्पर्शयोरिति भावः। **तत्संघातस्येति**—भवत्पक्षे तस्यापि (रूपादि) क्षणत्वेन नानात्वात् तदैक्यं च संघातत्वेन वक्तव्यं तस्यापि संघातरूपत्वेन संघातरूपदेशापेक्षायां अनवस्था। तथाच—पृथिव्याद्येकदेशसंघातप्रयोजको दुर्लभ इति भावः। **अन्योन्येति**—पृथिवीशब्दवाच्यरूपरससंघातस्य एतत्संघातावच्छेदेन संघातत्वाङ्गीकारे इति भावः। ननु गन्धानुमिते द्रव्ये घ्रातमेव पश्यामीतिवद्दृष्टरूपानुमितस्पर्शे दृष्टमेव स्पृशामीति प्रत्यभिज्ञेत्याशङ्क्य उभयाश्रयस्यैकस्य त्वयाऽनङ्गीकारेण साहचर्यगर्भव्याप्तिग्रहासंभवान्नानुमानप्रवृत्तिरिति परिहरति—**अथेति**। भेदग्रहेऽपि भ्रमरूपप्रत्यभिज्ञाङ्गीकारे बाधकमाह—**रसादिष्वपीति**। प्रत्यभिज्ञाया निर्विषयत्वे प्रत्ययमात्रस्याविशेषान्निर्विषयत्वप्रसङ्गेन रूपादिस्वलक्षणस्याप्यपह्नवस्स्यादित्याह—**योगाचारनीत्येति**। **समत्वादिति** ग्राह्यग्राहकभावानुपपत्त्यादिबाधकस्य तेनापि प्रतिपादनादिति भावः। संघातादेरयोगादित्यत्रादिशब्दसंगृहीतं मतान्तरं शङ्कते—**यत्तु मतान्तरमिति**। द्वित्रिचतुस्स्वभावा इति द्वन्द्वगर्भो बहुव्रीहिः। न च सर्वत्र सर्वान्वयः, देवदत्तयज्ञदत्तविष्णुमित्राः रक्तशुक्लकृष्णाः इतिवद्योग्यतयान्वयव्यवस्थासंभवात्। अतो द्वित्रिचतुरित्यत्र न समासान्तप्रसङ्गः। तदुक्तं तत्वमात्रपञ्चिकायां—

> वाय्वादिव्यवहारो भवति स्पर्शादिलक्षणैरेव।
> द्वित्रिस्वभावभाग्भिः एकस्माद्भूस्वतादीव॥

इति। अत्र मते धर्माणामेव तथाव्यवहारसाधनत्वं; धर्म्येवेति पक्षे तु न वस्तुनानास्वभावत्वं; किन्तु ग्राहकभेदेन तथा व्यवहार इति भेदः॥

स्वभावभेदा इत्यत्र स्वश्चासौ भावश्चेति स्वभावः—स्वरूपमित्यर्थः; उताहो स्वस्य भावः स्वभावः इति षष्ठीसमासः इति विकल्पं मनसि निधाय प्रथमं दूषयति—**एकस्येति**। चतुष्ट्वे हि वस्तुस्वभावानां परस्पराभेदे चतुष्ट्वव्याघातः भेदेऽत्वेकत्वव्याघात इति भावः। द्वितीयं दूषयति—**अनेकेति**। अगत्या धर्मिपक्षमवलम्बते—**एकस्मिन्नेवेति**। **सर्वत्रासिद्धस्येति**—क्वचित्सिद्धस्यैवारोपादिति भावः। ननु प्रत्येकं सिद्धानामेकस्मिन्नारोपे को विरोध इति चेत्; न; एकैकात्मकत्वेन सिद्धानां भेदाद्विरोधग्रहेणारोपासंभवादविरोधार्थं क्वचित्समावेशे वक्तव्ये तदसिद्धिरिति भावः। ननु रूपरूपिणोः भेदग्राहकप्रमाणाभावादभेदसिद्धौ रूपादीनामाश्रयासिद्धिरित्यत आह—**एतेनेति**—प्रत्यभिज्ञानुपपत्तिरूपस्य पूर्वोक्तसाधकस्य सत्त्वेनेत्यर्थः। दूषणान्तरमाह—**विपरिवर्तस्येति**। अभेदानुपलम्भेन भेदस्यैव सिद्धेरित्यर्थः। अभेदानुपलम्भमेव दर्शयति—**नहीति**। ननु वैपरीत्यप्रसङ्गो नोपपद्यते—सहोपलम्भनियम मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यैकशब्दानुविद्धप्रत्यय प्रथ-

मपिण्डग्रहणकालिकाभेदग्रहणरूपाभेदोपलम्भहेतुचतुष्टयस्य सत्त्वादित्यत्राह—**सहोपलम्भनियमादीति**। **निरसिष्यामह** इति। भेदाभेदनिरसनावसरे इत्यर्थः। असिद्धश्चायं प्रथमो हेतुरित्याह—**नचेति**। **रूपमन्तरेणेति**—स्वकीयरूपमन्तरेणेत्यर्थः। धर्मिज्ञानस्याप्यारोपहेतुत्वादिति भावः। **तमन्तरेणेति**—शङ्खमन्तरेण तदीयरूपस्यान्यत्रारोपस्थल इत्यर्थः। ननु पीतशङ्खादिभ्रमे पीतिमगुणविशिष्ट एवान्यश्शङ्खस्तदानीमुत्पद्यते; क्षणिकत्वाङ्गीकारेण पूर्वशङ्खस्य नाशात्। यद्वा—पित्त (पीत)द्रव्यस्यैवायं शङ्खाभासरूपेण परिणामः। तथाच सिद्ध एव सहोपलम्भनियमः तत्राह—**नचेति**। तत्र हेतुमाह—**स्पर्शनेनेति**—न क्षणिकत्वेन शङ्खान्तरोत्पादानं युक्तं; स एवायमिति प्रत्यभिज्ञानुपपत्तेः नापि पित्तविवर्तः; त्वगिन्द्रियविषयत्वानुपपत्तेरित्यर्थः। **एवमिति**-जले औष्ण्यभ्रमकाले तदीयशैत्यानुपलम्भात् उष्णस्पर्शस्याश्रयं विनोपलम्भाच्चेत्यर्थः। आदिशब्देन रसादयो गृह्यन्ते। सहोपलम्भनियमस्य व्याप्तिग्रहस्थानाभावान्न साधकत्वं तथाऽपि साधकत्वे योगाचारमतप्रसङ्ग इत्याह—**यदि चासाविति**। प्रत्युत सहभावस्य भेदघटितत्वात्तन्नियमहेतुर्विरुद्ध इत्याह—**अत इति**। किंच सहोपलम्भनियमेन धर्मधर्मिभेदनिरसनेऽपि रूपस्पर्शयोस्तन्नियामकाभावादसिद्धेः दृष्टमेव स्पृशामीति प्रत्यभिज्ञानुपपादनादेतावान् प्रयासो व्यर्थ इत्याह–**किञ्चेति**। भवद्भिरेवानुगतो धर्मी बुद्धेर्बाध्यबाधकभावनिरूपणस्थले बुद्धितत्वमालायामुक्तः; स इदानीं त्यज्यत इति पूर्वापरविरोधश्चेत्याह **यत्तदन्यत्रेति अनुपप्लवेति**—इदमित्थं सिद्धिटीकायां व्याख्यातं—शुक्तिकारजतयोर्बाध्यबाधकभावः कथं नियम्यते ? नहि विरोधेन, वैपरीत्यस्यापि प्रसङ्गात्। नच निषेधात्मकतया, विधेरपि क्वचिद्बाधकत्वात् निषेधस्यापि बाध्यत्वात्। न च प्रामाणिकत्वाप्रामाणिकत्वाभ्यां, प्रामाणिकस्यापि दुर्बलस्य शत्रोर्बाध्यत्वात्। किञ्च बाधार्थं बाध्यविषयकव्यापारं कुर्वाणो हि लोके बाधक इत्युच्यतेः नहि सत्यस्य शुक्त्यादेर्मिथ्यारजतत्वादिकं प्रति व्यापारोऽस्ति; अव्याप्रियमाणस्यापि बाधकत्वेऽतिप्रसङ्गो विपरिवर्तश्च स्यात्। तस्मात्कथं बाध्यबाधकभावव्यवस्थेति ? उच्यते—**अनुपप्लवेति**—उपप्लवभूतोऽर्थस्वभावो रजतत्वं; **अनुपप्लवभूतो**ऽर्थस्वभावोऽनारोपितश्शुक्तित्वादिः। तस्य **विपर्ययैः**—उपप्लवभूतैः रजतत्वादिभिः **न बाधः**; किंत्व **यत्नवत्त्वेऽपि**—बाध्यरजतत्वविषयव्यापाररहितत्वेऽपि शुक्तित्वादिरेव बाधः; कुतः **बुद्धेस्सत्पक्षपाततः**—भूतार्थपक्षपातित्वात्। अयं भावः—भूतार्थपक्षपातो हि बुद्धीनां स्वभावः। तावदेवेयमनवस्थिता; तावदेवेयं भ्रान्तिः। यावत्तत्वं न प्रतिलभते; तत्प्रतिलाभे तु तत्र स्थितपदा सती अप्रामाणिकं रजतत्वं न संस्पृशेत्; बुद्धेस्ततो निवृत्तिरेव तद्विषयव्यापारमकुर्वतोऽपि बाधकत्वं नाम। यथा हि वेश्यया परिगृह्यमाणः कुरूपो दरिद्रो वा तद्विषयव्यापारमकुर्वताऽपि सुरूपेणाढ्येन वा बाध्यते; बाधकत्वं चाढ्यस्य सुरूपस्य दरिद्रात्कुरूपाद्वा वेश्याया निवृत्तिरेव तथैतदपीति। अन्ये तु—सर्वेपि पुरुषास्सर्वेष्वपि पदार्थेषु संभावितभ्रान्तयः

आहोस्वित् कस्मिंश्चित्पदार्थे कश्चिदसंभावितभ्रान्तिरपि भवतीति ? तदर्थं विचारितं; कस्मिंश्चित्पदार्थे कांश्चिदाकारान् कश्चिग्दृह्णानि । अपरस्तु ततोऽप्यधिकान् । ततोन्यस्ततोऽप्यधिकान् । तत्र पूर्वस्या बुद्धेरुत्तरोत्तरमुत्कृष्यते । इयं चोत्कर्षपरम्परा कस्मिंश्चित्पुरुषे समाप्यते आहोस्विदप्रतिष्ठां गच्छतीति ? यदा तु काष्ठां न प्राप्नोति तदा सर्वेऽपि संभावितभ्रान्तयः । सर्वेषामपि स्वाज्ञाताकारस्य पदार्थेषु संम्भवात् । यदा तु काष्ठां प्राप्नोति तदा तस्मिन् पदार्थे तेनाज्ञाताकाराभावात् आकाराज्ञानहेतुकभ्रमासंभवः इति । तत्र पदार्थाभ्यासो हि बुद्ध्युत्कर्षहेतुर्भवति । अभ्यासेन जायमानोत्कर्षपरम्परा काष्ठां गच्छन्ती दृष्टा । यथा पुटपाकोत्कर्षेण जायमाना स्वर्णोत्कर्षपरम्परा दशवर्णे । पदार्थाभ्यासोऽभ्यासत्वात्काष्ठाप्राप्तिहेतुः इति । ननु लङ्घनाभ्यासेऽप्यभ्यासत्वं वर्तते; न स काष्ठाप्राप्तिहेतुर्भवतीति, मैवं; तत्रोत्कर्षं जनयन् लङ्घनाभ्यासः पूर्वपूर्वप्रयत्नाधिकप्रयत्नापेक्ष एवोत्कर्षं जनयति । तथा च त्रैलोक्यलङ्घनहेतुभूतप्रयत्नस्यासंभवात्तत्रोत्कर्षकाष्ठाप्राप्तिर्नास्ति । अयं चाभ्यासोऽधिकप्रयत्नापेक्ष एवोत्कर्षहेतुः पुटपाकाभ्यासवत् । तस्मादुत्कर्षकाष्ठाप्राप्तिहेतुर्भवतीति । एतदेवाभिप्रेत्योक्तं—**अयत्नवत्त्वेऽपि बुद्धेरिति** । पूर्वप्रयत्नाधिकप्रयत्नसापेक्षेणाभ्यासेन जायमानतया उत्कर्षकाष्ठां प्राप्तायाः । अत एव यथार्थविषयाया बुद्धेः तत्पक्षपाततो बाधकत्वमुपपद्यते इति । अस्मिन् पक्षद्वयेऽपि धर्मिस्वरूपस्य धर्मस्य चाङ्गीकाराद्विरोध इति भावः । अत्र बुद्धेस्सत्पक्षपाततः तत्पक्षपातत इति पाठद्वयं बोध्यं । केचिदेवं व्याचख्युः —निष्कलङ्कप्रत्यक्षसिद्धस्य युक्तिभिर्न बाध इति त्वयाङ्गीकारात् तन्न्यायो धर्मविशिष्टधर्मिण्यप्यस्त्वित्यत्राह—यत्तदन्यत्रेति । **उपप्लवो**—बाधः । प्रत्यक्षबाधाभावादनुपप्लवभूतः स चासावर्थश्च तथोक्तः । **स्वभावः**—स्वरूपं । **विपर्ययैः**—यौक्तिकबाधैः प्रत्यक्षबुद्धेरबाधितार्थविषयकत्वस्यौत्सर्गिकत्वादित्यर्थं इति । **तदिहेति**—एकस्मिन् धर्मिणि भ्रान्त्यभ्रान्त्यनुगत प्रामाणिकधर्माङ्गीकारेण ह्ययं बाध्यबाधकभावसमर्थनार्थो वा काष्ठाप्राप्तिसमर्थनार्थो वा ग्रन्थ आरब्ध इति न विस्मर्तव्यमित्यर्थः । **बुद्ध्यन्तराणीति**—यद्यपि दृष्टमेव स्पृशामीति पूर्वोक्तापि प्रत्यभिज्ञा एकेन्द्रियजन्यैव चक्षुर्मात्रजन्यत्वात्; तथाऽपि सा इन्द्रियद्वयसापेक्षेति भावः । **अभिन्नेन्द्रियजन्यानि**—भिन्नेन्द्रियानपेक्षाणि ॥ ननु विशदाविशदज्ञानं कथं धर्मिसाधकमित्यत्राह—**अल्पधर्मविशिष्टतयेति** तथाच एकस्यैव वस्तुनो भूयोऽल्पधर्मविशिष्टतया ग्रहणमेव प्रतीतेर्विशदाविशदत्वमिति धर्मिसिद्धिरिति भावः । ननु विशदाविशदत्वमधिकन्यूनविषयत्वमेव, न त्वेकधर्मिणि अधिकन्यूनधर्मविषयत्वं । तथा च न धर्मिसिद्धिरित्यत्राह * **न तु न्यूनाधिकेत्यादिना** । ननु रूपमेव दूरादूरयोरविशदं विशदं च भासतां; न (च) तु रूप एवाल्पबहुधर्मप्रसङ्गः; तदाऽपि तदाश्रयासिद्धेः इत्यत्राह—**नचेति** । तथा च पीतशङ्खभ्रमस्थले पूर्वं श्वैत्यस्य ग्रहणादिदानीं पीतिमग्रहणात्तयोरभिन्न-

त्वात् तद्विषयतया प्रत्यभिज्ञाया अनिर्वाहादुभयानुयायिधर्मिसिद्धिरिति भावः। परिमाणस्य द्वीन्द्रियग्राह्यतया प्रत्यभिज्ञाविषयत्वमस्त्वित्यत्राह—**नापीति** । काल्पनिकं परिमाणमस्त्वित्यत्राह—**दूरे चेति** । तथाच दूरान्तिकयोर्भिन्नपरिमाणस्फुरणान्न प्रतिज्ञानिर्वाह इति भावः। उक्तन्यायेन संख्याया अभावात्; काल्पनिकत्वेऽपि दूरासन्नयोः भिन्नसंख्यास्फुरणान्न तामादायापि निर्वाह इत्याशङ्क्याह—**अत एवेति** ननु संशयानुरोधात्कथं धर्मिसिद्धिरित्यत्राह—**संशयविपर्ययौ तावदिति** । किञ्चिदाकारेणाधिष्ठानज्ञानं किञ्चिदाकारविशिष्टतया च तदज्ञानं तस्मिन् सादृश्यज्ञानं च तत्कारणं । तौ तद्धर्म्यभावे न संभवत इत्यर्थः। तेषां कारणत्वे नियामकमाह—**तथा दृष्टि नियमश्चेति**—अन्वयव्यतिरेकदर्शनादित्यर्थः। ननु स्तो निर्धर्मकत्वेऽपि संशयविपर्ययावित्याङ्क्य कारणासंभवान्न संभवत इत्याह—**अधिष्ठानस्य कार्त्स्न्येनेति** निर्धर्मकत्वपक्षे अधिष्ठानज्ञानमस्ति न वा ? अस्ति चेत् कार्त्स्न्येन तद्रूपविशेषदर्शनादज्ञाताकाराभावान्न भ्रमः। तदभावे सामान्येनापि तज्ज्ञानाभावान्न भ्रम इत्यर्थः। ननु निर्धर्मकत्वेऽपि भाताभाताकारोऽस्तु इत्यत्राह—**भाताभातेति** । अयं भावः—एकस्य वस्तुनो न स्वरूपेण भाताभातत्वसंभवः विरोधात्; अपि तु किञ्चिद्धर्मविशिष्टतया ज्ञातत्वं किञ्चिद्धर्मविशिटष्त्वेनाज्ञातत्वं वाच्यं, तच्च निर्धर्मकस्य न संभवतीत्यर्थः। बाधकप्रत्ययबलादपि धर्मसिद्धिरित्याह—**बाधकधीश्चेति** । ननु धर्मस्वरूपज्ञानमेव बाधकमस्तु न तावता धर्मधर्मिभाव आवश्यकः इत्यत्राह—**स्वरूपग्रहस्येति** । तथाच क्वचिदप्यारोपो न स्यादिति भावः। जिज्ञासाबलाच्च धर्मधर्मिभावासिद्धिरित्याह—**जिज्ञासा चेति** इदं च निर्विशेषजिज्ञासाखण्डनसमये शतदूषण्यां प्रपञ्चितमाचार्यैः; तत्रानुसन्धेयम्। **विदिताविदिताकारवत्त्वमिति** आकारो—धर्मः। **भिन्नाभिन्नवादिभिः**—भास्करादिभिः। **आविर्भावधर्मः**—धर्मिग्रहणनियतग्रहणो धर्मः इदन्त्वादिः। **तिरोधानधर्मः**—धर्मिग्रहणसमये कदाचित् तिरोधानार्हधर्मः शुक्तित्वादिः। तत्रानुगतं धर्मीत्यर्थः। प्रकारान्तरमाह—**यत्रेति** । यत्र वा वस्तुनि धर्मग्रहणात्पूर्वं ज्ञानं भवेत् तद्धर्मीत्यर्थः। शुद्धनिर्विकल्पकानङ्गीकारात् स्वानभिमतांशमाह—**अत्रागृहीतेति**—अगृहीताशेषधर्मस्य धर्मिणो ग्रहणमित्यर्थः। धर्मधर्मिभेदे परोक्तं बाधकं शङ्कते—**यत्तु बौद्धैरुक्तमिति** । **धर्मोपकारेति** सिद्धिटीकायामिदमित्थं व्याख्यातं धर्माणां न केवलं धर्मिमात्रमङ्गीकार्यं; अपितु धर्मान्प्रति उपकारः तच्छक्तिश्च । न हि तदनुपकारिणस्तद्वत्वं संभवतीति माभूद्दश मासानपि धृत्वा प्रसूतापि वन्ध्या पुत्रिणी । नचाशक्त उपकारको नाम; अतिप्रसङ्गात् । नहि नद्यश्शतं सम्भूयापि पचेरन्; तस्माद्धर्मिणमङ्गीकुर्वता तस्मिन् धर्मोपकारः तदङ्गभूता शक्तिश्चेति पदार्थद्वयमङ्गीकरणीयं । अस्तु; सम्पदेव सम्पदोऽनुबध्नातीति चेत्; नायं संपत्सपंदनुबन्धः; किन्तु विपदो विपदनुबन्ध एवायमिति प्रतिपादनार्थमिदं पद्यमवतीर्णं । **धर्मेति** अयमर्थः धर्मविषयोपकारार्थं याश्शक्तयो मया आपादिताः तासां धर्मिणां भेदोऽभेदो वा ? आद्ये तासामपि शक्तीनां धर्मत्वं

वाच्यं धर्मिणश्च तद्वत्त्वं। ततश्च तासां शक्तीनां ततो—धर्मिणः उपकारो यदि न; तदा किं ता अस्य स्युः ? अन्येषामपि किं न स्युः ? न ह्यनुपकारकस्तद्वान्नाम। अस्तु तर्हि तत्राप्युपकारश्शक्तिश्च; तत्राह—तथा स्यादिति—त्रिचतुरकक्ष्याविश्रमे नियामकाभावात्। अस्तु तर्हि—

स्वभावनियमाभावादुपकारोऽपि दुर्घटः।

इति न्यायेनाभिन्ना इति द्वितीयपक्षः; तत्राह—नानोपाधीति। उपकाराङ्गभूता शक्तिः उपकाराङ्गशक्तिः। अयं भावः—रूपवत्त्वमात्रमस्य न स्वरूपं; अपि तु स्पर्शवत्त्वमपि। तथाच रूपवत्त्वादिसमस्तद्धर्मैरभिन्नात्मा धर्मी। तथाच यदैकधर्मवत्तया गृह्यते तदा सर्वधर्मात्मनापि गृहीत एव; स्वरूपे ग्रहणासंभवात्। ततश्चोपकार्यस्य धर्मस्य अनिश्चितः को भेदस्स्यात् अनिश्चितांशस्स्यात्रूपस्पर्शादीनां सर्वेषां एकात्मत्वेनागृहीतांशाभावादिति धर्मधर्म्यङ्गीकारेऽपि भाताभातांशानुपपत्तेः संशयाद्यनुपपत्तिस्समेत्यर्थः। उपाधीनामिति॥ न तावद्रूपस्पर्शवद्धर्म्यभेदमात्रेण रूपादीनामभेदः; अन्वयव्यतिरेकसिद्धभिन्नकारणकानां रूपादीनां घटपटयोरिवैक्यासंभवात्। नच धर्मोपकारशक्तीनामित्युक्तदूषणं संभवति; अन्वयव्यतिरेकसहकृतप्रत्यक्षादिप्रमाणैः कश्चिदेव रूपादीनां धर्मीति नियमसंभवात्। अन्यथा क्षणसंतानपक्षेऽपि सर्वक्षणसंतानोऽपि सर्वस्य किं न स्यात् ? इति तत्राप्युपकारशक्तिकल्पनमुखेन बहुविप्लवप्रसङ्गात्। तथाच धर्माणां भेदे युगपद्ग्रहणनियमोऽपि नास्ति; ग्राहकाणां परस्परव्यभिचारित्वात्। तस्मात् धर्मिणो ग्रहणेऽप्यनिचितांशसंभवात् 'को भेदस्स्यादनिश्चितः' इत्यनुपपन्नं; रूपस्य ग्रहणेऽपि रसस्याग्रहणोपपत्तेः। रूपादितया विकल्प्यमानस्येत्युक्तं पक्षं दूषयितुमनुभाषते नन्वस्तु प्रतिसन्धानबलादिति। एकस्मिन् वस्तुनि रूपरसाद्याकारबुद्धिः कथमित्यत्राह—एकस्मिन्नेवेति। ननु ग्राहकनिष्ठानां धर्माणां ग्राह्ये ग्रहणमस्तु तत्राविद्यमानानां रूपादीनां कथं ग्रहणमित्यत्राह—सव्यदक्षिणविपर्यासश्चेति। इह तावदिति। क्वचिदप्यसिद्धस्यारोपासंभवात् ग्राहकभेदान्न भेदधीरित्यर्थः। किञ्च इन्द्रियभेदः प्रमितो ग्राह्येऽध्यस्यते उत सत्तयेति विकल्प्याद्यं दूषयति—चक्षुरादीति।

कल्प्यत इति—ज्ञायत इत्यर्थः। ग्रहणभेदाद्ग्राहकभेदः कल्प्यतामित्यत्राह—मध्ये इति। बुद्धेर्भेदो न जातिकृतः; एकविषयप्रत्यक्षानुमित्योरिव समानव्यवहारप्रसङ्गात्। अपितु विषयकृतः। स च न संभवति; ग्राहकभेदज्ञानायत्तत्वात्। तथाच इन्द्रियभेदज्ञाने विषयभेदारोपः ततश्च विज्ञाने भिन्नविषयत्वज्ञानं तत इन्द्रियभेदज्ञानमिति चक्रकमित्यर्थः।

इन्द्रियेति—तथाविधकारणस्यानुपलम्भात्कल्पनं इन्द्रियवैजात्येन इन्द्रियवैजात्यं च तेनेत्यन्योन्याश्रय इत्यर्थः। ननु तर्हि व्यञ्जकभेदात् क्वापि धीभेदो

४

न स्यात् इति शङ्कते—**नन्विति**। दृष्टान्तदार्ष्टान्तिकवैषम्येन परिहृति—**सत्यमिति**। सत्यं; मालिन्यादयो भेदेन दृष्टा आरोप्यन्ते रूपादयस्त्वक्षेषु तदन्यत्र वा न गृहीताः कथमारोप्येरन् इत्यर्थः। द्वितीयं पक्षमाशङ्कते—**उपाधीति**। **तत्तद्दोषेति**—न चात्रेन्द्रियस्वरूपभेदतद्दोषव्यक्तीनां सिद्धिरिति भावः। ननु प्रतीतिवैजात्यं सिद्धं कारणादिवैजात्यं साधयतीत्यत्राह—**कल्प्याकारस्येति**। वैजात्यं विषयकृतमिति तद्भ्रान्तिरन्यत्र तत्सिद्धिसापेक्षेति भावः। ननु चक्षुरादिस्वभावास्सिद्धाः। त एव दोषा अध्यासहेतवः! नचान्यत्राप्रसिद्धस्यारोपानुपपत्तिः; आरोप्यज्ञानस्याहेतुत्वात्, अन्यथा कदाचिदपि सर्पादर्शिनो मण्डूकवसाञ्जनाक्तनेत्रस्य वंशे सर्पभ्रमाभावप्रसङ्गादिति शङ्कते **चक्षुरादि स्वभावा एवेति**। चक्षुरादीनामेव दोषत्वे स्वलक्षणस्यापि सिद्धिर्न स्यात्, दोषजन्यतया निर्विकल्पस्यापि प्रामाण्याभावप्रसङ्गादिति परिहरति नेति। **ततश्चेति** धर्मधर्मिणोरुभयोरपि कल्पितत्वप्रसङ्गात्तदुभयातिरिक्तपदार्थासम्भवाच्च न पारमार्थिकत्वं ग्राहकरूपभेदस्य वक्तुं शक्यमित्यर्थः। ननु निरधिष्ठानभ्रमानुपपत्त्यैव चक्षुरादीनां दोषत्वं प्रतिनियतमित्यत्राह—**अधिष्ठानेति**—**बुध्यैवेति**—योगाचारवत्तत्तत्पदार्थविषयबुध्यैव तेते पदार्थाः कल्प्यन्तामित्यर्थः। (अधिष्ठानबुद्धिरेवाधिष्ठानमस्तु) कल्पनालाघवाच्च त्वत्पक्षादप्ययं पक्षो ज्यायानित्याह—**तथाचेति**। बुद्धिशक्तिः बुद्धिरूपा शक्तिर्वासनेत्यर्थः। न च दुरालभास्पर्शस्यैकत्वेऽपि स्पर्शनेन्द्रियप्रदेशभेदैः अज्ञातैरेव करतलप्रकोष्ठादिवृत्तिभिः अनेकधोल्लेखस्य सर्वैरङ्गीकारात्तन्न्यायस्सर्वत्राप्यस्त्विति शङ्कते—**नन्विति** तत्राप्येकस्मिन् स्पर्शे ग्राहकप्रदेशभेदादनेकधोल्लेखोऽसिद्ध इति परिहरति। **नेति**—नन्वेकस्मिन्ननेकधोल्लेखाभावे विकृतितारतम्यं कथमित्यत्राह—**प्रदेशभेदेनेति**—यथा वह्न्यवयवानामुष्णस्पर्शवतां तत्तत्प्रदेशभेदेन अल्पशो बहुशश्च प्रवेशेऽपि स्पर्श एकरूप एव गृह्यते; स्पर्शवद्बह्वल्पव्यक्तिप्रवेशकृतमेव विकृतितारतम्यं, तथा दुरालभावयवानां (प्रदेशभेदेन) प्रविष्टानामल्पत्वबहुत्वकृतमेव तारतम्यमित्यर्थः। नन्विन्द्रियादिभेदेन तृणादिवस्तुषु प्रतिकूलत्वमनुकूलत्वं च कल्प्यत इति सर्वसंमतं; तद्वदत्रापि भवत्विति शङ्कते—**नन्विति**। ननु तत्र द्वयोरपि पारमार्थिकत्वमस्त्वित्यत्राह—**नचेति**। तथा च विनिगमकाभावादुभयं कल्पितमेवेति भावः।

तथाचोक्तं—

परिव्राट्कामुकशुनामेकस्यामेव योषिति ।
कुणपः कामिनी भक्ष्यमिति तिस्रो विकल्पनाः ॥

इति। **अनेकान्तवादः**—सप्तभङ्गीवादः। अनुकूलप्रतिकूलत्वयोः प्रतियोगिभेदेन विरोधाभावान्नेन्द्रियकल्पितत्वं किं तु पारमार्थिकत्वमेवेति परिहरति—**तदपीति**। तर्हि सर्वेषामुभयथा प्रतीतिस्स्यादित्यत्राह—**तत्तदिति**। पारमार्थिकत्वं विरोधाभावं चोपपादयति—**वस्तुष्विति**। **बुद्धिभेदावेवेति**। अनुकूलविषयिणी

बुद्धिः सुखं प्रतिकूलविषयिणी दुःखं इत्यङ्गीकृतमित्यर्थः। परेषां तु ते तज्जनके इति विशेषः। तथाच—

अर्थेनैव विशेषो हि निराकारतया धियाम्।

इति न्यायेन तद्भेदाद्धीभेदः धीभेदात्तद्भेद इत्यन्योन्याश्रय इत्यर्थः। उत्पत्तिज्ञप्त्योरन्योन्याश्रयो दोषो वाच्यः। न तावदुत्पत्तावन्योन्याश्रयः, अर्थभेदः स्वसामग्रचा न तु धीभेदेन; धीभेदस्त्वर्थभेदेनेति। नापि ज्ञप्तौ; धीभेदसामग्रचेव विषयभेदज्ञाने कारणं भेदज्ञाने च मनस्सन्निकर्षादिकमिति ज्ञप्तावपि नान्योन्याश्रय इति परिहरति—**न विषयभेदस्येति**। परस्परजन्यजनकभावे परस्परप्रतीतिसापेक्षप्रतीतिकत्वे (वा) नान्योन्याश्रय इति भावः। **एवमुपाधिभेदैरिति** यद्यप्येकमेव वस्तु ह्रस्वदीर्घत्वबुद्धिविषयः; न चात्र ह्रस्वदीर्घत्वे परिमाणे स्त; परिमाणद्वयाभावात्; तथापि निरूपकभेदाधीनन्यूनाधिकभावः परिमाणेऽस्तीति तत्रापि विषयभेद एवेति भावः। **पूर्ववदिति**— ज्ञाताज्ञातभिदाभावादित्यर्थः। ग्राहकभेदेन रूपरसादिबुद्धिभेदोपपादनेऽपि ग्राहकभेदाभावान्नीलपीतादिधीभेदो न स्यादित्याह—**नीलपीतेति**। नीलपीतयोश्चक्षुरेकेन्द्रियग्राह्यत्वात् शीतोष्णयोस्त्वगेकग्राह्यत्वात् मधुराम्लयोरसनैकेन्द्रियग्राह्यत्वादिति भावः। ननु मरीचिकाया मिथ्यात्वे तदन्तः पाति वीचिकाया इव रूपादि भेदस्यैव मिथ्यात्वे तदन्तः पाति नीलादि भेदस्य सुतरां मिथ्यत्वं; (तथा) ग्राहकभेदाभावेऽपि तद्भेदधीः कथञ्चित्समर्थनीयेति शङ्कते—**रूपादिभेदमिथ्यात्व इति**। **असिद्धस्येति**—मृगमरीचिकाया मिथ्यात्वं नाम किं स्वरूपस्य कुत्राप्यभावः? स त्वसिद्धः। अत्र सिद्धसूर्यालोकेऽन्यत्र सिद्धजलत्वारोपात् तथा वीचिकाप्युपपन्ना। नचात्र तन्न्यायो वक्तुं शक्यः; क्वापि (धी) रूपादिभेदस्यानभ्युपगमादिति भावः। ननु नीलादिनिदर्शनेन मरीचिकायाः मिथ्यात्वं साध्यतामित्यत्राह— **मिथ** इति। **निदर्शनमात्रेणेति** - स्वप्नादिप्रत्ययनिदर्शनमात्रेण स्वलक्षणमात्रस्यापि निह्नवप्रसङ्गादित्यर्थः। ननु रूपवत्त्वस्पर्शवत्त्वयोः प्रतियोगिभेदाद्भेदो वाच्यः; ताभ्यां च धर्मिण ऐक्येऽपि धर्मिभेदस्स्यादिति शङ्कते—**तथापीति**। स्वरूपस्यैकत्वात्तदभिन्नयोरूपवत्त्वस्पर्शवत्त्वयोर्भेदाभावान्न विरोध इत्याह—**नेति**। **धर्मभेदस्येति** नहि मशकमातङ्गभेदवद्रूपस्पर्शादिभेदस्तदाश्रयाभेदविरोधीति भावः। त्वयाप्येकस्य प्रामाणिकानेकाकारोऽप्यभ्युपगत इत्याह—**वेद्येति**। एका—बुद्धिः वेद्यस्य घटस्य हेतोश्चक्षुरादेः फलस्य चोपादानादेराकारैः **समेतीति**—सम्वध्नातीत्यर्थः; तथाहि—वाह्यार्थवादिना त्वयाऽप्ययं घट इति ज्ञानस्य घट एव विषयो नान्यदिति व्यवस्थासिद्धयर्थं वेद्यस्य घटस्याकारो ज्ञानेऽङ्गीकरणीयः। अन्यथा—

धियो नीलादिरूपत्वे वाह्योऽर्थः किं प्रमाणकः।
धियोऽनीलादिरूपत्वे स तस्यानुभवः कथम्॥

इति त्वदुक्तेरयोगात् । अनीलादिरूपत्वे इत्युत्तरत्र छेदः । तथा चाक्षुषमेवेदं ज्ञानं इति व्यवस्थासिद्ध्यर्थं हेत्वाकारोऽप्यपेक्ष्यः । एवं फलाकारोऽप्यूह्यः । **बाह्योऽपि**—घटपटादिरपीत्यर्थः ।

दृष्टत्वादिति—रूपवान् गन्धवान् इति दृष्टत्वादित्यर्थः । क्षणिकबुद्धिवादिनस्ते युगपदेवानेकाकारः; नः—अस्माकं युगपत्क्रमशोऽपि; श्यामघटे क्रमशो रक्तताद्युत्पत्तिदर्शनात् । **प्रतिसम्बन्धीति**—एकस्यापि देवदत्तस्य **प्रतिसम्बन्ध्यनेकत्वं**—भ्रातृपुत्रतातमात्राद्यनेकत्वं यथा तदैक्यबाधकं न भवति तथा **सम्बन्ध्यनेकत्वं**—घटसम्बन्धिनां रूपरसादीनामनेकत्वं बाधकं न भवति । यद्वा— यथैकस्य वस्तुनः प्रतिसम्बन्धिनो— विरोधिनो बहवस्सन्ति तथेत्यर्थः । **स्वाभीष्टे**— क्षणिकत्वबुद्धौ । अन्यथा वेद्याकारैर्बुद्धेरपि भेदःस्यादिति भावः ।।८।। **इति द्रव्यसाधनम्** ।

अक्ष० । अथ द्रव्याद्रव्यभेदेन विभागोऽनुपपन्नः द्रव्याद्रव्ययोरुभयोरभावात् अत एव द्रव्यस्य आगन्तुकधर्मवत्त्वं लक्षणमित्यप्यनुपपन्नम्, धर्मधर्मिणोरुभयोरभावात् । निराधारा निर्धर्मका रूपादयः पञ्च चत्वारो वा पदार्थाः इति हि वैभाषिका आहुः तदेकदेशिनस्तु रूपादित्वेन विकल्पितमेकमेव वस्त्विति वदन्तीत्याक्षेपे पक्षद्वयमिदमनेन क्रमान्निरस्यति—

एकार्थेति तत्र प्रथमं रूपादीनां निराधारत्वनिरासः । अस्ति "दृष्टमेवेदं स्पृशामि" इति एकार्थविषयिणी प्रत्यभिज्ञा । साच बाधदोषाद्यभावेन विपर्ययादिरूपत्वायोगात् दृढतरा निश्चितप्रामाण्या स्वविषयैक्यसाधने प्रभवति । तद्विषयो रूपादिकमेवास्त्वित्यत्राह—**दर्शनस्पर्शनाभ्यामिति** दर्शनं चक्षुः चाक्षुषं वा । स्पर्शनं त्वगिन्द्रियं । उभाभ्यामित्थं जायते पूर्वं चक्षुषा दृष्टस्य तत्संकारसहकृतेन त्वगिन्द्रियेण खलु इत्थं प्रत्यभिज्ञा जायते अत इह द्वीन्द्रियग्राह्यमेव विषयो भवितुमर्हति नत्वेकैकेन्द्रियग्राह्यं रूपस्पर्शादिकम् ।

नचानयोस्संघातो विषय इत्यपि वक्तुं शक्यमित्याह—**संघातादेरिति** आदिना नैरन्तर्यादिपरिग्रहः । **अयोगादिति**—संघातस्यातिरिक्तत्वोपगमे द्रव्यवाद एव वरं स्यात् अनतिरिक्तत्वे तु प्रत्येकानतिरिक्तस्य एकैकस्य द्वीन्द्रियग्राह्यत्वा योगादुक्तप्रत्यभिज्ञाविषयभावो न संभवति । एवं नैरन्तर्यवादेऽपि प्रत्येकानतिरेकादिति भावः । अतः **सा** प्रत्यभिज्ञा **वस्तु** स्वविषयं वस्तु । **रूपादितः** रूपस्पर्शाद्यपेक्षया । **अन्यत्**—भिन्नं । **अवगमयति** निश्चाययतीत्यर्थः ।

एवमेकैकेन्द्रियजन्यानि बुद्ध्यन्तराण्यपि अवगमयन्तीत्याह—**एकस्मिन्निति** ।

एकस्मिन् वस्तुनि । **दूरतादेरिति** आदिना समीपादिपरिग्रहः । **अविशदेति**—दूरे पूर्वमविशदं दृष्टमद्य समीपे विशदं पश्यामीति प्रत्यभिज्ञा चक्षुरिन्द्रियेण जन्यते तत्र अल्पधर्मविशिष्टतया वस्तुनो दर्शनमविशदं । भूयोधर्मविशिष्टतया दर्शनं ततो विशदं; नचात्र रूपमात्रं विषयः तस्य भूयोऽल्पधर्मवैशिष्ट्यानभ्युपगमात् अभ्यु-

पगमे धर्मधर्म्युभयसिद्धेरनिवार्यत्वात्। दूरे शुक्लतया दृष्टमेव शंखं समीपे पीतं पश्यामीति प्रत्यभिज्ञायां प्रतीयमानरूपभेदेन तदादाय विषयैक्यायोगाच्च। अत्र उत्तरेणादिना संशयविपर्ययोः ग्रहणम्। अधिष्ठाने समानधर्मग्रहणात् विशेषधर्माग्रहणाच्चैव हि तत्संभवः—अतस्तावपि धर्मातिरिक्तं धर्मिणमवगमयतः। तद्वत्—उक्तप्रत्यभिज्ञावदित्यर्थः।

अथास्तु अनेकेन्द्रियग्राह्यमपि एकमेव किञ्चिद्वस्तु तत्तु रूपाद्यात्मकं तदाश्रयरूपं वेति नाभ्युपैमः, किन्तु ग्राहकेन्द्रियभेदात् एकस्मिन्नेव रूपत्वस्पर्शत्वादिमतिर्जायते। यथा मणिकृपाणदर्पणादिव्यंजकभेदेन मुखादेः अणुत्व पृथुत्व मलिनत्व विमलत्वादिग्रहः। अतो न वस्तुतो रूपादयस्सन्तीत्यत्राह—नैकत्वेऽपीति। वस्तुनः एकत्वेपि तदेकमेव वस्तु—**अक्षभेदात्**–इन्द्रियभेदात। **भिदुरमिव** रूपत्व स्पर्शत्वादिना भिन्नभिन्नमिव भासते। एकत्रैव रूपत्वस्पर्शत्वाद्यारोपः इति न वक्तुं युक्तमिति भावः। कुत इत्यत्राह–**मिथ इति** दर्पणादिवदिन्द्रियाणि न प्रत्यक्षयोग्यानि किन्तु रूपादिग्रहणादुन्नेयानि। तथा च ग्राह्याकारभेदात् ग्राहकभेदसिद्धिः ग्राहक भेदात् ग्राह्याकारभेद इत्युपगमे अन्योन्याश्रय इत्यर्थः।

अत्रादिशब्देन नीलपीतशीतोष्णमधुराम्लादिभेदासम्भवो गृह्यते नील पीतादेः ग्राहकभेदाभावात्। अतो रूपस्पर्शाद्यनेकधर्मवत् स्थिरमेकं द्रव्यं उक्तप्रतीतिभिः सिद्धयतीति भावः।

धर्मो निर्धर्मकश्चेत्कथमिव भविता सोऽभिलापादियोग्यो
धर्मेणान्येन योगे स च भवति तथेत्यव्यवस्थेति चेन्न।
कश्चिद्धर्मोऽपि धर्मी स्फुटमतिमथने स्वान्यनिर्वाहकत्वं
तन्निष्कर्षप्रयोगेष्वपि भवति पुनस्तस्य धर्मी विशेषः॥ ९॥

सर्वा०। एवमेकाश्रयानेकदृष्टावन्यतरनिह्नवार्थिनौ पुनरपि धर्मधर्मिभावभङ्गमुखेन प्रवृत्तौ प्रतिहन्येते; अन्यथा *अन्तस्तद्धर्मोपदेशादित्याद्यनिरूढप्रायं स्यात्। नन्वनुमानं प्रमाणमिच्छन्न धर्मधर्मिभावं बाधितुमर्हति, तस्य हेतुसाध्यधर्माश्रयावश्यंभावात्। आह च **धर्मकीर्तिर्हेतुबिन्दौ**—

पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः।
अविनाभावनियमाद्धेत्वाभासास्ततोऽपरे ॥ इति ॥

अन्येऽपि *ग्राह्यधर्मस्तदंशेन व्याप्तो हेतुरिति। सत्यं, काल्पनिकहेतुसाध्यधर्मद्वारा अनुमानप्रवृत्तिः, पारम्पर्येण तु स्वलक्षणविश्रान्त्या भाक्तमनुमानप्रामाण्यमिति हि बौद्धानां रहस्यम्। तत्त्वगत्या चतुर्विधानामपि तेषां धर्मधर्मिभावः क्षेप्यः। अतस्तद्भङ्गमनूद्य प्रत्याह—**धर्म** इत्यादिना। अयमर्थः—यस्त्वया कश्चिद्धर्म इष्यते स निर्धर्मकः सधर्मको वा ? आद्ये तस्य शब्दवाच्यत्वं न स्यात्, अविशिष्टस्य व्युत्पत्त्याद्यगोचरत्वात्। सर्वधीशब्दानां विशिष्टविषयत्वं

च भवतां भाष्यादिषूक्तम् । द्वितीये तु येन धर्मेण धर्मः सधर्मकः सोऽपि पूर्ववद्धर्मान्तरेण धर्मी स्यादित्यपरापरापेक्षायामनवस्था, द्वित्रादिपर्वमात्रे विश्रम इति व्यवस्थाभावात् । धर्मत्वं च धर्मणां भावः । अतस्तस्यापि धर्मत्वं वाच्यम् । न चैतत्तस्यात्मैव, आत्माश्रयात्; न चान्यत्; अनवस्थानादेवेति चेत्, तन्न; सर्वेषां धर्माणां निर्धर्मकत्वानङ्गीकारात् । कश्चिद्धर्मोऽपि धर्मी स्फुटं स्पष्टम् । स्फुटदृष्टं हि नापह्नोतव्यम् । त्वयाऽपि हेतुसाध्यादिधर्माणां पक्षधर्मत्वादिधर्माः स्वीकार्याः, अन्यथाऽनुमानासिद्धौ क्षणभङ्गादिसाधनायोगात् । अतिमथने—अत्यन्तचर्चायाम् । यद्वा स्फुटमतिमथने—विशदबुद्ध्या सावधानं विमर्शे सतीत्यर्थः । स्वान्यनिर्वाहकत्वं—स्वपरव्यवहारादिव्यवस्थपकत्वम् । यत्र ह्यनवस्थाभयाद्धर्मान्तरं नेष्यते तत्र निमित्तान्तरनिरपेक्षौ तद्धीव्यवहारौ । यथा गोशब्दस्य व्यक्तिवृत्तावित्थंभावभूतं गोत्वं निमित्तम्; गोत्वे तु न निमित्तान्तरमपेक्ष्यते, आनन्त्यव्यभिचाररूपानुपपत्त्यभावात् । एवं शुक्लादिशब्देष्वपि । ननु गौः शुक्लः इत्यादिविशेष्यपर्यन्तोक्तौ तथा स्यात्; क्वचिद्गुणमात्रविषयेषु शुक्लादिशब्देशु भावप्रधानेषु *द्येकयोरित्यादिषु त्वतलाद्यन्तेषु जातिर्गुणः क्रियेत्यादिषु च वाच्यानां तत्तद्धर्माणामिदंत्वेन निर्देशादित्थंभावसापेक्षत्वेऽनवस्था । अनपेक्षत्वे तु इदमित्थमिति हि सर्वा प्रतीतिरिति भाष्यादिविरोध इत्यत्राह—तन्निष्कर्षप्रयोगेष्वित्यादि । अयं भावः—उदाहृतेषु नियतानियतनिष्कर्षकशब्देषु जातिगुणादेः प्रधानतया निर्देशेऽपि सन्ति केचिद्यथाप्रमाणमित्थंभावाः । त्वयाऽपि हेतुसाध्यादि [दीनां] धर्माणां पक्षधर्मत्वादिधर्माः स्वीकार्याः । अनवस्था च कथञ्चिदुपशमनीया । स्वीकृतं च सम्वेदनसम्वेदने शब्दशब्दादौ स्वपरनिर्वाहकत्वम् । न चात्र कर्मकर्तृविरोधः; स्वोत्पादकत्वादाविव पौर्वापर्यादिवैगुण्याभावात् । किञ्च स्वलक्षणादीनां जात्यादीनां च सम्वृत्तिसिद्धानां निर्धर्मकत्वेऽपि कथञ्चिदभिलापार्हत्वं त्वयाऽपि ग्राह्यम्; अन्यथा तत्तसम्व्यवहारेण कथादिप्रवृत्त्ययोगात् । अतो निर्धर्मकं शब्दवाच्यं न भवतीति स्वसिद्धान्तविरोधः, स्ववचनव्याघातश्च । आस्तामेतत्; समानाधिकरणस्येव व्यधिकरणस्यापि व्यावर्तकत्वादित्थंभावत्वं सिध्यति । तथा च नियतनिष्कर्षकप्रयोगेष्वप्येतेषु धर्मो धर्मं विशिनष्टि, यथा पटस्य शौक्ल्यं खण्डस्य गोत्वमित्यादिषु । धर्मिविशेषो धर्मस्य स्वेतरनिष्ठाद्व्यावृत्तिधीहेतुरित्यर्थः । न चात्र मिथःसंश्रयः, विशेषणविशेष्यधियोस्तद्व्यवहारयोश्च मिथो जन्यत्वाभावात् । निष्कर्षानिष्कर्षव्यवहारयोश्च विवक्षाभेदायत्तत्त्वात्; उभयधा व्यवहारस्य सर्वत्र सर्वैरपि दुरपह्नवत्वात् । यश्चात्र समानाधिकरणप्रयोगे विशिष्टत्वेनावस्थितोऽप्यर्थतः स्वधर्ममन्यनिष्ठाद्व्यवच्छिनत्ति, स एव पटस्य शौक्ल्यमित्यादिप्रयोगे गुणीभवन् कण्ठोक्तेन स्वसम्बन्धेन विशिनष्टि । गोत्वं शौक्ल्यमित्यादिपदेष्वपि *तस्य भावस्त्वतलावित्यादिविहिततद्धिताश्रयवाच्यत्वेन धीस्थ एवार्थो निष्कृष्यमाणः स्वविशेषणनिरूपकतयाऽनुशिष्यते । एवं विशेष्यस्यैव द्विधा विशेषणयोग इति व्यञ्जनाय पुनःशब्दः; निष्कर्षप्रयोगेषु विशेषं वा द्योयति ।। ९ ।।

आनन्द० । इह वादिनां वहूनि कर्तव्यानि भवन्ति—स्वपक्षप्रदर्शनं तत्र साधनोपन्यासः साधनसमर्थनं प्रतिवाद्युद्भावितस्वपक्षदूषणोद्धारः परपक्षदूषणसमर्थनं इत्यादीनि । तत्र द्रव्याद्रव्यविभागेन स्वपक्षप्रदर्शनं कृतं । प्रत्यभिज्ञाश्लोके च प्रमाणोपन्यासः । तदनन्यथासिद्ध्युपपादनेन च—

क्षीणानि चक्षुरादीनि रूपादिष्वेव पञ्चमु ।
न षष्ठमिन्द्रियं तस्य ग्राहकं विद्यते बहिः ॥

नैकं रूपाद्यभेदो वा दृष्टं चेन्नेन्द्रियेण तत् ।
अक्षानेकत्ववैयर्थ्यं स्वार्थे भिन्नेऽपि शक्तिमत् ॥

अविद्यमानाभेदेऽपि तदक्षागोचरत्वतः ।
स्पृशतोऽप्यस्ति सा बुद्धिः द्रव्यं तत् स्पर्शनं यदि ॥

नायं घट इति ज्ञानं सर्वं (वर्णं) प्रत्यवभासनात् ।

इत्यादीनि बौद्धपठितदूषणान्युद्धृतानि भवन्ति । इदानीं तु प्रमेयदूषणोद्धारः क्रियते इति सङ्गतिं दर्शयन् द्रव्यनिराकरणवादिनः पूर्वं प्रधानतया प्रस्तुतत्वात् तद्द्रव्यबाधकयुक्तीनां पृथगुपन्यासः तत्समाधानं च राद्धान्तिना वक्तव्यं; न चात्र तत्क्रियते धर्ममात्र पर्यवसानाद्वक्ष्यमाणयुक्तीनां; धर्ममात्रदूषणं च तच्छून्य-श्लोकेस युक्तिकमुपपादयिष्यते । अतः कथमुत्तरश्लोकारम्भ इति शङ्काद्वयं पौनरुक्त्यं च परिहरन्नवतारयति—**एवमेकाश्रयेति** धर्मधर्मिभावोऽत्र निराक्रियते न धर्ममात्रं । उत्तरत्रवृत्तिविकल्पेन अत्र तु धर्मधर्मिभावभङ्गमुखेन इति न कृत्वा-करणं नापि पौनरुक्त्यमिति भावः । धर्मधर्मिभावस्योपयोगमाह—**अन्यथेति**—धर्मधर्मिभावाभावे 'अन्तस्तद्धर्मोपदेशात्, इत्यादेरयोगादिति भावः । बौद्धानां धर्मधर्मिभावखण्डनमपसिद्धान्त इति शङ्कते **नन्विति** । **हेतुर्धूमादिः** साध्यं वन्ह्यादिः स **एवधर्मः** तदाश्रयः पर्वतादिः पक्षः **धर्मकीर्तिः**—बौद्धविशेषः । **हेतुबिन्दौ**—हेतुबिन्द्वाख्यग्रन्थे । **पक्षधर्म** इत्यादि—**पक्षधर्मः** साध्याश्रयस्य पक्षस्य पर्वतादेः धर्मः । तन्निष्ठो धूमादिरिति यावत् **तदंशेन**—पक्षांशेन तस्य पक्षस्य अंशेन—विशेषणेन साध्येन व्याप्तः । त्रिविधेन कार्यस्वभावानुपलब्धिभेदेन । **अविनाभावस्य नियमात्**—विद्यमानत्वादित्यर्थः । **ग्राह्यधर्म** इत्यादि—ग्राह्यस्य इन्द्रियग्राह्यस्य पक्षस्य धर्मस्तदंशेन साध्येन व्याप्तो हेतुः इति न्यायकौमुदीकारा-दय आहुरित्यर्थः । नात्रार्थतथात्वलक्षणं प्रामाण्यमङ्गीक्रियते; तस्य निर्विकल्प-कमात्रपर्यवसायित्वात् अपितु अविसम्वादित्वलक्षणं'तच्च धर्मधर्मिभावकल्पनयाऽप्यु-पपद्यते इति परिहरति **सत्यमिति**—अस्मिन् श्लोके न वैभाषिक एव पूर्वपक्षी; अपि तु चत्वारोऽपीत्याह—**चतुर्विधानामिति** । नन्वयं विकल्पो विषयसिद्ध्य-सिद्धपराहत इत्याह—**अयमर्थं इति—त्वयेति** । परसिद्धेन परो बोधनीय इति न्यायान्न व्याघात इति भावः । **आद्ये इति** । वाच्यत्वाभावाद्भवन्मतानुरोधेन

तुच्छत्वं स्यादिति भावः। शब्दगोचरत्वाभावे हेतुः **अविशिष्टस्येति**। अविशिष्टेऽपि व्युत्पत्तिरस्त्वित्यत्राह **सर्वधीशब्दानामिति**। अविशिष्टस्य सकलप्रमाणबाह्यतया धीगोचरत्वाभावेन, व्युत्पत्तिविषयत्वाभावान्न शब्दमात्रविषयत्वमित्यर्थः। यावद्दर्शनं व्यवस्था भविष्यतीत्याशङ्क्य दर्शनमसिद्धमित्याह—**द्वित्रादीति**। ततश्च—

अस्मानुपालभ्य पुनः कुर्वंतो धर्मविप्लवम्।
तव वाक्यमिदं हास्यं श्वश्रू निर्गच्छ वाक्यवत्॥

इति न्यायस्स्यादिति भावः। प्रकारान्तरेणानवस्थां प्रतिपादयति—**धर्मत्वं चेति**। धर्माणां भावो धर्मान्तरं न तु स्वरूपमित्यर्थः। ततः किमित्यत्राह—**अत इति**। **धर्मत्वं वाच्यमिति**—तत्रापि धर्मत्वे धर्मत्वं नाम धर्मान्तरं वाच्यमित्यर्थः। ननु सकलधर्मवर्तिधर्मत्वं स्वात्मैव; अन्यथा सकलधर्मवृत्तित्वव्याघातादित्यत्राह—**न चेति**। स्वनिष्ठत्वाभावे सकलधर्मवृत्तित्वव्याघातवत् स्वस्य स्ववृत्तित्वेऽपि व्याघातस्स्यादित्यर्थः। **अनवस्थानादेवेति**—स्वीकृतस्वीक्रियमाणधर्मवर्तिधर्मस्वीकारेऽनवस्था स्यादिति;

धर्मं समर्थयन् मूर्खः तेन धर्मेण बाध्यते।
कवाटविवरे पुच्छं प्रेरयेन् जम्बुको यथा॥

इति न्यायस्स्यादिति भावः। सिद्धान्ती परिहरति—**तन्नेति**। **सर्वेषामिति** जातिगुणक्रियादिवृत्तीनामेव निर्धर्मकत्वस्वीकारादिति भावः। तेषां च शब्दबोध्यत्वादिकमुपपादयिष्यते। **स्फुटदृष्टमिति**—

धर्मत्वेन प्रतीयन्ते स्पष्टं जातिगुणक्रियाः।
तत्तल्लक्षणयोगेन परस्परविलक्षणाः॥

इति प्रतीतत्वादित्यर्थः। अपसिद्धान्तमेव द्रढयति—**त्वयाऽपीति**। **अन्यथेति**—पक्षधर्मत्वादीनां कल्पितत्वेऽनुमानस्याभासत्वात् क्षणभङ्गादिसाधनमपि न स्यादित्यर्थः। **अत्यन्तचर्चायामिति**। अयं भावः—धर्मधर्मिभावमपलपतः को भावः? किमनुभव एव नास्तीति; उत सत्यपि तस्मिन् अनवस्थादुस्स्थतया न सद्विषयत्वमिति। नाद्यः; वाङ्मात्रेण प्रतीतिमात्रापह्नवप्रसङ्गात्। न द्वितीयः; स्वपरनिर्वाहकत्वेऽनवस्थाया एवाभावात् इति। तर्हि प्रथमत एव स्वपरनिर्वाहोऽस्तु किं धर्ममात्रेणापीति शङ्कां परिहर्तुं 'स्फुटमतिमथने' इत्येकनिर्वाहप्रमाणपरतया योजयति—**यद्वेति**। स्फुटा चासौ मतिश्चेति स्फुटमतिः। मतिरेव वस्तुसद्भावे भवति शरणं। स्वान्यनिर्वाहकतया केषाञ्चिदेव धर्माणां प्रतीतिरित्यनुभवानुसारात् क्वचिद्धर्मान्तरेण सधर्मकत्वं नापह्नोतुं शक्यमिति भावः। सदृष्टान्तमुपपादयति—**यत्र हीति**। नन्वेवं धर्मे धर्मान्तरनियमाभावे यस्य धर्मत्वादेर्न धर्मान्तरं तस्य व्युत्पत्त्याद्यभावे शब्दवाच्यत्वादिकं न स्यादिति चेन्न; तत्र धर्मान्तराभावेऽपि

स्वस्यैव स्ववृत्तितया प्रमेयत्वादिवद्विशिष्टबुद्धचादिविषयत्वेन वाच्यत्वादिसंभवात्। नच सिद्धान्ते गोत्वस्य संस्थानरूपतया आनन्त्यव्यभिचाराद्यनुपपत्तिः; तथाऽपि सौसादृश्यरूपस्यैकस्य सम्भवादिति भावः। **एवं शुक्लादिशब्देष्वपीति**—ननु शुक्लादीनामनेकत्वान्न गोत्वादिन्याय इति चेन्न; शुक्लत्वस्यैकस्योपाधेर्वक्तुं शक्यत्वात्। ननु यदि केषां चिद्धर्माणां स्वेनैव विशेषः तथात्वेऽपि गौरित्यादिजाति-शब्देषु धर्मिपर्यन्तेषु शुक्लादिशब्देषु व्यक्तेर्जातिर्गुणश्च जातेर्व्यक्त्यादिश्च वैशिष्ट्य-प्रतियोगित्वादिना भासतां। यत्र गुणमात्रविषयकश्शुक्लशब्दः यत्र वा भावप्रधान-निर्देशो द्व्यचकयोरित्यादिषु बहुवचनप्रसङ्गेन द्वित्वैकत्वपरेषु त्वतलाद्यन्तेषु गोत्व-गोतादिशब्देषु जातिरित्यादिशब्देषु च प्रधानतया गुणादीनां निर्देशः तत्र किञ्चि-द्धर्मवत्त्वाभावे प्राधान्यायोगात्तदन्यत्वेऽनवस्थाप्रसङ्गात्तदभावे एकस्य विशेषण-विशेष्यतया प्रतीत्ययोगादपसिद्धान्तः। प्रमेयत्वादिकं च पक्षसममिति तत्र धर्मा भावेऽपि गत्यन्तराङ्गीकारे सर्वत्र तथाऽस्त्विति शङ्कते—**नन्विति**—ननु धर्माणां धर्मान्तराङ्गीकारे अनवस्था; स्वस्यैव स्वनिष्ठत्वे आत्माश्रयः; धर्मिणश्च धर्मापेक्षया धर्मत्वेऽन्योन्याश्रयः; परस्परव्यावर्तकत्वे कर्मकर्तृविरोध इति तन्निष्कर्षकप्रयोगे धर्मी विशेष इत्यनुपपन्नमित्यत्राह—**अयं भाव इति**। कल्पितधर्ममादाय सधर्मक-त्वप्रतीत्युपपादनेऽपीदृशदोषाःस्युरिति त्वयापि कथंचित्परिहार्या इत्याह—**त्वया-पोति**। स्वपरनिर्वाहकत्वं त्वयापि क्वचित्स्वीकार्यमित्याह—**स्वीकृतं चेति**। संवेदनसंवेदनं—ज्ञानमात्रविषयकं ज्ञानं। आदिशब्देन सर्वमित्यादिशब्द उक्तः। देवदत्त आत्मानं पश्यतीत्यादौ कर्मकर्तृभावदर्शनान्न विरोध इत्याह—**न चात्रेति**। ननु तर्हि स्वस्य स्वजनकत्वमपि स्यादित्यत्राह—**स्वोत्पादकत्वादाविति**। तत्र हि सत्त्वासत्त्वयोर्विरोध इति भावः। ननु धर्मे स्वपरनिर्वाहकत्वमसिद्धमित्यत्राह—**किं चेति**। ननु कल्पितधर्ममादाय धर्मे व्यवहार इत्यत्राह—**जात्यादीनामिति**। तत्रापि धर्मकल्पनेन व्यवहारेऽनवस्था स्यादिति भावः। **अतो निर्धर्मकमिति**। कल्पितधर्ममादाय शब्दवाच्यत्वे शुक्त्यादेरपि रजतादिशब्दवाच्यत्वप्रसङ्गे लोक-व्यवहारविरोधाद्व्यवस्था न स्यादिति स्वरूपेणापि वाच्यत्वं स्वलक्षणं वाच्यमिति सिद्धान्तविरोधोऽपीति भावः। **स्ववचनेति**। निर्धर्मकं शब्दवाच्यं न भवतीति निर्धर्मकशब्दवाच्यत्वेन तदवाच्यत्वप्रतिपादनात् स्ववचनव्याघात इत्यर्थः। ननु प्रतिबन्दीमात्रमनुत्तरमित्यत्राह—**आस्तामिति**। **व्यावर्तकत्वादिति**। राज्ञः पुरुष इत्यादौ व्यावर्तकत्वादित्यर्थः। ननु परस्परव्यावृत्तबुद्धिविषयत्वेऽन्योन्याश्रयः इत्याह—**नचेति**। परस्परविशिष्टबुद्धिर्व्यावृत्तिधीहेतुः। नचात्रान्योन्याश्रयः परस्परव्यावृत्तिबुद्धेः परस्परहेतुत्वाभावात्। तद्विशिष्टबुद्धिश्चेन्द्रियसंप्रयोगाद्विशिष्ट-शब्दादिप्रमाणाद्वा भवति। तत्र शब्देन कदाचित्किञ्चिद्विशेष्यतया भासते। तथानियमस्य विवक्षा नियामिका। उभयथाऽपि प्रतीतौ परस्परव्यावर्तकत्वाविशेषे कथं विशेषणविशेष्यभावभेद इत्यत्राह—**यश्चेति**। नन्वेवं सति गोत्वं शाबलय-

मित्यादौ तद्धिताश्रयप्रकृतिगवादिशब्दैः धर्म्येव धर्मविशेषितः प्रतीयत इति गुणीभवन् कण्ठोक्तेन सम्बन्धेन प्रतीयत इत्यनुपपन्नमित्यत आह–गोत्वं शौक्ल्यमित्यादीति। प्रकृत्या विशिष्टार्थोपस्थितावपि तद्धितार्थधर्मान्वयबोधसमये गौर्नित्येत्यादाविव धर्मं विहाय स्वरूपमन्वेतीति न दोष इति भावः। ननु जातिर्गुणः क्रियेत्यत्र न धर्म्युपस्थापकं प्रमाणमस्ति। अनुपस्थितानां च न व्यावर्तकत्वं। न च जात्यादिकमेव तदुपस्थापकं; अनुपस्थापितस्य तस्य तदुपस्थापकत्वायोगात्। उपस्थापनस्य व्यापकधर्म्युपस्थापनाधीनत्वादिति चेत्तत्राह—निष्कर्षप्रयोगेष्विति। तत्तच्छब्द एव सहानुभवसामर्थ्यात् स्मारयति, स्मृतानां व्यावर्तकत्वं चेति न विरोध इति भावः॥ ९॥

अक्ष०। पुनरपि धर्मधर्मिभावभङ्गमुखेन द्रव्याद्रव्यान्यतरनिह्नवप्रवृत्तयोर्वादमनूद्य प्रतिक्षिपति— धर्मइति यस्त्वया कश्चिद्धर्म इष्यते स इत्यर्थः। तेन स्वमते धर्मस्याभावेपि न व्याघातः। निर्धर्मकश्चेदिति। कस्यचिद्धर्मस्य अनाश्रयश्चेदित्यर्थः। ततः किमित्यत्राह–कथमिवेति। सः शब्दवाच्यः कथं वा भविता–नैव भवेदित्यर्थः, त्वदीयैरविशिष्टस्य व्युत्पत्त्यादिगोचरत्वानभ्युपगमादिति भावः। तस्यापि धर्मस्य धर्मान्तराभ्युपगमे त्वाह–धर्मेणेति। तादृशधर्मान्तरस्यापि शब्दवाच्यत्वसम्भवाय धर्मान्तरमभ्युपगन्तव्यमितिरीत्या अनवस्थापत्तिरित्याह – सच भवतीति। स च-अन्यो धर्मश्चेत्यर्थः। तथेति धर्मान्तरयुक्तश्चेदित्यर्थः। अव्यवस्थेति अनवस्थेत्यर्थः। द्वित्रादिधर्ममात्रे विश्रमे नियामकाभावादिति भावः। इति चेदित्याशङ्कामनूद्य परिहरति–नेति। सर्वे धर्माः सधर्मका इति वा। सर्वे निर्धर्मका इति वा न ब्रूमः येनानवस्थादयो दोषाः प्रादुष्युः–किन्तु अनुभवानुरोधात् केचिद्धर्माः सधर्मकाः अन्ये निर्धर्मका एव प्रतीतिव्यवहारविषया इत्युपैम इत्याह–कश्चिद्धर्म इति। धर्मीति— धर्मान्तरवानित्यर्थः। किमत्र मानमित्यत्राह—स्फुटमतिमथन इति।

स्फुटमिति–सम्प्रतिपन्नमिति भावः। (ऐकपद्ये) विशदबुद्ध्या सावधानं विमर्शे सतीत्यर्थः। अनुभवएव प्रमाणमित्युक्तं भवति। भवद्भिरपि क्षणिकत्वानुमाने साध्यहेतुधर्माणां–पक्षवृत्तित्वादिधर्मोऽभ्युपगन्तव्य एवेति भावः। एवं यत्र अनुभवानुरोधेन अनवस्थाभयाद्धर्मान्तरं नेष्यते तत्र निमित्तान्तरनिरपेक्षौ तद्बुद्धिव्यवहारौ इत्याह–स्वान्य निर्वाहकत्वमिति। स्वपरधीव्यवहार व्यवस्थापकत्वमित्यर्थः। गोत्वादेः यथा गवादिव्यक्तौ गोशब्दादि प्रवृत्ति प्रति निमित्तत्वं तथा स्वस्मिन्नपि–गोशब्दादिप्रवृत्ति प्रति निमित्तत्वं; निमित्तान्तरापेक्षा नास्तीति यावत्। गोत्वादिजातेः–व्यक्तिवदानन्त्याभावेन एकत्वात् तामन्तरेण क्वचिदपि गोशब्दादिप्रवृत्तेरभावात् व्यभिचाराप्रसक्त्या स्वविषये गोशब्दादिप्रवृत्तावपि निमित्तत्वोपगमे न कश्चिद्दोष इति भावः।

ननु "गौश्शुक्लः" इत्यादि धर्मिपर्यन्तोक्तौ तथोपपत्तावपि रूपादिमात्रपर शुक्लादिपदोक्तौ "गोत्वं" "शुक्लत्वं" "एकत्वं" "द्वित्व" मित्यादि भावप्रधानोक्तौ च अनवस्थाभयात् प्रकारीभूतगोत्वाद्यतिरिक्तधर्मानङ्गीकारे 'इदमित्थमिति-हि सर्वाप्रतीति" रिति भाष्यविरोधस्स्यादित्यत्राह-तन्निष्कर्षप्रयोगेष्विति। धर्मप्रधा-नकशब्द प्रयोगेष्वित्यर्थः।

स च शब्दः-अनियतनिष्कर्षकः नियत निष्कर्षकश्चेति द्विविधः। तत्र आद्यश्शुक्लादिशब्दः-कदाचिद्रूपमात्रे, कदाचित्तद्विशिष्टे च प्रयोगात्। द्वितीयस्तु शुक्लत्वादिशब्दः- धर्ममात्रे प्रयोगात्। उभयत्रापि अनुभवानुरोधेन धर्मान्तर भानोपगमेऽपि नानवस्थास्स्युः। अनुभवविरहे तदनापत्तेः, स्वपरनिर्वाहकसमाधेश्च 'संवेदनसंवेदन शब्दशब्दादौ' सम्प्रतिपन्नतया तद्वत् धर्मान्तिरभानानुपगमेऽपि न व्यावृत्यसिद्धिः इत्थंभावतानियमस्य व्यधिकरणस्यापि धर्माणां विशेषणतया भानोपगमेष्वपि संपद्यत इत्याह-भवतीति तस्य शौक्ल्यादिधर्मस्य धर्मी घटादिः। विशेषः—स्वेतरनिष्ठाद्व्यावृत्तिधीहेतुरित्यर्थः। "घटस्य शौक्ल्य" मित्यादौ घटादिः स्वगतशौक्ल्यंपटादिशौक्ल्याच्च व्यावर्तयतीति भावः। अत्र धर्मीति कालादेरप्युपलक्षणम्।

तच्छून्ये तस्य वृत्तिः कथमिव घटते तद्विशिष्टे तु वृत्तौ
स्वाधारत्वप्रसङ्गस्तत इह न गुणो नापि धर्मीत्ययुक्तम्।
तद्वृत्तिर्धर्ममात्रे न भवति तत एवास्य तच्छून्यताऽतो
नोक्तौ दोषौ स्वधीवाग्विहृतिरितरथा तद्वदन्येऽपि जल्पाः॥ १०॥

सर्वा०। पुनरपि धर्मस्य धर्मिणि वृत्तिं विकल्प्य तदुभयमपह्नुवानं प्रत्याह—तच्छून्य इति॥ योऽयं रूपादिः द्रव्यस्य गुणतयेष्टस्स किं स्वशून्ये वर्तते स्वविशिष्टे वा? नाद्यः; व्याघातात्। अन्यथा सर्वेषां सर्वत्र वृत्तिः किं न स्यात्? खपुष्पादीनामपि कथं निषेधः? योग्यानुपलब्ध्येति चेन्न; तदुपलब्ध्यनुपलब्ध्योरपि विरोधाभावात्। किञ्चानुपलब्धिरभावोपस्थापनेन भावं विरुन्ध्यात्; तदा कथं तच्छून्ये तस्य वृत्तिः? न द्वितीयः, आत्माश्रयापातात्। शिष्टं विशेषणविशेष्यतत्स-म्बन्धातिरिक्तं न किञ्चित्, तस्मिन् प्रमाणाभावात्। न चोक्तेषु त्रिष्वन्यतममात्रम्, तावति विशिष्टधीव्यवहारयोरभावात्। अतः सम्बन्ध्युभयं विशिष्टशब्दार्थ इति स्यात्। तथा च स्वविशिष्टे वर्तमानो गुणस्स्वविशेष्यमिव स्वात्मानपि स्वा-धारीकुर्यात्। किमत्रानिष्टम्? स्वस्य स्वस्मादन्यत्वम्; अभेदे कथमाधाराधेय-भावः? प्रतिसम्बन्धिभेदाभावात्। न चात्र भिन्नाभिन्नत्वं दृष्टं युष्मदिष्टं वा। एवं वृत्त्यनुपपत्त्या वा गुणगुणिनोरन्यतरपरिशेषः स्यात्, उभयपरित्यागो वेति परोक्तमयुक्तम्। कथमित्यत्राह—तद्वृत्तिर्धर्मिमात्र इति। न वयं तच्छून्ये तद्वि-शिष्टे वा तस्य वृत्तिं ब्रूमः। अपि तु वस्तुतस्तद्विशिष्टे विशेष्ये तद्विशिष्ट-

वृत्त्यभावे तच्छून्ये वृत्तिस्स्यादेवेति चेत्तत्राह—**न भवति तत एवास्य तच्छून्यतेति।** यत्र यद्वर्तते तस्य कथं तच्छून्यत्वम्? न च तद्वति वर्तमानस्य तस्मिन्नपि वृत्तिरिति नियमः। घटवति भूतले वर्तमानानां गुणादीनां घटेऽपि वृत्तेरदृष्टेः। एवं घटस्यापि। ननु सर्वत्र वृत्तिविकल्पेन विशिष्टं दूषयतः किं नि[दर्श]दानम्? किं क्वचिदपि विशिष्टप्रतीतिरेव नास्ति, सत्यपि वा निष्कारिणिका सकारणाऽपि वा दुर्निरूपितकारणा, निरूपितकारणाऽपि वा निर्विषया, सविषयाऽपि वा बाधितविषयेति। नाद्यः, लौकिकपरीक्षकबहिष्कारप्रसङ्गात्। सर्वशून्यवादिनाऽपि हि सम्वृत्या विशिष्टिधीरिष्यते। न द्वितीयः, कार्यस्य कारणावश्यम्भावात्, तदनभ्युपगमे तु लोकायतावतारात्। इष्यते चाविद्यावासनादिभ्रान्तेरपि निदानं भवद्भिः। अत एव न तृतीयः। नापि चतुर्थः, स्वपरलोकव्यवहारविरोधादेव। कथं किलासौ विशिष्टप्रतीतिः? कथं च निर्विषया? न पञ्चमः, अद्यापि बाधस्याशामोदकायमानत्वात्। विकल्पप्रामाण्यं च वक्ष्यते। अतो यथादर्शनं क्वचित्किंचिद्वर्तते न स्वस्मिन्निति व्यवस्थिते त्वदुक्तौ व्याघातात्माश्रयदोषौ न स्त इत्याह—**अतो नोक्तौ दोषाविति।** अन्यथाऽनिष्टमाह—**स्वधीवाग्विहतिरितरथेति।** स्वधीविहतिः स्ववाग्विहतिः स्वधीवाग्विहतिरिति प्रत्येकसमुदायपरं योज्यम्। कथं तवापि विशिष्टधीविरहे तद्विषयव्याहारव्यवहारावुदाहरणोपनयौ च वस्तुतस्तद्धर्मविशिष्टविषयौ? बुद्धिस्स्वप्रकाशा अभिन्नदेशकालं स्वलक्षणम् कल्पनापोढमभ्रान्तं प्रत्यक्षम् प्रतिवादिवाक्यमसाधकम् विशिष्टं नास्तीत्यपि विशिष्टमात्थ; तच्च विशिष्टविषयस्वधीविरुद्धमिति। ननु सन्त्यन्येऽपि धर्मधर्मिभावभञ्जकाः परेषां प्रसङ्गाः ते कथमुद्धार्या इत्यत्राह—**तद्वदन्येऽपि जल्पा इति।** अन्येऽपि नित्यसमाधिरूपाः शुष्कप्रलापास्तद्वन्निरस्तवाक्यैस्तुल्यं वर्तन्ते। उत्थानपरिहारप्रकारभेदेऽपि स्वव्याघातादिदोषाविशेषादित्यर्थः।

घटकुड्यवदन्यत्वेऽनन्यत्वे तु स्वरूपवत्।
न गुणस्य गुणत्वं स्यादित्यसत्स्वोक्तिबाधतः॥

दूष्यादन्यदनन्यद्वा दूषणं न तु दूषणम्।
गर्दभादिवदन्यत्वेऽनन्यत्वे दूषणीयवत्॥

एवं सम्बद्धत्वासम्बद्धत्वसमानकालत्वासमानकालत्वयुगपद्ग्राह्यत्वायुगपद्ग्राह्यत्वादिविकल्पस्यबाधास्तदुद्धाराश्च विशुद्धबुद्धिभिरवधातव्याः, दूष्येणापि सम्बन्धादिविकल्पदोषसाम्यादिति॥ १०॥ **इति धर्मधर्मिभावः॥**

आनन्द० ननु पूर्वमेव धर्मधर्मिभावानुपपत्तिमाशङ्क्य समाहितत्वात् पुनस्तत्कथनमयुक्तं इत्याशङ्क्य निरसनीयशङ्काभेदान्न पौनरुक्त्यमित्याह—**पुनरपीति।** एकस्मिन् काले स्वात्यन्ताभावसामाधिकरण्यं निरुद्धमित्याह—**व्याघातादिति।** विरोधादित्यर्थः। अन्यथा—विरोधाभावे। ननु सर्वत्र सर्वं स्यादित्ययुक्तं रूपरसयो-

विरोधाभावमात्रेण तेजसि न रसप्रसक्तिः अपि तु तत्सत्ताग्राहकप्रमाणसत्त्वे; सर्वत्र तदनुपलब्धेर्न प्रसक्तिरित्यत्राह–**खपुष्पादीनामिति**। निषेधः–निस्स्वभावत्वनियमः। ननु तत्राप्यनुपलब्ध्या निश्चयोऽस्त्विति शङ्कते–**योग्यानुपलब्धेरिति**। अनुपलब्धिर्न तावत्स्वरूपाभावविषया; अपितूपलब्ध्यभावरूपतया उपलम्भरूपप्रमाणाभावे प्रमेयाभाव इति व्याप्त्या वा प्रत्यक्षसहकारेण वा। उभयथाऽपि नानुपलब्धिमात्रमभावनिश्चयहेतुः घटवति घटानुपलब्धिमतिव्यभिचारात्। किञ्च तयाऽभावनिश्चयोऽस्तु तावतापि रूपज्ञानं रसवत्त्वमिव कथं भावं निरुन्ध्यात् विरोधाभावात् इत्याह–**न तदुपलब्ध्यनुपलब्धियोरिति**। ननु अनुपलब्धिरभावमुपस्थाप्य सत्त्वविरोधी न भविष्यतीत्यत्राह—**किञ्चेति**। तथा सति भावस्याभावविरोधित्वात्स्वशून्ये स्वस्य वृत्तिर्न स्यादित्यर्थः। ननु स्वस्य स्ववृत्तित्वे आत्माश्रय इत्यसङ्गतं उत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभावादित्याशङ्क्य आधाराधेयभावे भेदस्स्यात् तस्य भेदाधीनत्वादिति परिहरति—**किमत्रेत्यादिना**। ननु प्रमेयत्वे प्रमेयत्वमित्यादावभेदेऽपि दर्शनात्तथाऽत्राप्यस्त्वित्यत्राह—**अभेद इति**॥

कथं स्ववृत्तिरिष्टा चेद्यथाऽन्यत्रेति गम्यताम्।
प्रमाणं कारणं वृत्तौ न भिन्नाभिन्नते यतः॥

इति न्यायेन प्रमाणसद्भावात्तथाऽङ्गीकारः; इह तु न तथा; प्रमाणाभावादिति भावः। नन्वेकस्यैव घटस्य भूतलाधेयत्वं रूपाधारत्वं च दृष्टमित्यत्राह–**प्रतिसम्बन्धीति**। यस्य यदपेक्षया आधारत्वं तस्य तदपेक्षया भेद इति भावः। ननु एकस्य गुणगुणिस्वरूपस्य कौमारिलैराधाराधेयभावोऽङ्गीकृत इत्यत्राह—**न चात्रेति**। तन्मतं प्रामाणविरुद्धमिति भावः। अपसिद्धान्तश्चेत्याह–**युष्मदिष्टमिति**। **वृत्त्यनुपपत्त्या** वेति वाकारः पूर्वश्लोकोक्ततर्कापेक्षया। **अन्यतरपरिशेषस्स्यादिति** वैभाषिकसौत्रान्तिकमतोपसंहारः। **वस्तुतस्तद्विशिष्टे**—तदाधारे इत्यर्थः **यत्र यद्वर्तत इति**–ततश्च तदाश्रयस्य तच्छून्यत्वं स्वविशिष्टत्वमिति वा विरुद्धं। ततश्च—

तर्तुकामो यथा गर्तं वेदादुत्प्लुत्य मूढधीः।
अन्धः कूपे पतेत्तद्वद् बद्धो व्याप्तिसमर्थनात्॥

इति न्यायानुसरणमिति भावः। किञ्च यत्र रूपं न तत्र रूपाभावः यत्र रूपाभावः तत्र न रूपमिति व्याप्तिं वदता रूपस्य वृत्तिरभ्युपगतेति। ततश्च—

अस्मदुक्तं भवान्वक्ति नान्यत्किञ्चन भाषते।
पिशाच इव कूटस्थः तस्मात्त्वत्तो बिभेम्यहम्॥

पिशाचन्याय इति भावः। ननु घटवति भूतले इत्यादेर्दृष्टान्तस्यापि पक्षतुल्यत्वात्तदुदाहरणमसङ्गतमिति शङ्कते—**नन्विति**। **निदर्शनं** दृष्टान्तः। क्वचित् किं निदानमिति पाठः। तदा नन्वित्यारभ्य सिद्धान्तिवाक्यं। नन्विति

प्रश्नपरं। उत्तरमाह—**किमित्यादि**। प्रतीत्या ह्यर्थक्लृप्तिर्द्वेधा—कार्यत्वेन कारणतया, विषयत्वेन विषयितया वा; उभयथाऽपि न सम्भवतीति प्रथमः कल्पः। कार्यत्वेन कारणतयाऽर्थकल्पनं च सम्भवतीति द्वितीयतृतीयौ। विषयविषयितया कल्पनं न सम्भवतीति चतुर्थपञ्चमाविति विवेकः। **सम्वृतिर्दोषः** तदधीनकल्पित-विषया विशिष्टधीरित्यर्थः। **लोकायतेति**—चार्वाकमते कार्यकारणभावाभावादिति भावः। नचेष्टापत्तिः अपसिद्धान्तप्रसङ्गापत्तेरित्याह—**इष्यते चेति**। **अविद्या**—दोषः। **वासना** पूर्वपूर्वसंस्कारः। आदिशब्देनालम्बनसमनन्तरसहकार्यधिपति-प्रत्ययादयः। अत एवेति—तत्कारणतयैव निरूपणसम्भवादित्यर्थः। **स्वपरेति**—लोको द्विविधः—स्वः परश्चेति। तद्व्यवहारविरोधादित्यर्थः **कथं चेति** विशिष्ट-विषया प्रतीतिर्विशिष्टप्रतीतिः। तथा च विशिष्टप्रतीतिर्निर्विषयेति स्ववचन-व्याघात इत्यर्थः। —**अद्यापीति**—व्याघातात्माश्रययोर्बाधकयोरद्याप्यलब्धजीवित-त्वादित्यर्थः। ननु सर्वविकल्पानां वासनानिर्मिततया प्रकारद्वयेनापि विषयव्यवस्था-पकत्वमनुपपन्नमित्यत आह—**विकल्पेति**—बुद्धिसर इति शेषः। **स्वधीवाग्विहति-रिति**—धीश्चवाक्चेतीतरेतरयोगे द्वन्द्वसमासः।

नातो द्वन्द्वाच्चुदषहान्तात्समाहार इति समासान्तः। स्वधिया विहतिं दर्शयति—**कथमिति**। **तद्विषयेति**। **उक्तिः** व्याहारः। **व्यवहारः**—प्रवृत्त्यादिः। तयोर्विशि-ष्टधीसाध्यत्वादित्यर्थः। स्ववाग्विरोधमाह—**उदाहरणेति**। उदाहरणं दृष्टान्त-वाक्यं। **उपनयः**—संश्च शब्दादिरिति वाक्यं। स्वधीवाग्विरोधं दर्शयति—**विशिष्टं नास्तीत्यपीति**। स्वधीवाग्विहतिमुपपादयति—**तच्चेति**। अनेन वाक्येन विशिष्टाभावविषयिणी विशिष्टबुद्धिर्जायमाना विशिष्टसाधिकेति। तया वाचा धियो विरोध इति भावः। **नित्यसमादिरूपेति**—क्वचित्साहचर्यदर्शनमात्रेण व्यापकापादनं नित्यसमः। आदिशब्देनोत्कर्षसमादयो गृह्यन्ते। मतुबन्तता भ्रान्तिं वारययि—**निरस्तवाक्यैरिति**। ननु कथं तुल्यत्वं ? उत्थानस्य परिहारस्य च भिन्नत्वादित्यत्राह—**उत्थानेति**। व्याघातांशमादाय तुल्यत्वमित्यर्थः। अन्येऽपि जल्पा इत्युक्तांशं दर्शयति—**घटकुड्यवदिति**। धर्मधर्मिणोर्भेदोऽभेदो वा ? आद्ये घटकुड्यवद्धर्मधर्मिभावो न स्यात्। द्वितीये स्वरूपवद्धर्मधर्मिभावो न स्यादित्यर्थः। —**स्वोक्तिबाधत इति**—सिद्ध्यसिद्धिरूपव्याघातादित्यन्ये। अनुमानेन धर्मधर्मिभावखण्डने अनुमानस्य धर्मधर्मिप्रतिपादकोदाहरणोपयरूपस्वोक्तिवि-रोधादित्यर्थं इत्यपरे। जातिरूपतया स्वव्याघातकत्वादित्यप्याहुः। दूषणस्य स्वव्यापकत्वमेव दर्शयति—**दूष्यादन्यदिथि**—दूषणं दूष्यादन्यन्न वा ? उभयथाऽपि दूष्यादन्यगर्दभवत् तस्मादनन्यदूष्यवद्वा दूषणं न स्यादित्यर्थः। **एवमिति**—धर्मिणा रूपादिकं सम्बद्धमसम्बद्धं वा ? सम्बद्धत्वे संयुक्तघटपटयोरिव धर्मधर्मिभावो न स्यात्। एवं धर्मिणा धर्मस्समानकालोऽसमानकालो वा ? उभयथाऽपि समान-कालीनासमानकालीनघटपटयोरिव गुणगुणिभावो न स्यादित्यर्थः। एवं धर्मिणा

धर्मो युगपद्ग्राह्यो न वा? उभयथाऽपि तादृशघटपटवदगुणत्वप्रसङ्ग इति प्रसङ्गो बोध्यः। एवं प्रमेयप्रमेयं वा? जन्यमजन्यं वा? घटस्तदन्यो वा उभयथाऽपि न गुण इति प्रसङ्गाः आदिशब्देन विवक्षिताः तदुद्धारक्रममाह—**दूष्येणापीति**। दूषणं दूष्येण सम्बद्धमसम्बद्धं वा? समानकालमसमानकालं वा? युगपद्ग्राह्यमयुगपद्ग्राह्यं वा उभयथाऽपि तादृशदूष्यरासभावादिवन्न दूषणमित्यादिप्रसङ्गादिति भावः। केचित्तु सम्बद्धत्वेत्याद्येवं व्याचख्युः—विशेषणस्य विशेष्येण सह सम्बद्धत्वे सोऽपि सम्बन्धस्सम्बद्धो नवा? आद्ये अनवस्था। द्वितीये—

षण्णामपि पदार्थानामसंघातः प्रसज्यते।

इति न्यायेन असंहतरूपता स्यात्। विशेषणस्य विशेष्येण समानकालीनत्वे सामग्र्यैक्यात्कार्यैक्यप्रसङ्गः। प्रागभावभेदस्य प्रतियोगिभेदाधीनतया तदसिद्धावसिद्धेः। भिन्नकालत्वे तु विशेषणस्य पूर्वत्वे निराधारकार्योत्पत्तिप्रसङ्गः। विशेष्यपूर्वकत्वे तु गुणाश्रयो द्रव्यमिति द्रव्यलक्षणव्याघातः। न च गुणात्यन्ताभावानकिकरणत्वेन निर्वाहः अत्यन्ताभावानधिकरणत्वं नाम अत्यन्ताभावा भावाधिकरणत्वं: तथा च अभावाभावस्य भावात्मकत्वात् गुणाधिकरणत्वमित्यर्थस्स्यात्। तथाचोक्तदोषानतिक्रान्तिः। गुणात्यन्ताभावस्यैकत्वे तत्रैवातिव्याप्तिः। अनेकत्वेऽनवस्थेत्यदिकमूह्यमिति ॥ १० ॥

अक्ष०। पुनरपि वृत्यनुपपत्या धर्मधर्म्यन्यतरपरिशेषमाशंकते **तच्छून्ये इति**। **तच्छून्ये** तद्धर्मशून्ये। **तस्य** तद्धर्मस्य। **वृत्तिः** वृत्तित्वं। **कथमिव घटते**—तच्छून्यत्व तद्वत्वयोरेकत्र विरोधात् न कथञ्चिदपि घटेतेतिभावः।

तद्विशिष्टे तु—तद्धर्मविशिष्टे तु। **वृत्तौ** तद्धर्मस्य वृत्तित्वे। **स्वाधारत्वप्रसङ्ग इति**—विशिष्टं नाम न विशेष्यमात्रं विशेष्यमात्रे विशिष्टव्यवहाराभावात् किन्तु परस्परसम्बन्धिविशेष्यविशेषणोभयं अतः स्वविशिष्टे वर्तत इत्युक्ते विशेषणे स्वस्मिन्नपि वर्तत इत्यर्थलाभादात्माश्रयतापत्तिरित्यर्थः। आधाराधेयभावस्य भेदव्यापित्वात् स्वस्मिन्नपि स्वान्यत्वं दुर्घटमापद्यत इति भावः।

ततः उक्तरीत्या वृत्त्यनुपपत्या। इह रूपघटाद्योः रूपादिर्नगुणः घटादिर्न धर्मीत्याशङ्काशयः। तत्र युक्तिर्नास्तीत्याह—**इत्ययुक्तमिति**। कथमित्यत्राह—**तद्वृत्तिरिति**—धर्मवृत्तिरित्यर्थः। **धर्मिमात्रे**—विशेष्यमात्रे नतु तच्छून्ये तद्विशिष्टे वा। तद्विशिष्टवृत्त्यभावे तच्छून्यवृत्तिस्स्यादेवेत्यत्राह—**न भवतीति**। **ततएव** धर्मस्यात्र वर्तमानत्वादेव। **अस्य धर्मिणः**। **तच्छून्यता**—धर्मशून्यता न भवतीत्यन्वयः यत्र यद्वर्तते तस्य कथं तच्छून्यत्वमिति भावः। नच तद्वति वर्तमानस्य तस्मिन्नपि वृत्तिरिति नियमः, घटवति भूतले वर्तमानानां—गुणानां घटेऽपि वृत्तेरदृष्टेः। अतो धर्मिणः धर्मशून्यत्वस्य धर्मे स्ववृत्तित्वस्य चानभ्युपगमात् **नोक्तौ दोषौ** भवदुक्तौ व्याघातात्माश्रयदोषौ न प्रसज्येते। अन्यथाऽनिष्टमाह—**स्वधीति** स्वधीविरोधः स्ववाग्विरोधश्च स्यातां विशिष्टधीविरहे तवापि विशिष्ट-

व्यवहारविरोधः–"बुद्धिः स्वप्रकाशा अभिन्नदेशकालं स्वलक्षण" मित्यादयो भवदीयव्यवहारा विशिष्टगोचरा हि दृश्यन्त इतिभावः एवमन्येऽपि धर्मधर्मिभाव-भञ्जकाः परेषां वादा निरसनीया इत्याह–**तद्वदिति** ॥ १० ॥

स्वच्छन्देनागमेन प्रकृतिमहदहङ्कारमात्राक्षसिद्धि-
र्नाध्यक्षेणाप्रतीतेर्न पुनरनुमया व्याप्तिलिङ्गाद्यसिद्धेः ।
सत्त्वाद्युन्मेषभिन्नान्महत इह तथा स्यादहङ्कारभेदः
प्राच्यादक्षाणि मात्राः प्रजनयति परो मध्यमस्तूभयार्थः ॥ ११ ॥

सर्वा०। एवं द्रव्याद्रव्ये सामान्यतः प्रसाध्य द्रव्येषु प्रथमोद्दिष्टं परीक्ष्यते त्रिगुण-मादौ परीक्ष्यते तया प्रसिद्धस्सुरगुरुर्लोकायतं शास्त्रमारभ्य पृथिव्यादीनि चत्वार्येव तत्त्वान्याह। अधिकानि तु तावन्मात्रविभागोद्देशादपोढानि, अतिरिक्तचेतन-निषेधाच्चेति। अत्र किं लोकायतसूत्राणि स्वयंप्रमाणतयोपादीयन्ते ? तदुपस्था-पकतया वा ? नाद्यः; असम्मतेः; गुरूक्तेश्च विरोचनोपदेशवदसुरमोहनार्थत्वात् । न द्वितीयः; उक्तेषु विवादाभावादधिकानां निषेधस्य निष्प्रमाणकत्वात् । अनुप-लब्ध्या निषेध इति चेन्नः; योग्यानुपलब्धेरभावादितरस्य निषेधकत्वायोगात् । उपलब्ध्या चेच्चतुर्णामुपादानमाकाशेन किमपराद्धम् ? अस्ति ह्यासंसारं तदुप-लम्भः । न चात्रास्पर्शत्वादिभिर्बाधः; अरूपत्वादिना वाय्वादेरपि निह्नवप्रसङ्गात् । शेषं च वक्ष्यामः । अथोपलम्भबलादस्त्वाकाशमपीति चेत्, तथैव भिन्नभवानु-भूतार्थप्रतिसन्धाताऽप्यभ्युपगन्तव्यः । अस्तु तर्हि षड्धातुवादः अध्वर्युभिस्तथाध्यय-नादिति चेत्तर्ह्युद्गातृभिश्चतुर्णामध्ययनाच्चतुर्धातुवादः स्यात् । अनुक्तमविरुद्ध-मन्यतो ग्राह्यमिति चेत्समानम्; भूयसां च प्राबल्यादुपबृंहणप्राचुर्याच्च । न चात्र मिथो विरोधान्निरर्थकार्थवादमात्रता, सम्यङ्न्यायानुग्रहमात्रेण बलाबलदृष्ट्या विरोधशान्तेः । केचित्तु प्रकृत्यादिशब्दैरदृष्टादिकं कथ्यत इत्याहुः । यथाऽऽहोदयनः– *इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो मूलत्वात्प्रकृतिरित्यादि, तदेतद-पष्ठु; नियतक्रमानुपूर्वप्रकृतिविकृतिपरम्परोपदेशात्, बाधाभावे भाक्तत्वायोगात्; अन्यथा सर्वत्र श्रुतहान्यश्रुतकल्पनाप्रसङ्गाच्च । तदेतत्सर्वमभिप्रेत्याह—**स्वच्छन्दे-नेति** ॥

साधकबाधकप्रमाणभावे विशिष्टार्थबोधनसामर्थ्यमागमस्य स्वाच्छन्द्यम् । आगम इह श्रुतिस्मृतीतिहासादिः । कारणदोषबाधकप्रत्ययविरहादस्मदाद्यतीन्द्रिय-विषयं शास्त्रमपि प्रत्यक्षवच्छ्रद्धेयमेव । अत आगमिकानामपि सद्भावनिश्चय इति सिद्धिशब्दाभिप्रायः । ननु प्रत्यक्षसिद्धं पृथिव्यादितत्त्वं, तच्च कार्यावस्थं प्रकृतिद्रव्यमेवेति ब्रूथ, यथा सति कारणावस्थमपि तदेवेति कथं तस्याप्रत्यक्षत्वम् ? अश्रुतागमैरप्रतिसंहितव्याप्तिभिश्च बालादिभिरपि चक्षुरादिकरणानि व्यव-ह्रियन्ते । अतः कथं तेषामागमिकत्वम् ? तत्राह—**नाध्यक्षेणेति** । प्रत्यक्षविरुद्धेयं प्रतिज्ञेत्यत्राह—**अप्रतीतेरिति** । नहि प्रकृत्याद्यवस्थस्य प्रत्यक्षतः प्रतीतिरस्ति ।

अवस्थादिभेदैरेकस्यैव प्रत्यक्षत्वाप्रत्यक्षत्वे बहुलं लोकदृष्टे। चक्षुरादिव्यवहाराश्च लौकिकानां तत्तदधिष्ठानमात्रविषयाः। मनसा जानामीत्युक्तिरपि धीविशेषविषया। अहमिति प्रत्यक्षं तु न महत्तत्त्वविषयमहंकारविषयं वा, प्रत्यगात्मन एवाहति भानात्। अध्यवसादयोऽपि वस्तुत आत्मधर्माः; करणभेदायत्ततया तु त [त्त] द्वृत्तित्वोपचाराः। दृष्टेषु पृथिव्यादिष्वपि शास्त्रैकवेद्याः कतिकति न सन्त्याकाराः? किं पुनरन्येषु? अतो लोकोत्तीर्णकारण त्रिगुणस्य शास्त्रवेद्यत्वम्। एषां च तत्त्वानां तदवान्तरभेदानां च यथागमं यथादर्शनं च लक्षणं ग्राह्यम्। केषुचित्क्षीरगुडादिरसभेदवद्दुर्वचा अपि भेदास्त्वनुभवादिसिद्धा दुरपह्नवाः। **सांख्यो क्तैरनुमानैः** प्रधानसिद्धिः स्यादित्यत्राह—**न पुनरनुमयेति**। न त्वनुमानैरित्यर्थः। तत्र हेतुः—व्याप्तिलिङ्गाद्यसिद्धेः—यथासम्भवं व्याप्तिलिङ्गपक्षदृष्टान्तानामसिद्धेरित्यर्थः।

तथा हि—यत्तावदुक्तं कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धमिति, अयमर्थः—यत्कार्यं तत्कारणगुणात्मकं यथा तन्त्वादिगुणात्मकं पटादि। तथा महदादिकार्यजातमपि सुखदुःखमोहात्मकतया स्वकारणगतसुखदुःखाद्यात्मकं भवति। अतस्तत्कारणं सुखदुःखाद्यात्मकं प्रधानमिति। तत्र पटादेः किमिदं कारणगुणात्मकत्वम्? किं कारणगुणतादात्म्यमुत कारणं प्रति गुणभूतत्वम्? कारणगुणैर्गुणित्वं वा? तत्सजातीयगुणवत्त्वं वा? अन्यद्वा किंचित्? नाद्यः, असिद्धेः। न खलु तन्त्वादिगुणैः शौक्ल्यादिभिः पटस्य तादात्म्यं दृष्टं, तथा सति गुणवत्तन्तुनिष्पत्तिमात्रेण पटनिष्पत्तिप्रसङ्गात्। न चायमिष्टः प्रसङ्गः; अभिव्यक्तिवादादेरपाकरिष्यमाणत्वात्। अत एव न द्रव्यस्य गुणतादात्म्यम्; शुक्लः पट इति च न पर्यायः। न द्वितीयः, अदृष्टेरेव। तन्तुसमवेतत्वात्पटस्य तन्तुगुणत्वोक्तिरिति चेन्न; अवयविसमवाययोस्त्वयाऽप्यनभ्युपगमात्। पटस्य तन्तुनिष्ठत्वमुपलब्धमिति चेत्, किमतः? कार्यावस्थानां कारणद्रव्यवर्तित्वमात्रसाधनापत्तेः। तथा च न कारणावस्थस्य सुखाद्यात्मकत्वसिद्धिः। कारणमात्रं तु सिद्धत्वान्न साध्यम्। तृतीयेऽपि किमिदं कार्यस्य कारणं प्रत्यप्रधानत्वम्? तत्कार्यत्वमिति चेन्न; सिद्धसाधनात्, साध्याविशेषाच्च। न ह्यकारणेन किञ्चित्कार्यमिच्छामः। कारणसहकारित्वादिसाधनेऽपि न विवक्षितसिद्धिः। न चतुर्थः, अवयविवादे तन्तुपटोदाहरणायोगात्। तत्र हि तन्तुगुणैः पटगुणा जन्याः। द्रव्यनित्यत्ववादे सिद्धसाधनात्; कार्यावस्थस्य कारणावस्थानियतगुणसाधने विरोधात्। पञ्चमस्तु विलक्षणमहत्त्वाद्यधिकरणत्वान्निरस्तः। सजातीयगुणसद्भावमात्रे साध्ये सिद्धसाधनात्, सर्वगुणसजातीयत्वसाधने कार्यकारणयोरविशेषप्रसङ्गात्। मृत्सुवर्णादिवत्कार्यविशेषव्यवस्थापककारणस्वभावसाजात्यविवक्षायां गोमयसाक्षिकाद्यारब्धवृश्चिकादिषु व्यभिचारात्। तदभिप्रायं च सूत्रं *दृश्यते त्विति। नापि

षष्ठः, तस्य त्वद्बुद्धिमात्रारूढस्यादूष्यत्वात्। लोकदृष्टस्य तु कस्यचिदुक्तोत्तरप्रायत्वात्। अतः कर्मणां स्वविषयस्वरूपफलप्रदत्वानुमानवत्कार्याणां स्वगुणसरूपगुणकारणत्वानुमानमप्यनैकान्त्यदुःस्थमिति।

ये च *भेदानां परिमाणादित्या दिना हेतव उक्तास्तत्र तावद्यत्परिमितं तत्सकारणमित्यत्र न व्याप्तिर्जीवाणुत्व नित्यत्वयोस्साधयिष्यमाणत्वात्। महदादीनां स्वरूपमनुमानसिद्धं वा पक्षीक्रियते? आगमसिद्धं वा? नाद्यः, तल्लिङ्गासिद्धेः। ननु चिच्छक्तेरेव स्वतो विषयप्रवणतायामनिर्मोक्षप्रसङ्गात् अस्ति किञ्चिद्द्वारम्; तत्तु न चक्षुरादिमात्रं, तदुपरमेऽपि सङ्कल्पाद्युत्पत्तेः। नापि मनोमात्रविश्रमः, तत्प्रशान्तावपि स्वप्ने मनुष्यस्य स्वात्मनि व्याघ्राद्यभिमानात्। नाप्यहङ्कारे पर्यवासनं, तद्विरामे सुषुप्तौ प्रश्वास निश्वासहेतुभूतप्रयत्नाधारस्य महतस्सिद्धेः। न च तदवधिस्तत्त्वपङ्क्तिः, तस्यापि परिमितत्वेन कार्यत्वात्; तत्कारणं त्वव्यक्तं न परिमितमित्यत्र प्रमाणमस्ति। तत्कल्पनायां त्वनवस्थापातः, अतोऽव्यक्तमपरिमितमादिकारणमिति वृत्तिभेदसिद्धैर्महदादिभिरव्यक्तानुमानं स्यात्। तदेतत्कथामात्रम्। स्वतस्सर्वग्रहणयोग्याऽपि हि पुंसां चिच्छक्तिस्संसारावस्थायां कर्मणा संकुचन्ती कर्मोत्पन्नै रेव द्वारैर्यथाकर्म प्रसरतीति तु त्रय्यन्तवृद्धाः।

नापि सङ्कल्पादिभिर्मनःक्लृप्तिः, संस्कारप्रणाड्याऽपि तदुपपत्तेः। अन्यथा मनसाऽपि तदुत्पादनायोगात्। करणस्य च द्रव्यत्वं नावश्यापेक्षितम्। न च स्वप्ने व्याघ्राद्यभिमानादहङ्कारक्लृप्तिः, मनसैव तादृशसंस्कारसध्रीचा तदुपपत्तेः। निश्वासादिहेतुभूतप्रयत्नाधारतया महत्क्लृप्तिरप्ययुक्ता। अदृष्टवशादेव बाह्यस्येवान्तरस्यापि मरुतः क्षेत्रस्यापि न जीवनपूर्वकः प्रयत्नः कल्प्यः। किमुत कस्यचिदचिद्द्रव्यस्य? परिमितत्वं तु महतः कुतस्त्यम्? अन्तर्देहमेव तत्प्रवृत्त्युपलम्भादिति चेन्न; त्वत्पक्षे विभोरप्यात्मनः शरीरावच्छिन्नप्रदेश एव व्यापारावेशवद्विभोरपि महतस्सहकारिविशेषसामर्थ्यात् क्वाचित्कप्रवृत्तिसम्भवात्। न च वृत्तिभेदमात्रादन्तःकरणभेदक्लृप्तिर्युक्ता। *कामस्सङ्कल्प इत्यादिना मनस्येव बहुविधवृत्तिश्रुतेः। कामादीनां मनस्सामानाधिकरण्यम् *आयुर्घृतमितिवद्वाक्तम्; महतश्च त्वया मिथो विरुद्धभावाष्टकसुख-दुःखाद्याश्रयत्वस्वीकारात्। बाह्येन्द्रियमनोहङ्काराणामालोचनादिवृत्तिभेदाश्रयणमप्ययुक्तम्, महत एव सहकारिभेदात् सर्ववृत्त्यविरोधात्। अत एव शास्त्रतो महदादितत्त्वसिद्धावपि तेषां पृथक्करणत्वं वृत्त्याश्रयत्वं वा न कल्प्यम्। एवं चक्षुरादिष्वालोचनोक्तिरपि नेया।

न द्वितीयः, महदादीनामागमतस्सिध्यतां साक्षात्परम्परया वा प्रधानजन्यत्वसिद्धेः, अनुमातव्याभावात्।

एकप्रमाणवेद्यत्वे कार्यकारणयोर्मिथः।
बोध्यबोधकते न स्तः सहदृष्टाग्निधूमवत् ॥

विप्रतिपन्नं प्रत्यनुमानं सार्थमिति चेन्न; महदादीनभ्युपेत्यानभ्युपेत्य वा तेष्वव्यक्तकारणकत्वविप्रतिपत्त्ययोगात् ।

यदप्याहुः कार्याणां स्वाधिकपरिमाणादुत्पत्तिर्नियतेति, तदप्यसत्; वस्त्रादिषु वैपरीत्यदृष्टेः। अव्यक्तस्य च परिच्छिन्नत्वं * तमसः परस्तान्मृत्युं भिनत्ति इत्यादिशास्त्रशतसिद्धम्। व्याप्तिवचनं तदनन्तमसंख्यातप्रमाणं चेत्यादिकमपि विभुत्वमन्तरेणापि स्यात्। घटादीनामपि स्वन्यूनपरिमाणैः पिण्डाद्यवयवैरेवोत्पत्तिरिति समन्वयश्च कुत्र? केषाम्? कीदृशः? सुखादिरूपेषु कार्येषु सत्त्वादीनां समनुगतिरिति चेत्, किमतः? न हि यद्येष्वनुगतं तत्तेषां कारणमिति नियमः, शौक्ल्यगोत्वादेरनेकानुगतस्य तत्कारणत्वाभावात् अन्यथा व्यक्ताव्यक्तसाधारणधर्माणां तदुभयकारणत्वप्रसङ्गात्। तथा च तत्त्वाधिक्यप्रसङ्गः। एतेन विगीतं स्वानुगतकारणकं कार्यत्वाद्घटशरावादिवदित्यपि निरस्तम्। घटादिष्वनुगतस्य मृत्त्वस्य तत्कारणत्वासिद्धेः, मृद्द्रव्यस्य तु घटाद्यात्मना विभक्तस्याविभक्तस्य वा तेष्वनुगतत्वादृष्टेः।

यदप्येकरूपान्वितत्वादेकोपादानत्वमिच्छन्ति, तदपि स्वपरमतनिर्धूतम्, सर्वथा सारूप्ये हेतौ तत्त्वभेदभङ्गप्रसङ्गात्; यथाकथंचित्सारूप्ये तु व्यभिचारात्, साक्षादेकोपादानत्वसाधने सृष्टिक्रमादिशैथिल्यं स्यात्। मृत्तन्त्वाद्युपादानभेदश्च निह्नूयते। परम्परयेति तु मृद्घटादिनिदर्शनविरुद्धम्। नित्येषु च पुरुषेषु साक्षित्वादयो धर्मास्साधारणा युष्माभिरेव पठ्यन्ते, न तु तेषां हेतव दृष्टाः। व्यक्ताव्यक्तयोश्च * त्रिगुणमविवेकि इत्यादिसाधर्म्यपाठादेकोपादानत्वप्रसङ्गः। कार्यत्वे सतीति विशेषणेऽपि मृत्पिण्डद्वयारब्धघटादिभिर्गोमयादिनानोपादानवृश्चिकादिभिश्चानैकान्त्यम्। [बह्वा] तन्त्वारब्धपटादिभिश्च तेषामपि पक्षीकरणे दृष्टान्तासिद्धिः। [अविदित] व्यतिरेकिहेतुविवक्षायामपि न दृष्टः कारणभेदोऽपह्नोतुं शक्य। नापि कारणान्तरमेकं विधातुं, दृष्टैरेव हेतुभिरदृष्टघटितैः कार्याणां चरितार्थत्वात्। न च शास्त्रमन्तरेण जगतस्सत्त्वादिगुणसमन्वयसिद्धिः, येन तन्मयं कारणमुन्नीयेत। ननु सुख्यामि दुःख्यामि मुह्यामीति स्वानुभवसिद्धास्तावत् सुखादयः, ते च कार्यभूताः स्वानुरूपं कारणमाक्षिपन्ति। तथातथा तेषुतेषु विषयेषु कालभेदेन पुरुषभेदेन च प्रीत्यप्रीतिविषादजनकत्वं दृष्टम्, तदपि तत्तद्गतविचित्रगुणविशेषहेतुकं युक्तमिति। तन्न; सम्प्रतिपन्नदृष्टादृष्टहेतुशक्त्यैव सर्वोपपत्तौ तदतिरिक्तत्रैगुण्यक्लृप्त्ययोगात्। गुणानां कार्यैकनिरूपणीयत्वभाषणमपि शास्त्रोपज्ञम्। अन्यथा त्रैगुण्योन्मेषभेदस्याप्यतिरिक्तनिर्वाहकत्रैविध्यक्लृप्तावनवस्थाप्रसङ्गात्। सामग्र्यनवस्था तु सिद्धा न क्वापि दोषाय, प्रत्युत गुणायेति सर्वैरेष्टव्या।

गुणत्रयात्मकं च कारणमिच्छतस्ते विश्वस्यैकोपादानत्वं दुर्वचम्। ननु साम्यावस्थानां सत्त्वरजस्तमसां सङ्घातः प्रकृतिः; अतः कारणैकत्वं स्यात्। तन्न, चित्रपटारम्भकशुक्लकृष्णरक्ततन्तुसङ्घातन्यायेन सूक्ष्मदृष्टौ कार्याणां यथास्वं कारणभेदस्यैवाङ्गीकारात्। ततश्च भेदानां भिन्नत्वे सति विका [र] रित्वादभिन्नहेतुकत्वक्लृप्तिश्च निरस्ता; सत्त्वादीनां भिन्नत्वाद्विकारित्वाच्च। अथ तत्त्वाभिन्नकारणान्तरक्लृप्तिः, तथा सति स्वाभीष्टतत्त्वसंख्याविरोधः; सत्त्वादिद्रव्यभेदाभ्युपगमाच्च।

* शक्तितः प्रवृत्तेश्चेत्येतदपि मन्दम्। यदि कारणशक्तितः कार्यं प्रवर्तते कथमव्यक्तसिद्धिः? ननु कारणशक्तिर्नाम सत्कार्यपक्षे न कार्यस्याव्यक्तत्वादन्या। यथा हि तिले तैलस्य। अतस्सर्वकार्योपादानाव्यक्तसिद्धिरिति। मैवम्, यदि तैलाश्रयतिलवदव्यक्तावस्थाश्रयस्वीकारः, तदा पूर्ववत्स्वेष्टतत्त्वसंख्याविरोधः। अथ न, विषमस्तिलदृष्टान्तः। नोदाहरणमादर्तव्यम्; क्षीराद्दधिवत्सूक्ष्मावस्थात्स्वस्मादेव जगदुत्पत्स्यत इति। तथाऽपि संप्रतिपन्नावधिस्तत्त्वपङ्क्तिरस्तु। यद्वा तदपि सूक्ष्मं सूक्ष्मान्तरादिति कथं तत्त्वेयत्ता? एतेन सांख्यानां सूक्ष्मशरीरक्लृप्तिश्च निरस्ता। यदाहुः—पूर्वोत्पन्नमव्यक्तमित्यादिना, तन्न; नह्यत्र लिङ्गशब्दोक्तसूक्ष्मशरीरसद्भावे प्रमाणमिति स्थूलवत्प्रत्यक्षम्, कैश्चिदप्यनुपलम्भात्। विभोरात्मनस्स्वर्गादिगत्युपदेशान्यथानुपपत्त्या तत्क्लृप्तिरिति चेन्न; तत्क्लृप्तावपि युष्मन्मते तद्गतेरात्मन्युपचारात्। ततो वरमदृष्टशक्त्या तत्रतत्र देहोत्पत्तिमात्रेण तत्तद्देशगत्युपचारः। ननु स्थूलदेहद्वयान्तरालवर्ती क्षेत्रज्ञस्तत्कालीनदेहवान्, क्षेत्रज्ञत्वात्, यस्तथा स तथा यथा कालान्तरवर्तीत्यनुमीयेत। मैवम्; विपक्षे बाधकाभावात्; गत्युपदेशानुपपत्तेः परिहृतत्वात्। अशरीरत्वे मुक्तत्वप्रसङ्ग इति चेन्न; प्रलयवदविरोधात्। तत्रापि सूक्ष्माचिद्विशिष्ट एव पुरुष इति चेन्न; अत्रापि तावन्मात्रसाधने सिद्धसाधनात्। आगमस्तु गत्यवस्थायां पूर्वशरीराकृष्टसूक्ष्मावयवसङ्घातमात्रेणापि गतार्थः। * सूक्ष्मं प्रमाणतश्च तथोपलब्धेरिति सूत्रमपि तावन्मात्रविषयम्। पुर्यष्टकशरीरोक्तिश्च न शरीरान्तर्वर्तिसूक्ष्मदेहसद्भावपरा। *कारणकार्यविभागादविभागादिति हेतुश्च महदादिपक्षसिद्ध्यसिद्धिविकल्पेन निरस्तः। किंच कार्याणां सतां क्वचित्कारणे विभागाविभागौ नियताविति कृत्वा विचित्रस्य कार्यवर्गस्य विभागाविभागस्थानतया प्रधानं सिषाधयिषितम्। न त्वेवं नियमः; यथा मृदादिषु घटादीनामेतौ दृष्टौ न तथा तन्त्वादिषु पटादीनाम्। न हि तन्त्वेकदेशात्मकः पटः येन घटादिन्यायः स्यात्। एकस्मादनेकोत्पत्तिनियमश्चानेन भग्नः, त्वयाऽपि संहतेस्सत्त्वादिभिर्जगदारम्भोक्तेश्च। यत्र कार्याणां विभागाविभागदृष्टिः न तत्र सर्वत्रोपादानत्वम्, निमित्तेऽपि क्वचित्तद्दृष्टेः अरणेरिवारणेयस्य। न हि काष्ठे पार्थिवांशो वह्नेरुपादानम्। न च वह्न्यंशो धूमस्य। एवं सति नाव्यक्तस्यैव सिद्धिः। विश्वनिमित्तस्यापि कस्यचिदेवमनुमातुं शक्यत्वात्, तस्य च विजातीयस्यापि सम्भवात्। किंच यथा मृदवयवसङ्घाते घटादेरविभागादिः, तथा पार्थिवाद्यणुसङ्घाते तत्तद्भूत-

भौतिकानां स किं न स्यात्? ततश्च का कथा तदतिरिक्ततत्त्वकल्पनायाम्। कृत्स्नैकदेशसंयोगानुपपत्त्याऽणुसङ्घातस्य कारणत्वक्लृप्तिरयुक्तेति चेन्न; सत्त्वादिविभुद्रव्यसङ्घातस्यापि तत्रैव संयोगविकल्पावतारात्। अणूनां मिथः कार्त्स्न्येन संयोगे पृथुकार्यानुपपत्तिस्स्यात्, न तु विभूनामिति चेन्न; तेषामपि मिथः कार्त्स्न्येन संयुक्तानां स्वापेक्षयाऽल्पपरिमाणबहुकार्योत्पत्तौ प्रतिकार्यं कारणस्य कृत्स्नैकदेशवियोगविकल्पे कार्यान्तराणामनुत्पत्तिर्वा कारणस्य सावयवत्वं वा स्यादिति चर्चा स्यात्। श्रौते तूपादाने * श्रुतेस्तु शब्दमूलत्वादिति समाधानं सूत्रितम्। अपि च क्षीरदधिरुचकस्वस्तिकादिन्यायेन स्वस्यैव पूर्वावस्थाविशेषवतस्स्वोपादानत्वे सिद्धे किमन्यत्र कुत्रचिदविभागादिगवेषणया? घटादयोऽपि मृत्पिण्डादिषु तत्तदंशैरेवोपादीयन्ते न तु पिण्डादिभिः। कूर्मावयवदृष्टान्तश्चात्र मन्दः, तत्र ह्याकुञ्चनप्रसारणाभ्यामवयवान्तरावृतानावृतत्वसिद्ध्या भवत्यव्यक्तव्यक्तावस्थाभेदः, न तूपादानोपादेयभावात्। न च तत्र कस्यचिदवयवनाशोत्पत्तिव्यवहारः। अतो न कथंचिदप्यनुमानादव्यक्तादिसिद्धिः।

आगमेन विना सिद्धिस्तन्मात्राणां च दुर्वचा।
उद्भवानुद्भवाद्यैस्तु लोके सूक्ष्मादिकल्पना॥

अक्षेषु वचनादीनामनुपहतैस्सहकारिमद्भिस्तदवयवविशेषैरेवोपपत्तौ न तावत्कर्मेन्द्रियक्लृप्तिः, रूपादिज्ञानादीनां च तत्तदधिष्ठानभेदैरेव तदनुगुणदशाविशेषितैस्सम्भवात्; तदतिरिक्तकल्पनेऽपि काणादादिकल्पितन्यायेन स्मृतिविशेषानुगृहीतेन भौतिकत्वोपपत्तेराहङ्कारिकेन्द्रियसिद्धिरनागमतो न भवति।

कल्पनागौरवभयात्कलाकाष्ठाद्यकल्पयन्।
अविशेषात्प्रधानादिकल्पनामप्यपास्य तु॥
षड्विंशत्तत्त्ववादश्च यदि युक्त्या समर्थ्यते।
सांख्यवत्प्रतिवक्तव्यो न विस्रम्भस्तदागमे॥
तं षड्विंशकमित्याहुस्सप्तविंशमथापरे।
इत्यत्र न विरोधस्स्याच्छ्रुतिमात्रानुसारतः॥

एवमागमिकेषु महदादिषु कालभेदनियतविकारभेदाधीनं विशेषमाह—सत्त्वादीति। गुणत्रयाश्रयात्प्रधानात्सत्त्वादिगुणोन्मेषभेदेन सात्त्विको राजसस्तामसश्चेति त्रिधा महानुत्पद्यते। त्रिभ्यश्च महद्भ्यस्तथैव त्रिविधोऽहङ्कारः। तत्र प्राच्यादेकादशेन्द्रियाणि। परस्तु भूतादिसंज्ञस्तन्मात्राः क्रमाज्जनयति। मध्यमस्तैजसाख्यः पूर्वापरयोरनुग्राहकतया तदुभयसाध्यसृष्टिद्वयार्थः। तुशब्दो मतान्तराद् व्यवच्छिनत्ति। कल्पितं हि कैश्चित्तन्त्रान्तरनिष्ठैः कर्मेन्द्रियाणां प्रवृत्तिशीलतया राजसाहङ्कारजन्यत्वम्; तच्चायुक्तं शब्दैकगम्येऽर्थे युक्तिभिरन्यथाकरणायोगात्॥ ११॥ इति **प्रकृतिमहदाद्यागमिकतासृष्टिप्रकारौ**॥

आनन्द०। प्रकृत्यादौ विप्रतिपत्त्यभावात् तत्र प्रमाणोपन्यासवफल्यमाशङ्क्याह—**द्रव्याद्रव्ये** इति। **धीमन्निदर्शनतया**—बुद्धिदृष्टान्ततया। **लोकायतं शास्त्रमारभ्येति**—'अथ लोकायतं शास्त्रं। पृथिव्यादीनि चत्वार्येत्र तत्वानि। तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवत्'' इत्यादिनेत्यर्थः—**विरोचनोपदेशवदिति**—ब्रह्मणा मोहनार्थं विरोचनं प्रत्युपदेशवदित्यर्थः। **अधिकानामिति**—संख्याविशेषात्तन्मूलभूतप्रमाणेनाधिकनिषेधः कर्तव्यः। आगमबाधे (न) तदनुमानायोगादिति भावः। **इतरस्य**। अनुपलब्धिमात्रस्य। **अस्ति हीति**—इहाकाशे विहगः पततीत्याबालमुपलम्भादित्यर्थः। अरूपत्वादिनेत्यादिशब्दद्वयेन गन्धवत्त्वाभावाज्जलस्य स्नेहवत्त्वाभावात्तेजसश्चेति विवक्षितं। ननु महत्त्वे सत्युद्भूतस्पर्शवत्त्वं बाह्ये (ह्यं के) न्द्रियग्राह्यस्पर्शवत्त्वं वा द्रव्यप्रत्य (क्षे) क्षत्वे तन्त्रं; अनुगतसम्भवे तत्परित्यागायोगादिति चेत्तत्राह—**शेषं चेति**—आकाशनिरूपणे इत्यर्थः। **भिन्नभवो**—जन्मान्तरं—**तत्रानुभूतार्थप्रतिसन्धानं**—स्तन्यपानादीष्टसाधनतास्मृतिः। **अभिन्नभवे**-बाल्ये अनुभूतस्य प्रतिसंन्धानं—तत्स्मृतिः। **षड्धातुवादः**—षट्तत्ववादः। **अध्वर्युभिरिति**—''तस्माद्वा एतस्मादात्मन आकाशस्संभूतः'' इत्यादिना यजुर्वेदेऽध्ययनादित्यर्थः। **उद्गातृभिरिति**—''सदेव सौम्येदमग्र आसीत्तत्तेजोऽसृजत ता आप ऐक्षन्त ता अन्नमसृजन्त'' इत्यादिवाक्यैरित्यर्थः। ननु विभागेनोद्देशेनेतरव्यवच्छेदाद्विरोध इत्यत्राह—**भूयसां चेति**। भूयसां—चतुर्विंशतितत्वप्रतिपादकानामिति शेषः। विरोधाङ्गीकारेऽपि न तत्प्रतिबन्धीति भावः। भूयस्त्वमसिद्धशेषः। विरोधाङ्गीकारोऽपि न तत्प्रतिबन्धीति भावः। भूयस्त्वमसिद्धमित्यत्राह—**उपबृंहणप्राचुर्यादिति**। तथाच अनुग्राहकप्राचुर्यमपि प्राबल्यप्रयोजकमविशेषादिति भावः। ननु भूयस्त्वमप्रयोजकं; शतमप्यन्धानां न पश्यतीति न्यायादित्यत्राह—**नचात्रेति**। सम्यङ्न्यायबलादुभयोरविरोधस्यैव स्थि(र)तत्वात्। चतुर्धातुवाक्यं चतुर्णां स्वरूपप्रतिपादनमात्रेणापि प्रामाण्यमश्नुते। न तदर्थमितरनिषेधमपेक्षते। चतुर्विंशतिवाक्यं तु न्यूनपरं चेन्न प्रामाण्यं लभते इति न विरोध इति भावः। ननु चतुर्विंशतिवाक्यस्य चतुर्विंशतितत्वपरत्वं नावश्यं वाच्यं;- अन्यथाऽपि प्रमाण्योपपत्तेरिति नैयायिकमतमनुभाषते—**केचित्त्वित्यादिना**। प्रथमादिपदेन महदहङ्कारादिशब्दग्रहणं। द्वितीयादिपदेन बुद्धिविशेषचेतनगुणौ गृह्येते। कुसुमाञ्जलिसंमतिमाह—**यथाऽऽहेति**। **सहकारिशक्तिः** सर्वकार्यसहकारिकारणं, अदृष्टमित्यर्थः। दुरत्ययोग्रत्वान्मायाशब्दवाच्यतापीत्याह—**दुरुन्नीतितः**। तस्य प्रकृतिशब्दवाच्यताऽपि युक्तेत्याह—**मूलत्वात्प्रकृतिरिति**।

नियतक्रमेति—प्रकृति विकृति भावस्य द्रव्यधर्मत्वादिति भावः। ननु न प्रकृतेर्महानिति प्रकृतिशब्देनोपादनमुच्यते; अपितु निमित्तमात्रमित्यत्राह—**बाधेति**। बाधाभावे निमित्तत्वस्य प्रकृतिशब्दबोध्यत्वादिति भावः। **अन्यथेति**—तथाच प्रकृतेरिति

पञ्चमीश्रुतस्य तस्माद्वेति पञ्चमीश्रुतस्य जनिकर्तुरित्यनुशासनसिद्धस्य "तमसि लीयते" इति सप्तम्या च श्रुतस्योपादानत्वस्य हानिरश्रुतस्य निमित्तत्वस्य स्वीकार इत्यर्थः। अन्ये तु--प्रकृतिशब्दस्योपादानपरस्य निमित्तत्वे लक्षणास्वीकार इत्याहुः। यद्वा—बाधकाभावेऽपि भाक्तत्वे सर्वत्र तथा प्रसङ्गेन कोऽपि सिद्धान्तो न सिध्येदित्यर्थः। **साधकबाधकेति** साधकसत्त्वेऽनुवादप्रसङ्गाद्बाधकसत्त्वे योग्यविरहादर्थविशेषप्रतिपादनाभावादपुरुषार्थतापत्तेर्विहतं स्वाच्छन्द्य। **श्रद्धेयमेवेति**। 'तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति न्यायादिति भावः। ननु नाध्यक्षणेति मूलमसंगतं अभागिप्रतिषेधापत्तेरित्याशङ्क्यावतारयति—**नन्विति**। नन्विन्द्रियाणामतीन्द्रियत्वात्तद्विषयं शास्त्रमर्थंवदित्याह—**अश्रुतागमरिति**। **अप्रतिसंहितेति**। यथा धर्माधर्मविषयकवैदिकव्यवहारात् व्यवहारविषयत्वेन व्यवहर्तव्यविशेषविषयअनुमीयते तद्वदपि न व्यवहार्यमनुमाय व्यवहार इत्यर्थः। ननु प्रत्यक्षसिद्धत्वं भवतु को दोष इत्यत्राह—**अतः कथमिति**। प्रत्यक्षसिद्धे शास्त्रस्य तात्पर्याभावादिति भावः। ननु पृथिव्यादीनामपि प्रत्यक्षत्वं न स्यात् तदभेदात् इत्यत्राह —**अवस्थेति**। असंयुक्तावस्थस्य केशम्य दूरे न प्रत्यक्षता। तस्यैव सजातीययुक्तावस्थस्य प्रत्यक्षता। प्रत्येकस्य रजसश्चक्षुरगम्यत्वं; तस्यैव राश्यवस्थस्य चक्षुर्गम्यत्वं दृष्टमित्यर्थः। तथाच यदवस्थाविशिष्टस्य शास्त्रप्रतिपाद्यत्वं तदवस्थस्य न प्रत्यक्षत्वमिति भावः। ननु यत्र प्रत्यक्षमधिष्ठानं नास्ति तत्र कथमित्यत्राह—**मनसेति**। सम्भावनारूपधीविशेषविषय इत्यर्थः। ननु अहमिति महत्तत्वस्य अहङ्कारस्य च प्रत्यक्षत्वात् कथं तयोः शास्त्रवेद्यत्वमित्यत्राह—**अहमति**। ननु साङ्ख्यैः 'अध्यवसायो बुद्धिः इत्यत्र बुध्यते अध्यवस्यतेऽनेनेति व्युत्पत्त्या महत्तत्वपरिमाणतयाऽध्यवसायस्य तन्निष्ठत्वोक्तेरध्यवसायाश्रयतया प्रतीयमानोऽहमर्थो महत्तत्वमेव। तथा 'अभिमानोऽहङ्कारः' इत्यत्र अभिमन्यतेऽनेनेति व्युत्पत्त्या तिरस्कारात्मकबुद्धेर्वाऽहङ्कारधर्मत्वात्तदाश्रयतया प्रतीयमानोऽहङ्कार इति चेत्तत्राह—**अध्यवसायादयोऽपीति**। तर्ह्यध्यवसायादेः तद्धर्मत्वे (शास्त्रेषु धर्मितया) तेषु तद्धर्मतया व्यपदेशः कथमित्त्राह—**कारणभेदेति**। करण(रूप) भूत महदाद्यायत्तत्वादित्यर्थः। ननु पृथिव्याद्यवस्थाविशिष्टस्यैव प्रत्यक्षवेद्यत्वात् कथं पृथिव्यादेश्शास्त्रवेद्यत्वम्? नच तस्य मास्तु तद्वेद्यत्वमिति वाच्यम्; तथा सति चतुर्विंशतितत्वानां शास्त्रवेद्यत्ववचनविरो (धः)धात् इत्यत्राह—**दृष्टेष्विति**। पृथिव्यवस्थाविशिष्टतया प्रत्यक्षत्वेऽपि सलिलादिजन्यत्वब्रह्मपरतन्त्रत्व ब्रह्मकारणकत्वब्रह्मशरीरत्वाद्यैर्धर्मैरप्रत्यक्षत्वेन शास्त्र वेद्यत्वमविरुद्धम्।

द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते।
तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता।
श्रेयस्साधनताप्येषां नित्यं वेदात्प्रतीयते॥

इति न्यायादिति भावः। दृष्टानामेव पृथिव्यादीनां शास्त्रगम्यत्वे अतीन्द्रिय-प्रकृत्यादीनां शास्त्रगम्यत्वं किं पुनर्न्यायसिद्धमित्याह--**किंपुनरिति**। तथाच इदं सुखदुःखमोहात्मकं कार्यजातं तादृशकारणजन्यमित्यानुमानान्न सिध्यतीति भावः। ननु प्रकृत्यादीनामप्रत्यक्षत्वे तल्लक्षणग्रहणमनुपपन्नं; प्रत्यक्षदृष्टानां पृथिव्यादीनां तत्तदवान्तरभेदानां च लक्षणमप्यनुपपन्नं; कार्यकारणयोरभेदेन पृथिव्यादिलक्षण-प्रकृत्यादावतिव्याप्तेश्चेत्यत्राह–**एषां चेति**। अप्रत्यक्षाणामागमबोधितं लक्षणं। तेषु सर्वतत्वकारणत्वं महत्तत्वकारणत्वं च प्रकृतिलक्षणं। प्रकृत्यव्यवधानेन प्रकृतिजन्यत्वं महल्लक्षणं इत्यादिना ग्राह्यम्। पृथिव्यादीनां च प्रत्यक्षतः। नचा-तिव्याप्तिः; यथादर्शनं यथाऽऽगमं तत्तदवस्थाविशिष्टस्य लक्ष्यतया तत्तदवस्था-शून्यकाले लक्षणविरहादतिव्याप्तयभावादिति भावः। ननु पृथिव्यादीनामनुगतस्य धर्मस्य दुर्वचत्वात् न लक्षणं सम्भवतीत्यतआह--**केषुचिदिति**। **भेदाः**—भेदक-धर्मा इत्यर्थः। ननु प्रत्यक्षेणाप्रतीतेरित्यस्यानुषङ्गेऽनुमयेत्यनुपपन्नं; अनुमाशब्द-स्यानुमितिपरत्वेन तज्जन्यप्रतीत्यभावादित्यत्राह—**न पुनरनुमयेति अनुमानै-रित्यर्थः** इति। अनुमाशब्दः करणपरो जात्येकवचन इति भावः। आदिशब्दार्थ-माह--**पक्षदृष्टान्तेति**। साङ्ख्योक्तं प्रकृत्यनुमानं दूषयितुमनुभाषते--**यत्तावदुक्त-मिति**। काकस्य कार्ष्ण्याद्धवलः प्रासाद इतिवदसंगतमित्यत्राह--**अयमर्थ इति**। **सुखदुःखमोहात्मकतयेति**। इत्थं साङ्ख्यप्रक्रिया—सर्वं कार्यजातं सुखदुःखमोहा-त्मकं। यथा स्त्री रूपयौवनकुलादिसम्पन्ना स्वामिनं सुखाकरोति स्वामिनं प्रति सुखात्मकत्वात्। एवं पुरुषान्तरं मोहयति तं प्रति मोहात्मकत्वात्। सपत्नीं दुःखाकरोति तां प्रति दुःखात्मकत्वात्। अनया स्त्रिया सर्वे भावा व्याख्याता इति। तथाचेदं कार्यजातं सुखदुःखमोहात्मकमिति तादृशकारणजन्यं तादृशकार्य-त्वात् यद्यदात्मकं कार्यं तत् तदात्मककारणजन्यं यथा मृदात्मको घटस्तदात्मक-मृज्जन्य इति सुखाद्यात्मकतया परिणतसत्वाद्यात्मकप्रकृतिसिद्धिरिति भावः। ननु शुक्लः पट इति प्रतीतेस्तन्त्वादिगुणैस्तादात्म्यं पटादेरस्त्वित्यत्राह—**तथा सतीति**। तथा च पटाद्यर्थंकारकव्यापारवैयर्थ्यमिति भावः। ननु कारकव्यापारो न पटा-द्युत्पत्त्यर्थोऽपितु तदभिव्यक्त्यर्थः इत्यत्राह—**नचायमिति**। ननु शुक्लः पट इति धीभेदव्यवहारबलात्पटगुणयोरभेदस्सिद्धः। तथा च तन्तुपटयोस्तादात्म्यात्तन्तु-रूपमेव पटरूपमिति कारणगुणतादात्म्यं सिद्धमित्यत्राह—**अत एवेति**। द्रव्य-निष्पत्तिमात्रेण रूपादेस्सिद्ध्या रूपाद्यर्थंपाकादिरूपकारकव्यापारवैयर्थ्यंप्रसङ्गा-देवेत्यर्थः। दूषणान्तरमाह—**शुक्लः पट इति**। अभेदे पर्यायत्वप्रसङ्गादित्यर्थः। न च अभेदेऽपि द्रव्यपटयोः पर्यायत्वाभाववदिहापी (पिने) ति शङ्क्यं; तत्र द्रव्य-त्वादेर्भिन्नधर्मस्य सत्वात्। अत्रापि भिन्नधर्माङ्गीकारे स एव गुणो धर्मि (धर्मीच) भिन्न इति भावः। ननु कारणगुणभूतरूपाद्यात्मकत्वाभावेऽपि रूपादिवत् स्वयमपि गुणान्तरं भवत्विति द्वितीयपक्षं दूषयति—**न द्वितीय** इति तथा च असिद्धिरित्यर्थः।

ननु कारणगुणत्वं नाम कारणसमवेतत्वमेव विवक्षितं; अस्ति च तत् पटेऽपि तन्तुसमवेतत्वादिति शङ्कते—**तन्तुसमवेतत्वादिति**। ननु तन्निष्ठत्वमेव तद्गुणत्वप्रयोजकमस्तु त (त्तु) च्च पटावस्थाया अस्तीति शङ्कते—**पटत्वस्येति। किमत इति**। महत्त्वाद्यवस्थाः कारणनिष्ठाः कार्यावस्थात्वात् पटत्वाद्यवस्थावदिति हि तदा प्रयोगो भवेत्। तथा च कारणगुणसामान्यं सिद्धचेत् न तु त्रिगुणात्मककारणविशेष इति भावः। **सिद्धसाधनादिति**—महत्त्वा (हृदा) दिकं कारणायत्तं कार्यत्वादिति हि तदा स्यात्; तथा च चार्वाकव्यतिरिक्तं प्रति सिद्धसाधनमेवेति भावः। साध्याविशेषाच्चेति—कारणनियतपश्चाद्भावित्वलक्षणकार्यत्वस्य कारणायत्तत्वस्य च पर्यायत्वादिति भावः। ननु कारणनियतपश्चाद्भावित्वं न कार्यत्वं अपि तु प्रागभावप्रतियोगित्वादिकं; तथा न पर्यायत्वं न सिद्धसाधनं चेत्यत्राह—**न हीति**। कार्यमात्रस्य कारणनिरूप्यत्वव्याप्तिग्रहाद्वयाप्तिग्रहसामान्यसिद्धचैव सिद्धचा सिद्धसाधनमिति भावः। यद्वा—कारणं विनाऽपि कार्यं (कार्यं किं) मस्त्वित्यत्राह—**न हीति**। **अकारणं**—कारणाभावः सहयोगे तृतीया। न हि कारणाभावस्थले कार्यं चार्वाकादन्येऽङ्गीकुर्वन्तीति भावः। **कारणसहकारित्वादीति**—कारणं प्रत्यप्रधानत्वं कारणसहकारित्वमिति निर्वचनेऽपि (तेन) कारणं किञ्चित्सिद्धचेत्। न तु सुखदुःखमोहात्मकमित्यर्थः। आदिशब्देन समवायिविनाशजन्यविनाशप्रतियोगित्वादिकं विवक्षितं।

इदमुपलक्षणं—कारणस्य कार्यजनने सहकारित्वं नाम किं स्वजजने स्वकारणापेक्षया? उत यत्किञ्चित्कार्यजनने तत्कारणापेक्षया? नाद्यः; बाधात्, महदादेः प्रकृत्यादिसहकारित्वा (सिद्धेः) भावात्। न द्वितीयः; सिद्धसाधनादित्यपि द्रष्टव्यम्।

अवयविवादे इति—तथा च असिद्धिरिति भावः। **विरोधादिति**—नित्यत्वाव्यक्तत्वादिसाधने कार्यत्वव्यक्तत्वादिना विरोधादित्यर्थः। ननु कार्यस्य स्वगुणा (णत्वा) वच्छेदेन कारणावस्थवृत्तित्वं साध्यं। तथा च सुखदुःखमोहादीनां महदादिधर्माणां त (द्वति कारणे वृत्त्या) त्कारणवृत्त्या तदात्मकप्रकृतिसिद्धिरिति चेन्न। अहङ्कारादिस्वकार (णा) णवृत्तिशब्दादिगुणवत्तयाऽऽकाशादीनां तत्र व्यभिचार इति भावः। कारणगुणसजातीयैर्गुणवत्त्वमित्यत्र किं तैरेवेत्यवधारणं विवक्षितं उत नेति विकल्पमभिप्रेत्य आद्ये दोषमाह—**विलक्षणेति** द्वितीयं निरस्यति—**स्वसजातीयेति**। किं च किं कारणगुणवत्त्वमात्रं साध्यते यद्वा सर्वगुणसजातीयसर्वगुणवत्त्वं वा उत विशेषगुणसाजात्यं वे (मि)ति विकल्प्याद्ये दोषः काकाक्षिन्यायेनावर्तनीय इति मत्वा द्वितीये दोषमाह—**सर्वगुणेति**। यथा मृद उत्पन्नो घटो मृदात्मकः स्वर्णादुत्पन्नः कटकः स्वर्णात्मकः तद्वदित्यर्थः। तृतीये दोषमाह—**कार्यविशेषेति**। महदादि कार्यं कार्यविशेषधर्मव्यवस्थापक-

कारणगुणसजातीयगुणवत् कार्यत्वात् इति साधने वृश्चिकमाक्षिकादौ व्यभिचारीति भावः। 'न विलक्षणत्वादस्य तथात्वं च शब्दात्' इति व्याससूक्तिसम्मतिमाह—तदभिप्रायमिति। कार्यकारणयोर्गोमयवृश्चिकयोर्वैलक्षण्यं दृश्यत इत्यर्थः। स्वविषयसरूपेति—स्वस्य हिंसादेर्विषयो वधादिस्तज्जन्यदुःखादिकं वा तत्सरूपफलप्रदानानुमानवदित्यर्थः। वैदिकहिंसा स्वपीडनजनिका परपीडनात्मकत्वादिति वा; वैदिकहिंसा स्वविषयसरूपफलप्रदा क्रियात्वात् इति वा प्रयोगो द्रष्टव्यः। पशुदहनादौ च परस्त्रीगमनादौ च व्यभिचार इति।

भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥
कारणमस्त्यव्यक्तं..... ....।

इति सांख्योक्तानुमानतन्त्राण्यपि दूषयितुमनुभाषते—ये चेति। भेदानां महदादिकार्याणां कारणमव्यक्तमस्ति कुतः परिमाणात् परिच्छिन्नत्वात् इति प्रथमो हेत्वर्थः। तद्दूषयति—तत्रेति। तत्र परिच्छिन्नत्वात्सकारणकमित्येवानुमानं; न त्वव्यक्तकारणकमिति। 'कारणमस्त्यव्यक्तम्' इति तु पक्षधर्मतावल सिद्धा (लभ्या) भिप्रायम्। तथा च आत्मनि व्यभिचारान्न व्याप्तिरित्यर्थः। तल्लिङ्गासिद्धेरिति—तथा चाद्यानुमानस्याश्रयासिद्धिरिति भावः। ननु विष्वक्प्रवणा चिच्छक्तिः किंचिद्द्वारमपेक्ष्य प्रवर्तते स्वतो विष्वक्प्रवणयोग्यत्वे सति कदाचिदेव किंचिद्विषयकत्वात् यत्प्रवणयोग्यत्वेसति तेषु किंचिदेव प्रकाशयति तत्तत्र किंचिद्द्वारमपेक्षते यथा-घटस्थदीपालोको वहिरर्थप्रकाशकः इति। तथाच यद्द्वारतया वुद्धि(रस्तीत्य) सिद्धिरित्याशङ्कते—नन्वि(ति)त्यादिना—विपक्षे वाधकतर्कमाह—अनिर्मोक्षेति। विषयोपराग विरत्य(त्यागा)भावाद्वैराग्याद्यसिद्धेरिति भावः। परिशेषाद्वुद्धिसिद्धिरित्याह—तन्न चक्षुरादिमात्रमिति। तत्प्रशान्तावपीति—सांख्यैः स्वप्ने इन्द्रियमात्रोपरमस्याविशेषेण साधना (अभिधाना) दिति भावः। तथाच अहङ्कारजन्यस्वाप्नानुभवः। नाप्यहंकार इति। सुषुप्तावहमनुभवाभावेनाहङ्कारस्योपरमात् प्रश्वासनिश्वासहेतुभूतप्रयत्नाधारभूतस्य महतस्सिद्धिः। नच तन्मते आत्मनः प्रयत्नाधारत्वं; तस्य त्रिविधान्तःकरणवशादेव (ज्ञातृत्वादि;) प्रतिभासात्। स्वभावतश्चितिमात्ररूपत्वस्य तैरङ्गीकारादिति ध्येयम्। कारणत्वादेव महदादिवत्परिमितत्वमित्याह—तत्कल्पनायां त्विति। तथाच अप्रयोजकत्वमिति भावः। वृत्तिभेदसिद्धेरिति 'अध्यवसायोवुद्धिः' 'अभिमानोऽहङ्कारः' उभयात्मकमत्र मनः' इत्युक्तेरित्यर्थः। आलोच्य—मयेदं कर्तव्यमिति योऽयं चितिसन्निधानापन्नचैतन्याया वुद्धेर्निश्चयः सोऽध्यवसायः। स च वुद्धेर्महतोऽसाधारणधर्मः, तस्य वुद्धिकार्यत्वात्तदभेदेन निर्देशः। आलोच्यात्राहमधिकृतो मदर्थाएवामी विषयाः अहम-

स्मीति योऽयमभिमानः साऽहङ्कारस्य वृत्तिः चक्षुरादिना सम्मुग्धाकारेण वस्तुग्रहणे इदमित्थमिति विशेषणविशेष्यभावेन ग्रहणं मनसेति तादृशसम्यक्क (ल्यं) ल्यः सविकल्पाध्यवसायो मनोवृत्तिरिति तदर्थः। **कर्मोत्पन्नैरिति।** तथा च कर्मोत्पन्नचक्षुरादिभिरन्यथासिद्ध्यार्थं ? कादाचित्कप्रसरबलान्न महदादिसिद्धिरिति भावः। **संस्कारप्रणाड्येति।** संस्कारसहितादात्मन एव वा चक्षुरादितोऽपि वा तदुपपत्तेरित्यर्थः। यद्वा—संस्कारादेवेत्यर्थः। संस्कारस्यावश्यकतामाह—**अन्यथेति।** ननु संस्कारस्य न सङ्कल्पादिकरणत्वं गुणत्वादित्यत्राह—**कारणस्य चेति।** प्रत्यक्षं प्रतीन्द्रियार्थसन्निकर्षादेरिवानुमि (तौ) त्यादौ व्या(प्ति) प्त्याादिज्ञानस्य(क) ? कारणत्वदर्शनाद्व्यभिचार इति भावः। वृत्ति-भेदान्मनः क्लृप्तिं दूषयित्वा तद्भेदादहङ्कारक्लृप्तिं दूषयति—**नच स्वप्न इति।** एवमध्यवसायस्याप्यन्यथा सिद्ध्या न महत्तत्त्वसिद्धिरिति द्रष्टव्यं। ननु निश्वासादि हेतुप्रयत्नाधारतया महत्सिद्धिरिति (त्युक्तमितिचेत्) चेत्तत्राह **निश्वासादिहेतुभूतेति।** नन्वस्तु तादृशादृष्टाधारतया महत्सिद्धिरित्यत्राह—**नचादृष्टस्यापीति।** तथा च व्याप्त्यसिद्धिरिति भावः कैमुतिकन्यायेनापि महतः प्रयत्नाधारत्वमित्याह—**यदेति।** उच्छ्वासनिश्वासादिकं परप्रयत्ननैव लोहकारभस्त्रिकान्यायेनोपपाद्यमिति भावः। भेदानां परिमाणादित्यनुमाने आश्रयासिद्धिमुक्त्वा स्वरूपासिद्धिमप्याह—

परिमितत्वं (त्वं) चेति। प्रकारान्तरेण लिङ्गसिद्धिं शङ्कते—**अन्तरिति।** **तत्प्रवृत्तिः**—प्रयत्नाध्यवसायादिः। **व्यापारावेशः** मुखे दर्पणमालिन्यसम्बन्ध इवातात्विकः—कृत्यध्यवसायसंस्पर्शः ? (क्वाचित्कः) ? (तात्विकः) **सहकारिविशेषः**—क्वाचित्कशरीरयोगादिः। अध्यवसायस्य प्रमारूपत्वादिति भावः। संस्पृश्यतेऽनेनेति सहकारि वृत्तिविशेषादन्तः करणकल्पनेऽपि 'अन्तःकरणं त्रिविधमिति' त्रैविध्यकल्पन मनुपपन्नमित्याह—**नचवृत्तोति।** एकस्यैवानेकवृत्तिसम्भवादिति भावः। तत्र श्रुतिबाधमप्याह—**'कामस्सङ्कल्पइति'**। सर्वशब्देनाध्यवसायादीनां धीभेदानां ग्रहः। यद्वा वृत्तिभेदस्याश्रयभेदकत्वे व्यभिचारमप्याह—**कामस्सङ्कल्पइति।** **आयुर्घृतमितिवदति**—कारणे कार्योपचारः। ननु विरुद्धवृत्ति (बुद्धिवृत्तिः) ? राश्रयभेदिकेत्यत्राह—**महतश्चेति।** **भावाष्टकं** धर्माधर्मज्ञानाज्ञान वैराग्यावैराग्यैश्वर्यानैश्वर्याणि। तेषां बुद्धिधर्मत्वं 'धर्मो ज्ञानं विरागऐश्वर्यम्' इत्यादिना निरूपितं। अत्र वाचस्पतिना व्याख्यातं—धर्मोनाम यागादिजनितोऽष्टाङ्गयोगाभ्यासजनितश्चाभ्युदयनिश्रेयसहेतुभूतो गुणविशेषः। ज्ञानं—तत्त्वज्ञानं विरागो नाम 'दृष्टानुश्रविकविषय वितृष्णस्य वशीकारसंज्ञा वैराग्यमिति' वशीकाराख्यं। ऐश्वर्यं—अणिमादिप्रादुर्भावः। एवं चत्वारस्सात्विका (काख्याता) बुद्धिधर्माः। तामसास्तु तद्विपरीता अधर्माज्ञानावैराग्यानैश्वर्याख्याश्चत्वारः तथाचाष्टविधा अन्योन्यविरुद्धा भावा बुद्धिनामकमहत्तत्वधर्मा इति। वृत्तिभेदेन बाह्येन्द्रियमनोहङ्काराणाम्मह

(तत्त्वाद्भेद) तस्तत्त्वान्तराद्भेदकल्पनं च न स्यादित्याह— **बाह्येन्द्रियेति**। **आलोचनं**— सम्मुग्धा कारेण (अस्मीदन्ताकारेण) ज्ञानं आदिशब्दार्थस्तु सङ्कल्पाभिमानौ। **सहकारिभेदात्**— तत्तद्गोलकाधिष्ठानभेदात्। शास्त्रतो महदादीनामसिद्ध्यङ्गीकर्तुः पृथक्करणत्वं वृत्तिभेदश्चसिद्ध इति। अन्तःकरणत्रैविध्यदूषणं सिद्धान्तिनो ? सङ्गतमित्यत्राह-**अत एव शास्त्रत इति**। एकस्यैव वृत्तिभेदसंभवादिति भावः। **एवं चक्षुरादिष्विति**।

रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः-

इति बाह्येन्द्रियस्यान्तरिन्द्रियभेदकवृत्तिभेदकल्पनमपि नोपपद्यते। आलोचनसङ्कल्परूपवृत्त्योरपि एकत्रैवोपपत्तेरिति भावः। एवं सर्ववृत्तीनामेकाश्रयत्वेसति चक्षुरादिष्वाप्तागमेष्वालोचनाख्यवृत्त्यभेदोक्तिरपि राज्यं सुखमितिवद्गौण्यावृत्त्या नेतव्या स्यादित्याह--**एवं चक्षुरादिष्वितीत्यप्याहुः**। महदादीनामनुमानसिद्धानां पक्षत्व मागमसिद्धानां पक्षत्वं वेत्याद्यविकल्पे द्वितीयं दूषयति—**न द्वितीय इति**। **साक्षात्परम्परया वेति**। प्रकृतेर्महान्महतोऽहङ्कार इत्येवंरूपेण सिद्धेरित्यर्थः। तथा च सिद्धसाधनमिति भावः। तदेव कारिकयोपपादयति— **एकेति**। ननु धूमाग्न्योरप्येकप्रमाणवेद्ययोरनुमापकत्वमनुमेयत्वं च दृश्यत इत्यत्राह— **सहदृष्टाग्निधूमवदिति**। एकप्रमाण वेद्यत्वमेकदा निश्चितत्त्वमित्यर्थः।

अत्र कैश्चिद्भेदानां परिमाणादित्यत्र भेदानां— कार्याणां परिमाणात्-स्वाधिकपरिमाणकारणजन्यत्वस्य सिद्धत्वान्महदादिकार्यापेक्षयाधिकपरिमाणमव्यक्तं सिद्धं इति व्याचक्षते। तन्मतमाह-**यदप्याहुरिति**। **वस्त्रादिष्विति**। तथा च विरुद्धमिति भावः। व्यभिचारमप्याह—**अव्यक्तस्यचेति**। **भिनत्ति**— तरति। **व्याप्तिवचनं**— अपरिच्छिन्नत्ववचनं। अव्यक्ते व्यभिचारप्रदर्शनस्य सिद्ध्यसिद्धिदोषादुदाहरणान्तरे व्यभिचारमाह—**घटादीनामपीति**। समन्वयादित्युक्तं दूषयितुमुपक्रमते— **समन्वयश्चेति**। अत्रैवमनुमानप्रयोगः— विवादाध्यासिता महदादिभेदाः स्वानुगताव्यक्तकारणवन्तः। समन्वयात्। यानि च यद्रूपसमन्वितानि तानि तत्स्वभावाव्यक्तकारणकानि यथा मृद्धेमरूपसमन्विता घटमकुटादयो मृद्धेमपिण्डाव्यक्तकारणका इति। तथा च सुखदुःखमोहसमन्विता बुद्ध्यादयस्तादृशाव्यक्तं साधयन्तीति। **सुखादिरूपेष्विति**। भिन्नेष्वेकाकारतानुगतिरिति तैरुक्तेस्सत्वादीनां सुखादिरूपेषु महदादिष्वनुगतिरित्यर्थः। (तत) अव्यक्तकारणकमित्यत्रा (प्य) व्यक्तशब्दस्य कारणपरत्वे सिद्धसाधनात्। येषु यदनुगतं तत्तत्कारणमिति वक्तव्यं तत्राह— **नहीति**। तत्र हेतुमाह-**शौक्ल्येति**। तथा च तत्र व्यभिचार (उक्त) ? इति भावः।

सर्वस्यापि कारणत्वमस्त्वित्यत्राह—**अन्यथेति**। 'त्रिगुणमविवेकि विषयः' इत्यादिना त्वया प्रतिपादितानां त्रिगुणत्वादीनामित्यर्थः। इष्टाप (त्त्या)त्ति

परिहरति—**तथाचेति** । त्रिगुणापेक्षयापि कारणं तत्वान्तरं स्यादित्यर्थः । इदमुपलक्षणं— प्रकृतेरपि विकृतित्वं स्यादिति 'प्रकृति विकृतयस्सप्त' इत्युक्तं विरुध्येतेत्यपि ध्येयम् । ननु कार्यस्य स्वानुगतकारणकत्वमात्रं साध्यं न तु तदनुगतानां यावतां तत्कारणत्वं । तथा च शौक्ल्यादिषु न व्यभिचार इत्यत्राह—**एतेनेति**। एतेनेत्युक्तमेवाह—**घटादिष्विति** । तथा च व्याप्यत्वासिद्धिरिति भावः । **विभक्तस्य**—कार्यावस्थस्य । **अविभक्तस्य**—कारणावस्थस्य । तस्याभेदेन तदात्मकतया तद्वृत्तित्वासिद्धेरिति भावः । ननु समन्वयादित्यस्य एकरूपान्वितत्वादित्यर्थस्य च साध्यमेकोपादानकत्वमिति च कस्य चिन्मतमनूद्य दूषयति—**यद्यपीत्यादिना**। **स्वपरमतनिर्धूतं**—स्वपरमतानुसारेण घटादिषु व्याप्तिशून्यमित्यर्थः । किं च एकरूपान्वितत्वं नाम सर्वथास्व (सर्वसारूप्यं) रूपैक्यं विवक्षितं उत यत्किञ्चिदाकारेण वेति विकल्पमभिप्रेत्याद्यं दूषयति—**सर्वथेति** । तथा च महदादय इति पक्षबहुत्वासिद्धे (राश्रयसिद्धि) रित्यर्थः । द्वितीयं दूषयति— **यथाकथञ्चिदिति**। द्रव्यत्वेनैकरूपवद्भिर्भिन्नैः मृत्तन्तूपादानकैर्व्यभिचारादित्यर्थः । किञ्चैकोपादानक (त्व) ? मित्यत्र किं साक्षादेकोपादानकत्वं साध्यते उत परम्परया यद्वा सामान्येनेति विकल्पाभिप्रायेणाद्ये दूषणमाह—**साक्षादिति** । सृष्टिक्रमादीति । प्रकृतेर्महान्महतोऽहङ्कारस्ततस्तन्मात्राणीत्यादिक्रम इत्यर्थः । तथाचागमबाध इति भावः। व्यभिचारश्चेत्याह—**मृत्तन्त्वादीति** । द्वितीयं दूषयति—**परम्परयेति** । (तथाच) दृष्टान्ते साध्यवैकल्यमिति भावः । तृतीयं दूषयति- **नित्येषु चेति**।

'तस्माच्चविपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य । कैवल्यं (कैवल्याध्यस्तत्वं) माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च । इत्यनेनेति शेषः ।

ननु नास्मन्मतेऽपि नित्यत्वं हेतुमत्त्वविरोधीत्यत्राह—**ननु तेषामिति** । अभिव्यञ्जका अपि तेषां नेष्टा इति भावः । ननु यत्कार्यं येन सहैकरूपं तत्तेन सह समानो (सहैको) पादानकमिति विवक्षितमित्यत्राह—**व्यक्ता व्यक्तयोश्चेति** । आदिशब्दार्थस्तु ·········विषयस्सामान्यमचेतनं प्रसवधर्मि ।

व्यक्तं तथा प्रधानम्' ··· ····· ····· ····· ····· ।

इति विवक्षितः तथा च महदादेः प्रकृत्या सह त्रैगुण्यादिसमानरूपवत्त्वात्तया नित्यभूतया सहैकोपादानकत्वाभावाद्व्यभिचार इति भावः । ननु यत्कार्यं येनकार्येण सरूपमिति विवक्षायां न व्यभिचार इत्यत्राह—**कार्यत्वे सतीति** । ननु

कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ।।

इति तथा च यथा कारणात्मना हेमरूपेणाभेदः । कुण्डलाद्यात्मना भेदः तथा मृत्पिण्डस्वरूपेण भेदेऽपि मृदात्मना कारणतावच्छेदकाकारेण वा अभेदोऽस्तीत्य-

त्राह—**गोमयेति।** एकरूपान्वितवृश्चिकापेक्षया उपादानभूतगोमयवृश्चिकयोः परस्परं विरुद्धधर्मसंसृष्टत्वेन कारणात्मना (प्यभेदस्य) प्यैक्यस्य वक्तुमशक्यत्वादिति भावः। न च एकव्यक्तिदृष्टान्तस्तस्या एकमृत्पिण्डोपादानकत्वादित्यत्राह—वह्निति। तथाचैकं कार्यमेकोपादानकमिति नियम एव नास्ति दूरे बहूनि कार्या (बहुकार्यद्रव्या) ण्यैकोपादनकानीति नियम इति भावः। ननु सर्वकार्याणामप्यनेनानुमानेनैकोपादानकत्वं साध्यते। (तथा च) पटादीनां नानोपादानकत्वेऽपि क्षित्यादावेककर्तृकत्वसिद्धिरिव न विरुद्धमिति पटादीनां पक्षकोटिनिक्षिप्तत्वान्न व्यभिचार इत्यत्राह—**तेषामपीति।** तथा च व्याप्यत्वासिद्धिरिति भावः। ननु सर्वं कार्यजातमेकोपादानकं एकरूपान्वितत्वात् यदेकोपादानकं न भवति तदेकरूपान्वितमपि न भवति। यथात्मानात्मानौ यथा वा शशशृङ्ग कूर्मरोमाणीति तत्राह—**अवीतेति**—व्यतिरेकीत्यर्थः। किं दृष्टाना मेवोपादानानामैक्यं साध्यते। उत तदतिरिक्तैकोपादानकत्वमिति विकल्प्याद्यं दूषयति—**न दृष्ट इति।** तथा च बाध इति भावः। द्वितीयं दूषयति। नापीति। शक्यमिति शेषः। तथाचाप्रयोजकत्वमिति भावः। न चेति। तथा च सत्वादिसमन्वितकारणस्य तदैक्यस्य च श्रुत्यैव सिद्धत्वात्किमनुमानेनेति भावः।

ननु (प्रत्यक्षेण तन्मूलकानुमानेन वा) लिङ्गग्रहणे तदर्थं श्रुत्यनपेक्षणान्नानुमानैवयर्थ्यमिति शङ्कते—**नन्वित्यादिना। तथेति।** सर्वे पदार्थास्सुखदुःखमोहात्मकाः। यथैकमेव वस्तु कंचिद्दुःखाकरोति कंचित्सुखाकरोति कंचिन्मोही करोति; तथा कालभेदेनैक (मेव) पुरुषं प्रति यथाग्निः। तत्र सुखं सत्वात्मकं सत्वपरिणामः दुःखं रजःपरिणामः मोहस्तमःपरिणाम इति 'प्रीत्यप्रीतिविषादात्मान' इत्यादिना साङ्ख्यैरुपपादितैः सुखादिभिस्सत्वादिसमनुगतिरनुमीयते। न तदर्थं श्रुत्यपेक्षेति भावः।

विचित्रगुणहेतुकं—सत्वरजस्तमोगुणहेतुकमित्यर्थः। आद्यं दूषयति—**संप्रतिपन्नेति। दृष्टं**—कण्टकवेधादि। **अदृष्टं**—धातुवैषम्यादि। द्वितीयं दूषयति—**गुणानामिति। भाषणं**—भाष्ये प्रतिपादनमित्यर्थः। 'प्रीत्यप्रीतिविषादात्मानः' 'सत्वं लघु प्रकाशकम्' इत्यादि सांख्यानां भाषणमित्यन्ये। त्रैगुण्यक्लृप्त्ययोगादित्यत्र विपक्षबाधकमाह—**अन्यथेति।** न सत्वमात्रं सुखं जनयति सन्ततजननप्रसङ्गात् अपितून्मिषितम्। तथाचोन्मेषेऽपि विलक्षणास्त्रयो गुणाः कल्पनीयाः। तथा परापरा (परम्परा) पेक्षायामनवस्था स्यादित्यर्थः। त्रयो गुणास्त्रैगुण्यं स्वार्थे ष्यञ्। **सामग्रचनवस्थात्विति।** ननु पूर्वत्रापि सामग्र्यनवस्थैवेति चेत्; सत्यं; तथाऽप्यनुमानतः कल्प्यमानेऽपि कारणे तदुन्मेषादिकारणं ज्ञातव्यं; अत्र तु स्वरूपानवस्था वीजाङ्कुरादिवन्न दोषकरीति भावः।

केचित्तु—एकपदार्थनिष्ठानेकपदार्थपरम्परा दोषः। सामग्र्यनवस्था तु न तादृशी (त्यदोष इ) त्याहुः। एकोपादानकत्वानुमानं च तव सिद्धान्तविरुद्धं चेत्याह—गुणत्रयेति। यथास्वमिति—कार्यस्य सुखाद्यात्मकत्वे सत्वरूपत्वरजोरूपत्वतमोरूपत्वांशभेदेन भिन्नत्वात्तत्तदंशे तत्तत्स्वरूपस्य हेतुत्वात्सर्वं प्रत्यपि नैकमुपादानमिति भावः।

नन्वेकमृत्पिण्डेन क्रमेणोत्पन्नानां घटशरावादीनां दर्शनात् विमतमेकोपादानकं भिन्नत्वे सति विकारत्वादेकमृत्पिण्डोपादानकघटशरावादिवदित्यनुमानस्य किं दूषणमित्यत आह—ततश्चेति। सत्वादीनामेव त्वन्मते प्रकृतित्वाद्बाधो व्यभिचारश्चेति भावः। ननु तत्र न बाधः। ईश्वरानुमानवत्कारणान्तरस्य सिद्धिरित्यत्राह—तथासतीति। त्वन्मते न कल्प्यमानेनैव संख्याविरोधः अपि तु क्लृप्तेनापीत्याह—सत्वादीति। यदपि महदादिकार्यं कारणशक्त्या प्रवर्तते कार्यत्वाद्घटवदिति शक्तितः प्रवृत्तेश्चेति विवक्षितमनुमानं तदनुवदति—शक्तितःप्रवृत्तेश्चेतीति। दूषयति—कथमिति। तत्तत्कार्याणां तत्तत्कारणशक्त्या प्रवृत्तावपि महदादिकार्याणां नैकं कारणमव्यक्तं सिद्ध्यतीति भावः।

ननु सांख्यपक्षे कारणे शक्तिः कार्यमेव; सा चाव्यक्तादनन्यैव शक्तिविशिष्टस्यैवाव्यक्तत्वात्। तथा च महतस्तत्कारणाद (स्यज्ञात्र) भिन्नता। तथाहङ्कारस्यापि महदभिन्नत्वमेवमिन्द्रियादिकार्याणामपि महदभिन्नतया सर्वस्यापि महदुपादानभूतैककारणतया अव्यक्तसिद्धिरिति शङ्कते—नन्विति। मैवमिति। सत्वाद्यात्मकस्याव्यक्तस्यापि नानात्वान्नैकोपादानसिद्धिरिति भावः।

किंच तैलाश्रयस्य तिलस्यापि शक्त्याश्रयस्य कार्यत्वात्तद्वदेव महदादिशक्त्याश्रयस्यापि कार्यत्वनियमात्तस्य कारणशक्तितः प्रवृत्त्यनङ्गीकारे च तस्य कारणस्यापि द्रव्यान्तरत्वात्तत्वसंख्याविरोध इत्याह—यदि तैलाश्रयेति। अव्यक्तावस्थस्याश्रय इत्यर्थः। अथ नेति। अव्यक्तावस्थस्याश्रयो यदि न स्वीक्रियत इत्यर्थः। विषम इति तिलस्याव्यक्तावस्थाश्रयस्यैक (व कारण) त्वादिति भावः।

यद्यप्ययमुत्कर्षसमभेदः व्यञ्जनवत्त्वापादनवत्; तथाऽपि नियतस्य सहचारस्य सत्त्वे तादृशो नेति भावः। समाधानमाशङ्कते—नोदाहरणमिति। तथा च सूक्ष्मावस्थस्यैकस्यैव जगदुपादानत्वाङ्गीकारे न तत्वाधिक्यं; ततोऽवस्थान्तरस्य सूक्ष्मत्वेन यावतीनां तादृशीनामवस्थानामेकत्वेन भेदगणनाप्रयोजकत्वाभावादिति भावः।

संप्रतिपन्नावधिरिति। महत्तत्वावधिरित्यर्थः। यद्यप्यहङ्कारादिकारणस्य महतस्सूक्ष्मत्वमस्ति (तथापि) तदपि सूक्ष्मान्तरसापेक्षं। तस्य च सूक्ष्मावस्थस्य

न तत्रान्तर्भावः इति यद्युच्येत तदा तदप्युपादानत्वात्सूक्ष्मान्तरसापेक्षमिति कथं तत्वपङ्क्तीयत्तेत्याह—यद्वेति—यदीत्यर्थः ।

केचित्तु—कथमव्यक्तसिद्धिरिति—शक्तिसिद्धावपि नाव्यक्तसिद्धिरित्यर्थः । ननु शक्तित एव कार्यं प्रवर्तते । सा चाव्यक्तमेव । तिलेषु तैलमिव । यथा च तत्सूक्ष्मावस्थं तथाचाव्यक्तसिद्धिरिति शङ्कते—नन्विति यदिति । तथाच तैलाश्रयतिलवदव्यक्ताश्रयात्मकशक्त्याश्रयोऽप्यङ्गीकार्य इति सिद्धान्तविरोध इत्यर्थः । विभ्रम इति । तिलस्येव शक्त्याधारस्या (त्रा) नभ्युपगमादिति भावः । तर्हि तदुदाहरणं त्यजत इत्याह—नोदाहरणमिति । तथापि संप्रतिपन्नावधिरिति । सूक्ष्मभूतमहत्तत्वावधिरित्यर्थः ।

यद्वा—सूक्ष्मस्यापि सूक्ष्मान्तरसापेक्षत्वात्तत्वेयत्तासिद्धिर्न स्यादिति दूषणं तदवस्थमेवेत्याह—यद्वेति । अपिचेत्यर्थ इत्याहुः । ननु कारणेषु (कारणं) सूक्ष्मं कार्यं शक्तिरिति शरीरे सूक्ष्मशरीरवद्वर्तत इत्यत्राह—एतेनेति यथाहुरिति । सांख्यां इति शेषः ।

नियतं महदादिसूक्ष्मपर्यन्तम्

संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ।

इत्यादिशब्दार्थः । अस्यार्थः—पूर्वं मातापितृजन्यशरीरस्य भस्मकीटान्तत्वेन निवृत्तिः सूक्ष्मशरीरस्य नैयत्यं चोक्तं—

सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ।

इति । पूर्वोत्पन्नं प्रकृतस्थूलभूतोत्पत्तेः पूर्वं प्रकृतित उत्पन्नं प्रतिपुरुषमेकैकमित्यर्थः । अ (व्यक्तं) सक्तं—अव्याहतं शिलास्वप्यनुप्रवेशसमर्थमिति यावत् । नियतं—आच महासर्गादाच प्रलयादवतिष्ठते । महदादिसूक्ष्मपर्यन्तं—महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्यन्तं तेषां समुदाय इत्यर्थः ।

नन्वेतदेवास्तु किं षाट्कौशिकशरीरेणेत्यत आह—संसरतीति । उपात्तं षाट्कौशिकं शरीरं जहाति हायंहायं चोपादत्ते; तस्मान्निरुपभोगं—यतः षाट्कौशिकं विना सूक्ष्मशरीरं निरुपभोगं तस्मात्संसरति ।

ननु धर्माधर्मनिमित्तः संसारः; न च सूक्ष्मशरीरस्यास्ति तद्योगः; तत्कथं संसरतीत्यत्राह । भावैरधिवासितं—धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावाः । तदन्विता बुद्धिस्तदन्वितं सूक्ष्मशरीरं तदपि भावैरधिवासितं; यथा सुरभिचम्पकसम्पर्काद्वस्त्रं तदामोदवासितं भवति । तस्मात्संसरति । तस्मात्प्रधानमिव महाप्रलये तच्छरीरं न तिष्ठतीत्यत्राह—लिङ्गमिति । लयं गच्छतीति

लिङ्गं हेतु (मत्त्वा) त्वादिति भावः। किमत्र सूक्ष्मशरीरसद्भावे प्रमाणं प्रत्यक्षमनुमानमागमो वेति विकल्पमभिप्रेत्य प्रथमं दूषयति। न हीति स्थूलवत्—स्थूलशरीर इव। सप्तम्यर्थे वतिः। द्वितीयमाशङ्कते—विभोरिति स्वतः स्पन्दात्मकगतेरसम्भवादिति भावः। तत्तदेशगत्युपचार इति—यद्यपि लिङ्गशरीरे साक्षाद्गतिरस्ति तथाप्यात्मनो न सेति तत्र गत्युपदेश औपचारिक एव। तथा च देशान्तरशरीरोत्पत्त्याप्यौपचारिकव्यवहारसम्भवान्नोक्तं गतिमत्त्वं लिङ्गमिति भावः। अनुमानान्तरं शङ्कते—नन्विति शरीरवत्त्वे साध्ये सिद्धसाधनमिति तात्कालिकेति। विपक्षवाधमाशङ्कते अशरीरत्व इति। प्रलयवदिति। त्वयापि महाप्रलये लिङ्गशरीरनाशस्याङ्गीकारादिति भावः।

तस्मादपिचासिद्धं परोक्षमाप्तागमात्सिद्धम्।

इति न्यायेन तृतीयमाशङ्कते। आगमस्त्विति—'वेत्थ कतम्यामाहूतावापः पुरुषवचसो भवन्तीति प्रश्ने; इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स यथा पेशसा मात्रामुपाददानोऽन्यन्नवतरं कल्याणतरं कल्याणतमं रूपं कुरुते।

अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्।'

इत्यागमस्त्वित्यर्थः। नन्वत्र शरीरपदाभावात्कथं शङ्केति चेन्न। पुरुषशब्दस्य पुरि शेत इति व्युत्पत्त्या लिङ्गशरीरपरत्वात्। तस्यापि स्थूलशरीररूपपुरस्स्थत्वात्। तत्त्वार्थं इति अर्थवानेवेत्यर्थः। गतार्थ इति पाठस्तु सुगमः।

ननु सूक्ष्मशरीरनिराकरणं सूत्रकारविरुद्धमित्यत्राह—सूक्ष्ममिति। चन्द्रसंवादादिकं तु तादात्विकशरीरान्तरमादाय नेयं सूक्ष्मशरीरस्यायोग्यत्वादिति भावः।

ननु

बुद्धीन्द्रियाणि खलु पञ्च तथापराणि
कर्मेन्द्रियाणि मनआदिचतुष्टयं च।
प्राणादि पञ्चकमथो वियदादिपञ्च
कामाश्च कर्म च तमः पुनरष्टमी पूः॥

इति। तथा च—

शब्दस्स्पर्शश्च रूपं च रसो गन्धश्च पञ्चकम्।
बुद्धिर्मनश्चाहङ्कारः पुर्यष्टकमुदाहृतम्॥

इति कालोत्तरसंहितादिवचनोपबृंहितया 'देवानां पूरयोध्या। अष्टाचक्रा नवद्वारा' इति श्रुत्या लिङ्गशरीरसिद्धिरिति चेत्तत्राह—पुर्यष्टकेति। स्थूलशरीर एव रूपकमात्रत्वात्तस्याश्श्रुतेरिति भावः।

भेदानां परिमाणादित्यु (त्याद्यु) क्तहेतुपञ्चकमध्ये त्रयो हेतवो निरस्ताः । परिशिष्टं हेतुद्वयं निराकर्तुमनुवदति । **कारणकार्यविभागादिति** ॥

सिद्ध्यसिद्धिविकल्पेनेति सिद्धिः श्रुत्यैवेति तयैव प्रकृतिसिद्धेस्सिद्धसाधनं असिद्धावाश्रयासिद्धिरिति भावः । व्याप्यत्वासिद्धिमप्याह—**किंचेति** । यथा मृत्पिण्डाद्विभज्य तदेकदेशो घटः क्रियते । पुनस्तदुपम (र्दन) र्दने मृत्पिण्ड एव निविशते न तथा पटस्तन्तोरेकस्माद्विभज्योत्पद्यते । न च स्वोपम (र्दन) र्दने निविशते इत्यर्थः । **तत्र हेतुर्नहीति** । तन्तूनामेव तदेकदेशत्वादिति भावः । **अनेनेति**-पटनिदर्शनेनेत्यर्थः । प्रत्येकं पटानामनेकतन्त्वारब्धत्वादिति भावः ।

जगत एकप्रकृत्युपादानकत्वसाधने स्वमते बाधो विशेषविरुद्धश्चेत्याह—**त्वयाऽपीति** । पूर्वोक्तानुमाने व्यभिचारमप्याह—**न तत्र सर्वत्रोपादानत्वमिति**—उपदानत्वनियमो नेत्यर्थः । **आरणेयस्य**—अरणिजन्यस्य । शुभ्रादित्वादपत्यार्थे ढक्प्रत्ययः । व्यभिचारस्थलान्तरमप्याह—**न च वह्न्यंश इति** । **अव्यक्तस्य**—प्रकृतेः । उभयथा विभागाविभागदर्शनान्निमित्तोपादानयोरुभयोरप्यनुमानप्रसङ्गेन तत्वसंख्याव्याघातः; तत्परिहारार्थमन्यतरानुमाने निमित्तमात्रस्यैव सिद्धिप्रसङ्गे-नार्थान्तरमित्याह—**विश्वनिमित्तस्येति** ।

नन्वस्त्वेकं निमित्तं सैव प्रकृतिरित्यत्राह—**विजातीयस्यापीति** । कार्यस्य सत्वाद्यात्मकतया तदात्मिका प्रकृतिस्त्वया सिषाधयिषिता; निमित्तत्वे कार्यगत-सत्वाद्युपपादकत्वाभावादप्रयोजकतेति भावः ।

किंचाणुसंघात एव घटादीनां विभागाविभागदर्शनान्महदादीनामपि तेष्वेव विभागाद्यनुमानस्योचितत्वान्न तदतिरिक्तस्यैकस्य विभागाविभागभूमित्वानुमानं युज्यत इत्याह—**किंचेति** । तथा च महदादि (तत्वमेव) कमेव प्रमाणाभावात् पक्षीकर्तुं न शक्यत इति भावः । अर्थान्तरपरिहारमाशङ्कते—**कृत्स्नेति** । समौ चोद्यपरिहाराविति परिहरति **नेति** । वैषम्यमाशङ्कते—**अणूनामिति** । पुनस्सम-तामाह—**नेति** । बहुकार्योत्पत्तावित्यनन्तरमनुपपत्तिस्स्यादिति पदमनुषञ्जनीयम् । तथा च पृथुकार्यानुपपत्तिवदल्पपरिमाणानेकानुपपत्तिस्समेति भावः ।

अनुपपत्तिमेवोपपादयति । **प्रतिकार्यमिति** कृत्स्नविनियोगपक्षे कार्यान्तराणाम नुत्पत्तिःएकदेशविनियोगपक्षे सावयवत्वमित्यन्वयः । कार्यान्तराणामनुत्पत्तिरित्यत्र स्वल्पपरिमाणानामप्यनुत्पत्तिर्बोध्या । पक्षद्वयानुपपत्तौ प्रकृत्युपादानत्वं वा तद्विशिष्ट ब्रह्मोपादानत्वं वा कथं युष्माभिरङ्गीक्रियते इत्यत्राह—**श्रौते त्विति** । श्रुतान्यथा-नुपपत्त्या यागादावदृष्टकल्पनावदत्राप्यव्यापिपरिणामहेतुसंयोगकल्पनासम्भवादि-त्यर्थः । **अपिचेति** ननु महदादेरेव सूक्ष्मरूपावस्थाङ्गीकारे सैव प्रकृतिरिति चेन्न; तन्मते महदादीनां सूक्ष्मरूपेण स्थित्यङ्गीकारेण प्रकृतेस्ततो भिन्नत्वात् ।

ननु घटादयो हि स्वभिन्नमृत्पिण्डादुपादीयमानास्ततो विभक्ता अविभक्ताश्चेति व्याप्तिरस्तीति चेत्तत्राह—घटादयोऽपीति एवं च तत्तदंश एवोपादानं न तु ततो विभक्तांश इति भावः। अत्र यदुक्तं वाचस्पतिना विभागाविभागनिदर्शनतया—'यथा हि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निस्सरन्ति चाविर्भवन्ति; न तु कूर्मस्तदङ्गानि वोत्पद्यन्ते ध्वंसन्ते चेति' तद्दूषयति **कूर्मावयवेति** तत्र व्यक्ताव्यक्तावस्थाभेदो नोपादानोपादेयभावात् किं त्वावृतत्वानावृतत्वाभ्याँ। ततश्च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमिति भावः। **नचेति**। उपादानोपादेयस्थले नाशोत्पत्त्यव्यवहारादिति भावः।

त्रिगुणपरीक्षायां प्रकृत्याद्यनुमाननिरासःप्रकृत्यादेरागमिकत्वं च

पूर्वं महदादीनां स्वरूपं किमागमेनानुमानेन वा सिद्धमिति विकल्प्य, स्वरूपासिद्धिरुक्ता। इदानीं तन्मात्राणां महदादिवद्वृत्तिभेदरूपलिङ्गाभासोऽपि नास्तीत्याह—**आगमेनेति**।

ननु तन्मात्राणां यदि सूक्ष्मत्वेनाप्रत्यक्षत्वं तथा सति लौकिकानां तद्ग्रहणाभावेन क्वचिदपि सूक्ष्मादिव्यवहारो न स्यादित्यत्राह—**उद्भवानुद्भवाद्यैस्त्विति**। उद्भवः स्फुटतरप्रकाशः। अनुद्भवस्तदभावः। न्यूनपरिमाणाधिकपरिमाणादिकमादिशब्दार्थ इत्यन्ये।

ननूद्भूतशब्दादिकं भूतं अनुद्भूतशब्दादिकं तन्मात्रं उद्भवोऽनुद्भवश्च लोकसिद्धावित्यत्राह—**उद्भवेति** सिध्यतां नामोद्भवानुद्भवौ लोके; तथाऽपि एकस्मिन्नेव तत्वे तौ सूक्ष्मस्थूलविभागं कुरुतः न तु तत्वान्तरत्वमापादयेतामिति भाव इत्यपरे।

इन्द्रियाणामप्यागमैकगम्यत्वमाह—**अक्षेष्विति**। वचनादिक्रिया करणसाध्या क्रियात्वात् भिदि (क्रिया) वदित्यनुमानमपि ताल्वाद्यवयवातिरिक्तेन्द्रियसाधकं न सम्भवतीत्याह—**वचनादीनामिति**। सहकारि–बलोत्साहादिदशा बाल्यादि। अभ्युपगम्याप्याह–**तदतिरिक्तेति**।

यत्तावद्वाचस्पतिराह—'कालश्च वैशेषिकाभिमतोऽनागतादिभेदं प्रवर्तयितुं स्वतो नार्हति। ततश्च तपनपरिस्पन्दाद्युपाधिभेदेनानागतादिभावः प्रतिपाद्यते। सन्तु त एवोपाश्रयोऽनागतादिव्यवहारहेतवः कृतं कालेनेति साङ्ख्याचार्याः' इति। तदन्यायेन प्रधानादिकल्पनायां अपि युष्माभिर्भेतव्यमित्याह—**कल्पनेति**। कलाश्च कालश्च–उपाध्यधीनः कालःकलाः शुद्धस्तु कालशब्दार्थः।

केचित्तु कलाकाष्ठादीति पाठः। तदर्थस्तु कालदिशाविति वदन्ति। प्रसङ्गाच्छैवमतमप्युक्तन्यायेन दुष्टमिति सूचयति। **षट्त्रिंशदिति**। तदुक्तं श्रीकरभाष्ये—

पृथ्व्यादि पञ्चभूतानि तन्मात्रपञ्चकं तथा।
बुद्धीन्द्रियाणि पञ्चापि पञ्च कर्मेन्द्रियाणि च॥

मनो बुद्धिरहङ्कारः कला कालौ (काष्ठा) तथैव च।
नियती रागविद्ये च प्रकृतिस्तद्गुणास्त्र (श्र) यः॥
धर्माधर्मौ तथा जीवः ईशस्तत्त्वानि बुध्यतु।

इति। (अन्यत्रापि तेषां) शैवतत्त्वसंग्रहे च—

शैवागमेषु मुख्यं पशुपतिपाशा इति क्रमात्त्रितयम्॥
तत्र पतिश्शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशः।

इति।

मलं कर्म च माया च मायोत्थमखिलं जगत्॥
तिरोधानमयी शक्तिरर्थपञ्चकमिष्यते।

इति पाशविभागः।

शुद्धानि पञ्च तत्त्वान्याद्यन्तेषु स्मरन्ति शिवतत्त्वम्।
शक्तिसदाशिवतत्त्वे ईश्वरविद्याख्यतत्त्वे च॥
पुंसो ज्ञकर्तृतार्थं मायातस्तत्त्वपञ्चकं भवति।
कालो नियतिश्च तथा कला च विद्या च रागाश्च॥
अव्यक्तान्मायातो गुणतत्त्वं तदनु बुद्ध्यहङ्कारौ।
चेतो धीकर्मेन्द्रियतन्मात्राण्यनु च भूतानि॥

इति। एतानि युक्त्या समर्थ्यन्ते आगमेन वेति विकल्पं मनसिकृत्याद्ये आह—यदि युक्त्येति। सांख्यमतवत् दूषितव्यमित्यर्थः।

द्वितीय आह—न विस्रम्भ इति। तादृश्याः श्रुतेरभावात्तदागमस्य सूत्रकृद्विद्विष्टत्वादिति भावः।

नन्वौपनिषदपक्षेऽपि—

तं षड्विंशकमित्याहुः सप्तविंशमथापरे।

इत्यादिना ह्यव्यवस्थया गणनान्न तत्त्वव्यवस्थेत्यत्राह—तं षड्विंशकमिति। सप्ताविंशमिति यदि पाठस्तदा छान्दसो दीर्घः। यदा व्यक्तमादाय गणना क्रियते तदा षड्विंशकत्वं। यदा तत्पूर्वावस्थयोरक्षरतमसोरन्यतरदप्यादाय तदा सप्तविंशत्वमिति श्रुतमात्रस्वीकारान्न कल्पनादोषो नाप्यव्यवस्थितिरिति भावः।

पद्यशेषं व्याख्याति—एवमित्यादिना। कालभेदः सर्गादिकालविशेषः। तथैवेति सात्विकादिभेदेनेत्यर्थः। प्राच्यात् सात्विकाहङ्कारात् भूतादिसंज्ञस्तामसाहङ्कारः। तैजसाख्यः राजसः अनुग्राहकतया प्रवृत्त्युत्पादनेनेति शेषः। तन्त्रान्तरनिष्ठैरिति—शैवशास्त्रनिष्ठैरित्यर्थः।

ज्ञानेन्द्रियकर्मेन्द्रियभूतान्यहङ्कारतः क्रमशः। इत्युक्तेः।

केचित्तु—मायिनस्तन्त्रान्तरनिष्ठाः इन्द्रियाणां भौतिकत्वेऽपि तन्मध्ये सात्विकांशैः भूतैर्ज्ञानेन्द्रियाणि राजसांशैः कर्मेन्द्रियाणि तामसांशैर्भूतानीत्युक्तेरित्याहुः। प्रमाणशून्यत्वादयुक्तं तदित्याह—**तच्चायुक्तमिति** ॥ ११ ॥

त्रिगुणपरीक्षायां तन्मात्रादेरागमिकता महदाद्युत्पत्तिप्रकारश्च

अक्ष०। एवं द्रव्याद्रव्ये उभे अप्यभ्युपगन्तव्ये इत्युक्तम्। अथ द्रव्येषु प्रथमोद्दिष्टं त्रिगुणमादौ निरूप्यते। तत्र प्रत्यक्षगम्यानि पृथिव्यादीनि चत्वारि पञ्च वा भूतान्येव तत्वानीति केचिदाहुः। ततोऽधिकान्येकोनविंशतितत्वान्यपि अतीन्द्रियाणि स्वतन्त्रेण शास्त्रेणैव सिद्धयतीत्याह—**स्वच्छन्देनेति**—साधकबाधकप्रमाणाभावे सति इतरनिरपेक्षं विशिष्टार्थबोधनसामर्थ्यमागमस्य स्वाच्छन्द्यम्। आगम इह श्रुतिस्मृतीतिहासादिः। कारणदोषबाधकप्रत्ययविरहादतीन्द्रियविषयक शास्त्रमपि प्रत्यक्षवद्विश्वसनीयमेवेति भावः। तत्र कानि तत्वानि अधिकानीत्यत्राह—**प्रकृतीति** 'प्रकृतिः" "महान्" "अहङ्कारः" "तन्मात्राणि पञ्च" "एकादशेन्द्रियाणि"इति एकोनविंशतितत्वानामपि सिद्धिरित्यर्थः। प्रत्यक्षसिद्धपञ्चभूतसाहित्येन चतुर्विंशति रिति भावः।

ननु पृथिव्यादेरव्यक्तावस्थाविशेषरूपतया प्रत्यक्षतस्सिद्धौ अव्यक्ततादेरपि प्रत्यक्षत एव सिद्धिस्स्यात् किं शास्त्रेणेत्यत्राह—**नाध्यक्षेणेति**। **अप्रतीतेरिति** प्रकृत्याद्यवस्थस्य प्रत्यक्षेण प्रतीत्यभावात् न प्रात्यक्षिकसिद्धिरव्यक्तादेर्वक्तुं शक्येति भावः। दृश्यते हि लोकेऽपि एकस्य तन्तोर्दूरस्थस्य तन्तुपटावस्थाभेदेन दृश्यत्वादृश्यत्वे अपि। अतः कार्यावस्थायां दृश्यस्य कारणावस्थायामदृश्यत्वं नानुपपन्नम्।

ननु साङ्ख्योक्तानुमानतः प्रधानादिसिद्धिस्स्या दित्यत्राह—**न पुनरनुमयेति**। "कारणगुणात्मकत्वा त्कार्यस्या व्यक्तमपि सिद्ध" मित्युक्तेनानुमानेन नाव्यक्तमनुमातुं शक्यमित्यर्थः। कुत इत्यत्राह **व्याप्तीति** महदादि–स्वगुणसजातीयगुणककारणकं कार्यत्वादित्यनुमाने गोमय वृश्चिकादौ सजातीयगुणकत्वाभावेन व्यभिचाराद्व्याप्तिविरहः। अतीन्द्रियमहदादिपक्षस्वरूपासिद्ध्या आश्रयासिद्धिः तस्याप्यनुमानतस्सिद्धौ--लिङ्गासिद्धिः। एवं भेदानां परिमाणा" दित्यादिना परोक्तानुमानान्तराणामपि चेतनादौ परिमितत्वादिहेतोर्व्यभिचारदर्शनेन–व्याप्त्याद्यभावात् नानुमानमव्यक्तसाधकं स्यादिति भावः। एवमागमादेवाधिगतेषु महदादिषु सत्वगुणाद्युन्मेषभेदेन सात्विको राजसस्तामसश्चेति त्रिविधो महानुत्पद्यते त्रिभ्यश्च महद्भ्यः तथैव त्रिविधोऽहङ्कार इत्याह—**सत्वादीति**। ततः परं **प्राच्यात्** प्राथमिकात् सात्विकाहंकारादेकादशेन्द्रियाण्यप्युत्पद्यन्ते। **परः**–अन्तिमस्तामसाहङ्कारः भूतादिसंज्ञकः। **मात्राः**—शब्दादितन्मात्राः। **क्रमाज्जनयति**। **मध्यमस्तु**—तैजसाख्यो राजसाहङ्कारस्तु। **उभयार्थः** पूर्वापरसात्विकतामसाहंकारयोः यद्यत्कार्यं तत्रानुग्राहको भवतीत्याह—**प्राच्यादिति**।

तत्राहङ्कारजन्यं भजति परिणतैः शब्दमात्रं नभस्त्वं
तद्वत्तन्मात्रपूर्वास्तदुपरि मरुदग्न्यम्बुभूम्यः क्रमात्स्युः ।
सूक्ष्मस्थूलस्वभावस्वगुणसमुदयप्रक्रियातारतम्यात्
तन्मात्राभूतभेदः कललदधिनयात् कल्पितस्तत्त्वविद्भिः ॥ १२ ॥

सर्वा० । एवं प्रकृत्यादीनामागमगम्यत्वं सृष्टिप्रकारं च संजगृहे । अथ तेषु तन्मात्रसृष्टौ श्रुतिस्मृतिविप्रतिपत्तेस्संशयं विपर्ययं वा निरस्यति–तत्रेति॥ श्रूयते हि* तन्मात्राणि भूतादौ लीयन्त इति । नच श्रुतिविरुद्धा स्मृतिरुदीयेत; अतः पञ्चानामपि तन्मात्राणां तामसाहङ्कारादुत्पत्तिः। बहुवचनात् बहुत्वस्य च प्रसिद्धितो नियमः । भूतानां तु यथास्वं तन्मात्रेभ्यः क्रमादुत्पत्तिरिति कश्चिन्मन्यते । तं प्रति ब्रूमः—न ह्यनुपबृंहणा श्रुतिराप्ततमा । अन्योन्यघटितानेकोपबृंहणविरोधे तदनुगुणं नेतव्या । अतः पाशवद्बहुवचनमनादरणीयम् । अंशभूयस्त्वव्यक्त्यर्थं वा । तस्माच्छब्दतन्मात्रमेकमहङ्कारजन्यम्, तच्च परिणतिविशेषादाकाशत्वं भजते । एतेन सर्वत्र सृष्टौ द्रव्यानुवृत्तिस्सूच्यते । तद्वत्—आकाशवत् । तन्मात्रपूर्वाणि वाय्वादिभूतानि स्युः । ननु यदि शब्दाद्याश्रयतया तत्तद्भूतत्वं तर्हि कथं तत्र पञ्चकद्वयकल्प्तिरित्यत्राह—सूक्ष्मेति । स्वगुणा इह शब्दादयः, तेषां समुदय उत्पत्तिः । तत्प्रक्रियातारतम्यं सूक्ष्मस्थूलस्वभावतयैव । तच्च शास्त्रगम्यम् । कललशब्दोऽत्र दुग्धदधिमध्यावस्थाविषयः । तत्र हि निवृत्तभूयिष्ठमाधुर्यमीषदम्लत्वमुपलभ्यते तथा स्यात् ॥ १२ ॥ इति तन्मात्रभूतसृष्टिप्रकारः ।

आनन्द० । सत्वाद्युन्मेषभिन्नादित्यादिना सृष्टिरुक्ता । पुनस्तदुक्तौ पौनरुक्त्य (मिति शङ्कां परिहरन्नवसरसङ्गतिं दर्शयति) माशङ्क्यावतारयति—एवं प्रकृत्यादीनामिति । श्रुतिस्मृतिविप्रतिपत्तेरिति–-'तन्मात्राणिभूतादौ लीयन्ते' इत्याथर्वणश्रुतिः ।

प्रधानं तत्वमुद्भूतं महत्तत्वं समावृणोत् ।

इत्यारभ्य—

विकुर्वाणानि चाम्भांसि गन्धमात्रं ससर्जिरे ।
संघातो जायते तस्मात्तस्य गन्धो गुणो मतः ॥

इत्यन्ता विष्णुपुराणरूपा स्मृतिः । नचेति । विरोधाधिकरणन्यायादित्यर्थः । ननु पञ्चत्वस्याश्रवणाद्विरोधो नास्तीत्यत्राह–-बहुवचनादिति । नन्वेवं आकाशाद्वायुरित्यादिकं विरुध्येत तत्राह—

भूतानामिति । तत्र पौर्वापर्यमात्रे तात्पर्यं न त्वव्यवधानांशोऽपि स्वीकार्यः । तथा सत्याथर्वणश्रुतिबाधापत्तेः । न च स युक्तः; अबाधेनोपपत्तौ बाधस्यान्याय्यत्वात् । अत एव भट्टपादैर्विरोधाधिकरणे —

यदि द्वित्राङ्गुलं मध्ये विमुच्योत्तरभागतः।
वेष्टयेतौदुम्बरीं तत्र किं नाम न कृतं भवेत् ॥

इति। श्रुतिस्मृत्योरविरोधोऽङ्गीकृतश्चेत् किं पुनश्श्रुत्योरिति भावः।

कश्चित्—साङ्ख्यः। अनुपबृंहणेति—त्रिवृत्करणादिश्रुतिवदिति भावः।

तर्हि बहुवचनस्य का गतिरित्यत्राह—पाशवदिति। अग्नीषोमीये एकपशुके पाशबहुत्वाभावात् 'अदितिः पाशानिति' बहूवचनमविवक्षितं अंशबहुत्वपरं वा तत्र निर्णीतं। तथात्राप्यविवक्षा शब्दतन्मात्राणामनेकत्वज्ञापनेन चरितार्थं वेति भावः। उपसर्जनस्यापि तात्पर्यात्परामर्शस्तच्छब्देनेत्याह—आकाशवदिति।

मूले कललदधिनयादित्यत्र नाडीमुष्टयोश्चेति ज्ञापकादुपपत्तिरिति भाव, ॥ १२ ॥

त्रिगुणपरीक्षायां तन्मात्रभूतयोरुत्पत्तिः श्रुतिस्मृतिविप्रतिपत्तिनिरासश्च।

अक्ष० मात्राः प्रजनयति पर इति पूर्वमुक्तं। तत्र किमविशेषात् सर्वाणि तन्मात्राणि साक्षादेव जनयत्यहङ्कारः उत किञ्चित्साक्षादन्यानि परम्परयेत्यत्राह तत्रेति। तन्मात्रेष्वित्यर्थः। अहङ्कारजन्यमिति साक्षात्तामसाहङ्कारजन्यमित्यर्थः। शब्दमात्रमिति शब्दतन्मात्रमात्रमित्यर्थः। नभस्त्वमिति आकाशत्वमित्यर्थः। परिणतेः भजतीति-परिणामात्प्राप्नोतीत्यर्थः। अहंकारात्साक्षाच्छब्दतन्मात्रमेव जायते "तन्मात्राणि भूतादौ लीयन्ते" इति प्रलयश्रुतौ अनेकोपबृंहणपुराण स्मृत्याद्यनुरोधेन बहुवचनमविवक्षितं अवयवबहुत्वपरं वाऽश्रयणीयं शब्दतन्मात्रमेव स्थूलावस्थाविशेषेण आकाशरूपं भवति कारणद्रव्यस्वरूपमेव हि सर्वत्र कार्यात्मना परिणमत इति भावः।

तद्वदिति शब्दतन्मात्रात् आकाश इव। तन्मात्रपूर्वाः स्पर्शरूप-रस-गन्ध-तन्मात्रकारणकाः। तदुपरि आकाशोत्पत्तेः पश्चात्। मरुदिति वायु-तेजो-जल-पृथिव्य इत्यर्थः। क्रमात्स्युः उत्पद्यन्त इत्यर्थः।

तन्मात्राणां भूतानांच को भेद इत्यत्राह-सूक्ष्मेति शब्दादितन्मात्रासु—सूक्ष्मस्वभावाः—शब्दादयो गुणा उत्पद्यन्ते भूतेषु स्थूलस्वभावा-इत्येवं प्रकारतारतम्यात्। तन्मात्राभूतभेदः—तत्वपङ्क्तौ परिगण्यत इत्यर्थः। भूतगुणस्य तन्मात्रे सूक्ष्मरूपत्वे तत्पूर्वतत्वएव तदन्तर्भावस्स्यादित्यत्राह—कललेति कललशब्देनात्र निवृत्त भूयिष्ठ माधुर्यं ईषदम्लत्वमापन्नं दुग्धदधिमध्यावस्थं पूर्वोत्तरवैलक्षण्यात्-तत्वान्तरं कल्पितं तत्वज्ञैरित्यर्थः। ॥ १२ ॥

अद्भ्योऽग्निस्तेजसस्ता इति न हि वचसोर्बाधितुं युक्तमेकं
निर्वाहः कल्पभेदाद्यदि न दृढमितात्तत्त्वसृष्टयैकरूप्यात् ।
व्यष्टौ ताभ्यः कदाचित्तदुपजनिरतो व्यत्ययस्तत्समष्टौ
आदावप्सृष्टिवादश्श्रुतिमितमितरन्न प्रतिक्षेप्तुमीष्टे ॥ १३ ॥

सर्वा० । एवं तन्मात्रभूतसृष्टिप्रकार उक्तः । तत्र तोयतेजसोः सृष्टौ प्रमाणविप्रतिपत्तिं शमयति—अद्भ्योऽग्निरिति ॥ अबाधेन गतिमत्त्वे श्रुतिविरोधप्रतीतावपि स्मृतिस्तद्वदबाध्येति भावः । गत्यन्तरं निवारयति—निर्वाह इति । स्वेष्टां गतिमाह—* व्यष्टाविति । निमित्तभूताभ्य इति भाव्यम्, अतश्शब्दो हेतुमवधिं वा ब्रूते । ननु * आपो वा इदमग्रे * अप एव ससर्जादावित्यादिश्रुतिस्मृतिदर्शनादग्न्यादेस्सर्वस्याद्भ्यस्सृष्टिस्स्यादित्यत्राह—आदाविति । महदादीनामिवाग्नेरप्यद्भ्यः पूर्वभावित्वं वहुश्रुतिस्मृतिसिद्धमतस्तदविरुद्धं दुर्निवारमित्यर्थः । श्रुतिषु च न्यूननिर्देशेष्वनुक्तमधिकमन्यतो ग्राह्यम्; श्रुतहानायोगात्, अव्यवस्थितन्यूनाधिकसृष्टिकल्पने गौरवाच्च ॥ १३ ॥ इति अप्तेजसोर्व्यष्टिसृष्टिविशेषः ॥

आनन्द०। सृष्टौ श्रुतिस्मृति (विप्रतिपत्तः) विरोधः पूर्वश्लोके परि (हृता) हृतः अत्र स एव परिह्रियत इति पौनरुक्त्यं वारयन् पूर्वसङ्गतत्वान्न पृथक् संगतिरित्याह—एवं तन्मात्रेति । तोयतेजसोरिति । 'अग्नेराप' इति श्रुत्या तेजसस्सकाशादपामुत्पत्तिरुच्यते ।

अवावृतमिदं सर्वमद्भ्योऽग्निरुदपद्यत ।

इति स्मृत्या अद्भ्यस्तेजसस्सृष्टिः प्रतिपाद्यत इति श्रुतिस्मृत्योर्विप्रतिपत्तिः । न च श्रुत्या स्मृतिबाधः अबाधेनापि सम्भवे बाधस्यान्याय्यत्वादित्याह—अबाधेन गतिमत्त्व इति । तद्वदिति—श्रुतिवदित्यर्थः । तदुक्तं—

परस्परविरुद्धत्वं श्रुतीनां न भवेद्यदि ।

स्मृतेः श्रुतिविरुद्धायास्ततो मूलान्तरं भवेत् ॥

इति । यथा श्रुत्योर्विरोधे निर्वाहस्तथा विरुद्धाया अपि स्मृतेरिति भावः । निमित्तिभूताभ्य इति । 'अद्भ्योऽग्निरिति' वचनं व्यष्टिसृष्टौ तेजः प्रति निमित्तकारणत्वमाह यथा तप्ततैलेऽग्निमुत्पादयन्त्यापः । 'अग्नेराप' इति तु समष्टिसृष्टौ उपादानत्वमाहेति न विरोध इत्यर्थः । पञ्चीकृतेभ्यः (भूतत्वापन्नेभ्यः) उत्पत्तिर्व्यष्टिसृष्टिः ततः प्राक्तनसृष्टिस्समष्टिसृष्टिः । न्यायत ? इत्यनेनैव हेतुत्वस्य सिद्धत्वादत इति शब्दवैयर्थ्यमिति पक्षान्तरमाह—अवधिमिति । अतस्तेजसस्सकाशादित्यर्थः । श्रुतिस्मृतिभ्यामपामेवादावुत्पत्तिश्रवणादुक्तनिर्वाहो नोपपद्यत इत्याशङ्क्य समाधत्ते—नन्वित्यादिना 'आपो वा इदमग्रे सलिलमासीत्' । 'अप एव

ससर्जादाविति' श्रुतिस्मृती। इदमवादिकं कार्यं सलिलं प्रकृतिरासीत्प्रलयकाल इत्यर्थः।

आचार्यैस्सलिलशब्दस्य प्रकृतिपरत्वस्य परमतभङ्गे प्रदर्शितत्वात्। न ह्यपां सर्वपूर्वभावः प्रतिपादयितुं शक्यः महदादीनां तत्पूर्वभाविनां दुरपह्नवत्वात्। नापि तेजःपूर्वभावः। नियामकाभावात्। तथा च "अग्नेरापः। तत्तेजोऽसृजत। आपस्तेजसि लीयन्ते। प्रधानं तत्वमुद्भूतमिति" बहुश्रुतिस्मृत्यन्तरानुगुण्येन पृथिवीसृष्टेःव्यष्टितः पूर्वभावः प्रतिपाद्यत इति न विरोध इति भावः।

नन्वेतच्छ्रुतिस्मृत्यनुसारेणैव श्रुत्यन्तराणां वा नयनं कुतो न स्यादित्यत आह—श्रुतिषु चेति। न्यूननिर्देशानुसारेणाधिकश्रुतेर्नयने विरोधादधिकश्रुत्यनुसारेण नयने शाखान्तराधिकरणन्यायेन विरोधाभावादिति भावः।

नन्वन्यतरानुसारेण किमर्थमन्यतरा श्रुतिर्नेया ? विकल्पितयोः व्रीहियवयोः प्रयोगभेदेनेव कल्पभेदेनोभयोरुपपत्तेरित्यत आह —अव्यवस्थितेति 'धाता यथापूर्वमिति' व्यवस्थायाः सर्वकल्पेषु श्रुतत्वादिति भावः ॥१३॥

त्रिगुणपरीक्षायां तोयतेजसोः परस्परहेतुताप्रमाणगतिव्यवस्था।

अक्ष० सृष्टिक्रमे प्रमाणविरोधं शमयति—अद्भ्योऽग्निरिति "अद्भ्योऽग्निरुदपद्यत" इतिस्मृत्या अद्भ्यस्तेजसोऽग्ने रुत्पत्तिः स्मर्यते "अग्नेरापः इति तेजसएवापामुत्पत्तिः श्रूयते अनयोर्वचनयोरेकमपि न बाधितुं युक्तमित्याह—नहीति। वस्तुनि विकल्पायोगात् कथमुभयोरबाध इत्यत्रकथञ्चिन्निर्वाहमाह—निर्वाह इति। तन्निरस्यति नेति। कुत इत्यत्राह—दृढमितादिति दृढमितत्वात् बहुप्रमाणसिद्धत्वेन बह्वीषु श्रुति स्मृतिषु तत्वसृष्टेरैकरूप्यस्याधिगमात् यत्किञ्चिदेव स्मृतिमात्रानुसारेण कल्पभेदेन तद्वैरूप्यकल्प्नं न युक्तमिति भावः। तर्हि—"अद्भ्योऽग्निरित्यस्य कथं निर्वाह इत्याह—व्यष्टाविति। पञ्चीकरणात्पश्चाद्भाविनी सृष्टिः व्यष्टिः तत्र। ताभ्यः—अद्भ्यः। कदाचित्—अग्नितापदशायां तैलादावग्नेरुत्पत्तिर्भवतीत्यर्थः।

तप्ततैलादौ जलप्रक्षेपे सति अग्न्युत्पत्तिरूपमग्निज्वलनं दृश्यते। तत्र निमित्तभूता आपः तत्परा तत्स्मृतिरिति भावः। अतोव्यत्यय इतिएतद्विपरीत इति भावः। यत्समष्टौ—अग्निजलयोः समष्टिसृष्टौ। अग्नेरेवापां सृष्टिरिति भावः।

तर्हि "आपो वा इदमग्रे सलिलमासीत्" "अपएव ससर्जादा" विति श्रुतिस्मृती कथमुपपद्येते इत्यत्राह-आदाविति। श्रुतिमितमिति "तत्तेजोऽसृजत" "तदपोऽसृजत" इतिश्रुत्या समधिगतं पूर्वभावितत्वान्तरं। प्रतिक्षेप्तुं प्रतिषेद्धुं नेष्टे न प्रभवतीत्यर्थः।

यथा—छान्दोग्यादावादौ तेजस्सृष्टिवादः तैत्तिरीयकोक्ताकाशादिसृष्टिक्रमं न प्रतिषेद्धुमीष्टे श्रुतहानायोगेन अनुक्तस्याधिकस्या न्यतोग्राह्यत्वावश्यंभावात् तथा प्रकृतेऽपि महदादीनामिवाग्नेरप्यद्भ्यः पूर्वभावित्वस्यानेकश्रुतिसिद्धत्वान्न बाधा शक्येति भावः।

पृथ्व्यास्स्पर्शादिभेदो द्रवमृदुकठिनीभावभेदश्च दृष्ट-
स्तद्वत्पृथ्वीजलाग्निश्वसनपरिणतिर्लाघवायेति जैनाः।
तत्र द्रव्यैक्यमिष्टं क्रमजनिविलयौ त्वागमादप्रकम्प्यौ
तर्कैकालम्बिगोष्ठ्यां भजतु बहुमतिं तादृशी लाघवोक्तिः ॥१४॥

सर्वा०। ननु कथमेवं तोयतेजसोर्व्यष्टिसमष्टिसृष्टिव्यवस्था, विचित्रपरिणामशालिनस्त्रिगुणस्य कालभेदेनानियतपरिणामोपपत्तेः। उक्तं च जैनैः—पुद्गलाख्यमेकजातीयद्रव्यं तत्तत्सामग्रीभेदैरव्यवस्थितक्रमान् भिन्नाभिन्नस्वभावान् विचित्रपर्यायान् भजत इति यथा काणादप्रभृतीनामेकैकभूतपरमाणवः; यथा च सांख्यादीनामेकैकं भूतम्। अतो न शाश्वतभूतभेदक्लृप्तिः। वाय्वादिचातुर्विध्योक्तिरपि पर्यायभेदनिबन्धना; नियतक्रमभूतसृष्टिकल्पना च लाघवयुक्तिविहता; तदेतदनुभाषते—पृथ्व्या इति। दूष्यांशव्यक्त्यै शेषमनुमनुते—तत्र द्रव्यैक्यमिति। त्रिगुणद्रव्यमेव हि वाय्वाद्यवस्थमिति भावः। नियतक्रमत्वे कल्पनागौरवमागमबलादपनयति—क्रमेति। लाघवतर्कस्य का गतिरित्यत्राह—तर्केति। गुरुकल्पनाप्रवृत्तं प्रति हि लाघवोक्तिः शोभत इति भावः॥ १४॥ इति पुद्गलानामनियतपृथिव्यादिपरिणामवादभङ्गः॥

आनन्द० आक्षेपिकीं संगतिमाह—कथमिति। व्यष्टिसमष्टिसृष्टिव्यवस्था—व्यष्टावनियता समष्टौ नियतेति व्यवस्थेत्यर्थः। उक्तं च जैनैरिति—विद्यानन्दादिभिरित्यर्थः। पुद्गलो नाम स्पर्शरसगन्धवर्णवद्द्रव्यं। तद्द्विविधं–परमाणुरूपं स्कन्धरूपं चेति। परमाणुसंयोगात् द्व्यणुकादयः स्कन्धा उत्पद्यन्ते। स्कन्धभेदनात्परमाणवः' इत्यादिभिरनियतवाय्वादिरूपपर्याया उत्पद्यन्त इत्युक्तमिति भावः। भेदनात्परमाणवः' इत्यादिभिरनियतवाय्वादिरूपपर्याया उत्पद्यन्त इत्युक्तमिति भावः। **यथाकणादप्रभृतीनामिति**। अनियतमृत्पाषाणाद्युत्पत्तिरित्यर्थः। **न शाश्वतभूतभेदक्लृप्तिरिति**। तैर्नित्यत्वानभ्युपगमादिति भावः। ननु—

वायुस्तेजो जलं भूमिरिति भिन्नश्च पुद्गलाः।

इति चातुर्विध्योक्तिः कथमित्यत्राह—**वाय्वादीति**। **पर्यायः**—परिणामः अवस्था इति यावत्। एकजातीयस्यैव परिणामभेदनिबन्धनेत्यर्थः **दूष्यांशेति**।

ननु जैनैरप्येकजातीयद्रव्यस्य परिणामभेदोऽङ्गीकृतः। सिद्धान्तेऽपि प्रकृतेः

परिणामभेद इति तन्मतात्कोभेदः ? इति चेत्, न, सिद्धान्ते क्रमनियमस्याङ्गीकाराद्भेद इति भावः। गुरुकल्पनेति। न तर्कावकाश इति भावः।

मूलस्यायमर्थः--यथा पृथ्व्याः स्पर्शभेदः शूकशिम्बुपरिणामे द्रवत्वं घृतपरिणामे मृदुत्वं नवनीतपरिणामे काठिन्यं पाषाणादिपरिणामे दृष्टं तन्न्यायेनैकस्यैव द्रव्यस्य पृथ्व्यादिपरिणतिर्लाघवाय स्वीकार्येति जैनमतस्था आहुः। तत्र—तदुक्तेषु एकस्य परिणतिरिष्टा। सा च क्रमनियता तथा लयश्च तथा दृढतरागमतः प्रतिपादनात्। या तु लाघवोक्तिः सा तर्कैकालम्बिगोष्ठयां बहुमतिं केवलानुमानतस्तत्त्वक्लृप्तिगोष्ठयां—साङ्ख्यगोष्ठयां भजत्विति ॥१४॥

इति त्रिगुणपरीक्षयां जैनोक्तशाश्वतभूतभेदक्लृप्तिभङ्गनिरासः।

अक्ष० जैना; पुनरेकस्मादेव पुद्गलाख्यात् स्पर्शरस गन्ध वर्णवद्द्रव्याद्विभिन्नसामग्रीसहकृतादव्यवस्थितक्रमाः पृथिव्यादयो विचित्रस्वभावा जायन्ते नतु विभिन्नस्वभावेभ्यः नानाभूतेभ्यः कारणेभ्यः इति लाघवमवलंबमाना वदन्ति तन्मतमनूद्य तत्र निरसनीयमंशं निरस्यति पथ्व्या इति। यथा एकस्या अपि पृथिव्याः स्पर्शरसादयः परस्परविजातीया भेदाः द्रवमृदुकठिनीभावभेदाश्च जाता दृष्टाः तद्वदेकस्यैव पुद्गलस्य पृथ्वी-जलाग्नि-श्वसन-परिणतिर्लाघवाद्युक्तेति जैना वदन्तीत्यर्थः। एकमेव पुद्गलं पृथिव्यप्तेजोवाय्वात्मना परिणमत इत्युपगमे लाघवसंभव इति भावः। तत्र सिद्धान्तिनोप्यभिमतमंशमाह—तत्रेति सिद्धान्तेपि प्रकृतेरेव सर्वकार्येष्वनुवृत्युपगमादिति भावः।

निरसनीयमंशमाह—क्रमेति। व्यवस्थितेन महदहङ्कारादिक्रमेण प्राकृतानां सर्वेषां पृथिव्यादीनामुत्पत्तिः तद्विपरीतक्रमेण लयश्च आगमसिद्धत्वान्न लाघवयुक्तिमात्रेण बाधितुं शक्यावित्यर्थः। आगमसिद्धनियतस्वभावक्रमादिना अव्यवस्थितस्वभावक्रमादिना जननलयादिकं निरसनीयमिति भावः। तर्हि लाघवतर्कस्य क्वावकाश इत्यत्राह तर्केति। युक्तिमात्रेण गुरुकल्पनाप्रवृत्तौ तन्निरसनाय लाघवोक्तिः प्रभवतीति भावः।

तत्त्वेष्वाथर्वणेऽष्टौ प्रकृतय उदिताः षोडशान्ये विकारा
निष्कर्षेदंपरेऽस्मिन् वचसि तदितरत्सर्वमावर्जनीयम्।
दृष्ट्वा सांख्यं पुराणादिकमपि बहुधा निर्वहन्त्येतदेके
चिन्तासाफल्यमान्द्याच्छ्रमबहुलतयाऽप्यत्र तज्ज्ञैरुदासि ॥ १५ ॥

सर्वा०। ननु तत्त्वसृष्टौ क्रमनियमो न संभवति * आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेष्विति सुबालोपनिषदाम्नानात्। अव्यवस्थिताश्च सृष्टिव्यवहाराः पृथ्व्यादिषु दृश्यन्ते। अतो यथाश्रुतं कल्पभेदात् सृष्टिभेदः स्यादित्यत्राह—तत्त्वेष्विति ॥

अधीयते हि केचिदाथर्वणिकाः ❀ अष्टौ प्रकृतयः षोडश विकारा इति। अत्र तावदव्यक्तमहदहङ्कारतन्मात्राणां प्रकृतित्वमविगीतम्। इन्द्रियेभ्यस्तत्त्वान्तरोत्पत्तिः श्रुत्यन्तरेषु वा न क्वचिद्दृश्यते। सौबाले च लयानुक्रमे पूर्वापरवाक्यवदिन्द्रियतन्मात्रवाक्ययोर्न लीयत इति पदमावृत्तम्। एवं वाक्यवैरूप्ये सत्यनुषङ्गात् वरमधिकरणविभक्त्याऽपि संसर्गमात्रग्रहणमिति स्थिते प्रकरणान्तरैककण्ठ्यं भवतीति केवलविकृतित्वमिन्द्रियाणां युक्तम्। भूतानां चाकाशादीनां चतुर्णां साक्षात् तन्मात्रद्वारेण वा तत्त्वान्तरोपादानत्वे प्रकृतयो विकृतयश्च पृथग् द्वादश स्युः।

ननूपबृंहणविशेषानुसारादिन्द्रियाणि शब्दादिगुणाश्च षोडशविकराः, भूततन्मात्रभेदानादरेण प्रकृतयश्चाष्टावभ्युपगम्यन्ताम्। मैवम्; द्रव्यतत्त्वप्रकरणे गुणपरिगणनानौचित्यात्, गुणशब्देन च क्वचिद्गुणाश्रयविवक्षा स्यात्। गत्यभावे गुणविवक्षायामप्यत्र द्रव्यविवक्षोपपत्तेः। * आकाशाद्वायुरित्यादीन्यपि स्थूलसूक्ष्मभेदानादरेणेति समाधानम्। एवं स्थिते तामसाहङ्कारोत्पन्ने तन्मात्रपञ्चके भूतान्येकद्वित्रिचतुः पञ्चभिस्तन्मात्रैरारभ्यन्त इति सांख्याः। पूर्वपूर्वतन्मात्राणि उत्तरोत्तरतन्मात्रमेकैकं भूतं जनयन्ति इति पौराणिकाः। अत्राप्युत्तरोत्तरभूतसृष्टौ पूर्वपूर्वेषां तन्मात्राणां भूतानां वा सहकारित्वमिति पक्षभेदः। एवमन्योऽपि यथामति। तदिदमाह—दृष्ट्वेति। एतत्—इतरत्सर्ववाक्यजातमित्यर्थः। किमिति पूर्वाचार्यैरत्रोपेक्षितं तत्राह—चिन्तेति।

न प्रधानविरोधः स्यादीदृशानवधारणे।
इति शिक्षयितुं शिष्यान्प्राचां क्वचिदनिश्चयः॥ १५॥

॥ इति प्रकृतिविकृतिविभागचिन्ता॥

आनन्द० आक्षेपिकी संगतिरित्याह—**ननु तत्त्वसृष्टाविति**। **सुबालोपनिषदीति**। 'पृथिव्यप्सु प्रलीयते आपस्तेजसि लीयन्ते तेजो वायौ लीयते वायुराकाशे लीयते आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते' इत्यादिलयानुक्रमणात् लयस्थानस्योपादानत्वप्रतीतेरिति भावः। पूर्वोक्तगत्यन्तरमेव ज्याय इत्याह—**अत्र इति**। ननु सुबालोपनिषद्वाक्यमस्तीत्याह—**सौबाले चेति**। न च तत्र साक्षादुपादानत्वश्रुतिः। न च लयो वा तत्र श्रुतः येन तदन्यथानुपपत्त्योपादानत्वं सिध्येदिति भावः। ननु वाक्यवैरूप्यपरिहारायानुषङ्गः कल्प्यतामित्यत्राह—**अनुषङ्गाद्वरमिति**। श्रुतमात्रादेवोपपत्तेरिति भावः। अनुषङ्गपक्षे पूर्वापरवाक्ययोर्लयश्रवणं व्यर्थं सर्वत्रानुषङ्गादेवोपपत्तेः; अतो नानुषङ्ग इति व्यनक्ति—**प्रकरणान्तरैककण्ठ्य**—सृष्टिप्रकरणैककण्ठ्यं।

अयं भावः—घ्राणादीनामिन्द्रियाणां पृथिव्यादिभूतैराप्यायनं श्रुतिषु प्रसिद्धं। तत्र तत्र पृथिव्यादिषु वायुपर्यन्तेषु प्रलीनेषु तत्तदाप्यायकभूतानामपि

प्रलीनतया तेषामाकाशदशापन्नत्वात् सर्वैरपीन्द्रियैः स्वान्तर्गतेतरभूतचतुष्टयस्याकाशस्यात्र लयं वक्तुं तस्य तन्मात्रावस्थापन्नस्येन्द्रियसंसर्गमनुवदति "इन्द्रियाणि तन्मात्रेष्विति"। पूर्वमाकाशे संसृष्टानीन्द्रियाणि पश्चाच्छब्दतन्मात्रेषु संसृष्टानीति।

अथ सेन्द्रियाणां तन्मात्राणां स्वकारणे लयमाह 'तन्मात्राणि भूतादौ' इति। भूतादिशब्देनाहङ्कारमात्रं विवक्षितं। आकाशादेव वायुः वायोरेवाकाशसहितात्तेजः तेजस एवापः अद्भ्य एव पृथिवीत्यद्वारकपक्षः। शब्दतन्मात्रादाकाशमाकाशात् स्पर्शतन्मात्रं ततो वायुरिति सद्वारकपक्षः। तौ न युक्तावित्याह—**भूतानां चाकाशादीनामिति**। तथाचाथर्वणविरोध इति भावः।

अत्र यदुक्तं भट्टपराशरपादैः सुबालोपनिषद्विवरणे—'यदि भूतानामपि प्रकृतित्वं तर्हि 'अष्टौ प्रकृतयष्षोडश विकाराः' इति श्रुतेः का गतिरिति चेत्; वेदोपबृंहणनिपुणतरपरमर्षिसन्दर्शितैव गतिः; नास्माभिस्तदिरुद्धनिर्वहणेऽभिनिवेष्टव्यमित्यारभ्य; तदपि स्वारस्याभावाद्दूषयति—**नन्वितीत्येके**।

विरोधपरिहारं शङ्कते नन्वितीति बहवः। मोक्षधर्मे याज्ञवल्क्यजनकसंवादे—

अष्टौ प्रकृतयः प्रोक्ताः विकाराश्चैव षोडश।
अव्यक्तं च महांश्चैव तथाऽहङ्कार एव च॥

पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्।
एताः प्रकृतयस्त्वष्टौ विकारानपि मे शृणु॥

श्रोत्रं त्वक्चैव चक्षुश्च जिह्वा घ्राणं च पञ्चमम्।
वाक्च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च॥

एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु।
मनष्षोडशमित्याहुस्तथैव गतिचिन्तकाः॥

इत्याद्युपबृंहणानि द्रष्टव्यानि। आथर्वणवाक्यस्य द्रव्यतत्वप्रकरणस्थत्वादत्र गुणविवक्षा न सम्भवतीति परिहरति—**मैवमिति**। तर्हि द्रव्यतत्वप्रकरणस्थोपबृंहणविशेषस्य का गतिरित्यत्राह—**गुणशब्देनेति**। 'त्रीणि रूपाणि सत्यं' 'गन्धविक्रयिकस्तथा' इत्यत्रेव गुणवाचकशब्दे तदाश्रयविवक्षेत्यर्थः। नन्वाकाशाद्वायुरित्यादिश्रुतिविरोध इत्यत्राह—**आकाशाद्वायुरित्यादीति**। तथाचाकाशादित्यादिपञ्चम्यन्तास्तन्मात्राकाशादिपराः! वाय्वादिशब्दाः प्रथमान्ताः स्थूलसूक्ष्मोभयपराः। तथाचायमर्थः—आकाशात्तन्मात्राकाशाद्वायुः। सूक्ष्मद्वारा स्थूल उत्पद्यत इत्यर्थः। एवमन्यत्रापि द्रष्टव्यम्।

एकद्वित्र्यादीति—भूतादितः पञ्चतन्मात्राणि। तत्राकाशमेकस्माच्छब्दतन्मात्रादुत्पद्यते। वायुः शब्दस्पर्शगुणयोगाच्छब्दस्पर्शतन्मात्राभ्यामुत्पद्यते। तदु-

भयसहिताद्रूपतन्मात्राद्गुणत्रयवत्तेजः। तत्त्रयसहिताद्रसतन्मात्रात्तद्गुणवज्जलं। तथा पञ्चभ्यस्तन्मात्रेभ्यः पञ्चगुणा पृथिवीति सांख्यसप्ततिव्याख्याने वाचस्पतिना प्रतिपादितत्वादित्यर्थः। तत्राप्युत्तरोत्तरभूतसृष्टाविति।

यदि भूतानां सहकारित्वं तदा तन्मात्राणामुपादानत्वमिति केचित्। अन्ये तदुभयस्यापि निमित्तत्वमेवेति वदन्ति।

एवमन्योऽपीति—आकाशात् स्पर्शतन्मात्रं तस्माद्वायुः वायोः रूपतन्मात्रं तस्मात्तेज इत्यादिरूपः। मूलश्लोकस्यायमन्वयः—केचित्—सांख्यादयः सांख्यं योगं पुराणादिकं च दृष्ट्वेत्यत्रान्वयः। निर्वहन्ति—सृष्टिक्रमं वदन्ति। तदितरत् सर्वं—आथर्वणवाक्यादितरत् सर्वं। निष्कर्षेदम्परेऽस्मिन् निस्सन्देहं प्रकृतिविकृतिविभागेदम्परे आथर्वणवचने। आवर्जनीयं—आथर्वणोक्तानुसारेण नेतव्यमिति। औदासीन्यस्य प्रयोजनमाह—**न प्रधानेति**। तत्वहितपुरुषार्थप्रमितिविरोधाभावादीदृशावधारणे नावश्यं यत्नः कर्तव्य इत्यर्थः। अत्र पौराणिकः पक्षः आथर्वणिकाभिमतत्वाद्ग्रन्थकारस्याभिमत इति द्रष्टव्यम्। न्यायसिद्धाञ्जने तु द्वादशप्रकृतिपक्षाङ्गीकारः प्रतीयते। तथा च पक्षान्तरमप्यस्तीत्याहुः॥ १५॥

इति प्रकृतिविकृतिविभागपरीक्षा तद्गणनपरीक्षाच।

अक्ष०। ननु सुबालोपनिषदि लयप्रकरणे "पृथिव्यप्सु प्रलीयते" "आपस्तेजसि लीयते" इत्यारभ्य "आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु" इत्याकाशस्य इन्द्रियेषु लयाभिधानाल्लयस्थानस्यैवोपादानत्वप्रतीत्या आकाशस्येन्द्रियोपादानकत्वावगमेन तन्मात्रोपादानकत्वपरवचनान्तरविरोधे कल्पभेदेन क्रमभेदस्यैवाश्रयणीयतया "क्रमजनिविलयावप्रकम्प्या"विति पूर्वमुक्तमयुक्तमित्यत्राह—**तत्वेष्विति**। चतुर्विंशतितत्वानां मध्ये इत्यर्थः। **अष्टौ प्रकृतयः अन्ये षोडशविकारा इति—"उदिताः निष्कर्षेदम्पर इति**—"अष्टौ प्रकृतयः षोडशविकाराः" इत्याथर्वणे शाखाविशेषे। **उदिताः**—आम्नाता इत्यर्थः। अन्यत्रान्यथाप्याम्नाता इत्यत्राह **निष्कर्षेदम्पर इति। अस्मिन्वचसि**—आथर्वणवचसि। **तदितरत्सर्वं** वचनं। **आवर्जनीयं**?अनुगुणं नेतव्यम् अस्य वचनस्य निष्कर्षेदम्परत्वादित्यर्थः।

अत्रैवहि प्रकृतितद्विकाराणां इयत्ता निष्कृष्याभिधीयते नत्वेवमन्यत्र; अनिदम्परवचनानां इदम्परवचनानुसारेणार्थवर्णनं-हि-न्याय्यं अतोऽन्यत्सर्वं मेतद विरुद्धमेव व्याख्येयमिति भावः। सौबालञ्च "आकाशमिन्द्रियेष्वि"ति वचनं न विरुद्धमभिधत्ते पूर्वापरवाक्येष्विव तत्र लयपदाश्रवणात्सप्तम्याअधिकरणत्वाभिधानस्य सम्बन्धसद्भावतोप्युपपत्तेराप्यायक भूतसम्बन्धस्य चेन्द्रियेष्वपि सत्वाच्च लयपदानुषङ्गस्याकल्पनीयत्वादनुषङ्गतात्पर्ये अबादिवाक्येषु लयपदाम्नानस्य अनर्थकत्वापाताच्च। अतस्तत्र लयाप्रतिपादनान्नेन्द्रियोपादनकत्वप्रसक्ति रिति न विरोधगन्ध इति भावः।

"आकाशाद्वायु" रित्यादिकमपि स्थूलसूक्ष्म भेदानादरेण तन्मात्ररूपात्सूक्ष्माकाशात्सूक्ष्मस्थूलरूपो वायुरित्येवं पञ्चम्यन्तानां सूक्ष्मपरतया प्रथमान्तानां सूक्ष्मस्थूलपरतया च निर्वाहसम्भवान्नाथर्वणवाक्यविरुद्धमिति ध्येयम् ।

एवं स्थिते तामसाहङ्कारादेवोत्पन्ने तन्मात्रपञ्चके एक द्वित्रि चतुः पञ्चतन्मात्रैः क्रमेण भूतान्युत्पद्यन्त इति पक्षः पूर्वपूर्वतन्मात्राणि उत्तरोत्तरतन्मात्रामेकैकं भूतं च जनयन्ति" इत्यादि पक्षभेदाश्च कथं परिदृश्यन्ते, तत्रान्यतमस्य साधुत्वं च प्राचीनैः कुतो न व्यवस्थाप्यते इत्यत्राह—**दृष्ट्वा सांख्यमिति**—सांख्याद्युक्तिमनुरुद्धय—उक्ताथर्वणोक्तिं बहुधा ते ते निर्वहन्ति। तत्र सर्वत्र प्रधानविरोधाभावेन अन्यतमनिर्णयार्थविचारे प्रयोजनमान्द्येन श्रमाधिक्येन च तत्राभिज्ञैरपि प्राचीनैरौदासीन्यमवलंबित मित्यर्थः ।

निश्शेषं कार्यतत्त्वं जनयति स परो हेतुतत्त्वैश्शरीरी
तत्तत्कार्यान्तरात्मा भवति च तदसौ विश्रुतो विश्वरूपः ।
तेजोबन्नाभिधेये बहुभवनमभिध्यानलिङ्गं च दृष्टं
तस्मादीशाननिघ्नाः प्रकृतिविकृतयस्स्वस्वकार्यप्रसूतौ ॥१६॥

सर्वा० । प्रक्रान्तेषु प्रकृत्यादिकारणेषु * पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणमिति वदतस्सांख्यस्यानन्यथासिद्धेः श्रुत्यादिभिर्बाधमाह—**निश्शेषमिति** ॥ * यत्किंचित्सृज्यते येन*जगत्सर्वं शरीरं ते इत्यादिभिरेतत्सिद्धम् ।* तत्सृष्ट्वा तदेवानुप्राविशदित्यादेश्चार्थमाह—**तत्तदिति** । **अन्तर्यामिब्राह्मणसुबालोपनिषदादिप्रसिद्धिमपि** संवादयति—**तदसाविति** । विश्रुतः प्रधानपुरुषविलक्षणत्वेन विश्वशरीरकतया प्रत्यक्षश्रुतिसिद्धः, क्वचिद्विश्वरूपशब्देनापि । * तत्तेज ऐक्षत, बहु स्यां * ता आप ऐक्षन्त बह्व्यः स्याम इति वाक्यविशेषाभिप्रेतं तद्व्यनक्ति—**तेज इति** । न ह्यचेतनमात्रस्यानुत्पन्नकरणकलेवरस्य कर्मिणो वा तदानीं बहुभवनसङ्कल्पाश्रयत्वं युक्तम्, गौणत्वं चात्रापि * गौणश्चेन्नात्मशब्दादिति सूत्रन्यायेन निरस्तम् । प्रकृतं हि मुख्यमीक्षणम्; अत्रापि तत्संभवे नान्यथा गतिर्युक्तेति भावः उक्तनिगमनव्याजेन—

* विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् ।
ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः ॥

सूयते पूरुषार्थं च तेनैवाधिष्ठिता जगत् ॥

* मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् । यत्किंचिद्वर्तते लोके सर्वं तन्मद्विचेष्टितम् ॥ इत्यादिकमपि प्रख्यापयति—**तस्मादिति** ॥ १६ ॥ **इति सर्वतत्त्वानामीश्वराधिष्ठानेन कार्यकरत्वम् ॥**

आनन्द० । उत्तरपद्येन तत्वानामीश्वरनिघ्नताकथनस्य का सङ्गतिः ? विवादाभावेन व्यर्थं चेत्यत्राह—प्रक्रान्तेति । प्रसङ्ग एव सङ्गतिर्विवादश्चास्तीति भावः । सांख्यपद्यं पठति—**पुरुषार्थं इति** । करणं चक्षुरादिकं सर्वं तत्त्वजातं केनचिदधिष्ठात्रा न कार्यते । कथं तर्हि तेषां प्रवृत्तिः ? पुरुषार्थ एव हेतुः—स्वर्गापवर्गलक्षणः पुरुषार्थं एवानागतावस्थालक्षणसिद्धये प्रवर्तयतीत्यर्थः । चैतन्याभावेऽपि पुरुषार्थस्य प्रवर्तकत्वं संभवति—

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।

इत्युक्तेः । **एतत्सिद्धमिति**—शरीरत्वं सिद्धमित्यर्थः ।

यत्किञ्चित्सृज्यते येन भूतं स्थावरजङ्गमम् ।
तस्य सृज्यस्य सम्भूता तत्सर्वं वै हरेस्तनुः ॥

इति शरीरत्वोक्तिरिति भावः—**अन्तर्यामीति** । 'यस्य पृथिवी शरीरं यस्यापश्शरीरम्' इत्यादिनाऽन्तर्यामिब्राह्मणादिषु शरीरत्वोक्तेरित्यर्थः । **क्वचिद्विश्वरूपेति**—'विश्वात्मन्' 'विश्वरूपाय वै नमः' । 'सर्वात्मन' 'विश्वरूप' इत्यादावित्यर्थः । एवं तेज ऐक्षत आप ऐक्षन्त इत्यादिश्रुत्या बाध इत्याह—**तत्तेज ऐक्षतेत्यादि** । तथा च चेतनाधिष्ठिता प्रकृतिः कारणमिति भावः । नन्वत्रेश्वराधिष्ठितत्वं न प्रतीयत इत्यत्राह—**अभिप्रेतमिति** । ननु प्रकृतेरचेतनायास्सङ्कल्पाश्रयत्वाभावेऽपि जीवस्य सम्भवाज्जीवस्स्रष्टाऽस्त्वित्यत्राह—**अनुत्पन्नकरणकळेबरस्येति** । नन्वैक्षतेतीक्षणं प्रवृत्तिमात्रं । तच्चाचेतनायाः प्रकृतेः सम्भवतीत्युक्तमित्यत्राह—**गौणत्वं चेति प्रकृतमिति** । 'सेयं देवतैक्षत' इत्यादिनेत्यर्थः । अष्टरूपां—अष्टौ प्रकृतय इत्युक्ताष्टरूपां । ध्रुवां—विनाशरहितां । तेन...ब्रह्मणा । अध्यासिता—अधिष्ठिता पुरुषार्थं जगच्च सूयते ॥ १६ ॥

इति त्रिगुणपरीक्षायां प्रकृतिविकृतीनामीश्वराधिष्ठानेन कार्यकरत्वम् ।

अक्ष० उक्तानां प्रकृत्यादितत्वाना मीश्वराधिष्ठानेनैव कार्यकरत्वमाह—**निश्शेषमिति** निखिलं कार्यं प्रकृत्यादिकारणतत्वशरीरकः सः परमात्मैवोत्पादयतीत्यर्थः ।

"यत्किञ्चित्सृज्यते येन भूतं स्थावरजङ्गमं ।
तस्य सृज्यस्य सम्भूतौ तत्सर्वं वै हरेस्तनुः ॥
जगत्सर्वं शरीरं ते"

इत्यादि पुराणादिवचनबलात् "पुरुषार्थं एव हेतुः न केनचित्कार्यते करण" मिति सांख्योक्तिरनादरणीयेति भावः । न केवलं हेतुतत्वैरेव शरीरी अपि तु कार्यतत्वैरपीत्याह—**तत्तदिति** "तत्सृष्ट्वा तदेवानु प्राविशत्" इत्यादिश्रुतिसिद्धोऽयमर्थ इति भावः । अत एवासावन्तर्यामिब्राह्मणादौ विश्वशरीरकः प्रसिद्ध इत्याह—**तदसाविति** ।

"तत्तेज ऐक्षत बहु स्यां प्रजायेय ता आप ऐक्षन्त बह्व्यस्स्यांप्रजायेमही" ति वाक्येषु ईक्षणबहुभवनश्रवणादपि कार्यकारणशरीरकत्वं स्फुटमित्याह—**तेज** इति। अभिध्यानमीक्षणम्। तत्र अचेतनमात्राभिधाने जीवमात्राभिधानेऽपि तदानीं करणकलेवराद्यभावेनेक्षणाद्यनुपपत्तेः तत्तच्छरीरकपरमात्मा तत्तच्छब्दाभिधेय इत्यभ्युपगन्तव्यमिति भावः। "गौणश्चेन्नात्मशब्दा" दितिन्यायादत्रापि गौणत्वं न गणनीयम्। तस्मादीश्वराधीना एवप्रकृतिविकृतयः स्वस्वकार्यप्रसूतौ प्रभवन्तीति निगमयति—**तस्मादिति**। कार्यकारणानामीश्वरशरीरत्वादित्यर्थः।

द्वेधा भूतानि भित्त्वा पुनरपि च भिनत्त्यर्धमेकं चतुर्धा
तैरेकैकस्य भागैः परमनुकलयत्यर्धमर्धं चतुर्भिः।
इत्थं पञ्चीकृतैस्तैर्जनयति स जगद्धेतुरण्डादिकार्या-
ण्यैदंपर्यं त्रिवृत्त्वश्रुतिरधिकगिरामक्षमैका निरोद्धुम्॥१७॥

सर्वा० तत्त्वान्तराणामीश्वराधीनत्वं व्यष्ट्याद्यारम्भवृत्तान्तैरपि व्यनक्ति—**द्वेधेति**॥ स खल्वादिकर्ता स्वसृष्टानि पञ्च भूतानि द्विधा कृत्वैकैकं भागं स्थापयित्वाऽर्धान्तराणि चतुर्धा विभज्य तत्तद्भागैश्चतुर्भिर्भूतान्तराणामविभक्तान्यर्धान्तराण्य नुकलयति यथोक्तम्—

एवं जातेषु भूतानि प्रत्येकं स्युर्द्विधा ततः।
चतुर्धा भिन्नमेकैकमर्धमर्धं ततः स्थितम्॥
व्योम्नोऽर्धभागाश्चत्वारो वायुतेजःपयोभुवाम्।
अर्धानि यानि वायोस्तु व्योमतेजःपयोभुवाम्॥ इति।

ततः पञ्चधा विभक्तानां भागानां पञ्चस्वर्धान्तरेषु योजनमिति परोक्तं निरस्तम्। एवं पञ्चीकृतानां व्यष्टिकार्येषु विनियोगमाह—**इत्थमिति**। महदादिमिश्चेति भाव्यं * महदाद्या विशेषान्ता इत्याद्युक्तेः। ननु * हन्ताहमिमास्तिस्रो देवता इत्याद्यारभ्य * तासां त्रिवृतंत्रिवृतमेकैकां करवाणि, * त्रिवृतं-त्रिवृतमेकैकामकरोत् इति त्रिवृत्करणे श्रुते पञ्चीकरणादिस्मृतिरन्यपरा स्यादित्यत्राह**ऐदंपर्यमिति**। तात्पर्यमित्यर्थः। अत्रानन्यपराणां भूयसां च बलीयस्त्वमनुक्तानामविरुद्धानामपेक्षितानामन्यतोऽपि ग्राह्यत्वं स्थापितम्। अभाष्यत च त्रिवृत्करणं पञ्चीकरणप्रदर्शनमिति॥१७॥ **इति पञ्चीकरणप्रक्रिया**॥

आनन्द० पूर्वशेषत्वात्तत्संगतिरेव संगतिरित्याह—**तत्त्वान्तराणामिति**। यद्यपि पञ्चधा विभागस्सिद्धान्तेऽपि; तथापि एकस्य भूतस्य समतया न पञ्चधा विभागः। अपि तु द्विधा विभागे तत्रैको भागश्चतुर्धा विभज्यते इति ध्येयं। पञ्चीकरणमपि सप्तीकरणोपलक्षणमित्याह—**महदादिभिश्चेति**।

नानावीर्याः पृथग्भूतास्ततस्से संहतिं विना।
नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः॥

समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
एकसंघातलक्षास्तु संप्राप्यैक्यमशेषतः ॥
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ।

तत इति महदादिसंसर्गस्यापि प्रतिपादनादिति भावः । विशेषाः—स्थूलभूतानि । ऐदम्पर्यमिति; पञ्चीकरण इति शेषः । अनन्यपराणामिति—

यद्यपि श्रुतिस्मृत्योर्विरोधे भूयसीनामपि स्मृतीनां बाध एव; तथाप्यबाधेनोपपत्तौ बाधस्यान्याय्यत्वादन्यतरस्यान्यतरानुसारे वाच्ये अविरोधेन वक्तुं च शक्येऽनन्यपरस्मृत्यनुसारो युक्तः; तथा हि श्रुत्यर्थस्य वाच्यस्य त्रिवृत्करणस्य सहस्रे शतन्यायेन सम्भवाद्वचवच्छेदस्तु संख्याश्रवणकल्प्यः । स च श्रुतिमूलेऽपि भूयसां स्यादिति न्यायेन बाधित इत्यर्थः । अनुक्तानामिति—आचमनादीनां स्मार्तानामपि दर्शादिविधिना (ग्राह्यत्वं) ग्रहणं क्रमविरोध्यपि कर्मकाण्डे स्थापितमित्यर्थः । अभाष्यतेति । 'वैशेष्यात्तु तद्वादस्तद्वादः' 'त्र्यात्मकत्वात्तु' इत्यादिसूत्रभाष्ये ।

"महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।

इति । क्षेत्रारम्भकद्रव्याणीत्यादिकमुक्त्वा प्रकृत्यादिपृथिव्यन्तद्रव्यारब्धमिन्द्रियाश्रयभूतमिच्छाद्वेषसुखदुःखविकारि भूतसंघातरूपं चेतनसुखदुःखोपभोगाधारत्वप्रयोजनं क्षेत्रमित्युक्तं भवतीति" गीताभाष्ये चोक्तमित्यर्थः । मूलश्लोकस्यायमर्थः—भूतानि द्वेधा भित्वा तत्र एकस्मिन् स्थित एव अपरमर्धं पुनश्चतुर्धा भिनत्ति । तैः पुनः भिन्नस्यार्धस्य भागैः स्थि (स्थापि) तेनार्धेन संयोजनार्थं (तु) परमर्धं अनुकलयति—सम्पादयतीत्यर्थः ॥ १७ ॥

इति त्रिगुणपरीक्षायां पञ्चीकरणस्थापनम्

अक्ष० अथ भूतानां पञ्चीकरणप्रकारमाह—द्वेधेति । एकैकं भूतं द्वेधा विभज्येत्यर्थः । एवं विभक्तयोः द्वयोरर्धयोः एकमर्धमखण्डं तथैव स्थापयित्वा अपरमर्धं चतुर्धा विभजतीत्याह—पुनरपीति । भिनत्ति—विभजतीत्यर्थः । अतः परं कर्तव्यमाह—तैरिति । चतुर्धा विभक्तैरित्यर्थः । एकैकस्य भूतस्याष्टमांशे चतुर्भिः भागैः । परं अर्धमर्धं—भूतान्तरीयप्रत्यर्धं अखण्डितमपरमेकैकमर्धम् । अनुकलयति—संयोजयतीत्यर्थः । चतुर्धाकृतेषु भागेषु एकैकं भागं स्वेतरभूतार्धेषु चतुर्षु योजयतीति यावत् । तत्तद्भूतेष्वखण्डितमर्धं तदितर भूतचतुष्टयाष्टमांशमिश्रणसंपन्नमर्धं च एकीकृत्य एकैकं भूतं पूर्णमविकलं पञ्चीकृतं करोतीति भावः ।

तत्प्रयोजनमाह—इत्थमिति । तैः-भूतैः । अण्डादिकार्याणि—व्यष्टिसृष्टिरिति यावत् । सः परमात्मा जगत्कारणभूतः । जनयति—उत्पादयति । अपञ्चीकृतैः भूतैस्तदुत्पादनासंभवात्पञ्चीकरणं क्रियते । तदुक्तम्—

नानावीर्याः पृथग्भूता स्ततस्ते संहतिं विना।
नाशक्नुवन्प्रजास्स्त्रष्टु मसमागम्य कृत्स्नशः॥

इति। छान्दोग्ये—"त्रिवृतमकरोत्" इति त्रिवृत्करणस्यैवश्रवणात् पञ्चीकरण-श्रवणमन्यपरं स्यादित्यत्राह **ऐदम्पर्यमिति**—तात्पर्यमित्यर्थः। **एका त्रिवृत्करण-श्रुतिः**। **इतरगिरां** भूयसीनामनन्यपराणां पञ्चीकरणवचनानाम् तात्पर्यं पञ्चीकरणविषयं। **निरोद्धुम्**—असमर्था। "भूयसां स्याद्बलीयस्त्वम्" "अनुक्त-मन्यतो ग्राह्य" मिति न्यायादन्यपरत्वासंभवाच्चेति भावः।

इदञ्च "अनुक्तमन्यतोग्राह्य" मिति न्यायात् महदादिसृष्टिश्रवणानुरोधात् सप्तीकरणस्याप्युपलक्षणम्। तत्र अर्धस्य चतुर्धाकरणस्थाने षोडाकरणं षण्णां भागानां एकैकस्येतरार्धेषु त्रिगुणञ्च समानन्यायादधिगन्तव्यम्। एवं व्यष्टि-सृष्टिरपीश्वराधीनेति सूचितम्।

कार्यं नैवारभेरन्समधिकमणवस्सर्वतस्संप्रयुक्ता
दिक्संयोगैकदेश्यान्न घटत इह ते दिक्कृतोऽप्यंशभेदः।
बुद्धेस्त्वंशानपेक्षा स्फुरति विषयिता विश्रमस्त्वस्तु दृष्टे
नो चेदारम्भकांशप्रभृतिषु नियता दुर्निवाराः प्रसङ्गाः॥१८॥

सर्वा० ननु पञ्चीकरणाभिधानात्पञ्चसु भूतेषु स्वतस्सभागत्वम्, व्यष्टिसमष्टि-भावः, भूतांशानां चात्यन्तभिन्त्वं समानन्यायतया प्रकृतिपर्यन्तेषु तत्त्वान्तरेष्वपि तत्सर्वं सिद्धम्। भूतभागानां चात्यन्तभेदो वेणुरन्ध्रश्लोकेऽभाष्यत। एवं सत्य-णुसमाहार एव प्रकृतिरिति स्थिते * महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामित्यौलूक्यो-पालम्भो न युक्त इत्यत्राह—**कार्यमिति**॥

अयं भावः—अनन्यपरशास्त्रसिद्धेष्वर्थेषु * श्रुतेस्तु शब्दमूलत्वादिति न्यायेन गत्यन्तराभावे काचिद्गमनिका स्वीकार्या। अनुमेयेषु तु यथा दृष्टान्तं सिद्धिः, अन्यथाऽतिप्रसङ्गात्। ततश्चावयविवादिनामवयवास्स्वभागैर्मिथस्संयुज्यावयविन-मारभन्त इति सिद्धान्तः। एतच्च व्यणुकावधि निर्विघातं, व्यणुकारम्भे तु निर-वयवा अणवोऽवयवा इति कल्पितम्; तत्रैवं प्रसङ्गावतारः—यदि परमाणवस्स्वां-शतस्संयुज्यावयविनमारभेरन्, तदा तदंशोऽवयवरूपस्तदन्यो वा? आद्ये तस्यापि तथेत्यनवस्था। अन्यस्तु स्वाभाविकः औपाधिको वा? पूर्वत्र भिन्नाभिन्नता स्यात्। उत्तरत्रोपाधिसंबन्धेऽप्यंशभेदो दुर्वचः। परिशेषात्तन्निरपेक्षसंयोगैरन्योन्यानाघ्रात-भागभेदरहितैरणुभिरारम्भः स्यात्। त्यक्तस्तर्हि सप्रतिघत्वविरोधः। सर्वेषु च परमाणुष्वेकपरमाणुप्रदेशमात्रावस्थितेषु स्वाधिकदेशव्यापिकार्यारम्भो न [सिध्येत्] स्यात्, न खल्ववयवास्पृष्टे कुत्रचित् प्रदेशेऽवयवी तिष्ठेत्, अदृष्टेर-निष्टेश्च। अवयवनाशादययविनाशे क्षणमानाधारोऽवयवीति चेत् तथा

कल्पयताऽपि त्वया पूर्वं तन्तुसंघानवच्छिन्नप्रदेशे पटस्य वृत्तिर्न कल्पिता। एवमधिकारम्भानुपपत्तौ मेरुसर्षपादिविचित्रभेदासिद्धिः। सेयमसिद्धं सिषाधयिषतः सिद्धहानिः; तथा चासिद्धसाधनं निर्मूलम्।

ननु परिमितानां सर्वेषां दिग्भेदेन भागभेदे दृष्टे परमाणुष्वपि तथाङ्गीकारो दुर्वार इत्यत्राह—दिक्संयोगेति। दिक्संयोगायत्तोऽपि हि भागभेदस्सावयवेष्वेव दृष्टः, त्रसरेणोरपि त्वया सावयवत्वक्लृप्तेः। निरवयवेषु तु विश्वव्याप्तैकदिक्त्त्ववादिनस्ते तन्निबन्धना भागक्लृप्तिरशक्या। तदुपाधिसंयोगात्तु स्यादपि यदि तत्राप्यंशानंशविकल्पक्षोभोऽतिलङ्घ्येत। अतस्सर्वदिगुपाधिसंयोगानां परमाणुषु पृथक्प्रदेशरहितानां कथमौपाधिकभागभेदापादकत्वम्? यदि चानंशभेदेन संयुक्ता उपाधयः क्वचिद्भागभेदकास्तर्हि परमाणव एव तथा किं न स्युः? वृथा चैवमंशक्लृप्तिरभागेन संयोगावस्थितेरिति। तदिदं सर्वमभिप्रेत्याहुः—

> ष [ट्केन] ट्कोणयुगपद्योगात् परमाणोष्षडंशता।
> षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः॥ इति॥

ननु बुद्धिस्तावत्सर्वतन्त्रसिद्धा। सांवृतीत्यपि हि तां माध्यमिको मन्यते। सा चैकाऽप्यनेकविषया दृष्टेष्टा च। निरंशा च सा प्रत्येकं कार्त्स्न्येनांशतो वा विषयीकुर्यात्? नाद्यः; अन्यानुल्लेखप्रसङ्गात्। न द्वितीयः, निरंशत्वादेव। तत्र चेत् कश्चित्समाधिः अणुष्वपि तथा स्यात्। तत्राह—बुद्धेस्त्विति। तुश्शङ्कानिवृत्त्यर्थः। विषयित्वं ह्यंशानपेक्षतयैव दृष्टम्, नह्यन्यतोऽपि तस्यान्यथादृष्टिः, अतो यथोपलम्भमेकवदनेकोऽपि विषय एकस्या बुद्धेः। एवमेकस्य निरंशस्यानेकबुद्धिविषयत्वमपि निरूढम्। अवयव्यारम्भकसंयोगस्तु त्वयाऽपि न क्वचिदंशनिरपेक्ष उक्तः; क्वचिद्विशेषाङ्गीकारे नियामकाभावः।

अथ संघातारम्भकसंयोगेऽपि समः प्रसङ्ग इति, न समः; संयोगसाध्यसंघाताभावात्। तत्स्वीकारे ह्यवयविवाद एव वरम्। संयोगस्तर्ह्येकोऽनेकवृत्तिस्सन्नंशानंशविकल्पदौस्थ्यं नातिक्रामेत्। न ह्यसौ नास्त्येव सिद्धयोस्साध्यतया दृष्टेरिति, तदपि न; विषयित्ववन्निस्तारात् सोऽपि हि द्वयोर्न स्वांशाभ्यां वर्तत इति दृश्यते। एवं स्वामित्वादयोऽपि न प्रतिबन्दिः। अस्तु तर्हि संयुक्तप्रतिबन्दिः। मूर्तैर्विभूनां संयोगोऽस्ति न वा? न चेदन्यतरकर्मजसंयोगलोपः; अविशेषात्। अस्ति चेत् यदि कार्त्स्न्येन विभुद्रव्यमेकेन स्पर्शवता संयुज्यते, कथं स्पर्शवदन्तरेण तस्य संयोगः स्यात्? अंशतश्चेत् सावयवत्वप्रसङ्गः। न हि विभुद्रव्यस्यावयवित्वं संघातत्वं वा सुवचं, पूर्वत्र स्पर्शवत्त्ववृत्तत्वकार्यत्वानित्यत्वादिप्रसङ्गात्। उत्तरत्र नानात्वभेदाभेदयोरन्यतरापातात्। तत्र च विभुद्रव्यांशानां मिथस्संयोगोऽस्ति न वा? अस्ति चेत् तत्रापि स एव प्रसङ्गः; नास्ति चेदसंहतरूपता स्यात्। औपाधिको विभूनामंशभेद इति चेन्न। उपाधिसंयोगेऽपि अंशादिविकल्पानपायात्। निरंशेऽपि

संयुज्यमानं स्वरूपेण तद्भेदोपाधिरिति चेन्न। स भेद उपाधिना च्छिन्ने चेदवयव-विश्लेषात्मा स्यात्, अच्छिन्ने तु भेदाभेदवाद एव शरणम्।

अत एव स्वसमानपरिमाणेषु विभुप्रदेशेषु तत्तदुपाधिसम्बन्धव्यवस्थेति निरस्तम्, तत्प्रदेशभेदस्यैव मृग्यमाणत्वात्। विभुद्रव्यमेव तत्तन्मूर्ततुल्यपरिमाणं जायत इति चेन्न; विरोधादुक्तदोषानतिक्रमाच्च। काल्पनिकांशभेदेन मूर्तसंयोग इति चेत्तर्हि वस्तुतस्त्वखण्डेनेत्युक्तं स्यात्। अंशभेदकल्पना च किं विभुद्रव्यस्वरूप-मात्रे उत तदंशे एवेति दुस्तरो गर्तः। निरंशानामपि स्वभावत एव विभूनामनेकमू-र्तसंयोगक्षमत्वमिति चेदणूनामपि एतदस्तु; अविशेषात्। एवं त्रसरेणुप्रतिबन्दिश्च भाव्येति।

अत्रोच्यते—यदि वयं प्रदेशवर्तिगुणनिह्नवाय प्रवर्त्स्यामस्तदा विभुप्रतिबन्द्याऽ-णुष्वपि तत्सम्भवः प्रदर्श्येत। किं त्ववयव्यारम्भकाणामवयवैरेव संयोग इति नियमस्य त्वयैवान्येषु सर्वेष्वङ्गीकारात् कल्प्येष्वपि तत्प्रसङ्गो दुर्वार इति ब्रूमः। न चान्यत्रैवायं नियम इति स्थाप्यम्; तादृशानामणूनामदृष्टेः, अनन्यथासिद्ध-लिङ्गाभावाच्च। यदि विभज्यमानेष्वभावपरिशेषायोगात् परमाणुरपि सत्त्वरज-स्तमसां सर्वापकृष्टससंघात इति सांख्यमतस्य निर्मूलत्वात्, महत्परिमाणतारतम्य-विश्रान्तिवत् परिमाणतारतम्यत्वादणुपरिमाणतारतम्यविश्रान्तिरपि क्वचि-त्कल्प्येत; तत्राह—विश्रमस्त्वस्तु दृष्ट इति। दृष्टे त्रसरेणौ विश्रमसम्भवे न मृग्यं ह्यन्यत्। तथा च सिद्धसाध्यता। यदि त्रसरेणुरेव परमाणुस्स्यादप्रत्यक्षस्तर्हि स्यादिति चेत्, हन्त कुत्रैषा व्याप्तिः?

सिद्धो ह्यन्यत्र दृष्टान्तस्साध्ये त्वन्योन्यसंश्रयः।
त्रसरेणुः पराणुस्सन् किं नाध्यक्षोऽपराणुवत्॥

चाक्षुषत्वप्रकर्षनिकर्षयोर्महत्त्वप्रकर्षनिकर्षानुविधानात् द्रव्यस्य चाक्षुषत्वं महत्त्वनियतमिति चेत्, चाक्षुषावयवकस्यैव द्रव्यस्य चाक्षुषत्वनियमदर्शनादचाक्षुषा-वयवकस्य त्रसरेणोरप्यचाक्षुषत्वप्रसङ्गे कस्ते निस्तारः? अगत्येति चेत्, भवतु कुत-श्चित् महत्त्वाभावेऽपि क्वचिदेवम्। अत एव मूर्तत्वे सति महत्त्वात् त्रसरेणुः कार्यद्रव्या-रब्ध इति कल्पनाऽपि निरस्ता। अस्तु बाह्येन्द्रियग्राह्यत्वादेव तत्साध्यमिति चेन्न; विपक्षे बाधकाभावाद्। अन्यथा त्रसरेण्वारम्भकस्यापि कार्यद्रव्यारब्धत्वकल्पनाया निवारकाभावात्। तत्र विपक्षे बाधकं नास्तीति चेदत्रापि तथेत्युक्तमेव। अतो न व्यणुकमित्यपि किंचित्। एवमारम्भकपरम्परायास्सावयवत्वं तद्व्यापकतयाऽ-भिमतमनित्यत्वं कुतश्चिन्महत्त्वं च प्रसज्यमानमनिवारणीयं स्यात्। एतत्सर्वम-भिप्रेत्याह—नो चेदिति। अणुषु स्वाभावसमानाधिकरणसंयोगसिद्धेरौपाधिकांशव-त्त्वस्वीकारात् इष्टप्रसङ्गतां परिहर्तुमारम्भकशब्दः॥ १८॥

आनन्द० ननु परमाणुकारणत्वनिराकरणं प्रकरणे न सङ्गतमित्याक्षेपसङ्गतिमाह—**ननु पञ्चीकरणाभिधानादिति।** **स्वतस्सभागत्वमिति**—अन्यथा विभागकरणासम्भवादिति भावः। **भूतांशानामिति** - भूतानामंशसंघातरूपत्वात्समष्टित्वं। अंशानां व्यष्टित्वं। **समानन्यायतयेति**—अन्यथा भूतानां सभागत्वं नानात्वं च न स्यादिति भावः। **तत्सर्वं सिद्धमिति**—सभागत्वादि सिद्धमित्यर्थः।

अभाष्यतेति—प्रथमसूत्रभाष्ये महासिद्धान्ते अभेदव्यापिनो वायोः वेणुरन्ध्रभेदेनांशभेदोऽप्यधायि इति भावः। **महद्दीर्घवद्वेति।** **ह्रस्वपरिमण्डलाभ्यां**—द्व्यणुकपरमाणुभ्यां महद्दीर्घवत् द्व्यणुकत्र्यणुकोत्पत्त्यनुपपत्तिवत् तदुक्तप्रक्रियान्तरमप्यनुपपन्नमिति सूत्रार्थः।

ननु पृथक्कार्यारम्भाद्यनुपपत्तिः सिद्धान्तेऽपि समेत्यत आह—**अयं भाव इति।** यागस्य स्वर्गसाधनताबोधकश्रुतिबलाददृष्टकल्पनावदित्याहुः। **श्रुतेस्त्विति**—जगत्प्रति ब्रह्मणः कार्त्स्न्येन कारणत्वमेकदेशेन वेति विकल्पे 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इति सूत्रेण पूर्वपक्षं कृत्वा समाहितं 'श्रुतेस्तु शब्दमूलत्वात्' इति। श्रुतेः—श्रुतिप्रामाण्यस्य सत्त्वान्नोक्तदोषः; कुतः ? शब्दमूलत्वात्—इतरविसजातीयतया शब्दवेद्ये लोकदृष्टव्याप्त्यभावादित्यर्थः। अनुमानेन तु दृष्टसजातीयमेव साधनीयं न विजातीयं व्याप्त्यभावादिति भावः।

अतिप्रसङ्गादिति। धूमादिना नित्यवह्निसिद्धिप्रसङ्गादित्यर्थः। **एतच्चेति**—सिद्धान्त इत्येतदित्यर्थः। तदन्यो वेति विकल्पं विकल्पयति—**अन्यस्त्विति।** **स्वाभाविक इति।** तद्द्रव्यस्वरूपमेवांश इत्यर्थः। स्वभावेन स्वरूपेणागतं संजातं वा। स्वार्थिको वा। स्वरूपमेवांशांशिभावापन्नमित्यर्थः **उत्तरत्रेति**—उपाधिसम्बन्ध एवांशांशिभावं भजत इति भावः।

नन्वंशाभावेऽपि स्वरूपेण संयुक्ताः परमाणव आरम्भका भवन्त्वित्यत्राह—**परिशेषादिति।** **अन्योन्यानाघ्रातेति**—अन्योन्यासंयुक्तांशरहितैः—कृत्स्नसंयुक्तैरित्यर्थः। **त्यक्त इति**—एकपरमाण्ववष्टब्धे प्रदेशे परस्या (परेणा) प्यवष्टम्भस्य वक्तव्यतया स्पर्शवद्द्रव्यस्य सप्रतिघत्वनियमत्यागप्रसङ्गः; अन्यथा सर्वव्यापिसंयोगासम्भवादित्यर्थः। दूषणान्तरमाह—**सर्वेष्विति।** तदेवोपपादयति—**न खल्विति।** तथात्वे घटादेरपि परमाणुतारतम्यं नियामकाभावान्न स्यात्। सर्वकार्यद्रव्यस्यापि विभुत्वं च स्यादिति भावः। नन्ववयवं विनाऽप्यवयवी तिष्ठत्येव विनश्यदवस्थायां. तथाचावयवाभावप्रदेशेऽप्यविनश्यन्नपि तिष्ठ (ति) तु; अतिप्रसङ्गस्तु यथाकथञ्चिन्नेय इत्याशङ्क्य समाधत्ते—**अवयवनाशादिति।** अन्यथा विन्ध्यभागेऽवयवनाशे हिमवद्भागेऽवयविनाशप्रसङ्गादिति भावः।

सेयमित्यादि—असिद्धं परमाणुं तदपेक्षयाऽधिकपरिमाणं द्व्यणुकं च साधयतः विचित्रपरिमाणत्वेन सिद्धस्य मेरुसर्षपादेस्सिद्धिर्न स्यादित्यर्थः। निर्मूलं—

निष्प्रमाणकमित्यर्थः। ननु घटस्य परिमितस्य पूर्वो भागः दक्षिणो भागः पश्चिम-मुत्तरमूर्ध्वमित्यादिदिगधीनो भेदो दृष्ट इति परमाणुष्वपि तत्कृतभागक्लृप्तिर-स्त्वित्याशङ्कते नन्विति। दिक्संयोगेति–संयोगभेदादेव भागक्लृप्तिः कल्प्या; नच संयोगभेदः; प्रतियोगिभेदाभावादिति भावः।

ननु दिगुपाधीनां भिन्नत्वात्संयोगभेदस्स्यादित्यत्राह—तदुपाधीति। यदि तत्रापीति—परमाणवः स्वांशैरुपाधिभिः संयुज्यन्ते उपाधयो वा तथा तैस्संयुज्यन्ते उत स्वरूपेणेति विकल्पेन पूर्वदोषानतिवृत्तेरिति भावः। दिगुपाधीनां परमाणु-भिरेकदेशेन संयोगाभावे दोषमाह—अत इति। ननु स्वांशभेदेन विनाऽप्यु (विना संसृज्यमाना उ) पाधयः स्वसंयोगिनि परमाणावंशभेदकल्पका भवन्तु इति चेत्; मैवं; तथा सति परमाणूनामेवांशभेदकल्पकत्वमस्तु कृतमुपाधिभिः? तदङ्गीकारेऽपि तत्संयोगस्य परमाणौ व्याप्य (परमाणाव) विद्यमानस्य अंशभेदक्लृप्तावनुपयो-गादित्याह—यदि चानंशभेदेनेति। षट्केनेति—षड्भिः परमाणुभिरेकस्य परमाणो-ष्षट्सु पार्श्वेषु योगे परमाणोः षडंशत्वं यदि पार्श्वभेदमन्तरेण सम्बन्धस्तदाऽ-धिकपरिमाणं न स्यादिति भावः। अणुमात्रक इति। स्वार्थे कः। अणुपरिमाण इत्यर्थः।

ननु सर्वशून्यवादिनः सा न सिद्धेत्यत आह—सांवृतीति—दोषसिद्धेत्यर्थः। प्रतिबन्दीमुपपादयति—निरंशा चेति। अन्येति—एकविषय एव कृत्स्नसंविदोऽ-प्युपयुक्तत्वादिति भावः। उल्लेखो—विषयीकरणं। अंशानपेक्षयेत्यत्र अंशस्यापेक्षा न विद्यते यस्येति गमकत्वात्समास इति ध्येयम्। न ह्यन्तत इति—उपाध्यधीनांश-भेदक्लृप्त्या वा बुद्धेर्विषयता दृष्टा नेत्यर्थः। यथोपलम्भमिति एकविषयत्ववदनेक-विषयत्वस्यापि दर्शनानुसारादुपपत्तिः; वस्तुव्यवस्थाया उपलम्भानुसारित्वा-दित्यर्थः। निरूढमिति—उपपन्नमित्यर्थः। अवयव्येति—परमाणुव्यतिरिक्तस्थल इति शेषः।

ननु परमाण्वारब्धसङ्घात इत्यङ्गीकारेऽपि तत्रोक्तविकल्पदोषस्स्यादिति प्रतिबन्दिमाशङ्कते--अथेति। परिहरति—न सम इति—संयोगस्यैव सङ्घातत्वा-दिति भावः।

ननु निरंशस्संयोग उभयवृत्तिरङ्गीक्रियते। तत्र स्वांशेन वर्तते उत कार्त्स्न्येन? नान्त्यः, एकत्र वृत्तावन्यत्राभावप्रसङ्गात्। न प्रथमः; अंशाभावादिति प्रतिबन्दीं शङ्कते—संयोगस्तर्हीति। सिद्धयोरिति—इदं वस्तुद्वयं दूरस्थं मया संयुक्तमिति सिद्धयोर्वस्तुनोः साध्यतया—जन्यतया संयोगस्य दर्शनादित्यर्थः। यथादर्शनमङ्गीकारादुभयवृत्तिताया नानुपपत्तिरित्याह—तदपि नेति। तदेवोप-पादयति—सोऽपीति-संयोगोऽपीत्यर्थः। दासत्वादिरादिशब्दार्थः। न प्रतिबन्दिः—न प्रतिबन्दियोग्य इत्यर्थः। अविशेषादिति—यदा पक्ष्यादेरन्यतरस्य कर्मसत्वेऽपि

विभुषु संयोगो नोत्पद्यते तदा तत्र व्यभिचारादन्यतरकर्म न संयोगकारणमिति कुत्रापि ततस्संयोगो न स्यादित्यर्थः। **कथमिति**—सप्रतिघत्वविरोधादित्यर्थः। इष्टापत्तिं निराचष्टे—**न (हि) च विभुद्रव्यस्येति**। अवयवित्वावयवसङ्घातत्वे मतभेदेन उत्तरत्रेति **तत्रचेति**—नानात्वाङ्गीकारे एकस्यैव सङ्घातत्वार्थं भेदाङ्गीकारे भेदाभेदप्रसङ्ग इत्यर्थः। अंशभेदमङ्गीकृत्याह—**स तत्रचेति**। विभुद्रव्यस्यांशवत्त्व इत्यर्थः। **स एवेति**—स्वांशभेदेन संयुज्यते न वेत्यादिप्रसङ्ग इत्यर्थः। **असंहतरूपता स्यादिति**—एकं वस्तु विभुद्रव्यं न स्यादित्यर्थः। **अच्छिन्ने**—अखण्डिते। **भेदाभेदेति** अखण्डितस्याभिन्नत्वादिति भावः। **स्वसमानपरिमाणेषु** उपाधिसमपरिमाणेषु। **विभुप्रदेशेषु**—विभुद्रव्यस्य प्रदेशेषु। **तत्प्रदेशभेदस्यैवेति**—उपाधिसमपरिमाणविभुप्रदेशस्यैवासिद्धेरित्यर्थः। **विरोधादिति**—विभुनः कार्यत्वाभावात्तथात्वे विभुत्वव्याघातादित्यर्थः। **उक्तदोषेति**—तत्तुल्यपरिमाणमप्यंशभेदेन जायते उत न ? उपाधिना विच्छिन्नं न तत्तुल्यपरिमाणं जायते अविच्छिन्नं वा ? इत्यादि दोषानतिक्रमादित्यर्थः। **तर्हीति**—काल्पनिकांशस्य वस्तुनः पारमार्थिकवस्तुनिर्वाहकत्वाभावादित्यर्थः। कल्पनापेक्षेऽप्युक्तदोषानिस्तार इत्याह—**अंशभेदेति**। सिद्धान्ते त्रसरेणूनां निरंशत्वात्तत्संयोगप्रतिबन्दिमप्याह—**एवमिति**। **प्रदेशवर्तीति**—प्रदेशवर्तिसंयोगापह्नवायेत्यर्थः। **विभुप्रतिबन्द्येति**।

यद्यपि विभूनां तन्न्यूनपरिमाणसंयोगः स्वाश्रयभूतन्यूनपरिमाणद्रव्याभावे न संभवति आश्रयरहितप्रदेशे संयोगासंभवात्। यद्येकाश्रयसत्त्वमात्रात् प्रतियोग्यन्तराभावप्रदेशेऽप्याश्रयान्तरे संयोगस्स्यात् तथा सति प्रदेशान्तरवर्तिवह्निना पटस्य कात्स्र्न्येन संयोगस्स्यात् अविशेषादिति कृत्स्नपटदाहेनैकदेशेन पटदाहः कुत्रापि न स्यादिति युक्तमाकाशादावव्याप्यवृत्तिसंयोगवत्त्वं। परमाणौ तु तन्न्यूनपरिमाणप्रतियोग्यन्तराभावान्नाव्याप्यवृत्तिसंयोगसम्भवः; तथाऽप्यभ्युपगम्यैतदुक्तमिति द्रष्टव्यम्।

तत्सम्भवः—अव्याप्यवृत्तिगुणसम्भवः। **अवयव्यारम्भकाणामिति**। यद्यपि द्व्यणुकस्य परमाणुरवयवः; तथाऽप्यवयव्यारम्भकाणामवयवानां संयोगः स्वावयवाच्छिन्नो दृष्ट इति त्वयाऽपि द्व्यणुकातिरिक्तकार्यस्थलेऽङ्गीकारादित्यर्थः। अत्र प्रत्यक्षदृष्टेस्संकोच उतानुमानादिति विकल्प्याद्यं दूषयति—**तादृशानामणूनामदृष्टेरिति**—अप्रत्यक्षत्वादित्यर्थः।

द्वितीयं दूषयति—**अनन्यथेति**। लिङ्गं शङ्कते—**यदीति**। **सर्वापकृष्टस्संघात इति**—प्रकृतिकार्यत्वादिति भावः **निर्मूलत्वात्**—निष्प्रमाणकत्वात्। **महत्परिमाणेति**। अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवदिति प्रयोगो द्रष्टव्यः। यत्र विश्रमस्स निरवयोऽणुरिति भावः।

न मृग्यमिति—अन्यत्परमाणुद्रव्यं न कल्प्यमित्यर्थः। **यदीति**—परमाणोरतीन्द्रियत्वनियमादिति भावः। **कुत्रेति**—गृहीतेति शेषः। प्रत्यक्षसिद्धो दृष्टान्त उतानुमानिक इति विकल्पमभिप्रेत्याद्यं दूषयति—**सिद्ध इति**। नात्र प्रत्यक्षसिद्धिरितिभावः। द्वितीयं दूषयति—**साध्ये त्विति**। तस्यापि दृष्टान्तापेक्षायामनुमानान्तराधीनस्य दृष्टान्तत्वे चक्रकानवस्थाप्रसङ्गात्प्राथमिकानुमानगम्यस्यैव दृष्टान्तत्वेऽन्योन्याश्रय इत्यर्थः। त्रसरेणोः परमाणुत्वेऽपि प्रत्यक्षत्वं साधयति—**त्रसरेणुरिति**। **परमाणुस्सन्**—परमाणुस्थानापन्नः। त्रसरेणुरध्यक्षः अणुत्वात् तदपेक्षया स्थूलजालमरीचिमध्यभासमानाणुवत्। इन्द्रियस्याणुत्वं नास्तीति 'अणवश्चेति' सूत्रे प्रत्यपादीति भावः।

महत्त्वस्य बहिर्द्रव्यप्रत्यक्षव्यापकत्वात्त्रसरेणौ तन्निवृत्तिमाशङ्कते—**चाक्षुषत्वेति**। बहिर्द्रव्यप्रत्यक्षत्वेत्यर्थः। यद्वा चाक्षुषत्वनिवृत्तिमाशङ्कत इत्यर्थः। साहचर्यमात्रं न व्याप्तिग्राहकमप्रयोजकत्वादित्याह—**चाक्षुषावयवस्यैवेति**। तथाचात्र त्रसरेणौ विश्रामानङ्गीकर्तुस्तदतिरिक्तपरमाण्वभ्युपगन्तुरपीत्यर्थः। **कुतश्चित्**—कारणान्तरात्। **क्वचित्**—त्रसरेणौ महत्त्वरूपपरिमाणाभावेऽपि। **एवं**—प्रत्यक्षत्वमित्यर्थः। तथाच—महत्त्वोत्कर्षस्य चाक्षुषप्रत्यक्षोत्कर्षप्रयोजकत्वेऽपि न चाक्षुषप्रत्यक्षमात्रहेतुत्वमिति भावः।

अत एवेति—त्रसरेणोः परमाणुत्वादित्यर्थः। तथाच स्वरूपासिद्धिरिति भावः। **एतत्साध्यं**—कार्यद्रव्यावस्थत्वरूपं साध्यं। **त्रसरेण्वारम्भकस्येति**। व्यणुकस्येत्यर्थः व्याप्तिरविशेषादित्याह—**निवारकाभावादिति**। इष्टापत्तिमाशङ्क्य नित्यनिरवयवाणुत्वसिद्धिर्न स्यादित्याह—**एवमारम्भकेति**। संयुक्तविभुप्रतिबन्द्याऽणुष्वव्याप्यवृत्तिसंयोगोपाधिकांशवत्त्वस्वीकारसम्भवादेकदेशेन संयुज्यते उत नेत्यादिविकल्पमुखेन प्रवृत्तानामिष्टप्रसङ्गतामाशङ्क्यारम्भकांशपदविशेषणेन परिहरतीत्याह—**अणुष्विति**। आरम्भकसंयोगानामवयवावच्छिन्नानामेव जनकत्वनियमादिति भावः। परमाणुस्सांशस्स्यात् आरम्भकत्वात् परमाणुरनौपाधिकदेशेन संयोगवान् स्यादारम्भकसंयोगवत्त्वादित्यादिप्रयोगो द्रष्टव्यः ॥१८॥

अक्ष० एवं शास्त्रीयं प्रकृतिविकृतिक्रमादिकमुपपाद्य महद्दीर्घाधिकरणोक्तमानुमानिकपरमाणुकारणवादासामञ्जस्यमुपपादयति—**कार्यमिति**। सर्वांशेन संयुक्ताः णवः न्यूनपरिमाणाः न्यूनदेशवर्तिनः। **समधिकं**—अधिकपरिमाणं—स्वापेक्षया अधिकदेशव्यापिकार्यं नैवारभेरन्नित्यर्थः।

अयं प्रसङ्गः परमाणुकारणवादे कृतः अनवस्थाभयात्परमाणूनामवयवा नेष्यन्ते–अवयवाभावे च पार्श्वमध्यादिप्रदेशभेदस्य न प्रसक्तिः प्रदेशभेदाभावे च द्व्यणुकारम्भकसंयोगः परमाणोः पार्श्वादिभागमात्रे इति न वक्तुं शक्यं सर्वत्र संयोगे असंयुक्तप्रदेशाभावेन नैकस्मात्परमाणोरधिकदेशवर्तित्वं द्व्यणुकस्य

कार्यस्य स्यात्। दृश्यते हि त्र्यणुकादावनवयवसत्वात्पार्श्वादिभागमात्रे संयोगेन असंयुक्तभागस्यापि सत्वात् पृथुतरचतुरणुकादिकार्यरम्भो यथादृष्टान्तं च अनुमेयेषु सिद्धिस्स्यात्। ननु शास्त्रैकगम्येष्विव लोकदृष्टविजातीयस्यापि सिद्धिरिति भावः। तथाचोक्तं—"षट्केन युगपद्योगात्परमाणोष्षडंशता" इति। स्वाभाविकभागभेदाभावेऽपि दिक्संयोगादिकृतप्राच्योदीच्यादिभागक्लृप्तिस्स्यादित्यत्राह—दिक्संयोगेति दिक्संयोगाधीनो हि प्रदेशभेदः सावयवेष्वेव दृष्टः अत इह निरवयवे परमाणौ दिक्संयोगानामैकदेश्यात्प्रदेशभेदाभावात् दिक्कृतोऽप्यंश भेदः। ते—दृष्टानुसारेण कल्पयतो न घटत इत्यर्थः। अतष्षण्णां समानदेशत्वे "पिण्डस्स्यादणुमात्रकः" इत्येव स्यादिति भावः। अत्र षट्कं चतुःपार्श्वं ऊर्ध्वाधोदेशषट्कं।

ननु निरंशा—बुद्धिः सात्रैकाऽप्यनेकान् विषयानवगाहमाना—दृश्यते तस्याः अंशाभावेन अंशानपेक्षापि, एकैकविषयावगाहनं न कार्त्स्न्येन भवति कार्त्स्न्येन तदवगाहने विषयान्तरोल्लेखानापत्तेः तद्वदंशानपेक्षत्वेऽपि परमाणुसंयोगस्य न कृत्स्नप्रतिसम्बन्धिकत्वावश्यम्भाव इत्यत्राह - बुद्धेस्त्विति स्फुरति—प्रकाशते—उपलम्भानुरोधात्—बुद्धेरंशानपेक्षा विषयिता उपगम्यते। नचैवमुपलम्भः परमाणोरस्ति नवा त्र्युणकादेरारम्भक संयोगः अंशानपेक्षो कुत्रचिद्भवद्भिः परमाणु कारणवादिभिरपि दृष्टचरः तन्निदर्शनेन साध्यमानः परमाणोरारम्भकसंयोगः अंशापेक्ष एव स्यादिति भावः।

महत्परिमाणतारतम्यविश्रान्तिवदणुपरिमाणतारतम्यविश्रान्तिरपि क्वचित्कल्प्येत्यत्राह—विश्रम इति। दृष्टे त्र्यणुक एव विश्रमो भवतु द्व्यणुकमपि माभूत्—त्र्यणुकसाधने च सिद्धसाधनमिति भावः। अन्यथा बाधकमाह—नोचेदिति। अप्रयोजकाख्यानावलम्बेन त्र्यसरेणौ विश्रमानङ्गीकारे-त्र्यसरेणुः-कार्यद्रव्यारब्धः बाह्येन्द्रियग्राह्यत्वादित्यादिना तदवयवानुमाने। आरम्भकांशप्रभृतिषु—आरम्भकावयवप्रभृतिषु। नियताः—व्याप्ताः। प्रसङ्गाः—परमाणुरपि सावयवस्स्यात् आरम्भकत्वात्—कपालादिवत् अत एवानित्यस्स्यात् तत एव किञ्चिदपेक्षया महानपि स्यादित्यादिप्रसङ्गाः। दुर्निवाराः—अनिवार्या इति भावः।

स्याद्भागानन्त्यसाम्ये परिमितिसमता सर्षपक्ष्माभृतोश्चे-
न्मैवं भागेष्वनन्तेष्वपि समधिकता स्थौल्यहेतुर्गिरेः स्यात्।
द्व्यक्त्यानन्त्येऽपि जात्योः परतदितरता पक्ष्मासाद्यनन्तं
श्रौतोपादानसौक्ष्म्यं न भवदभिमतं तत्प्रथिम्नश्श्रुतत्वात् ॥ १९॥

सर्वा०। नन्वेवं सर्वत्रावयवानन्त्यप्रसङ्गे सर्षपमहीधरादिपरिमाणवैचित्र्यं न स्यादिति शङ्कते—स्यादिति॥ प्रसञ्जकस्याप्रयोजकत्वमित्या [त्वा] भिप्रायेण प्रतिवक्ति—मैवमिति। आनन्त्यसाम्येऽप्यवयवानां न्यूनाधिकभावेन परिमाण-

वैषम्योपपत्तिमाह—भागेष्विति। एतच्चोत्तरमनन्तभागाभ्युपगन्तॄणां तत्प्रसञ्जकानां च समानम्।

अण्वंशानामनन्तत्वे गन्तॄणां तदतिक्रमः।
कदाऽपि न स्यात्किं न स्याद्वेगातिशयवैभवात्॥

द्युमणेरातपस्सर्पन्नुदयाद्रिशिखामणेः।
तत्क्षणं किं न निर्भाति पश्चिमाद्रिशिखण्डकः॥

आनन्त्याविशेषे कथं न्यूनाधिकभाव इत्यत्राह—व्यक्तीति। सत्ताप्रभृतिघटत्वादिपर्यन्तानां सर्वासां जातीनां त्रैकालिकानन्तव्यक्तिवृत्तित्वमविशिष्टं, तथापि न्यूनाधिकवृत्त्यैव परापरभावो युष्माभिः कल्पितः, तद्वदिहापि स्यादिति भावः। निदर्शनान्तराण्यप्याह—पक्षेति। अनन्ताः पक्षा मासाश्च, तथाऽपि मासापेक्षया द्वैगुण्यं पक्षाणामेष्टव्यम्। आदिशब्देन क्षणप्रभृति परार्धादिसंग्रहः। अन्यच्च, घटसमुदयाद्घटपटसमुदायोऽधिकः. हिमवद्दक्षिणदेशान्मेरुदक्षिणदेशः; एकात्मदुःखजातादनन्तात्मदुःख जातमित्यादि स्वयमूह्यम्। * नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा इति जगदुपादानं निरतिशयसूक्ष्मं श्रूयते, अतोऽस्मदाद्यग्राह्योदुस्त्यजः परमाणुरित्यत्राह—श्रौतेति। न हि सर्वन्यूनपरिमाणत्वं तत्सूक्ष्मत्वम्, पूर्वोक्तसर्वगतशब्देन श्रुत्यन्तरैश्च विरोधात्। न च जात्यभिप्रायोऽसौ; एकस्य सर्वोपादानत्वोक्तेः, सर्वव्यापिस्वतस्सर्वज्ञजगत्कर्तृविषयत्वाच्च वाक्यस्य। सूक्ष्मशब्दश्च न परिमाणविशेषनियतः। उक्तं च विभ्वीं प्रकृतिं महीयसश्च महदादीन् प्र[कृत्य]क्रम्य साङ्ख्यैः‌ *सौक्ष्म्यात्तदनुपलब्धिरिति।

ननु त्रसरेणोरष्टमः षष्ठो वा भागः परमाणुरिति सर्वानुमतैश्शिल्पिनां शास्त्रैर्धर्मशास्त्रैस्तन्मूलश्रुत्या च परमाणुसिद्धिः स्यात्। तन्न; शिल्पादिशास्त्राणां परमाणावतत्परत्वात्; मानोन्मानादिविशेषनिर्धारणं हि तत्र विधित्सितम्। ततो हैतुकोक्तानुवादमात्रमिह स्यात्। तत्र च त्रसरेणुतः किंचित्सूक्ष्मं भवतु, मा वा भूत्, दृष्टोपक्रमं विवक्षितसिद्धिरित्यत्राकूतम्। शास्त्रतश्च कचिदनन्यथासिद्धात् परमाणुसिद्धावपि तदनुमानभङ्गात्परस्य मानभङ्गः, यथा प्रकृत्याद्यनुमायिनस्साङ्ख्यस्य।

शास्त्रैकविषयत्वे च परमण्णोर्न सिध्यति।
नित्यस्पर्शादियोगित्वं भूतानां विकृतित्वतः॥

अस्पर्शाण्वंशसंघत्वात्कतिचित्प्रकृतेरतः।
एकैकाण्वंशभागेऽपि भागानन्त्यं प्रचक्षते॥

निरंशा प्रकृतिस्सैव परिणामविभागिनी।
अनन्तांशात्मिका चेति व्याहतं साङ्ख्यभाषितम्॥

अत्यन्तभिन्नसत्त्वादिद्रव्यसंघातप्रधानतः ।
यथांशं विश्वसृष्टौ च न स्यात्त्रिगुणता क्वचित् ।। १९ ।।

इति परमाणुकारणतावादभङ्गः ।।

आनन्द० मुखान्तरेणानवस्थापरिहारेण निरवयवपरमाणुसाधनमाशङ्क्य परिहरतीत्याह—**नन्वेवमिति** । आक्षेपसङ्गतिर्बोध्या ।

एतच्चोत्तरमिति । अधिकावयवारब्धत्वं न्यूनावयवारब्धत्वं च परिमाणतारतम्यप्रयोजकमित्युत्तरमित्यर्थः अनवस्थया अनन्तभागाभ्युपगन्तॄणां तत्प्रसञ्जकानां क्वचिदवयवारब्धत्वमनभ्युपेत्य नित्यपरमाणुवादिनां नैयायिकानां च समानमित्याह—**अनन्तभागेति** । प्रकारान्तरेण परमाणुसाधनमाशङ्क्य निराकरोति —**अण्वंशानामिति** । **तदतिक्रमः**—अण्वतिक्रमः- । **न स्यादिति**—अनन्तावयवत्वेन परमाणोरपि गगनादिवदनन्तत्वादतिक्रमणं न स्यादित्यर्थः । घटादीनामतिक्रमो न स्यादित्येतत्कैमुत्यन्यायसिद्धमिति द्रष्टव्यम् । परिहरति—**किं न स्यादिति** । स्यादेवेति भावः । तत्र हेतुः—**वेगातिशयेति** । तत्र दृष्टान्तमाह—**द्युमणेरिति** । **सर्पन्**—गच्छन् । **उदयाद्रिशिखामणेः**—उदयं गतस्य । **पश्चिमाद्रिशिखण्डकः**—पश्चिमाद्रिशिखरगतः ।

मासापेक्षयेति—एकैकस्य मासस्य पक्षद्वयात्मकत्वादिति भावः । मूले 'व्यक्त्यानन्त्येऽपि जात्योः परतदितरता पक्षमासाद्यनन्तम्' इत्यनन्तरं तथाऽपि न्यूनाधिकभावो दृष्ट इति शेषः । **सर्वगतशब्देनेति**— विभुशब्देनापीत्यर्थः । **असाविति**—सर्वगतशब्द इत्यर्थः । **एकस्येति**—अजामेकामित्यादिनेत्यर्थः । वस्तुतस्तु नेदं वाक्यं प्रकृतिपरं येन परमाणुसिद्धिमाशङ्केतेत्याह—**सर्वव्यापीति** । **उक्तं चेति**—

सामान्यतस्तु दृष्टात् अतीन्द्रियाणां प्रसिद्धिरनुमानात् ।

इत्यादिना प्रकृत्यादिसिद्धिमुक्त्वा तेषामनुपलब्धिबाधात्सिद्धिर्न स्यादित्याशङ्क्य अनुपलब्धिमात्रं न बाधकं; अपि नु योग्यानुपलब्धिः; प्रकृते सा नास्ति । कुतः ?—

सौक्ष्म्यात्तदनुपलब्धिः नाभावात् कार्यतस्तदुपलब्धेः ।

इति महत्स्वपीन्द्रियाग्राह्यत्वमात्रेण सूक्ष्मपदं प्रयुक्तमित्यर्थः । ननु देवताविग्रहादिप्रमाणनिर्णयार्थम्—

जालसूर्यमरीचिस्थं सूक्ष्मं यत्परिदृश्यते ।
तस्याष्टमो वा षष्ठो वा भागोऽणु परिकीर्तितः ।

इति । तथा स्वर्णस्तेयादिनिर्णयार्थं स्मृतावपि—

जालसूर्यमरीच्यां यद्भाति सूक्ष्मं त्रुटेः परम् ।
भागोऽष्टमस्तृतीयो वा परमाणुरितीरितः ।।

इत्यादिना शिल्पशास्त्रधर्मशास्त्रेषूक्तेः कथं निराकरणम् ? इति शङ्कते—**नन्विति** । **अतत्परत्वादिति**—परमाणुविषयतात्पर्याभावादित्यर्थः । तात्पर्याभावमेवोपपादयति—**मानोन्मानादीति** । **तत्रेति** ।

इदमुपलक्षणं—त्रसरेणुतत्सूक्ष्मभागपरिकल्पना च स्यादिति द्रष्टव्यम् । तदिदमाह—**भवतु मा वा भूविति**—तावतैव माननिर्णयसम्भवादिति भावः । परमाणौ शास्त्रप्रमाणकथनं विवक्षितमित्याह—**शास्त्रतश्चेति** । ननु यथाकथञ्चित्परमाणुसिद्धिरेवालमित्यत्राह—**शास्त्रैकविषयत्व इति** । परमाणोर्नित्यस्पर्शरूपरसगन्धवत्त्वं च तदङ्गीकृतं न सिध्यतीत्यर्थः । तत्र हेतुमाह—**भूतानामिति** । अणूनां भूतविकृतित्वादित्यर्थः ।

यद्वा भूतानां परमाणुविकृतित्वाद्विकृतिवत्परमाणुरप्यनित्यरूपादिमानित्यर्थं इत्याहुः ।

इतरे तु स्पर्शादीनां भूतविकारत्वात्प्रकृतिभूतपरमाणौ स्पर्शादयो न स्युरित्यर्थं इति वदन्ति ।

किञ्चाणूनां निरवयवत्वमपि न सिध्यतीत्याह—**अस्पर्शेति** । **कतिचित्**—केचन । **अस्पर्शाण्वंशसङ्घत्वात् अतः प्रकृतेः** सकाशात् ।

एकैकाण्वंशस्य पृथक्करणेऽपि तस्मिन्नंशेऽपि भागानन्त्यं प्रचक्षते तस्याप्यनन्तावयवत्वं वदन्तीत्यर्थः । तथाच क्वचिदपि पर्यवसानाभावान्निरवयवपरमाणुसिद्धिर्न स्यादिति भावः ।

साङ्ख्यास्तु प्रकृतिर्निरंशैव परिणामवशाद्विभक्ता सत्यनन्तांशा चेति वदन्ति । तदयुक्तं; सांशत्वनिरंशत्वविभागानां व्याहृतत्वादित्याह—**निरंशा प्रकृतिरिति** । तैरेव साङ्ख्यैरत्यन्तभिन्नसत्वरजस्तमसां सङ्घातः प्रकृतिरित्युक्तं; तदपि दूषयति—**अत्यन्तेति** । **यथांऽशं विश्वसृष्टौ चेति** । सत्वांशस्सत्वरूपं कार्यं सृजति रजोंऽशो रजोरूपं तमोंऽशस्तमोरूपं चेत्यर्थः । **न स्यादिति** । **क्वचिदपि कार्ये त्रिगुणता**—सत्वादिरूपता न स्यादित्यर्थः ।

ननु त्रयाणामेकैकस्मिन्नेव कार्ये शुक्लकृष्णादितन्तूनामिव जनकत्वमस्त्विति चेत् मैवं; तैः प्रत्येकं तत्तदंशजनकत्वोक्तेः । किञ्च तथासत्यत्यन्तभेदाङ्गीकारो व्यर्थः । त्रयाणामेकात्मत्वस्य लाघवेनाभ्युपगन्तुं युक्तत्वात् ।। १९ ।।

इति त्रिगुणपरीक्षायां परमाणुकारणतावादभङ्गः

अक्ष० आरम्भकपरम्परायाः सावयवत्वप्रसङ्गं बाधक माशङ्कच परिहरति—**स्याद्भागेति**। **भागानन्त्यसाम्य इति**। अवयवानन्त्यसाम्य इत्यर्थः। **परिमिति समतेति** परिमाणसाम्यतेत्यर्थः। अवयवबहुत्वस्यैव अवयविपरिमाणकारणत्वेन सर्षपावयवानां महीधरावयवानाञ्च बहुत्वसाम्येन सर्षपमहीधरयोः समपरिमाणत्व प्रसङ्गः इत्यर्थः। अत्र प्रसञ्जकम प्रयोजकमित्याशयेनाह—**मैवमिति**। **भागेष्विति** अवयवेषु। **अनन्तेष्वपि**—सर्षपावयवापेक्षया महीधरावयवानामानन्त्ये समधिकत्वमस्ति तत्र अन्यूनानधिकत्वमेव अवयविपरिमाणसाम्यप्रयोजकं इह तदभावान्न साम्यापादनं सुकरं अतोऽधिकत्वमिह गिरेः स्थौल्यहेतुस्स्यादिति भावः। आनन्त्याविशेषे कथं न्यूनाधिकभाव इत्यत्राह—**व्यक्तीति**।

सत्तादिजातीनां त्रैकालिकानन्तव्यक्तिवृत्तित्वाविशेषेऽपि सत्ताजातिः अधिकदेशवृत्तित्वात्परा घटत्वादिजातिः न्यूनदेशवृत्तित्वादपरेति सत्ता-घटत्वादिजात्योः परापरभावो युष्माभिरेव कल्पितः तद्वदिहापि स्यादिति भावः। स्वाभिमतं दृष्टान्तमाह—**पक्षेति**। पक्षामासाश्चानन्ताः तथापि मासापेक्षया द्वैगुण्यं पक्षाणामिष्यते तथा प्रकृतेऽपीति भावः।

ननु श्रुतावेव "सुसूक्ष्मं यद्भूतयोनिं परिपश्यन्ति धीराः" इति जगदुपादानस्य सुसूक्ष्मत्वश्रवणात् परमाणुकारणत्वमेवाभिप्रेतमित्यत्राह—**श्रौतेति**। श्रुत्युक्तमुपादानकारणसौक्ष्म्यं भवदभिमतं न -सर्वन्यूनपरिमाणत्वं न भवितुमर्हतीत्यर्थः। कुतइतिचेदाह—**तत्प्रथिम्न इति**—तस्मिन्नेव वाक्ये अव्यवहितपूर्वं "नित्यं विभुं सर्वगतं सुसूक्ष्मम्" इति जगदुपादानस्य परममहत्परिमाणस्य श्रुतत्वादित्यर्थः। परममहत्वे सुसूक्ष्मत्वं कथमिति चेत् परममहतोऽपीन्द्रियाग्राह्यत्वादिना सुसूक्ष्मत्वोपचार इत्यवधेयम्। अत एव विभ्व्याः प्रकृतेस्सौक्ष्म्यात्तदनुपलब्धिरिति साङ्ख्याः।

कार्योपादानभेदे न कथमधिकतो गौरवादेस्स्वकार्यं
नान्यत्व नामसंख्याव्यवहृतिधिषणाकारकालादिभेदैः।
द्रव्याभेदेऽप्यवस्थान्तरत इह तु ते पत्रताटङ्कवत्स्युः
नोचेदंशांशिनोस्स्यात्प्रतिहतिरुभयोः स्पर्शवत्त्वाविशेषात् ॥२०॥

सर्वा०। एवं पृथिव्याद्युपादानं चिन्तितम्। अथोपादानातिरिक्तं कार्यंद्रव्यं नास्तीति साध्यते; तत्रावस्थाभेदमात्रं स्वीकृतम्। अयमेव च सत्कार्यवाद आरम्भणाधिकरणसाध्यः।

विसृष्टयुल्लासविशेषाः कार्याणां कथिताः क्वचित्।
कल्पनीया न सर्वत्र परिणामोक्त्यबाधतः ॥

आविर्भावतिरोभावजन्मनाशविकल्पवत् ।
नित्यं जगदिति स्मृत्या व्यवस्थाद्वयमीरितम् ॥

तदिह प्रत्यक्षागमवलादेकस्यैव द्रव्यस्यावस्थाभेदादुपादानोपादेयभाव इति स्थिते द्रव्यान्तरं प्रागसदागन्तुकं वदतः प्रतिवक्ति—कार्येति ॥ कार्यद्रव्यस्य स्वोपादानद्रव्याद्भेदे सति द्विपलकैकपलन्यायेन तन्तुगुरुत्वम्, समं न्यूनमधिकं वा पटगुरुत्वं च सम्भूय पतनातिरेकं कथं न कुर्यात् ? तदकरणे कश्चिदपि हेतुर्न सिध्येदित्यर्थः—

तथा हि—न तावदवयविनि गुरुत्वं न जायते, परमाणुगुरुत्वपरिशेषप्रसङ्गात् तथा च त्वयाऽनभ्युपगमात्, अयुक्तेश्च । कार्यगुरुत्वादेव द्व्यणुगुरुत्वं कल्पयसि । जातस्य च न स्वाभावतः पतनहेतुत्वाभावः । प्रतिवन्धात्कार्यानतिरेक इति चेत्, किमयं प्रतिबन्धोऽवयविगुरुत्वस्य ? उतावयवगुरुत्वस्य ? नाद्यः; परमाणुगुरुत्वस्यैव [प्र] पतनहेतुत्वप्रसङ्गात् । तथा सति गुरुत्वात् पतनं द्रवत्वात्स्यन्दनमिति तत्तत्क्रियावन्निष्ठगुरुत्वादिकल्पनभङ्गापाताच्च । अतो वरमवयविनि गुरुत्वाद्यनुत्पत्तिकल्पनम्; तत्र चोक्तो दोषः ।

न द्वितीयः, कदाचिन्निष्कम्पेऽवयविनि शाखाफलहस्तादिलम्बनाभावप्रसङ्गात् । तथा च कथमवयव्यपि तत्र लम्बेत ? संयोगान्तरादर्शनात् लम्बमानोऽत्रयवी स्वावयवमपि लम्वयतीति चेन्न; सर्वावयवलम्बनप्रसङ्गात् । सङ्घातवादिनस्तु यथार्ह प्रतिब[न्धां]द्धांशेऽलम्वनोपपत्तिः । कार्यगुरुत्वोत्पत्तौ कारणगुरुत्वं नश्यतीति चेन्न; अपसिद्धान्तात्, रूपादिष्वपि तथात्वप्रसङ्गात् । अथ कार्यगुरुत्वस्यातिमन्दत्वात्सूक्ष्मं पतनवैषम्यं दुर्ग्रहमिति, तदपि न; मान्द्यकारणादृष्टेः, कल्पकासम्भवाच्च । अतस्तन्तुतत्कार्यपटसमुदायोन्माने पटद्वयोन्मान इव गुरुत्वान्तरकार्यं दुस्त्यजम्, आदिशब्देन द्रवत्वगन्धादिसंग्रहः स्वकार्यं त[त्त]दुचितं कार्यमित्यर्थः । तथाऽप्यनन्यथासिद्धभेदकभूम्ना भेदसिद्धौ गुरुत्वान्तरकार्यादर्शनं कथंचिदन्यतरप्रतिवन्धेन नेयमित्यभिप्रायेण शङ्कमानं प्रत्याह—नान्यत्वमिति ।

यद्यपि नामभेदाभेदावर्थभेदाभेदयोरप्रयोजकौ, तथापि पर्यायातिरिक्तो विशेषणविशेष्यभावानर्हो वाचकभेद इह नामभेदः । स च सिंहव्याघ्रशब्दवत् स्ववाच्यं भिन्द्यात् । संख्याभेदोऽप्येकस्यैव द्वितीयादियोगाद्यद्यपि स्यात्, तथाऽपि नैवमत्र; बह्वस्तन्तवः, एकः पट इति विभजनात् । व्यवहृतिरिहार्थक्रियासिद्ध्यर्थो व्यापारः । पटाद्यर्थं तन्त्वादय उपादीयन्ते, पटादयस्त्वाच्छादनाद्यर्थम् । न च तन्त्वादिमात्रे पटादिधीः, पटादिषु वा तन्त्वादिधीरिति धिषणाभेदः । आकारभेदश्च व्यवस्थिताश्रयो वृत्तचतुरश्रत्वादिः । पूर्वकालीनास्तन्त्वादयः पटादयस्तु पश्चाद्भाविन इत्येवंविध इह कालभेदः । आदिशब्देन कारणभेदादिसंग्रहः । अंशुप्रभृतयस्तन्त्वादीनां पटादीनां तु तन्त्वादय इति नियतोऽत्र कारणभेदः । कार्यभेदश्च एवं

नियत एव। कारणस्यैव च कार्यत्वे कारकव्यापारवैयर्थ्यं स्यादिति भेदहेतवः। एषामन्यथासिद्धिमाह—**द्रव्याभेदेऽपीति**। तुशब्दोऽवधारणे। उपादानोपादेयतयावस्थाद्वयवति द्रव्ये घटपटवद्भेदंसाधयितुं न शक्नुवन्तीत्यर्थः अत्र दुस्तरप्रतिबन्ध्यभिप्रायेण दर्शयति—**पत्रताटङ्कवदिति**। पत्रस्य हि कुण्डलितस्य नियतं नामान्तरं दृष्टम्। सफलश्चावस्थान्तरेण कारकव्यापारः, न ह्यत्रावयव्यन्तरोत्पत्तिः। आकुञ्चनप्रसारणपद्मसंकोचविकासादिष्वपि तत्कल्पनाप्रसङ्गात्।

न चैकेनावयवेनावयव्यारम्भः, असमवायिकारणासम्भवात्। अवयवावयवसंयोगस्तत्रासमवायिकारणमिति चेन्न; तस्यान्यार्थत्वात्। अन्यथा अंशूनां तन्तुवत् पटाश्रयत्वमपि स्यात्। न च तद्युक्तम्; आरब्धकार्यैरवयवैस्तदैवावयव्यन्तरारम्भानभ्युपगमात्। तत्र हि सप्रतिघत्वविरोधाद्विभेषि। एवं संप्रतिपन्नावस्थाभेदमात्रानादरेण द्रव्यान्तरकल्पनेऽपि तमेव विरोधं प्रसञ्जयति—**नो चेदिति**। अंशांशिनोः—अवयवावयविनोरित्यर्थः। उक्तप्रसङ्गे तदभिमतमेव हेतुमाह—**उभयोरिति**। द्वयोर्द्रव्ययोरन्यतरस्य वा स्पर्शहीनत्वे मिथः प्रतिरोधो नास्ति। इह तु न तथेत्यभिप्रायेणोभयोरित्युक्तम्। अवयवावयविनोरेकत्र वृत्तिर्नास्तीति चेत्, समवायिदेशैक्याभावेऽपि संयोगिदेशैक्यमङ्गीकरोषि, तत्र कथं तन्त्ववष्टब्धनभःप्रदेशे पटसंयोगः, माभूदिति चेत् मूर्तामूर्तसंयोगविलोपप्रसङ्गः। मेरुमन्दरादीनामप्यविभक्ताकाशप्रदेशवृत्तावविरोधः स्यात्; नीरक्षीरादिमेलने का वार्ता? हन्त! स्वसिद्धान्तं प्रस्मृत्य पृच्छसि। एतेन भूमावुन्मज्जति, निमज्जतीत्यादिसिद्धनिदर्शनमपि निहतम्। तस्मादवयवावयविव्यतिरिक्तविषय एव सप्रतिघत्वविरोधव्यवस्थापनमपि निर्मूलमिति॥ २०॥

आनन्द० प्रसङ्गात्मिकां सङ्गतिमाह—**एवमिति**। नन्ववस्थारूपकार्यभेदाङ्गीकारे तस्यावस्थावतो भेदात् 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यधिकरणविरोधः; तत्र कार्यमात्रस्याभेदाङ्गीकारादित्याह—**अयमेवेति**। तत्रापि कार्यद्रव्यस्यैवाभेदस्साधित इत्यर्थः।

ननु कार्यं कारणमिति विभाग एव नास्ति; सतामेव द्रव्याणां विसृष्ट्युल्लासविक्षेपैः पुराणादिष्वाविर्भावमात्राङ्गीकारादुत्पत्त्यभावात्साङ्ख्यपक्ष एव युक्त इत्यत्राह—**विसृष्टीति**। विसृष्टिः—विसर्गः; यथा कूर्मादेराकुञ्चितानामवयवानां प्रसारणम्। उल्लासः—विकसनं; यथा मुकुलीभूतस्य (पद्मादेः) करवीरादेः। विक्षेपः—यथा पिण्डीभूतस्य रजसः सर्वतः स (सम) र्पणं (जलादेः विस्तारकारणम्)। यद्यपि क्वचिद्विसृष्ट्यादय उक्ताः; तथाऽपि ते न सर्वत्र कार्येषु; किन्तु कूर्माद्यङ्गप्रकाशनमिव पूर्वं विसृष्टप्रच्छन्नेष्वेव। तथा च क्वचित्पूर्वमुत्पन्नस्य नित्यस्य वा भगवद्विग्रहादेराविर्भाव इत्यर्थः;। तत्र प्रमाणमाह—**परिणामेति** 'सदेव

सोम्येदमग्र आसीत्' 'तत्सृष्ट्वा' 'प्रकृतेः परिणामास्ते' 'महदाद्या विशेषान्ताः' इत्यादौ परिणामवचनाबाधाय विसृष्ट्यादेः क्वाचित्कताकल्पनमिति भावः।

ननु परिणामवचनमेव विसृष्ट्यादिपरं भवत्वित्याह—**आविर्भवेति।** व्यवस्थाद्वयं—आविर्भावः जन्मेति व्यवस्थाद्वयमित्यर्थः। तथा च सर्वत्र विसृष्ट्याद्यङ्गीकारे आविर्भावस्यैव सार्वत्रिकत्वाव्द्यवस्था न स्यादिति भावः। **तदिहेति**—मृदयं कुम्भः तन्तवः पट इति प्रत्यक्षं, सदेवेत्याद्यागमः। **कार्यद्रव्यस्येति**—तस्मिन्नपि कारणगुणप्रक्रमेण गुरुत्वाङ्गीकारादिति भावः। **सम्भूय**—संहत्य। **न सिध्येदिति**—सम्भावनायां लिङ्। **परमाणुगुरुत्वेति**—द्व्यणुकादीनामवयवित्वादिति भावः। इष्टापत्तिं निरस्यति—**तथाचेति।** अयुक्तिमेवाह—**कार्यगुरुत्वादेवेति।** **जातस्य चेति**—कार्ये उत्पन्नस्य गुरुत्वस्येत्यर्थः। **परमाणूगुरुत्वस्यैवेति**—द्व्यणुकादिगुरुत्वानामवयविगुरुत्वत्वादिति भावः। इष्टापत्तिं निरस्यति—**तथा सतीति।** **ततो वरमिति**—गुरुत्वकार्याभावादिति भावः। इष्टापत्तौ बाधकमाह—**तत्र चोक्तो दोष इति।** परमाणुगुरुत्वकल्पना न स्यादिति दोष उक्त इत्यर्थः। **तथा चेति**—अवयवलम्बनाभावे तत्समवेतावयविनो लम्बनासम्भवादिति भावः। अप्रतिबद्धगुरुत्ववद्द्रव्यान्तरसंयोगात् बद्धपाषाणलतान्यायेनावयवी लम्बतामित्यत्राह—**संयोगान्तरेति।** संयोगान्तरादर्शनादिति क्वचित्पाठः। तदा सम्बन्धविशेषादवयवी स्वावयवमपि लम्बयतीति कल्प्यते प्रत्यक्षदर्शनादित्यर्थः। **सर्वावयवेति** अविशेषादिति भावः। **रूपादिष्विति।**

नन्वस्तु रूपादिष्वापादितः प्रसङ्गः को दोषः? इति चेन्न; तथा सति तन्तूनां विभागेन पटनाशे उत्पादकाभावाद्रूपादिकं न स्यात्। न च कारणगुणप्रक्रमेणोत्पत्तिः; परमाणावपि नाशात्। न च नित्यत्वात्परमाणुगतानां न नाश इति वाच्यं; तथा सति पटदशायां तन्तूनां प्रत्यक्षता न स्यात्। न चेष्टापत्तिः; अस्मिन् पटे त एव तन्तव इति सर्वानुभवविरोधादिति भावः। **कल्पकासम्भवाच्चेति**—नन्वयव्यतिरेक्यकल्पकमेव कल्पकमिति चेत् न; तस्यैवासिद्धेरिति भावः। रसादिरादिशब्दार्थः। कल्पकमाशङ्कते—**तथापीति।** अत्र—तन्तुपटस्थले। **मेवं** द्रव्यान्तरयोगनिमित्तव्यवहारो न भवतीत्यर्थः। तदेव दर्शयति—**बहव इति।**

कारणभेदादीत्यनेन कार्यभेद उच्यते। **कार्यभेदश्चैवमिति**—पटस्याच्छादनरूपं कार्यम्; तन्तूनां पटादिरूपं कार्यमियर्थः। एतेषामनुग्राहकं तर्कमाह—**कारणस्यैवेति।** अनुकूलतर्काभावान्न साधक इत्याह—**एषामिति।** **दुस्तरेति**—तथा च तत्र व्यभिचारोऽपीति भावः। व्यभिचारस्थलान्तरमप्याह—**आकुञ्चनेति।** **असमवायिकारणेति**—अन्यथा द्व्यणुकमेकस्मादेव परमाणोरुत्पद्येतेति भावः। **अवयवावयवेति**—अवयवस्य चेदवयवास्तेषां संयोग इत्यर्थः। **अन्यार्थत्वादिति**—अवयवजनकत्वेन

पटरूपवदन्यथासिद्धत्वादित्यर्थः। **अन्यथेति**—कार्यद्रव्यस्यासमवायिसामानाधिकरण्यनियमादिति भावः।

आरब्धकार्यैरिति—द्रव्यासमवायिकारणाश्रयस्य समवायिकारणत्वनियमादवयवावयवानां आरब्धावयव्यात्मकावयवतया तत्काल एवावयव्यन्तरजनकत्वं न सम्भवतीत्यर्थः। अनभ्युपगमे हेतुमाह—तत्रेति। यद्वा—नचैकावयवेत्यारभ्य पत्रताटङ्कादिस्थलपरिहाराशङ्कापूर्वकं नो चेदित्यस्यावतारिकाग्रन्थः।

नन्ववयवस्य स्वावयववृत्तित्वं अवयविनोऽवयववृत्तित्वमिति नैकत्र वृत्तित्वमिति शङ्कते—**अवयवावयविनोरिति**। **संयोगिदेशैक्यमिति**—एकत्र नभस्स्थलेऽवयवावयविनोस्संयोगसम्बन्धवृत्तिरिति भावः। **मूर्तामूर्तेति**—यद्यपि कार्यानारम्भकाले परमाण्वाकाशसंयोगे न विरोधः; तथाऽपि घटादीनां मूर्तानाममूर्तैस्संयोगं ब्रवीषि संयोगजसंयोगं स न स्यादिति भावः। यदि स्पर्शवतोस्सप्रतिघत्वविरोधो न स्यात्तत्राह—**मेरुमन्दरेति**।

ननु सप्रतिघत्वविरोधे नीरक्षीरयोरेकनभः प्रदेशवृत्तिः कथं? भूमौ सिद्धादीनां विमज्जनं कथम्? तस्मात् स्पर्शवतां सप्रतिघत्वव्याप्तिरवयवावयविव्यतिरिक्तस्थले नीरक्षीरादिस्थल इव संकुचिता न वर्तत इत्यत्राह—**नीरक्षीरेति**। **स्वसिद्धान्तं प्रस्मृत्येति**—नीरक्षीरादिष्ववयवविभागेन परस्परानाक्रान्त प्रदेश एव परस्परावयवानां वृत्तिस्सिद्धा। निमज्जनादावपि भूविभागेन प्रवेशः; झडिति जलनिमज्जने विभक्तजलसन्धानन्यायेन पुनस्सन्धानम्। तच्च सूक्ष्मकालत्वात् ज्वालानाशन्यायेन न प्रतीयते इति किरणावल्यादौ प्रतिपादितमित्यर्थः। **तस्मादिति**—तथा च संकोचे न प्रमाणमिति भावः॥ २०॥

अक्ष० इत्थं पृथिव्याद्युपादानं निरूपितं। अथ उपादानातिरिक्तमवयविकार्यद्रव्यं नास्तीति निरूप्यते—**कार्येति**। घटकपालादिरूपकार्यद्रव्योपादानयोर्भेदे कपालादिरूपोपादाने तद्भिन्नं घटादिरूपमवयविकार्यं समवेतमस्तीत्युपगम इति यावत्। किमत्रानुपपन्नमित्यत्राह—**नेति** केवलकपालादिरूपोपादानगुरुत्वापेक्षया घटकपालादिरूपकार्योपादानोभयगौरवस्याऽधिकतया तदुचितकार्यस्य कपालादिपतनापेक्षया पतनातिरेकस्यावश्यकत्वेन तददर्शनमेवात्रानुपपन्नं स्यादिति भावः[1]।

अधिकतद्गौर वादेरिति। अत्र तयोः कार्योपादानयोः मेलने यद्गौरवं तदधिकमित्यन्वयः अथवा तस्य कार्यत्वस्य गौरवादेरित्यन्वयः। अधिकश्चतत् तद्गौरवादि चेति समासः। अत्र पतनातिरेको नाम तुलायां धरणे उन्माने

---

१. अधिकतो गौरवादेरिति उ० प्र० को० पाठः श्रीचरणैस्तु अधिक तद्गौरवादेरित्येवपाठः आदृतः।

एकपलद्रव्यपार्श्वापेक्षया द्विपलद्रव्यपार्श्वस्येव उपादानद्रव्यमात्रपार्श्वापेक्षया अवयविद्रव्यपार्श्वस्य अधिको यो देशसंयोगसमुदायः। अत्रादिशब्दः द्रवत्वादिपरः। तथापि भेदकभूम्ना भेदसिद्धौ गुरुत्वान्तरकार्यादर्शनं केनचित्प्रतिबन्धादप्युपपद्यत इत्यत्राह—**नान्यत्वमिति**। अवयवावयविनोर्नामभेदः पर्यायातिरिक्तो वाचकशब्द भेदः। संख्या भेदः—एकोऽवयवी बहवोऽवयवाः इति व्यवहृतिभेदः। व्यवहृतिरिह स्वसिद्धयर्थो व्यापारविशेषः तद्भेदः। अवयविसिद्धयर्थमवयवा उपादीयन्ते तत्सिद्धयर्थंन्तु तदवयवा इति धिषणा बुद्धिः तद्भेदः अवयविनि घटः पट इति बुद्धिः नैवमवयवेषु किन्तु कपालाः तन्तवः इति। आकारभेदः अवयविनः पृथुबुध्नोदरत्व—चतुरश्रत्वादिः नैवमवयवानां। कालभेदः—पूर्वभाविनोऽवयवाः अवयवीत्वनन्तर भावी। सन्तोऽप्यमी भेदाः नावयविनं भिन्द्युरिति भावः। कथमितिचेत्तत्राह—**द्रव्याभेद इति**। द्रव्यभेदाभावेऽपि अवस्थाभेदमात्रेणाऽपि। **इह**—अवयविनि। **ते** उक्तनामादिभेदाः उपपन्नास्स्युरित्यर्थः। तत्र दृष्टान्तमाह—**पत्रेति**। यथा एकस्य तालपत्रस्यैव कुण्डलीकरणे ताटङ्कमिति नामादिभेदः नहि तत्र तालपत्राद तिरिक्तं ताटङ्कमुत्पद्यत इति भवन्तोऽपि मन्यन्ते तालपत्रस्यैकत्वेन तत्रारम्भकसंयोगस्य दुर्वचत्वात्। एवमनभ्युपगमे बाधकमाह—**नोचेदिति**। **अंशांशिनोः**। अवयवावयविनोः। उभयोरपि स्पर्शवत्वसाम्यात्। **प्रतिहतिः**—प्रतिघातः द्वयोर्घटयोरिव एकघटस्यापि अवयवभिन्नस्य तत्सहभावेन एकस्मिन्भूतलादिदेशे संयोगस्य प्रतिरोधस्स्यादिति भावः।

इत्थं वृत्त्यादिखेदो न भवति न च नः कल्पनागौरवं स्या-
द्वस्त्रे दीर्घैकतन्तुभ्रमणविरचिते वस्त्रधीर्नापि बाध्या।
देशाधिक्यं समेतेष्वणुषु न हि ततः स्थूलधीबाधशङ्का
संसर्गैर्विशेषादवयविपरिषद्राशिवन्यादिवादः ॥ २१ ॥

सर्वा०। परपक्षे प्रसञ्जितानां दोषाणामभावात् स्वपक्षस्य सम्यक्त्वमाह—**इत्थमिति** ॥ इत्थम्—अवस्थाभेदमात्रेण निर्वाहे सतीत्यर्थः। यद्वा, त्वत्पक्षवदिति। उक्तस्सप्रतिघत्वविरोध इह वृत्तेः खेदः, अवयवेषु वृत्त्यनुपपत्तिर्वा। यदि प्रत्यवयवमविभागेनावयवी वर्तते तदेकावयवदर्शनेऽप्यवयव्युपलभ्येत, जातिरिव प्रत्याधारम्। अथ विभज्य, अवयवातिरिक्तांशभेदेनानवस्थापातः। बलवत्प्रमाणोपनीतेऽर्थे संप्रतिपन्नवद्वृत्त्यनुपपत्तिर्विलीयत इति चेन्न; प्रमाणबलस्यात्र निरस्तत्वात् आदिशब्देनोत्पत्तिनाशानुपपत्तिस्संगृह्यते। तथाहि—पृथुतरपटनिर्माणप्रक्रमे द्वितन्तुकादिपटपङ्क्तिरुत्पद्यते नवा? न चेत्, बुद्धिशब्दान्तरादिरवस्थाभेदादेवेति सिद्धं स्यात् उत्पद्यते चेत् त्रितन्तुकाद्यारम्भदशायां पूर्वंपूर्वं तिष्ठति न वा? पूर्वत्र तदनारम्भः, आरब्धकार्यैस्तदानीमवयव्यन्तरानारम्भात्। न च द्वितन्तुकादिस्त

न्त्वन्तरसहितस्त्रितन्तुकाद्यारम्भक इति युक्तम् । इह तन्तुषु पट इत्यादिस्वाभिमतव्यवहारविरोधात् ।

पूर्वसिद्धपटैस्सार्द्धं तन्तुभिः पटसम्भवे ।
पटपङ्क्तिस्समीक्ष्येत क्रमादाधिक्यशालिनी ॥

प्राक्सिद्धानां पटादीनामुत्तरोत्तरजन्मनि ।
अहेतुको विनाशश्च स्थिरपक्षे न युज्यते ॥

न चेदुपलम्भविरुद्धनाशसन्ततिकल्पनाप्रसङ्गः । एवमेकद्वित्र्यादितन्त्वपकर्षणदशायामपि खण्डपरम्परोत्पत्तिनाशपरम्पराक्लृप्तिः क्लिष्टतरा । लाघवशालिनि सङ्घातमात्रपक्षे राशिन्यायान्नासौ दोषः ।

ननु गौरवभयादवयविपरिहारे सौगतवत्स्वरूपविशेषमालम्ब्य तन्त्वादीनां संयोगोऽपि त्यज्यतामित्यत्राह—न चेति ।अत्र हि परैरप्यसमवायिकारणतयाऽभिमता दृष्टा च संयुक्तावस्था स्वीकृतेति नास्माकमिह काचित्कल्पना । कुतस्तद्गौरवं सम्भवेदिति भावः । स्वलक्षणसमुदायवादिनाऽपि नैरन्तर्यरूपोऽतिशयः कश्चिदिष्यते; अन्यथा दूरस्थवदेकताभ्रान्तिः पुञ्जबुद्धिर्वा न स्यात् । त्वमपि विभूनामणूनां च नित्यानामपि हेतुभेदैरवस्थान्तरापत्तिमङ्गीकरोषि; सर्वद्रव्यस्वरूपनित्यत्वं तदवस्थाभेदं च वदतामपि तथा किं न स्यात् ? संयुक्तावस्थाऽपि हि परिणामः । कथं तर्हि नित्यानित्यविभागः ? इत्थम्—द्रव्यतदवस्थयोस्तथाभावादेव, द्रव्यविवक्षायां त्ववस्थाविशिष्टवेषेणानित्यत्वव्यवहार इति ।

ननु तन्तव एव व्यतिषङ्गविशेषविशिष्टाः पट इति भवतां राद्धान्तः * पटवच्चेति सूत्रे दर्शितः । तथा सति दीर्घैकतन्तुपरिवर्तनविशेषनिष्पादितेऽवयविनि कथं पटबुद्धिः स्यात् ? अनेकतन्तुसङ्घातासिद्धेरित्यत्राह—वस्त्र इति । नहि वयं तन्तुगतमेकत्वं द्वित्वबहुत्वादिकं वा पटधीनिबन्धनं नियच्छामः; यथादृष्टि सर्वसम्भवात् । त्वं तु स्वपक्षदोषमस्मत्पक्षस्थं मन्यसे । प्रदर्शितं हि पत्रे ताटङ्कनिष्पत्तावेकस्यावयवस्यानारम्भकत्वम्; अतस्तवैव तत्र पटधीबाधः । एकस्यारम्भकत्वेऽतिप्रसङ्गोपि तवैव । स्यादेतत्, अवयविनमनभ्युपगच्छतामन्ततः पर्वतादयोऽपि परमाणव एव संहताः स्युः । ते न प्रत्यक्षाः; अतः * सर्वाग्रहणमवयव्यसिद्धेरित्यक्षपादोक्तमनतिक्रमणीयं स्यात्, स्थूलद्रव्याभावे चाणुसंहतौ स्थूलत्वाध्यासोऽपि न सिध्येदिति; तत्राह—देशाधिक्यमिति ।

अयंभावः—स्थूलधीरित्यवयविधीर्वा ? परिणामविशेषधीर्वा ? प्रत्यक्षयोग्यत्वधीर्वा ? प्रत्येकदेशादधिकदेशत्वधीर्वा ? नाद्यः, तदभावप्रसक्तेरिष्टप्रसङ्गात्। न द्वितीयः, संहतैरेवावयविवत्परिणामान्तरस्य सृष्ट्युपपत्तेः । अणुष्वेव कथं विरुद्धं स्थूलत्वं स्यादिति चेदेकत्वाद्याश्रयेष्वेव कथं द्वित्वादिकमिच्छसि ! अपेक्षाबुद्धि-

संगृहीतान्यानुबन्धसामर्थ्यादिति चेद्द्व्यनपेक्षसम्भेदसामर्थ्यादेव परिमाणान्तरमपि पश्यन्तु भवन्तः। न तृतीयः, एकैकस्याप्रत्यक्षत्वेऽपि समुदायवशाद्दृश्यत्वोपपत्तेः यथैकैकस्य दवीयसः केशहिमादेरदर्शनेऽपि संहतानां दृश्यत्वम्; एकैकस्याप्यासत्तौ दर्शनाद्योग्यत्वमस्तीति चेदणूनामपि त्रसरेणुमात्ररूपाणां सामग्रीसम्भवे तथैव स्यात्। न चतुर्थः, माषादिराशिषु संहतिभेदैर्देशतारतम्यदृष्टेः।

ननु तत्तत्परिमाणावयविद्रव्याभावे तत्प्रयुक्तदेशन्यूनाधिकत्वं दुर्निरूपं स्यात्। नैवम्; न ह्यवयविनिरूपणेनैव देशाधिक्यादिनिरूपणम् सुरभित्वगन्धत्वादेरिव सम्बन्धिन्यूनाधिकभावेनापि तदुपपत्तेः। द्रव्येषु नैवमिति चेत् न, द्व्यणुकोत्पत्तेः पूर्वक्षणे संयुक्ताणुद्वयस्य प्रत्येकदेशादधिकदेशत्वावश्यंभावात्। अन्यथा सर्वपरमाणूनां समानदेशत्वे प्रागुक्तदोषप्रसङ्गात् द्व्यणुकान्तरपरिच्छिन्नस्स देश इति चेन्न; सहवृत्त्ययोगात्, अन्यथा परिच्छेदासिद्धेः। समवायिनस्संयोगिनो वा देशस्याभावे कथं तत्र देशाधिक्यमिति चेन्न; आकाशाद्यंशभेदेन तदुपपत्तेः। कथं निरवयवस्यांश भेद इति चेदात्मानं पृच्छ। कर्णशष्कुल्याद्युपाधिपरिच्छित्त्या नभसि नानाश्रोत्राणि कल्पयसि। भेर्यादिशब्देषु श्रूयमाणेषु तरङ्गवृत्त्या तत्तदनन्तरदेशेषु शब्दोत्पत्तिं साधयसि। वेणुरन्ध्रादिविशेषभागाश्च प्रसिद्धाः। आकाशादेरप्रत्यक्षत्वात्तदंशतारतम्यं दुर्ग्रहमिति चेन्न; प्रत्यक्षाकाशवादिनं प्रति हेत्वसिद्धेः। त्वयाऽपि माषादवयविनो महीधरस्याधिकदेशत्वं गृह्यते। आलोकमण्डलांशभेदैस्तत्र देशाधिक्यमिति चेन्न; आलोकस्यापि नभसि न्यूनाधिकदेशवृत्तित्वदृष्टेः। परिमाणाधिक्यमात्रमेव पर्वतादिषु गृह्यत इति चेदगृह्यमाणमपि देशाधिक्यं तत्रास्ति न वा? अस्ति चेत्सङ्घातेऽपि कश्चोद्यावकाशः? न चेत्तत्तद्देशेषु चक्षुःप्रसरादिनिरोधकत्वं न स्यात्। अन्यथाऽल्पदेशवर्तिनः सर्वत्र निरोधकत्वप्रसङ्गात्। अतः परस्पराक्रान्तदेशावष्टम्भेन संहन्यमानेषु त्रसरेणुषु सुग्रहमेव देशाधिक्यम्, देशस्त्वालोकाकाशादिर्यः कश्चिद्यथायोग्यमस्तु। अत एव प्रधानाभावादणुषु स्थौल्यारोपोऽपि न स्यादिति चोद्यमपि निस्तीर्णम्।

तथाऽपि यदि संसृष्टास्तन्तव एव पटस्ततस्तन्तुराशिमात्रेऽपि पटधीः स्यादित्यत्राह—संसर्गदेरिति। न हि त्वयाऽपि तन्तुसंसर्गमात्रं पटस्यासमवायिकारणमिष्यते; तथा सति कुविन्दादिव्यापारनैरपेक्ष्यप्रसङ्गात्। अतो यादृशात्संसर्गविशेषादवयवी तवोत्पद्यते तादृशसंसर्गविशिष्टास्तन्तवः पट इति क्वातिप्रसङ्गः? आदिशब्देन संसर्गिद्रव्याणि देशकालौ च गृह्यन्ते। द्वितीयेन त्वादिशब्देन यूथपङ्क्तिमण्डलसेनाव्यूहपूर्णचतुरश्रादिसंग्रहः। परिषदाद्युपादानं दृष्टान्तार्थम्। मत्वर्थीयमपि शूरवती सेनेतिवत् प्रत्येकसमुदायभेदविवक्षया स्यादिति।

भिन्नानामेव संश्लेषे संघातैक्यानुसारतः।
संयुक्तौ द्वाविति प्रख्या राशिद्वित्वनयाद्भवेत्॥

महत्त्वैकत्वयुक्तत्वप्रभृतेरपि राशिवत् ।
संयुक्तद्रव्यनिष्ठत्वान्न संयोगे प्रसञ्जनम् ॥
घनत्वश्यामतादीनां वनैकाधिकरण्यतः ।
न स्याद्वृक्षबहुत्वादेर्घनत्वाद्यैर्विशेषणम् ॥
तन्तवः सितरक्ताद्याः पटचित्रानुयायिनः ।
अवयव्यनपेक्षत्वं चूर्णसंहतिचित्रवत् ॥
रूपादीनामचित्रेऽपि वदन् वैषम्यदर्शनम् ।
अपह्नुवीत वैयात्यात्खपुष्पादेरदर्शनम् ॥
या चासौ धारणाकृष्टचोरुपपत्तिरसूत्र्यत ।
तादृग्भूतावयव्यर्थे संघाते सा भविष्यति ॥
गाढावयवसंश्लेषरहितेऽवयविन्यपि ।
धारणाकर्षणे न स्तस्तथा चाभ्युपगच्छसि ॥
धारणाकर्षणे चात्र धृताकृष्टानुबन्धतः ।
दृढावयवसंश्लेषसहितेऽवयविन्यपि ॥
अंशान्तरेषु तेऽस्माकं सिद्धे जतुगृहीतवत् ।
तृणोपलादिजतुसंगृहीतं यदुदाहृतम् ॥
तत्राप्यवयवी नेष्टः कश्चिज्जतुतृणादिषु ।
पाशाद्यैरपि पश्वादेर्धारणाकर्षणे क्षमे ॥
किं तत्र पशुपाशादिष्ववयव्यभ्युपेयते ।
संग्रहप्रभवं चात्र धारणाद्यनुभाष्य तु ॥
पक्षिलस्तन्मतस्थो वा नोत्तरं सम्यगब्रवीत् ।
आरब्धकार्यैरारम्भो मिथस्सप्रतिघत्वतः ॥
न्यायवार्तिकटीकादौ क्षिप्तस्संमतिरत्र नः ।
प्रत्यक्षातीन्द्रियोपात्ते प्रत्यक्षत्वं च दुर्भणम् ॥
चाक्षुषाचाक्षुषद्रव्यसंयोगे चाक्षुषत्ववत् ।
मुधा चोदाहृतं कैश्चिद्धिमवत्परमाणुकम् ॥
टीकाकारस्तु तत्राह सूक्ष्मद्रव्योपलक्षणम् ।
विशेषानुपलम्भेऽपि राश्येकत्वमतिर्यथा ॥
वृक्षादिष्वपि तद्वत्स्याद्यथादृष्टि व्यवस्थितेः ।
एकदेशे समस्ते च वृक्षलक्षणसंभवे ॥

वृक्षधीरुपपद्येत संग्रहाच्चापृथङ्मतिः ।
* सर्वाग्रहणमवयव्यसिद्धेरिति सूत्रयन् ॥
प्रत्यक्षव्यतिरिक्तान्तक्लृप्तिदौस्थ्यपराहतः ।
* सेनावनवदित्यादावप्रत्यक्षाणुसूत्रणम् ॥
त्रसरेण्ववधिस्थाणुस्थापकेषु न शोभते ॥ २१ ॥

आनन्द० संगतिं दर्शयति-**परपक्ष इति** । दृष्टान्तपरत्वे स्वारस्यादाह--**यद्वेति** । अथ प्रत्यवयवं अविभागेन वर्तते उत विभागेन ? इति विकल्पमभिप्रेत्य आद्यं दूषयति—**यदि प्रत्यवयवमिति** । द्वितीयं दूषयति—**अथेति** । वि (अवि) भागस्त्ववयवमादायैव । पूर्वावयववृत्त्यर्थमवयवान्तरस्वीकारे तस्मिन्नप्यवयवसम्बन्धस्य वक्तव्यतया तत्राप्युक्तविकल्पेनावयवान्तराङ्गीकारे अनवस्थेति भावः । **सम्प्रतिपन्नवदिति**—संयोगादिवदित्यर्थः । आरब्धकार्यैरिति-तथा सति कार्योत्पत्तेरविरामप्रसङ्गादिति भावः ।

नचेति—द्वितन्तुकपटादेस्तन्त्वन्तरस्य चानारब्धकार्यत्वादिति भावः । इहेति—इह पटः तन्तौ च पट इति व्यवहारप्रसङ्गादिति भावः । द्वितन्तुकपटादिभिः पटान्तरोत्पत्त्यङ्गीकारे उपलम्भविरोधोऽपीत्याह—**पूर्वसिद्धेति । समीक्ष्येतेति**—न दृश्यत इत्यर्थः । क्रियातिपत्तौ लिङ् । ननु पूर्वपूर्वेषां द्वितन्तुकानां त्रितन्तुककाले नाशात् पटपङ्क्त्यनुपलम्भो न दोष इत्याशङ्क्याह—**प्राक्सिद्धानामिति । स्थिरपक्षे इति**-तथा च बौद्धपक्षपरिग्रहप्रसङ्ग इति भाव; । द्वितीयं दूषयति—**न चेदिति** । न युज्यते इत्येतन्न चेदित्यर्थः—युज्यते चेदिति यावत् । तथा च नाशसन्ततिरनुपलम्भबाधितेति भावः ।

केचित्तु-प्राक्सिद्धानामित्यारभ्य न युज्यते इत्यन्तं पूर्वशेषतया व्याख्याय; द्वितीयं दूषयति-न चेदितीत्याहुः ।

एवमिति—अनुपलम्भबाधितेऽपीत्यर्थः । कल्पनीयेति शेषः । **लाघवशालिनीति**-अतिरिक्तद्रव्याभावेन लाघववादिमतीत्यर्थः । अवयविवादिभिरपि तन्त्वादिसंयोगाङ्गीकारान्नास्माकमेव संयोगाङ्गीकारे गौरवमित्याह **अत्र हीति** । किंचात्र संयोगस्य प्रत्यक्षसिद्धत्वान्न कल्पनेत्याह—**दृष्टा चेति** । स्वलक्षणवादिनाऽपि स्वलक्षणातिरिक्तं संयोगस्थानिकं व्यवहारार्थमङ्गीकृतमित्याह-**स्वलक्षणेति** । **दूरस्थवदिति**-दूरस्थपदार्थेष्विव समीपस्थपदार्थेष्वपि पुञ्जबुद्धिर्न स्यादित्यर्थः ।

नन्ववस्था विकारः । नच सा नित्यानां युक्ता । तथात्वे विनाशित्वप्रसङ्गेन नित्यताव्याघातादित्यत्राह-**त्वमपीति** । बहूनामाकाशादीनामपि शब्दादिरूपविकारवत्त्वं अणूनामपि द्व्यणुकसंयोगपाकजरूपादिविकारवत्त्वमङ्गीकरोषीत्यर्थः । **तथेति**—त्वदङ्गीकृतप्रकारेणेत्यर्थः । ननु परिणामो विकारः । सैवावस्था । नच

नित्यानां सा अङ्गीकार्येत्यत्राह–संयुक्तावस्थाऽपीति। तद्वद्ध्रुवदभिमतासमवायिकारणसंयोगावस्थाऽपि न विरुद्धेत्यर्थः। ननु भवत्पक्षे नित्यस्यापि कार्यत्वान्नित्यानित्यव्यवस्था न स्यादित्याशङ्कते–कथं तर्हीति। इत्थमिति–नामान्तरभजनावस्थाभावादेव नित्यत्वव्यवहार इत्यर्थः। द्रव्यविवक्षायामिति–द्रव्यस्य (द्रव्ये) ह्यनित्यताव्यवहारः स्वर्गिन्यानेन विशिष्टवेषेणेत्यर्थः। यथादृष्टीति–संयोगविशेषरूपावस्थाबलाद्व्यवहारः। तथा च तादृशावस्थाया अत्रापि सत्त्वात् पटव्यवहारादिसम्भव इत्यर्थः। प्रत्युत तवैव तत्र पटबुद्ध्याद्यनुपपत्तिरित्याह–त्वं त्विति। संयोगासम्भवेन तव कारणाभावात्; मम त्ववयवानामेव संयोगादिति भावः। ते च–परमाणवः। सर्वाग्रहणम्–परमाणुवत् पर्वतादेरग्रहणम्। अतिरिक्तस्य प्रत्यक्षयोग्यस्यावयविनोऽसिद्धेस्संघातस्याप्यणुवदग्राह्यत्वात्। स्थूलत्वाध्यासोऽपीति–आरोप्यस्यान्यत्र सत्त्वनियमात्। तथा च सर्वसिद्धस्थूलधीः क्वचिदपि न स्यादिति भावः।

ननु देशाधिक्यं वा कथं भवेत्? भवतु वा आधिक्यम्; तथाऽप्यणुभूतस्य स्थौल्यं प्रत्यक्षं वा कथं भवेदित्यत्राह–अयं भाव इति। तदभावप्रसक्तेरिति–अवयव्यभावापादनस्येत्यर्थः। एकत्वेति–नच 'अणोरणीयान् महतो महीयान्' इत्यादिश्रुत्या ब्रह्मणि परपक्षवत् स्वाभाविकाणुत्वमहत्त्वप्रसङ्गः इति चेत्; यथैकव्यक्तिगतैकत्वसमनियतं द्वित्वं विरुद्धं तथैकपरिमाणसमनियतं परिमाणान्तरं विरुद्धमिति व्याप्तेः; भगवति तन्महत्परिमाणसमनियतततदणुत्वं विरुद्धमिति न तत्स्वाभाविकमिति ध्येयम्।

अन्यानुबन्धः-व्यक्त्यन्तरानुबन्धः–सम्बन्धः। एकैकस्यापीति–तथा च सर्वथा दर्शनायोग्यत्वाभावात् दृष्टान्तवैषम्यमिति भावः। वैषम्याभावमाह–अणूनामिति। तथैव स्यात्–दर्शनयोग्यत्वं स्यादित्यर्थः। त्रसरेणुविश्रमादणुपरिमाणस्येति भावः। नन्विति–न्यूनाधिकपरिमाणद्रव्यावच्छिन्नस्यैव न्यूनाधिकदेशत्वादिति भावः। सुरभित्वेति–यथा कर्पूरधूलिषु पुष्पेषु वा सौरभ्यं न्यूनमधिकं वाऽऽश्रयन्यूनाधिकभावाद्भवति; तथा अत्रापि संयुक्तद्रव्यन्यूनाधिकभावेन अवयव्यभावेऽपि तारतम्यं संभवतीत्यर्थः। गन्धत्वमित्यत्र गन्धशब्दो द्रव्यपरः। तथा च गन्धत्वतारतम्यं–परिमलतारतम्यमित्यर्थः। द्व्यणुकोत्पत्तेःपूर्वमिति–देशविशेषापादकावयविनोऽभावादिति भावः। द्व्यणुकान्तर(रावच्छि)परिच्छिन्नेति–एतद्द्व्यणुकोत्पत्तेः पूर्वं द्व्यणुकान्तरस्य सम्भवेन तस्य देशावच्छेदकत्वेन नानुपपत्तिरित्यर्थः। सह वृत्त्ययोगादिति–द्व्यणुकान्तरावच्छिन्नप्रदेशे परमाणुद्वयस्य सप्रतिघत्वविरोधात्सहवृत्त्ययोगादित्यर्थः।

ननु सहवृत्तिर्मास्तु; द्व्यणुकस्य देशतया तत्र वृत्त्यङ्गीकारे दोषाभावादिति चेत्; सह वृत्त्ययोगादिति–परमाण्वन्तरेणापि सहवृत्त्ययोगादित्यर्थः। अन्यथेति–

तथाचैकपरमाणुदेश एव परमाण्वन्तरस्यापि वृत्तेः द्वयणुकस्याप्यधिकदेशावच्छेदकत्वाभावादित्यर्थः।

ननु न्यूनाधिकपरिमाणद्रव्यं देशः। स च संयोगी समवायी वा ? तदभावे कथं देशाधिक्यम् ? इति शङ्कते—**समवायिन इति**। **आकाशेति**—आकाशाद्यंशभेद इत्यर्थः। प्रदेशभेदाश्च सर्वसिद्धा इत्याह—**वेणुरन्ध्रेति**। **प्रत्यक्षेति**—सिद्धान्ते प्रत्यक्षत्वादिति भावः। प्रतिबन्द्या समाधत्ते—**त्वयापीति**। आकाशाप्रत्यक्षवादिनाऽपि माषावयवापेक्षया महीधरस्योपरिभागेऽधिकदेशत्वं ग्राह्यम्। तत्राकाशव्यतिरेकेणान्यस्याभावादिति भावः। **आलोकस्यापीति**—आलोकमण्डलान्तराभावादिति भावः।

ननु माषापेक्षया महीधरस्योपरिभागे परिमाणाधिक्यमेव (दृश्यते) गृह्यते न देशाधिक्यमिति शङ्कते—**परिमाणाधिक्यमिति**। **न चेदिति**—तत्तद्देशाधिकदेशकत्वाभावादितिभावः। ननु तत्तदधिकदेशकत्वाभावेऽपि तत्तद्देशे चक्षुःप्रवृत्तिनिरोधकत्वमस्त्वित्यत्राह—**अन्यथेति**। अविशेषादिति भावः। तथाचावयव्यनङ्गीकारेऽप्यवयवसंघात एव न्यूनाधिकदेशत्वमित्युपसंहरति—**अत इति**। **देशस्त्विति**—तन्निर्धारणं व्यर्थमित्यर्थः। **अत एवेति**—देशाधिक्यरूपप्रधानस्योपपादितत्वादित्यर्थः। ततः स्थूलधीबाधशङ्केति मूलस्यामर्थः—स्थूलधियो या बाधशङ्का—स्थूलधीः कुत्राऽपि नास्तीति या शङ्केति यावत्। सा ततः देशाधिक्यरूपस्थौल्यस्योपपादनान्नेति। **क्वातिप्रसङ्ग इति** - तन्तुराशिमात्रे पटधीप्रसङ्गो नास्तीत्यर्थः। ननु तन्तूनामेवावस्थायोगिनां पटत्वे पटस्तन्तुमानिति न प्रयोगो न स्यादित्यत्राह—**मत्वर्थीयमपीति**। मतोरर्थं इवार्थो यस्येति बहुव्रीहिः। 'मत्वर्थाच्छः' इति स्वार्थिकच्छप्रत्ययः।

ननु घटादीनां संघातात्मकत्वे परस्परसंयोगे सत्येकसंघातत्वापत्त्या एकस्मिन्नेव संयुक्ताविमाविति च द्वाविति च बुद्धिर्न स्यादित्यत्राह—**भिन्नानामेवेति**। भिन्नानामवयवानां **संश्लेषे**—संयोगविशेषे **संघातैक्यानुसारतः**—पृथक् संघातक्लृप्तया संघातद्वयस्य संयोगेऽपि संयोगविशेषावस्थाभेदघटितैकसंघातात्मकत्वाभावात् **संयुक्तौ द्वाविति** बुद्धी राशिद्वय इव सम्भवतीत्यर्थः। अन्यथा महत्त्वादि राश्यादावपि न स्यादिति भावः।

ननु संयोगविशेषावस्थात एव घटादिव्यवहाराः; तर्हि महत्त्वादिकं संयोगस्य स्यादिति तस्यैव द्रव्यत्वापत्तिः; अवस्थाश्रयस्य त्वया द्रव्यत्वाभ्युपगमात्। तथा च घट्टकुट्यां प्रभातमित्यत्राह—**महत्त्वैकत्वेति**। राशिसंयोगादेः द्रव्यनिष्ठतया न संयोगस्य द्रव्यत्वमिति भावः। ननु त्वन्मते संयोगस्यैव घटाद्यवस्थारूपतया महत्त्वैकत्वद्वित्वयुक्तत्वादीनां संयोगविशेषघटादिनिष्ठत्वाभावे महान् घट इत्यादिविशेषणविशेष्यभावप्रतीतिर्न स्यादित्यत्राह—**घनत्वेति**। घनत्वं निबिडत्वं

संयोगविशेषः महत्त्वं वा । **वनैकाधिकरण्यतः**—वनसामानाधिकरण्यात् । वननिष्ठत्वाभावात्तत्रापि घनं वनं नीलं वनमिति प्रतीतिर्न स्यादित्यर्थः । **वृक्षबहुत्वादेः**—वनस्येत्यर्थः ।

केचित्तु—वनैकाधिकरण्यतः—घनं वनं श्यामं वनमिति प्रतीत्या वननिष्ठत्वस्य सिद्धेः वृक्षबहुत्वादेः—घनत्वाद्यैस्सह वहवो वृक्षाः घनाः श्यामा इति सामानाधिकरण्यप्रतीतिरित्यर्थः । आदिशब्देन देशसंयोगो विवक्षितः । ननु वननिष्ठमेव घनत्वादिकमित्यत्राह—**वृक्षबहुत्वादेरिति** । ततोऽतिरिक्तस्य वनस्य भवताऽप्यनङ्गीकारात्; तस्य गुणत्वात् तत्र घनत्वादीनामसंभवादिति भावः ।

ननु सितरक्तादितन्त्वारब्धे पटे चित्ररूपधीरस्ति; तन्तूनामेव पटत्वे प्रत्येकतन्तुव्यतिरेकेण चित्ररूपाधिकरणपटस्याभावात्तन्तूनां तदधिकरणत्वाभावादाश्रयाभावेन चित्ररूपाभावप्रसङ्गेन चित्रधीर्न स्यादित्यत्राह—**तन्तव इति** । सितरक्ताद्यास्तन्तव एव पटचित्रानुयायिनः । व्यतिषङ्गवशेन पटावस्थापन्नेषु सितरक्तादितन्तुषु विद्यमाननानारूपेष्वेव चित्ररूपव्यवहार इत्यर्थः । तथा च चित्ररूपाश्रयतया नावयव्यभ्युपेयमित्याह—**अवयव्यनपेक्षत्वमिति** । अनपेक्षत्वं—अनपेक्षा । तत्र दृष्टान्तः—**चूर्णसंहतिचित्रवदिति** । सितरक्तादिचूर्णसंहतावयव्यनभ्युपगमादिति भावः ।

ननु चूर्णचित्रापेक्षया विशेषात्तन्तुरूपातिरिक्तमेव चित्ररूपम् । नच तन्तवस्तदधिकरणं; युगपद्विजातीयरूपासंभवादित्यत्राह—**रूपादीनामिति** । तन्तुरूपपटरूपादीनामचित्रेऽपि—वैचित्र्याभावेऽपि भेदाभावेऽपीत्यर्थः । **वैषम्यदर्शनं**—वैषम्योपलम्भनं **वदन्**—खपुष्पादेरप्युपलम्भं वदेदित्यर्थः ।

नन्ववयव्यनभ्युपगमे एकावयवधृतेऽन्येषामवयवानां धारणं न स्यात्; एकावयवाकृष्टेऽन्येषामाकर्षणं न स्यात्; दृश्यते च मूले धृते वा कृष्टे वाऽग्रादीनां धारणमाकर्षणं च । अवयव्यङ्गीकारे तु एकत्वात् सर्वावयवेष्ववयविनस्तत्संभवादिति चेत् तत्राह—**या चासाविति** । 'धारणाकर्षणोपपत्तेश्च' इति गौतमेनासूत्रचतेत्यर्थः । अत्र विपर्यये पर्यवसानेनावयव्यङ्गीकारे धारणाकृष्टी उपपद्येते इत्युपपत्तिरेव सूत्रेण प्रतिपादितेत्यर्थः । **तादृगिति**—धारणाकृष्टियोग्यावयव्युत्पादकसंघातमात्रादेव तदुपपद्यत इत्यर्थः । धारणाकर्षणयोरवयविसाध्यताऽपि नेत्याह—**गाढावयवेति** । अवयव्युत्पादकासमवायिकारणसंयोगो यत्र दृढो न भवति कोमललतादौ तत्र धारणाकर्षणे प्रति न प्रयोजकमवयवि; नच तत्रावयव्यभावः । **तथाचेति**—धारणाकर्षणाद्यभावेऽपि तत्रावयव्यभ्युपगच्छसि । कुत्र तर्हि धारणाकर्षणे अभ्युपगम्येते इत्यत्राह—**धारणेति** । अवयविन्यपि सति गाढावयवसंश्लेषे सत्येव **धृताकृष्टानुबन्धतः** । धृताकृष्टसंबन्धेन धारणकर्षणे भवत इति वक्तव्यम्;

तथाऽवान्तरेषु दृढतरसंश्लिष्टदृढाकृष्टावयवानुबन्धतो धारणाकर्षणे भवत इति नावयव्यपेक्षा। जतुगृहीतवदिति तृणोपलायस्कान्तादीनामप्युपलक्षणम्। जतुगृहीतिस्थले एकस्य धारणाकर्षणमात्राज्जतुगृहीतयोरुभयोर्धारणाकर्षणवदित्यर्थः।

ननु जतुगृहीतादिष्ववयव्यस्तु इत्यत्राह—**तृणोपलेति**। तृणग्राही उपलस्तृणोपलः, शाकपार्थिवादिः। **यदुदाहृतं**—यद्दृष्टान्ततयोक्तं तृणोपलादिकं तत्र जतुतृणाद्यवयवेषु तव कश्चिदवयवीष्टोऽपि न; तथापि धारणाकर्षणे वर्तेते इत्यर्थः। अपिस्त्वर्थः। स्फुटतरव्यभिचारस्थलमाह—**पाशाद्यैरिति**। **धारणाकर्षणयोरीक्षणे**-दर्शने सतीत्यर्थः। धारणाकर्षणे क्षमे इति पाठान्तरम्। किं **तत्रेति**—किमिति नाभ्युपेयत इत्यर्थः।

ननु जतुसंगृहीत्यादिस्थलेषु पक्षिलभाप्यादिषु व्यभिचारः परिहृत इत्यत्राह—**संग्रहप्रभवं चेति**। संग्रहप्रभवं—जतुसंगृहीतिजन्यमित्यर्थः। एवं सप्रतिघत्वविरोधोऽपि द्वितन्तुकपटाद्युत्पत्तिस्थले टीकाकारादिभिः शङ्कितो न सम्यक्परिहृत इत्याह—**आरब्धकार्यैरिति** क्षिप्तः- आक्षिप्तः। अवयव्यारम्भपक्षे प्रतिक्षणं पृथिव्यादीनां परमाणुसंयोगविभागाभ्यां पूर्वविनाशोऽपूर्वोत्पत्तिश्चावश्यकाविति। प्रत्यक्षं खण्डपृथिवी अतीन्द्रियः परमाणुः ताभ्यामुत्पन्नायाः पृथिव्याः प्रत्यक्षातीन्द्रियोपात्ततया तादृशगगनघटसंयोगवत् प्रत्य(क्षत्वं)क्षं न स्यादित्याह—**प्रत्यक्षातीन्द्रियेति**।

न्यायवार्तिकादौ हिमवत्परमाणुकमेवाप्रत्यक्षमित्याशङ्कितं न तु पृथिव्यादिकमित्यत्राह—**मुधा चोदाहृतमिति** हिमवत्सहितः परमाणुरस्येति बहुव्रीहिः; 'तदस्य परिमाणम्' इति वा निर्वाहमाहुः। 'स एषां ग्रामणीः' इति मान्याः, हिमवत्परमाणू ग्रामण्यौ निर्वाहकौ—कारणे इति निर्वहन्ति। व्रीह्यादित्वात् मत्वर्थे इनिरिति केचित्। पृथिव्यादिकं परित्यज्याविमृश्य विशेषत उदाहरणं व्यर्थमित्यर्थः। अत एव टीकाकारस्तदुदाहरणमुपलक्षणमित्युक्तवानित्याह—**टीकाकारस्त्विति**।

ननु अवयव्यनभ्युपगमे संघातस्य बहुत्वात्कथमेकत्वधी व्यवहारावित्यत्राह-**विशेषानुपलम्भेऽपीति**। विशेषोऽवयवी तस्य राश्यादिष्वभावेऽपीत्यर्थः। **वृक्षादिष्वपीति**—स्कन्धपलाशादिव्यतिरिक्तावयव्यनभ्युपगमेऽपि वृक्षधीः राश्यादाविव स्यादित्यर्थः। ननु संघातस्यैव वृक्षत्वे समुदायप्रतीतावेव वृक्षधीस्स्यात् न त्वेकदेशशाखादिप्रतीतावित्यत्राह—**एकदेश इति**। एकदेशस्यापि जलावयवस्य जलवत् वृक्षत्वादित्यर्थः। तर्हि शाखादीनामपि वृक्षलक्षणयोगाद्वृक्षत्वे वृक्षकत्वधीर्न

स्यादित्यत्राह—**संग्रहाच्चेति**। सर्वेषां शाखाद्यवयवानां जलराशिवद्दृढतरसंश्लेषादेकवृक्षवुद्धिरित्यर्थः।

यदुक्तमक्षपादोक्तमनतिक्रमणीयं स्यादिति; तद्दूषयति—**सर्वाग्रहणमिति**। प्रत्यक्षव्यतिरिक्तपरमाण्वन्ततत्वपाङ्क्तिकक्लृप्ताविदं दूषणं स्यात्; नच तदन्तक्लृप्तिः; दौस्थ्यपराहतत्वात्; तथाच तत्कल्पकोऽक्षपादोऽपि पराहत इत्यर्थः। किञ्च 'सेनावनवद्ग्रहणमिति चेन्न अतीन्द्रियत्वादणूनाम्' इति अवयव्यभावमाशङ्क्य अप्रत्यक्षत्वप्रसङ्गादवयविसाधनं चायुक्तमित्याह—**सेनेति**॥ २१॥

अक्ष०। परपक्षे प्रसञ्जितानां दोषाणां स्वपक्षे न प्रसक्तिरित्याह—**इत्थमिति**—अवस्थाभेदमात्रेण नामादिभेदनिर्वाहे सतीत्यर्थः। यद्वा—त्वत्पक्षवदित्यर्थः। **वृत्यादिखेदः**—अवयवावयविनोरेकत्र वृत्तौ सप्रतिघत्वविरोधः अथवा अवयवेषु अवयविनो वृत्यनुपपत्तिः—कात्स्न्र्येन वृत्तौ एकावयवदर्शनेप्यवयव्युपलम्भप्रसङ्गः अंशभेदेनेति चेत् अवयवातिरिक्तांशभेदकल्पनादनवस्था स्यादिति अतिरिक्तावयव्युनभ्युपगमादयं दोषो न भवतीतिभावः।

ननु गौरवभिया अवयव्यनुपगमे संयोगोऽपि त्यज्यता मित्यत्राह—**नचेति**—अवयवसंयोगः प्रत्यक्षसिद्धः युष्माभिरपि असमवायिकारणतयाऽभ्युपगम्यते अतो नास्माभिरेव कल्प्यते। कल्पनायां खलु गौरवावकाशः। संप्रतिपन्नत्वान्न कल्पना। अतएव **नः** अस्माकं। न गौरवमिति भावः।

अथ दीर्घैकतन्तुपरिवर्तनविशेषनिष्पादिते पटे अनेकतन्तुसंयोगाभावात्पटवुद्धिर्न स्यादित्यत्राह—**वस्त्र इति**। अस्मन्मते पटसत्वे तन्त्वनेकत्वनियमानङ्गीकाराद्वहूनामिव एकस्यापि तन्तोरवस्थाविशेषे यथादृष्टि पटधीरवितथैव भवितुमर्हतीति न तद्वाधः। भवन्मत एव तन्त्वैक्ये आरम्भकसंयोगायोगेन पटानुत्पत्या तथैव भवेदिति वाधिता भवेदिति भावः।

ननु अवयव्यभावे सर्वेषां परमाणुरूपत्वापत्या ग्रहणमेव न स्यात् स्थूलद्रव्याभावे च अणुसंहतौ स्थूलत्वाध्यासोऽपि न सिद्ध्येदित्यत्राह—**देशेति**। जालसूर्यमरीचिदृश्यत्र्यसरेणुरेव परमाणुरित्युपेयते तत्समुदाये आश्रयदेशाधिक्यात्स्थूलपरिमाणमुत्पद्यते ततस्तत्र जायमानायाः स्थूलधियो न वाधो भवितु मर्हतीति भावः। तथापि यदि संसृष्टास्तन्तव एव पटः तदा तन्तुराशिमात्रेऽपि पटधीस्स्यादित्यत्राह—**संसर्गविशेषादिति**। भवन्मते असमवायिकारणतयाऽभिमतात्संसर्गविशेषादित्यर्थः। आदिशव्देन संसर्गिद्रव्यपरिग्रहः। द्वितीयेन तेन यूथपङ्क्त्यादि परिग्रहः॥ २१॥

द्रव्यैक्यं प्रत्यभिज्ञा प्रथयति परिमित्यन्तरेऽन्याप्रतीते-
रंशूत्कर्षक्षयादिक्षममपि च ततो राशिवत्स्थूलमेकम् ।
नो चेदश्रान्तचण्डानिलजलधिधुनीदन्तिदावानलाद्यैः
क्षोणीयं क्षुद्यमाना क्षणमपि चरमामण्ववस्थां न जह्यात् ॥ २२ ॥

सर्वा० । एवं तन्तुपटादीनां भेदे बाधकं तत्साधकानामन्यथासिद्धत्वं चोक्तम् । तथाऽप्यभेदे किं प्रमाणमिति वदन्तं प्रति स्थिरत्वे प्रमाणमेवात्र प्रमाणमित्याह—द्रव्यैक्यमिति ॥ परिमित्यन्तरे, सत्यपीति शेषः । इदं च भेदसाधकानामुपलक्षणम्, यथा प्रसारितस्याकुञ्चितस्य दीर्घत्वह्रस्वत्वे, यथा च घनीकृतस्य विरलीकृतस्य च तूलपिण्डस्याल्पत्वविपुलत्वे दृश्येते, एवं वृत्तचतुरश्रत्वादिविशेषे दृष्टेऽपि स्यात् । कुतः ? अन्याप्रतीतेः, द्रव्यान्तरस्यादर्शनादित्यर्थः । अन्यथा सर्वत्र यत्किंचिदवस्थाभेदमात्रेऽपि द्रव्यभेदो दृश्यत इति धृष्टवादे का प्रत्युक्तिः ? पद्मसंकोचविकासादिषु च द्रव्यान्तराभावो न्यायवार्तिकटीकायामुक्तः ।

किञ्चान्त्यावयवित्वं पटादीनामिष्यते । तैरनेकैरच्छिन्नावयवैरेकपटादिनिर्माणेऽवयव्यन्तरमुत्पद्यते नवा ? पूर्वत्र तेषामन्त्यावयवित्वव्याघातः । उत्तरत्र तन्त्वादिभिरपि तथा स्यात्; अविशेषात् । अन्यस्तह्यन्त्यावयवी भवत्विति चेन्न । सर्वत्रैवं कस्यचित्कार्यस्य सहकारिभेदैः सम्भवात् । सन्ति चास्मदाद्यशक्यस्रष्टारः केचित्, अन्तत ईश्वरश्च । किं च योऽसौ गोपुरादिरन्त्यावयवी तत्र यदि कश्चित्सुधाभिरवयवान्तरं संघटयेत् तदा तत्पूर्वं गोपुरं तिष्ठति नश्यति वा ? पूर्वत्र कथमन्त्यः ? उत्तरत्रानन्यथासिद्धोपलम्भविरोधः । नाशकारणाभावे नाशानुपपत्तिः । अपि च तूलपिण्डमध्यस्थमंशुं यदि कश्चित्सूच्याऽपकर्षेत्, तदा तस्य परिमाणह्रासो न दृश्यते; न च तस्य नाशः । अथापि तत्र ते नाशः कल्प्यः, असमवायिविनाशात् समवायिविगमाच्च । संघातवादे त्ववयवोत्कर्षापकर्षवादमात्रान्न किंचिद् द्रव्यमुत्पद्यते, नश्यति वा; केवलमाषादिराशिष्विवोपचयापचयमात्रमेव । अतो यथोपलम्भं संघातपक्ष एव साधीयानित्याह—अंशूत्कर्षेति । आदिशब्देनांशविदारणसन्धाने गृह्येते । यदि क्वाचित्कावयवभेदमात्रात्पूर्वद्रव्यनिवृत्तिरवयव्यन्तरोत्पत्तिः स्यात्; तत्रानिष्टमाह—नो चेदिति । अव्यवस्थितेषु प्रदेशभेदेषु तैस्तैर्भेदकैरणुद्वयविघटने द्व्यणुकविनाशादिक्रमेण महापृथिवीपर्यन्तनाशे सति अवस्थितसंयोगैरपि पुनस्तदारम्भावसरो न सेत्स्यति । तदेतत्समुद्रादिषु कैमुत्यसिद्धम् ।

यदप्येवं कल्प्यते—द्वाभ्यामेवाणुभ्यामाद्यं कार्यद्रव्यमारभ्यते, एकस्यानारम्भकत्वादसमवायिविरहात् । संयोगो हि न स्वेन; स्वस्य बहुभिरारब्धत्वे महत्त्वप्रसङ्गेन प्रत्यक्षत्वापातात् । बह्वारब्धस्याप्यणुत्वेऽतिप्रसङ्गः; तत्परिमाणं चावयवसंख्याविशेषेणावयवमहत्त्वप्रचययोरसम्भवात्, नित्यपरिमाणस्यानारम्भकत्वात्, स्वातिशयपरिमाणारम्भकत्वनियमेनाणुतरपरिमाणारम्भकत्वप्रसङ्गाच्च । सा च

द्वित्वसंख्या सर्वज्ञापेक्षाबुद्धिजन्या तद्विनाशकाभावेऽपि कार्यत्वादनित्या। एवं त्रिभिरेव व्यणुकैस्त्रसरेण्वारम्भः, तावतैव महत्त्वलाभात्; द्वाभ्यामारम्भे त्ववयवप्रचयमहत्त्वरूपकारणान्तराभावेन महत्त्वानुत्पत्तावदृश्यत्वप्रसङ्गात्। स च त्रसरेणुः अप्रत्यक्षावयवकतद्रूपोऽपि स्वयं प्रत्यक्षः प्रत्यक्षरूपश्च। यद्वा अन्यरूपारोपेणालोच्यते; यथाऽऽहोदयनः—*दृश्यमेव ह्यालोकरूपमारोप्य पिञ्जरस्त्रसरेणुश्चालोच्यत इति। उत्तरावयविनां त्वनियतसंख्यैरारम्भः। भावरूपस्य सर्वस्य समवाय्यसमवायिनिमित्तसापेक्षत्वेऽपि प्रध्वंसस्तु निमित्तमात्रजन्य इत्यादि। एतादृशं कल्पनाजातं न विद्यावृद्धा बहुमन्यन्ते। तथा च सूत्रम्—* अपरिग्रहाच्चात्यन्तमनपेक्षेति २२॥ **इत्यवयविवादभङ्गः॥**

आनन्द० उत्तरश्लोकेनाप्यवयविखण्डनं क्रियते इति पौनरुक्त्यं (परिहरन्) पूर्वशेषत्वात् (संगत्यन्तरंन्ना) नास्तीत्यभिप्रायेणाह—**तन्तुपटादीनामिति। स्थिरत्वे** प्रमाणमेवेति—बाधकाभावे प्रत्यभिज्ञायाः जातिविषयत्वादिना अन्यथासिद्धिवर्णनमयुक्तम् अन्यथा कस्यापि वस्तुनः स्थैर्यं न सिद्धयेदिति भावः। **भेदसाधकानामिति**—नामसंख्यादीनामित्यर्थः। **यथा च घनीकृतस्येति**- यद्यपि द्रव्यान्तरोत्पत्तिस्तूलपिण्डादौ प्रचयस्य परिमाणहेतुत्वं वदताऽङ्गीकृता; तथाऽपि पद्मसंकोचविकासादिस्थले न्यायवार्तिकादावनारम्भस्योक्तत्वा(त्तुल्यत्वा) न्नात्राऽप्यवयव्यारम्भ इति सिद्धवत्कृत्योक्तिः।

नन्ववयव्यन्तरसाधकबलात् प्रत्यभिज्ञा जातिविषया भवतु इत्याशङ्कय; किं द्रव्यान्तरमुपलब्ध्या वदसि उत लिङ्गात्? इति विकल्प्य आद्यं दूषयति—**अदर्शनादिति।** नन्ववस्थाभेदस्थले घटपटादौ भिन्नद्रव्यप्रतीतिनियमादत्राप्युपलम्भोऽस्त्येव; तन्तुपटावस्थाभेदात् इत्यत्राह—**अन्यथेति।** तथाच अवस्थाभेदस्थले भिन्नद्रव्यप्रतीतिनियमो नास्तीत्यर्थः। ननुचेष्टापत्तिरिति चेत्तत्राह— **पद्मसंकोचेति।** तत्र द्रव्यान्तराभावात्तत्प्रतीतिर्दूरे इति तत्र व्यभिचार इति भावः।

द्वितीयं दूषयति—**किञ्चेति।** तत्र लिङ्गं सामग्र्येव उतान्यत्? नान्त्यः; तथाविधस्यानुपलम्भात्। न प्रथमः; अवयवसंयोगो हि सामग्री; तस्याः पद्मादिस्थले व्यभिचारादलिङ्गत्वमिति दूषणे सत्येव दूषणान्तरमाह—**अन्त्यावयवित्वं घटादीनामिष्यते इति। उत्तरत्रेति**—तन्त्वादिस्थलेऽपि द्रव्यन्तरारम्भकाभावात् द्रव्यान्तरं न स्यादित्यर्थः।

ननु अन्त्यावयविस्वीकारो मत्सिद्धान्ते; ननु पटादिरेवान्त्यावयवीति निर्बन्ध इत्याह—**अन्यस्तर्हीति सर्वत्रैवमिति**—सर्वत्राप्यवयव्यन्तरोत्पत्तौ न किञ्चिदप्यन्त्यावयवि सिध्येदित्यर्थः। ननु कार्यस्य कर्तृसापेक्षत्वाद्यदवयव्यन्तमादायास्मदादीनां द्रव्यान्तरसृष्टिसामर्थ्यं नास्ति तत्रैवान्त्यावयवि; तत्र द्रव्यान्तरोत्प-

स्यभावात् इत्यत आह—**सन्ति चेति**। ननु गोपुरादिभिः पटादिभिर्बृहत्पटादिवद्द्रव्यान्तरारम्भासंभवात् अन्त्यावयवि गोपुरादिकं भवतु ! इत्यत्राह–**किञ्च योऽसौ गोपुरादिरिति**।

केचित्तु—'त्वदभिमतद्रव्या(न्तरा)रम्भकस्य व्यभिचारस्थलान्तरमप्याह-–किञ्चेति' इत्याहुः।

पूर्वत्रेति—सप्रतिघत्वविरोधेन पूर्वगोपुरावयवानामनारम्भकतया तस्यैवोत्तरगोपुरारम्भकत्वेन तत्समवायित्वादिति भावः। ननु दीपप्रभान्यायेन उपलम्भविरोधो नेत्याह—**नाशकारणेति**। **तदा तस्येति**—अवयविवादिमते द्रव्यनाशेन पूर्वपरिमाणनाशात् पुनरारब्धद्रव्यस्य तन्न्यूनावयवप्रशिथिलसंयोगकत्वेन न्यूनपरिमाणनियमात् तद्दर्शनप्रसङ्गः। **अथाऽपीति**—पूर्वपरिमाणोपलम्भेऽपि आश्रयनाशकल्पनं साहसमिति भावः। ननु तत्र नाशो मास्त्वित्यत्राह—**असमवायीति**। त्वदुक्तनाशसामग्रीसत्त्वान्नाशकल्पनायास्तवावश्यकत्वादिति भावः। संघातवादे न दोष इत्याह—**संघातवादे इति**। उपचयापचयौ-अवयवाधिक्यन्यूनते। **अशुविदारणं**—अवयवविच्छेदः। **संधानं**—योजनम्।

तथाच मूलस्यायमर्थः—भवतामवयविस्थाने स्थूलसंघातमेकम्। राशिवत्–राशिन्यायेन। अंशूत्कर्षात् क्षयः—अपचयः। आदिशब्दादुपचयः। तत्क्षमं—तद्योग्यमिति संघातपक्षे न दोष इति। अतिरिक्तावयविवादिनोऽप्यतिरिक्तावयव्यारम्भकां (म्भावता) शाभावात् अणुत्वावस्थाया अपरित्यागात् तद्व्यतिरिक्तद्व्यणुकाद्यभावात् द्रव्यमात्रं प्रत्यक्षं न स्यात् इति गौतमोक्तदूषणप्रसङ्गात् अकामेनापि सिद्धान्त्युक्तरीत्या संघातपक्ष एवाश्रयणीय इत्यनिष्टप्रसञ्जनव्याजेनाह—**यदीति**। **न सेत्स्यतीति**—द्रव्यान्तरोत्पादकानामपि विनाशसामग्रीनियतत्वेन तदुत्पादनसमये समवायिनाशस्यैवोत्पत्तेरित्यर्थः।

मूलस्यायमर्थः—नोचेत्—संघात एवेत्यनङ्गीकारे। अनवरतचण्डवाय्वादिभिः अवयवशोऽभिघातेन विभज्यमाना क्षणकालमप्यण्ववस्थां न परित्यजेत्—सर्वदा अणुसंघातरूपैव स्यादिति। खननादिरादिशब्दार्थः। ननु पृथिव्यवयव्यभावेऽपि जलावयव्यस्तु ! इत्यत्राह—**तदेतत् समुद्रादिष्विति**।

'कार्यं नैवारभेरन्' इत्यादिपद्यत्रयेण दूषणं तन्मते क्वचिदर्थे दूषणोक्तिः वेदान्तविरुद्धार्थेषु सर्वत्र दूषणस्योपलक्षणमित्याह–**यदपीति**। **आद्यं कार्यं** द्व्यणुकमित्यर्थः। **एकस्येति**—परमाणोरिति शेषः। **संयोगो हीति**—स्वस्य स्वेन नेत्यर्थः। **बहुभिरिति**—कारणबहुत्वस्य महत्त्वप्रयोजकत्वादिति भावः। **अतिप्रसङ्ग इति**—त्र्यणुकमप्यणु स्यात्; तथा च महदेव न स्यादित्यर्थः। **तत्परिमाणं चेति**—द्व्यणुक परिमाणमित्यर्थः। (**संख्याविशेषेण**) आरभ्यते इति शेषः। **अवयवमहत्त्वं**—

कार्यगत (परमाणुपरिमाणातिरिक्त) परिमाणं। परिशेषात् संख्याविशेषो द्वित्वसंख्येत्याह—सा चेति। कार्यत्वादिति—भावकार्यत्वादित्यर्थः। अप्रत्यक्षेति—अप्रत्यक्षत्वमवयवतद्रूपयोर्विशेषणम्। प्रत्यक्षरूपारब्धरूपस्यैव प्रत्यक्षत्वात् त्रसरेणुरूपमप्रत्यक्षमिति पक्षमवलम्ब्याह—यद्वेति। आलोच्यते इति—पीतश्शङ्ख इतिवत् चक्षुषा गृह्य (दृश्य) ते इत्यर्थः। पिञ्जरः—पीतरूपः। विद्यावृद्धाः—पाराशर्यादयः। पाराशर्यवचनमुदाहरति—अपरिग्रहादिति। महद्भिः सांख्यपक्षः क्वचित् त्यक्तोऽपि प्रायेण परिगृह्यते काणादपक्षस्त्वत्यन्तं त्यज्यते इत्यर्थः। यद्यपि 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्'—'इति लक्षणात् प्रथयति परिमि' इत्यत्र यतिभङ्गः; तथाऽपि–

स्वरसन्ध्याप्तसौन्दर्ये यतिभङ्गो न दोषभाक्।

इति वृत्तरत्नाकरव्याख्यानोक्तेरदोष इति ध्येयम्। एवमुत्तरत्राऽपि समाधेयम्॥ २२॥

अक्ष०। इत्थमवयवावयविनोर्भेदबाधकं तत्साधकानामन्यथासिद्धत्वञ्चोक्तम् तथाप्यभेदे किं प्रमाणमित्यत्राह—द्रव्यंक्यमिति। अवयवावयविनोरभेद मित्यर्थः। प्रत्यभिज्ञेति। मृदयं घटः इति प्रत्यभिज्ञेत्यर्थः। प्रथयति। ख्यापयति। परिमित्यन्तरे। सत्यपीति शेषः। इदमुपलक्षणम्। भेदसाधकनामादिभेदे सत्यपि प्रत्यभिज्ञा अभेदं साधयतीति भावः। कुतः। अन्याप्रतीते द्रव्यान्तरस्याऽदर्शनादित्यर्थः। अन्यथा यत्किञ्चिदवस्थाभेदमात्रेण द्रव्यान्तरमिति धृष्टवादः अपरिहार्यस्स्यादिति भावः।

अपि च तूलपिण्डमध्यस्थस्यांशोस्सूच्याऽपकर्षे केनचित्कृतेऽपि तूलपिण्डस्य परिमाणह्रासो वा नाशो वा न दृश्यते अथाऽपि तत्र तव मते नाशः कल्पनीयः। असमवायिकारणनाशात्समवायिकारणविभागाच्च।

सङ्घातवादे तु माषादिराशिष्विव अवयवोत्कर्षापकर्ष मात्रान्न किञ्चिदुत्पद्यते नश्यति वा अतस्संघातपक्ष एव साधीयानित्याह—अंशूत्कर्षेति। आदिशब्देन अंशुविदारणसंधानयोः ग्रहः। यदि यत्किञ्चिदवयवभेदमात्रात्पूर्वद्रव्यनिवृत्यादिरिष्यते तदा अनिष्टमाह—नोचेदिति। यत्किञ्चिदवयवभेदादिना अवयविनाशोपगमे अव्यवस्थितेषु प्रदेशभेदेषु क्वचिन्महावातेनान्यत्र समुद्रतरङ्गास्फालनेन अपरत्र प्रवाहेण एकत्र दन्तिदन्ताघातेन वनप्रदेशे दावानलेन आदिपदगृहीतेन सार्वत्रिकमहिषवृषभाजादियुद्धेनचाविरतं क्षुद्यमाना पृथिवीयं-क्षणकालेऽपि चरमाण्वस्थां परमाणुरूपतां न परित्यजेत्। तैस्तैर्भेदकैरणुद्वयविघटने महापृथिवीपर्यन्तनाशे सति पुनरणुद्वयसंयोगादेरविरतविघटकभूम्ना अवसर एव न सेत्स्यतीति भावः॥ २२॥

संघातोऽनेकभूतैरपि भवति यथा ह्येकभूतस्य भागै-
र्देहादिः पञ्चभूतात्मक इति निगमाद्युक्तिभिश्च प्रसिद्धम् ।
न त्वेवं संकरः स्याद्व्यवहृतिनियमस्सूत्रितस्तारतम्या-
द्देहादौ येन भूतान्तरयुजि भवतो भौमतादिव्यवस्था ॥ २३ ॥

सर्वा० । या चान्या कल्पना शरीरादिषु पृथिव्याद्यनेकभूतसद्भावेऽप्येकमेव भूतमुपादानमन्यत्संसर्गिमात्रमिति, तामपि निरस्यति—संघात इति ॥ अवयविसद्भावे ह्येकप्रकृतित्वं नियन्तव्यं न वा त्वया ? संघातवादे तु यथादर्शनं सर्वमुपादानम् । न च विजातीयानां संहतिर्नास्ति दृष्टविरोधात् युष्मत्सिद्धान्तविरोधाच्च । अन्यथा कथं तैजसत्वाभिमते काञ्चनादौ गुरुत्वादिक्लृप्तिः ? किंच *त्रिवृत्करणं नामरूपव्याकरणार्थं चतुर्विधाहारमयं शरीरमिति च गर्भोपनिषत् । *पञ्चभूतात्मकं वपुरित्यादि च स्मर्यते । तदिदमाह—देहादिरिति । यथा विजातीयवृक्षपोतव्यतिषक्तोपचये वृक्षैकत्वधीः, एवमेकस्मिन्ननेकभूतारब्धे विरुद्धजातिसमावेशगन्धोऽपि न स्यादित्याह—न त्विति । एवंशब्द उक्तहेतुपरो वा; अपूर्वद्रव्यानुत्पादादित्यर्थः । तदुत्पादेऽपि न जातिसङ्कर इत्याशयः । नरसिंहादिन्यायेनोभयविलक्षणावयव्युत्पत्तिसम्भवात् । कल्प्यते च युष्माभिश्चित्रं रूपान्तरम् ।

एतेन तज्जातीयोपात्तं कथमतज्जातीयमित्यपि प्रत्युक्तम्, तन्त्वादिजातीयैरतन्त्वादिजातीयोत्पत्त्यभ्युपगमाच्च । भवतु वा पृथिवीत्वतोयत्वादीनामेकत्र समावेशः, तथाऽपि का हानिः ? परस्परपरिहार्युपाधिद्वयसमावेशन्यायेन दर्शनादर्शनाभ्यामेव सर्वातिप्रसङ्गशान्तेः । ननु पाञ्चभौतिकेषु कथमेकभूतशब्दस्तत्तदर्थक्रियानियमश्च ? वर्णितो हि भवद्भिरेव भूतान्तरोपष्टब्धेष्वपि देहादिषु पार्थिवाप्यादिविभागः । कथं च मन्त्रार्थवादेषु * पृथिवी शरीरमित्यादिविशेषव्यपदेश इत्यत्राह—व्यवहृतीति । सूत्रितो ह्यसौ * वैशेष्यात्तु तद्वादस्तद्वाद इति * त्र्यात्मकत्वात्तु भूयस्त्वादिति च । अत्र प्रतिबन्दीं प्रथयति—देहादाविति । येनेति तारतम्यपरामर्शः । तवाप्यनारब्धावयवकेषु विजातीयराशिषु भूयसा व्यवहारो लोकसिद्धस्संमन्तव्यः । विजातीयदारुशिलाद्यारब्धेषु च खट्वागोपुरादिषु किंचिज्जातीयत्वनियमः, तत्रावयव्यनारम्भे सर्वत्रैवमस्मन्मतसिद्धिः ।

विभागादविभागाच्च भूतभौतिकभेदधीः ।
सत्येव यदि वा द्रव्ये सिद्धसाध्यदशाद्वयात् ॥

एकत्वं च बहुत्वं च मृत्पिण्डकरकादिवत् ।
समष्टिव्यष्टिनीत्यैव त्रिगुणे वदति श्रुतिः ॥

ईदृक्सत्कार्यवादश्च वैदिकैः परिगृह्यते ।
द्रव्यस्य पूर्वसिद्धस्य साध्यावस्थाविशेषतः ॥

ननु यदि पूर्वं नित्यं सत् द्रव्यं, तत्कथं सांख्यमतमुज्झतः कार्यं स्यात् ? या त्वागन्तुकव्यवस्था सा न प्राक्सती । अतः कथं सत्कार्यवादं ब्रूथ ? इत्थम्—प्राक्सदेव द्रव्यमवस्थान्तरविशिष्टवेषेण कार्यम्; तथैव लोकवेदव्यवहारस्थितिरिति ॥ २३ ॥

इति देहादेः पाञ्चभौतिकत्वम् ॥

आनन्द०प्रसङ्गसंगतिमाह–**या चान्या कल्पनेति**। अनेकप्रकृतित्वेऽपि बाधकाभावस्य उत्तरत्र वक्ष्यमाणत्वादिति भावः। **संघातवादेस्त्विति**–अत्रानेकप्रकृतिकत्वमेकप्रकृतिकत्वमिति विचारस्यैवानुत्थानमित्यर्थः। **दृष्टविरोधादिति**–नीरक्षीरादिसंहतिदर्शनादित्यर्थः। दृष्टिविरोधादिति क्वचित्पाठः। सिद्धान्तविरोधमेवोपपादयति—**अन्यथेति**। उपष्टम्भकपार्थिवांशगुरुत्वं स्वर्णे प्रतीयते इति युष्मत्क्लृप्तिः। आदिशब्देन रूपादिर्गृह्यते। निगमाद्युक्तिभिश्चेत्यस्यार्थमाह–**किंचेति**। ननु त्रिवृत्करणश्रुतिर्न देहस्य पाञ्चभौतिकत्वं वदतीत्यत्राह—**त्रिवृत्करणमिति**। रूपवत्त्वाच्छरीरस्येति भावः।

साक्षाद्विवक्षितार्थप्रतिपादिकां श्रुतिमाह—**चतुर्विधाहारमयमिति**। यद्यपि पेयं लेह्यं चोष्यं खाद्यमिति चतुर्विधाहाराणामप्यपार्थिवरूपवत्त्वमेव; तथाऽपि भूतद्वयमयत्वे शरीरस्य भूतान्तरमयत्वमपि तद्वद्भवतीति भावः। **वृक्षैकत्वधीरिति**-यथा चूतवटाश्वत्थव्यतिषक्ताङ्कुरजन्ये नानोपादानके एकोऽवयवीति धीरित्यर्थः। व्यतिषक्तवृक्षपोतोपचयस्यासन्निहितत्वात्तत्परामर्शो न युक्त इति पक्षान्तरमाह—**एवंशब्द इति**। पूर्वश्लोके प्रतिपन्नत्वात्। एवं च पाञ्चभौतिकत्वे शरीरस्य नियतजातिर्न स्यात् नियामकाभावात्। नाऽपि नाना; साङ्कर्यप्रसङ्गात्; नापि तद्रहितम्; द्रव्यत्वावान्तरजातिरहितस्य कार्यस्याद्रव्यत्वापातात्। नापि जात्यन्तरम्; अधिकद्रव्यापत्तेः इत्याद्यनुपपत्तयः परोत्प्रेक्षिताः अवयव्यनभ्युपगमपक्षे न प्रभवन्तीति भावः।

अवयव्यङ्गीकारेऽपि नैते दोषाः स्युरित्याह—**तदुत्पादेऽपीति**। ननु तर्हि क्लृप्तानन्तर्भावाद्द्रव्यान्तरतापत्तिरित्यत्राह-**कल्प्यते चेति**। क्लृप्तानन्तर्भावे रूपन्यायादतिरिक्तत्वमिति भावः। द्रव्येष्वयं नियम इत्यत्राह—**तन्त्वादीति**। ननु जातिसंकराङ्गीकारे गवां क्षीरं पातव्यं नोष्ट्रादेरिति शास्त्रार्थनियमो न स्यात्; गव्यप्युष्ट्रत्वजातिसम्भवादित्यत्राह—**परस्परेति**। यथा स्वादुत्वरसवत्त्वकाश्यादिदेशप्रभवत्वादिरूपोपाधिसाङ्कर्येऽपि गोपयस्त्वोष्ट्रपयस्त्वादेः साङ्कर्याभावात् शास्त्रार्थनियमः; यथा गृहस्थत्वयतित्वादेरेककाले न साङ्कर्यं यथा वा शूद्रान्नत्वब्राह्मणान्नत्वादेरसाङ्कर्यं दर्शनबलादङ्गीकार्यम्; तथाऽत्रापि यथादर्शनं व्यवस्थासम्भवान्न दोष इत्यर्थः।

ननु शरीरस्य पाञ्चभौतिकत्वे कथं पार्थिवत्वव्यपदेशः ? इत्याशङ्क्याह—**नन्वित्यादिना**। तत्तदर्थक्रियानियमः–पार्थिवत्वप्रयुक्तगुरुत्वकाठिन्यादिहेतुकक्रियैव।

न तु सेचनदहनादिक्रियाः। **वर्णितो ह्योति**—अस्थित्वगादिकं पार्थिवं रुधिरादिकमाप्यमित्यादिविभाग इत्यर्थः। **मन्त्रार्थवादेष्विति**–निरूढपश्वङ्गहोमकरणमन्त्रार्थवादे इत्यर्थः। तत्र यद्यपि; 'पृथिव्यै शरीरम्' इति पाठो दृश्यते; तथाऽपि अन्तरिक्षमात्मा' इत्यादिसाहचर्यात् विभक्तिव्यत्ययेनार्थतोऽनुवादः। तथैव पाठ इत्येके। शाखान्तरे तथा पाठ इत्यपरे। **वैशेष्यादित्यादि**—एकभूतांशस्याधिक्यात्तद्भूतव्यवहार इत्यर्थः। द्विरुक्तिरध्यायपरिसमाप्तिद्योतिका। **त्र्यात्मकत्वादिति**—त्रित्वमुपलक्षणम्; पञ्चभूतात्मकस्यापि त्र्यात्मकत्वात्। कथमेकभूतव्यवहारः? इति शङ्कायामेकांशस्य भूयस्त्वात्तव्द्यवहार इत्यर्थः। **तारतम्यपरामर्श इति**—तथा च मूलस्यायमर्थः—भूतान्तरयुजि—पञ्चभूतानां देहारम्भात्पूर्वकाले संहृतानां सत्त्वात् शरीरं पृथिव्यारब्धमेव कुतः अप्यं वा भवतु? इति शङ्कायां पृथिव्यवयवानां बहुत्वात्तस्या एव शरीरारम्भकत्वमित्यादि किञ्चिद्व्यवस्थापकं वक्तव्यम्; तदत्रापि समानमिति।

आदिशब्दद्वयार्थमप्याह— **तवापीति**। **विजातीयराशिषु**—अधिकैकजातीयमाषतिलादिराशिषु। **अस्मन्मतसिद्धिरिति**–तत्रातिरिक्तावयव्यभावेऽपि शब्दान्तरादिसर्वकार्यसिद्धौ सर्वत्राऽपि तथा शब्दान्तरादिसम्भवात् अवयवी न स्यादित्यर्थः। ननु अवयव्यभावे सर्वेषां भूतसंघात्मकत्वेन भूतत्वात् भूतभौतिकभेदधीरसत्या स्यात् इत्याशङ्क्य विभागाविभागाभ्यां वा सिद्धसाध्यावस्थायोगेन वा सत्या सम्भवतीत्याह–**विभागादिति**। नन्वतिरिक्तावयविनिरासे प्रकृतेरेकत्वात् बहुरूपप्रजारूपता न सम्भवतीत्यत्राह–**एकत्वं चेति**।

केचित्तु-अजामेकां बह्वीं सरूपां प्रजां जनयन्तीमिति प्रकृतिविशेषणं बहुत्वमित्याहुः। ननु आगन्त्ववस्थायोगित्वमेव कार्यत्वं द्रव्यस्य; न त्वसत उत्पत्तिः; अत एव शरीरस्यापि पाञ्चभौतिकत्वमिति इयता प्रतिपन्नम्; तदयुक्तम्; ईदृशसत्कार्यवादस्य साङ्ख्यैरनङ्गीकारे सत्कार्यवादत्वाभावात् इत्यत आह–**ईदृक्सत्कार्यवादश्चेति**। ननु आगन्तुक्योऽवस्थाः; तथाऽपि तद्वत्त्वेन सत्कार्यपक्षो नोपपद्यते इत्याशङ्कते–**नन्विति**। **साङ्ख्यमतमुज्झत इति**—अभिव्यक्तिपक्षमनभ्युपगच्छत इत्यर्थः॥ २३॥

इति त्रिगुणपरीक्षायां देहादेः पाञ्चभौतिकत्वं
सद्द्रव्यवादनिगमनं च.

अक्ष०। अतिरिक्तावयविकल्पनानिरासेन देहादेस्संघातरूपतया अनेकभूतैरपि तदुत्पत्तिर्भवतीत्याह–**संघात इति**। तत्र दृष्टान्तमाह—**यथाह्योति**—एकभूतस्य भागैरिव नानाभूतैरपि देहादिसंघातो भवितुमर्हति कथमन्यथा तैजसत्वाभिमते काञ्चनादौ गुरुत्वादिक्लृप्तिरिति भावः। किञ्च देहादेर्नानाभूतात्म-

कत्वे श्रुत्यादिकमप्यस्तीत्याह—देहादिरिति । आदिशब्देन सङ्घातान्तरपरिग्रहः । नामरूप व्याकरणाय त्रिवृत्करणं श्रुतं "चतुर्विधाहारमयं शरीर" मिति च गर्भोपनिषदि श्रुतं—"पञ्चभूतात्मकं वपु" रिति च स्मर्यते । एवं निगमाद्युक्तिभिः श्रुति स्मृत्युक्तिभिश्च पञ्चभूतात्मको देहादिरिति प्रसिद्धमित्यर्थः । एवमवयव्यनभ्युपगमेन संघातस्य अनेकभूतारब्धत्वोपगमेऽपि न जातिसङ्कर इत्यत्राह—नत्वेवमिति । अपूर्वद्रव्योत्पत्त्यनुपगमेन नानाजातीनां नानाभूतेष्वेव वर्तमानतया समावेशाभावान्न सङ्करइत्यर्थः । अपूर्वद्रव्योत्पादेऽपि नरसिंहादिन्यायेन उभयविजातीयावयव्युत्पत्तेस्संभावान्न जातिसङ्करस्स्यादिति भावः ।

ननु शरीरस्य नानाभूतात्मकत्वे "पृथिवी शरीर" मिति शरीरस्य पृथिवीमात्राप्ययव्यवहारः (श्रवणं) कथमुपपद्यत इत्यत्राह—व्यवहृति नियम इति । सूत्रित इति । "वैशेष्यात्तु तद्वादः" "त्र्यात्मकत्वाच्च भूयस्त्वा" दिति च सूत्राभ्यां अनेकसत्वेप्येकस्य आधिक्यनिबन्धनो व्यपदेश इत्युक्तमितिभावः । भवताप्ययमुपगन्तव्य इत्याह—देहादाविति । येनेति । तारतम्यपरामर्शात् । भूतान्तरयुजीति । भूतान्तरप्रकृतिकत्वानुपगमेऽपि भूतान्तरसंसर्गस्योपगमादिति भावः । भौमतादिव्यवस्थेति—पार्थिवत्वव्यवस्था भूतान्तरापेक्षया पार्थिवाधिक्येनैवोपपादनीयेति भावः ॥ २३ ॥

सन्ति प्रागप्यवस्थास्सदितरकरणाप्राप्तनिष्पत्त्यदृष्टेः
शक्ताशक्तप्रभेदादिभिरपि यदि न स्वोचितात्कार्यदृष्टेः ।
तस्मिन्सत्येव तस्माज्जनिरपि नियता तन्निमित्तादिनोक्ते-
र्व्यक्तिर्व्यक्ताऽनवस्थां भजति न च कृतामात्थ नैवं कृतो नः ॥२४॥

सर्वा० । ईदृशसत्कार्यवादमसहमानस्य **सांख्यस्य** नित्यैकान्तवादनियतान् प्रयोगानन्वाह—**सन्तीति** ॥ द्रव्यपक्षीकारेऽस्मान् प्रति सिद्धसाध्यता; अतोऽवस्थेत्युक्तम् । यदाहुस्सांख्याः—

❀ असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात्कारणभावाच्चसत्कार्यम् ॥ इति ॥

तत्रायं सदितरकरणादृष्टेरित्येको हेतुः । अप्राप्तिनिष्पत्त्यदृष्टेरिति द्वितीयः । सदितरशब्देन प्रागसत्त्वमिह विवक्षितम्, न ह्यसत्खपुष्पादि क्रियेत; माभून्नित्यासतः करणम् । अत्र प्रागसत्त्वमात्रमिति चेन्न; तद्वदेव कदाचिदसतस्सर्वदैवासत्त्वापातात् । न चासतः कदाचित्सत्त्वापत्तिः; विरोधात् । न हि चिच्छक्तेः कदाचिदपि जडत्वम्; जडस्य वा चित्त्वम् । एवं यद्यतोऽन्यत् न तत्सर्वं कदाचिदपि तत्स्यात्; प्रमाणादेरपि कदाचिदप्रमाणत्वप्रसङ्गात् । न चातीतादेर्वर्तमानतादिरीश्वरेणापि सुनिष्पादः । असत्त्वं सत्त्वं च वस्तुनोऽव-

स्येति चेत्, वस्तुनस्तर्ह्यनादितैव। नच सन्निवासन्घटः प्रागुपलभ्यते, अस्माकं त्वव्यक्तावस्थयाऽनुपलब्धिरप्युक्ता। न ह्यसन् घटादिर्न घटादिरिति त कस्यचिद्वचनं बालप्रतारणम्, अभावप्रतियोगिवचने विवक्षितविरुद्धोक्तेः, अभावमात्रविवक्षायां विरोधादिति। उपादानग्रहणादित्यनेन विवक्षितं हेतुं व्यतिरेकेण व्यनक्ति—अप्राप्तनिष्पत्त्यदृष्टेरिति। न हि घटादिकार्यमप्राप्तैरन्यत्र दण्डचक्रादिभिस्तस्योत्पत्तिः, तन्त्वादिभिर्वा पटादेः। अतोऽवगम्यते स्वकार्यं प्राप्तैरेव निमित्तैरुपादानैश्च स्वसाध्यसाधनमिति। प्राप्तिश्च द्विनिष्ठेति साध्यस्यापि साधनवत्पूर्वभावित्वात्, सदेव साध्यमिति। शक्तस्य शक्यकरणादित्युक्तहेत्वभिप्रायेण शक्ताशक्तप्रभेदवचनम्। असतोऽप्यप्राप्तस्यापि सृष्टिः, हेतुशक्तिनियमात्स्यादित्यस्योत्तरमेतत्।

अयं भावः— यदि कारणेष्वसत्तदप्राप्तं च कार्यमुत्पद्येत, तदा तिलेभ्य एव तैलं किमुत्पद्यते, न सिकतादिभ्यः? शक्ताशक्तभेदादिति चेत्, सिद्धं नस्समीहितम्। तिलानां तैलोत्पादनशक्तिर्हि तद्गर्भत्वमेव, अन्यादर्शनात्; तदशक्तिश्च सिकतानां तदभावः। तथा सति तद्वतस्तन्निष्पत्तेः प्रागपि तत्सिद्धिरनिवार्येति। आदिशब्देन कारणभावात्, सर्वसम्भवाभावादिति हेतुद्वयग्रहणम्। कारणभावात्—कार्यस्य कारणात्मकत्वादित्यर्थः। प्रागेव सति कारणे कथं तदा तदभिन्नं कार्यमसद्भवेत्? नन्वस्तु प्रागसदेव कार्यं मा च भूवन् हेतुप्राप्तितद्वृत्तितदैक्यानि. तथाऽपि कस्यचिदेव किंचित्कार्यमित्यत्र सर्वसंभवाभावादिति प्रसङ्गतद्विपर्ययाभ्यां प्रत्युक्तिः।

तथा हि—यदि प्रागसत् हेतुभिरप्राप्तं हेतुवृत्तितादात्म्यरहितं च तत उत्पद्यते, सर्वस्मात्सर्वसम्भवः स्यात्, नचासावस्तीति। पञ्चानामप्याभासत्वाभिप्रायेण प्रतिवक्ति—नेति। तत्र प्रथमस्य प्रतिक्षेपे हेतुः—कार्यदृष्टेरिति। शेषाणां तु स एव स्वोचितादिति विशेषितः। न तावत्कार्यमिति किमपि न दृष्टम्, सर्वलोकवेदविरोधात्; व्यक्तिसाधनस्यापि निराश्रयत्वप्रसङ्गाच्च। न च दृष्टमपि न सत्यं, माध्यमिकादिमतानां निराकरिष्यमाणत्वात्। न च सत्यमपि न कारणाद्व्यतिरेकेण गृह्यते, उक्तोत्तरत्वात्, प्रकृतिविकृतीत्यादिविभागभङ्गप्रसङ्गाच्च। अतः कारणाद्भिन्नत्वेन दृष्टं कार्यं तेनाकारेण पूर्वं नासीदिति त्वयैवाकामेनापि स्वीकर्तव्यम्। न हि घटाकारेण निष्पन्नस्य पुनरपि दण्डादिव्यापारनिष्पाद्यत्वमस्ति। किंच कार्यव्यङ्ग्यशब्दौ च व्यवस्थितविषयौ लोके दृष्टौ। कारकव्यञ्जकभेदश्च। कारकं समग्रमप्येकमुत्पादयति। व्यञ्जकं तु सहकारिसंपन्नं समानेन्द्रियग्राह्याणि समानदेशस्थानि तादृशानि सर्वाण्यपि व्यनक्ति। तदत्र घटादिव्यक्तिसामग्र्यैव तद्वन्मृत्पिण्डगतानां करकादीनामपि व्यक्तिः स्यात्। व्यञ्जकत्वे सिद्धे ह्यवान्तरव्यङ्ग्यभेदप्रतिनियतव्यञ्जकभेदव्यवस्थाक्लृप्तिः। न चेह तथा: आगन्तुकाभावे च पुरुषवत्प्रकृतिरपि ते निर्व्यापारैव स्यात्। तथा च गतं सृष्टिप्रलयादिवादैः सिद्धान्तसृष्ट्यादिभिश्च।

किंच सत्कार्यमिति कार्यस्य सत्त्वमात्रे साध्ये सिद्धसाध्यता; कारकव्यापारात्प्रागपि सदिति साध्ये कार्यस्य कारकव्यापारस्य प्रागसत्त्वमङ्गीकृतं स्यात्। असदकरणात्, शक्तस्य शक्यकरणादिति हेत्वोश्च करणशब्देनापूर्वोत्पादने विवक्षिते स्ववचनव्याघातः। व्यक्तिविवक्षायां तु व्यज्यमानत्वात्प्रागपि सदिति स्यात्; तदा अन्यतरासिद्धो हेतुः।

ननु सतोऽभिव्यक्तौ घटतैलतण्डुलादिनिदर्शनमस्ति, असत उत्पत्तौ न किंचिदिति चेत्, किमतः? न हि निदर्शनमेव प्रमाणं, हेतुनैष्फल्यप्रसङ्गात्। न च निदर्शनाभावो बाधकः, सर्वत्र प्रतिनियतस्वभावलोपप्रसङ्गात्। अपि च असदकरणादित्यत्र कार्यस्य प्राक्सत्त्वे क्रियमाणत्वादित्येव हेतुः स्यात्, तथा च प्रतिज्ञाहेतुविरोधः। विपक्षात् खपुष्पादेः सपक्षाच्च सर्वस्मात् व्यावृत्तत्वेन हेतोरसाधारणत्वप्रसङ्गश्च। भावत्वेन तु प्राक्सत्त्वं साधयाम इति चेत्, तथाऽपि प्रत्यक्षविरोधः। अन्यथा नित्यासतोऽपि कुतश्चिन्नित्यसत्त्वसाधने निवारकाभावात्। असतः सत्त्वापादनमशक्यमित्युक्तमिति चेन्न; अत्यन्तासत्त्वे विवक्षिते कार्येषु तदभावात्; प्रागसत्त्वे तु सृष्ट्यनुगुणस्यैव तद्विरुद्धत्वोपन्यासात्।

प्रागसत्तुच्छमेव स्यात् सच्च नित्यं सदित्यसत्।
अयथादृष्टि निर्णेतुरशेषाभीष्टविप्लवात्॥

अन्योऽपि घटवान्कालः कालत्वादिति वादिनः।
पक्षदृष्टान्तबाधादिप्रसङ्गः प्रणिधीयताम्॥

यच्च कारकाणां कार्यं प्राप्तानामेव तदुत्पादकत्वमिति; व्याहतमेतत्। किंच किं दृष्टत्वादेवमङ्गीक्रियते? अव्यवस्थाभयाद्वा? नाद्यः; अनन्यथासिद्धनियतपूर्वभावित्वादतिरिक्तायाः कार्यप्राप्तेः कारणानां मिथः प्राप्तिवत् त्वयाऽप्यदृष्टत्वात्। तदिहानङ्गाङ्गीकारो युक्ताङ्गहानिश्च, प्रागसत्त्वस्य युक्तस्योपेक्षणात् अविषयवृत्तित्वं वा, कारकाणां सम्बन्धस्य विरुद्धस्थले संचरणात्। समश्च प्राप्तावप्यतिप्रसङ्गः। न हि प्राप्तयोरपि रज्जुघटयोर्जन्यजनकता। तत्र नित्यप्राप्तिर्नास्तीति विशेष इति चेत्, निमित्तानामपि घटादिभिर्नित्यप्राप्त्यसंभवात्। उपादाने तु स्यादिति चेन्न; निमित्तवदेव नित्यप्राप्तिनैरपेक्ष्यात्। त्वत्पक्षेण च यद्येन नित्यप्राप्तं न तत्तस्योपादेयम्; यथा पटस्य तन्तुः, तथा च पटः, तस्मान्न तन्तूपादेय इति प्रसङ्गात्। प्रकृतिपुरुषयोर्नित्यप्राप्तयोर्नोपादानोपादेयभावः। अतो यद्येन नित्यप्राप्तं न तत्तस्योपादेयं यथा प्रकृतिपुरुषयोरन्योन्यमिति, पटादिकमपि येन नित्यप्राप्तं कथं तस्योपादेयं स्यात्; तयोरन्योन्यप्राप्तिर्नास्तीति चेन्न. *पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्ग इति स्वसमयविरोधात्। अजसंयोगपक्षे विभूनामपि नित्यप्राप्तेः।‡व्याप्तिरूपेण संबन्धस्तस्याश्च पुरुषस्य च। दारुण्यग्निर्यथा—इत्यागमविरोधाच्च। *जहात्येनां भुक्तभोगामिति श्रुत्या

मुक्तस्य प्रकृतिप्राप्तिर्निवर्त्स्यतीति चेन्न; तदाऽपि परस्परधर्माध्यासाधिकारभूत-दर्शनमात्रनिवृत्तेः त्वदिष्टत्वात् ।

यद् ब्रूथ—*या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्येति । अतः कार्य-प्राप्तिः कारणानङ्गम् । उक्तं चाक्षपादेन * घटादिनिष्पत्तिदर्शनात्पीडने च व्यभि-चारादप्रतिषेध इति । अत्र कार्यमप्राप्तैः इत्युपस्कार्यम् । एतेन—

*असत्त्वान्नास्ति सम्बन्धः कार[कै]णैः सत्त्वसङ्गिभिः ।
असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥

इति साङ्ख्यवृद्धगाथाऽपि प्रत्युक्ता । इह तु स्वोचितात्कारकचक्रात् तत्संबन्धतश्च कार्यदृष्टेरित्यव्यवस्थामूलघातः । एतेन विमतं पूर्वापरकालयोरपि सत् प्रमेयत्वात् सत्त्वाद्वा, आत्मवत्; विगीतः काल एतद्घटादिमान्, कालत्वात्, एतत्कालवदित्यादिर्निरस्तः; सर्वलोकप्रत्यक्षादिबाधात् ।

कारकव्यञ्जकानां च व्यवहारव्यवस्थितिः ।
किंनिमित्तेति वक्तव्यं सर्वनित्यत्ववादिना ॥

न हि व्यक्तौ विशेषोऽस्ति न चावरणवारणम् ।
तयोरपि भवत्पक्षे नित्यत्वात्साध्यता कथम् ॥

आवारकं च नित्यं चेन्नित्यमावरणं भवेत् ।
अन्यथा त्वपसिद्धान्तस्तत्तिरोधिश्च दुर्वचः ॥

तिरोधिं तन्निवृत्तिं च नानित्यौ तस्य मन्यसे ।
मिथश्चाभिभवाद्युक्तिर्गुणेष्वेवमनर्थिका ॥

समानदेशकालत्वमभावप्रतियोगिनोः ।
सहन्ते क्वाप्यगत्यैव न तथाऽत्रान्यथा गतेः ॥

अपि चाशेषनित्यत्वे पौर्वापर्यं न कुत्र चित् ।
व्यक्तिभोगापवर्गादिसाध्यतोक्तिरतो मुधा ॥

स्वप्रवृत्त्यादिनैष्फल्यं शास्त्रादेरप्यनुत्थितिः ।
सांख्यचार्वाकयोस्स्यातां साध्यसाधनबाधनात् ॥

अयोग्यत्वं तिरोधानं योग्यत्वं व्यक्तिरित्यपि ।
तन्नित्यानित्यताभ्यां ते विवक्षितविघातकृत् ॥

इन्द्रियप्रतिघातेन भागैर्भागान्तरावृतिः ।
यथाऽन्यत्र तथा नात्र कादाचित्कदशात्यजः ॥

असम्भवनिरस्तं च ग्रसनोद्ग्रसनादिकम् ।
मृत्पिण्डादिषु दुस्साधं शास्त्रमप्यनिदम्परम् ॥

अप्राप्तावव्यवस्थोक्ता प्राप्तावपि तवापतेत् ।
व्यक्तिवादोऽत एवेत्यप्ययुक्तं तन्निरासतः ॥

सत्त्वादिगुणभूयिष्ठभागभेदाव्यवस्थितेः ।
त्रिगुणद्रव्यसम्बन्धः प्रवाहानादिरात्मनाम् ॥

सार्वज्ञ्यप्रागभावात्मा तिरोधिरपि कर्मिणाम् ।
संविद्विकाससङ्कोचप्रवाहान्नातिरिच्यते ॥

तत्तत्कर्मप्रवाहेण तयोरेवं व्यवस्थितेः ।
न हि स्वरूपतोऽनादेर्हेतुरस्माभिरिष्यते ॥

यत्तु कारकशक्तिर्नाम तद्गतं सूक्ष्मं कार्यमिति कल्प्यते तत्प्रतिबन्द्या प्रतिरुणद्धि तस्मिन्निति। तस्मादित्यत्रापि स्वोचितादिति विशेषणीयं, यथा सर्वेषु द्रव्येषु तिला एव तैलगर्भाः स्वकारणशक्त्या सृज्यन्ते, तथा तत्तत्कार्यनियतपूर्वभावितया तत्तदुत्पादकस्वभावास्ते ते भावास्तथैवेति स्वीकार्यम्; अन्यथा दृष्टहानमदृष्टकल्पनं च। प्रतिबन्द्यन्तराणि स्वव्याघातं चाभिप्रेत्याह—तन्निमित्तेति। निमित्तादीनां कार्योत्पादनशक्तिरस्ति वा न वा? न चेत्कथं तन्निमित्तत्वम्? अन्येषां वा कथमतन्निमित्तत्वम्? अस्ति चेत्सा किं कार्यस्य सूक्ष्मावस्था? अन्या वा? न पूर्वः; अपसिद्धान्तात्। उपादाने हि तत्सत्त्वमङ्गीकरोषि, अन्यथा प्रकृतेरिवात्मनोऽपि प्रपञ्चगर्भत्वेन प्रकृतित्वप्रसङ्गात्। आत्मा खल्वयस्कान्तवन्निर्व्यापारोऽपि सन्निधिमात्रेण निमित्तमिष्यते, तथा सति निमित्तोपादानवैषम्यविलयाच्च। नाशकेषु च नाश्यवृत्तिरस्ति वा न वा? अस्ति चेद्वह्नौ तूलवद्विरोधः। न चेत्कथं तदेव तस्य नाशकम्? न ह्यतद्वृत्तिस्तेन नाश्यते, शुक्तावविद्यमानस्य रूप्यस्य तया नाशप्रसङ्गात्, सर्वत्र वाऽतिप्रसङ्गात्। दूषणेषु च दूष्यं वर्तते न वा? पूर्वत्र दूषणत्वादेरिव तद्वृत्तेस्तेन दूषणायोगः। उत्तरत्र तद्वृत्तिरहितस्य घटादेरिव तद्दूष्यत्वं न स्यात्। अथैतेषु यथादर्शनं व्यवस्थेष्यते। प्रकृतेऽपि तथा स्यात्। एवं निमित्तादिप्रतिबन्द्यैव कार्यस्य कारणभावः सर्वत्र सर्वसंभवप्रसङ्गश्च निरस्तः।

यानि च सांख्यानामवस्थातद्वतोरभेदसाधकानि, तेषु यदेतत् पटस्तन्तुभ्यो न भिद्यते तद्धर्मत्वादिति; अत्र तावत्प्रतिज्ञाहेतुविरोधः स्पष्टः। दृष्टान्ताभावेन व्याप्तिश्च नास्ति। यद्यतो भिद्यते न तत्तस्य धर्म इति व्यतिरेकव्याप्तिरस्तीति चेन्न; सपक्षेभ्यस्तन्तुभ्योऽपि व्यावृत्तत्वेन केवलव्यतिरेकित्वायोगात्।

यदपि तदुपादेयत्वात्तदभिन्न इति, एतदपि पूर्ववदेव। तदुपादेयत्वं च तज्जन्यत्वमात्रं वा, तद्विकारत्वं वा, तत्संबन्धित्वं वा, तद्धर्मत्वं वा, तदभिन्नत्वं वा, अन्यद्वा यत्किञ्चिदिति। नाद्यः; निमित्तैरप्यभेदप्रसङ्गात्। न द्वितीयः, तद्धर्मत्वहेतूक्तदोषादेव। उभयत्र पटावस्था तन्त्वात्मा न भवति तन्तुभ्यो भिन्नत्वात्

घटवदिति प्रतिप्रयोगस्य शक्यत्वाच्च। इष्टो हि त्वयाऽपि तत्र भेदोऽपि। न तृतीयः, कारणेषु परस्परसंबन्धिषु व्यभिचारात्, त्वत्पक्षेणासिद्धेश्च। न हि धर्मधर्मिणोस्तादात्म्यवादिनः तत्संबन्धित्वसंभवः, समवायस्यानभ्युपगमात् अन्यतरस्याद्रव्यत्वे तु संयोगायोगाच्च। न चतुर्थः, प्रागेव दूषितत्वात्। न पञ्चमः, तस्यैव साध्यत्वात्। न षष्ठः, अभेदव्याप्यस्य कस्यचिदन्यस्य त्वयाऽप्यदर्शनात् इति। यच्चैतत्पटस्तन्त्वात्मकः तत्संयोगतदप्राप्तिरहितत्वात्, तादात्म्याभावे हि कुण्डबदरयोरिव संयोगो वा स्यात्, हिमवद्विन्ध्ययोरिवाप्राप्तिर्वा, तदुभयमिह निवर्तमानं तादात्म्यविरहमपि निवर्तयति इति।

तदपि मन्दम्; तादात्म्यविरहेऽप्यन्यतरस्याद्रव्यत्वात् संयोगाभावः; तद्धर्मस्वभावत्वादेवाप्राप्तिपरिहार इत्यन्यथासिद्धस्यासाधकत्वात्। अन्यथा तादात्म्यभाव इव भेदसद्भावेऽपि घटपटयोरिव धर्मधर्मिभावो न स्यादिति प्रसज्येत। गुरुत्वान्तरकार्यादर्शनं तु द्रव्यान्तरोत्पत्तिं प्रतिरुन्ध्यात्, न त्ववस्थातद्वतोरभेदं विदधीत। ननु जनिरपि व्यक्तिरेव, * जनी प्रादुर्भावे इति धात्वर्थपाठात्। न; जनिव्यक्तिशब्दयोरर्थभेदेनैव निरूढेः। प्रादुर्भावपाठोऽप्युत्पत्तिपरस्स्यात् निर्वर्त्यप्राप्यभेदसिद्धेश्च। जन्यं हि निर्वर्त्यम्, व्यङ्ग्यं तु प्राप्यम्। अभूततद्भावादिषु प्रागसतस्सत्त्वमनुस्मृतमेव। भवतु वा जनिशब्दो व्यक्तिपरः।

न व्यक्तिरुपलब्धिस्ते दृष्टादृष्टदशान्वयात्।
अथोपलब्धियोग्यत्वं न तदव्यापकत्वतः॥
सत्त्वलक्षणपूर्तिश्चेदभिव्यक्तिस्तदप्यसत्।
साऽपि वः प्राक्तनी नो चेन्न सिध्येद्धेतुरप्यसन्॥

किं च व्यक्तिरपि नित्या कार्या वा? पूर्वत्र कारकाणामिव व्यञ्जकानामपि नैष्फल्यम्। उत्तरत्रार्धजरतीयः सत्कार्यवादः। व्यक्तेरपि व्यक्त्यर्थं कारकापेक्षेति चेत् तत्रानवस्थाप्रसङ्गमाह—**व्यक्तिरिति**। व्यक्तेः कार्यत्वपक्षे अपसिद्धान्तमसदकरणादित्यादिहेतुविरोधं चाभिप्रेत्याह—**न चेति**।

ननु कार्यस्य कृतिस्तावन्न कार्यस्वरूपमेव; कार्यं क्रियते घटः क्रियत इति सामान्यतो विशेषतश्च सहप्रयोगात्। अतिरिक्ता च सा। तथा सति कार्यव्यक्तौ कः प्रद्वेषः? कृतिरपि कृता वा व्यक्ता वा? पूर्वत्रानवस्था; उत्तरत्र कारकनैष्फल्यापसिद्धान्तौ। व्यक्तिरपि कृता व्यक्ता वेत्युभयधाऽप्यनवस्था। तत्राह—**नैवमिति**। कृतिर्हि कारकाणां व्यापारः, स चागन्तुस्वकारणव्यापारेण जन्यते। सोऽपि तथेति सिद्धाऽनवस्थैषा। सा च सर्वसंमता न दोषः। त्वयाऽप्यभिव्यञ्जकव्यापारो व्यञ्जकान्तरव्यापारव्यङ्ग्य इति वाच्यम्। ननु व्यक्तिर्न व्यज्यते न क्रियते च, अव्यक्तैव नित्यं स्वयं व्यक्तैव वा कार्याणां व्यक्तिः स्यात्। न स्यात्, तदर्थकारकव्यापारवैयर्थ्यप्रसङ्गात्, कार्याणां नित्यव्यक्तिप्रसङ्गाच्च।

ननूत्पत्तिर्नाम सत्तासमवायो वा, स्वकारकसमवायो वा ? स च नित्यः न तदर्थश्च कारकव्यापारः कृतिरिति समा नश्चर्चा। न; समवायस्यास्माभिरनभ्युपगमात्। तदेतदस्मच्छब्दान्वादेशेन सूचितम्। का तर्ह्युत्पत्तिः? कृतिरेव। अन्यधर्मः कथमन्यस्योत्पत्तिरिति चेत्तादर्थ्येन तद्धर्मतोपचारात्। यदा हि तन्त्वादयो व्याप्रियन्ते तदा पट उत्पद्यत इति व्यवहरन्ति, आद्यक्षणावच्छिन्नपटत्वावस्थैव वा पटोत्पत्तिरुच्यते। * सैव तदवस्थस्योत्पत्तिरिति भाष्यमपि तदभिप्रायमेव स्यात्। अत एव हि सहप्रयोगोपपत्तिः। न चेदृश्या उत्पत्तेरीदृशमुत्पत्त्यन्तरमस्ति। तथाऽपि प्रागसिद्धस्वरूपलाभादुत्पत्तिशब्द उपचाराद्भवतु वा मा वा। तदा कार्योत्पत्त्यर्थः कारकव्यापार इति सिध्यति। स एव यदोत्पत्तिर्विवक्षिता, तदा कार्यार्थः कारकव्यापार इत्येव वक्तव्यम्, अन्यथा तूपचारः।

क्रियैव कारकाणां स्यात् प्रतिसंबन्धिनीत्यसत्।
प्राक्सत्त्वासत्त्वसंक्षोभस्तस्यामपि हि दुस्तरः॥

क्रियावद्भिः पटादेश्च कारकैस्तादृशोऽन्वयः।
प्रधाने भागनिष्पत्त्या भागैरैक्याच्च भागिनः॥

प्राक्सत्त्वं सर्वभावानां मिथश्चैक्यमिति त्वसत्।
भिन्नांशपूर्वसत्वे हि नाभिन्नाद्भेदसंभवः॥

भिन्नाभिन्नाद्यदि व्यक्तिभेदानां प्राक्तनी भवेत्।
एकस्य प्रागसन् भेदो यदि स्यादस्मदिष्टवत्॥

प्राक्सतोऽस्याप्यवस्था चेत्तथाऽप्यस्मदभीष्टवत्॥ २४॥

॥ इति सांख्यसत्कार्यवादभङ्गः॥

आनन्द० आक्षेपिकी संगतिरित्यभिप्रायेणाह—**असहमानस्येति**। नित्यैकान्तवादित्वात्तस्य देहादेः पञ्चभूतोपादानकत्वायोगादित्यर्थः। एकान्तता चैकरूपता। तथाच सर्ववस्तूनामेकरूपत्वान्नागन्तुकावस्थाऽपीति भावः। **असदकरणादिति**। कार्यं—कार्यत्वेनाभिमतं घटपटाद्यात्मकमिति पक्षः। सदिति साध्यम्; सर्वदा सदित्यर्थः। एवमपरमपि द्रष्टव्यम्।

उपादानग्रहणादित्यस्य उपादानेन संबन्धात्कार्यस्येत्यर्थः। कार्यं सत् उपादानेन सम्बद्धत्वात् इति द्वितीयः। तमपि व्यतिरेकव्याप्तिप्रदर्शनमुखेन व्याख्याति—**अप्राप्तनिष्पत्त्य (सिद्धेः) दृष्टेरिति**। तथा च मूलेऽपि सदितरजननाप्राप्तनिष्पत्त्ययोगात् इति व्यतिरेकव्याप्तिप्रदर्शनमुखेन उक्तहेतुद्वयमभिप्रेतमन्यथा वैयधिकरण्यप्रसङ्गात्।

कारणभावात्—काणात्मकत्वः दिति तृतीयो हेतुः। **सर्वसम्भवाभावात् शक्तस्य शक्यकरणात्** इति आद्यद्वयस्यानुग्राहकम्। तथा च प्रथममुक्तं तर्कतद्धेतुद्वयं

दूषयितुं हेतुद्वयं व्याख्यातमिति द्रष्टव्यम्। व्यतिरेकव्याप्तौ नित्यासत्त्वं साधनावच्छिन्नसाध्यव्यापकमुपाधिरिति शङ्कते—माभूदिति। साध्यस्यासत्त्वमात्रस्य अनुकूलतर्कबलाद्व्याप्तिग्रहे साधनाव्यापकता नास्तीत्याह—नेति। साधनाव्यापकत्वभङ्गमेवोपपादयति—नचासत इति। कालभेदेनाऽप्यविरोधासम्भवादित्यर्थः।

ननु एकस्यानेकधर्मवत्त्वमविरुद्धम्; तथाच सत्त्वासत्त्वे धर्मौ घटस्य सत एवेति शङ्कते—असत्त्वं सत्त्वं चेति। तर्हि सत्त्वासत्त्वाश्रयस्यानादितया सत्त्वकाले सत्तयेवासत्त्वकालेऽप्यसत्तया चोपलब्धिः प्रसज्येत; नचेष्टापत्तिः; अनुभवविरोधादित्याह—वस्तुनस्तर्हीति। ननु सर्वदा सत्त्वे तवाऽपि सर्वदा सत्त्वेन प्रतीतिस्स्यादित्यत्राह—अस्माकं त्विति।

यद्यप्यव्यक्तावस्थाव्यक्तावस्थयोर्विरोधात् कथं व्यक्तस्यैवाव्यक्तत्वम्? कालभेदेनाविरोधेऽप्यव्यक्तावस्थस्याप्रतीतिवदसत्त्वावस्थस्याप्यप्रतीतिरिति वक्तुं शक्यम्; तथाऽप्येकस्यैव व्यञ्जकसन्निधानासन्निधानाभ्यां समावेशो दृष्टः, न तथा सत्त्वासत्त्वसमावेश इति भावः।

सत्त्वविशिष्टस्य कारणत्वखण्डनाय; 'किञ्च स्वरूपसत्त्वं स्वरूपाद्धटाद्यात्मनो नाधिकम्। असतोऽपि च स्वरूपं स्वरूपमेव। न ह्यसन् घटादिर्न घटादिः। तथा सति घटादिर्नेत्यपि न स्यात्; असतोऽघटादित्वात्, इति खण्डनोक्तमनुवदति—न ह्यसन् घटादिरिति। असत्त्वेन स्वरूपेण व्यवह्रियमाणं घटादि घटादिरूपं न भवतीति न स्वरूपमेव सत्त्वमिति यावत्। तत्र प्रतिवन्दिः—तथा सति स्वरूपसत्त्वाभावे घटादिसत्ताऽपि स्वरूपं न स्यात्; तथा च सत्त्वं न स्यात्। तत्र हेतुः असतोऽघटादित्वात्—स्वरूपत्वाभावात्; तथाच निषेधो न स्यात्। प्रतियोगिनोऽभावादिति भावः। तथाच सत्त्वस्य घटरूपत्वे असत्त्वस्यापि घटरूपत्वमविशेषादिति सत्त्वासत्त्वात्मकत्वयोर्विरोधात् सदसद्विलक्षणत्वरूपानिर्वचनीयत्वं पर्यवस्यतीति असन् घटादिः—असत्त्वेन व्यह्रियमाणघटादिः न घटादिः—स्वरूपमेव नास्तीति वक्तुं न शक्यत इत्यर्थः। कुतः? तथा सति घटादिस्वरूपं न स्यात्। तत्र हेतुः—असतोऽघटादित्वात् घटादिस्वरूपस्यातद्रूपत्वादित्यर्थः।

तथाचायं निर्गलितार्थः—सत्त्वस्य घटरूपत्वे असत्त्वस्यापि घटरूपत्वमविशेषादिति सत्त्वासत्त्वात्मकत्वयोर्विरोधात्। अन्यतरपरिशेषे स्वरूपशून्यतायां पर्यवस्यतीति खण्डनतात्पर्यम्।

किमत्र असत्त्वमभावप्रतियोगित्वं विवक्षितं उताभावात्मकत्वमिति विकल्पमभिप्रेत्य आद्यं दूषयति—अभावेति। अभावप्रतियोगित्वेऽपि सत्त्वविरोधाभावेन असत्त्वासिद्धेरित्यर्थः द्वितीयआह—विरोधादिति। भावात्मकत्वेन घटादेरुपलम्भादभावात्मकत्वाभावा (त्वविरोधा) दित्यर्थः।

ननु सांख्यकारिकायां उपादानग्रहणादित्युक्तम्; मूलेऽप्राप्तनिष्पत्त्ययोगादित्यनुवादोस्ति; स न युक्त इत्यत्राह—**उपादानग्रहणादित्यनेनेति**। उपादानग्रहणमुपलक्षणमित्याह—**दण्डचक्रादिभिरिति**। **सदेव साध्यमिति**—पूर्वमपि सदेव कार्यं साध्यमित्यर्थः। ननु शक्ताशक्तप्रभेदादिभिरित्यनुवादो न युक्तः कारिकायामदृष्टेरित्याशङ्क्याह—**शक्तस्येति**।

ननु घटादिकार्यं प्रागपि सत् शक्तकारणजन्यत्वादित्यत्र व्याप्तिरसति गाह्या; तत्र जन्यत्वादित्येव हेतुस्स्यात्; तथाच प्रथमहेत्वभेद इत्याशङ्क्य पूर्वहेतौ विपक्षे बाधकस्तर्क इत्याह—**असतोऽपीति**। ननु शक्तस्य जनकत्वं कथमप्राप्तस्योत्पत्त्यभावव्याप्तौ बाधकस्तर्क इत्यत्राह—**अयं भाव इति**। **तद्गर्भत्वमेवेति**—तैलगर्भत्वमेवेत्यर्थः! **तदभावः**—सिकतादिषु तैलाभावः। **तद्वतः**—कार्यरूपशक्तिमतो हेतोः। **तन्निष्पत्तेः**—कार्यनिष्पत्तेः; प्रागपि तत्सि (द्धिरनिवार्येत्यर्थः) द्धिः कार्यसत्ताऽस्तीत्यर्थः। **हेतुद्वयं**—तर्कमूलभूतव्याप्ति (कं आपादक) द्वयमित्यर्थः। प्रसङ्गतद्विपर्ययावेवोपपादयति—**तथाहीति**। **सर्वस्मात्सर्वसंभवस्स्यात्**—सर्वकारणादपि सर्वं कार्यं स्यादिति प्रसङ्गः। न चासौ सर्वकार्यसम्भवोऽस्तीति विपर्ययः। **पञ्चानामिति**—साधकानिष्टापादकरूपाणामनुमानतर्काणामित्यर्थः। विशिष्टस्य सर्वहेतुदूषणपरत्वे विशेषणवैयर्थ्यमाद्यहेतावित्यभिप्रायेणाह—**तत्रेति**। किञ्चिद्विशेषस्य किञ्चद्विशेषं प्रति अन्वयव्यतिरेकवशात् कारणत्वोक्तौ नोक्तदूषणमिति शेषाणां दूषणमाह **शेषाणां त्विति**। **स्वोचितत्वं**—कार्यानुकृतान्वयव्यतिरेकित्वम्। कार्यदृष्टेरित्येतदुपपादयति—**न तावदिति**। तथाच सत उत्पत्तिदर्शनाद्बाध इत्यर्थः। न चासत उत्पत्तौ शशशृङ्गस्याप्युत्पत्तिः। अन्वयव्यतिरेकसिद्धकारणाभावात्। **निराश्रयत्वप्रसङ्गाच्चेति**—तथाच आश्रयासिद्धिरिति भावः। लोकविरोधपरिहारमाशङ्कते—**न च दृष्टमपीति**। परिहरति—**माध्यमिकादिमतानामिति**। बाधादर्शनेऽप्यसत्यत्वे सर्वत्राप्येवं प्रसङ्गेन माध्यमिकमतप्रसङ्गः; स च निराकरिष्यत इत्यर्थः। **उक्तोत्तरत्वादिति**—पूर्वं घटो नासीदिदानीमासीदिति कारणाद्व्यतिरेकेण लोकदृष्टेरित्यर्थः। **प्रकृतीति**—असदवस्थाया अभावे सर्वेषां स्वस्वावस्थाविशिष्टानां प्राक्सत्वात् किंचिन्न कस्यचिद्विकृतिरित्यर्थः।

न च यद्यतः कदाचिदभिव्यक्तं तत्तद्विकृतिरिति विभागः; अभिव्यक्तेः प्रकाशात्मकत्वे प्रकृतेरपि कदाचिच्छब्दादिभिः प्रकाशात्तद्विकृतित्वप्रसङ्गात्। आपरोक्ष्यविवक्षायां प्रकृत्यादि (त्यादीनां) (प्रति) महदादि विकृतिर्न स्यात्। तस्या (तेषामा) परोक्ष्याभावात्। न च यद्यस्माद्विभज्यते सा तस्य प्रकृतिरिति विभागः; विभागस्य प्राक्सत्त्वे असत्त्वे च (उक्तदोषात्) असाध्यत्वप्रसङ्गात्। न चाभिव्यक्तिरन्या; तस्याः पराभिमतोत्पत्तेरन्यस्या दुर्वचतया आद्यक्षणसम्बन्धात्मिकायाः प्रागसत्त्वनियमादिति भावः।

अवस्थायाः प्राक्सत्वे कारकव्यापारवैयर्थ्यमित्याह—**नहीति**। **निष्पन्नस्य**—सिद्धस्य निष्पाद्यत्वायोगात्; अन्यथा घटस्योत्पन्नस्य सर्वदोत्पादप्रसङ्गादिति भावः। ननु न कारकव्यापारस्य वैयर्थ्यं, तेषां व्यञ्जकत्वादित्यत्राह—**किञ्चेति**। कारक-व्यञ्जकयोर्व्यापारभेदादपि नैक्यमित्याह—**कारकं समग्रमिति**। **व्यञ्जकं त्विति**—एकस्य दीपस्य युगपद्धटपटादिव्यञ्जकत्वदर्शनादिति भावः। कारकस्य व्यञ्जक-त्वमेव यदि तदा बाधकमप्याह—**तदत्रेति**। न च मृत्पिण्डे करकाद्यभावः; क्रमेणो-त्पद्यमानानां दर्शनादिति भावः।

ननु व्यञ्जकानां स्वभावभेदः कल्प्यते; केषांचिद्युगपदनेकव्यञ्जकत्वं केषांचित् किञ्चिज्जातीयव्यञ्जकत्वं; तथा च नोक्तदोष इत्यत आह - **व्यञ्जकत्वे सिद्धे इति**।

ननु आगन्तुकं नास्ति; सर्वं पूर्वमेव सत्; तथाच तदनुरोधाद्धटादिकारणानां दण्डादीनां व्यञ्जकत्वमङ्गीकरणीयमित्याशङ्क्य प्रत्यक्षादिभिरागन्तवस्सन्त्येवेत्य-भ्युपगन्तव्यम्; अन्यथा दोषमाह -**आगन्तुकाभाव इति**। व्यापारस्यागन्तुक-स्याभावादित्यर्थः। तस्यापि पूर्वसत्त्वाङ्गीकारे सृष्टिप्रलयादिकं युगपत्स्या (सर्वदा स्या) दिति भावः—**सिद्धान्तसृष्ट्यादिभिश्चेति**। सिद्धान्तकल्पनयेत्यर्थः। यद्वा त्वत्सिद्धान्तसृष्ट्यादिक्रमादिभिश्चेत्यर्थः—**कारकव्यापारात्प्रागिति**। प्राक्त्व-(प्राक्सत्त्व) स्य तदभावघटितत्वादिति भावः—**अपूर्वोत्पादने इति**। उत्पादनस्यो-त्पत्तेः पूर्वमविद्यमानस्य विवक्षितत्वे इत्यर्थः। व्यक्तिविवक्षायामिति। अभिव्यक्ति-विवक्षायामित्यर्थः। विपर्ययमुखेन पर्यवसितं हेतुमाह—**व्यज्यमानत्वादिति**। **हेत्विति**—व्याप्तं लिङ्गमित्यर्थः। **सर्वत्रेति**। तेजस उष्णस्पर्शः पृथिव्या गन्ध इत्यादिलोपप्रसङ्गादित्यर्थः। अपूर्वोत्पादनविवक्षायां विरुद्धत्वमपीत्याह—**अपिचेति**। सपक्षाच्चेति—नित्यत्वेनाभ्युपगतादात्मादेरित्यर्थः—**अन्यथेति**। शशशृङ्गादेरप्युत्पत्त्यभावादिना नित्यसत्त्वसाधनप्रसङ्गादित्यर्थः— **भागसत्त्वे त्विति**। तस्योत्पत्तियोग्यतावच्छेदकत्वात् उत्पत्तेश्च आद्यसमयसम्बन्धरूपायाः प्रागसत्त्वस्यानुकूलत्वात् तस्य तद्विरुद्धत्वोपन्यासो व्याहत इत्यर्थः। अन्यथा अनभिव्यक्तस्य शशशृङ्गददभिव्यक्तिसम्पादन (मशङ्कयम्) मप्यशक्यं; अतिप्रसङ्गात्।

ननु प्रागसत्त्वे चासत्त्वाविशेषात् शशशृङ्गवत् तुच्छता स्यात्; कदाचित्सत्त्वे सत्त्वाविशेषात् आत्मादिवत् सर्वदा सत्त्वमेव स्यादित्यत्राह—**प्रागसदित्यादिना**। प्रागसत एव घटादेः कदाचित्सत्त्वस्य सत एव घटादेः पश्चादसत्त्वस्य च प्रत्यक्षदृष्टेः दहनानुष्णत्वानुमानवद्बाधितमिति भावः। अनुभवातिक्रमे बाधकमाह--**अयथेति**। आत्मा जडो विकारी वस्तुत्वात्; प्रकृतिरपि स्वोपादाननिष्ठा जडद्रव्यत्वात्; प्रकृत्यादि प्रत्यक्षं स्यात् उपादानद्रव्यत्वात् इत्यादिप्रसङ्गादित्यर्थः। सत्त्वसाधका-

नुमानान्तरं दूषयति--अन्योऽपीति। घटवत्त्वेन वादिद्वयसंप्रतिपन्नकालान्य। काल इत्यर्थः--इतिवादिनः--सांख्यस्य। भवद्भिः कालरूपपदार्थानङ्गीकारात् पक्षासिद्धिरित्यर्थः--प्रणिधीयतां--प्रतिसन्धीयताम्। परसिद्धस्य पक्षत्वे तु बाध इति ध्येयम्।

द्वितीयमपि हेतुं विशिष्य दूषयति—यच्चकारकाणामित्यादिना। व्याहतमेतदिति—कार्यस्या (स्यासिद्धत्वनियमात्) सिद्धत्वे सिद्धं प्रत्युत्पादकत्वस्यासम्भवादित्यर्थः—अनङ्गाङ्गीकार इति। अनपेक्षितस्वीकारो निग्रह इत्यर्थः—युक्ताङ्गहानिः। सिद्धत्वस्य प्रतिवन्धकतया तदभावरूपस्यासिद्धत्वस्योत्पत्त्यनुकूलतया तत्त्यागो युक्ताङ्गहानिर्निग्रह इत्यर्थः। अविषयवृत्तित्वं चेति। अविषये—स्वविपयतानर्हे स्वव्यापारफलप्रतिकूल एव वृत्तित्वं वेत्यर्थः। विरुद्धस्थले—स्वव्यापारफलप्रतिवन्धकस्थले। एवं च तव निग्रहत्रयमिति भावः।

अव्यवस्थाभयादिति द्वितीयं दूषयति—समश्चेति। तदेव दर्शयति—न हीति। निमित्तवदेवेति—निमित्ते अतिप्रसङ्गपरिहारवदुपादानेऽपि सम्भवादिति भावः। प्रतिपक्षमाह—स्वत्पक्षेण चेति। तथाच पट इति—नित्यप्राप्त इत्यर्थः। व्यभिचारमप्याह—प्रकृतिपुरुषयोरिति। विरुद्धत्वमप्याह—अतो यद्येनेति। तयोः—प्रकृतिपुरुषयोः। पङ्ग्वन्धवदिति—

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।

इति पूर्वार्धम्। अत्रेत्थं वाचस्पतिना व्याख्यातम्—'ननु चेतनोऽहं चिकीर्षन् करोमी'ति कृतिचैतन्ययोः सामानाधिकरण्यमनुभूयते तन्नोपपद्यते चैतन्यस्याकर्तृत्वात् कर्तुश्चाचैतन्यात् इति शङ्कायाम्;—

तस्मात्तत्संयोगात् अचेतनं चेतनावदिव लिङ्गम्।

इति परस्परसंयोगाधीनो भ्रम इत्युक्त्वा; अवच्छिन्नयोस्संयोगोऽपेक्षां विना न सम्भवति; अपेक्षा चोपकार्योपकारकभावं विना नेति अपेक्षाहेतुमुपकार्योपकारकभावं पूर्वार्धेन प्रतिपाद्य पङ्ग्वन्धवदित्यनेन संयोगउक्तः इति। तत्कृतस्सर्गः—महदादिसर्गस्संयोगकृत इत्यर्थः। अजसंयोगपक्षे इति—विभूनामात्मनां परस्परसम्बन्धाव्यभिचार इत्यर्थः। प्रकृतिपुरुषयोस्संबन्धानङ्गीकारे आगमबाधमप्याह—व्याप्तिरूपेणेति।

ननु प्रकृतिपुरुषयोर्न नित्यस्संयोगः; मुक्तस्य तन्निवृत्तिश्रवणात्। तथा च यावद्द्रव्यं सम्बन्धोऽत्र विवक्षितो नास्तीति शङ्कते—जहात्येनामिति। निवर्त्स्यंतीति—'न वृद्भ्य' इति इडभावः। तदाऽपीति—जहातीति परस्पराध्यासरूपभ्रान्तेरेव निवृत्तिर्भवदभिमता न तद्धेतुभूतसंयोगनिवृत्तिरिति व्यभिचारस्तदवस्थ इत्यर्थः। उक्तेऽर्थे तदुक्तिं संवादयति—यदूचुरिति—

प्रकृतेस्सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।

'प्रकृतेस्सुकुमारतत्वं—पुनर्दर्शनासहत्वम्। अतिमन्दाक्षवैलक्ष्यमन्थरा प्रमादाद्विगलितवसना चेदालोक्यते वधूः पुरुषेण पुनस्सा दर्शनं न याति तथा प्रकृतिरपि पुनर्न द्रक्ष्यते इत्यर्थः' इति वाचस्पतिना व्याख्यात इत्यर्थः। उक्तेऽर्थे अक्षपादसम्मतिमाह—उक्तं चेति। अप्राप्तैरेव घटादिनिष्पत्तिदर्शनानुरोधेनैवाति-प्रसङ्गभङ्गात्। पीडने च—सम्बन्ध आवश्यक इति निर्बन्धकरणे च उक्तरीत्या व्यभिचारात्—सम्बद्धादपि रज्वादेरुत्पत्त्यदर्शनात् असंबद्धोत्पादनेऽपि न विरोध इत्यर्थः। **उपस्कार्यं**—अध्याहार्यम्। एतेनेत्यस्यार्थमाह—इह त्विति।

एतेनेति—पूर्वं कालपक्षकानुमानस्य परपक्षानुसारेण दूषणमुक्तम्। इदानीं प्रत्यक्षादिभिर्बाधोऽपीति वक्तुं (कार्यप्राप्तकारणानामेवोत्पादकत्वमिति सत्त्वसाधक रूपस्य निरस्तत्वात् प्रत्यक्षादिभिर्बाधोऽपि सिद्ध इति विशेष इति दूषितस्यापि) पुनरनुवादः। अन्यथा आदिशब्दोक्तानुमानादीनां तुल्यतया प्रतिपक्षत्वप्रसङ्ग इति ध्येयम्। व्यञ्जकत्वमेवोत्पादकत्वं तदतिरेकेणोत्पादकत्वाभावात्। तत्र सिद्धत्व-मनुकूलमेव। न च कारकव्यञ्जकव्यवस्थिती न स्यातामिति वाच्यम्; तारतम्य-मादाय व्यवस्थासम्भवात्। तथा च पूर्वोक्ता दोषा इत्याह—**कारकव्यञ्जकानां चेति**।

किमभिव्यक्तिरावरणनिवृत्तिः तदनुकूलव्यापारो वा? नोभयत्र तारतम्य-मस्तीत्यर्थः। तत्तारतम्याङ्गीकारेपि तदादाय न व्यवस्था सम्भवतीत्याह—**तयोरपीति**। अभिव्यक्त्यावरणयोरित्यर्थः। आवरणतद्वारणयोरित्यन्ये। सर्वनि-त्यत्ववादिनः आवरणनिवारणमेव न स्यात्; दूरे तत्तारतम्यमिति भावः। आवर-णतन्निवृत्त्योर्यौगपद्ये विरोधमप्याह—**आवारकं चेति**। **अन्यथा**—अनित्यत्वे सर्वनित्यत्ववादिनः कादाचित्कसत्त्वप्रसङ्गेन अपसिद्धान्त इत्यर्थः।

तत्तिरोधिश्चेति—तिरोधानं नाम ज्ञानप्रतिबन्धो वा तत्सामग्रीरूपसन्नि-कर्षप्रतिबन्धो वा? उभयत्र ज्ञानसन्निकर्षौ स्तो न वा? आद्ये विद्यमानयोस्सर्वदा सत्वेन नित्यतया निवृत्त्यनुत्पत्तिप्रयोजकत्वरूपप्रतिबन्धासम्भवात्। द्वितीये असतस्तव सर्वदैवासत्त्वान्निवृत्त्यनुत्पत्तिप्रयोजकत्वं शशशृङ्गादेरिव न सम्भवती-त्यर्थः। तिरोधानतन्निवृत्त्योरनित्यत्वे चासत उत्पत्तिप्रसङ्गः। तन्नित्यत्वाङ्गीकारे दूषणान्तरमाह—**तिरोधिमिति**। अनित्यश्चानित्या चानित्यौ। 'पुमान् स्त्रिया' इति पुंसश्शेषः।

अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥

इति सृष्ट्यर्थं सत्वरजस्तमसामन्योन्याभिभवोक्तिरनुपपन्नेत्यर्थः। सत्वं रजस्तमसी अभिभूय शान्तात्मनो वृत्तीर्लभते। रजस्सत्वतमसी अभिभूय घोरा-

त्मनो वृत्तीः। तमस्सत्वरजसी अभिभूय मूढात्मनो वृत्तीरिति सृष्टयर्थमन्योन्याभिभवोक्तिर्व्यर्था अभिभवस्य नित्यत्वेन स्वतस्सिद्धत्वादित्यर्थः। केचित्तु—तिरोधेर्दुर्वचत्वमेवाह—**तिरोधि तन्निवृत्ति चेति**। भावाभावयोरेकत्र वृत्त्यसम्भवा (वृत्त्ययोगा) दिति भावः। एवं च सति दूषणान्तरं च भवतीत्याह—**मिथश्चेतीत्याहुः**।

भावाभावयोरेकदैकत्र वृत्तिस्संयोगतदभावयोरिवोपलब्ध्यन्यथानुपपत्त्या साधयितव्या। तथा च तिरोधितदभावयोर्नित्यत्वेऽपि तिरोधेर्न दुर्वचत्वमित्यत्राह—**समानदेशेति**।

यद्वा तिरोधिनदभावयोर्नित्यत्वाङ्गीकारे भावाभावात्मकयोस्तयोस्समानदेशकालत्वं विरुद्धमङ्गीकरणीयमिति दूषणान्तरमाह—**समानेति**। असदुत्पत्त्यङ्गीकारेणापि निर्वाहसम्भवान्नान्यथा गतिरिति भावः। किञ्चाशेषनित्यत्वे पौर्वापर्याभावात्तद्व्यवहारोच्छेदः; अभिव्यक्त्यादीनां साध्यतोक्तिश्चार्थशून्येत्याह—**अपिचेति**। साध्य साधनभावस्य सर्वनित्यत्वमते बाधात् प्रवृत्तिनिवृत्तिवैधर्थ्यं शास्त्राप्रामाण्यं च स्याच्चार्वाकस्येवेत्याह—**स्वप्रवृत्तीति**। प्रथम आदिशब्दो निवृत्तिपरः; अपगोरणादेर्नित्यस्य निवृत्त्या परिहारसम्भवादिति भावः। कृष्यादेर्ज्योतिष्टोमाद्यपूर्वस्य प्रयत्नसाध्यत्वासम्भवाच्च साध्यताबोधकानुमानादिकं द्वितीयस्यार्थः। **अनुस्थितिः**—अनन्तरस्थितिः। प्रमाणा (अनुमाना) पेक्षया पश्चात् स्थितिः—अप्रामाण्यमिति यावत्। केचित्तु अनुस्थितिः—व्यर्थप्रवृत्त्यनुसरणमित्यर्थ इत्याहुः।

साङ्ख्यचार्वाकयो-रित्यत्र चार्वाकग्रहणं दृष्टान्तार्थम्। यथा चार्वाकमते कार्यकारणभावस्य साधनाभावात् प्रवृत्त्यादिवैफल्यं शास्त्रादेरप्रामाण्यं च तथा साङ्ख्यस्यापि स्यादित्यर्थः। **अयोग्यत्वमिति**—प्रत्यक्षायोग्यत्वं तद्योग्यत्वं चेत्यर्थः। **विवक्षितविघातकृदिति**—अनभिव्यक्तस्य कदाचिदभिव्यक्त्यर्थं प्रवृत्त्यासाफल्यसमर्थनभङ्गकृदित्यर्थः। ननु परेषां यस्तिरोधानपदार्थस्तदभावश्च तावेवास्माकमपि स्त इत्यत्राह—**इन्द्रियेति**। **इन्द्रियप्रतिघातः**-इन्द्रियप्रवृत्तिनिरोधः। **अन्यत्र**—अन्येषां पक्षे। **अत्र**—त्वत्पक्षे। **कादाचित्केति**—इन्द्रियप्रवृत्तेर्नित्यत्वे तत्प्रतिघातायोगात् तत्प्रतिघाताङ्गीकारे प्रतिघातस्य नित्यतयाऽनभिव्यक्तस्य कदाचिदभिव्यक्त्ययोगादित्यर्थः।

ननु दन्तिकपित्थादिग्रसनोद्ग्रसनादिवन्मृदादिभिर्घटादेर्ग्रसनोद्ग्रसनादिकं तिरोध्यभिव्यक्तिशब्दार्थौ भवत इत्यत आह—**असम्भवनिरस्तं चेति**। मृत्पिण्डापेक्षयाऽधिकपरिमाणस्य घटादेः मृदादिभिः ग्रसनोद्ग्रसनासम्भवादित्यर्थः। ननु "यथोर्णनाभस्सृजते गृह्णते च' 'ग्रसते च चराचरम्' इत्यादिशास्त्राणां का गतिरित्यत्राह—**शास्त्रमपीति**। तत्राप्यवस्थाविशेषोत्पत्तिलयावादायोपपत्तिरि (पपन्नमि)ति भावः।

नन्वप्राप्तानां जनकत्वे अतिप्रसङ्गात् प्राप्तस्य जनकत्वायोगादकामेनाप्यभिव्यक्तिर्वक्तव्या; दोषाश्च यथाकथंचित्परिहार्या इत्याशङ्क्ते– **प्राप्ताविति । अत एव तव व्यक्ती–त्यन्वयः ।** अभिव्यक्तिं प्राप्याप्राप्य वा करोतीति विकल्पक्षोभस्य समानत्वादित्याह—**इत्यप्ययुक्तमिति ।** ननु भवन्मते प्रकृतिसम्बन्धोऽनादिरित्युच्यते स च कर्मसाध्य इत्यपि; तद्वत् कार्याणां पूर्वसत्त्वेऽपि साध्यत्वमस्त्वित्यत आह—**सत्त्वादिगुणभूयिष्ठेति ।** सत्वरजस्तमोभूयिष्ठभागानामंशानां देहादिरूपेण परिणतानां **अव्यवस्थितेः**—अनियतत्वात् सम्बन्धस्याप्येकत्वाभावेन भिन्नभिन्नत्वात् बीजाङ्कुरन्यायेन पूर्वपूर्वेषां प्रकृतिसम्बन्धानामुत्पत्तिरित्यर्थः ।

नन्वेवमनादित्वोक्तिः कथम् ? इत्यत्राह—**प्रवाहानादिरिति ।** ननु जीवानां ज्ञानं संसारदशायां तिरोहितमितीष्यते । तिरोधानं चास्य तत्प्रागभाव एव । स चानादिः । स च कर्मणेति कर्मकृतत्वं कथम् ? इत्याशङ्क्य प्रवाहानादि(तया) संविद्विकाससङ्कोचरूपसंतन्यमानकादाचित्कावस्थारूपत्वात्प्रागभावस्य कर्मसाध्यता न विरुद्धेत्याह—**सार्वज्ञेति । कर्मिणां**—जीवानां । सूल एव 'शक्तस्य शक्यकरणात्' इत्युक्तहेतुं विशिष्य दूषयतीत्याह—**यस्त्विति ।** प्रतिबन्दिमेवोपपादयति—**यथेति ।** तिलकारणपरम्पराया एव तैलादिरूपशक्तिमत्त्वं न तु सिकतातत्परम्पराया इत्यत्र किं निदानम् ? इति शङ्कायां तथा दर्शनादिति व्यवस्थापनीयं; तथा मृदादीनामेवान्वयव्यतिरेकदर्शनात् घटादिजनकत्वं नान्येषामिति वक्तुं शक्यत्वादित्यर्थः । **दृष्टहानं**—दृष्टयोरन्वयव्यतिरेकयोर्हानम् । **अदृष्टस्य** कार्यगर्भत्वस्य । **अन्येषां**—कारणाद्भिन्नानामित्यर्थः । सिद्धान्तातिक्रमे त्वत्पक्षे शक्तिमत्त्वाविशेषादिदं निमित्तमेव नोपादानमिति व्यवस्था न स्यादिति दूषणे सत्येव दूषणान्तरं वक्तुं विकल्पयति—**सा किमिति ।** दूषयति—**न्यथेति ।** आत्मनो निमित्तत्वं नास्तीत्यत आह **आत्मा खल्वति ।** किञ्च नाशकेषु नाश्यमस्ति नवेति विकल्पमुखेन प्रतिबन्द्यन्तरमाह—**नाशकेष्विति ।** वह्नौ नाशके तथा तूलं विरुद्धं तथा नाशकान्तरेऽपि नाश्यं विरुद्धमित्यर्थः । **कथं तदेवेति**—वह्निरेव तूलस्य नाशकः न जलमिति नियमः कथमित्यर्थः । परापादितातिप्रमङ्गमिहापि दर्शयति—**न ह्यतद्वत्तीति । शुक्ताविति**—अनिर्वचनीयरजतपक्षेऽपि अधिष्ठानतया रजतनाशनिमित्तत्वात् प्राप्तरजतनाशकत्वं दृष्टं नाप्राप्तमिति प्रतिबन्द्यन्तरमित्यर्थः ।

केचित्तु—साङ्ख्यमत एव भ्रमस्थले रजतस्य शुक्तावविद्यमानस्य दोषादिघटितसाम्रग्याऽभिव्यक्तिरिति वक्तव्यम्, अन्यथाख्यात्यङ्गीकारे तस्या नित्यत्वप्रसङ्गेनानिर्मोक्षप्रसङ्गात् । तथाच तस्य भ्रमत्वमधिष्ठानसाक्षात्कारमात्रस्य निवर्त्यत्वात् । निवृत्तिश्च तिरोधानमेव । तथा च प्राप्तनिवर्तकत्वे-शुक्तौ रजतसत्त्व

प्रसङ्गः। तथाऽङ्गीकारे च सर्वं सर्वत्र वर्तेत; सर्वत्र भ्रमसम्भवात्। तथाच अप्राप्तमेव रजतम(मित्य)भिव्यक्तं तिरोहितमिति वाच्यं; तदा शुक्तिरूप्यतत्तुल्यता प्रसजेत्; तथा(एवं) च आपणस्थरजतस्यापि (सत्यरूप्यस्य शुक्तिभावस्यानिवर्तनमिति न्यायेन) शुक्तिरूप्यवन्निवृत्तिस्स्यादित्यर्थः। प्रतिबन्द्यन्तरमाह **दूषणेष्विति**। अनेन सर्वसम्भवाभावादिति विवक्षितहेतुश्च दूषित इत्याह—**प्रतिज्ञाहेतुविरोध इति**। धर्मत्वस्य भेदघटितत्वादिति भावः। **सपक्षेभ्य इति**—तथाच असाधारणानैकान्तिकत्वमिति भावः।

'पटस्तन्तुभ्योऽभिन्नः तदुपादेयत्वात् यदुक्तसाध्यं न तदुक्त साधनं न यथा घटः' इत्यनुमानान्तरं दूषयति—**यदपीति**। अभेदस्तादात्म्यं। **पूर्ववदेवेति**—व्याप्यत्वासिद्ध्यादिदूषणदुष्टमित्यर्थः। दूषणान्तरं च वक्तुं विकल्पयति—**तदुपादेयत्वमिति**। **तत्सम्बन्धित्वं वेति**—संयोगसमवायान्यतरवत्त्वमित्यर्थः। **निमित्तैरिति**—तत्र व्यभिचार इति भावः। **तद्धर्मत्वहेतूक्तेति**—दृष्टान्तासिद्ध्यादिदोषादेरित्यर्थः। **उभयत्र**—विकल्पद्वयेऽपि। हेत्वसिद्धिं परिहरति—**इष्टोऽपीति**। भवता कारणे सत्त्वं हि कार्यस्याङ्गीकृतं! तस्य तद्भेदाभावे तत्र सत्त्वायोगादिति भावः। तथाच अत्रानुमाने भिन्नत्वे सति अभिन्नसत्ताकत्वं तादात्म्यं साध्यमिति ध्येयम्।

असिद्धिमेवोपपादयति—**न हीति**। तत्र हेतुमाह—**समवायस्येति**। **तस्यैव साध्यत्वादिति**—साध्याविशेषो दोष इत्यर्थः। तदुक्तमनुमानान्तरं दूषयति—**यच्चैतदित्यादिना**। **तत्संयोगेति**—तत्संयोगरहितत्वे सति तदप्राप्तिरहितत्वादित्यर्थः। तत्संयोगरहितत्वादित्युक्तौ हिमवद्विन्ध्ययोर्व्यभिचारः। तदप्राप्तिरहितत्वादित्युक्तौ कुण्डवदरयोर्व्यभिचारः इति विशिष्टहेतुः। व्यतिरेकव्याप्तिं दर्शयति—**तादात्म्याभावे हीति**। अप्रयोजकतामाह—**तादात्म्यविरहेऽपीति**। इष्टापत्त्यादिना अवस्थातद्वतोर्भेदस्यैवोपपादनादिति भावः। इतश्च न पटस्तन्तुभ्यो भिद्यते गुरुत्वान्तरकार्यादर्शनादित्यनुमानान्तरं दूषयति—**गुरुत्वान्तरेति**। द्रव्यस्यैव गुरुत्वाश्रयत्वादिति भावः।

ननूत्पत्तिवादिभिरपि अभिव्यक्तिरेव नामान्तरेणाभ्युपगता। अन्यथा पद गताविति शाब्दस्मृतिविरोधः। गतिर्हि ज्ञानमभिव्यक्तिः; अतस्तद्दूषणं स्वमतदूषणमेव स्यादिति शङ्कते—**नन्विति**। परिहरति—**पाठोऽपीति**। धातुपाठोऽपीत्यर्थः। ननु जन्मनोऽभिव्यक्तित्वे निर्वर्त्यं च विकार्यं च प्राप्यं चेति भेदेन कथनमनुपपन्नं स्यादित्याह—**निर्वर्त्येति**।

ननु जनीप्रादुर्भावे इत्यत्र प्रादुर्भावशब्दः कथमित्यत्राह—**अभूतेति**। पूर्वमविद्यमानं यत् तद्भावः तादृशावस्थावत्त्वमित्यर्थः। तथाच असत उत्पत्ति-

स्मृतिबलाल्लक्षणेति भावः। अस्तु वा प्रादुर्भावशब्दो मुख्यः; तथाऽपि तस्यासत्त्वात् असत उत्पत्तिरिति न ते विवक्षितसिद्धिरित्याह—**भवति वेति**। अभिव्यक्तिः किमुपलब्धिरेव उत तद्योग्यत्वं? नाद्य इत्याह—**दृष्टादृष्टदशान्वयादिति**। उत्पत्तिरभिव्यक्तिश्चेत् सोपलब्धिरिति घटस्य यावद्विनाशमभिव्यक्तिमत्त्वात् दृष्टत्वादृष्टत्वरूपदशान्वयो न स्यात्। उत्पत्त्यनन्तरं विद्यमान एव घटः कदाचिद्दृश्यते कदाचिन्न दृश्यते चेति भावः। न द्वितीय इत्याह—**अथेति**। अथेन्द्रियाणामुत्पत्तिरस्ति; तन्न स्यात्; उपलब्धियोग्यत्वरूपाभिव्यक्तेरभावादित्यर्थः। **सत्स्वलक्षणेति**—सतो विद्यमानस्य स्वलक्षणस्य वस्तुस्वरूपस्य पूर्णता अभिव्यक्तिः। सा कारकव्यापाराद्भवतीत्यर्थः। पूर्तिरपि पूर्वमस्ति नवेति विकल्प्य आद्यं दूषयति—**साऽपि प्राक्तनीति**। कारकव्यापारवैयर्थ्यमित्यर्थः द्वितीयं दूषयति—**नो चेदिति**। असतस्सर्वदा असत्त्वात् पूर्तिर्न सिध्येदित्यर्थः। **हेतुरप्यसंन्निति**—कार्यपूर्वसत्त्वसाधकस्सत्स्वलक्षणपूर्तिरूपाभिव्यक्तौ व्यभिचारादसन्नित्यर्थः।

असत उत्पत्तिपक्षे दूषणानां स्वव्यापकत्वाज्जातित्वमित्याह—**किञ्चेति**। **हेतुविरोधं चेति**—सतः कृतकत्वायोगात् कृतकत्वे (वा) प्रागसत्त्वनियमात् असदकरणादिति हेतुविरोध इत्यर्थः। **कार्यव्यक्तौ** कार्यस्याभिव्यक्तौ। **कःप्रद्वेषः**—कृतितुल्यत्वादित्यर्थ तुल्यतामेवोपपादयति—**कृतिरपीति**। कृतिर्हि कृतैव। नचानवस्था; सिद्धानवस्थारूपतया मूलक्षयकरत्वाभावात् बीजाङ्कुरस्थल इव न दोष इति परिहरति—**कृतिर्हीति**। अभिव्यञ्जकव्यापारे त्वयाऽपि दृश्यानवस्था वक्तव्ये (स्थाङ्गीकार्ये) त्याह—**त्वयापीति**।

ननु अभिव्यक्त्युत्पत्तिपक्षयोस्तुल्यत्वेऽभि (त्वादभि) व्यक्तिपक्षे कः प्रद्वेषः? इति चेन्न; अभिव्यक्तिवादिनस्तव सर्वनित्यत्वाङ्गीकारादीदृशावस्थयाऽप्यभिव्यक्तिकादाचित्कत्वादिसमर्थनं दुर्घटं (मत्वा) आगन्त्ववस्थावादिनस्तादृशव्यापाराङ्गीकारात्सुलभमित्युत्पत्तिपक्ष एव श्रेयानिति द्रष्ट (मन्त) व्यम्।

नन्वभिव्यक्तेर्नाभिव्यक्त्यन्तरमपेक्षितं; तथा च नानवस्थेति त्वदुक्तप्रतिबन्धवकशो नेति शङ्कते—**नन्विति**। ननु परस्यापि कारकव्यापारवैयर्थ्यमिति प्रतिबन्दीमाशङ्कते—**नन्विति**। **सत्ता**—सत्ताजातिः। **चर्चा**—विचारः। **अस्मच्छब्देति**—षष्ठीबहुवचनान्तस्य विहितान्वादेशाख्येन नश्शब्देनेत्यर्थः। **अन्यधर्म इति**। कृतिरात्मधर्मः कथ घटधर्मरूपोत्पत्तिस्स्यादित्यर्थः। यद्वा कृतिर्व्यापारः कारकधर्मः। **तादर्थ्येनेति**। ज्ञातो घट इत्यादौ ज्ञातताऽनभ्युपगन्तुर्ज्ञानस्येव घटधर्मत्वमित्यर्थः।

कृतेरुत्पत्तित्वे लोकव्यवहारं प्रमाणयति—**यदा हीति**। **व्याप्रियन्ते**—कृतिविषया भवन्ति। व्यापारावस्थावत्त्वयोरुत्पत्तित्वे भाष्यं प्रमाणयति—**संवेति**।

तदभिप्रायमिति। आद्यक्षणावच्छिन्नाभिप्रायं कृत्यभिप्रायं चेत्यर्थः। एतेन उत्पत्तिर्न तावत् स्वरूपं घट उत्पन्न इति सह प्रयोगानुपपत्तेः इति सांख्योक्तंदूषणं निरस्तमित्याह—**अत एवेति** ननु उत्पत्तिरुत्पद्यते न वा? आद्येऽनवस्था; अन्त्ये उत्पत्तावुत्पत्तिव्यवहारो न स्यादित्यत आह—**नचेदृश्या इति**।

भवतु वा मा वेति। उत्पत्तिशब्दस्योपचारोऽस्तु वा मा वा; प्रागसिद्धस्वरूपत्वादुत्पत्तिः तदर्थं कारकव्यापार इति न वैयर्थ्यमित्यर्थः। **स एवेति**—कारकव्यापार एवोत्पत्तिरित्यर्थः। ननु तर्हि कारकव्यापारस्यैवोत्पत्ति (शब्दार्थ) त्वे कार्यस्यैवोत्पत्त्यर्थं कारकव्यापार इति लोकव्यवहारोऽनुपपन्नः षष्ठ्यर्थाभावादित्यत आह—तदा **कार्यार्थं इति**। अन्यथेति—कार्यस्योत्पत्त्यर्थे व्यवहार इत्यर्थः।

ननु तर्हि कार्यंमुत्पन्नमित्यत्र पौनरुक्त्यप्रसङ्गः? कृतिविषयत्वप्रागसत्त्वरूपलाभाकारेण शब्दबोध्याकारभेदान्न प्रसङ्गः। नन्वभिव्यक्तिवादिनोऽपि क्रियार्थत्वेन कारकव्यापारसार्थक्यमित्याशङ्क्य तद्दूषयति—**क्रियैवेति**। **प्रागिति**। तस्यां—क्रियायां। ननु क्रियाया अपि प्राक्सत्त्वमस्तु क्रियावद्भिः कारकैः पटादेः कार्यस्य प्रधाने—उपादाने भोग्यांशस्य निष्पत्त्या तादृगन्वयस्साध्यसाधनभावान्वयोस्तु; तथा च न कारकव्यापारवैयर्थ्यं भागिनोंऽशिन उपादानस्य भागैरंशैरैक्यात्सर्वभावानां प्राक्सत्त्वमन्योन्यमैक्यं चेति शङ्कते—**क्रियावद्भिरिति**। भेदः प्राक्सन्न वेति विकल्पमभिप्रेत्य आद्यं दूषयति—**भिन्नांशेति**। **नाभिन्नादिति**। भेदस्यापि पूर्वसिद्धत्वान्न कारकैः (कव्यापारसाध्यत्व) सम्भव इत्यर्थः।

नन्वेकमेव वस्तु भिन्नं चाभिन्नं च। तत्र कारकैर्भेदस्याभिव्यक्तिः करिष्यत इति शङ्कते—**भिन्नाभिन्नादीति**। तस्मादभिव्यक्तेरेव प्राक्तन्या न साध्यत्वमिति साऽपि न साध्येति दूषयति—**प्राक्तनीति**। द्वितीयं दूषयति—**एकस्येति**। **अस्मदिष्टवत्**। अस्मदिष्टमस्मिन् वर्तत इत्यर्थः। इष्टयदिति पाठान्तरं। इष्टं करोतीत्यर्थः॥ २४॥

इति साख्योक्तसत्कार्यवादनिरासः

अक्ष०। एतादृशसत्कार्यवादेऽप्यलब्धतृप्तेस्सांख्यस्य नित्यैकान्तवादानुगुणान् प्रयोगाननुवदति— **सन्तीति**। **प्रागपि**। कुलाल तन्तुवायादि कारकव्यापारात्पूर्वमित्यर्थः। **अवस्थाः**—घटत्वपटत्वादयः। **सन्तीति**। यथा द्रव्यस्य प्राक् सत्वं भवन्मते न विरुद्धयते तथाऽवस्थानामपीति। कुत इत्यत्राह—**मदितरेति**। तदस्माभिरिष्यत इति भावः। अनेन पदेन सांख्योक्तहेतुषु प्राथमिकहेतुद्वयानुवादः। यदाहुः—

"असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात् कारण भावाच्च सत्कार्यमिति"॥

तत्र असदकरणादित्यस्य असतः करणादृष्टेरित्यर्थः। नहि शशशृङ्गादिकं किञ्चित्क्रियमाणं दृश्यत इति भावः। अस्यानुवादः सदितरकरणादृष्टेरिति। उपादानग्रहणादित्यस्य उपादानस्य करणस्य ग्रहणात् कार्यसम्बन्धनियमादित्यर्थः। असंबद्धस्य कारणत्वादर्शनेन कार्यसंबद्धस्यैव कारणत्वे सम्बन्धस्य च द्विनिष्ठतया कारण तत्कार्यमपि पूर्वं सदेवेति वक्तुमुचितमिति भावः। अस्यैव व्यतिरेकमुखेनानुवादः **अप्राप्तनिष्पत्यदृष्टेरिति**—असंबद्धेन हेतुना असंबद्धकार्यनिष्पत्यदृष्टेरित्यर्थः। एवं हेतुद्वयमनूद्य तृतीयादिहेतूनप्यन्वाह—**शक्तेति**—शक्तस्य शक्यकरणादित्युक्तहेत्वभिप्रायेण शक्ताशक्तेति वचनं। असतोप्यसंबद्धस्यापि कार्यस्य हेतुशक्तिनियमान्निष्पत्तिस्स्यादित्यस्योत्तरमेतत्। तिलेभ्यस्तैलमुत्पद्यते न सिकताभ्य इत्यत्र तिला एव तैलोपादानशक्ता न सिकता इति वक्तव्यम्। तत्र तिलेषु तैलातिरिक्तशक्त्यदर्शनात्कार्यस्य सूक्ष्मावस्थैव शक्तिरिति सिद्धौ पूर्वमेव कारणे कार्यस्य सत्ता सिद्ध्यतीति भावः। आदिशब्देन कारणभावात् सर्वसम्भवाभावादिति हेतुद्वयग्रहणम्। कारणभावादित्यस्य कार्यस्य कारणात्मकत्वादित्यर्थः। मृदयं घटः इत्यादिव्यवहारादिति भावः। **सर्वसंभवाभावात्**—सर्वेभ्यः सर्वोत्पत्यभावादित्यर्थः। पूर्वोक्तहेतूनामप्रयोजकत्वशङ्कायां प्रसङ्गः विपर्ययाभ्यां प्रतिवचन मिदं सर्वस्मात्सर्वसम्भवस्स्यात् नचासावस्तीति।

उक्तानां पञ्चानामपि हेतूनामाभासत्वाभिप्रायेण प्रत्याह—**नेति**। प्रथमस्य प्रतिक्षेपहेतुः—**कार्यदृष्टेरिति**। पूर्वमसत एव कार्यस्य करणदृष्टेरित्यर्थः। पूर्वं घटो नासीत् इदानीमेव क्रियत इति लोकदृष्टेः प्रथमहेतोरसिद्धिरिति भावः। शेषाणान्तु स्वोचितादिति विशेषितः। कार्यदृष्टेरित्ययमेव प्रतिक्षेपकः स्वोचितादित्यत्र स्वपदं कार्यपरं तत्तत्कार्योचितात्कारकचक्रादित्यर्थः। तत्तत्कार्योचितत्वञ्च तत्तदुत्पादकस्वभावत्वं। तत्तन्नियतपूर्ववृत्तितावच्छेदकधर्मवत्वमेव नतु तदतिरिक्तं सम्बन्धसामान्यं कार्यस्याधारत्वं तादात्म्यं वा एषामभावेऽपि नियतपूर्ववृत्ति मात्रेण कार्यस्य दर्शनादिति भावः।

यदुक्तं कार्यानुकूलशक्तिमत्वमेव कारकत्वं शक्तिश्च कार्यस्य सूक्ष्मावस्थैव अत एव तिलेभ्य एव तैलं न सिकताभ्य इति दर्शनमुपपद्यत इति। तत् प्रतिबन्द्या समाधत्ते—**तस्मिन्निति**। तच्छब्दद्वयेन स्वोचितादित्युक्तस्य परामर्शः। **सत्येवेति**। स्वोचितात्कारकात्। जनिः—स्वस्योत्पत्तिः। स्वोचितकारके सत्येवेत्यर्थः। स्वोत्पत्तौ स्वकारकसद्भाव एवापेक्षितः नतु कारके स्वसद्भावोऽपि। मृत्तन्त्वादिषु घटपटाद्यदर्शनात्—अन्यथा मृत्पिण्डे तन्तु तूलादावपि घटपटादिसत्वप्रसङ्गः। इष्टापत्तौ अदृष्टकल्पने मानाभाव इति भावः। प्रतिबन्द्यन्तराभिप्रायेणाह—**तन्निमित्तादीति**।

भवन्मते निमित्तकारणस्यापि कारकत्वोपगमात्तत्रापि कार्यसत्वप्रसङ्गः—

इष्टापत्तावपसिद्धान्तस्स्यात् । उपादानमात्रे हि वः तत्सत्वाङ्गीकारः । दर्शनानुरोधेन कार्यगर्भत्वाऽभावेऽपि निमित्तादीनां कारकत्वोपगमे तन्न्यायः उपादानेऽपि तुल्य इति भावः । अत्र आदिशब्देन तन्नाशकादि गृह्यते । यथा नाशके नाश्यसद्भावानङ्गीकारेऽपि नाशकत्वव्यवस्था तथा कारके कार्यसद्भावाभावेऽपि कारकत्वव्यवस्था भवत्येव अन्यथा नाशकेऽपि अग्न्यादौ तूलादिसत्वप्रसङ्गेन विरोधो दुर्निवारस्स्यादिति भावः ।

किञ्च पूर्वसिद्धायाः अवस्थायाः अभिव्यक्त्यर्थं कारकव्यापार इति पक्षे अभिव्यक्तेरभिव्यक्त्यर्थं वा उत्पत्त्यर्थं वा कारकव्यापार इति विकल्पे आद्ये दोषमाह—**व्यक्तिरिति**--अभिव्यक्तिरित्यर्थः । **व्यक्तेति**-अभिव्यक्तेत्यर्थः । यदीति शेषः । अनवस्थां भजतीत्यनेनान्वयः । अभिव्यक्तेरभिव्यक्तिरितिकल्पने तुल्यन्यायेन तस्यापि तथेत्यप्रामाणिकाभिव्यक्तिपरम्पराकल्पनायाः विश्रान्तिरेव न स्यादिति भावः ।

उत्पत्तिकल्पन्तु नित्यैकान्तवादभङ्गभिया त्वमेव वक्तुं नार्हसीत्याह—**नचेति**—ननु कार्यं क्रियत इति पक्षेऽपि कार्यस्वरूपातिरिक्तायाः कृतेः किं कृतिरुताभिव्यक्तिरिति विकल्पे कल्पद्वयेऽपि अनवस्था तदवस्था स्यादित्यत्राह—**नैवमिति**—क्रियत इत्यत्र कृतेः कारकव्यापाररूपतया तदौपयिककारकान्तर व्यापारपरम्पराभ्युपगमावश्यम्भावेऽपि वीजाङ्कुरपरम्परावत्प्रामाणिकत्वेन सिद्धानवस्थाया न दोषत्वमितिभावः ।

एवं वा । तस्मिन्सत्येवेत्यत्र तच्छब्दः कार्यपरः । तस्मिन् तैलादिरूपे कार्ये सत्येव । कारण इति शेषः । तिलादिरूपे कारणे । **सत्येव**—विद्यमानएव । **तस्मात्** । स्वोचितात्तिलादिरूपकारणात् । **जनिः**—स्वस्येति शेषः । स्वस्य कार्यस्योत्पत्तिरित्यपि । **नियता**—तन्मात्रनियता नतु मृद्घटादिसर्वकार्यकारणसाधारणीत्यर्थः । ततश्च तत्कार्यजननशक्तिमत्तायाः तत्कार्यवत्वरूपत्वे घटाद्युत्पत्तेः प्रागपि मृदादीनां घटादिकार्यवत्वप्रसङ्गः । नचेष्टापत्तिः उपलम्भविरोधादिति भावः । स्वाभ्युपगमविरोधप्रसंगमपि व्यञ्जयति—**तन्निमित्तेति** । कार्यगर्भतयाऽनभ्युपगतेषु निमित्तकारणादिष्वपि कार्यजननशक्तेरभ्युपगन्तव्यत्वात् कार्यशक्तिमत्वं न कार्यगर्भत्वमिति भावः । आदिना कालादिसाधारणकारणसंग्रहः ॥

एवं कार्यमुत्पद्यत इति सह प्रयोगेन कार्यस्वरूपातिरिक्ताया उत्पत्तेस्सत्तासमवायरूपतया समवायस्य च नित्यत्वेन कारकव्यापारवैयर्थ्यमिति शङ्कायाअपि परिहाराभिप्रायेण नः इत्युक्तम् । सिद्धान्तिना समवायानभ्युपगमेन तदतिरिक्तायाः कृतेराद्यक्षणावच्छिन्नघटत्वाद्यवस्थाया वा उत्पत्तिरूपतया तस्याः अनित्यतया न कारकव्यापारवैयर्थ्यप्रसक्तिरिति भावः ॥ २४ ॥

वस्तुस्थैर्यं विरुद्धानुपहितविषया साधयेत् प्रत्यभिज्ञा
नैकस्मिन् शक्त्यशक्तौ कृतितदितरयोः साह्यभेदे । सिद्धेः ।
एकस्मिन् कालभेदाद्भवति च सहकार्यन्वयानन्वयादि-
र्नोचेन्नो देशभेदादपि सुपरिहरस्तेन नैकं क्वचित्स्यात् ॥ २५ ॥

सर्वा० । अर्धवैनाशिकनिरासाय सत्कार्यवादे साधिते तुल्यन्यायतया सर्वनित्यत्ववादेन समुत्थितः सांख्यो निरस्तः । अथ पक्षत्रयप्रतिपक्षं वैनाशिकमतं निरस्यति—वस्तुस्थैर्यमिति ॥ वस्तुशब्देन सत्त्वानुमानसूचनम् । यथाऽऽहुः—यत्सत् तत्क्षणिकं यथा जलधरः सन्तश्च भावा इति । यदक्षणिकं तदवस्तु यथा खसूनम् । अक्षणिकत्वे चामीषां तद्वदसत्त्वप्रसङ्ग इति भावः । विरुद्धानुपहित-विषयेति— विरुद्धधर्मासंसृष्टविषयेत्यर्थः । दीपस्रोतःप्रभृतिषु अनन्यथासिद्धभेदक-बलात् बाधः । विप्रतिपन्नैकत्वधीः प्रमा विरुद्धधर्मासंसृष्टविषयत्वात् समतैकत्व-धीवत् । न हि स्वलक्षणानां प्रत्येकमेकत्वं नास्ति; तथा सत्येकानेकसर्वविकल्प-लोपेन माध्यमिकविजयप्रसङ्गात् । रूपादिधीवदित्येव वोदाहर्तव्यम् ।

तदियं प्रमितिः सती प्रत्यभिज्ञा पूर्वापरकालवर्तिविषयं साधयति । दीपनदी-प्रवाहकृत्तपुनःप्ररूढकेशादिषु तु संप्रतिपन्नसामग्रीभेदादिबाधकबलात् तस्या न साधकत्वम् । ननु स इति धीः स्मृतिः, अयमित्यनुभवः, निरन्तरोत्पत्तेः ज्वाला-क्षणेष्विव तयोर्भेदाग्रह इति, तन्न; समानाधिकरणबोधात् । यद्यपि सोऽयमिति व्यवहारे तादृशधीभेदेन वैयधिकरण्यशङ्का; तथाऽपि तमिमं पश्यामीत्यादिषु उभयाकारविशिष्टस्यैकस्य दृशिकर्मत्वदृष्टेर्बुद्ध्यैक्यं दुरपह्नवम् । अत एव ग्रहण-स्मरणात्मकमिदं ज्ञानमिति वदन्तः प्रत्युक्ताः ।

ननु कथमिन्द्रियासंबद्धः तदंश इदानीमिन्द्रियेण गृह्येत ? मनोसंबद्धोऽनु-भूतविषयः कथं मनसा ? तदनुभवजन्यसंस्कारसहकारादिति चेत्, समानमत्रापि । दृष्टत्वात् तथैव तत्रेति चेत्, अत्राऽपि तथैव । वेद्याकारैकदेशादुत्पन्नस्य प्रत्यक्षत्वे शुक्तिरजतधीरपि मानं स्यादिति चेन्न; आरोपानारोपाभ्यां विशेषात् । किं च संस्कारोपनीतरजताद्यारोपे च इदं रजतमिति चाक्षुषबुद्धिरेका । न हि तत्र रजता-द्बुद्ध्युत्पत्तिः, तस्यासन्निहितत्वात्; अर्थजत्वेन त्वदुक्ताविसंवादित्वप्रसङ्गाच्च । इन्द्रियजन्यतया प्रत्यक्षत्ववत् संस्कारजन्यतया स्मृतित्वमपि दुर्निवारमिति चेन्न, तमेतमनुभवामि पश्यामीत्यादिप्रत्यक्षविरोधादेव । अत एव संस्कारप्राधान्यमुत्प्रेक्ष्य केवलस्मृतित्वशङ्काऽपि निरस्ता ।

भवतु वा स्मृतित्वमपि; तथाऽपि स्मृत्यनुभवात्मकमेकं ज्ञानं स्वविषयस्य स्थिरत्वं साधयत्येव । कथमप्रमा स्मृतिरर्थं व्यवस्थापयेदिति चेत्; किमत्राप्रमात्वं ज्ञानव्यतिरिक्तत्वं वा ? अनुभवव्यतिरिक्तत्वं वा ? अयथार्थत्वं वा ? नाद्यः,

असिद्धेः। न द्वितीयः, त्रितयप्रकाशवादिभिः स्मृतेरप्यात्मस्वात्मविषयेऽनुभवत्व-स्वीकारात्, त्वया च स्वसंवेदनांशेऽपि। विषयांशेऽनुभवव्यतिरिक्तत्वं स्मृतेरिति चेत्, तथाभूताऽपि स्वकारणानुभवात् स्वविषयमबाधितं व्यवस्थापयेत्। अस्वातन्त्र्यादिविचारस्त्वत्र प्रकृतानुपयुक्तः। न तृतीयः, यथार्थस्मृतौ विरोधाभावात्। सर्वाऽपि स्मृतिरयथार्था अतीतस्य वर्तमानतया अवभासादिति चेन्न; अतीततयाऽपि प्रायशः स्मृतिभिरर्थोल्लेखात्। प्रच्युततदाकारस्य तद्वत्तया भासनादयाथार्थ्यमिति चेन्न; स्मृतिप्रमोषे तदभावात्, अतीतादिविषयानुमानानामपि तत्प्रसङ्गाच्च। तर्हि पाकरक्तेऽपि श्यामत्वधीर्यथार्था स्यादिति च मन्दम्; प्राचीनश्यामताबुद्धौ विरोधाभावात्। एतेन स्मृतिर्न बाह्यविषया नष्टेऽप्यर्थे स्मृतिदर्शनादिति वदन्तोऽपि निरस्ताः।

एवं प्रत्यभिज्ञा स्थिरविषयेति सिद्धे सोऽहमिति धीश्चात्मनः स्थिरत्व-मुल्लेढि। तदहं स्मरामीति स्मृतिमात्रेण चैतत्सिद्धम्। ननु विरुद्धानुपहितविषयेत्यसिद्धम्, कुर्वदकुर्वत्क्षणयोः शक्त्यशक्तिभ्यां वैजात्यादित्यत्राह—**नकस्मिन्निति**। कुर्वतोऽकुर्वतश्चैकत्वेऽङ्गीक्रियमाणेऽपि शक्त्यशक्तिरूपविरुद्धधर्माध्यासो न स्यादित्यर्थः। शक्तश्चेत्कुर्यादेव, न करोति चेदं कुसूलनिहितं बीजमिति प्रसङ्गतद्विपर्ययाभ्यां शक्त्यशक्तिसिद्धिरिति चेन्न; शक्तस्यापि करणाकरणयोः सहकारिसन्निध्यसन्निधिप्रयुक्तत्वात्। तदाह—**कृतिर्तादितरयोरिति**। साह्यं—सहभावः। कदाचित्पुष्कलैः सहकारिभिः साह्यं कदाचिद्विकलैरिति प्रयोजकभेदेनेत्यर्थः। अकुर्वत्स्वभावस्य कथं सहकारिभिरपि कुर्वत्ता, कुर्वत्स्वभावस्य वा कथम्? तद्विरहात्तदभाव इति चेन्न; सहकारिसन्निधौ कुर्वत्तया तदभावे चाकुर्वत्तया स्वभावव्यवस्थासिद्धेः। परसापेक्षः कथं स्वभाव इति चेन्न; स्वहेतुसापेक्षत्ववदुपपत्तेः, अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो विज्ञानोत्पत्तौ कारणमिति युष्मदुक्तिविरोधात्। अयंजत्वं च प्रामाण्यं ब्रूषे। उपच्छन्दनार्थमुत्तानवाक्यमिति चेन्न; अतिप्रसक्त्या सिद्धान्तस्थितेर्दुर्निरूपत्वप्रसङ्गात्। शक्तं चेदन्त्यतन्तुसंयोगादिवदवश्यसिद्धसहकारिचक्रं स्वकार्यं कुर्यादिति चेन्न; स्वकारणादापततां सहकारिणामेतदधीनत्वाभावात्। पराधीनत्वेऽप्यवर्जनीयं तत्सन्निधानमिति चेन्न; अन्यथाऽपि दृष्टेः।

अस्तु सहकारिसंबन्धासंबन्धादिकमेव विरुद्धत्वाद्भेदकमित्यत्राह—**एकस्मिन्निति**। आदिशब्देन प्रस्तुतकरणाकरणादिसंग्रहः। कालभेदाद्विरुद्धस्वीकारे किम्, कुत्र, नासीत्, न स्याद्वेति सर्वत्राव्यवस्थितिरिति चेन्न; दर्शनादर्शननियमाभ्यामेव संभवासंभवस्थितेः। एवमनभ्युपगममनुवदन्प्रतिबन्दिमाह—**नो चेदिति**। अत्रास्ति करोति च, अन्यत्र नास्ति न करोति चेत्यादिनिर्देशभेदेन सत्त्वासत्त्वादिसमुच्चयः सुदुष्परिहरः स्यात्। अपिर्विषयभेदाद्यनुक्तसमुच्चये। विषयादिभेदादपि हि विरोधः परिह्रियते। क्वचिच्छक्तं क्वचिदशक्तं केनचिज्जन्यते व्यज्यते

वाध्यते वा नान्येन, कस्यचित् प्रतियोगी व्याप्यः व्यापकः पूर्वः परो वा नान्यस्येत्यादि। एवं विषयभेदादिभिरपि विरोधस्ते दुष्परिहरः। ततः किमित्यत्राह— तेनेति। विरुद्धानां देशकालाद्यसमाहितविरोधत्वेन स्वलक्षणस्यापि विरुद्धशतक्षुण्णतया नानात्वे तत्क्षोदानां च तथातथा क्षोदे किंचिदप्येकं न सिध्येत्, तदभावे च कुतोऽनेकमिति माध्यमिकमतापातः। सैव तर्हि सुगतमतकाष्ठेति तत्र तिष्ठाम इति चेत्; तन्निष्ठेन त्वयाऽस्मन्मतबाधकानुपन्यासे विवादाभावः। तदुपन्यासे तु तत्रतत्र तद्बाधाबाधविकल्पदौस्थ्यं दुष्परिहरमिति भावः॥ २५॥

आनन्द० सांख्यनिरसनानन्तरमेव वैनाशिकनिरसने संगतिमाह—अर्धवैनाशिकेति। अर्धवैनाशिको—वैशेषिकः। वैनाशिको बौद्धः। विनाशं व्यवहरतीति ठक्।

वस्तुशब्देनेति। तस्य सत्त्व (वस्तु) वाचित्वादिति भावः।

अवस्तु—असदित्यर्थः। विरुद्धेति—कथञ्चिदपि परस्परसामानाधिकरण्यानर्हधर्मा (संसृष्ट) नाश्रयविषयेत्यर्थः। भेदकं—सामग्रीभेदादि। तथा सतीति— स्वलक्षणं किञ्चिदपि एकं वा भिन्नं वा ? भिन्नमपि किञ्चिदेकं वा भिन्नं वा ? इति विकल्पेन स्वलक्षणसर्ववस्तुविलोपप्रसङ्गेन माध्यमिकमतप्रसङ्ग इत्यर्थः। सर्वस्याप्येवं विकल्पे कुत्रापि विश्रमाभावात् स्वलक्षणं विद्यमानस्वरूपमेव यादवमुसलनीत्या न भवेदिति भावः।

ननु तेषां धर्मधर्मिभावाभावात् कथमेकत्वबुद्धिर्दृष्टान्तः ? इत्यत आह— रूपादिधीवदिति। तथा च एकत्वधीः—अभेदधीरित्यर्थः। प्रत्यभिज्ञाया ऐक्यसाधकत्वे अतिप्रसङ्गं परिहरति—नदीप्रवाहेति। सम्प्रतिपन्नेति। तथा च न तुल्यबलत्वमिति भावः। आद्यदीपज्वालोत्पत्तौ अग्निवर्त्यवयवसंयोगो हेतुत्वेन निश्चितः। तथाऽन्त्यवर्तिसंयोगनाशो ज्वालानाशहेतुत्वेनावगतः। ततः प्रतिक्षणं अग्निवर्त्यवयवसंयोगतन्नाशानां भिन्नभिन्नानामुत्पद्यमानानां प्रतिक्षणं ज्वालातन्नाशोत्पादकत्वात् तत्र प्रत्यभिज्ञा बाधिता न साधिकेत्यर्थः। एतेन विप्रतिपन्नैकत्वधीः न प्रमा प्रत्यभिज्ञात्वात् नद्यादिप्रत्यभिज्ञावदिति प्रतिरोधः। तथा पूर्वानुमाने नदीप्रत्यभिज्ञायां व्यभिचारश्च परिहृतः। प्रतिपक्षे बाधितत्वमुपाधिरिति न तुल्यबलता। विरुद्धानुपहितविषयत्वाभावाद्व्यभिचाराभावश्चेति ध्येयम्।

ननु प्रत्यभिज्ञाया ऐक्यसाधकत्वमनुपपन्नं ज्ञानद्वयात्मकत्वेन तस्याः पूर्वापरकालवर्तिवस्तुविषयकत्वस्य प्रत्येकमभावात्। न च तदुभयगोचरज्ञानद्वयादैक्यसिद्धिः; उभयत्रोभयगोचरत्वाभावे तदैक्यगोचरत्वासम्भवादिति शङ्कते— नन्विति। तर्हि बुद्धावैक्यगोचरबुद्धिः कथमित्यत्राह—निरन्तरोत्पत्तेरिति। ज्वालाक्षणेषु—ज्वालारूपवस्तुषु। परिहरति—तन्नेति। ऐक्यरूपसामानाधिकर-

ण्यविषयव्यवहारहेतुबोधस्य बाधकाभावे सामानाधिकरण्यविषयत्वनियमादिति भावः। उभयाकारेति—पूर्वकालिकत्ववर्तमानकालिकत्वविशिष्टस्यैवेत्यर्थः। उभयधर्मविशिष्टस्यैकस्य दृक्कर्मत्वं बुद्धयैक्यमापादय (माक्षिप) तीति भावः। अन्यथा दृशिप्रयोगवत् अधीगर्थप्रयोगोऽपि स्यादित्यर्थः।

केचित्तु दृशिकर्मत्वदृष्टेः—प्रत्यक्षमात्रकर्मत्वस्य द्वितीयाप्रयोगे दर्शनात्। अन्यथा तमित्यत्र अधीगर्थसम्बन्धेन षष्ठीप्रसङ्गादित्याहुः।

ननु स्मृतिकर्मदृक्कर्मभेदाग्रहादुभयकर्मत्वविशिष्टे कर्मत्वव्यवहार इति चेत्; अत्र वदन्ति—बाधकाभावेन भेदाग्रहादैक्यव्यवहारस्य वक्तुमयुक्तत्वात्। न च सत्त्वानुमानं बाधकं; तस्यास्मात्प्रत्यक्षाद्दुर्बलतया बाधितत्वेन स्वरूपालाभादिति।

अत एवेति—ज्ञानस्यैक्ये सिद्धे तस्य च प्रत्यक्षत्वे विरोधिपरोक्षत्वव्याप्यस्य स्मृतित्वस्य प्रत्यक्षे विरोधादिति भावः। वदन्तः—मीमांसकाः। ज्ञानद्वयवादी ग्रहणस्मरणात्मकज्ञानवादी च शङ्कते–नन्वितिवेद्याकारो विषय इत्यर्थः। प्रत्यक्षत्वे—प्रत्यक्षप्रमात्वे। शुक्तिरजतेति—तस्या अपि वेद्याकारैकदेशेदमंशजन्यत्वादिति भावः। अर्थजन्यत्वाभावे किं प्रमात्वं न स्यादिति विवक्षितम्? उत तदैक्यं न स्यादिति? इति विकल्पमभिप्रेत्य आद्यं परिहरति—आरोपेति। अर्थजत्वाभावेऽपि बाधितेतरविषयत्वेन अनुमितिवत् प्रामाण्यसम्भवादिति भावः। द्वितीयं परिहरति—किञ्चेति। यथाच व्यभिचारादर्थजत्वं तदैक्यस्याप्रयोजकमित्यर्थः। तमेतमिति—संस्कारजन्यत्वं स्मृतित्वप्रयोजकं न भवतीत्यर्थः।

नन्विन्द्रियस्येव संस्कारस्य प्राधान्यात् केवलस्मृतित्वमस्तु विनिगमकाभावात् इति शङ्कां बाह्येन्द्रियसन्निकर्षनिरपेक्षसंस्कारजन्यत्वं स्मृतित्वप्रयोजकमिति परिहरति—अतएवेति। उत्तरी (ग) त्या प्रत्यक्षत्वस्य सिद्धत्वादित्यर्थः। स्वसंवेदनांशे—स्वात्मांशे इत्यर्थः; बौद्धैरपि स्वप्रकाशत्वस्वीकारादिति भावः। शङ्कते—विषयांशे इति। तथाभूताऽपीति—अनुभवव्यतिरिक्ताऽपि कारणरूपानुभवमाक्षिप्य तद्द्वारा अबाधितं विषयं साधयतीत्यर्थः। स्वकारणानुभवादितिल्यब्लोपे पञ्चमी। ननु स्मृतित्वेऽस्वातन्त्र्यं न स्यादिति शङ्कां परिहरति—अस्वातन्त्र्येति। स्वातन्त्र्यास्वातन्त्र्ययोरर्थव्यवस्थापनादावनुपयोगादित्यर्थः।

ननु ज्ञानं स्वसमानकालिकत्वेन स्वविषयावभासनस्वभावं। तथाच स्मृतिरपि स्वविषयमतीतदेशकालादिकं वर्तमानतया गृह्णती बाधितविषयत्वादप्रमेति शङ्कते—सर्वापीति। तादृशस्वभावोऽसिद्ध इति परिहरति—नेति। प्रच्युततदाकारस्य—अवगतपूर्वकालादिसम्बन्धस्य। स्मृतिप्रमोषः—तत्तानवगाहिस्मृतिः। यथा ज्ञानद्वयं भ्रम इति पक्षे इदं रजतमित्यत्र रजतस्मृतिः। यदि ज्ञानस्यातीतादिविषयकस्याप्रामाण्यनियमः तदा दोषमाह—अतीतेति। प्राचीनश्यामताबुद्धौ—प्राचीनतया श्यामताबुद्धौ श्यामतामात्रबुद्धौ चेत्यर्थः। बाह्यार्थे स्थैर्यं साधयित्वा

आत्मनोऽपि स्थैर्यं साधयति—एवमिति। कुर्वदकुर्वदिति—कार्यजनने वर्तमान-व्यापारवत्तदभाववद्दण्डादिक्षणयोर्वस्तुनोरित्यर्थः। शक्त्यशक्ती—शक्तितदभावौ।

ननु स्थायित्वपक्षेऽङ्कुरोत्पादकमेव बीजं कुसूलस्थमिति प्रत्यभिज्ञया साधनीयं। तत्र अङ्कुरोत्पादनशक्तिश्चेत् कुर्यादेव; न करोतीति (शक्त्यभावः कुसूलस्थस्य; केदारस्थस्य शक्तत्वं करणादिति) विरुद्धधर्माध्यास इति शङ्कते—शक्तश्चेदिति। शक्तस्यापीति—करणाकरणयोः शक्तितदभावप्रयुक्तत्वाभावान्न शक्त्यशक्तिरूपविरुद्धधर्माध्यासप्रसङ्ग इति भावः। सहशब्दस्य धर्म्यवाचकत्वात् तत्र भवप्रत्यय; कथमित्यत्राह—साह्यमिति। सहशब्दः सहितपरः; तस्य भाव-स्साह्यं। यद्वा त्रैलोक्यादिवत् स्वार्थिकः। तदेवाह—कदाचिदिति। पुष्कलसह-कारिसान्निध्यमपुष्कलसहकारिसान्निध्यं चेत्यर्थः। भेदो—विशेषः।

सहकारिसन्निधाविति—दर्शनादित्यर्थः। स्वहेत्विति—कुर्वत्स्वभाव (स्व) लक्षणस्यापि स्वहेतुपरसापेक्षतया स्वभावत्वाभावप्रसङ्गादिति भावः।

ननु क्षणानां हेतुसापेक्षत्वमेव नास्तीत्यत आह—अधिपतीति—अधिपति-रिन्द्रियं चक्षुरादि। प्रतीयते अनेनेति प्रत्ययः—कारणं। उदितस्य ज्ञानस्य रसादि-साधारण्याद्रू (ण्ये रू) पादिविशेषनियमनादिन्द्रियस्याधिपतित्वं। नियामकस्या-धिपतित्वात्। सहकारी—आलोकादिः। ततो जातस्य ज्ञानस्य स्पष्टता भवति। समनन्तरप्रत्ययः—संस्कारः। तस्मात् प्राचीनज्ञानोद्बोधः। आलम्बनप्रत्ययः—नीलानीलाद्यर्थाकारः प्रत्ययः। ज्ञानपदवेदनीयस्य चित्तस्य समनन्तरप्रत्ययसहिता-दधिपत्यादिविषयनियामकस्पष्टताप्रयोज (जन) कसहितान्नीलाकारज्ञानाच्चि-त्ताख्यं ज्ञानं नीलोऽहमित्याद्याकारसन्ततिं भजत इति चत्वारः प्रत्ययाः, इति बोधि-चित्तविवरणे दर्शनादित्यर्थः प्रामाण्यमिति—प्रामाण्यप्रयोजकमित्यर्थः। उपच्छ-न्दनं—वञ्चनं। उत्तानं—अहृदयं अतिप्रसक्तचेति—त्वदुक्ताविदमुपच्छन्दनार्थ-मुत्तानं इदं नेति निर्णयनियामकाभावात्सन्देहादयं सिद्धान्त इति व्यवस्था न स्यादित्यर्थः।

ननु शक्तस्य सहकारिसम्पत्तिनियमात् अन्त्यतन्तुसंयोगादिवत् स्वकार्यका (क) रणं न स्यादिति शङ्कामनूद्य सहकारिसंपत्तेश्शक्त्यधीनत्वाभावेन तथा नियम एव नास्तीति परिहरति—शक्तं चेदिति अन्यथाऽपि—सहकारिसान्निध्या-भाववत्तयापीत्यर्थः। दर्शनानुसारेण व्याप्तिर्वाच्येति भावः। करणाकरणादीत्यादि-शब्देन शक्त्यशक्त्यादिकं गृह्यते। अव्यवस्थितिरिति—कालभेदेन सर्वं सर्वत्र स्यात् विरोधाभावादिति भावः। तथाच असाधारणधर्मव्यवस्था न सिध्येदिति ध्येयम्।

सम्भवासम्भवौ—इदमत्रासीदिदमत्र भविष्यति इदमत्र नासीदिदमत्र न भविष्यतीति सद्भावासद्भावौ। यदि करणाकरणादीनां कालभेदेन समुच्चयेऽप्य

व्यवस्थादोषः; तदा क्षणेऽपि देशभेदेन सत्त्वासत्त्वकरणाकरणादिसमुच्चयस्य दुष्परिहरत्वात् स दोषस्तवापि स्यादित्याह—अत्रास्ति करोति चेति। विषयादिभेदादपीति—शक्तचशक्तचादीनां त्रिषयादिभेदादपि विरोधाभावेन तत्प्रयुक्तो भेदः परिह्रियते इत्यर्थः। तदेव दर्शयति—क्वचिच्छक्तमिति। दण्डो घटे शक्तः पटोत्पादने शक्तचभाववान् घटः क्वचिदधिकरणे जायते क्वचिद्व्यज्यते क्वचिद्बाध्यते; एवं केनचिज्जन्यते व्यज्यते बाध्यते च नान्येन; तथा कस्यचित्प्रतियोगी कस्यचिद्व्याप्यः कस्यचिद्व्यापकः इति शक्तत्वाशक्तत्वादीनामविरोध इत्यर्थः। आदिशब्देन कुत्रचित्संयोगतदभावादीनां ग्रहः। परः पूर्वं इत्यादौ कस्यचिदित्यस्य तस्मादिति विभक्तिविपरिणामेन कस्माच्चिदित्यन्वयः।

केचित्तु—'अन्यारादितरर्ते' इत्यादिना दिक्छब्दयोगे पञ्चम्याः 'तस्य परमाम्रेडितम्' इति निर्देशेन अनित्यत्वज्ञापनात् कस्यचिदित्यनुषङ्गः। भवत्पक्षे भिन्नविषयकत्वादिभिरपि विरोधपरिहारो न सम्भवति भिन्नविषयकत्वादेरपि विरुद्धत्वादित्याह—एवमिति। विषयभेदो भिन्नविषयत्वं। आदिशब्देन करणभेदादिसंग्रहः। तत्क्षोदानां—क्षणिकस्वलक्षणाद्भिन्नानां भागानां। तथातथा—जन्यत्वाजन्यत्वादिप्रकारेण। तदभावे इति—तथाच वस्तुनः पारमार्थिकत्वे तस्यैव किञ्चित्प्रति कुर्वत्त्वं किञ्चित्प्रत्यकुर्वत्त्वमित्यादि विरुद्धधर्माध्यासस्यावश्यकत्वात्; तादृशस्यासम्भवात् ॥

कुर्वतोऽकुर्वतो नैक्यं सतश्चाप्यसतस्तथा।
अजन्यस्य च जन्यस्य तथाभातमतो मृषा ॥

इति माध्यमिकमतापात इत्यर्थः। सैवेति—माध्यमिकमतमेवेत्यर्थः। शैत्यं ह्रीत्यादिवत् स्त्रीत्वं। तदुपन्यास इति—बाधकोपन्यासे उपन्यस्तं प्रमाणं बाधितं न वा ? आद्ये अस्मन्मतबाधो न स्यात्। द्वितीये बाधस्याबाधितत्वान्माध्यमिकमतं न स्यादिति माध्यमिकमतस्य दुस्थत्वादित्यर्थः ॥ २५ ॥

अक्ष०। वैशेषिकादिमतनिरासाय सत्कार्यवादे बाधिते तुल्यन्यायादवस्थानामपि नित्यत्वं साधनीयमिति प्रत्याशया समुत्थितसांख्यपक्षो निरस्तः। अथ उक्तपक्षत्रयप्रतिपक्षं सर्वानित्यत्ववादि वैनाशिकमतन्निरस्यति वस्तुस्थैर्यमिति। अत्र वस्तुशब्देन परोक्तं सत्वानुमानं सूच्यते-यथोक्तं तैः—

"यत्सत् तत्क्षणिकं" यथा जलधरः सन्तश्च भावा अमी इति। यदक्षणिकं तदवस्तु—यथा खपुष्पमिति व्यतिरेकव्याप्त्या अक्षणिकत्वे अवस्तुत्वमापाद्यते। तस्यानुमानस्य संप्रति सोऽयं घट इत्यादि प्रत्यभिज्ञाप्रत्यक्षेण बाध उच्यते एकस्यैव विषयस्य पूर्वापरकालवृत्तितयाऽवगाहनात्।

दीपज्वालाप्रभृतिष्वीदृशप्रत्यभिज्ञासत्वेऽपि न तावदैक्यमङ्गीकृतमित्यत्राह—विरुद्धानुपहितविषयेति। विरुद्ध धर्मासंसृष्टविषयेत्यर्थः। दीपज्वालादिषु

विभिन्न सामग्री जन्यत्वादि विरुद्ध धर्माध्यासादैक्यस्य बाधेन सा प्रत्यभिज्ञा अप्रमा भवति ततो नैक्यसिद्धिः। इयन्तु प्रत्यभिज्ञा प्रमा—विरुद्धधर्मासंसृष्टविषय(क) त्वात् रूपादिधीवत्—इति प्रमात्वसिद्धौ विषयैक्यं साधयतीति भावः।

अत्र स्मृत्यनुभवात्मकं ज्ञानद्वयमिति पक्षस्य "तमिमं पश्यामी"ति उभयाकारविशिष्टस्यैकस्य दृशि कर्मत्वदृष्टया निरासो भाव्यः। इदानीमिन्द्रियासंबद्धस्याऽपि तत्तांशस्य पूर्वतन–तदनुभवजन्यसंस्कारसहकारादिन्द्रियेण ग्रहणं यथा मनसा तदसंबद्धस्य बाह्यार्थस्येति दर्शनानुरोधादुपगम्यते। संस्कारजन्यत्वेऽपि तमेतमनुभवामि पश्यामी"ति प्रत्यक्ष बुध्युद्बुदयान्न स्मृतित्वप्रसक्तिरिति बोध्यम्।

ननु विरुद्धानुपहितविषयेत्यसिद्धं कुसूलक्षेत्रयोर्वर्तमानस्य बीजस्य अङ्कुरशक्त्यशक्तिरूपविरुद्धधर्मदर्शनादित्यत्राह—नैकस्मिन्निति। क्षेत्रस्थस्य देश भेदेन कुर्वतः अकुर्वतश्च बीजस्यैकत्वेऽपि तत्र शक्त्यशक्तिरूपविरुद्धधर्माध्यासो नास्ति कुसूलस्थतादशायामपि शक्तेरुपगमादिति भावः। शक्तिसत्वे तदानीमप्यङ्कुरादिकरणप्रसक्तिरित्यत्राह—कृतितदितरयोरिति। देशभेदेन अङ्कुरकरणाकरणयोरित्यर्थः। साह्यभेदेनेति। साहृयं सहभावः। पुष्कलैस्सहकारिभिः सहभावे सति करणं विकलैः सहकारिभिस्सहभावे अकरणमिति (भावः) शक्तिसत्वेऽपि करणाकरणयोस्सहकारिसम्बन्धासम्वन्धाभ्यामेव सिद्धिरिति भावः।

तर्हि सहकारि सम्बन्धासम्वन्धादिकमेव विरुद्धत्वाद्भेदकमस्तु इत्यत्राह—एकस्मिन्निति। अन्वयानन्वयादिः। सम्वन्धासम्वन्धादिः। आदिशब्देन प्रकृत करणाकरणसंग्रहः। कालभेदादिति। कालभेदेन विरुद्धसमावेशो न भेदक इति भावः। एवमनभ्युपगमे प्रतिवन्दीमाह—नोचेदित्यादिना।

कालभेदेनाऽपि विरुद्धसमावेशो नैकत्र स्यादिति चेत् तर्हि—देशभेदेनाऽपि सचैकत्र न संभवत्येवेति वक्तव्यम्—स तु दुष्परिहरः, नह्येकत्र क्षेत्रे अङ्कुरमुत्पादयन्बीजव्यक्तिविशेषः क्षेत्रान्तरेऽपि अङ्कुरमुत्पादयति तथा सर्वत्रैकैकत्र बीजविशेषे क्षेत्रभेदेन करणाकरणयोस्समावेशस्समापतन् कथं परिहर्तुं शक्यः।

एवं विषयभेदादपि दुष्परिहरत्वं अपिशब्देन सूच्यते। कलमबीजं कलमाङ्कुरमेवोत्पादयति - नतु कोद्रवाङ्कुरमिति भिन्नविषयकरणाकरणयोरेकत्र दुर्निवारत्वात्। ततः किमित्यत्राह—तेनेति। देशकालादिभेदेनाप्यसमाधेयविरोधानां करणाकरण सत्वासत्वादीनामेकैकत्र स्वलक्षणे दुष्परिहरत्वेन न किञ्चिदप्येकमनिर्भिन्नं वस्तु सिद्ध्येदितिभावः॥ २५॥

तत्त्वेदं हि कालान्तरघटनमये नैककाले घटेतां
कालद्वं तेऽनवस्थाद्यत इह न मितिः प्रत्यभिज्ञेति चेन्न।
स्वस्य स्वाभावकाले विहतिनियमनात्स्वेन चात्रैककाल्यात्
काले कालानपेक्षे कथमपि सुवचौ नानवस्थाविरोधौ॥ २६॥

सर्वा०—पुनरपि प्रकारान्तरेण प्रत्यभिज्ञाबाधकं विरुद्धधर्माध्यासं प्रतिबन्दिविशेषमप्याशङ्कते – तत्त्वेदंत्वे हीति ।। अतीतकालसम्बन्धस्तत्त्वम्, वर्तमानकालसम्बन्ध इदंत्वम्, न ह्यतीतं वर्तत इति सम्भवति सर्वेषां नित्यत्वप्रसङ्गात्; वर्तमानं च यद्यतीतं कथमस्मदादिप्रत्यक्षेण गृह्येत ? किं च कालद्वयान्वयरूपयोः तत्त्वेदन्त्वयोरेकवस्तुसम्बन्ध एकस्मिन्काले भिन्ने वा ? पूर्वत्र विरोधः; तस्मिन्नेतस्मिंस्तदुभयपूर्वापरे वा क्वचिदपि काले कालान्तरसंभेदायोगात्, अन्यथा त्रैकाल्ययौगपद्यप्रसङ्गात् । एतेन विरुद्धानुपहितविषयेति विशेषणं चासिद्धम् । उत्तरत्र कालद्वयनिर्वाहककालभेदाश्रयणे तयोरपि तथेत्यनवस्थापातः; न चैवं दृष्टमिष्टं वा । न च देशद्वयप्रतिबन्दिः, अस्माभिस्तदनभ्युपगमात् । तस्मात्कालद्वयविशिष्टे वस्तुनि प्रवृत्ता कृत्स्ना प्रत्यभिज्ञा न प्रमितिः विरुद्धविषयत्वात् शुक्तिरूप्यधीवत्, प्रत्यभिज्ञात्वादेव वा दीपादिप्रत्यभिज्ञावदिति चेत्, अत्र न कालद्वयंमात्र वस्तुनि विरुद्धं, विरुद्धकालान्वयस्तु नास्तीत्यभिप्रायेण प्रतिवक्ति—नेति ।

अतत्तामनिदन्तां च तत्त्वेदन्त्वे निरस्यतः ।
अन्योन्यप्रतिषेधस्तु न ततः सेद्धुमर्हति ।।

एकस्य भिन्नकालाभ्यां वैशिष्ट्यं विहतं यदि ।
तथा स्याद्भिन्नदेशाभ्यां पुञ्जबुद्धिस्ततो न ते ।।

तर्हि कालद्वयविरोधः कुत्रेत्यत्राह—स्वस्येति । नियमनात्—यथाप्रमाणं व्यवस्थापनादित्यर्थः । अत एवातीतस्य वर्तमानत्वं वर्तमानस्य वाऽतीतत्वमिह न प्रवर्तनीयम् । ननु तत्त्वेदन्त्वे तावत् विरुद्धे, अन्यथा यौगपद्ये विरोधाभावप्रसङ्गात्, तत एव कालद्वयमप्येकस्य विरुद्धमिति तत्राह—स्वेनेति । पूर्वापरकालयोगो हि विरुद्धः । स्वेनोपाधिनाऽवच्छिन्नस्यैकस्य कालस्यावान्तरोपाधिभिर्नानात्वेऽपि तत्तदुपाधीनामेव तत्तदवान्तरकालद्वयान्वयविरोधः । अन्यापेक्षया पूर्वापरकालयोरन्यस्य विरुद्धत्वे क्षणकालस्याप्यन्यापेक्षया पौर्वापर्यात्तत्कालवर्तित्वमपि वस्तुनो विरुध्येत । क्षणकालसम्बन्धो वस्तुनः काल्पनिक इति चेत्, ततोऽपि माध्यमिकोत्थानम् ।

ननु स्वरूपसत्यता क्षणसम्बन्धित्वं च साध्यते । न केवलं क्षणकालमात्रसंबन्धित्वम् । अतस्तुर्यबौद्धात् त्रयाणां विशेष इति । तर्हि सिद्धसाधनम् । अतः क्षणिकपक्षे स्थिरपक्षे वा स्वाभावकाले वृत्तिविरोधाद्वारणीया न तु स्वकालवृत्तिरिति भावः । अत्र च विरोधानवस्थयोः शङ्काऽपि नास्तीत्याह—काल इति । न ह्ययमपि काल एतस्मिन्काले किमुत कालान्तरम् ? तत्कालोऽपि न तस्मिन्काले किमुतायम् ? अत एतत्कालतत्कालौ वा कालान्तरं वाऽनपेक्ष्य एकस्मिन्वस्तुनि कालद्वयं संबध्यत इति स्थिते कथंचिदप्यनवस्थाविरोधयोर्नावकाशः । तथाऽपि कालद्वयं परस्पराभावनान्तरीयकं तदात्मकं वा कथमेकत्र स्यादिति चेन्न; कालद्वय-

स्थान्योन्यस्मिन्नभावेऽपि तदुभयसंबन्धिनि वस्तुन्यभावाभावात् । यस्तु तस्मिन्वस्तुन्यसंबद्धः कालः तस्य तत्र सद्भावं न ब्रूमः । न हि वयं नित्यानित्यविभागं निराकुर्मः ॥ २६ ॥

आनन्द०—ननु पूर्वमेव प्रत्यभिज्ञायां विरुद्धधर्माध्यासदोषमाशङ्क्य परिहृतत्वात् उत्तरपद्ये पुनस्तदेवोच्यत इति पौनरुक्त्यमित्यत आह—**पुनरपीति** । पूर्वशेषत्वान्न पृथक्संगतिरिति भावः । **वर्तमानं चेति**—वर्तमानस्य तत्ताश्रय (यातीतादि) भिन्नत्वेन संप्रतिपन्नवदिन्द्रियसम्बन्धाभावादिति भावः । **तस्मिन्**—अतीतकाले । **एतस्मिन्**—वर्तमानकाले । **तदुभयपूर्वापरे**—अतीतवर्तमानकालात्पूर्वापरयोरित्यर्थः । **पूर्वश्चापरश्च**—**पूर्वापरं**; एकवद्भावः । क्वचिदपि काले तदन्यकालसम्बन्धस्यासम्भवादिति भावः **त्रैकाल्येति**—भूतभविष्यद्वर्तमानकालानामित्यर्थः । समाहारद्विगोः स्वार्थे ष्यञ् त्रैलोक्यमितिवत् । **उत्तरत्रेति**—भिन्नकाले वेति द्वितीयपक्षे । **तयोरपि**—निर्वाहककालयोरपि कालभेदमादाय सम्बन्धइत्यनवस्थेत्यर्थः । **कालद्वयमात्रं**—कालद्वयसम्बन्धमात्रं ।

ननु तत्तेदन्तयोरन्योन्यप्रतिक्षेपकत्वात् कथमेकत्रेत्यत्राह—**अतत्तामिति** । तत्ता स्वाभावं इदन्ता च स्वाभावं तत्तेदन्ते च प्रतिक्षिपत इत्यर्थः । **ततः**—तस्मात् । तत्तेदन्तयोः प्रतिक्षेपकत्वं **सेढुं** (सोढुं) भवितुं नार्हतीत्यर्थः । **तथा स्यादिति**—नन्वस्माभिर्देशद्वयसम्बन्धानङ्गीकारान्न प्रतिबन्दिरित्युक्तमिति चेत्; किं तदा देशानभ्युपगमात् ? तत्सत्वेऽपि तत्सम्बन्धानभ्युपगमाद्वा ? उभयथाऽपि पुञ्जबुद्धिर्न स्यात् । नानादेशस्थानामेकदेशसम्बन्धः पुञ्ज इति भावः । **न प्रवर्तनीयं**—न प्रसञ्जनीयं । **अन्यथेति**—विरुद्धयो रूपरसयोर्यौगपद्यदर्शनादिति भावः । **तत एवेति**—तत्तेदन्तयोर्विरोधात्तद्घटकीभूतकालद्वयमप्येकस्य विरुद्धमित्यर्थः । **क्षणकालस्येति**—अविशेषादिति भावः । **ततोऽपीति**—क्षणकालसम्बन्धाभावे कालासम्बन्धिनो वस्तुनः कदाऽप्यभावाच्च शशशृङ्गवदिति भावः । **स्वरूपसत्यतेति**—स्वरूपसत्यत्वसाधनात्तत्क्षणसम्बन्धस्य काल्पनिकत्वेऽपि तुर्याद्भेद इति भावः । स्वरूपसत्यत्वस्य सिद्धत्वात् क्षणमात्रसम्बन्धस्य (काल्पनिकत्वे वस्तुतः) मिथ्यात्वाच्च क्षणिकत्वाभा (वात्) वेन सिद्धसाधनमित्यर्थः । **एतस्मिन्निति** । न वर्तत इति शेषः । **किमुतेति**—अयमेव काल एतस्मिन् न वर्तते चेत् भूतकालादौ तद्वृत्तिताशङ्का दूरे इत्यर्थः । **परस्पराभावनान्तरीयकमिति**—परस्पराभावव्याप्तमित्यर्थः । **कालद्वयस्येति**—परस्पराभावनान्तरीयकत्वे परस्पराभावरूपत्वेऽपि वा कालिकविरोधितया नैकस्मिन् काले तद्द्वयं सम्बध्नाति । एकस्मिन् वस्तुनि सम्बन्धे न विरोध इत्यर्थः । नन्वेवं सति सर्वकालानां वस्तुसम्बन्धे विरोधाभावात् सर्वं वस्तु सर्वकालसम्बन्धीति सर्वं नित्यं स्यात् । तथा च नित्यानित्यविभागो न स्यादित्यत्राह—**यस्त्विति** । न हि वयं तत्रासम्बद्धकालसम्बन्धमपि ब्रूमः ! येन नित्यानित्यविभागं निराकुर्म इत्यर्थः ॥ २६ ॥

अक्ष०। पुनरपि प्रकारान्तरेण प्रत्यभिज्ञायाः बाधं शङ्कते—तत्त्वेदन्त्वे इति। कालान्तरघटनमये इति। विभिन्न काल सम्बन्धरूपे इत्यर्थः। अतीतकाल-संबन्धः तत्त्वं वर्तमानकालसंबन्ध इदन्त्वं, इति हि निर्वक्तव्यमिति भावः। एवंरूपे तत्त्वेदन्त्वे नैकस्मिन् वस्तुनि सम्भवेतां(म्) नह्यतीतं वर्तत इति संभवति—सर्व-नित्यत्वप्रसङ्गात्।

किञ्च तस्मिन्नस्मिन्वा—तदुभयपूर्वापरे वा कस्मिन्नप्येकस्मिन् काले कालान्तरसंबन्धाभावेन विरोधात्तदवच्छेदेन कालद्वयसंबन्धः नोपपादयितुं शक्य इत्याह—नैककाल इति। कालभेदेनोपपाद्यत इत्यत्राह—कालद्वैत इति। कालद्वयसम्बन्ध-निर्वाहककालयुगलावलम्बन इत्यर्थः। अनवस्थादीति। निर्वाहककालयोरपि एकत्र सम्बन्धार्थं निर्वाहकान्तरकल्पने अनवस्था अन्यथा विरोध एवेत्यर्थः। एवं विरुद्धविषयत्वादुक्तप्रत्यभिज्ञा दीपप्रत्यभिज्ञावद्वस्तुस्थैर्ये न प्रमाणमित्याह—अत इति।

अत्र कालद्वयसम्बन्धमात्रं न वस्तुनि विरुद्ध मित्याशयेन प्रत्याह—नेति। तर्हि कालद्वयविरोधः कुत्रेत्यत्राह—स्वस्येति। स्वाभावाधिकरण काल एव स्वस्य सम्बन्धोविरुद्ध इति प्रमाणतो व्यवस्थापनादित्यर्थः। स्वाधिकरणकाल स्वाभावा-धिकरणकालोभयसम्बन्धवत्ता एकत्र विरुद्धेत्युक्तं भवति। अत्र अतीतकाल इत्युक्तः स्वाभावकालः किं न स्यादित्यत्राह—स्वेनेति। स्वाधिकरण पक्षमासादि स्थूलकाल एक एवात्रातीतकाल इत्युच्यते नतु स्वाभावकालः स्वाधिकरणस्थूल-कालस्य स्वाभावानधिकरणत्वेऽपि स्वावान्तर दिन क्षणादि कालमात्रवृत्तिवस्तु प्रागभावाधिकरणतयाऽतीतत्वसंभवादिति भावः।

एवं स्वाभावकाले वृत्तिरेव विरुद्धा नतु स्वकालेऽपीत्युक्त्या तत्त्वेदन्त्वयोः विरोधाभावात् विरोधपरिहाराय कालभेदापेक्षाऽभावात्पूर्वपक्षोक्तरीत्या अनव-स्थाविरोधयोश्शङ्काऽपि न स्यादित्याह—काल इति। कालानपेक्षे इति। विरोध-स्यैवाऽभावेन अविरोधनिर्वाहक कालान्तरापेक्षाया अभावेनेत्यर्थः। अतो विरुद्ध-विषयकत्वाऽभावात्प्रत्यभिज्ञायाः प्रामाण्यं दुरपह्नवमिति भावः॥ २६॥

प्रत्यक्षं वर्तमानं प्रथयति यदिहावर्तमानाद्विभक्तं
तस्मात्तेनैव सिद्धं क्षणिकमिति न सत्तावदित्यप्रतीतेः।
तत्कालासत्त्वमेव ह्युपनयति सतो वर्तमानत्वबोधः
कालेऽन्यत्रापि सत्त्वं प्रमितमिति कथं तद्विरोधप्रसङ्गः॥ २७॥

सर्वा०—अथ प्रत्यक्षेणैव प्रत्यभिज्ञाप्रत्यक्षस्य विरोधं भावानां क्षणिकत्व-सिद्धिं च शङ्कते—प्रत्यक्षमिति॥ अस्मदादिप्रत्यक्षं तावद्वर्तमानमात्रविषयमिति सर्वसंमतम्। अन्यथा दृश्यमानानां पदार्थानां तत्क्षणापेक्षया पूर्वापरविशेषाणामपि

प्रत्यक्षत्वप्रसङ्गात्। तस्मादगृहीतपूर्वापरविशेषं वर्तमानग्राहि प्रत्यक्षमवर्तमानाव्यावृत्तमेव स्वविषयं गृह्णाति। एतदेव च क्षणिकत्वं वस्तूनां यदपूर्वोत्तरत्वम्। अतस्संस्कारनिरपेक्षप्रत्यक्षबाधिता प्रत्यभिज्ञा देशान्तरस्थग्राहिशुक्तिरूप्यधीवत् संस्कारोपनीतकालान्तरस्थभेदसंवृत्त्या तस्मिन्निदन्त्वमस्मिन्वा तत्त्वमारोप्य कल्पितैक्यविषयेति। अत्र प्रत्यक्षवृत्तान्तानभिज्ञोक्तिरियमित्यभिप्रायेण प्रतिवक्ति— न सदिति। प्रत्यक्षस्य कालान्तरसंबन्धप्रतिक्षेपकत्वाभावमाह— तावदिति। वर्तमानत्वविधिरेवावर्तमानत्वनिषेधात्मा तावन्मात्रकालवर्तित्वं नियच्छदित्यत्राह —तत्कालेति। तत्कालसत्त्वविधिर्हि तदानीमसत्तां निरुन्ध्यात्, न तु कालान्तरसत्तामित्यर्थः। तथाऽपि इदंकारवता प्रत्यक्षेण कालान्तरसत्त्वस्यानालम्बनात् तत्प्रतिक्षेप इति चेत्तत्राह— कालेऽन्यत्रापीति।

अयं भावः—यथेदमिति तत्कालसत्ता गृह्यते, तथा तदिदमिति कालद्वयसत्त्वमपि प्रत्क्षणैव गृहीतम्। एवं सति न्यूनाधिकविषयतामात्रमिह प्रत्यक्षयोर्न विरुद्धविषयत्वम्; अन्यथाऽतिप्रसङ्गादिति। अल्पविषयस्य प्राबल्यमालम्भविधौ दृष्टमिति; चेन्न विरोधे सत्येव बलाबलविमर्शात्। इह तु विरोध एव न समस्ति। अपि च प्रत्यक्षं किं वर्तमानत्वेन स्वविषयं गृह्णाति, उत वस्तुवृत्त्या वर्तमानम्? नाद्यः; त्वन्मते प्रत्यक्षतयाऽभिमतस्य निर्विकल्पकस्य वि[कल्प]शिष्टबोधनाशक्तेः, सविकल्पकस्य तु प्रत्यक्षत्वानभ्युपगमात्। न द्वितीयः, इन्द्रियसंयुक्तक्षणस्य तज्जन्यज्ञानकालेऽतीतत्वात्, तदुत्तरक्षणस्य स्वपूर्वक्षणेन्द्रियसंप्रयोगायोगेन तज्जन्यधीविषयत्वासंभवात्; तदातनाक्षिसंप्रयोगस्य तु तात्कालिकबुद्धिहेतुत्वासिद्धेः। अतस्ते कथं प्रत्यक्षं वर्तमानग्राहि? अस्मन्मते त्विन्द्रियसंप्रयोगस्य तद्विशिष्टवस्तुनस्तदुपहितकलांशस्य च स्थायित्वेन धीक्षणानुवृत्तौ तद्विषयतया प्रत्यक्षोदयात्। संप्रयोगानन्तरक्षणे धीरपि निर्वर्त्यते। अतो नासंप्रयुक्तं नास्थिरं नावर्तमानं वा प्रत्यक्षमिति।

पूर्वापरबहुव्यक्तिव्याप्तिग्रहणसंभवा ।
न काचिदपि युक्तिः स्यात् सर्वक्षणिकवादिनः ॥ २७ ॥

आनन्द०। पूर्वसंगतिमभिप्रेत्याह—अथेति। प्रत्यभिज्ञाप्रत्यक्षविरोधं–प्रत्यभिज्ञा (या) बाधमित्यर्थः। पूर्वापरेति—तत्क्षणापेक्षया पूर्वापरकालिकरूपादि (कत्वादि रूप) विशेषाणामित्यर्थः। अवर्तमानाव्यावृत्तं—वर्तमानाभिन्नं। एतदेव चेति—एतत्क्षणकालवर्तिनः पूर्वापरक्षणवर्तिभिन्नत्वे तत्क्षणमात्रावृत्तित्वमि (त्तित्वमे) त्यर्थः अपूर्वोत्तरत्वं—पूर्वोत्तरकालावर्तित्वं तत्क्षणमात्रवृत्तित्वमिति यावत्। संस्कारनिरपेक्षेति—संस्कारसापेक्षप्रत्यभिज्ञातो बलवदिदन्त्वमात्रग्राहिप्रत्यक्षमित्यर्थः।

ननु भिन्नत्वे पूर्वापरयोः कथं वर्तमानाद्भेदधीरित्यत्राह—देशान्तरस्थेति।

यथा देशान्तरस्थस्मृत्युपनीतरूपतद्भे (रजतभे) दसंवृत्या शुक्तौ तदैक्यधीः तथेदंवस्तुनि तस्मिन् वा स्मृत्युपनीते भेदज्ञानप्रतिबन्धकदोषेणाभेदधीरित्यर्थः। प्रत्यक्षवृत्तान्तानभिज्ञतां दर्शयतीत्याह—प्रत्यक्षेति। अवर्तमानत्वनिषेधात्मा—कालान्तरसत्त्वनिषेधात्मा। तत्कालेति—वर्तमानकालसम्बन्धो न कालान्तरसम्बन्धाभाव इति भावः। तथा च सोऽपि तत्काले असंबन्धं निरुन्ध्यात् न तु तस्य कालान्तरसम्बन्धमन्यकाले निरुन्ध्यादित्यर्थः। तथाऽपीति—साधकाभावादिति भावः।

ननु प्रत्यभिज्ञायाः प्रामाण्यसंदेहात् अन्यस्य च साधकस्याभावात् कथं प्रमितत्वमित्यत्राह—अयं भाव इति। इदमिति वर्तमानत्वात्प्रत्यक्षत्वबाधात् प्रत्यभिज्ञाया अप्रामाण्यं वाच्यं। तत्रेदमिति प्रत्यक्षस्य विरोधिविषयत्वाद्बाधकत्वं उत न्यूनविषयत्वाद्वा ? इति विकल्पमभिप्रेत्य आद्ये आह—यथेदमिति। द्वितीय आह—अन्यथेति। विरोधिविषयत्वाभावेऽपि न्यूनाधिकविषयतामात्रेण बाध्यबाधकभावे घटप्रत्यक्षात् घटपटसमूहालम्बनबाधप्रसङ्गादित्यर्थः। विरोधे सत्येवेति—यद्यपि न हिंस्यादग्नीषोमीयवाक्ययोर्वैयर्थ्यपरिहारायान्यतरसंकोचे (कोचरूपबाधे) कर्तव्ये सामान्यस्य (अधिकविषयस्य) संकोचो युक्तः। उभयसाफल्यसिद्धेः; रजतभ्रमस्य न्यूनविषयस्याप्यधिकविषयशुक्तित्वनीलपृष्ठत्वरजतत्वाभावाद्यनेकविषयेणापि बाधदर्शनात् बाध्यबाधकभावे न न्यूनाधिकविषयत्वादि प्रयोजकं; तथाऽपि तदभ्युपगम्यैतदु (प्रौढवादेनो) क्तमिति द्रष्टव्यं।

किञ्च वर्तमानविषयकतया क्षणिकत्वप्रत्यभिज्ञाबाधश्च त्वन्मतानुसारेण ? उत अस्मन्मतानुसारेण इति विकल्पाभिप्रायेणाह—अपिचेति। यद्वा वर्तमानज्ञानस्य (भूतादिविषय) प्रत्यभिज्ञाबाधकत्वं वर्तमानत्वरूपविरुद्धधर्मविषयत्वेन उत स्वरूपविषयत्वेन ? इति विकल्प्य दूषयति—अपिचेति। आद्येऽपि किं निर्विकल्पकं सविकल्पकं वा ? इति विकल्पमभिप्रेत्य आद्यं दूषयति—त्वन्मते इति। प्रत्यक्षतयाऽभिमतस्य—प्रमाणतयाऽभिमतस्य। द्वितीयं दूषयति—सविकल्पकस्येति। तथा च अप्रमाणत्वान्न तेन प्रत्यभिज्ञाबाध इत्यर्थः।

यद्यपि प्रत्यभिज्ञा प्रमाणं तन्मते; तथाऽपि विनिगमकाभावात् प्रत्यक्षतः क्षणिकत्वसिद्धिवत् स्थायित्वमपि सिध्यतीति भावः। वर्तमानविषयत्वमिन्द्रियसम्प्रयुक्तक्षणविषयतया उत तदुत्तरक्षणविषयतया ? इति विकल्पमभिप्रेत्य आद्यं दूषयति—इन्द्रियसम्प्रयुक्तेति। क्षणिकवादिनो ज्ञानोत्पत्तिकाले तस्याभावादिति भावः। द्वितीयं दूषयति—तदुत्तरक्षणस्येति। प्रत्यक्षस्य सन्निकृष्टार्थगोचरत्वादिति भावः। तदात (नोन्त) नेति—पौर्वापर्याभावादिति भावः। आद्यद्वितीये आह—अस्मन्मते त्विति। पूर्वापरेति—पौर्वकालिकीनामापरकालिकीनां व्यक्तीनां क्षणिकवादिमते ग्राहकः कर्ता नैकोऽस्ति। तस्मात्तद्ग्रहापेक्षो व्याप्तिग्रहः तन्मूलश्च तर्कोऽनुमानं च न सम्भवतीत्यर्थः॥ २७॥

अक्ष० अथ प्रत्यक्षबाधात्प्रत्यभिज्ञाया अप्रामाण्यं तत एव च भावानां क्षणिकत्व-सिद्धिश्च शङ्कतेप्रत्यक्षमिति। वर्तमानमात्रग्राहीति सम्प्रतिपन्नमित्याह—वर्तमान-मिति—वर्तमानग्राहित्वेऽपि न तन्मात्रग्राहित्वं संप्रतिपन्नमित्यत्राह—यदिहेति। यतः अवर्तमानाद्विलक्षणमेव वर्तमानं गृह्णाति-अन्यथा पूर्वापरक्षणकालीन रूपादि विशेषाणामपि ग्रहणप्रसङ्गात्, अतो वर्तमानमात्रग्राहीति भावः। ततःकिमिति-चेदाह—तस्मादिति। क्षणिकत्वं सिद्धयति एतदेवहि क्षणिकत्वं वस्तूनां यदपूर्वोत्त रत्वम्। संस्कारनिरपेक्षप्रत्यक्षविरुद्धायाः संस्कारोपनीतदेशकालान्तरस्थग्राहि प्रत्यभिज्ञायाः शुक्तिरूप्यादिधीवत् भेदाग्रहादारोपात्मकत्वेन न प्रामाण्यमिति भावः। तदेतन्निराकरोति—इति न सदिति। कुत इत्यत्राह—तावदिति। प्रत्यक्षेण वर्तमानकाल सम्बन्धग्रहणेऽपि अवर्तमानकालसम्बन्धनिषेधाप्रतीतेरिति भावः।

तर्हि वर्तमानत्वावगाहिना प्रत्यक्षेण किन्तावद्व्यावर्त्यंत इत्यत्राह—तत्कालासत्वमिति—तत्कालसम्बन्धविधिस्तत्कालासम्बन्धस्यैव विरोधी, नतु कालान्तरसम्बन्धस्याऽपीति भावः। तथाऽपि अयमिति प्रत्यक्षे तत्कालसम्बन्ध-भानेऽपि कालान्तर सम्बन्धस्य भाने प्रमाणाभावादेव तत्प्रतिषेधसिद्धिरित्यत्राह—काल इति। प्रमितमिति। सोऽयमिति प्रत्यभिज्ञायामिति भावः। एककालाव लम्बिप्रत्यक्षस्य कालद्वयावलम्बिप्रत्यभिज्ञायाश्चपरस्परविरोधाभावेन पूर्वोक्त-बलाबलविचारस्याऽत्राऽनवकाश इति ध्येयम्। अत एवाल्पविषयस्य प्राबल्यमाल-म्भविधौ दृष्टमित्यपि प्रत्युक्तम्।

उत्पन्नानां विनाशे ध्रुवभवितृतया हेत्वपेक्षाविहीने
जन्मन्येवोपरोधात्क्षणिकमिह जगत्सर्वमित्यप्यसारम्।
लिङ्गं ह्येष्यत्वमात्रं जननविधुरता तत्क्षणानुक्षणत्वे
तत्त्वं तज्जन्यता वा तदिदमनियमासिद्धिबाधाविदूष्यम्॥ २८॥

सर्वा०—ननु * जातस्य हि ध्रुवो मृत्युरिति प्रसिद्धम्। अतस्सतां सत्तानुबन्धी विनाशः स्वरूपवन्न हेतुसापेक्षः झटित्येवापतेत्। तस्मात् सर्वं क्षणिकमित्यनूद्य परिहरति—उत्पन्नानामिति॥ असारं—न्याय्यादन्यदित्यर्थः। तत्र हेतुं विकल्प-यति—लिङ्गमिति। एवं विकल्पिते यथासंभवं दोषानाह—तदिदमिति।

तथा हि। तत्राद्ये तावद्यत् यस्य ध्रुवं भविष्यति न तत्तस्य हेतुसापेक्षं, नाशश्च जातानां ध्रुवभावीत्युक्तं स्यात्। तदा कस्यचिदङ्कुरस्य सामग्रीप्रवाह-वशात् ध्रुवं भविष्यद्भिः पत्रपुष्पादिभिर्घटादीनां कपालादिभिरप्यनैकान्त्यम्, सर्वत्र चैकसन्तानोत्तरक्षणैः। नहि ते तन्निरपेक्षाः; तथा सति प्रागेवोपनिपाते कथं तत्र सन्तानत्वमपि? पूर्वक्षणानामर्थक्रियाविरहात् असत्त्वं च स्यात् [इति ?] चार्वाकवादः।

द्वितीये तु यद्यस्यानुत्पन्नमनुबन्धि न तद्धेत्वपेक्षम्, यथा गोरश्वापोह इति

स्यात्। तथा च हेत्वसिद्धिः प्रतियोगिवत्स्वोचितहेतुजन्यत्वात्। मुद्गरादयोऽपि सभागसन्तानमात्रारम्भकाः, नतु नाशजनका इति चेन्नः दीपादिसन्ताना [नाम]-न्तिमध्वंसकेषु तदसिद्धेः। न हि तत्र विभक्तसूक्ष्मावस्थान्तरापत्तिमिच्छसि; अन्वयव्यतिरेकाविशेषे व्यवस्थापकाभावात्। निस्वभावतया तुच्छस्य हेत्वपेक्षाविरहो व्यवस्थापक इति चेन्न; प्रतियोगिवदेव नियतकालतया प्रमितस्यात्यन्ततच्छत्वायोगात्, खपुष्पवच्चानादित्वप्रसङ्गेन सर्वभावासिद्धिप्रसङ्गात्। ध्वंसस्य च तुच्छत्वे तत्कालेऽपि स्वकाल इव भावानां सत्त्वप्रसङ्गाच्च। तथा च क्षणभङ्गं प्रतिज्ञाय स्थिरवादं साधयसि। कीदृशं च ध्वंसस्य निस्स्वभावत्वम्? यदि यत्किंचित्स्वभावविरहः, तत्स्वलक्षणेऽपि समानम्। सर्वस्वभावविरहस्तु ध्वंसेऽप्यसिद्धः। अन्यथा कथमस्य पक्षीकारः? ध्वंसरूपतया सिद्धस्येति चेत्, तर्हि तत्स्वभावस्य कथं सर्वस्वभावविरहः? अपि चास्य प्रागसत्त्वे हेत्वपेक्षा दुर्वारा; प्राक्सत्त्वे तु भावापह्नवः। तत एवाभावस्याप्यभाव इति सर्वाभावः स्यात्।

तृतीये च स एव क्षणो यस्य स तत्क्षणः तस्य भावस्तत्क्षणत्वं तदा ध्रुवभावि सहभावीत्यर्थः। अयमपि हेतुरसिद्ध एव। न च प्रध्वंसप्रतियोगिनोर्यौगपद्यसंभवः, संभवे वा भावः पश्चादपि किं न स्यात्? अनुक्षणशब्दोपचरितस्तु हेतुरनन्तरक्षणवर्तित्वम्, तत्रापि भावोत्पत्त्यपेक्षयाऽऽनन्तर्यविवक्षायामसिद्धिः। भावस्वरूपापेक्षया त्वानन्तर्यनियमे भाव एव हेतुः स्यादिति कथं हेतुनैरपेक्ष्यम्? तदतिरिक्तनैरपेक्ष्यं विवक्षितमिति चेन्न; तद्वदेव सहकारिणामप्यवर्जनीयत्वादिति। पञ्चमे त्वसिद्धिर्व्याघातश्च।

ननु कथं ध्रुवभाविशब्देन तत्त्वविवक्षा शङ्क्यते? इत्थम्—यद्यतो भिद्यते न तत्तस्य ध्वंसः, यथा रूपस्य रसः। ध्वंसस्तु कस्यचिदेव भवतीति तदात्मकः। अतः स्वोत्पत्तावेव स्वात्मनि ध्वंसे सन्निहिते कथं क्षणान्तरं प्राप्नुयादिति।

तत्रेदं ब्रूमः—ततो भिन्नस्यापि तत्प्रध्वंसत्वं यथादर्शनं स्यात्। अन्यथा भिन्नस्य भिन्नकालस्य च कारणत्वादिकमपि हीयेत; अविशेषात्। स्वात्मन एव स्वनाशात्मकत्वे पश्चादिव स्वकालेऽपि स्वाभावसिद्धेः। स एव सर्वापह्नवस्स्यादिति। तज्जन्यत्वे हेतौ प्रतिज्ञाविरोधः। तज्जन्यत्वं हि तद्धेतुकत्वम्; तेन कथं हेतुनैरपेक्ष्यसाधनम्? हेत्वन्तरनैरपेक्ष्यमपि च दुर्वचमित्युक्तम्। अतः क्रमभाविसहकारिविशेषात् कार्यान्तरमिव स्वनाशमपि स्वयमुत्पादयतु नाम। न ततः क्षणिकत्वं सिध्येदिति। बाधश्चामीषां प्रागुक्तप्रत्यभिज्ञया स्पष्टः। आदिशब्दः प्रदर्शितयोरपसिद्धान्तप्रतिज्ञाविरोधयोः संग्रहार्थः॥ २८॥

आनन्द० पूर्वशेषतया न पृथक्संगतिरित्यभिप्रायेणाह—नन्विति। केचिदाक्षेपसंगतिमाह नन्वितीत्याहुः। मृत्युः—विनाशः। जननं—सत्ता। तथा च विनाशः भावानामुत्पत्तिक्षणानन्तरभावी अहेतुकत्वे सति भावानामवश्यम्भावित्वात्।

य (द्य)दहेतुकत्वे सति यस्यावश्यम्भावि तत्तदनन्तरक्षणभावि यथा घटस्यान्यापोह इति प्रयोगे हेत्वसिद्धिशङ्कापरिहाराय ध्वंसो (भावस्य) हेतुनिरपेक्षः तस्य ध्रुवभावित्वात् अपोहवदिति प्रयोगो द्रष्टव्यः। झटित्येव—उत्पत्त्यनन्तरमेव।

मूलस्यायमर्थः—उत्पन्नानां भावानां विनाशस्य ध्रुवभवितृतया हेत्वपेक्षारहितत्वात् जन्मन्येवोपरोधात्सम्बन्धात् सर्वं जगत् क्षणिकमिति। तत्र किं ध्रुवभवितृत्वम् ? इति विकल्पयती (विकल्पपरत्वयभिप्रे) त्याह—तत्रेति। एष्यत्त्वमवश्यम्भावित्वमात्रं। जननविधुरता –उत्पत्त्यभावः। तत्क्षणत्वं—भावकालत्वं। अनन्तरक्षणवर्तित्वमनुक्षणत्वं। तत्त्वं–प्रतियोगिस्वरूपत्वं। तज्जन्यत्वं–प्रतियोगिजन्यत्वं। ध्रुवभवितृ (ध्रुवभावित्व) शब्देन एतेषां लाभो यथा सम्भवति तथोत्तरत्र स्वयमेव दर्शयिष्यति। तेषां समुच्चित्य प्रत्येकम (प्रत्येकं प्राप्तच) भावादाह—यथासंभवमिति। तत्र क्रमेण दूषणानि वक्तुं प्रतिजानीते— तथाहीति। अनियमो—व्याप्त्यभावः। असिद्धिः हेत्वसिद्धिः। बाधः—साध्याभावनिश्चयः। कस्यचिदिति –व्यभिचारेण व्याप्त्यभावादित्यर्थः। सर्वत्रचेति—तत्तदुत्तरक्षणानां ध्रुवभावित्वात् पूर्वपूर्वक्षणहेतुकत्वाच्चेति भावः।

क्षणः-स्वलक्षणं वस्तु। तथासतीति-तथाच सर्वेषामेकक्षणोत्पत्तिसमय एव विनिगम (का) नाभावेनोत्पत्तौ पूर्वापरभावापन्नसंतानसिद्धिर्न स्यादित्यर्थः। असत्त्वं च स्यादिति—उत्तरोत्तरेषां क्षणानां पूर्वपूर्वजन्यत्वाभावेन अर्थक्रियाकारित्वाभावादिति भावः। चार्वाकवादः निर्हे (अहे) तुक (त्वं।) त्ववादः। द्वितीयेत्विति—जननविधुरतेत्यस्मिन् पक्षे इत्यर्थः। हेत्वसिद्धिमेवोपपादयति–प्रतियोगिवदिति। स्वोचितहेतवो मुद्गरादयः। असि(द्धि परिहरति) द्धिपरिहारं शङ्कते—मुग्दरादय इति। सभागः—विभक्तावयवः। तथाच मुद्गरा (दण्डा) द्यन्वयव्यतिरेकयोरन्यार्थत्वात् ध्वंसस्य न तज्जन्यत्वमिति भावः।

दीपेति—तत्रा (न्यथासिद्धेः) न्यार्थत्वस्य वक्तुमशक्यतया ध्वंसस्य तज्जन्यत्वासम्भवादित्यर्थः। तत्राप्यन्यथासिद्धिमाशङ्क्य परिहरति – नहीति। तत्र प्रमाणाभावादिति भावः। अन्वयव्यतिरेकाविशेषेऽपि व्यवस्थापकं शङ्कते—निस्स्वभावतयेति। तत्र किं स्व (य) मेव भावः स्वभाव इति स्वरूपं विवक्षितं ? आहोस्वित् स्वस्य भावः स्वभाव इति धर्मो वा ? इति विकल्पमभिप्रेत्य आद्यं दूषयति—प्रतियोगिवदिति। अत्यन्ततुच्छत्वायोगादिति—शशशृङ्ग (ङ्गादि)वत् निस्स्वरूप (निस्स्वरस) त्वासम्भवादित्यर्थः। खपुष्पवदिति—ध्वंसप्रतियोगिनोर्विरोधादुत्तरकालमिव पूर्वमपि भावानां सत्त्वं न स्यादिति; तथाच माध्यमिकमतापात इति भावः॥

ननु तुच्छत्वान्न प्रतियोगिविरोध इत्यत आह—ध्वंसस्य चेति। द्वितीये दूषणमाह—कीदृशं चेति। तर्हीति -तद्ध्वंसत्वस्यैव स्वभावत्वादित्यर्थः। अस्येति—

ध्वंसस्येत्यर्थः। भावापह्नव इति—ध्वंसकाले प्रतियोगिनोऽसम्भवादिति भावः। तत एवेति—यत एव प्रतियोगिनोऽभावः ततः प्रतियोग्यप्रसिद्धया भावोऽपि न स्यादिति माध्यमिकमतप्रसङ्ग इति भावः। न (ह्री) चेति—विरोधादिति भावः। सम्भवे (वे) चेति—विरोधाभावादिति भावः। उपचरितस्त्विति—अनुशब्दस्य 'प्रादयो गताद्यर्थे' इति अनुयातः क्षण इति समासे कालवाचि (त्वात्) त्वेन बहुव्रीहिसमासे चान्यपदार्थलक्ष(णकतया) कत्वात् तत्स्थवाचि (त्वमुपचारेणेत्यर्थः) त्वाभावात् तेनोपचरितो लक्षित इति भावः।

भाव एवेति—अनन्यथासिद्धनियतपूर्ववृत्तित्वादिति भावः। कथमिति—तथाच बाध इति भावः। तद्वदेवेति—प्रतियोगिन इव मुद्गरादेरप्यन्वयव्यतिरेकसत्त्वादिति भावः। पञ्चम इति—ध्वंसप्रतियोगिनोरैक्यानभ्युपगमात् भावाभावयोः परस्परविरोधिनोरैक्यस्य विरुद्धत्वादित्यर्थः। अन्यथा भावस्सर्वदा स्यान्न स्याद्वेति न क्षणिकत्वसिद्धिरिति भावः। नन्वस्याः कोटेरुत्थितिरेव न सम्भवति; शब्दस्य तद्वोधनासामर्थ्यात्। तथाच असम्भवद्विकल्पदोषः। तथा भावानां सहेतुकत्वात् तद्(भेदे अ) हेतुकत्वं वा कथं ? ततः क्षणिकत्वं वा कथं सिध्येत् ? इति शङ्कामाशङ्क्य परिहरति—नन्वित्यादिना। अन्यथेति—पूर्वक्षणानामप्युत्तरक्षणहेतुत्वं न स्यादित्यर्थः। प्रतिज्ञाविरोध इति—हेतुसाध्ययो (साध्येनहेतो) विरुद्धत्वादित्यर्थः।

यद्वा प्रतिज्ञावाक्यस्य हेतुवाक्येन विरुद्धत्वादित्यर्थः। विरोधपरिहारमाशङ्क्य परिहरति—हेत्वन्तरेति। तद्वदेव सहकारिणामित्यर्थः। ननु सहकारिसापेक्षत्वेऽप्युत्पत्त्यनन्तरमेव ध्वंससम्भवात् क्षणिकत्वं स्यादित्यत्राह—क्रमभावीति। ध्वंसजनने सहकारिणामाद्यक्षण एव भावित्वमित्यत्र नियामकाभावात्; यदा कदाचित्सहकारिलाभे प्रतियोगिनो ध्वंसजनकत्वेऽपि न क्षणिकत्वसिद्धिरित्यर्थः॥ २८॥

अक्ष० अथ "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य चे"ति प्रसिद्धया जातानां सतां विनाशस्य हेतुनिरपेक्षत्वसिद्धया अनन्तरक्षण एव नाशसम्भवात्क्षणिकत्वसिद्धिरित्यनूद्य परिहरति-उत्पन्नानामिति उत्पन्नानां भावानां विनाशो हेतुनिरपेक्षः ध्रुवभावित्वादिति प्रयोग इह दर्शितः। ततः किमित्यत्राह जन्मनीति। उत्पत्तावेव उत्पत्त्यनन्तरमेवेत्यर्थः। उपरोधात्—विनाशात्। हेत्वपेक्षाविरहादिति भावः। क्षणिकमिति। द्वितीयक्षण एव विनाशेन—"सर्वं जगत् क्षणिक" मिति सिद्धयतीति भावः।

प्रयोगोऽयमाभास इत्याह—असारमिति। आभासतामुपपादयितुं लिङ्गं विकल्पयति—लिङ्गमिति। ध्रुवत्वमात्रम्—अवश्यम्भावित्वमात्रम्। जननविधुरता अनुत्पन्नत्वं। तत्क्षणानुक्षणत्वे प्रतियोगिपरोऽत्रतच्छब्दः प्रतियोगिकालवृत्तित्व प्रतियोग्यनन्तरकालवृत्तित्वे इत्यर्थः। तत्वं-प्रतियोगिस्वरूपत्वं तज्जन्यता—

प्रतियोगिजन्यता। एवं ध्रुवभावित्वरूपहेतुं षोडा विकल्प्य तत्र यथासम्भवं दोषानाह—तदिदमिति। तत्राद्ये कस्यचिदङ्कुरस्य सामग्री प्रवाहवशात् ध्रुवं भविष्यति पत्र पुष्पादिभिः अनियमः—व्यभिचारः। तत्र हेतुसत्वेऽपि साध्याभावात्। द्वितीये घटादिनाशे मुद्गरादिजन्ये अनुत्पन्नत्वरूपहेतोरभावादसिद्धिः। तृतीयेऽपि प्रतियोगिध्वंसयोः यौगपद्यासम्भवादसिद्धिरेव। चतुर्थे प्रतियोग्यनन्तर कालनियमोपगमे प्रतियोगिन एव नियत पूर्ववृत्तितया हेतुत्वात् साध्यबाधः। पञ्चमे व्याघातः—प्रतियोगि ध्वंसयोरैक्यायोगात्। षष्ठे तु प्रतिज्ञाविरोधः—प्रतियोगिजन्यत्वे निर्हेतुकत्वायोगात् दोषोऽयमादिशब्देन जिघृक्षित;। इत्यादिदोषसद्भावादुक्तप्रयोगस्य आभासत्वान्न क्षणिकत्व सिद्धिरिति भावः।

कालानन्तर्यसाम्ये क्षणिकवपुषि ते देशकालाद्युपाधौ
सर्वे पूर्वे भवेयुस्तदनुपरि भवतां कारणानि क्षणानाम्।
सन्तानैक्यव्यवस्था निजफलनियतिर्वासनानां च न स्यात्
कार्पासे रक्ततादिक्रमविपरिणमत्संस्कृतद्रव्यतस्स्यात्॥ २९॥

सर्वा० प्रतिकूलतर्कप्रतिहतिमप्याह—कालानन्तर्येति॥ आदिशब्देन दिक्संग्रहः। अयमर्थः—सर्वं क्षणिकमिति वदतस्ते कस्यचित्किञ्चित्प्रति कार्यत्वं किमनन्तरकालभावित्वमात्रात्? उत तद्विशेषात्? आद्ये त्रैलोक्योदरवर्तिनः पूर्वक्षणास्सर्वे तदनन्तरभाविनां सर्वेषां क्षणानां कारणानि स्युः। द्वितीयेऽप्यसौ विशेषः किं देशाद्युपाधिनिरपेक्षः? तत्सापेक्षो वा? नाद्यः, अतीन्द्रियस्य तु तस्यादर्शनात्, दृश्यस्य तु वह्निधूमत्वादेरतिप्रसङ्गित्वात्। न द्वितीयः, यस्मिन्देशादौ यद्वर्तते तस्मिन् जायमानस्य तत्कारणमिति नियमो न संभवति। कार्यक्षणस्य कारणदेशादिवर्तित्वे कारणदेशादेः क्षणद्वयापत्तेः; तथा चानन्तरक्षणयोगेऽपि को बाधः? अतः स्थिरदेशादिकमनभ्युपगच्छतस्तत्प्रयुक्तनियमायोगात् अतिप्रसङ्गस्तदवस्थ एव।

ननु यद्देशादिक्षणवर्ती कारणक्षणः तत्कार्यदेशादिक्षणे स्वकार्यमारभत इति नियम इति चेन्न; देशादिक्षणद्वयेऽपि कार्यकारणव्यवस्थाया दुः[स्थ] साधत्वात्। तदेतदभिप्रेत्याह—सन्तानैक्यव्यवस्था न स्यादिति। यदप्याहुः—

* यस्मिन्नेव हि सन्तान आहिता कर्मवासना।
फलं तत्रैव बध्नाति कार्पासे रक्तता यथा॥ इति।

कर्मवासनेत्यनुभववासनाया उपलक्षणम्। तदपि दूषयति—निजफलनियतिर्वासनानां न स्यादिति। सन्तानैक्ये सिद्धे हि यस्मिन् तस्मिन्निति निर्देशः स्यादिति भावः। दृष्टान्तस्तर्हि कथमित्यत्राह—कार्पास इति। रञ्जकद्रव्यविशेषसंस्कृतबीजावयवानुवृत्त्या कार्यस्रोतोविशेषनियमे यथादर्शनं तत्र तादृशफलसिद्धिर्युक्ता। त्वन्मते तु तदेतत् संततिव्यवस्थापकाभावात्, तत्रैव फलं बध्नातीति दुश्शको नियम इति भावः॥ २९॥

आ०-पूर्वशेषत्वान्न पृथकसंगतिरित्यभिप्रायेणाह-प्रतिकूलेति ननु क्षणिकत्वपक्षेऽपि वीचीतरङ्गन्यायेन शब्दसंतानानामिव व्यवस्थापककार्यकारणभावस्स्यात् इत्यंत आह—अयमर्थ इति । देशाद्युपाधिनिरपेक्षः—तदघटितः कारणकार्यधर्म इत्यर्थः। तत्सापेक्षः—एकदेश एव पूर्वापरकालवर्तित्व(त्वादि)रूपः। तस्येति—विशेषस्य कार्यकारणयोरदर्शनादित्यर्थः। अतिप्रसङ्गित्वादिति—तेन रूपेण पूर्वक्षणापेक्षया पूर्वापरभावित्वादित्यर्थः। तदिति—तद्देशे तत्पूर्ववर्तीत्यर्थः। क्षणद्वयापत्तेः—कार्यकारणद्वयाधिकरणक्षणद्वयकालवर्तित्वापत्तेरित्यर्थः। तथाचेति—

एतावन्तं स्थितं कालं कः पश्चान्नाशयिष्यति ।

इति न्यायादिति भावः। ननु कार्यकारणयोरेकदेशवर्तित्वं मास्तु; अपि तु एकदेशसन्तानवर्तित्वं; तथा च नातिप्रसङ्ग इति शङ्कते—नन्विति। देशादीति—तथाच पूर्वदेशलक्षणस्य (स्व) पश्चाद्भाविसर्वदेशक्षणसन्तानजनकत्वात् सर्वे सर्व-(स्यापि)स्य सन्ताना इति पूर्वव(र्वत) देतद्देशसन्तानैक्यनियमो नास्तीति भावः।

ननु क्षणिकत्वपक्षे पाकेषुविक्षेपादौ वासनाश्रयस्य नाशादुत्तरो(नाशात्तदु) त्तरक्षणेषु विक्लृत्तिदेशान्तरगमनहेतुक्रिया न स्यादित्याशङ्क्य सन्तानैक्यान्न दोष इति सिद्धान्तदीपिकोक्तमनुवदति—यदप्याहुरिति। कर्मवासना—वेगादि-संस्कारः। यदा पाकादिक्रियाशक्तिः तत्रैव तण्डुलादिसन्ताने विक्लृत्यादिक्रियां जनयतीत्यर्थः। रञ्जकद्रव्येति—स्थिरवादे कार्पाससन्तानव्यवस्थासम्भवाद्युज्यते; क्षणिकवादे तन्नियमो न स्यादिति दृष्टान्तासिद्धेश्चेति भावः ॥ २९ ॥

अक्ष० अथ क्षणिकत्वबाधनस्य प्रतितर्कपराहतिमाह—कालानन्तर्येति। सर्वेषामपिकार्याणां पूर्वक्षणानन्तर्यस्य समानत्व इत्यर्थः। ते—क्षणिकत्ववादिनस्तव। देशकालाद्युपाधाविति। क्षणिक—'वपुषि—क्षणिकस्वरूपइत्यर्थः। तथासति अनिष्टप्रसङ्गमाह—सर्व इति—त्रिलोकान्तर्गतास्सर्वे। पूर्वे—क्षणाः—तदुपरीति—तदनन्तरभाविनां सर्वेषामपि क्षणानां। कारणानिस्युरित्यर्थः। घटादिरूपपूर्वक्षणानां विसदृशपटादिरूपोत्तरक्षणं प्रत्यपि कारणत्वापत्तिरिति यावत् नचैवमिष्यते।

नच देशाद्यैक्यान्नियमस्सुवचः क्षणिकवादे देशकालदिशामपि क्षणिकत्वोपगमेन क्रमिककार्यं कारण उभयाधिकरणदेशाद्यभावेन तद्देशादि वृत्तिपूर्वक्षणस्य तद्देशादिवृत्युत्तरक्षणरूपकार्यं प्रत्येव कारणत्वमिति व्यवस्थापनायोगादिति भावः। एवं विसदृशकार्योत्पत्तिप्रसंगे दुर्निवारे सन्तानैक्यस्य दुर्वचतया—

"यस्मिनेव हि सन्ताने आहिता कर्मवासना।
फलं तत्रैव बध्नाति कार्पासे रक्तता यथा" ॥ इति।

त्वदीयोक्तमपि न घटत इत्याह—सन्तानेति। विसदृशोत्पादे सन्तानैक्यव्यवस्था

न स्यात्—तदभावे च वासनानां वेगापूर्वाद्यात्मककर्मवासनानां अनुभवाधीन-संस्कारात्मकवासनानाञ्च। निजफलनियतिः तत्फलव्यवस्थासु एकसन्तान एव पतनस्मरणादिफलनियतिश्च न स्यादित्यर्थः। दृष्टान्ते तर्हि कथमित्यत्राह—कार्पास इति। स्थिरवादे रञ्जकजपादिद्रव्यसंस्कृतकार्पासबीजावयवानामेव कार्पासरूपेण परिणामाद्रागसंक्रम उपपद्येत क्षणिकवादे तु रञ्जकद्रव्यसंस्कृतद्रव्यस्य तत्सन्तानस्य वा स्थितेरभावेन तत्रैव फलं बध्नातीति नियमस्य दुर्वचतया दृष्टान्तस्यैवासिद्धिरिति भावः।

मेयत्वाद्यैर्विगीतं क्षणिकमिह जगत्स्यात्क्षणोपाधिवच्चेद्
बाधो दृष्टान्तहानिः स्थिर इति विदितो यत्क्षणस्याप्युपाधिः ॥
सामग्री कार्यशून्या क्षण इयमपि तद्धेतुसंघो न चासौ
हेतुर्नान्यः स्थिरास्ते क्रमवदुपधिवत्स्यात्क्षणत्वं स्थिरेऽपि ॥३०॥

क्षणभङ्गसाधानान्तरं दूषयितुमनुवक्ति—मेयत्वाद्यैरिति ॥ इह— पक्षदृष्टान्तविकल्पार्हे वस्तुजाते; विगीतं क्षणिकं मेयत्वात् सत्त्वात् भासमानत्वाद्वा। अत्र स्यादित्यनेनाक्षणिकतायामसत्त्वप्रसङ्गः सूच्यते। अर्थक्रियाकारित्वं हि सत्त्वम्; तच्च कुर्वत्क्षणस्यैवास्ति। अकुर्वत्क्षणस्य तु तदभावादसत्त्वं प्राप्तमिति, घटजलधरादौ दृष्टान्तिते साध्यवैकल्यं क्रमेण कथंचित्परिहर्तव्यम्। इह तु तथेत्यभिप्रायेण क्षणोपाधिवचनम्। इति रौचित्यादाकृष्टव्यः। अत्र बाधोक्तिस्साध्यविकल्पेन बहुधा भाव्या।

तथा हि क्षणिकत्वं नाम क्षणसंभवत्त्वं वा, क्षणकालसंबन्धित्वं वा, क्षणमात्रवर्तित्वं वा, क्षणद्वयसंबन्धशून्यत्वं वा, क्षणकालत्वं वा, तदुपाधित्वं वा? नाद्यः, सिद्धसाधनात्, स्थिरमपि नस्सामग्र्या क्षणे संभवतीति। न द्वितीयः, तत एव। कालमेवानिच्छतस्ते कोऽसौ क्षणकालः? कश्च तत्संबन्धः? तदभ्युपगमे सिद्धान्तबाधः। अत एव न तृतीयोऽपि; प्रत्यभिज्ञया च बाधः प्रागुक्तः। न चतुर्थः, उक्तबाधादेव; क्षणेतरस्य तथात्वे खपुष्पवदसत्त्वप्रसङ्गस्य दुर्वारत्वात्। त्वन्मते च खपुष्पनिदर्शनेन प्रसञ्जनं युक्तम्। एवमपि हि ब्रूथ—

* तस्माद्वैधर्म्यदृष्टान्ते नेष्टोऽवश्यमिहाश्रयः।
तदभावे च तन्नेति वचनादेव तद्गतेः ॥ इति।

अन्येऽपि केचिदाहुः—

* यस्मिन्ननित्यता नास्ति कार्यताऽपि न विद्यते।
तस्मिन्यथा खपुष्पादाविति शक्यं हि भाषितुम् ॥ इति।

न पञ्चमः, तद्देशतद्वर्तिनोरिव कालतद्वर्तिनोरैक्यस्य प्रत्यक्षेण बाधात्। तत एव न षष्ठः; यदा हि घटादयः स्वरूपेण क्षणोपाधयः स्युः कालतारतम्यधीः

कुत्रापि न भवेत् । तथा च स्थिरशङ्काया एवानुदयात् निर्विषयमनुमानं स्यात् । सर्वस्य च त्रिलोकस्य स्वप्रयोजनेच्छया हि प्रवृत्तिः । सा फलार्थिनः फलिनश्च भेदे बाध्यते ।

न च त्वमपि कृत्येषु निरन्वयविनाशवत् ।
मत्सन्तानसमृद्धयर्थमिति मत्वा प्रवर्तसे ॥

तदिह स्वाभिप्रायादिबाधश्च । आत्मदृष्टान्तेन च प्रत्युमानबाधः । तत्र साध्यवैकल्यं च घटादीन्निदर्शयद्भिः युष्मामिरिव क्रमात्प्रशमनीयम् । अस्ति च सोऽहमिति प्रत्यभिज्ञयाऽस्माकं तत्सिद्धिः । आलयविज्ञानसन्ततिविषयेयमिति चेत्, इदमपि परिभाषामात्रम्, प्रमाणाभावात् । *नान्यदृष्टं स्मरत्यन्य इति परिभाषाया निर्बाधित्वाच्च । निरर्थकं चेदमालयविज्ञानसन्ततिकल्पनम्; तस्य प्रवृत्तिविज्ञानेन सह सर्वप्रकारसंबन्धायोगादिति । अथ क्षणोपाधिवदित्युक्तं प्रतिवक्ति—दृष्टान्तहानिरिति । अक्षणिकत्वे कथं क्षणोपाधिरित्यत्र गूढाभिप्राय आह—सामग्रीति । कार्यशून्या—कार्यंप्रागभावसमन्वितेत्यर्थः । क्षणः—क्षणोपाधिरिति यावत् । तयाऽपि तस्य क्षणिकत्वं न प्रतिक्षिप्तमित्याह—इयमपीति ।

ननु हेतूनां संघोऽपि हेत्वनतिरिक्तश्चेत् तेषां भवत्पक्षे स्थिरत्वान्न क्षणोपाधित्वम् । अतिरिक्तोऽप्यक्षणिकः क्षणोपाधिर्न स्यादित्यत्राह—न चेति । अयं भावः—संघशब्दो न संबन्धमात्रवाचकः, संबन्धशब्दपर्यायित्वाप्रसिद्धेः । न च तत्तत्संबन्धिस्वरूपवाचकः, प्रत्येकमप्रयोगात् । अतः केनचिदुपाधिना संगृहीतास्त एव संघशब्दार्थः । तत्र यदि त एव क्षणोपाधितया दृष्टान्तीक्रियन्ते तथा सति स्थिरास्त इति । ननु तत्संहतिहेतुरुपाधिदृष्टान्तः स्यात् । मैवम्; न हि नः केवलनित्यात् केवलानित्याद्वा कस्यचिदपि कार्यस्योत्पत्तिः; किंतु तत्समुदायात् । तत्र नित्यांशे तावत्क्षणिक(त्व)शङ्काऽपि नास्ति, अनित्येऽपि यतश्चिरोत्पन्नाद्धेतोस्संघभावः सोऽपि स्थिरः ।

यस्तु चरमस्सहकारी स च स्थिर एव सन् स्वकार्यप्रागभावोपहितरूपः कालमवच्छिन्दन् क्षणोपाधिरित्युच्यते, तदुपधानं च तस्य प्रत्यक्षादिसिद्धम् । न चात्र क्षणिकं किंचित्सिध्यति अनवच्छिन्नस्य कालतत्त्वस्य कालपरिच्छेदलक्षणानित्यताभावात् ।

क्रियादिश्च स्थिरोऽप्येवं क्षणोपाधिर्विशेषकैः ।
तत्प्रकर्षनिकर्षैस्तु तत्तत्कालप्रकल्पना ॥

इयं तावत्सर्वलोकसाक्षिकी, क्षणकालावच्छेदकयोः प्रागूर्ध्वव्यापिनोरक्षणिकत्वात्, तदवच्छिन्नस्य कालस्य तु क्षणत्वादेव न क्षणिकत्वमिति वस्तुस्थितिः । त्वत्पक्षे तु क्षणोपाधिरसिद्धः कालस्यैवाभावात् । न चासिद्धोऽपि साध्यः स्वमतविरोधात् । यथाऽऽहुः—

* योऽपि तावत्परासिद्धः स्वयं सिद्धोऽभिधीयते ।
भवेत्तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रिया ।। इति ।

अनन्यावच्छेदार्थेन स्वरूपणैव कश्चित्क्षणशब्दवाच्य इति चेत्, तर्हि क्षणभङ्ग-साधनात्पूर्वमसिद्धः कथं दृष्टान्तः स्यात् ?

उत्तरप्रागभावाप्तपूर्वध्वंसैककालतः ।
मध्यमक्षणतादृक्त्वं व्यवस्थाप्यं त्वयाऽप्यतः ।।

ननु क्षणक्षरणस्वभावा प्रकृतिरिति हि भवत्सिद्धान्तः । अत्र प्रतिक्षणमुदयविलियिनो विकाराः क्षणिका एवेति तद्दृष्टान्तेनान्येषां युष्माभिः किं नानुमीयत इति चेत्, अशक्यत्वादयं सुहृदुपदेशस्त्यज्यते । सर्वक्षणिकत्वं साधयितुमुपक्रम्य स्थिरद्रव्य वृत्तिक्षणिकविकारवदिति कथं दृष्टान्तयेम ? तेषु च न त्वदभिमतं क्षणिकत्वम्, प्रदीपादिवदाशुतरवद्विनाशित्वमात्रेण क्षणिकतोक्तेः । तदेतदभिप्रेत्याह— क्रमवदति । क्षणत्वं—क्षणोपाधित्वमित्यर्थः ।

द्वयोरयुगपद्दृष्टिर्युगपच्च यथायथम् ।
अशक्यापह्नवा तस्मादस्मदुक्तैव पद्धतिः ।। ३० ।।

आनन्द० ननु क्षणिकत्वानुमानं पूर्वं दूषित(मिति)मेव पुनस्तद्दूषणे पौन-रुक्त्यमित्याशङ्क्यावतारयति—क्षणभङ्गेति । इहेत्यस्य जगत्परत्वेऽनन्वयमाशङ्क्य तस्या (इहशब्दा)र्थमाह—पक्षदृष्टान्तेति—विगीतं—क्षणिकत्वेन विप्रतिपन्नं । प्रयोगदर्शनमिदं तन्मते उदाहरणोपनययोरेव प्रयोक्तव्यत्वात् । आदिशब्दार्थं-माह—भासमानत्वाद्वेति । स्यादित्यनेनेति—स्यादित्यस्य सत्त्ववाचित्वात् क्षणिकं स्यादिति समभिव्याहारेण सत्त्वव्यापकं क्षणिकत्वमिति गम्य (मानत्वादिति)त इति भावः । क्षणिकत्वस्य सत्त्वव्यापकत्वे अनुकूलतर्कमाह—अर्थक्रियाकारित्व-मिति । क्षणिकत्वाभावे कुसूलस्थानां बीजानामङ्कुरादिरूपकार्यजनकत्वरूपकुर्व-त्वाभावात् सत्त्वं न स्यात्; क्षणिकत्वे तु पूर्वपूर्वेषां क्षणानां उत्तरोत्तरक्षणजन-कत्वात् कुर्वत्त्वं सिध्यतीति भावः । इतिरिति—तथाचक्षणोपाधिवदितीति मूले सम्बन्धः बाधोक्तिरति—विशेषानुपादानादिति भावः । यद्यपि क्वचित्क्वचिद्वि-कल्पे बाधो न प्रदर्श्यत इति बाधबहुत्वोपपादनार्थं साध्यविकल्प इति न संगच्छत इति मन्दधियां प्रतिभाति; तथाऽपि सर्वविकल्पकोटिष्वपि बाधप्रदर्शनं न प्रतिज्ञार्थः । किंतु विकल्पितकोटिषु यथासम्भवं तत्प्रदर्शनं प्रतिज्ञार्थं इति द्रष्टव्यम् ।

क्षणिकत्वं नामेति—क्षणे भवः क्षणे जातः क्षणोऽस्यास्तीत्यर्थविवक्षायां कुमुदादित्वात् ठच् । अत इनिठनाविति वा ठनि क्षणिकशब्दस्य निष्पत्तेः । विनयादित्वाद्वा स्वार्थिकठकि संज्ञापूर्वकपरिभाषया वृद्ध्यभावाद्वा व्युत्पत्ति-सम्भवात् अवधारणविवक्षातदभावाद्यार्थिकार्थविवक्षानुसारेण विकल्पसम्भवात् नासम्भावितविकल्पदोष इति द्रष्टव्यं ।

तत एवेति—स्थिरस्यापि सामग्रीक्षणे सम्बन्धसम्भवेन सिद्धसाधनादित्यर्थः। व्याप्तिग्राहकाभावाद्व्याप्यत्वासिद्धिरिति चाह— कालमेवेति सिद्धान्तबाधः—अपसिद्धान्तः। 'निराधारा निर्धर्मकाश्च रूपादयश्चत्वारः पदार्थाः।'

वात्सीपुत्रास्तु शब्दादीन् पञ्च वैभाषिका विदुः।
शब्दात्मानश्चतुर्ष्वेव केचिदित्यपरेऽब्रुवन्॥

इति परिगणनेन कालानङ्गीकारादिति भावः। अतएव—अपसिद्धान्तादिप्रसङ्गादेव। अक्षणिकत्वे सत्त्वं न स्यादिति तदीयतर्कस्य प्रतिहतिमाह— क्षणेतरस्येति। विवादाध्यासितमसत् क्षणेतरत्वे सति क्षणद्वयसम्बन्धशून्यत्वात् इत्यर्थः।

ननु सर्वत्र प्रामाणिकस्यैव दृष्टान्तत्वात् खपुष्पनिदर्शनेन प्रतिरोधो न युक्त इत्यत्राह—त्वन्मते चेति। क्षणिकत्वसाधने असतो विपर्ययदृष्टान्तकरणादिति भावः। तदीयसंमतिमाह—एवमपीति। ननु व्यतिरेकव्याप्तिः कथं गृह्यते? यदक्षणिकं तदसत् यथा खपुष्पमिति व्याप्तिग्रहाधिकरणस्याप्रामाणिकत्वात् प्रामाणिकस्यैव सर्वत्र दृष्टान्तत्वादिति शङ्कायां 'तदभावे च तन्न' इति वचनादपि व्यतिरेकव्याप्तेरवगमो यस्मात्तस्माद्वैधर्म्यदृष्टान्ते व्यतिरेकव्याप्तिग्रहे आश्रयापेक्षानियमो नास्तीत्यपि ब्रूथेत्यर्थः। तथाच प्रतिरोधो न(सम्भवति) युक्त इति भावः।

अन्येऽपि—सौगतैकदेशिनोऽपि। अनित्यता—क्षणिकत्वं। अन्ये नैयायिकैकदेशिन इत्य(परेऽ)प्याहुः। बाधादिति—अस्मिन् क्षणे अयं वर्तत इति भेदग्राहित्वात्प्रत्यक्षस्येति भावः। तत एवेति – क्षणोपाधेश्च भेदग्राहिप्रमाणबाधादेवेत्यर्थः। भेदग्रहमेवोपपादयति—य(दि)दा हीति। सर्वपदार्थानां स्वरूपेणोपाधित्वे स्वस्वावच्छिन्नकालस्यैव क्षणत्वात् सर्वेषां च स्वावछिन्नकाल एव वृत्तेः कालतारतम्यं न स्यात्। स्वकालातिरिक्तकालवृत्तित्व(रूप)स्य वैषम्यस्यासम्भवात्। नन्विष्टापत्तिः; क्षणिकवादिनः सर्वस्यापि क्षणकालवृत्तित्वादित्यत्राह— तथाचेति।

स्वावच्छिन्नकालमात्रस्य क्षणकालत्वात् तदतिरिक्तिवृत्तित्वं हि स्थिरत्वं भवन्मते निरस्यं! नचेदं कस्यचिदपि सम्भाव्यते! स्वकालवृत्तिरवस्य स्थैर्यवादिभिरप्यङ्गीकारात्; अतिरिक्तवृत्तित्वे सन्देहाभावात् एतादृशक्षणिकत्वसाधने सिद्धसाधनता स्यात्। तथा च सन्दिग्धे न्यायः प्रवर्तत इति अनुमानमपि निर्विषयं स्यादित्यर्थः। क्षणिकत्वसाधकानुमानस्य तर्कबाधमप्याह— सर्वस्यचेति त्रिलोकस्येति—पात्रादित्वात्साधुः। बहुलग्रहणात् स्त्रीत्वाभावः।

यद्वा लोकशब्दो भुवनपरः। त्रयो लोका यस्येति बहुव्रीहिः। तथा च कस्यापि प्रवृत्तस्य फलप्राप्त्यभावात् प्रवृत्तिर्न स्यादिति भावः। ननु सन्तानैक्यात् प्रवृत्तिस्सम्भवतीत्यत्राह— नचेति। तथाच स्वानुभवबाध इति भावः। आदि-

शब्देन इच्छादिर्गृह्यते। विमतं स्थिरं वस्तुत्वात् आत्मवत् इति प्रतिरोधश्चेत्याह—आत्मदृष्टान्तेनेति। बाधः—प्रतिबन्धः। उक्ततर्कानुगृहीतत्वादस्याधिकबलतया बाध एवेत्यर्थः। व्याप्यत्वासिद्धिं परिहरति—घटादीनिति। प्रशमनप्रकारमाह—अस्ति चेति। दीपादिविषयप्रत्यभिज्ञावदन्यथासिद्धिमाशङ्कते—आलयेति। आलयः—प्रवृत्तिविज्ञानाश्रयः। प्रवृत्तिविज्ञानं—प्रवर्तकं घटादिविज्ञानं। विज्ञानं—विज्ञानस्वरूपमात्मेति सौगतपरिभाषा। तथाच आलयविज्ञानसन्ततिविषयतया न स्थिरत्वसाधिकेति न दृष्टान्तासिद्धिरित्यर्थः। प्रमाणाभावादिति—क्षणिकत्वसाधकानुमानात्प्रागालयविज्ञानसन्ततिकल्पने प्रमाणाभावान्निष्प्रतिपक्षा प्रत्यभिज्ञा स्थिरत्वं साधयेदिति भावः।

प्रत्यभिज्ञायाः स्थिरविषयत्वेऽनुकूलतर्कमप्याह—नान्यदृष्टमिति। परिभाषा व्याप्तिः। तथाच नातिप्रसङ्ग इति भावः। आलयविज्ञानस्यास्थिरत्वे बाधकतर्कान्तरमप्याह—निरर्थकं चेदमिति। आलयविज्ञानाङ्गीकारे प्रवृत्तिज्ञानस्य किञ्चित्सम्बन्धित्वाभावात्प्रवृत्तिः कस्यापि न स्यात् सर्वस्य वा स्यात् अविशेषात्। तदङ्गीकारे तु यदालयविज्ञानसम्बन्धि प्रवृत्तिज्ञानं तस्यैव प्रवृत्तिं जनयतीति नियमस्सिध्यतीति तदङ्गीक्रियते तस्य चेत् क्षणिकत्वमभ्युपैषि तदा प्रवृत्तिज्ञानेन सम्बन्धाभावान्नियमासिद्धेस्सर्वस्य प्रवृत्त्यप्रवृत्तिप्रसङ्गतादवस्थ्यात्तदङ्गीकारो व्यर्थ इत्यर्थः।

ननु जन्यजनकभावसम्बन्धान्नियमोऽस्तु इत्यत्राह—सर्वप्रकारेति। इन्द्रियसम्प्रयोगजन्ये ज्ञाने आलयविज्ञानस्याश्रयतया जनकत्वं वाच्यम्; तच्च क्षणिकत्वे न सम्भवति; ततोऽतिरिक्तश्च सम्बन्धोऽनतिप्रसक्तो दुर्वच इति सर्वप्रकारेणापीत्युक्तमिति भावः। ननु कार्यशून्या सामग्री क्षणोपाधिश्चेत् सामग्र्याः क्षणिकत्वमावश्यकं; अन्यथा क्षणोपाधित्वायोगादिति शङ्कायास्तादवस्थ्यादिति कथं दृष्टान्तहान्युपपादनमित्यत्राह—गूढाभिप्राय इति। गूढाभिप्रायमेवावतारिकामुखेन व्यनक्ति—तथाऽपीत्यादिना। अभिसन्धिं प्रकाशयति—अयं भाव इति। संबन्धशब्देति—संयोगादौ (गादिमात्रे) संघशब्दाव्यवहारादिति भावः। अत इति। केन चित् देशाद्युपाधिना प्रयोजकेन संगृहीताः अवच्छिन्नाः। त एव—संघातिन एव संघशब्दवाच्या इति नियमतस्तत्रैव व्यवहारादिति भावः—स्थिरा इति। तथा च दृष्टान्तासिद्धिरितिभावः। नन्विति—संहतिहेतूपाधेः क्षणिकत्वाभावे तदवच्छिन्नस्याक्षणिकतया क्षणोपाधित्वं न स्यादिति संहतिहेतूपाधिः क्षणिको वाच्यः। तथाच स दृष्टान्तस्स्यादिति भावः। संवमिति—सङ्घातप्रयोजकं कारणेषु किमिति विचारे तत्र प्राप्ताप्राप्तविवेचने चरमकारणमेव। तच्च उत्तरकालस्थायित्वात् स्थिरमेव।

न च क्षणोपाधित्वानुपपत्तिः स्वकार्यप्रागभावसहितस्य क्षणावच्छेदकत्वात्। तयोः स्थिरत्वान्न कस्यापि दृष्टान्ततेत्यर्थः। तथाच यत्किञ्चित्कार्यचरमकारण-

तत्प्रागभावावच्छिन्नकालत्वं क्षणत्वमिति पर्यवसितोऽर्थः। **तदुपधानं**—तत्प्रागभावोपधानं। **तस्य**—चरमकारणस्य।

ननु क्षणकाल एव दृष्टान्त इत्याह - **अनवच्छिन्नस्येति**। तत्र किमवच्छिन्नः क्षणो विवक्षितः उत कालस्वरूपमात्रं? नाद्यः क्षणश्च कालः उपाधिस्तत्संबन्धश्चेति त्रयमेव। तत्र प्रागभावचरमकारणयोः स्थिरत्वात् तत्संबन्धोऽपि स्थिर एव। तत्र कालस्वरूपं च स्थिरमेव। न द्वितीयः; अवच्छिन्नस्य कालस्वरूपमात्रतया तस्य नित्यत्वादिति भावः। ननु काले कालसम्बन्धाभावात् कथं तस्य नित्यत्वं? इत्यत्राह—**कालपरिच्छेदेति**। वस्तुनो ह्यनित्यत्वाभावे नित्यत्वभावः। एवं सामग्रीवत् क्रियाऽपि किञ्चिदवच्छिन्ना क्षणोपाधिरित्याह—**क्रियादिश्चेति**। आदिशब्देन अवस्थाऽपि विवक्षिता। **तत्प्रकर्षनिकर्षैः**—क्रियारूपक्षणोपाधिप्रकर्षनिकर्षैः—अधिकन्यूनभावैः।

यद्वा—क्षणप्रकर्षनिकर्षैः दिवसमासवत्सरादिकल्पनेत्यर्थः। **क्षणकालावच्छेदकयोः**—कार्यप्रागभावचरमकारणयोः। **प्रागूर्ध्वेति**—प्राक्कालव्यापी प्रागभावः ऊर्ध्वव्यापि चरमकारणमित्यर्थः। तथाच तदवच्छिन्नकालस्य क्षणत्वेऽपि तयोर्न क्षणिकत्वमित्याह--**तदवच्छिन्नस्येति**। तथाच सिद्धान्तिमतानुसारेण दृष्टान्तासिद्धिरिति भावः। ननु सिद्धान्तिमते कालः क्षणलवादिपरिणामवानित्युक्तत्वात् स्वरूपेण क्षणरूपपरिणामोऽङ्गीकृतः। न च तस्योपाध्यवच्छिन्नकालत्वं; येनोक्तरीत्या स्थिराणामवच्छेदकत्वमुच्येत। अत एव सिद्धान्त्यभिमतदशावत्त्वेन द्रव्यलक्षणवत्त्वात्कालस्य द्रव्यत्वं। तथाच तादृशलक्षणावस्था दृष्टान्तस्स्यादिति कथं दृष्टान्तासिद्धिरिति चेत्;।

अत्र केचित् - कालस्वरूपस्य न परिणामः। न च क्षणलवादिपरिणामवानित्युक्तिविरोधः उपाध्यवच्छेदस्यैव परिणामशब्दार्थत्वात्। न च द्रव्यलक्षणानुपपत्तिः; संयोगादिसम्बन्धस्यैवावस्थाशब्दार्थत्वात्। तथाच दृष्टान्तासिद्धिरित्याहुः। अन्ये तु—कालस्यास्तु परिणामः तथाऽपि क्षणिकत्वसाधकानुमाने कालोपाधित्वस्योपाधित्वात् सोपाधिकतया न सत्त्वहेतोः साध्यसाधकत्वमित्याहुः।

पूर्वपक्ष्यनुसारेणापि दृष्टान्तहानि (दृष्टान्तासिद्धि) माह—**स्वत्पक्षे त्विति**। **स्वमतविरोधः**—अपसिद्धान्त इत्यर्थः। यद्वा स्वोक्तिविरोध इत्यर्थः। तत्र तदुक्तिमाह—***यथाऽऽहुरिति***। वादिप्रतिवादिनोर्मध्ये प्रतिवाद्यसिद्धं **स्वयंसिद्धं** स्वमतसिद्धं पक्षदृष्टान्तादिरूपेणाभिधातुं शक्यं। तत्र प्रतिवाद्यसिद्धिशङ्कायां तत्सा (द्धिशङ्काभावात्सा) धनमुखेन प्रतिक्रिया परिहारश्च संभवति। **स्वतोऽसि-(द्धौ)द्धे** स्वमत एवासि (द्धौ)द्धे। **का प्रतिक्रिया**--कः प्रतीकारः? स्वमतासिद्धस्याप्यभ्युपगमे अपसिद्धान्ता(पाता)दित्यर्थः--**स्वत इति**। सार्वविभक्तिकष्षष्ठ्यर्थे तसिः।

अनन्यावच्छेदेनेत्यस्य विवरणं--स्वरूपेणैवेति। कालस्वरूपवस्त्वपि मास्तु; तस्य कश्चिदुपाधिरपि माभूत; किन्तु स्वरूपेणैव सिद्धेषु कश्चित् क्षणो भवतु-- स एव क्षणिको दृष्टान्तोऽस्त्वित्यर्थः। तर्हीति—तादृशक्षणिकः क्षणशब्दवाच्योऽनुमानात्साधनीय इति भावः। क्षणिकत्वसिद्धयनन्तरमेव तादृशक्षणसिद्धिमुपपादयति--उत्तरेति। क्षणसन्ततीनां मध्ये मध्यमः क्षणः पूर्वक्षणध्वंसोत्तरक्षणप्रागभावाभ्यामेककालो भवति। तदेककालत्वमेव क्षणत्वं अतिप्रसङ्गाभावादिति त्वयाऽपि वाच्यं। तच्च क्षणिकसन्तानसिद्धयपेक्षं क्षणिकत्वसाधकानुमानादेव सिद्धयतीति न ततः पूर्वं सिद्धयतीत्यर्थः। मध्यमक्षणस्य तादृ(वत्वं) शत्वं क्षण(णिक)त्वं। 'तदशिष्यं संज्ञाप्रमाणत्वादिति' ज्ञापकात् षष्ठीसमासः। नन्वितिं— 'नित्या सततविक्रिया' इत्यङ्गीकारात् पूर्वपूर्वविकाराणामुत्तोत्तरविकारसमये नाशादिति भावः। सर्वेति—तथाचैकदेशबाधो व्यभिचारश्चेति भावः। दृष्टान्तयेमेति —दृष्टान्तं कुर्याम इत्यर्थः। तेषु--प्रकृतिगतविकारेषु। न त्वदभिमतमिति--- उत्पत्त्यनन्तरक्षणविनाशित्वरूपं क्षणिकत्वमित्यर्थः। तथाच दृष्टान्तस्य साध्यवैकल्यमिति भावः!

प्रदीपादिवदिति—ननु तादृशं क्षणिकत्वं साध्यमस्तु; प्रदीपादीनामेव दृष्टान्तानां सत्त्वादिति चेन्न; प्रदीपादीनां वर्त्यवयवाग्निसंयोगादुत्पत्तिः ततो वर्त्यवयवस्य रूपपरावृत्तिलक्षणो दाहः ततो भस्मीभावलक्षणो नाशः ततो दीपनाश इति सहेतुको नाशो नाशकारणसन्निधानापेक्ष इति नाशकारणानां प्रदीपवत् सर्वत्र नियतकालसन्निधिनियमस्य प्रत्यक्षबाधितत्वान्न तादृशंक्षणिकत्वमपि साधयितुं शक्यमिति भावः। तथाच तत्साधने नियतकालविनाशसामग्रीकत्वमुपाधिरिति द्रष्टव्यं। तदेतदिति--स्थिरतराणामेव पूर्वोत्तरकालव्यापिनां क्रमोत्पन्नानां प्रागभावचरमकारणादीनां क्षणोपाधित्वं न कस्यापि क्षणिकत्व मित्येतदभिप्रेत्येत्यर्थः।

ननु क्रमवन्तौ पदार्थौ न समानकालिकौ भिन्नकालिकत्वात् संप्रतिपन्नवत्। तथाच नैककालिकतया क्षणोपाधित्वमित्यत आह—द्वयोरिति। अयुगपत्— भिन्नकाले। युगपत्—समानकाले। यथायथमिति—येषां येन प्रकारेण न्यूनाधिकभावरूपेण संभवति तेन प्रकारेण दर्शनादनुमानस्य बाध इति भावः। यथाशब्दः प्रथमः पदार्थानतिवृत्तिवचनः। द्वितीयः प्रकारवचनः 'यथाऽसादृश्ये' इत्यव्ययीभावः। क्षणिकत्वानुमानात्पूर्वं त्वदुक्तस्यासंभवान्मदुक्त एव क्षणोपाधिः स्वीकार्य इत्या (त्य तआ)ह तस्मादिति। नन्वनुमानान्तरं मदुक्तमस्त्विति चेत्; न; व्याप्तिग्राहकप्रमाणाभावेन अनुमानप्रवृत्तेरेवासंभवादिति भावः॥ ३०॥

अक्ष० मेयत्वाद्यैर्विगीतमिति। क्षणभङ्गानुमानान्तरं दूषयितुमनुवदति। इह— वस्तु जाते। विगीतं जगत् क्षणिकं मेयत्वात् सत्वात्-भासमानत्वाद्वा-क्षणोपाधिवत्-

इति प्रयोगो दर्शितः। अग्रेतनमितिशब्दमनुकृष्य इति चेदित्यन्वयो बोध्यः। अत्र प्रसङ्गसूचकेन स्यादितिशब्देन क्षणिकत्वानुपगमे असत्वप्रसङ्गस्सूच्यते। अर्थक्रिया-कारित्वरूपस्य सत्वस्य क्षणिकत्व एव उत्तरोत्तरक्षणोत्पादकतया सम्भव इत्यभिमानः। घटजलधरादौ साध्यस्य बाधनिघ्नतया सम्प्रतिपत्यभावात्क्षणोपाधेर्दृष्टान्तीकरणं। अस्य क्षणिकत्वानुपगमे क्षणोपाधित्वं न सम्भवतीत्यभिमानः। अत्र दूषणमाह—बाधइति स्थैर्यग्राहिकया प्रत्यभिज्ञया क्षणिकस्य बाध इत्यर्थः। एवं स्वप्रयोजनेच्छयैव सर्वस्य प्रवृत्तिदर्शनात्फलार्थिनः फलिनश्च क्षणिकत्वेन भेदे सर्वप्रवृत्तिबाधस्स्यादित्यपि गम्यते।

तथा विगीतं जगत् स्थिरंवस्तुत्वादात्मवदिति प्रत्यनुमानेनाऽपि बाधो विभावनीयः। नान्यदृष्टं स्मरत्यन्य इति नियमानुगृहीतया सोऽहमिति प्रत्यभिज्ञया आत्मस्थैर्यस्य प्रामाणिकत्वेन सम्प्रतिपत्यवश्यम्भावादुक्तप्रत्यनुमानस्याधिकबलत्वेन बाधकत्वमिति भावः।

परोक्तानुमाने दृष्टान्ते साध्यवैकल्यमाह–दृष्टान्तहानिरिति। तदुपपादयति–स्थिर इति—क्षणोपाधिः यतः स्थिरो विदितः तत इत्यर्थः। स्थिरत्वे कथं क्षणोपाधित्वमित्यत्राह—सामग्रीति– कार्यप्रागभावसहिता सामग्री क्षणोपाधिरित्यर्थः। तस्याः क्षणिकत्वमक्षतमेवेत्यत्राह—इयमपीति—कार्यप्रागभावान्विता सामग्र्यपीत्यर्थः। तद्धेतुसंघ इति। कार्यहेतुसमुदाय इत्यर्थः। अत्र संघशब्दः न केवलहेतुपरः एकैकस्मिन्नप्रयोगात्-नापि हेत्वतिरिक्तपरस्परहेतुसम्बन्धपरः सङ्घशब्दस्य सम्बन्धपर्यायत्वाभावादित्याह— नचासौ हेतुरित्यादिना। न केवलहेतुः, नापि हेत्वतिरिक्तः किन्तु समानदेशकालाद्युपाध्यन्विता हेतव एव हेतुसंघ इत्युच्यन्ते। तेच स्थिरा एव। स्थिराणामपि तेषां क्षणोपाधित्वं कथमित्यत्राह–क्रमवदिति। पौर्वापर्यविशिष्टयोः उत्तरसंयोगप्रागभाव—पूर्वसंयोगनाशयोरिव स्थिरेऽपि क्षणोपाधित्वं स्यादेवेत्याशयः।

दीपादीनां कदाचित्सदृशविसदृशाशेषसन्तत्यपेते
ध्वंसे दृष्टेऽप्यशक्या तदितरविषयेऽनन्वयध्वंसक्लृप्तिः।
बाधादेर्दर्शितत्वादपि च दृढमिते सान्वयेऽस्मिन्घटादौ
दुर्दर्शावस्थया स्युः पयसि लवणवल्लीनदीपादिभागाः ॥३१॥

इह च प्रतिसंख्याप्रतिसंख्यानिरोधयोः निरन्वयविनाशित्वे परोक्तं निदर्शनं दूषयति—दीपादीनामिति ॥ आदिशब्देन क्षणरुचिबुद्बुदादिसंग्रहः।

स निरन्वयनाशस्स्याद्धर्मो धर्म्यपि वा पुनः।
पूर्वसंघातभागो वा यद्भावेनानुवर्तते ॥
उत्पत्तिश्च तथाभूता निरन्वयसमुद्भवा।
तावुभौ सर्वभावानां नियताविति सौगताः ॥

यो विनाशस्स निरन्वयः, यथाऽन्त्यदीपस्य, अस्ति च विनाशो जातनाम्; अतस्सोऽपि निरन्वय इति निरन्वयध्वंसक्लृप्तिर्न शक्या। तदुपपादयति–बाधादेरिति। प्रत्यभिज्ञाबाधस्य प्रवृत्त्याद्यनुपपत्तीनां च दर्शितत्वात्। विपरिवर्तश्च युक्त इत्याह—अपि चेति। अन्त्यदीपविनाशस्सान्वयः विनाशत्वात् पटादिविनाशवत्। साध्यविकलो दृष्टान्त इति चेन्न; सङ्घातांशानां वा गन्धादिधर्माणां वा वा श्यामरक्तादिधर्मिणां वा यथासम्भवमनुवृत्तेर्दृढोपलब्धत्वात्। प्रत्यक्षबाधपरिहाराय दुर्दर्शावस्थत्वोक्तिः। स्युरित्यनेन दृश्यावस्थानिवृत्तावपि स्वरूपसत्त्वं सूच्यते।

ननु पयसि लवणवदित्ययुक्तं, तत्रापि निरन्वयविनाशात्। तन्न; रसेन सूक्ष्मावयवानुमानात्। दीपावयवेषु लिङ्गमपि नास्तीति चेन्न; दीपोर्ध्वदेशिनां किञ्चिदौष्ण्योपलब्ध्या दीपावयवसंक्रान्तेस्सुगमत्वात्। प्रभूतदीपपार्श्ववर्तिनां च तापस्वेदादिस्तत एव। एवमन्त्यदीपनाशेऽप्यदृश्यावयवविसर्पस्सिद्धः। अतो विनष्टदीपभागानुपलब्धेरदृश्यावस्थानिबन्धनत्वादनन्यथासिद्धप्रत्यक्षसिद्धःसान्वयविनाशदृष्टान्त एव साधीयान्। अन्त्यदीपादेश्च यदि न किञ्चिदुपादेयं ततोऽर्थक्रियाविरहादसत्त्वं स्यात्। बुद्ध्यादिरर्थक्रियाऽस्त्विति चेन्न, तस्यानियतत्वात्। विनाशस्तर्ह्यर्थक्रियाऽस्त्विति चेन्न, तस्य ते तुच्छत्वात् ध्रुवभावित्वेन अहेतुकत्वाभ्युपगमाच्च। एवमन्त्यदीपासत्त्वे च तत्कारणपरम्पराया अपि तथात्वं स्यादिति ॥ ३१ ॥

आनन्द०। प्रसङ्गसङ्गतिमाह—इह चेति। क्षणिकत्वसाधने बाधकपरिहारं परोक्तं दूषयति—इहेति इति केचिदाहुः। प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधयोरिति—निरन्वयविनाशः प्रतिसंख्यानिरोधः अप्रतिसंख्यानिरोधः सान्वयनाश इत्यर्थः। मुद्गरादिजन्यः प्रत्यक्षसिद्धो घटादेर्नाशः प्रतिसंख्यानिरोधः अस्फुटरूपदीपादिनाशोऽप्रतिसंख्यानिरोध इत्याहुः। अक्षणविनाश इति केचित्।

इह—जगति। विप्रतिपत्ताविति शेषः। ननु क्षणिकत्वसाधनमयुक्तं विनाशस्य सान्वयत्वात् अनुवृत्तांशस्य स्थिरत्वेन बाधादित्याशङ्क्य सर्वत्र निरन्वयविनाश एव न तु कस्यचिदंशस्यान्वयो येन बाधो दर्श्येतेति सौगतोक्तं संवादयति—स निरन्वयनाशस्स्यादिति। धर्मो—गन्धादिः। धर्मी—पाकरक्तस्थले घटादिः। पूर्वसंघातभागः—घटादिसंघातस्यावयवः तन्त्वादिर्वा यद्भावेन यत्स्वरूपेणानुवर्तते इत्युच्यते; तन्न; कुतः? स निरन्वयनाशस्स्यात्—निरवशेषं नश्यति; तथाच नानुवर्तत इति न क्षणिकत्वसाधने बाध इत्यर्थः। उत्पत्तिश्च। तथाभूता—द्रव्यादेरुत्पत्तिरपि विनाशवदेव। तथाशब्दार्थमेवाह—निरन्वयेति। पूर्वमवयवाद्यभावेऽपि द्रव्यसमुत्पाद इत्यर्थः सर्वभावानां—सर्वपदार्थानां। सौगताः न्यायचन्द्रिकायां प्रतिपादितवन्त इति शेषः। तदुक्तप्रयोगं दर्शयति—यो विनाश इति।

प्रत्यभिज्ञाबाधस्येत्यादि—यद्यपि न निरन्वयविनाशसाधने प्रत्यभिज्ञाबाधादि-र्दर्शितः तथाऽपि निरन्वयविनाशसाधनस्य क्षणिकत्वसाधनार्थत्वात् तत्र बाधा-दिर्दर्शित इति भावः।

ननु माभूत् क्षणिकत्वसाधनार्थता; निरन्वयविनाशमात्रं साध्यतामिति चेन्न; घटादिनाशस्थले कपालमालाद्यनुवृत्तिदर्शनात्तथाऽपि बाध एव। अत एव बाधा-देरिति सामान्योक्तिरिति ध्येयम्। प्रवृत्त्याद्यनुपपत्तिश्च आत्मनो विनाशित्वा-दिति भावः। विपरिवर्तश्चेति। प्रत्युत अन्त्यदीपविनाशस्थल एव सान्वयनाश-साधनं स्यादित्यर्थः। गन्धादीति—आदिशब्देन रसादिर्गृह्यते। प्रत्यक्षबाधेति। योग्यानुपलब्ध्यभावान्नानुपलम्भमात्रं बाधकमिति भावः विसर्पः—प्रसरः व्यापनमिति यावत्। ननु विनिगमकाभावात् को निर्णय इत्याह—अतो विनष्टेति विनष्टदीप-(दीपादि) स्थले निरन्वयविनाशस्सन्दिग्धः सूक्ष्मत(क्ष्मावस्य) याऽप्यनुपलब्धि-संभवात्। तथाच निरन्वयव्याप्तिग्रहो न शक्यः। सान्वयस्य तु घटादिनाशस्थले सन्देहाभावाद्व्याप्तिस्सुग्रहेति भावः। विपक्षबाधकबलादपि निश्चय इत्याह—अन्त्यदीपादेश्चेति। निरन्वयविनाशाङ्गीकारात् तज्जन्यस्य कस्यचिदभावादिति भावः। बुद्ध्यादिरिति – विषयप्रकाशतया विषतया वा बुद्ध्यादिजनकत्वाभावा-दिति भावः। आदिशब्देन तमोनिरसनादिर्गृह्यते। नन्वन्त्यदीपस्य सत्त्वं माभू-दित्यत्राह—एवमन्त्यदीपादिसत्त्वे इति। (तथाच) उपान्त्यस्यान्त्यदीपजनकत्वेन सत्त्वं वाच्यं; अन्त्यस्यासत्त्वे तुच्छतयोपान्त्यजनकत्वमेव न स्यात्: तथा चोपान्त्य-स्याप्यर्थक्रियाविरहात्तुच्छता; तथा पूर्वपूर्वेषामपीति दीपपरम्परावत्सर्वक्षणपरम्प-राणामपीति चरमवौद्धपक्ष (पात) स्स्यादित्यर्थः॥ ३१॥

अक्ष० मुद्गराद्यभिघातानन्तरं उपलब्धियोग्यः यः घटादिनाशः सः प्रति-संख्यानिरोधः-विनैव मुद्गराद्यभिघातं प्रतिक्षणभावी उपलब्ध्यनर्हः विनाशश्च-अप्रतिसंख्यानिरोधः। उभयोरपि निरन्वयत्वं सौगता वदन्ति। विनाशस्य सान्वयत्वे अनुवृत्तांशस्य स्थिरत्वसिद्धया क्षणिकत्वानुमानस्य बाधस्स्यात्। एवं प्रतिक्षण विनाशे अन्वयादर्शनात्क्षणभंगोऽपि न सिद्ध्येत् इति तेषामाशयः। तत्र निरन्वयत्व-साधने दीपादीन्निदर्शयन्ति। आदिशब्देन विद्युदादयो। [बुद्बुदादयो] विवक्षिताः। कदाचित् महावर्त्यादिप्रसक्तौ। सदृशसन्ततिः—वर्तिभागान्तरोत्पन्न-दीपपरम्परा। विसदृशसन्ततिः भस्मादिरूपा। तदुभयरहिते। ध्वंसे-दृष्टेऽपि—तादृशध्वंसो दृश्यत इत्यभ्युपगमेऽपीत्यर्थः। वस्तुतस्तादृशध्वंसो नेत्याशयः। ततस्तथाऽभ्युपगमेऽपि तद्दृष्टान्तेन अन्यत्र मुद्गराद्यभिघातजन्यघटादिनाशेऽपि निरन्वयक्लृप्तिर्नशक्येत्याह—अशक्येत्यादिना। कुत इत्यत्राह—बाधादेरिति। प्रत्यभिज्ञाबाधो दर्शितः। कपालादिदर्शनेनापि बाधो द्रष्टव्यः। आदिशब्देन प्रवृत्त्यनुपपत्तिर्ग्राह्या। अतो यो-विनाशस्स-निरन्वय इति साधनं न सम्भवतीति

भावः। प्रत्युत विपरिवर्तं एव युक्तस्स्यादित्याह—अपिचेति। दृढमिते—प्रत्यक्ष सिद्धेऽस्मिन्विनाशे। घटादौ—घटादिविषये घटादिप्रतियोगिकइति यावत्। घटादिनाशे कपालाद्यन्वयस्य प्रत्यक्षसिद्धत्वादिति भावः। अत्र अन्त्यदीप-विनाशोऽपि-सान्वयः विनाशत्वात् घटादिविनाशवदिति विपरिवर्तंप्रसङ्गो विवक्षितः। अनुपलब्ध्या बाधस्स्यादित्यत्राह—दुर्दर्शावस्थयेति। स्युरिति। दृश्यावस्थानिवृत्तावपि स्वरूपसत्वं सूचितम्। तत्र दृष्टान्तमाह—पयसीति—तत्र रूपरूपिदर्शनाभावेऽपि रसोपलब्धिसत्वाद्धर्मिस्वरूपं नापह्नोतुं शक्यं-तद्वदत्र दीपोर्ध्वदेशे दीपनाशानन्तरमपि किञ्चिदौष्ण्योपलम्भात् दीपावयवसद्भावो दुरपह्नव इति भावः।

"निरन्वय विनाशस्स्यात् धर्मो धर्म्यंपि वा पुनः
पूर्वसङ्घातभावो वा यद्भावे नानुवर्तते"॥ इति हि सौगताः।

क्षणभङ्गनिरासः॥

सत्त्वेऽसत्त्वेऽपि पूर्वं किमपि गगनतत्पुष्पवन्नैव साध्यं
हेतुप्राप्तिर्न पश्चाद्भवितुरघटितोत्पादनेऽतिप्रसङ्गः।
जन्यं जन्माऽन्यथा वा द्वयमसदनवस्थानकार्यक्षतिभ्या-
मित्याद्यैर्हेतुसाध्यं न किमपि यदि न स्वक्रियादेर्विरोधात्॥ ३२॥

सर्वा० ननु साध्यसाधनभावे सिद्धे हि प्रस्तुतं पक्षचतुष्टयं सिध्येत्; स एव नास्तीति चार्वाक उत्तिष्ठते—सत्त्वेऽसत्त्व इति॥ यदि कार्यं कारकव्यापारात्पूर्वमस्ति तदा पूर्वसिद्धगगनादिवत्किमपि न कार्यं स्यात्। अथ तदा नास्ति, तदाऽपि खपुष्पवन्न कार्यम्; न चासतः सत्त्वापादानसंभवः। न हि नीलं शिल्पिसहस्रेणापि सितीकर्तुं शक्यमिति। कार्यं च कारणेन सह पूर्वं पश्चाद्वा जायते? आद्ये किं कस्य कारणं कार्यं वा स्यात्? द्वितीयेऽपि ततः पूर्वस्य कथं तज्जन्यत्वम्? वैपरीत्यापातश्च लोकव्यवहारानुरोधात्। तृतीये हेतुः स्वेन प्राप्तं साधयेत् अप्राप्तं वा? आद्ये प्राप्तत्वादेव पूर्वसिद्धेर्न साध्यत्वम्, न चोत्तरकालीनस्य पूर्वकालीनेन प्राप्तिः; उभयस्वरूपसिद्ध्यपेक्षत्वात्तस्याः। तदिदमाह—हेतुप्राप्तिरिति।

द्वितीयमपि दूषयति—अघटितेति। अप्राप्तोत्पादने सर्वस्मात् सर्वमुत्पद्येत; प्रकाश्यमप्राप्य वा दीपः प्रकाशयेत्; दाह्यमप्राप्य वा दहनो दहेत्। पुनर्विकल्पान्तरेण विहतिमाह—जन्यमिति। घटो जायत इत्येतौ तावन्न पर्यायौ, सहप्रयोगात्, यावद्विनाशं जायत इति प्रयोगप्रसङ्गाच्च। पटो जायत इति प्रयोगश्च न स्यात्; घटपटशब्दयोरपर्यायत्वात्। अतः कार्यस्वरूपातिरिक्तं जन्म। तच्च जन्यमजन्यं वेति विकल्प्य द्वयप्ययुक्तमित्याह—द्वयमसदिति। क्रमात् बाधकमाह—अनवस्थानकार्यक्षतिभ्यामिति। जन्मनो जन्यत्वं हि जननकर्मतया; अतस्तस्यापि जन्म स्वीकर्तव्यम्, एवं तस्यापीत्यनवस्था। अजन्यत्वे तज्जन्मनोऽ-

नादित्वात् तद्वतो घटादेरपि तथात्वं स्यात्। तथा च कार्यत्वक्षतिः स्यादिति। आदिशब्देन भिन्नाभिन्नत्वादिविकल्पक्षोभसंग्रहः। हेतुश्च साध्यं च हेतुसाध्यं, हेतुना साध्यं वा। ईदृशानां तर्काणां युक्ताङ्गहान्यादिकमभिप्रेत्याह—नेति। साधारणदुष्टत्वमाह—स्वक्रियादेरिति। इह तावदनिष्टकोटिभङ्गो न प्रत्याख्येयः। अन्यत्रैवमुत्तरगतिः—

यदत्र पूर्वमसत्त्वे कार्यत्वं न स्यादिति तद्विरुद्धभाषितं, प्रागसत्त्वविशेषितं सत्त्वमेव हि कार्यत्वम्। तत्र च प्रागसत्त्वे प्रागसत्त्वमेव न स्यादिति वा, तद्विशिष्टं न स्यादिति वा, सत्त्वमात्रं न स्यादिति वा प्रसङ्गार्थस्स्यात्? तत्र न प्रथमः, कस्यापि स्वाभावेन व्याप्त्यभावात्। अन्यथा शून्यवाद एव स्यात्; अनेकान्तवादो वा। द्वितीयः तदसत्त्व एव तद्विशिष्टशिद्धेः; न हि विशेषणसत्त्वं विशिष्टविरोधि। न तृतीयः, असत्त्वस्य स्वकालसत्त्वेन विरोधग्रहणात्, अन्यथा देशान्तरसत्त्वेऽपि विरोधप्रसङ्गे न स एवान्त्यबौद्धपक्षस्स्यात्।

यत्तु पश्चाद्भाविनः कारणप्राप्तिर्नास्तीति, तत्र पौर्वापर्यनियमलक्षणा प्राप्तिर्दृष्टत्वादनिवार्या। संयोगादिलक्षणा तु मा भूदनङ्गत्वात्। ततश्च नातिप्रसङ्गः, नियामकस्य सिद्धत्वात्। प्रकाश्यदाह्यादिषु च यथादर्शनं कार[काणां]-णानां मिथः प्राप्तिरेवाङ्गम्, न तु कार्येण ज्ञानेन सह, भस्मादिना वा। यस्तु जन्मनो जन्यत्वाजन्यत्वविकल्पेनातिप्रसङ्ग उक्तः, नासावस्मत्पक्षे युक्तदोषः। न हि वयमभिव्यक्ति वा कारणसमवायादिकं वा जन्मेति ब्रूमः, किन्तूपादानावस्थाविशेषम्। तस्य कार्यावस्थासामानाधिकरण्यव्यपदेशः तादात्म्येन तदाश्रयवृत्तेः; एवं ध्वंसादिसामानाधिकरण्यमपि यथायथमूह्यम्। ईदृशस्य जन्मन उपादानावस्थान्तरसाध्यत्वे कारणानवस्थामात्रमापतति; सा च न दोष इति सर्वाविगीतम्। यच्च भिन्नत्वे गवाश्वयोरिव कार्यकारणता न स्यात्, अभिन्नत्वे च कथं सिद्धस्य साध्यत्वमिति, तन्न; कारणात्कार्यस्य भिन्नस्यैवोत्पत्तिदर्शनात्।

अन्यथा बुद्धिबोध्यादौ भिन्नत्वादिविकल्पतः।
बोध्यत्वादिक्षतेर्न स्यात् स्वमतस्थापनाऽपि वः॥

अथ किंचित्कारेणाकिंचित्कारेण वा कारणत्वम्, पूर्वत्र हेतूनां किंचित्कारजननेऽपि किंचित्कारान्तरापेक्षयाऽनवस्था, किंचित्कारस्यापि किंचित्कारजननापेक्षया उत्तरत्रातिप्रसङ्ग इति। अत्रापि ब्रूमः—यत्र किंचित्कारेण हेतुत्वं दृष्टम्, यथा काष्ठादेर्ज्वालादिना, तत्र तथा। न चानवस्था हेतुसंपत्तिपरम्पराया दोषत्वाभावात्; अतिरिक्तस्यात्रानिरूपणात्। यत्र तु द्वारनिरपेक्षं हेतुत्वं तत्रापि दर्शनबलात् किंचित्कारान्तरं न जनयितव्यम्, यतोऽनवस्था स्यात्। न चातिप्रसङ्गः, नियतपूर्वत्वग्राहिणा प्रत्यक्षेणैव तन्निवारणात्। अन्यथा तदपि ते प्रमाणं न स्यादिति विश्वापह्नवः।

यच्च कार्यं कुर्वतोऽकुर्वतो वा कारणत्वम्, आद्ये कार्यस्यापि पूर्वसिद्धिप्रसक्त्या कार्यत्वाभावः। द्वितीये विरोधातिप्रङ्गाविति; तदप्यपष्ठु, भाविकार्यानुगुणव्यापारवत्त्वमेव कारणस्य कुर्वत्त्वम्। तत्र कथं कार्यस्य स्वस्मात् पूर्वसिद्धिः ? कुर्वत्त्वनिरूपणं तु भाविनाऽपि कार्येण बुद्ध्यारोहिणा सिध्येत्। एतेन निर्व्यापारस्सव्यापारो वा हेतुरित्याद्यपि दत्तोत्तरम्। कार्यकारणत्वयोः स्वभावत्वे पटत्वनीलत्वादिवत् सर्वं प्रत्यपि स्याताम्; अस्वभावत्वे कस्यचिदपि न स्यातामित्यपि नियतप्रतिसंबन्धिकस्वभावत एव तदुभयसिद्धेर्निरस्तम्। दण्डादिकार्यत्वं घटादिकारणत्वं वा नीलादिवदेव पुरुषभेदेऽप्यविपर्यस्तमेव।

अथ स्यात्, कार्यकारणभावस्य द्विष्ठत्वे द्वयोरपि द्वैरूप्यादविशेषविरोधभेदापत्तयस्युः, एकस्थत्वेऽपि यत्रैकस्मिंस्तत्रैवमिति; तत्र ब्रूमः – कार्ये कार्यत्वं कारणे कारणत्वं च वर्तते; तथाऽप्यन्योन्यनिरूप्यतया संबन्धव्यवहारादिसिद्धिरिति। स्यादेतत्, न तावद्दण्डादयो मृदाद्यवयवाश्च प्रत्येकं घटाद्युत्पादनशक्ताः; अदर्शनात्। अत एव न समुदिता अपि, न हि नद्यस्समेत्यापि दहेयुः। न च सिकतास्संभूय तैलं जनयेयुः। शक्तानामेव संभूय करणे सर्वे कृतकारास्युः। शक्तस्य कुर्वतोऽप्यन्याकाङ्क्षायां सर्वैरपि स्यात्। तथा च देशादिव्यवहितानामसन्निधेः कथं कार्यारम्भः ? न हि कार्ये कारणानां साध्यांशभेदः; विभक्तदशायां समुदाये वा तस्यादृष्टेः; निरंशे गुणादौ च दुर्वचमेतदिति।

अत्रोच्यते—समुदितानां कार्यकरत्वमेव हि प्रत्येकमपि[हि] शक्तिः; कथमत्र वियुक्तैः कार्यकरणं कथं च समेतेषु कृतकरता ? अतश्शक्तस्यापि सहकार्याकाङ्क्षायामतिप्रसङ्गश्च निरस्तः, यावत्कार्यसिद्धिनियतविषयत्वात्तस्या इति।

ननु पूर्वं कारणमित्युक्ते नष्टं कारणमित्युक्तं स्यात्। दृष्टा च मृदिते मृत्पिण्डे घटोत्पत्तिः, तथा च स्वात्मानमलभमानस्य कथं परसाधकत्वम् ? अन्यथा चिरातिक्रान्तस्य च स्यादेव कारणत्वम्। तुच्छस्य च कारणत्वे कार्यमपि तुच्छं स्यात्, नित्यं वेति; तदपि न, पूर्वक्षणसत्त्वमेव हि कारणस्य कार्योपयोगि; न च तत्तदा नास्ति। कार्यक्षणे तु कस्यचिदसत्त्वं न कारणत्वविरोधि। पूर्वं नष्टमित्यप्यसाधु; स्थिरवादे तदयोगात्। पिण्डस्य तु न साक्षात्कारणत्वम् न च पिण्डस्तत्प्रध्वंसो वाऽत्यन्ततुच्छः, स्वकाले सद्भावात्। कालान्तरासत्त्वेन तुच्छत्वे प्रत्यक्षविषयोऽपि तथा स्यात्। तथा चेयं माध्यमिकगतिः।

अथ ब्रूषे पूर्वत्वमेव कारणस्य दुर्निरूपम्, पूर्वकालवृत्तित्वं हि तत्; काले च पूर्वत्वमुपाधिकृतम्; स चोपाधिर्यद्ययमेव, तदा तदधीनं कालस्य पूर्वत्वं कालाधीनं चोपाधेरित्यन्योन्याश्रयः; अन्यापेक्षायां चक्रकम्, अनवस्थाऽपि। कालस्य क्रमवदुपाधिसंबन्धभेदाद्भेदश्च कृत्स्नैकदेशविकल्पदुःस्थ इति। एवं ब्रुवता किं पौर्वापर्यमेव न दृष्टम् ? दृष्टमपि वा बाधितम् ? नाद्यः, स्वाभ्युपेतलोक-

व्यवहारविरोधात्। न द्वितीयः, सर्वेषां नित्यत्वतुच्छत्वयोरन्यतरप्रसङ्गात्। अतः काले सत्यसति वा क्रमस्तावद् दुरपह्नवः।

क्रमेणोपाधिभिर्योगस्साकल्येनांशतोऽपि वा।
कालस्य न घटेतेति स्थिरवादी कथं वदेत्॥

प्रत्यक्षप्रतिरुद्धश्च क्षणभङ्गपरिग्रहः।
अपसिद्धान्तमादध्यान्मानमन्यदनिच्छतः॥

अथ लोकायतान्तस्थमनुमानं च मन्यसे।
आगमोऽप्यविसंवादी तदन्तस्स्थातुमर्हति॥

यत्र प्रवृत्तिसामर्थ्यं न लोकादुपलभ्यते।
अनुमीयेत तत्रापि प्रामाण्यमविशेषतः॥

अस्त्वेवम्; तस्य नियमो न शक्यः अस्मादेवेदमनन्तरमिति। तदेतन्नियनपूर्वत्वं हि न जातेर्जातिमपेक्ष्य, द्वयोरपि त्रैकालिकत्वात्। न च जातेर्व्यक्तिमपेक्ष्य, सर्वासां जातीनां पूर्वत्वेन कारणनियमासिद्धेः। जात्यन्तरापेक्षया कार्यत्वं न दृष्टमिति चेत्; किमतः; पूर्वमेतज्जातिकार्यत्वमपि दृष्टम्? एकव्यक्तेश्च नियमो दुर्ग्रहः, अननुवृत्तेः; कृत्तिकारोहिण्योरपि ह्युदयभेदेष्वेव व्याप्तिर्गृह्यते। एतेन व्यक्तेर्जात्यपेक्षया वा व्यक्त्यपेक्षया पूर्वत्वनियमोऽपि प्रत्युक्त इति। अयमप्यनुक्तोपालम्भः।

एतद्धर्मकादेतद्धर्मकमुपजातमिति जात्युपाधिक्रोडीकृतरूपेण व्यक्तिषु नियमसिद्धेः। यथादर्शनं चेयत्तानियमरहितनिरुपाधिनिर्व्यभिचारभूयोदर्शनबलेन व्याप्तिसिद्धिश्चानुमाने वक्ष्यते। न च सर्वस्मात्तादृशात्तादृशं सर्वमनियतं वा स्यादिति शङ्कनीयम्। तथा व्याप्तेरग्रहणात्, तद्विरुद्धा च ते प्रार्थना मोघैव। तृणारणिमण्यादिषु च वह्न्याद्युत्पत्तौ सामान्यतो विशेषतश्च हेतुकार्यभावो मन्तव्यः। तत्र कार्यवैजात्यं न दृश्यत इति चेन्न; अनुपलब्धवैषम्याणामप्यायुर्वेदादिषु शक्तिभेदसिद्धेरवान्तरवैजात्यस्य स्वीकार्यत्वादिति।

सांख्यसौगतचार्वाकैरन्येऽप्येवमुपप्लवाः।
प्रयुक्ताः प्रतिवक्तव्याः प्रतिष्ठितनयस्थितैः॥

यदत्र माध्यमिकमतस्थैरुच्यते—

* पूर्वसंबन्धनियमे हेतुत्वे तुल्य एव नौ।
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा॥ इति,

तत्रोच्यते—प्राक्कालनियतत्वेन कारणं प्रमितं न वा।
आद्ये तदेव तत्सत्त्वमन्यथा नियमोऽपि न॥

अन्यदपि यदुक्तम्—

* अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः।
नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः॥

अत्र तदसत्तत इत्यत्र स्थाने सदिदं तत इति पाठ्यं विशेषणतयोपलक्षणतया वा सत्तासंबन्धिनि नासत्त्वारोपश्शक्त इति।

सत्त्वं च सदसद्वेति विकल्प्यानिष्टकल्पने।
असत्त्वं सदसद्वेति विकल्प्योत्तरमूह्यताम्॥

स्वक्रियादिविरोधश्च सूत्रप्रभृतिदुस्तरः।
गुरुशिष्यादिवाक्यानां परबोधार्थता यतः॥

तेभ्यश्चैतन्यमित्यादि वदता गुरुणा स्वयम्।
किण्वादिभ्यः प्रसिध्यन्ती मदशक्तिर्निदर्शिता॥

प्रत्यक्षाल्लोकशब्दोक्तादधिकं च तदायतम्।
अभाष्यत भवत्पूर्वैः प्रत्यक्षं चार्थसाधकम्॥

अर्थकामौ पुमर्थौ च दृष्टेपायैरुदीरितौ।
प्रीयसे दूयसे च त्वं बिभेषि च ततस्ततः॥

इष्टं प्राप्तुमनिष्टं च निवर्तयितुमुद्यतः।
तत्सिद्धौ चरितार्थस्त्वं लोकवत्किं न मन्यसे॥

बुभुक्षुरन्नमादत्से श्वभक्ष्यादि जहासि च।
परोक्त्या प्रतिपद्यार्थं प्रतिब्रूषे जिगीषया॥

तत्त्वावधारणार्थं वा वादे किं न प्रवर्तसे।
स्वयं वा मानतर्काभ्यां किं न किञ्चित्परीक्षसे॥ ३२॥

आनन्द० कार्यकारणभावसमर्थनार्थमाक्षेपसंगतिमाह—नन्विति। पक्षचतुष्टयमिति—वैनाशिकार्धवैनाशिकसाङ्ख्यसिद्धान्तिपक्षचतुष्टयमित्यर्थः। अथ तदेति—कारकव्यापारात्पूर्वस्मिन् काले इत्यर्थः। किं कारणेन सह जायते पूर्वं वा पश्चाद्वा जायते? इति विकल्पक्रमः। आद्ये इति—सव्येतरविषाणवद्विनिगमकाभावा(वात्कार्यकारणव्यवस्था न स्या) दिति भावः। लोकेति—पूर्ववर्तिन एव लोके कारणत्वव्यवहारादित्यर्थः पूर्वसिद्धत्वमेवोपपादयति—नचोत्तरेति। तत्र हेतुमाह—उभयेति। तस्याः—प्राप्तेः सम्बन्धतया सम्बन्धिद्वयपूर्वकत्वादिति। भावः। अप्राप्तोत्पादने इति—अविशेषादिति भावः। यावद्विनाशमिति—घटस्य—जनिधात्वर्थ(र्थत्वे)त्वात् तस्य वर्तमानत्वात् धात्वर्थवर्तमानकाले वर्तमानप्रयोगस्योचितत्वादिति भावः। पटो जायत इति—घट(स्वरूप)स्यैव जन्म(नि)त्वे तस्य पटस्वरूपत्वाभावादित्यर्थः तस्याऽपि जन्मत्वेऽननुगम इति भावः।

किञ्च घटस्वरूपस्यैव जन्मत्वे पटो जायते इति प्रयोगात् पटस्यैव घटात्मकत्वं वाच्यं; तथाच घटपटशब्दयोः पर्यायत्वं च स्यादित्याह—**घटपटशब्दयोरिति।** **भिन्नाभिन्नत्वादीति**—कार्यं कारणाद्भिन्नमभिन्नं वेति (विकल्पे) इति-(त्यर्थः) भावः। कारणं किञ्चित्कारेण कार्यं जनयति उत तद्भिनेत्यादिविकल्प आदिशब्दर्थः। समाहारद्वन्द्व इत्याह—**हेतुश्चेति।** 'तृतीया तत्कृतार्थेन' 'कर्तृकरणे कृता' इति वा समास इत्याह—**हेतुनेति।** **युक्ताङ्ग**—प्रागसत्त्वं अयुक्ताङ्गस्वीकार आदिशब्दार्थः। अयुक्ताङ्गं च प्राक्सत्त्वकारणसंयोगादिः। दुष्टत्वं दोषः। **अनिष्टकोटीति**—प्राक्सत्वकारणप्राप्त्यादिरित्यर्थः। अन्यत्र प्रागसतोऽप्राप्तस्योत्पादने। वक्ष्यमाणा उत्तरगतिः। उत्तरगतिमेवोपपादयति—**यदत्रेत्यादिना।** चार्वाकोऽपि घटपटादि नित्यतया तुच्छतया वा नाङ्गीकरोति। किं तु निर्हेतुकं। तत्र (तथाच) प्रागसत्त्वमनुमतमेवेति स्वमतविरुद्धभाषणमित्यर्थः।

प्रकारान्तरेणापि विरुद्धतामाह—**प्रागसत्त्वविशेषितमित्यादिना।** प्रागसत्त्वे कार्यत्वं न स्यादित्यत्र प्रसङ्गे कार्यत्वस्य प्रागसत्त्वविशिष्टसत्त्वस्वरूपस्य विशेषणं न स्यादिति वा विशेषणविशेष्योभयं न स्यादिति वेति विकल्पार्थः। **कस्यापीति**—विशेषणस्य प्रागसत्त्वस्याभावः सत्त्वमेव। तथाच स्वाभावकाले स्वसत्त्वं स्यादिति प्रसङ्गार्थः। तथाच विरोधेन व्याप्त्यभावः इत्यर्थः। **अन्यथा**—प्रतियोगिनः स्वाभावकालिकत्वे। एकावच्छेदेन स्वाधारसंबन्धारोप्यकतदधि(स्वाधिकरणत्वाभिमताधि) करणकव्यासज्यवृत्तिधर्मेतरधर्मावच्छिन्नस्वसमानकालिकाद्यभावप्रतियोगित्वादेः शून्यताप्रयोजकत्वादिति भावः। **अनेकान्तेति**—शून्यत्वानङ्गीकारे सत्त्वासत्त्वरूपेणानेकान्तवाद इत्यर्थः। **तदसत्त्व एवेति**—प्रागसत्त्वरूपविशेषणसत्त्व एव प्रागसत्त्वे सति सत्त्वरूपविशिष्टसिद्धेरित्यर्थः। **न ह्येति**—विशेषणसत्त्वस्य विशिष्टसिद्ध्यनुकूलत्वात् प्रागसत्त्वरूपविशेषणं तद्विशिष्टत्त्वस्य न विरोधीत्यर्थः। **अन्यथेति**—असत्त्वस्य सत्त्वमात्रविरोधित्वे इत्यर्थः। कार्यस्य कारणप्राप्तिर्वक्तव्येत्यत्र यथाकथञ्चित्प्राप्तिर्वक्तव्येति उत संयोगादिलक्षणेति विकल्पमभिप्रेत्य आद्य आह—**पौर्वापर्येति।** द्वितीये आह—**संयोगेति।** प्रकाश्यदाह्यादावपि कार्यप्राप्तिर्नास्ति किंतु कारणानामेव यथादर्शनं मिथः प्राप्तिरिति नातिप्रसङ्ग इत्याह **प्रकाश्येति।** **नासाविति**—चार्वाकोपि घटपटादिवस्तुनो न नित्यतामभ्युपैति। किंतु तस्य सादितां निर्हेतुकं जन्म च। तत्रोक्तो दोषः स्वस्यैव दोषो नास्मत्पक्ष इति(त्यर्थः) भावः।

ननु त्वपक्षेऽप्यभिव्यक्त्यादिकमुत्पत्तिश्चेद्दोषस्समान इत्याह—**न हि वयमिति।** अभिव्यक्तिपक्षे अभिव्यक्तिरभिव्यज्यते न वेत्यादिविकल्पदोषस्स्यात्। कारणसमवायपक्षेऽपि स सिद्धो न वेत्यादिविकल्पदोषस्स्यादित्यर्थः। **उपादानावस्थाविशेषमिति**—उपादाननिष्ठो यो घटाद्यवस्थाव्यवहितप्राक्कालावस्थाविशेषः तमित्यर्थः। यद्वा आद्यक्षणावच्छिन्ना घटाद्यवस्थैवेत्यर्थः। ननूपादानावस्था

मृदादिनिष्ठतया घटादिकार्यनिष्ठत्वाभावात् कथं घटो जायत इति सामानाधिकरण्यव्यपदेश इत्यत्राह्—**कार्यावस्थेति**। उत्पत्त्यवस्थाश्रयवृत्तित्वाद्व्यपदेश इत्यर्थः। तदेव तु कुत इत्यत आह—**तादात्म्येनेति**। उत्पत्त्यवस्थाश्रयस्य कार्यावस्थाश्रयस्य च तादात्म्यादित्यर्थः। **एवमिति**—यदवस्थाश्रयवृत्तित्वं यस्य तस्य तत्सामानाधिकरण्यव्यवहारप्रयोजकत्वमित्यङ्गीकारात् ध्वंसावस्थासामानाधिकरण्येन ध्वस्तो घट इति व्यपदेश इत्यर्थः। ननूपादानावस्थाया जन्मत्वेऽपि प्रागसत्त्वेन साध्यत्वादनवस्था स्यादित्यत आह्—**ईदृशस्येति**। **सर्वाविगीतमिति**—बीजाङ्कुरादौ तथा दर्शनादिति भावः **अन्यथेति**—दर्शनस्यानियामकत्वे इत्यर्थः।

घटबुद्धिर्घटाद्भिन्ना न वा ? आद्ये पटवत् तद्विषया न स्यात्। द्वितीयेऽपि स्वयं तद्विषया न स्यात्। बोध्यं बुद्धिसंबद्धं प्रकाशते असंबद्धं वा ? आद्येऽपि स संबन्धस्संबद्धोऽसंबद्धो वा ? प्रथमेऽनवस्था; द्वितीये संबन्धस्यासंबद्धत्वे तन्मूलकबोध्यसंबन्धस्याप्यभावेन प्रकाशाभावादिति प्रसङ्गयोः प्रसङ्गः; अत एवाद्यद्वितीयोऽपि नेत्यादि (त्याद्य) विकल्पसंभवादिति भावः। किञ्चित्कारः—व्यापारविशेषः। प्रकारान्तरेणाप्यनवस्थामाह्—**किञ्चित्कारस्यापीति**। किञ्चित्कारस्यापि कार्यजननार्थं किञ्चित्कारापेक्षायां द्वितीयाऽनवस्थेत्यर्थः। **उत्तरत्रेति**—अकिञ्चित्कुर्वतोऽपि जनकत्वे विशेषाभावात्तन्तुभिरपि घट उत्पद्येतेत्यर्थः। **अतिरिक्तस्येति**— हेतुसम्पत्तिपरम्परातिरिक्तस्येत्यर्थः। **अन्यथेति**—प्रत्यक्षस्य नियामकत्वाभावे प्रत्यक्षमात्रप्रमाणवादिनस्तत्वार्थसिद्धिरेव न स्यादित्यर्थः। **आद्ये कार्यस्यापीति** कृतिनिरूपकस्य कर्मणोपि प्राक्सत्त्वनियमादिति भावः। **द्वितीये इति**—अकुर्वतो जनकत्वरूपकुर्वत्त्वं विरुद्धं कृतिमत्त्वाभावेऽपि जनकत्वे सर्वं सर्वस्य कारणमित्यतिप्रसङ्गश्चेत्यर्थः। **अपष्ठु**—असारं।

एतेनेति—पूर्वत्र कृतिरूपव्यापारविशेषः अत्र क्रिया (कृति) रूप साधारणव्यापारमात्रमिति भेदो ज्ञेयः। **स्वभावत्वे इति**—न हि घटस्वभावः कस्यचित् कस्यचिन्नेति सम्भवति। स्वभावत्वव्याघातादिति भावः। **अस्वभावत्वे इति**—तद्धर्मत्वाभाव इत्यर्थः। **नियतप्रतिसम्बन्धिकेति**—कार्यकारणत्वे स्वभावावेव। नचातिप्रसङ्गः; संयोगादिवत्प्रतिसम्बन्धिनियमादित्यर्थः। स्वभावत्वमेवोपपादयति—**दण्डादीति**। यथा नीलादिकं धर्मिविशेषनियतमपि तस्य स्वभावः पुरुषविशेषनियतं च न भवति तद्वदित्यर्थः। **विपर्यस्तं**—विपरीतं तदन्यदिति यावत्। **अविशेषेति**—कार्यस्यापि कारणत्वं कारणस्य कार्यत्वं कार्यकारणयोस्स्वस्वापेक्षया पूर्वभावित्वपश्चाद्भावित्वरूपविरोध एकस्यैव कार्यकारणरूपेण भेदश्च स्युरि (स्यादि) त्यर्थः। **एकस्थत्वेऽपि**—कार्यकारणयोरन्यतरमात्रवृत्तित्वेऽपि। **यत्रेति**—यत्र कार्यकारणभाववै (भावाद्वै) रूप्यं तत्र उक्तदोषाः स्युरित्यर्थः।

ननु मृदादयश्शक्ताः कार्यं जनयन्त्यशक्ता वेति विकल्पमभिप्रेत्य द्वितीयं दूषयति—न तावदिति। अशक्तानां जनकत्वं व्याहतमिति भावः। आद्यं दूषयति—शक्तानामिति। एकस्यापि शक्तत्वेन कार्यस्य करणादितरैरपि तस्य करणे कुतः करणत्वमितीतर (कृतकरत्वमिति सहकारि) वैयर्थ्यमिति भावः। सर्वैरपि स्यादिति—अविशेषादिति भावः। अस्तु को दोष इत्यत्राह—तथाचेति। एकघट-व्यक्त्युत्पत्तौ दण्डादिकारणताव (त्पत्ति)स्थदण्डत्वादिकारणत्वावच्छेदकावच्छिन्न-यावद्भिर्भवितव्यमिति देशादिव्यवहितानां सन्निध्यसंभवादुत्पत्तिरेव न स्यादि-त्यर्थः। ननु सन्निहितं कारणं कार्यं कश्चिदंशं जनयति; असन्निहितं च यदा सन्निधा-स्यति तदेतरांशं जनयतु कथं कार्यानारम्भ इत्यत्राह—नहि कार्यं इति। एतदिति जन्यजनकत्वमित्यर्थः। यावत्कार्यसिद्धीति—एककार्यनिरूपितानि यावन्ति कारण-तावच्छेदकानि प्रत्येकं तावदवच्छिन्नयत्किञ्चित्सत्त्व एव कार्यदर्शनादिति भावः। नन्विति—पूर्वकाल इत्यादौ पूर्वपदस्यातीतार्थकत्वादर्शनादित्यर्थः। अन्यथेति—स्वरूपाभावस्योभयत्र तुल्यत्वादिति भावः। तुच्छस्येति—उपादानसमानस्वभाव-त्वादिति भावः। तुच्छस्य सार्वकालिकत्वात् कार्योत्पादे विलम्बात् तुच्छकारणा-नन्तरक्षणवर्तिप्रागभावप्रतियोगित्वं न स्यादित्यर्थः।

अन्ये तु—तुच्छस्य सार्वकालिकतया सार्वकालिककार्यपरम्परा स्यादित्यर्थं इत्याहुः।

किं कारणमात्रस्य स्वकार्यकालसत्त्वं वक्तव्यं कारणविशेषस्य वा? इति विकल्प्य आद्यं प्रतिवक्ति—पूर्वक्षणसत्त्वमिति। द्वितीयं प्रतिवक्ति—कार्यक्षण इति। निमित्तस्यासत्त्वं न विरोधि उपादानस्यासत्त्वं विरोध्यप्यत्र नास्तीति भावः। तदेवोपपादयति—पूर्वं(मिति)मेवेति। पिण्डत्वावस्थानाशेऽपि मृद उपा-दानस्य सत्त्वादित्यर्थः। पिण्डस्येति—पिण्डावस्थाया इत्यर्थः। न साक्षादिति—परिचायकत्व(मात्र) मित्यर्थः। स्वकाले इति – सार्वकालिकासत्त्वमेव हि तुच्छत्व-मिति भावः। असत्त्वमात्रमेव तुच्छत्व प्रयोजकं लाघवादित्यत्राह—कालान्तरेति। प्रत्यक्षविषयस्यापि कालान्तरासत्त्वादिति भावः।

कृत्स्नैकदेशेति—कालः क्रमादुपाधिभिः कात्स्न्येन सम्बध्यते अथैक(थवैक) देशेन? न प्रथमः; सर्वोऽपि कालः पूर्वो वा परो(रोऽपि)वेति पूर्वापरविभागो न स्यात्। न द्वितीयः; एकदेशाभावादिति विकल्पदुःस्थत्वादित्यर्थः। स्वाभ्युपेतेति—स्वाभ्युपेतव्यवहारविरोधो लोकव्यवहारविरोधश्चेत्यर्थः। पूर्वः पर इति व्यवहार-स्य सर्वसिद्धत्वादहेतुकस्य नोत्पत्तिः। 'पूर्वं नैव स्वभावतः' इति चार्वाकव्यवहा-राच्चेति भावः। सर्वेषामिति। इदं पूर्वमिदं परमिति पौर्वापर्यविशिष्टप्रतीति-र्दृश्यते; तत्र विशेषणीभूतपूर्वत्वमात्रबाधे नित्यत्वं; विशेष्यबाधे विशिष्टबाधे च तुच्छत्वं स्यादित्यर्थः। ननु कालानभ्युपगन्तुः कथमित्यत्राह—अतः काल इति।

कालशब्दवाच्यस्य कस्य चित् तैरप्यभ्युपगन्तव्यत्वादिति भावः। कृत्स्नैकदेश-विकल्पं परिहरति—क्रमेणेति। तस्यैकस्य कालस्य क्रमेणोपाधियोगो वक्तुं शक्यः। क्षणिकत्वपक्ष एव परं वक्तुं न शक्यते। एकेनानेकेषामानन्तर्येण ;योगः क्रमवदु-पाधिसम्बन्धः।

न च कृत्स्नैकदेशविकल्पदोषः उभयथाऽपि दोषाभावात्। न च सर्वस्यापि पूर्वपरत्वयोः प्रसङ्गेन विभागाभावः; तत्तत्पूर्वोपाधिकाले सर्वस्य पूर्वत्वात् तत्तत्परो(तत्तदप)पाधिकाले सर्वस्य परत्वाच्च। नचैकदेशासम्भवः; सततपरिणाम-वादिभिरस्माभिस्तद(स्या)ङ्गीकारे विरोधाभावाच्चेत्यर्थः। ननु क्षणभङ्गाङ्गी-कारात् क्रमवदुपाधियोगो न घटते इत्याशङ्क्य किं प्रत्यक्षेण क्षणभङ्गस्वीकार उतानुमानेन? इति विकल्पमभिप्रेत्य आद्यं दूषयति—प्रत्यक्षेणेति। प्रत्यभिज्ञा-रूपप्रत्यक्षेण स्थैर्यगोचरेणेत्यर्थः। द्वितीयं दूषयति—अपसिद्धान्तमिति। तव प्रत्यक्षादन्यस्याप्रमाणत्वादिति भावः। लोकायतान्तस्स्थमिति—लोकायतं—चार्वाकशास्त्रं तत्रानुमानमप्यन्तर्गतं तथाच नापसिद्धान्त इति भावः।

केचित्तु(अन्येतु) लोकायतान्तस्स्थं—(लोकायतं तटस्थं) प्रत्यक्षान्तर्गत-मित्यर्थं इत्याहुः।

आगमोऽपीति—तुल्यत्वादिति भावः। किञ्च अनुमानप्रामाण्यमावश्यक-मित्याह—यत इति। यतो लोकात् प्रत्यक्षात्। प्रवृत्तिसामर्थ्यं—प्रवृत्तिजनकता। प्रामाण्यसंदेहादिना नोपलभ्यते तत्राप्यविसंवादिप्रत्यक्षाविशेषात्प्रामाण्यमनुमीयेत ततः प्रवृत्तिः अन्यथा प्रवृत्तिर्न स्यादिति भावः। अस्त्वेवमिति—अस्मादेवेदमन-न्तरमिति तस्य कारणस्य नियमो ग्रहीतुं न शक्य इत्यर्थः। तदेवोपपादयति—तदेतदिति। कारणनियमासिद्धेरिति—तन्तुजातिः पटकारणमिति नियमो न सिद्ध्येदित्यर्थः। एतज्जातीति—तन्तुजातीत्यर्थः। एकव्यक्तेरिति रासभादितुल्य-त्वादिति भावः। ननु कृत्तिकारोहिण्यादावेकव्यक्तिकत्वेऽपि व्याप्तिग्रहो दृष्ट इत्यत्राह—कृत्तिकेति। तत्राप्यनयोरुदयानां भिन्नभिन्नानामनेकेषामेव व्याप्ति-र्गृह्यत इत्यर्थः। एतेनेति—एकव्यक्तौ (क्तेः)नियमस्य१(मेन) दुर्ग्रहत्वादि(त्वेने) त्यर्थः। अनुक्तोपालम्भ इति—जात्याद्यपेक्षया जन्यजनकभावस्यानुक्तेरिति भावः।

तर्हि किमुक्तमित्यत्राह—एतद्धर्मकादिति। दण्डत्वादिधर्मकात् घटत्वादि-धर्मकं जातमित्यर्थः। जात्युपाधीति—तथाच यद्धर्मावच्छिन्नं प्रति यद्धर्मावच्छि-न्नमनन्यथासिद्धनियतपूर्वं तद्धर्मावच्छिन्नं तद्धर्मावच्छिन्नाज्जातमिति जात्युपाधि-क्रोडीकारेण व्याप्तिग्रहसम्भवादित्यर्थः। ननु सहचारदर्शनोपाध्यभावनिश्चय-व्यभिचारज्ञानविरहाणां व्याप्तिग्राहकत्वं वाच्यं; सहचारदर्शनमात्रस्य व्यभिचारि-साधारण्यात् भूयोदर्शनानां त्रिचतुरादिभावेनाननुगतत्वात् उपाधेर्योग्यायोग्यरूपत्वेन

तदभावस्य दुरवधारणत्वात् भूतभाव्यसन्निकृष्टव्यक्ति (वस्तु)षु व्यभिचारसंदेहेन व्यभिचारज्ञानविरहस्याप्ययोगा न्न (तैः) व्याप्तिग्रह इत्यत्राह—यथादर्शनं चेति। निरुपाधिः—उपाध्यभावनिश्चयः। निर्व्यभिचारः—व्यभिचारज्ञानविरहः। भूयोदर्शनं—भूयस्सहचारदर्शनमित्यर्थः अनुमान इति—अनुमाननिरूपणावसरे इत्यर्थः। सर्वस्मात्—दण्डचक्रादितः। सर्वं—घटपटादिकमुत्पद्येत। यद्येका सामग्रीति न्यायादेकमेवोत्पद्यते तथासति अनियतो घटः पटो वा जायेतेत्यतिप्रसङ्गश्च नास्तीत्याह—नचेति। तद्विरुद्धा चेति। एतज्जातीयादेतज्जातीयमुत्पद्यत इति व्याप्तिग्रहविरुद्धा सर्वानियतोत्पत्तिप्रार्थनेत्यर्थः। नन्वेतज्जतीयादेतज्जातीयमुत्पद्यत इति व्याप्तिग्रहो नोपपद्यते; तृणजातीयाद्वह्निजातीयमिति व्याप्तेरभावात् तदभावेऽपि वह्नि (मण्यादेरपि वह्निजातीय) दर्शनात्। एवं मण्यादिजातीयादपीति चोद्यं परिहरति—तृणारणीति। एक (जातीय) शक्तिमत्त्वेन त्रयाणां वह्निजातीये कारणत्वं।

यद्वा—वह्निफूत्कारादिसमवधानस्थले यज्जातीये (तीयसमवधाने) सति वह्निजाती (यकार्यं) यो (यस्यो) त्पत्तिः यज्जातीयाभावे वह्निजाती (याभावः) योत्पत्त्यभावः इति सामान्यकार्यकारणभावः, वह्नित्वावान्तरजातिविशेषावच्छेदेन विशेषकार्यकारणभावश्चेत्यर्थः।

अनुपलब्धेति। तृणादिजन्येषु वैषम्यमुपलभ्यत एव; तथाऽप्यनुपलम्भमात्रान्नाभाव इति भावः। साङ्गयेति—कार्यकारणभावस्यानतिप्रसक्तस्य दुर्वचत्वात् ग्राहकस्यापि दुर्निरूपत्वात् पूर्ववृत्तं च कारणं वाच्यम्; पूर्वत्वं च कार्यप्रागभावावच्छिन्नकालत्वम्। प्रागभावत्वं च प्रतियोगिजनकाभावत्वम्; तथाचात्माश्रय इत्याद्यन्येऽप्युपप्लवाः प्रतिष्ठितनयस्थितैः— सम्यगभ्यस्तन्यायैः पुरुषैः प्रतिवक्तव्याः परिहरणीया इत्यर्थः। तत्प्र(त्परिहारप्र)कारस्तु—न च लक्षणस्यानिर्वचनमात्रेण वस्तुनोऽभावः, इक्षुक्षीरादिमाधुर्यवैजात्यविलोप(त्याभाव) प्रसङ्गात्। प्रतियोगित्वादिवत् स्वरूपसंवन्धविशेषत्वेनाप्यन्तत उपपत्तेः। अनन्यथासिद्धनियतपूर्ववृत्तित्वा (सत्त्वा) दिना निर्वच (चनसंभवाच्च) नोपपत्तेश्च। नापि ग्राहकाभावः; अनन्यथासिद्धान्वयव्यतिरेकाग्राहकत्वात्। नापि पूर्वत्वनिर्वचनप्रयुक्तदोषः; विनाश्यभावावच्छिन्न (श्यभाव) त्वादिना निर्वचनसंभवादिति। ननु सतः कार्यकारणभावो नोपपद्यते कार्यकारणभावस्य सत्त्वाधीनत्वाभावेन असत्त्वनियतत्वादिति खण्डनोक्तिमनुवदति—यदत्रेति।

अन्ये तु ननु सर्वशून्यवादे कार्यकारणभाव एव न संभवति; शून्यस्य किञ्चिदपेक्षया पूर्वसत्त्वाभावात्। तथाच भ्रान्तिसिद्धस्यापि कालविशेषे उत्पत्तिः कालविशेषे प्रतीतिरित्याद्यनुपपन्नमित्याशङ्क्य पूर्वकालसत्त्वमात्रमतिप्रसक्तं; नियतसत्त्वविवक्षायां पूर्वकालनियतत्वमेव लाघवादस्तु; तच्च वादिप्रतिवादिनोस्समान-

मेव। सत्त्वं तु गौरवादनन्तर्भूतम्। तथाच कारणत्वानन्तर्गतसत्त्वासत्त्वविचारो व्यर्थं इति माध्यमिकमतस्थो (मतैकदेश्यु)क्तं दुरुक्तमिति प्रसङ्गाद्दूषयितुमनुभाषते—यदत्र माध्यमिकमतस्थैरिति इत्याहुः। अस्मिन् पक्षे माध्यमिकग्रन्थ एव किञ्चिद्विषमं खण्डनेनानूदित इति ध्येयं।

माध्यमिकमतस्थत्वं माध्यमिकमतानुसरणात्। यद्यपि खण्डने—

अन्तर्भूतवहिर्भूतसत्त्वासत्त्वकथा वृथा।

इति किञ्चिद्विकृतं पठ्यते; तथाऽपि उत्तरत्र अन्तर्भावितेति तदग्रन्थोपादानात् लेखकाधीनं तद्वैषम्यमिति केचिदाहुः।

अन्येतु - माध्यमिकमतस्थः खण्डनकार उच्यते। उत्तरत्रान्यदपीति खण्डनग्रन्थानुवादादित्याहुः।

तदेव प्रमितत्वमेव। प्रमितत्वं—अबाधितमानविषयत्वम्। नियतत्वम् च नियमेन सत्त्वं। तथाच सत्त्वघटितं कारणत्वमिति सत्त्वशून्यमते कारणत्वं दुर्वचमित्यर्थः। तदुक्तमन्यदपि दूषयितुमनुभाषते—**अन्यदपीति**। (अद्वैतमतं दूषयितुमनुभाषते)—**अन्तर्भावितस(त्त्वं)त्तं चेत्कारणमिति**। सत्त्वविशिष्टं चेत्—सत्त्वस्यापि कारणकोटिप्रवेशश्चेदिति यावत्। पूर्वसत्त्वं सत्त्वविशेष्ये विशेषणीभूतसत्त्वे वा नास्तीत्यसतः कारणत्वमायातमित्याह—**तदसदिति**। न हि स्वविशिष्टे स्वस्मिन् वा स्वस्य वृत्तिर्युज्यते; न च सत्त्वान्तरं; तस्यासत्त्वे तद्विशिष्टस्याप्यसत्त्वं स्यात्। **नान्तर्भावितेति**—अन्तर्भावितसत्त्वं न भवतीति नसमासः। तथा सत्त्वस्याप्रवेशादसतः कारणत्वं तत एवायातमित्यर्थः। त्वदुक्तमेव 'तदसत्ततः' इत्यत्र तदसदिति स्थाने सदिदमिति पदप्रक्षेपेण तव दूषणं भवतीत्याह—**अत्रेति**। इदं (कारणं) तत् सदेवेत्यर्थः। तदेवोपपादयति—**विशेषणतयेति**। उभयथाऽपि सत्ताश्रयत्वात्कारणस्येति भावः।

ननु सत्तायास्सत्ताश्रयत्वेऽनवस्था। तदनाश्रयत्वे तस्या असत्त्वे(न) कारणस्याप्यसत्त्वमित्यत्राह—**सत्त्वं चेति**। **सदसद्वेति**—कारणस्यासत्त्वं सन्न वा? आद्येऽनवस्था, सत्त्वान्तरापत्तिश्च। असत्त्वस्यासत्त्वे सत्त्वाश्रयत्वेनाभिमतस्यासत्त्वशून्यतया सर्वसत्त्वं स्यात्। द्वितीये तु असत्त्वस्यैवासत्त्वाभावरूपसत्त्वाश्रयतया (त्वात्) सत्त्वं; अवर्जनीयतया तद्वदेव सर्वस्यासत्त्वमिति भावः। पूर्वोक्तं स्वक्रियाव्याघातं विशदमाह—**स्वक्रियादीति**। **सूत्रप्रभृति**—त्वदीयशास्त्रभूतसूत्रमारभ्येत्यर्थः। तत्र हेतुमाह—**गुरुशिष्येति**। परबोधनार्थत्वं परप्रतिपत्तिप्रयोजनकत्वं; तच्च साध्यसाधनभावनिबन्धनमिति भावः। त्वयैव लोकसिद्धकार्यकारणभावस्य दृष्टान्तीकरणादपि विरोध इत्याह—**किण्वादिभ्य इति**। तदीयभाष्यविरोधमप्याह—**प्रत्यक्षादिति**। **अधिकं**—अधिरुपरिभावार्थः। प्रत्यक्षस्यो (क्षादु)

परिभूतं—फलभूतमित्यर्थः। दृष्टोपाधी—अन्वयव्यतिरेकसिद्धकारणकौ। ततस्तत इति—प्रीतिदुःखभयहेतुभ्य इत्यर्थः। उद्यतः—यत्नवान्। तत्सिद्धौ—इष्टप्राप्त्य-निष्टपरिहारसिद्धौ। चरितार्थः—प्राप्तप्रयोजनकः। ततः किमित्यत आह—लोकवदिति। पूर्वोक्तानां सर्वेषां साध्यसाधनभावप्रतिपत्तिनिबन्धनत्वात् लोकवत् किमर्थं तन्नाभ्युपगच्छसीत्यर्थः। बुभुक्षुरिति-क्षुन्निवर्तनसाधनत्वाभावे ह्यविशेषात् सर्वमुपादीयेत परित्यज्येत वा। तथा न क्रियते (इति)। ततश्च स्वक्रियाविरोध इति भावः॥ ३२॥

अक्ष० अथ चार्वाकस्य कार्यकारणभावाक्षेपं निराकर्तुमनुवदति—सत्वेऽसत्वेऽपीति। पूर्वं—कारकव्यापारात्पूर्वं कार्यस्य सत्वे गगनवत् तदपि कारक-व्यापारसाध्यं न स्यात् असत्वे तु गगनकुसुमवत् तत्साध्यां न स्यादित्यर्थः। एव मनन्तरभाविनः कार्यस्य पूर्वभाविना कारणेन सम्बन्धोऽपि न भवतीत्याह—हेतुप्राप्तिरिति। उभयसम्बन्धिस्वरूपसिद्धयपेक्षत्वात्सम्बन्धसिद्धेरिति भावः। असम्बद्धोत्पादने दोषमाह—अघटितेति—असम्बद्धत्वाविशेषात्सर्वस्मात्सर्वोत्पत्ति प्रसङ्ग इत्यर्थः।

अथ उत्पत्तेरुत्पत्तिविकल्पेन कार्यस्य विहतिमाह—जन्यमिति। उत्पत्ते-रुत्पत्तिमत्वेऽनवस्थानात् अनुत्पत्तिमत्वे उत्पत्तिमतः कार्यत्वक्षतेश्च कल्प द्वयमप्ययुक्तमेवेत्यर्थः। आद्यशब्देन कार्यं कारणाद्भिन्नमभिन्नं वेत्यादिविकल्पक्षो भसंग्रहः। हेतुसाध्यम्—हेतुना साध्यम्। न किमपि यदीति। किमपि न स्याच्चे-दित्यर्थः। उक्तशङ्कां निरस्यति—नेति। स्वक्रियादेरिति-स्वशास्त्रप्रणयनादे-रित्यर्थः। विरोधादिति—बोधकत्वाभावेन वैयर्थ्यादिति भावः॥ ३२॥

कादाचित्कस्य कालावधिनियतिकरं पूर्वसत्कारणं स्यात्
भावोपष्टम्भशून्यो न खलु तदवधिं प्रागभावेऽपि कुर्यात्।
कार्यं निर्हेतुकं चेत्कथमिव न भवेन्नित्यता तुच्छता वा
कादाचित्कस्वभावाद्यदि न नियमनादन्यथाऽतिप्रसङ्गात्॥ ३३॥

सर्वा०—ननु परिवेषादिषु नियतपूर्वसत्किञ्चिन्न दृश्यते। न च घटादि-दृष्टान्तेन तदनुमेयम्, विपरिवर्तस्य दुर्वारत्वात्। अतो दृश्यमाना अप्यवधयः केषुचिद्रसोत्पत्तौ रूपादिवद्यदृच्छासिद्धा इत्यत्राह—कादाचित्कस्येति॥ अयं भावः—यदि परिवेषादीनामपि कादाचित्कत्वं दृष्टं निपुणं तत्र निरूपयतां देशकालदृष्टविशेषादातपादिकारणविशेषस्सिद्धः। तदनुपलम्भेऽपि सन्दिग्धपरि-वेषादिदृष्टान्तेन नान्यत्र हेत्वभावश्शक्योऽनुमातुम्, अनिश्चितसाध्यस्य दृष्टान्तत्वा-योगात्, निश्चितसाध्यविपर्ययस्य पक्षत्वाद्यतिपातात्, निश्चितनिदर्शनादनिश्चिता-

नुमानं युक्तमेव। न च त्वद्विवादमात्रेण घटादिषु सर्वलोकसंमतः कारणसद्भावस्सन्दिह्यते।

एतेनाहेतुतो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् इत्यादि च प्रत्युक्तम्। अस्तु हेतुनिरपेक्षो नियतकालः प्रागभाव एव कार्यस्य पूर्वावधिः। स हि स्वभावविरुद्धतया कार्यकालमनश्नुवानस्तत्पूर्व एवेति सिद्धम्। अतः किमन्यैरित्यत्राह—भावोपष्टम्भेति। भावान्तरमभाव इति स्थापयिष्यते। इह त्वपिना पक्षान्तरान्वारोहस्सूच्यते। अयं भावः—यदि कार्येण प्रागभाव एव केवलोऽपेक्षणीयस्तद्वदेतेनाप्यानादिना भाव्यम्। अतः प्रागवधिः सन्नप्यभावस्तत्तद्भावशेखरित एव स्वात्मानमवधित्वेन नियच्छेदिति। नित्यस्वभाववत् कादाचित्कस्वभावस्यापि हेतुनैरपेक्ष्यं स्यादित्यत्राह—कार्यं निर्हेतुकं चेदिति। विषमं निदर्शनमित्याकूतम्। तदेवानिष्टप्रसङ्गेन व्यनक्ति—कथमिति। निरवधित्वे गत्यन्तरं न संभवतीति भावः। कार्यस्य निर्हेतुकत्वं सतोऽसतो वेति विकल्पे पूर्वत्र नित्यता, अन्यत्र तुच्छता स्यादिति विभा[ज्य]व्यम्, पूर्वावधिवदुत्तरावधेरप्यसत्कल्पत्वान्नित्यत्वम्। न हीतःपरं न भवितव्यमनेनेत्यपि नियमोऽस्ति।

ननु कादाचित्कत्वं स्वभावो न वा? आद्ये नित्यस्वभाववन्निरपेक्ष एव स्यात्। द्वितीये कथमतत्स्वभावः कारणसहस्रेणापि तत्स्वभावतां नेतुं शक्यः? स्वभावस्य च हेतुमत्त्वे निर्हेतुकमिति किञ्चिन्न स्यात्। अतो नित्यस्वभाववन्नियतकालस्वभावता स्यादिति शङ्कते—कादाचित्केति। कादाचित्कस्वभावत्वेऽपि हेत्वधीनतां तत एव नित्यस्वभाववैषम्यं चाभिप्रेत्याह—न नियमनादिति। न हि यतः कुतश्चिदनन्तरमनेन भवितव्यमिति कादाचित्कत्वम्, अनियमादृष्टेः; अस्मादनन्तरमेवेदमिति कालविशेषव्यवस्थादृष्टेरित्यर्थः। उक्तनियमानभ्युपगमे सर्वत्र सर्वदा सर्वतः कार्यं स्यादिति तर्कबाधं व्यनक्ति-अन्यथेति। न हि धूमादिना यदा कदाचिद्भवितव्यमित्यस्य कादाचित्कत्वं नियम्यते; तथा सति गर्दभादेरनन्तरं तदुपलब्धिर्वा सामग्र्यनन्तरमनुपलब्धिर्वा स्यादिति ॥ ३३ ॥

आनन्द०—आक्षेपिकी संगतिमाह—नन्विति। आदिशब्देन क्षणरुच्यादिसंग्रहः। नियतपूर्वमिति—यद्यपि सूर्याम्बुदादयस्सन्त्येव, तथाऽपि न तेषामवधित्वं, तत्सत्त्वेऽपि तदभावादिति भावः। विपरिवर्तस्येत्यादि—तद्दृष्टान्तेन घटादावेवावधिनैरपेक्ष्यानुमानस्य संभवादिति भावः यदृच्छासिद्धा इति—अकारणमिति भावः। प्रतिज्ञामात्रं नार्थसाधकमित्यत्राह—अयं भाव इति। आतपादीत्यादिशब्देन पृथिवीपीतभागादिपरिग्रहः। तदनुपलम्भेऽपीति—नच योग्यानुपलम्भादभावनिर्णयः भर्जनकपालस्थवह्निक(कार)णानामिव तेजःक(कार)णानामप्यनुपलम्भसंभवादिति भावः। विपरिवर्तप्रसङ्गं परिहरति—अनिश्चितेति निश्चितसाध्यविपर्ययस्येति—

ननु घटादावपि मृदादेर्यदृच्छासिद्धत्वमुक्तमिति चेत्; मैवम्; परिवेषादौ कारणभावनिश्चये हि तद्व्याप्तया घटादावपि मृदादेर्यदृच्छासिद्धता। परिवेषादौ संदेहेन तद्‌बलाद्यदृच्छासिद्धत्वकल्पनायोगात्। तथा च घटादौ सकारणकत्वव्याप्तिग्रहस्संभवत्येव। परिवेषादौ तत्संदेहश्च व्यभिचारसंदेहतया न प्रतिबन्धक इति साध्यविपर्ययनिश्चयात् न पक्षत्वमिति भावः। विपरिवर्तप्रसङ्गं परिहरति—एतेनेति। निश्चितसाध्यदृष्टान्तेन (तत्रापि) कारणविशेषानुमानसंभवादिति भावः। नन्वस्तु पूर्वावध्यनुमानम्। तथाऽपि प्रागभाव एव पूर्वावधिः कारणमस्तु। न च प्रागभावस्यपि यत्कारणं तदेव कारणम(तदेवावधिर)स्तु, न तु प्रागभावः, तद्धेतोरेवेति न्यायादिति वाच्यं; तस्य हेतुनिरपेक्षत्वात्। तथा च भावरूपकारणनिरपेक्षत्वमेव निर्हेतुकत्वमित्या(मस्तित्वत्या) शङ्कते—अस्तु हेतुनिरपेक्ष इति। स्वभावविरुद्धतया—भावाभावयोः स्वरूपेण विरुद्धतया। तत्पूर्व एव—अतः किमन्यैरिति सिद्धमित्यत्रा(मित्याहेत्य)न्वयः। अन्यैः—भावरूपैः। भावान्तरमिति—तथाच प्रागभावमात्रहेतुकत्वेऽपि भावरूपकारणजन्यत्वं सहेतुकत्वं सिद्धमिति भावः। अन्वारोहोऽङ्गीकारः।

ननु भावोपष्टम्भ एव मास्तु मानाभावादित्यत्राह—अयं भाव इति। तद्वदेवेति—ननु जन्यत्वस्यानादित्वविरुद्धतया तद्व्याप्यप्रागभावजन्यत्वस्यापि विरोधितया कथं ततोऽनादित्वसादित्वसाधनमिति चेन्न; कार्यं प्रागभावमात्रजन्यं चेत् प्रागभावाधिकरणक्षणोत्तरत्वाधिकरणक्षणवर्तिप्रागभावप्रतियोगि न स्यात्; यत्त(यच्च)दधिकरणक्षणोत्तरत्वाधिकरणक्षणवर्तिप्रागभावप्रतियोगि तन्न तन्मात्रजन्यं यथा घटो दण्डमात्रजन्यः इत्यापादनेनानादित्वसिद्धेरिति भावः।

अन्ये तु प्रागभावमात्रजन्यत्वे प्रागपि प्रागभावसत्त्वेन कार्योत्पत्तेर्विलम्बायोगात् अतीतका(लेऽपि)ले (कार्यस्यावश्यकतया) कार्याभावस्यासंभवात् अनादित्व (मर्थात्प्राप्त)मित्याहुः। कार्यस्याद्यजातस्य पूर्वकालसत्त्वमेवानादित्वमित्यप्याहुः।

तत्तद्भाव शेखरित इति—मूर्ति(मृत्त)त्वादिविशिष्टः। नित्यस्वभाववदिति—अन्यथा नित्यस्वभावस्यापि तत्सापेक्षता स्यादिति भावः। तदेवेति—निदर्शनवैषम्यमेवेत्यर्थः। कार्यस्य नित्यत्वं विभाज्यमित्यन्वयः। विभाज्यं—विवेचनीयम्। नन्वेतावता पूर्वावधिराहित्यमस्तु; उत्तरावधिवैधुर्यरूपनित्यत्वं कुत इत्यत्राह—पूर्वावधिश्चेदिति। असत्कल्पत्वमविरोधित्वमित्यर्थः। असत्कल्पत्वमेवोपपादयति—न ह्येति। उत्तरावधित्वाभावे सर्वस्याप्युत्तरावधिवैधुर्ये(ण)तदनन्तरमित्यभावादित्यर्थः।

यद्वा ननु ध्वंस उत्तरावधिरस्त्वित्यत्राह—न हीति। ध्वंसस्याप्युक्तरीत्या उत्तरावधिवैधुर्येणानादित्वात्सर्वस्याप्युत्तरावधित्वानुपपत्तेरित्यर्थः। नित्यस्वभाववदिति—पूर्वत्र स्वभावत्वाविशेषादहेतुकत्वशङ्का; संप्रति स्वभावत्वव्याघाताधी-

नेति वैषम्यम् । स्व(स्व)भावस्य चेति—सर्वस्यापि सहेतुकत्वप्रसङ्गात्; नचेष्टापत्तिः भवद्भिर्नित्यानित्यव्यवस्थाकरणादिति भावः। स्वभावत्वेऽपि कार्यस्य हेत्वधीनता दर्शनबलादभ्युपेयते न तु नित्यस्य; तदभावात्; अन्यथा कार्यस्य धूमादेर्यतः कुतश्चिद्गर्दभादिजातीयादनन्तरमप्युपलब्धिरुत्पत्तिस्स्यात् । वह्न्यादिघटितसामग्र्यनन्तरमपि कदाचिदनुपलब्धिस्स्यात्; नचेष्टापत्तिः; धूमादेर्वह्न्याद्यनन्तरमेव नियतोपलम्भविरोधात् । तदर्थिनो नियमेन तत्रैव प्रवृत्तेः। स्वक्रियाव्याघातादेरपि प्रसङ्गान्नियतावधिकत्वमङ्गीकरणीयमित्याह—स्वभावत्वेऽपि इत्यादिना । नहीति—(धूमादिना) यदाकदाचिद्भवितव्यमित्येतावता नियतकारणानङ्गीकारे तस्मादनन्तरमनेन भाव्यमिति कादाचित्कत्वमुत्पत्ति(त्तिर्न)न नियन्तुं शक्यमित्यर्थः ।। ३३ ।।

अक्ष० परिवेषविद्युदादि कार्यविशेषेषु नियतपूर्ववृत्तेः कस्यचिददर्शनादन्यत्रापि कार्यस्य कारणपूर्वकत्वनियम एव न स्यादित्यत्राह—कादाचित्कस्येति । कदाचिदेवोत्पत्तिमन्यमानस्य कालावधिनियतिकरं—देशकालादिसहकृतं आतप वलाहकादिकं पूर्वत्र विद्यमानमेव कारणं स्यादित्यर्थः। क्वचित्तदनुपलम्भेन सन्देहेऽपि । तद्दृष्टान्तेन अन्यत्र कारणपूर्वकत्वनिषेधः न बाधयितुं शक्य इति भावः । तर्हि तत्तत्प्रागभाव एव 'तत्तद्धेतुरास्तां'किमन्येनापीत्यत्राह—भावोपष्टम्भशून्य इति । भावरूपकारणान्तरवैशिष्टयमन्तरा केवलस्य प्रागभावस्य कार्यावधिकत्वं न संभवतीत्यर्थः। प्रागभाव मात्रावधिकत्वे तस्यानादित्वेन कार्यस्याप्यनादित्वमेवस्यात् नतु कादाचिकत्वमिति भावः ।

नित्यस्वभावस्येव कादाचित्कस्वभावस्यापि हेतुनैरपेक्ष्यं स्यादित्याशंकायामाह—कार्यं निर्हेतुकं चेदिति । निर्हेतुकत्वे गगनतत्कुसुमादिवत् नित्यत्वतुच्छत्व योरन्यतरावश्यम्भावेन कादाचित्कत्वमेव न स्यादिति भावः ।

ननु स्वभावो नाम स्वतस्सिद्धो धर्मः तस्य सहेतुकत्वे स्वभावत्वमेव हीयेत अतो निर्हेतुकेत्वेऽपि यथा गगनादेः खपुष्पवन्न तुच्छत्वं खपुष्पस्य वा गगनादि वन्न नित्यत्वं तद्वत्कादाचित्कस्वभावस्यापि न नित्यत्वं तुच्छत्वं वा प्रसञ्जयितुं युक्तमित्यत्राह—कादाचित्कस्वभावाद्यदीति । नेति । कादाचित्कस्वभावो निर्हेतुको न भवतीत्यर्थः। कुत इत्यत्राह—नियमनादिति । कस्यचिदनन्तरमेव नियमेन जननादित्यर्थः। विना हेतुविशेषं तदनुपपत्तेरितिभावः। उक्त नियमानभ्युपगमे सर्वदा सर्वत्र सर्वोत्पत्तिप्रसङ्ग इत्याह—अन्यथेति ।

इति त्रिगुणपरीक्षायां कार्यकारणभावभङ्गनिरासः।

नेत्रादेर्दीपिकादेरिव नियमयुतं तैजसत्वादिसाध्ये
रूपादिग्राहकत्वं यदि करणतया स्यादसाधारणत्वम् ।
तत्साहाय्यं स्वसिद्धं भवति गमकतामात्रमप्यञ्जनादा-
वक्षाहङ्कारिकत्वं श्रुतिपथनिपुणैर्घोषितं नैव बाध्यम् ।। ३४ ।।

सर्वा०—प्रकृतस्य प्रकृत्यादिकारणवादस्य प्रतिपक्षा निरस्ताः । तत्र देहादिवदिन्द्रियाणामपि भौतिकत्वं वदतः प्रतिवक्ति—नेत्रादेरिति ।। नियमयुतं सावधारणम्, रूपादिषु मध्ये रसाद्यग्राहकत्वेन विशेषमित्यर्थः । चक्षुस्तैजसं रसाद्यग्राहत्वे सति रूपग्राहकद्रव्यत्वात् दीपवदति । एवं त्वगिन्द्रियं वायवीयं स्पर्शादिषु मध्ये स्पर्शस्यैव ग्राहकद्रव्यत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकवायुवत् । रसनस्याप्यत्वे रसस्यैवेति दन्तान्तस्तोयदृष्टान्तः । घ्राणस्य पार्थिवत्वे गन्धस्यैवेति चन्दनकुङ्कुमादिगन्धाभिव्यञ्जकनिम्बत्वगादिनिदर्शनम् । श्रोत्रस्य तु नभस्त्वे श्रोत्रं गुणावान्तरजात्या स्वगुणसजातीयगुणग्राहकम् बाह्येन्द्रियत्वात् चक्षुरादिवदिति । शब्दो गुणावान्तरजात्या सजातीयगुणवतेन्द्रियेण गृह्यते बहिरिन्द्रियव्यवस्थापकगुणत्वाद्रूपादिवत् । शब्दो भूतेन्द्रियग्राह्य इति वा । बहिरिन्द्रियव्यवस्थापकत्वादित्येव हेतुः । तथा श्रोत्रं भौतिकम्, बाह्येन्द्रियत्वात् चक्षुरादिवत् । आकाश इन्द्रियारम्भकः, भूतत्वात् भूतान्तरवदिति । शब्दोपलब्धिर्वा भूतेन्द्रियकरणिका बाह्येन्द्रियव्यवस्थापकोपलब्धित्वात्, रूपोपलब्धिवत् । तत्राद्येषु चतुर्ष्वनुमानेषु हेतुविकल्पमनूद्य दूषयति—यदिकारणतयेत्यादिभिः । यस्मिन्सति कार्यं भवत्येव तत्करणम्; तच्च सन्निकर्षविशेषविशिष्टतयेन्द्रियाणाम् । ननु—

उद्विग्नो ह्यन्धकारेण कश्चिदेवं ब्रवीत्यपि ।
किं चक्षुषा ममैतेन दृष्टं दीपेन यन्मया ।।

इति दीपादिषु साधकत्वं कश्चिद् ब्रूयात्, अतस्सपक्षवृत्तेर्हेतोः कथमसाधारणत्वम् ? इत्थम्—आलोकेन विनाऽपि जन्तुभेदेषु चक्षुषो रूपादिग्राहकत्वं सिद्धम् । अन्धकारे च मनुष्यादीनां तत्त्वतोऽन्यथा वा । अत ईदृशं प्राधान्यमपेक्ष्य इन्द्रियेषु करणत्वं दीपादिषु सहकारित्वं च प्रख्यातमनुरुध्य विकल्पप्रवृत्तेरविरोधः । कोटयन्तरं दूषयति— तत्साहाय्यं स्वसिद्धमिति । करणभूतेन्द्रियापेक्षया तेषामेव दीपादिवत्सहकारित्वमनुपपन्नमित्यर्थः । दीपादीन्प्रति सहकारित्वान्नासिद्धिरिति चेत्तर्हि प्रमातृप्रमेययोरपि तथात्वात्तत्सिद्धिः स्यात् । तयोः सतोरपि कदाचित्कार्यं नास्तीति चेत्तावता करणत्वं माभूत् तत्सहकारित्वं तु सिद्धमेव । दीपे च सति भाव एवेति नियमो नास्ति । संप्रयोगविशेषसाहित्यात्स्यादिति चेत्तर्हि तयोरपि ततस्स्यादेवेत्यनैकान्त्यम् । एतेन करणत्वादिविकल्पानादरेण रूपादिबोधकद्रव्यत्वमात्रं हेतुरित्यपि निरस्तम् । तद्व्यनक्ति—भवतीत्यादिना । आदिशब्देन प्रमात्रादिसंग्रहः ।

अञ्जनस्य शक्ये प्रतिबन्धकनिवर्तकत्वमात्रमिति चेन्न; अशक्ये गूढनिदर्शनादौ शक्त्याधानेन सहकारित्वदृष्टेः। शक्त्याधानं हि सहकारीति चेन्न; दीपादावपि तथा क्लृप्तिप्रसङ्गात्। सत्तयैव हेतुत्वं तत्र दृष्टमिति चेदत्रापि तथास्तु; अविशेषात्। ये च तत्तदिन्द्रियदोषैरपि रूपादिधीरस्तीति मत्वा * शरीरयोगे सत्येव साक्षात्प्रमितिसाधनमिति लक्षयन्ति; तन्मते तत्तद्दोषैरप्यनैकान्त्यम्। तेषां तैजसत्वानभ्युपगमात्। दन्तान्तस्तोयदृष्टान्तश्चायुक्तः; विषयसंस्कारस्य व्यञ्जकत्वायोगात्। न हि ग्रस्यमानं किंचिदसंस्कृत्य दन्तान्तस्तोयस्योपकारत्वम्; तावता च रसव्यञ्जकत्वे रसगन्धाद्युद्भवहेतोरग्न्यादेरपि किं तन्न स्यात्? वायुश्च वेगेनाभिघ्नन् सूक्ष्मान्सलिलकणानन्तश्शरीरं प्रवेशयति। शैत्यं तु तेषां त्वगिन्द्रियप्रवेशवैषम्याद्विशदमनुभूयते। तावता स्पर्शव्यञ्जकत्वे गन्धोपकारस्य तस्य तव्द्यञ्जकत्वमपि किं नेष्यते? तथा च घ्राणपार्थिवत्वानुमानं दुःस्थमिति।

एवं चतुर्णां भौतिकत्वासिद्धौ तदृष्टान्तेन श्रोत्रभौतिकत्वानुमानान्यपि च्छिन्नमूलानि। आकाश इन्द्रियारम्भक इति चायुक्तम्। श्रोत्रस्य त्वन्मते तदारब्धत्वाभावात्। भूतत्वादिति च घटादिभिरनैकान्तिकम्। किंचात्र लोकसिद्धनयनबुद्बुदादिपक्षीकारे रूपादिविशेषैस्तेषां पार्थिवत्वसिद्धेः कालात्ययापदेशः। अनुमानतस्त्विन्द्रियसिद्धिरशक्येति वक्ष्यते। सामान्यतो दृष्टादधिष्ठानातिरिक्तेन्द्रियसिद्धावपि तदाहङ्कारिकत्वं श्रौतमबाध्यम्। इन्द्रियाण्यहङ्कारविशेषा इति हैरण्यगर्भोक्तिरपि तदाहङ्कारिकत्वानुगुणा; अतः श्रुतिसिद्धपक्षीकारेऽपि बाध एव। प्रतिप्रयोगाश्च—बाह्यचेन्द्रियाण्यभौतिकानि इन्द्रियत्वात्, मनोवत्। प्रत्येकपक्षीकारेण वा चक्षुरतैजसमित्यादि; तावेव हेतुदृष्टान्तौ; परस्परं वा घ्राणादयो दृष्टान्ताः। विपक्षे बाधकसदसद्भावश्च समः, यत्किंचिद्दृष्टान्तमात्रानुसारेण प्रसङ्गस्य सुलभत्वादिति। परोक्तानुमानानामागमबाधमभिप्रेत्याह—अक्षाहङ्कारिकत्वमिति। श्रुतिपथनिपुणैः—मनुपराशरपाराशर्यादिभिः। घोषितं—बहुषु प्रदेशेषु स्पष्टोक्तं नैव बाध्यम् अशक्तैरनुमानैरन्यपरैश्च वाक्यैरिति शेषः॥ ३४॥

आनन्द०—अवसरसंगतिमाह—प्रकृत्येति। रसाद्यग्राहकत्व इति—आत्मनि व्यभिचारवारणाय रसाद्यग्राहकत्व इति। परमाणौ व्यभिचारवारणाय रूपग्राहकत्वादिति। सन्निकर्षादौ व्यभिचारवारणाय द्रव्यत्वादिति। घटादिग्राहकतयाऽसिद्धिप्रसङ्गादत्रापि रूपादिष्विति बोध्यम्। तदर्थश्च—रूपादिषु पञ्चसु मध्ये इति। अत्र ग्राहकत्वं लौकिकप्रत्यक्षजनकत्वं; तेनोपनयादिवशाद्र(दिना र)सादिग्राहकतया नासिद्धिः। एवमुत्तरानुमानेष्वपि द्रष्टव्यम्। रसस्यैवेति—रसस्यैव ग्राहकत्वं हेतुरित्यर्थः। एवं गन्धस्यैवेत्यादावपि बोध्यम्। निदर्शनं—दृष्टान्तः।

बहिरिन्द्रियेति—इन्द्रियपञ्चके स्वग्राहकेन्द्रियेतरेन्द्रियनिरूपितस्वग्राहकेन्द्रियनिष्ठभेदानुमितिहेतुसाक्षात्कारविषयगुणत्वादित्यर्थः। तेन 'इन्द्रियव्यवस्थापकत्वं इन्द्रियसाधकत्वं; न च शब्दजन्यत्वमिन्द्रियस्य ! इन्द्रियानुमापकत्वं चेत् द्रव्यत्वादौ व्यभिचारः' इत्यपास्तम्। गुणत्वादिति शब्दत्वादौ व्यभिचारवारणाय। असिद्धिवारणाय साक्षात्कारविषयेति। सुखादौ व्यभिचारवारणाय बहिरिन्द्रियेति। द्रव्यत्वादौ व्यभिचारवारणाय इन्द्रियपञ्चकेति विशेषणमिति ध्येयम्।

बहिरिन्द्रियव्यवस्थापकत्वादिति--पूर्ववदेवार्थः। शब्दत्वादौ साध्यसत्त्वात् न व्यभिचार इति गुणत्वस्यानुपादानम्। शब्दोपलब्धिरिति–उपलब्धित्वं शाब्दोपलब्धौ व्यभिचारीतीन्द्रियेति विशेषणम्। सुखाद्युपलब्धौ व्यभिचारवारणाय बाह्ये'ति विशेषणम्। हेतुविकल्पमभिप्रेत्येति--अभिव्यञ्जकादित्यत्र हेतावभिव्यञ्जकत्वं किं क(का)रणत्वं ? यद्वा क(का)रणसहकारित्वं ? अथवा बोधकत्वमात्रमिति विकल्पमभिप्रेत्येत्यर्थः। तच्चेति इन्द्रियाणामेव तथात्वात् पक्षमात्रवृत्तित्वेन असाधारण्यमिति(त्यर्थः) भावः। अन्धकारेणोद्विग्नः—भीतः। साधकतमत्वं -करणत्वम्। कश्चित् इत्यनेन लौकिकव्यवहा(र विरहस्सूच्यते)रापरिज्ञानादिरुच्यते। सपक्षवृत्तेरिति–दीपादीनां सपक्षत्वमिति भावः। किं दीपादीनां रूपादिसाक्षात्कारमात्रे करणत्वम् ? उत मनुष्यकर्तृकरूपादिसाक्षात्कारे इति विकल्पमभिप्रेत्य आद्ये दूषणमाह–? आलोकेन विनापीति। द्वितीये दूषणमाह-- अन्धकारे चेति। ननु तर्हि व्यभिचाराद्दीपादेस्सहकारितापि न स्यात्। यदि तद्विशेषे विशदज्ञानादौ सहकारिता; तत्र करणताऽप्यस्त्वित्यत्राह—ईदृशेति। रूपोपलब्धिमात्रे चक्षुषो यस्मिन् सति भवत्येवेति रूपं प्राधान्यमभिप्रेत्येत्यर्थः। न च विशदज्ञानं प्रत्यपि करणत्वम्; अन्यत्र क्लृप्तचक्षुष एव करणस्य सत्त्वेन सहकारितामात्रत्वात् ? अन्यथा गौरवात्। कोटयन्तरमिति–सहकारित्वमित्यर्थः। सहकारित्वं किं करणं प्रति ? उत कारणमात्रं प्रति ? इति विकल्प्य आद्ये आह— करणेति। तेषामेव—इद्रियाणामेव। अनुपपन्नमिति—सहकारिसहकारिमतोर्भेदाधीनत्वादिति भावः। द्वितीयमाशङ्क्य दूषयति—दीपादीनित्यादिना। तथात्वात्– सहकारित्वात्। तत्सिद्धिस्स्यात्--तैजसत्वसिद्धिस्स्यात्। तदभावात्तत्र व्यभिचार (इति भावः)स्स्यादित्यर्थः।

ननु करणत्वमेव सहकारित्वेन विवक्षितमिति चेत्; तत्राह— दीपे चेति। तथा च असाधारण्यं तदवस्थमिति भावः। तयोरपीति—प्रमातृप्रमेययोरप्युक्तविधया नियमरूपकरणत्वसंभवेनानैकान्त्यमित्यर्थः। तृतीय आह—एतेनेति। आदिशब्देनेति—ननु प्रमातृप्रमेययोर्न स्वरूपमात्रग्रहसहकारित्वं; रसादिग्रहं प्रत्यपि सहकारित्वात्। रसादिग्रहासहकारित्वे सति रूपग्रहसहकारित्वस्य विवक्षितत्वात्; तथाच न व्यभिचार इति चेन्न; दृष्टान्तासिद्ध्या तथा विवक्षाया

असंभवात्। तेषामपि सन्निकर्षतया स्वनिष्ठस्पर्शादिव्यञ्जकत्वादिति भावः। इदञ्च अवधारणाविवक्षायां। तद्विवक्षायां त्वञ्जनादिद्रव्यसंस्कारकद्रव्ये दोषविशेषे च व्यभिचारो बोध्यः। **अञ्जनस्येति** -तथाच उपलब्धिसाधकत्वाभावान्न व्यभिचार इति भावः। **दीपादावपीति**–तस्य शक्त्याधायकत्वेन सहकारित्वाभावप्रसङ्गादित्यर्थः। **सत्तयैवेति**—दीपादीनां चक्षुरादौ शक्त्याधायकता नास्ति (स्तीत्यर्थः।) स्वरूपेण हेतुत्वादिति भावः। **अत्रापीति**—अञ्जनादावपि स्वरूपेण हेतुताक्लृप्तिरस्तीत्यर्थः।

ये चेति—नयनगतपित्तद्रव्येण शङ्खे पित्तरूपस्योपलम्भात् रसनगतदोषेण क्षीरादौ तिक्तताया उपलम्भात् तद्व्यावर्तनाय इन्द्रियलक्षणे प्रमितिविशेषणं तार्किकर (क्षणकृदादयः प्रतिक्षिपन्ति) क्षादावुक्तमित्यर्थः। अनैकान्त्यमेवोपपादयति—**तेषामिति**। **विषयसंस्कारकः**—विषये (द्रव्ये) ग्रस्यमाने रसाद्युत्पादकः। विषयसंस्कारकत्वमुपपादयति—**नहीति**। ननु रसाभिव्यञ्जकत्वं रसाभिव्यक्तिप्रयोजकत्वम्; तच्च रसोत्पादोपलम्भजनकसाधारणमिति नासिद्धिरित्यत आह—**तावता चेति**। तथाच पार्थिवत्वसाधकहेतोस्तत्र व्यभिचार इति भावः। त्वचो वायवीयत्वसाधकहेतावपि दृष्टान्तवैषम्यमाह—**वायुश्चेति**। उपलब्धि (मात्र) प्रयोजकत्व (मात्र) विवक्षायां दोषमाह—**तावता स्पर्शव्यञ्जकत्वे इति**। त(त्र)स्य वायोस्तत्र पार्थिवत्वसाधकहेतोर्व्यभिचार इति भावः। श्रोत्रस्य भौतिकत्वसाधकानुमानानां व्याप्यत्वासिद्धिरूपं साधारणं दोषमाह—**एवं चतुर्णामिति**। आकाश इन्द्रियारम्भकः इत्यनुमाने श्रोत्रस्य तन्मते नित्यतया बाधो व्यभिचारोऽपि दोष इत्याह—**आकाश इति**। किञ्च चक्षुराद्यनुमानेषु प्रत्यक्षसिद्धस्य पक्षत्वमुतानुमानसिद्धस्य आहोस्वित् श्रुतिसिद्धस्य इति विकल्पमभिप्रेत्य आद्ये दोषमाह—**लोकसिद्धेति**। द्वितीय आह—**अनुमानत इति**। वक्ष्यते—इन्द्रियाणामेकादशत्वसाधनावसर इत्यर्थः। **सामान्य इति**—रूपादिज्ञानं पक्षीकृत्य क्रिया क(का)रणजन्या इति सामान्यतो दृष्टादित्यर्थः। अपिशब्देनाधिष्ठानातिरिक्ततया सिद्धिर्न शक्येति सूच्यते। **तदिति**—तथाच आहङ्कारिकत्व(विरोधी न भवतीत्यर्थः) श्रुत्या तैजसत्वाद्यनुमानबाध इति भावः। योगशास्त्रे अहङ्कारत्वमिन्द्रियाणामुक्तमिति तदाहङ्कारिकत्वकथनं तेन विरुद्धमित्यत आह—**इन्द्रियाणीति**। कार्यकारणयोस्तत्त्वः पट इत्यभेदव्यपदेशदर्शनादाहङ्कारिकत्वविरोधी तद्व्यपदेशो न भवतीत्यर्थः। तृतीयं दूषयति—**अत इति**। धर्मिग्राहकमानबाध इत्यर्थः। **परस्परमिति**—चक्षुःपक्षकानुमाने घ्राणं घ्राणपक्षके चक्षुरादिक्रमेण परस्परपक्षकानुमाने परस्परं दृष्टान्ता इत्यर्थः। **अन्यपरैरिति**—भूताप्यायितत्वमात्रपरैरित्यर्थः॥ ३४॥

अक्ष० अथेन्द्रियाणां भौतिकत्ववादं निरस्यति—नेत्रादेरिति। [१]"चक्षुः तैजसं रूपादिषुमध्ये रूपस्यैव ग्राहकत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत्" "[२]रसनं आप्यं रसस्यैव ग्राहकत्वात् दन्तान्तस्तोयवत्" "[३] घ्राणं पार्थिवं गन्धस्यैव ग्राहकत्वात् कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्" इति तार्किका वदन्ति। तत्र हेतुशरीरविकल्पेन दूषणमाह—रूपादिग्राहकत्वमिति। नियमयुतमिति। सावधारणमित्यर्थः। रसाद्यग्राहकत्वेन विशेषमिति यावत्। ग्राहकत्वं ग्रहकरणत्वं, तत्सहकारित्वं, ग्रहकजनकत्वमात्रं, वेति विकल्प्याद्ये दूषणमाह—स्यादसाधारणत्वमिति। यस्मिन्सति यत्कार्यं भवत्येव तद्धि तत्कार्यकरणं दीपे सत्यप्यचक्षुष्मतो रूपग्रहाजननात् रूपग्रहकरणत्वं सपक्षतयाऽभिमते दीपे नास्तीति भावः।

द्वितीये दूषणमाह—तत्साहाय्यंत्वसिद्धमिति। करणभूतस्य चक्षुषः करणानुग्राहकत्वरूपं तत्सहकारित्वं न संभवति स्वस्यैव स्वानुग्राहकत्वाभावादिति स्वरूपासिद्धिस्स्यादिति भावः। तृतीये व्यभिचारमाह—भवतीति। अञ्जनादावतैजसे गूढनिधिदर्शनसाधनतायाः सत्वादिति भावः। आदिना भ्रमजनकेन्द्रियदोषाश्रयतया ज्ञानसामान्यसाधनचेतनादिपरिग्रहः। अपि च चक्षुर्गोलस्य पक्षीकरणे—तस्य पार्थिवत्वेन प्रत्यक्षसिद्धेन तैजसत्वस्य बाधः। तदतिरिक्तस्याप्रत्यक्षादनुपलब्ध्या आश्रयासिद्धिश्च स्यात् अनुमानतस्त्विन्द्रियसिद्धिरशक्येति वक्ष्यतेतदेकादशत्वसाधनावसरे। सामान्यतोदृष्टात् रूपादिग्रहः सकरणकः कार्यत्वादित्याद्यनुमानात् अधिष्ठानातिरिक्तेन्द्रियमेवेत्याह—अक्षाहंकारिकत्वमिति। श्रुतिपथनिपुणैः। मनु पराशर पाराशर्यादिभिः। घोषितम्—स्पष्टोक्तं। नैचबाध्यमिति—त्वदुक्तैरनुमानैरितिशेषः। त्वदुक्तानुमानानामागमबाधादिति भावः॥३४॥

तन्मात्रेष्विन्द्रियाणां श्रुतिरिह न लयं वक्ति किंतु प्रवेशं
नो चेत्पृथ्व्यादिवाक्येष्विव हि लयपदं व्योम्नि चाक्षेषु च स्यात्।
भूतैराप्यायितत्वात्क्वचिदुपचरिता भौतिकत्वोक्तिरेषा-
मन्नाप्तेजोमयत्वं श्रुतिरपि हि मनःप्राणवाचामुवाच॥ ३५॥

सर्वा० ननु *इन्द्रियाणि तन्मात्रेष्विति श्रुत्या भौतिकत्वममीषां भातीत्यत्राह—तन्मात्रेष्विति॥ पूर्वापरपर्यायेष्विव आकाशेन्द्रियादिपर्याययोर्लयो न पठ्यते। न चात्रानुषङ्गः कार्यः; सति गत्यन्तरेऽध्याहारवत्तस्याप्ययोगात्। अन्यथा द्वितीयादिषु सर्वेषु पर्यायेष्वप्यनुषङ्गेण भाव्यम्; वैरूप्यायोगात्। इन्द्रियाणामाकाशप्रकृतित्वं च सर्वोपबृंहणविरुद्धम्। अस्यां चोपनिषदि भूतादेराकाश आकाशाद्वायुरित्यादिः सृष्टिक्रम उक्तः। *षोडश विकारा इति श्रुतेश्चासामञ्जस्यं स्यात्।

अतो वरमधिकरणत्वोक्तिमात्रानुसारादाकाशस्येन्द्रियेषु, तेषां चाकाशारम्भकतन्मात्रेषु प्रवेशविशेषाभिधानमित्यभिप्रायेणाह—किंतु प्रवेशमिति।

अयं भावः—यद्यप्याकाशस्येन्द्रियैः प्रागपि संबन्धः, तथाऽपि तत्तदिन्द्रियाप्यायकभूतांशानां स्वकारणलयक्रमात् आकाशदशापन्नत्वात्तदानीमिन्द्रियेष्वाकाशस्यैव संसर्गः। अनन्तरमाकाशे च शब्दतन्मात्रावस्थे तानीन्द्रियाणि शब्दतन्मात्रसंसर्गीणि भवन्ति। अतस्तन्मात्रान्तराणामपि तदवस्थापत्त्या तत्तदंशभेदविवक्षया बहुवचनोपपत्तिः। अतः *तन्मात्राणि भूतादौ लीयन्त इत्यपि बहुवचनं गतार्थम्। [अत्रैवं व्याख्यातम्–इन्द्रियाप्यायकभूतांशानां सर्वेषामाकाशतापन्नत्वादाकाशस्यैव इन्द्रियसंसर्गं आसीत्; पञ्चानामपि भूतानां शब्दतन्मात्रापन्नत्वादिन्द्रियाणिं शब्दतन्मात्रांशभेदेषु संसृष्टान्यासन्निति।] एवमनभ्युपगमे वाक्यवैरूप्यदोषं व्यनक्ति—नो चेदिति।

ननु *श्रोत्रं नभो घ्राणमुक्तं पृथिव्या इत्यारभ्य *वाय्वात्मकं स्पर्शनमामनन्ति इत्युच्यते; *नभः श्रोत्रं च तन्मयम् इत्यादि च। अत आहङ्कारिकत्ववाक्यं परम्परया नेयमित्यत्राह—भूतैरिति। तदिदं व्यवस्थापितं वेदार्थसंग्रहे—*भूतैस्त्वाप्यायनं महाभारत उच्यते इति। इममेव न्यायम् *अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् इत्यादिष्वपि योजयितुमाह—अन्नाप्तेजोमयत्वमिति। न खलु हैतुकैरपि मनसः पार्थिवत्वं कल्प्यते; वायुरूपस्य प्राणस्याप्यत्वम्; तस्मादाप्यायनपरत्वमेव तत्र वाच्यम्, एवमन्यत्रापि। *अग्निर्वाग्भूत्वा मुखं प्राविशत्, आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशदित्यादिषु तत्तद्देवताधिष्ठाने तात्पर्यम्; *अग्निं वागप्येति इत्यप्ययश्रुतिश्चाधिष्ठातृदेवतांशापक्रमणपरेत्यभाष्यत। *ओषधीर्लोमानीत्यादिना अनपियद्भिर्लोमादिभिस्सह पाठात्॥ ३५॥

आनन्द०—आक्षेपिकी संगतिमाह—नन्विति। तन्मात्रेष्विति श्रुत्येति। कार्यस्योपादान एव लयनियमादिति भावः—पूर्वापरेति। 'पृथिव्यप्सु लीयते' इत्यारभ्य 'वायुराकाशे प्रलीयते' इति पठित्वा अनन्तरं आकाश इन्द्रियेषु इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ लीयन्ते इति पठ्यते; सर्वत्र लयपदं पठित्वा मध्ययोराकाशेन्द्रियपर्याययोर्लयपदं न पठ्यत इत्यर्थः। अन्यथेति—अत्र प्रकरणे अनुषङ्गस्याभिप्रेतत्वे इत्यर्थः। ननु श्रूयमाणस्थले अनुषङ्गासम्भवात् यत्र न श्रूयते तत्रानुषङ्गोऽस्तु वैरूप्यं च सोढव्यमिति चेत्; अनुषङ्गं विनाप्यर्थबोधकत्वेन वाक्यपरिसमाप्तौ वैरूप्यमभ्युपगम्य तत्कल्पनायोगात्। सोपबृंहणैतदुपनिषद्विरोधाच्चानुषङ्गो न युक्त इत्याह–इन्द्रियाणामिति। भूतादिः—तामसाहङ्कारः। षोडशेति–विकाराणां न्यूनत्वप्रसङ्गादिति भावः। नन्वनुषङ्गाभावे कथं वाक्यपरिसमाप्तिरित्यत्राह—अतो वरमिति। नन्वेवमपि प्रवेशनक्रियाया अश्रवणात् तदध्याहारादनु-

षङ्ग एव वरमित्यत्राह—अयं भाव इति। संसर्ग एव प्रवेशः; स च सप्तम्यर्थ इति नाध्याहार इति भावः।

ननु सर्वेषामाप्यायकभूतानां तत्तन्मात्राणां च लयक्रमेण आकाशदशापत्तिः तस्यापि लयक्रमाच्छब्दतन्मात्रतापत्तिरिति तन्मात्रसंसर्गे इन्द्रियाणि तन्मात्रेष्विति सप्तमीबहुवचनमनुपपन्नं; शब्दतन्मात्रस्यैकत्वात् इत्यत आह–अत इति। लयक्रमतः तन्मात्रान्तराणामपि शब्दतन्मात्रतापत्तौ तत्तदंशभेदस्य तत्र सत्त्वादित्यर्थः। एवं प्रथमाबहुवचनमप्यनुपपन्नमित्याह—अतस्तन्मात्राणीति। अंशभेदविवक्षात इत्यर्थः। ननु आकाशस्य प्राक्तनसम्बन्धापेक्षया इन्द्रियैस्सम्बन्धान्तरं वाच्यं; नचाप्यायकभूतानामाकाशतापत्तिमात्रेण तत्सम्भवतीत्याह–अत्रैवमिति। भाष्ये इति शेषः। 'आप्यायकानां भूतानामिन्द्रियैस्संबन्धविशेषोऽस्ति। इन्द्रियसम्बन्धविशेषवतां भूतानामाकाशतापन्नत्वे तत्र तत्सम्बन्धोऽप्याकाशे पर्यवसितः तथा तत्सम्बन्धापन्नस्यैवाकाशस्य तन्मात्रतापन्नत्वे तत्सम्बन्धाश्रयतन्मात्रसं(तत्सं)बन्ध इन्द्रियाणामासीदित्यर्थः' इति व्याख्यातमित्यर्थः।

यद्वा उक्तार्थे अभियुक्तसंमतिमाह—अत्रैवमिति। आहङ्कारिकत्वेऽप्युपबृंहणविरोधमाशङ्कय परिहरति—ननु श्रोत्रं नभ इति। परिहारप्रकारमाह—तदिदमिति। ननु महाभारतवचनादाप्यायनमस्तु; उपबृंहणान्तराद्भौतिकत्वं चास्त्विति चेत्; न; भौतिकत्वोपबृंहणस्य आहङ्कारिकत्वश्रुतेश्चान्यतरस्यान्यथासिद्धौ वाच्यायां श्रुतेः प्राबल्यात् तदनुरोधादुपबृंहणं व्यवस्थाप्यम्। किंच 'स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्' इत्यादिन्यायेनापि महाभारतवचनानुसारित्वमिति भावः। तत्र युक्तिमाह—न खल्विति। अन्यपरत्वस्य परेणावश्यं वाच्यत्वादित्यर्थः। ननु 'अग्निर्वाग्भूत्वा' इत्यादिना उत्पत्तिः 'अग्निं वागप्येति इति लयश्च श्रूयते इत्याह—अन्यत्रापीति। देवताप्रवेशाक्रमणपरत्वात् नोत्पत्तिलयपरत्वमित्यर्थः॥ ३५॥

अक्ष० "पृथिव्यप्सु प्रलीयते" इत्युपक्रम्य प्रवृत्तया "ननु" इन्द्रियाणि तन्मात्रेषु" इतिश्रुत्या भूतसूक्ष्मतन्मात्रेषु इन्द्रियाणां लयाभिधानेन तत्कार्यत्वावगमात् भौतिकत्वसिद्धिरित्यत्राह—तन्मात्रेष्विति। न लय वक्तीति—अस्मिन्पर्याये लीयत इत्यनाम्नानादिति भावः। तर्हि किमत्रोच्यत इत्यत्राह—किन्त्विति। प्रवेशमिति। संबन्धमात्रमित्यर्थः। तत्तदिन्द्रियाप्यायकतत्तद्भूतांशानां पृथिव्यादिलयक्रमेण आकाशतापत्तौ आकाशस्यैवेन्द्रियेषु संबन्धोस्तीति "आकाशमिन्द्रयेषु" इतिपूर्वपर्याये उक्तमिति संप्रतिपत्तव्यं। आकाशस्यापि तन्मात्रे लये तन्मात्रतापन्नेषुआप्यायकभूतांतेषु केवलेन्द्रियाणां संसर्गमात्रमस्मिन्पर्याये अधिकरणत्वमात्राभिधायिन्या "तन्मात्रे ष्विति" सप्तम्या उच्यत इति भावः। अन्यथा

वाक्यवैरूप्यदोषो दुर्निवार इत्याह—नोचेदिति। पृथिव्यादिपर्यायेष्विव आकाशेन्द्रियपर्याययोरपि लयविवक्षायां 'पृथिव्यप्सु प्रलीयते आपस्तेजसिलीयते" इत्यादिवत् पृथक्-पृथक् लीयत इति पदं प्रयुक्तं श्रूयेत नचैवमस्ति नचानुषङ्गात्तत्सिद्धिः अबादिपर्यायेषु पृथक्पृथगेव लयपदश्रवणेनानुषङ्गनिरोधादिति। भावः। एवं सति "श्रोत्रं नभो घ्राणमुक्तं पृथिव्या" इत्यारभ्य वाय्वात्मकं स्पर्शनमामनन्ती" त्याद्युपबृंहणविरोधस्स्यादित्यत्राह—भूतैरिति। एषामिन्द्रियाणां भूतैराप्यायितत्वात् भारतादिषु भौतिकत्वोक्तिरौपचारिकीत्यर्थः। आहङ्कारिकत्वश्रुतेर्बलीयस्त्वादिति भावः। "अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वाक्" इत्यादावप्ययमेव न्यायोऽवगन्तव्य इत्याह अन्नेति। मन आदौ पार्थिवत्वादेः केनाप्यनभ्युपगमादिति भावः।

अथवा तदाप्यायनमात्रेण तदात्मकत्वोपचारः कुत्रापि न दृष्ट इत्यत्राह—अन्नेति। मन आदेः अन्नादिमयत्वं आप्यायनमन्तरा अन्यादृशं दुर्वचमिति भावः। अपिना औपचारिकोक्तोपबृंह्मण समुच्चयः॥ ३५॥

इतिइन्द्रियाणां भौतिकत्वाहङ्कारिकत्वनिरासः।

रूपादिज्ञानसिद्धौ यदि करणतया कल्पनं धीन्द्रियाणां
तद्वद्गत्यादिकर्मस्वपि करणतया सन्तु कर्मेन्द्रियाणि।
कर्मज्ञानाक्षहेत्वोस्समपरिहरणा ह्यन्यथासिद्धिशङ्का
तस्मादेकादशाक्षाण्यपि निगमविदो मन्वते न्यायपूर्वम्॥ ३६॥

अथ मनष्षष्ठान्येवेन्द्रियाणि, वागादिष्विन्द्रियशब्दो भाक्त इति वदतः प्रतिबन्दिपूर्वकेण प्रमाणेन प्रतिक्षिपति—रूपादीति॥ अयं भावः—यद्यागमः प्रधानीक्रियेत तदा *इन्द्रियाणि दशैकं चेति व्यवतिष्ठेत। यदा तु क्रिया करणपूर्विकेति व्याप्त्या रूपादेः सुखादेश्चोपलब्धिः, स्मृतिश्च क्रियात्वात्करणपूर्विकेति कल्प्येत; तदा वचनादानादिक्रियाऽपि तत्पूर्विका कल्प्या स्यात्। अथ तावताऽधिष्ठानातिरिक्तं न सिध्यतीति मन्यसे, ज्ञानेन्द्रियेष्वपि तथैवालोकादिभिरधिष्ठानैश्च सिद्ध साध्यता। गोलकादिसद्भावेऽपि कदाचित् कार्यं न जायते इत्यतिरिक्तसिद्धिरितिचेत्; समं वागादावपि। सामग्रीवैकल्यात् प्रतिबन्धकाच्च तत्र तथेति चेत्; चक्षुरादावपि तथैव। सत्यप्यालोकादौ दोषादर्शनेऽपि गोलकादितः कदाचित्कार्यं न जायत इति चेत्, तदपि समम्। दोषस्सूक्ष्मस्तत्रेति चेत्; अत्राप्येवमस्तु। ज्वालाघ्रातबीजन्यायेन विशेषादर्शनेऽपि दोषस्य कल्प्यत्वात्, कल्पितेऽपि ह्यतीन्द्रिये तदानीं तद्भ्रंशहेतुस्सूक्ष्मो दोषस्त्वयाऽप्यङ्गीकार्यः। अन्यथा कथं कर्मेन्द्रियक्लृप्तेरन्यथासिद्धिः?

तं० मु० क० २३

ननु च यदि चक्षुर्गोलक एवेन्द्रियम्, कथं तर्हि दूरस्थं व्यवहितं वा न प्रकाशयति ? इत्थम्—यथाऽयस्कान्तादेरव्यवहितानतिविप्रकृष्टाकर्षकत्वं, तथेह प्रकाशकत्वम्। आभिमुख्यविशेष एव च बाह्यैरुक्तस्संबन्धोऽस्तु। नन्वयस्कान्तादिवदाभिमुख्याभावेऽपि दर्पणादिभिः स्वमुखादेः पश्चाद्भागवर्तिनां च दर्शनं कथं स्यात् ? भवतो वा कथम् ? चाक्षुषस्य तेजसः प्रतिलोमवृत्त्येति चेत्; सा कुड्यपाषाणादौ कथं न जायते ? मणिसलिलदर्पणादिषु च कथं भवति ? अपर्यनुयोज्यतत्तद्वस्तुस्वभावविशेषादिति चेत्; अस्तु तर्हि स एव सन्निधिविशेषसामर्थ्यादिनभिमुखवस्तुनिदर्शनस्य हेतुः। द्रव्यान्तरकल्पनाद्वरं सिद्धद्रव्यसामर्थ्यविशेषस्य प्रतिफलनादौ संमन्तव्यस्य कार्यान्तरयोजनामात्रम्। अतो धीन्द्रियाणां कल्प्यत्वे कर्मेन्द्रियाणामपि क्लृप्तिरनिवार्या; अन्यथासिद्धिशङ्कापरिहारौ च समाविति। तदेतत्सर्वमभिप्रेत्याह—कर्मेति। त्यज्यतां तर्हि वर्गद्वयमिति चार्वाकोत्थानं प्रतिरुणद्धि—तस्मादिति। अतीन्द्रियेन्द्रियकल्प्यत्वासंभवादप्राप्ते च शास्त्रस्यार्थवत्त्वादिति भावः। निगमविद इत्यनेन श्रुतिस्मृत्यनुविधानसूचनम्। *एका कन्या दशेन्द्रियाणि इत्यादेर्न हि कश्चिद्बाधो दृश्यते। नच कणभक्षाक्षपादाद्यनुसारेण षट्कावच्छिन्नेन्द्रियलक्षणक्लृप्तिर्युक्ता। यथाऽऽहुः—

सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्॥ इति॥

वक्ष्यते चानुवृत्तं तल्लक्षणं सात्त्विकाहङ्कारोपात्तत्वम्। न च कर्मेन्द्रियाणां तन्त्रान्तरसिद्धं राजसत्वमनुमन्तव्यम्; शब्दप्रमाणके यथाशब्दं व्यवस्थापनात्। साङ्ख्यैरप्यत्र शास्त्रमेवानुसृतम्—*सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारादिति। साधितं च सप्तगत्यधिकरणसिद्धान्ते हस्तादीनामपि तादृशमिन्द्रियत्वं न्यायपूर्वम्। *क्रिया करणपूर्विकेति व्याप्त्यनुसारेण तत्तत्करणमात्रानुमानेऽपि अलौकिकविशेषप्रतिपत्तिश्शास्त्रत एवेति भावः। एवं च शास्त्रयोन्यधिकरणे भाष्यम्—*अतीन्द्रियेऽर्थे शास्त्रमेव प्रमाणमिति। चन्द्रबिम्बपरभागादिषु व्यवधानविप्रकर्षादिभिरस्मदादीन्द्रियग्रहणानर्हेषु नानुमानम्; तस्य पक्षाश्रयहेतुधर्मव्यापकान्वयमात्रातिरिक्तेषु प्रवृत्त्ययोगात्, साध्यसामान्यस्य तु विवक्षितविशेषविरुद्धव्याप्तत्वेन तदाकर्षकत्वायोगात्। अतोऽतीन्द्रियध [र्मि] र्मकल्पनाद्वरं दृष्टेषु केषुचिद्वैषम्यमात्रस्वीकार इति तात्पर्यम्॥ ३६॥

आनन्द०—प्रसङ्गसंगतिमाह-अथेति। अवसरसङ्गतिरित्यन्ये। नन्वनुमानात्सिद्धिश्चान्यथासिद्धिश्च समे इत्युक्तं; तावता न सङ्ख्याविशेषसमर्थनं उभयथाऽपि व्याप्त्यभावात् इत्यत्राह—अयं भाव इति। इन्द्रियाणामतीन्द्रियत्वेन तत्रानुमानागमयोरेव प्रमाणतया पर्यवसानात् प्रथमभागमपक्षे स्वपक्षसिद्धि(र्नस्य)

स्स्यादित्याह–यद्यागम इति । अनुमानपक्षेऽपि प्रतिबन्दिमुखेन स्वमतसिद्धिमाह––यदा तु इत्यादिना । सुखाद्युपलब्धिः स्मृतिश्च मनोऽनुमाने पक्षः । ननु अधिष्ठानेन वागाद्यवयवेनान्यथासिद्धिरिति शङ्कते––अथ तावतेति । आलोकादिभिः––विषयप्रकाशकसौरालोकादिभिः । ज्ञानेन्द्रियादिष्वन्यथासिद्धयभावं शङ्कते–गोलकादिति । सममिति–मूकादीनां वागाद्यवयवसत्त्वेपि वचनादिक्रियाया अदर्शनात् परिहरणं सममित्यर्थः । न समतेति शङ्कते—सामग्रीति । पुनर्ज्ञानेन्द्रियेषु वैषम्यमाशङ्कते—सत्यपीति । तदपीति—दोषदर्शनमित्यर्थः । सूक्ष्मेति—वागादौ दोषाभावोऽनुपलम्भमात्रान्न वक्तुं शक्य इत्यर्थः । तदपि सममित्याह—अत्रापीति । ज्वालाघ्रातं-ज्वालास्पृष्टम् । ननु अप्रत्यक्ष (अनुपलब्ध) प्रतिबन्धकल्प(नापक्षे)ने कल्प्यत्वाविशेषात् इन्द्रियक्लृप्तिरेवास्तु इत्यत्राह—कल्पितेऽपीति । इन्द्रियकल्पना गुर्वीति भावः । अन्यथा—सूक्ष्मदोषस्याकल्पने ।

ननु ज्ञानेन्द्रियानभ्युपगमे बाधकमस्ति न तु वागादीनामिति वैषम्यं शङ्कते–नन्विति । गोलकमात्रस्य प्रकाशकत्वे तस्य दूरस्थविषयसम्बन्धाभावादप्राप्तप्रकाशकत्वस्य वाच्यत्वेन अविशेषात् सर्वं सर्वदा प्रकाशयेदिति भावः । दूरस्थादिप्रकाशरूपातिप्रसङ्गं प्रतिबन्द्या परिहरति—इत्थमिति । अयस्कान्तादेस्संबन्धाभावेऽप्याकर्षे यथा नातिप्रसङ्गस्तथेहापीत्यर्थः । सम्बन्धेनैवातिप्रसङ्गः परिहरणीय इति यदि तदा सोऽप्यस्तीत्याह—आभिमुख्यविशेष इति । (ननु) आभिमुख्यस्य (स्याव्याप्तत्ववत्) न सम्बन्धत्वमिति शङ्कते—नन्वयस्कान्तादिवदिति । अतिरिक्तेन्द्रियाभ्युपगमवादिनोऽपि पाश्चात्येन चक्षुषस्सम्बन्धाभावात् कथं प्रकाश इति चोद्यं समानमित्याह—भवतो वेति । दर्पणाद्यभिघाताच्चाक्षुषतेजसः प्रतिलोमगतिर्भवतीति भावः । सेति—तैरपि प्रतिघातात् सा प्रतिलोमवृत्तिजयितेताविशेषादिति भावः । परिहारमाशङ्कते—अपर्यनुयोज्येति । स एव—वस्तुस्वभाव एव । सन्निधिविशेषः—दर्पणापेक्षयाभिमुख्यरूपः ।

ननु सामर्थ्यविशेषस्यापि कल्प्यत्वादिन्द्रियकल्पने कः प्रद्वेष इत्यत्राह—द्रव्यान्तरकल्पनादिति । प्रतिफलनं दर्पण एव न कुड्यादाविति प्रतिफलनासामर्थ्यं संमतं तस्यैव दर्पणादेस्सिद्धस्य स्वाभिमुखवस्तुग्रहणसामर्थ्यमपि कल्प्यतां न धर्म्यन्तरं गौरवादिति भावः । कार्यान्तरयोजनं—प्रकाशरूपकार्यान्तिरेण सामर्थ्यविशेषस्य सम्बन्धः । वर्गद्वयमिति—कर्मज्ञानेन्द्रियवर्गद्वयमित्यर्थः । चार्वाकस्यातीन्द्रियार्थाभावेन इन्द्रियाभावादिति भावः । अतीन्द्रियेति—पूर्वोक्तरीत्या अनुमानाद्यप्रवृत्तावपि श्रुतिबलात् सिद्धिः; तत्प्रामाण्यं च समर्थितमिति भावः । एकाकन्येति—चञ्चलत्वान्मनः कन्येत्युक्तम् । 'इन्द्रियाणि दर्शकं च' इति स्मृ(तिरनुसन्धेया)तिः । ननु शरीरसंयुक्तमतीन्द्रियं ज्ञानकारणमिन्द्रियमित्यादिलक्षणाभावाद्वागादीनां नेन्द्रियत्वमित्यत्राह—न च कणभक्षाक्षपादेति । तेषामव्याप्तत्वान्न लक्षणत्वमिति भावः । अव्याप्तिमेव दर्शयति— यथाऽऽह्वुरिति ।

सर्वलोकव्यवहारसिद्धवागादावव्याप्तेरिति भावः। अन्यथा गवां क्षीरवत्त्वे सति सास्नावत्त्वं लक्षणमुक्त्वा पुङ्गवानां गोत्वं नेति ब्रुवतः किमुत्तरमिति भावः। तर्हि अव्याप्त्यादिरहितं तल्लक्षणं किमित्यत्राह— वक्ष्यते चेति। ननु भवदभिमत (भवदुक्त)स्यापि लक्षणस्य राजसाहङ्कारोपात्त(तेषु)कर्मेन्द्रियेष्वव्याप्तिरित्याह— नच कर्मेन्द्रियाणामिति। तन्त्रान्तरं—शैव(मतशास्त्रं) मतम्।

नन्वेवं तर्हि राजसाहङ्कारस्या (स्येन्द्रिया) नारम्भकत्वे प्रकृतित्वमेव न स्यात्। नचेष्टापत्तिः; षोडश विकारा इति परिगणनविरोधात्। नच प्रकृतित्वमवस्थाश्रयत्वमात्रं विवक्षितम्; आत्मादेरपि संयोगादिरूपविकारवत्त्वेन 'अष्टौ प्रकृतयः' इति विभागविरोधात्। नापि द्रव्यान्तरप्रकृतित्वम्; तथा भूतानामपि प्रकृतिकोटिप्रवेशे 'अष्टौ प्रकृतय' इति विरोधात्। तथा च तत्त्वान्तरप्रकृतित्वं वाच्यमिति राजसाहङ्कारस्य प्रकृतित्वाभावेन विकारकोटिप्रवेशप्रसङ्गः। नचाहङ्कारजातीयस्य प्रकृतित्वात् तस्यापि प्रकृत्यन्तर्भावः; वैपरीत्यप्रसङ्गात् इति चेत्।

अत्राहुः—सात्विकतामसयोरिन्द्रियभूतारम्भकयो राजसस्य प्रकृतित्वं (नाम) न निमित्त(त्वमात्रं;) तया; किंतु द्विधा विभक्त उभयत्र सम्बद्धस्सन् उपादानीभू(यैव) ततयैव (सहकारि) यथा शरीरोत्पत्तौ (पञ्चीकृतानां तदंशानां) पृथिव्या इतरभूतानि; तथा पृथ्व्या अण्डाद्युत्पत्तौ। नच सहकारित्वव्यपदेशो न स्यात् स्याच्चोपादानत्वव्यपदेश इति वाच्यम्; यथा पञ्चीकरणस्थले इतरभूतानां स्वल्पतया नियतैकभूतत्व(भूतत्वादि)व्यपदेशः तथा सहकारित्वेनैवात्रापि व्यपदेशः; अन्यथा कार्ये दण्डादेरिवानुवृत्त्ययोगाद्रजोगुणः तत्कार्यचलनादिक्रिया च न स्यादिति।

अन्ये तु निमित्तत्वमेव राजसाहङ्कारस्य; न च विकारकोटिपरिगणनापत्तिः; तत्वान्तरोपादाननिष्ठतत्वविभाजकधर्मावच्छिन्नत्वमुपादानत्वम्; तद्भिन्नतत्वविभाजकधर्मावच्छिन्नत्वं विकारत्वमिति विवक्षितत्वात्! उपष्टम्भकगतेनापि रजसा चलनाद्युपपत्तिः यथा स्वर्णतैजसत्वमते गुरुत्वादीत्याहुः।

सात्विकः—सत्वगुणेन व्यवह्रियमाणः—सत्वगुणाश्रयः इति यावत्। वैकृताहङ्कारः—सात्विकाहङ्कार। सात्विकान्येकादशेन्द्रियाणि सात्विकाहङ्कारादुत्पद्यन्त इत्यर्थः। एकादशकः—एकादशसंख्यया परिमितः; 'संख्याया अतिशदन्तायाः' इति कन्। 'ननु सप्तगतेर्विशेषितत्वात्' इति सूत्रे सप्तसंख्या प्रतीयत इत्याशङ्क्य सिद्धान्तसूत्रे 'हस्तादयः' इत्यनेन सिद्धान्तितत्वान्नात्र विरोध इत्याह— साधितमिति। ननु न्यायपूर्वकत्वे पूर्वोक्तं श्रुतत्वं विरुध्यते प्रमाणान्तराप्राप्ततात्पर्यकत्वाच्छास्त्रस्येत्यत्राह—अलौकिकेति। सर्वो विशेष आनुमानिक एव; यथा चन्द्रविम्बपरभागः तद्विशेषश्च; तथेन्द्रिये वा तद्विशेषे वा शास्त्रं प्रमाणमित्याह— चन्द्रबिम्बेति। तत्रापि विशेषशास्त्रमेव प्रमाणमित्यर्थः। आदिशब्देन सौरादि-

परभागग्रहणम् । द्वितीयेन तेन सौरादिग्रहणम् । तत्र हेतुमाह —तस्येति । पक्षश्चासावाश्रयश्च पक्षाश्रयः । हेतुरूपो धर्मः हेतुधर्मः । अन्वयः—तेषां सम्बन्धः । ननु सामान्यतस्साध्यसिद्धौ तद्विशेषः साध्येनैवानुमीयतामित्यत्राह—साध्यसामान्यस्येति । सामान्यतस्सिद्धस्य साध्यस्य पक्षादन्यत्र सिद्धविशेणापेक्षया विरुद्धधर्मदर्शनात् विशेषविरुद्धत्वमित्यर्थः । तथा च अनुमानमात्रेण न गोलकातिरिक्तेन्द्रियसिद्धिरित्युपसंहरति —अत इति ।। ३६ ।।

भक्ष०—चक्षुरादीनामिव वागादीनामपीन्द्रियत्वं प्रमाणसिद्धमित्याह—रूपादिज्ञानसिद्धाविति—क्रियाचेत् करणपूर्विका स्यादिति व्याप्त्या रूपसुखाद्युपलब्धिः करणपूर्विका क्रियात्वादित्यनुमानात् चक्षुरादिसाधने गमनादानादिक्रियापि करणपूर्विकेत्यनुमानेन पादादिसिद्धिरपि दुर्निवारा भवेदित्याह—पूर्वार्धेन ।

अथ उक्तानुमानस्य प्रत्यक्षसिद्धपादाद्यवयवमात्रेण अर्थान्तरत्वशंकायां चक्षुराद्यनुमानेऽपि गोलकाद्यधिष्ठानमादाय तत्प्रसक्तेः तुल्यतया तद्वारणाय वक्तव्यस्य क्वचिदधिष्ठानसत्वेऽपि उपलब्ध्यादिक्रियाव्यभिचारेण तस्य करणत्वासंभवस्य पादादि कर्मेन्द्रियानुमानेऽपि तुल्यतामाह—कर्मज्ञानेति । अन्यथासिद्धीति । अर्थान्तरमित्यर्थः । अतः एकादशापि कर्मज्ञानसाधनानि इन्द्रियाण्येव न तु षडेवेत्याह—तस्मादिति ।

अनुमानतः करणमात्रसिद्धावपि अतीन्द्रिय तद्विशेषसिद्धेरसंभवात् मानान्तराप्राप्ते तत्र शास्त्रस्यैव—प्रमाणत्वाच्चेत्यर्थः । निगमेति । "दशेमे पुरुषे प्राणाः आत्मैकादशः 'एका कन्या दशेन्द्रियाणि" 'इन्द्रियाणि दशैकञ्च देवावैकारिका दश एकादशं मनश्चात्र" इत्यादिकं विवक्षितम् । सात्विकाहङ्कारोत्पन्नत्वमेकादशानामपि अनुगतं लक्षणमितिभावः ।। ३६ ।। इत्येकादशेन्द्रियसिद्धिः ।

सांख्यैस्त्रेधोक्तमन्तःकरणमिह मनोबुद्धचहङ्कारभेदा-
च्चित्तं चान्ये चतुर्थं विदुरुभयमसत्तादृशश्रुत्यभावात् ।
तत्तत्तत्त्वोक्तिमात्रं न हि करणभिदामाह क्लृप्तिस्तु गुर्वी
बुद्धचाद्याख्या निरूढा क्वचिदिह मनसो वृत्तिवैचित्र्य [मात्रा] योगात् ।।३७।।

सर्वा० उक्तेष्विन्द्रियेषु एकमेवान्तःकरणमिति तत्त्वम् । सांख्यास्त्वाहुः—*करणं त्रयोदशविधम्; *अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् इति । अन्ये तु चित्ताख्यमप्यन्तःकरणमन्यदाहुः । तदनुभाषते—सांख्यैरिति ।। तदिदं मतद्वयं निष्प्रमाणकमित्याह—उभयमसदिति । कथमित्यत्र श्रुत्या कल्पनया वा तत्सिद्धिरिति विकल्पे प्रथमस्यासिद्धिमाह - तादृशेति ।

नंनु तान्यपि त्रीणि सुबालोपनिषदि पृथिव्यादितत्त्वपङ्क्तौ मनसोऽनन्तरं पठ्यन्त इत्यत्राह—तत्तदिति। अयं—भावः—न हि तत्त्वपङ्क्तिपाठमात्रान्मनस्सहपाठमात्राद्वा करणत्वं सिध्येत्; तथा सत्यव्यक्तादीनामपि तत्प्रसङ्गात् इति। द्वितीयं दूषयति—वर्त्तिरिति। एकस्यैव हि मनसः स्मृत्यनुभवभेदेन वा संकल्पविकल्पभेदेन वा वृत्तिभेदमन्येऽप्याहुः। श्रूयते च * कामस्संकल्प इत्यादौ *एतत्सर्वं मन एवेति। अत्र *आयुर्घृतमित्यादिवत्सामानाधिकरण्यम्। पुरुषधर्मा एव हि वस्तुतः कामादयोऽध्यवसायादयश्च। तदिह पुरुषबुद्धिभेदनियतसामग्रीभेदव्यवस्थितं वृत्तिभेदमात्रं न करणभेदकल्पकमिति भावः।

ननु *चक्षुश्च द्रष्टव्यं च नारायण इत्यादिना पञ्चज्ञानेन्द्रियाण्युक्त्वा *मनश्च मन्तव्यं च नारायणः, बुद्धिश्च बोद्धव्यं च नारायणः, अहङ्कारोऽहङ्कर्तव्यं च नारायणः, चित्तं च चेतव्यं च नारायण इत्याम्नातम्। अनन्तरं चैवं कर्मेन्द्रियाण्यधीतानि। अतः करणगणमध्यपाठादग्रचप्रायनयेन बुद्ध्यादीन्यपि करणानि स्युरित्यत्राह—बुद्ध्याद्याख्येति। तथा च भाष्यम् *अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते इति। अतस्तत्त्ववर्गमध्ये मनोऽनन्तरं बुद्ध्यादिचित्तान्तपाठोऽपि मनस एव हि वृत्तिभेदविशिष्टस्येति नेतुं शक्यम्। न च चित्तं नाम तत्त्वान्तरं सृष्टिप्रलयप्रकरणेषु पठ्यते। *अयमेव त्वहङ्कार उत्कृष्टजनावमानहेतुरित्यादिप्रथमसूत्रभाष्यमहमर्थहेयत्वनिरासपरतयाऽन्यार्थम्; अन्वारुह्याप्युपपत्तेः। अनुग्राहकत्वमात्रेण परम्परया वा गर्वहेतुत्वोक्तेरविरोधादिति॥ ३७॥

आनन्द० प्रासङ्गिकीं संगतिं दर्शयति—उक्तेष्विति। विप्रतिपत्तिं दर्शयति—सांख्यास्त्विति। 'करणं त्रयोदशविधम्' इति सांख्यसप्ततिश्लोके बाह्याभ्यन्तरविभागाभावेऽपि बाह्यानां दशत्वे शेषाणामान्तरत्वं सिध्यतीति भावः। विशेषतोऽपि तत्रैवोक्तमिति दर्शयति—अन्तः करणमिति। वाचस्पतिनेत्थं व्याख्यातं—'अन्तःकरणं महदहङ्कारमनोभेदेन त्रिविधम्। दशविधमपि बाह्यमिन्द्रियं त्रयस्यान्तःकरणस्य विषयाख्यं—बुद्धीन्द्रियं आलोचनेन कर्मेन्द्रियं स्वव्यापारेण संकल्पाभिमानाध्यवसायेषु विषयमाख्याति द्वारीभवतीत्यर्थः।

अन्ये स्त्विति—मायिमतानुसारिण इत्यर्थः। असिद्ध्यभावमाशङ्कते—नन्विति। प्रतिज्ञामात्रं न साधकमित्यत्राह—अयं भाव इति। तथा सतीति—व्यभिचारान्न साधकमिति भावः। द्वितीयमिति—वृत्तिभेदमादायान्यथासिद्धो व्यपदेशभेदो न साधक इति भावः। ननु मन (सो)सि वृत्तिभेदोऽप्यसिद्धः कल्प्य इति कल्प्यत्वाविशेषात् कारणभेद एव कल्प्यतामित्यत्राह—एकस्यैव हीति। सांख्या

अपि एकस्यैव मनसो वृत्तिभेदेन चित्तं मन इति व्यपदेशभेदं निर्वहन्तीत्यर्थः। संकल्पः—कर्तव्यताध्यवसायः। विकल्पः—अयमिति निश्चयः। न च विनिगमकाभाव इत्यत्राह—श्रूयते चेति। एकस्यैव मनसो बाह्यवृत्तय इति सिद्धा इत्यर्थः। चकारेण 'पञ्चवृत्तिर्मनोवद्व्यपदिश्यते' इति प्राणविषयसूत्रसिद्धत्वं चाभिप्रेतम्।

ननु भवन्मते कामादीनामात्मधर्मत्वात् म(नसि श्रूयन्त इत्य युक्तं ?) नोवृत्तित्वं कथम् ? तथा सति करणस्यैवात्मत्वप्रसङ्गः। कथं वा तेषां भेदव्यपदेशनिमित्तत्वं चेत्यत्राह—अत्रेति। तथा च तद्गतत्वाभावेऽपि तत्सामानाधिकरण्यनिर्देशः तद्भेदव्यपदेशनिमित्तत्वं च सम्भवतीत्यर्थः।

ननु पूर्वतन्त्रे स्थानप्रकरणयोर्बलाबलविचारेऽपि इष्टिसोमात्मकराजसूयान्तर्गताभिषेचनीयनामकसोमयागसन्निधौ विदेवनादयस्समाम्नाताः। ते किं सर्वस्य राजसूयस्याङ्गं उताभिषेचनीयस्येति संशय्य सन्निधि (वशा) बलादभिषेचनीयस्याङ्गमिति पूर्वपक्षयित्वा श्रुत्यादिविहिताङ्गसंदंशाद्राजसूयाङ्गत्वम् ? पवित्रादारभ्य क्षत्रस्य धृतिं यावत् अङ्गविधिषु प्रायेण 'राजसूयाय ह्येना उत्पुनाति' इति राजसूयप्रकरणानुवृत्तिसत्त्वादिति राद्धान्तितम्; तन्न्यायेन संदंशात् करणत्वबुद्ध्यनुवृत्तेः करणत्वमिति शङ्कते—नन्विति। अग्रचप्रायेति—अग्रचा (ग्रचप्राया)णां बहुत्वे तन्मध्यगतस्याप्यग्रचत्वबुद्धिविषयत्वम्। तथा करणमध्यपाठात् करणत्वनिश्चय इत्यर्थः। अपसिद्धान्तं वारयति—तथाच भाष्यमिति।

त(अ)त्र युक्तमाकाङ्क्षानुवृत्तिस्तद्बलाद्राजसूयाङ्गत्वं च राजसूयशब्दस्य तदङ्गत्वाकाङ्क्षो द्बोधकस्य सत्त्वात्; नचात्र; करणत्वोद्बोधकमस्ति! नच करणमध्य संदंशात्करणत्वम्! इन्द्रियमध्यसंदंशात् बाह्यमध्यसंदंशाच्च बाह्येन्द्रियत्वस्यापि प्रसङ्गात्। नचेन्द्रियत्वादौ बाधकमस्तीति चेत्, करणत्वेऽपि समानम्। नचेन्द्रियत्वमप्यस्त्विति वाच्यम्; अपसिद्धान्तात्। 'इन्द्रियाणि दर्शकं च' इत्यादिविरोधात्। किंच स्थानप्रकरणाभ्यां लिङ्गं बलीय इति सिद्धान्तितम्। तथाच प्रकृतित्वरूपलिङ्गात् अग्रचप्रायरूपस्थानसदंशन्यायरूपप्रकरणयोर्बाधात् न करणत्वनिश्चय इत्यर्थः। अभिमानः—अहं कर्तेति बुद्धिः। अत इति—ननु संज्ञाचोत्पत्तिसंयोगात्' इत्यधिकरणविरोधः; तथा हि—ज्योतिष्टोमप्रकरणे श्रूयते अथैष ज्योतिः अथैष विश्वज्योतिः अथैष सर्वज्योतिः एतेन सहस्रदक्षिणेन यजेत' इति। तत्रैतच्छब्दपरामृष्टानां ज्योतिरादिशब्दानां योजना सामानाधिकरण्याद्यागमनामत्वं तावत्सिद्धम्। तत्र प्रकृतमेव ज्योति(ष्टोमज्योति)रादिशब्दैरनूद्य, सहस्रदक्षिणारूपगुणो विधीयत इति पूर्वपक्षयित्वा नामान्तरश्रुतौ तावदर्थभेदः प्रतीयते संज्ञाभेदस्यार्थभेदकत्वात् प्रकृतात् ज्योतिष्टोमाद्भेद उक्तः। तथा शब्दान्तराधिकरणे(ऽपि) च यजति ददाति जुहोतीति शब्दभेदात् भेद उक्त इति तन्न्यायेनात्रापि भेदस्स्यादिति चेत्;

अत्राहुः—न तावत् संज्ञाभेदस्योक्ताधिकरणन्यायेन भेदकत्वं बलवता बाधकेन बाधितत्वात्। तदुक्तं तदधिकरणराद्धान्ते—

बलवद्बाधकाच्चासावन्यथात्वं प्रपद्यते।

इति प्रकृते च। एकादशत्ववचनानि बाधकानि। नापि शब्दाधिकरणन्यायः! वेदनध्यानोपासनानां भेदप्रसङ्गात्। आहवनीयादिशब्दानां पशुच्छागादिशब्दानां हविःपुरोडाशादिशब्दानामपि भेदकत्वापत्त्या बहुदोषप्रसङ्गात्। तस्मादत्रापि बाधकाभावे भेदकत्वं वाच्यम्। बाधककरं चात्रोक्तमेवेति।

केचित्तु—तेषां भेदोऽस्तु नाम! नच करणत्वमपि!' तत्साधकाभावात्। अत एव न शब्दान्तराधिकरणविरोधोऽपि। नच भाष्यमूलयोर्विरोधः! इन्द्रियत्वं करणत्वं चाभ्युपेत्य प्रवृत्तेः। नच करणमध्ये पाठात् करणत्वप्रसक्तिः! अनुवादसन्निधेरकिञ्चित्करत्वात्। पुरोवादे महतोऽहङ्कारस्य च तत्वान्तरोपादानतया करणत्वेन्द्रियत्वाभावात्। अत एवाङ्गत्वाभावनिश्चयाद्दर्शपूर्णमासाभ्यामिष्ट्वा सोमेनयजेतेत्यत्र कालार्थस्संयोगो नाङ्गाङ्गिभावार्थं इयुक्तम्। महदाद्यतिरिक्तपरत्वे तु तत्वाधिक्यप्रसङ्गः। ज्ञानादिपरत्वेनान्यथासिद्धिश्च। अहङ्कार शब्दोऽपि ज्ञानपर एव बुद्धिशब्दसन्निधानात्। युक्तं च तथा ज्ञानकरणानां तादधीन्यकथनानन्तरं ज्ञानस्य तथात्वकथनमिति। नच द्रव्यप्रकरणविरोधः! ज्ञानस्यापीन्द्रियादिवत् अवस्थाविशेषाश्रयद्रव्यत्वादित्याहुः।

ननु वृत्तिभेदमादाय कथञ्चिन्नयने को हेतुरित्यत्राह—**चित्तं नामेति।** अन्यथा सृष्टिप्रलयप्रकरणेषु पृथिव्यादिवत् पाठप्रसङ्ग इति भावः। नच 'इन्द्रियाणि तन्मात्रेष्विति मनसो यथा पाठः तथा स एव बुद्ध्यादेः पाठोऽस्तु। किञ्च महदहङ्कारयोरेव बुद्ध्यहङ्कारत्वात् 'प्रकृतेर्महान् महतोऽहङ्कारः' इति तयोः पाठो दृश्यत इति शङ्क्यम्! तैर्बुद्ध्यादेरिन्द्रियत्वानभ्युपगमात्; तदतिरिक्तत्वे पाठाभावात्, 'इन्द्रियाणि दशैकं च' 'चक्षुश्श्रोत्रम्' इति विशेषकीर्तनात्। कीर्तितयोर्महदहङ्कारयोश्च सद्वारकाद्वारकतयेन्द्रियजनकयोः करणत्वाभावाच्चेति भावः। ननु बुद्ध्यादीनामिन्द्रियमध्ये पाठो व्यर्थः मनः पाठमात्रेणाऽपि चरितार्थत्वात् इति चेत्;

अत्राहुः—सर्वेन्द्रियप्रधानस्यापि मनसस्सर्वावस्थायामपि तादधीन्यसिद्ध्यर्थं बुद्ध्यहङ्कारवृत्तिविशिष्टस्य वा सर्वत्र प्रवृत्तिप्रयोजकतया प्राधान्यद्योतनार्थं त्रेधा कथनमिति।

अन्ये तु प्रकरणस्य तादधीन्यमुखेन स्वातन्त्र्यभ्रमनिवृत्तिपरत्वात् न भेदेन कथनवैयर्थ्यं द्रष्टव्यम्। बोद्धव्याहङ्कर्तव्यानां भेदाभावेऽपि पृथगुक्तेरिव किञ्चिद्विशेषमादायापि स्वातन्त्र्यबुद्धिनिरासः फलमित्याहुः।

ननु अयमेव त्वहङ्कार इति भाष्ये अहङ्कारस्य उत्कृष्टजनावमानरूपप्रवृत्ति-करणत्वोक्तेः मनोऽतिरिक्तमप्यन्तःकरणमभिमतमित्यत्राह—अयमेवत्विति । अन्यार्थं—बुद्धिविशेषहेयत्वपरमित्यर्थः । तत्र हेतुः—अन्वारुह्येति । उपपत्तेरिति । अहमर्थात्म (त्व) समर्थनस्योपपत्तेरित्यर्थः । ननु अहङ्कारस्यानर्थहेतुबुद्धिविशेषहेतुत्वाभावे कथं तत्त्याज्यतापरत्वं वचनस्येत्यत्राह—अनुग्राहकत्वेति । तथाच तावन्मात्रेण अञ्जनादिवत् न करणत्वं सिध्यतीति भावः ॥ ३७ ॥

अक्ष०—इन्द्रियाणां न्यूनसंख्याव्यवच्छेदः कृतः अथ अधिक संख्यां व्यवच्छिनत्ति—सांख्यैरिति । "मनोबुद्धिरहङ्कार इति त्रिविधमन्तः करणमिति—"करणं त्रयोदशविधं अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यमित्यस्य अन्तःकरणत्रयस्य बाह्येन्द्रियदशकं विषयमाख्यातीति विषयाख्यं विषयग्रहणेद्वारं भवतीत्यर्थः । चतुर्थमप्यन्तःकरणं केचिदाहुरित्याह—चित्तंचेति । अन्ये । मायामतानुयायिनः । तदुभयं दूषयति—उभयमसदिति । कुत इत्यत्राह—तादृशेति—प्रमाणाभावादित्यर्थः । तत्वपङ्क्तौ मनसा सह बुद्ध्यहङ्कारपाठ एव तत्र प्रमाणं भविष्यतीत्यत्राह—तत्तत्त्वेति अव्यक्तादिवत् तत्वपङ्क्तिपठनमात्रेण करणत्वासिद्धेरिति भावः ।

श्रुत्या अन्तःकरणत्रैविध्यासिद्धावपि कल्पनया अनुमानतस्तत्सिद्धिस्स्यादित्यत्राह—क्लुप्तिरिति । अनेकान्तःकरणकल्पने गौरवान्नतत्कल्पनं युक्तमिति-भावः ।

ननु "चक्षुश्चद्रष्टव्यञ्च नारायणः" इत्यारभ्य इन्द्रियाणां नारायणात्मकत्वनिरूपणमध्ये अहङ्कारादेरपि "अहङ्कारश्च अहङ्कर्तव्यञ्च नारायणः" इत्यादिनिर्देशादग्रचप्रायन्यायादहङ्कारादेः करणत्वमपिसिद्ध्येदित्यत्राह—बुद्ध्याद्याख्येति । अध्यवसायाभिमान चिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारादिशब्दैर्व्यपदिश्यत इति भावः । चिन्ता तु न तत्वान्तरं क्वचिदपि सृष्टिप्रकरणे तस्य पाठाभावादित्यवधेयम् ॥ ३७ ॥

अन्तःकरणवैविध्यभङ्गः

एकं तत्तत्प्रदेशप्रतिनियततया शक्तिभेदं प्रपन्नं
देहव्यापीन्द्रियं चेत्प्रथममिह भवेदागमेनैव बाधः ॥
नो चेत्स्याद्देहभेदप्रतिनियततया सर्वजन्तोस्तदेकं
भेदाम्नानादवक्लृप्तेरपि न च भजते देह एवेन्द्रियत्वम् ॥३८॥

सर्वा०—नन्वेवं बाह्यकरणभेदोऽप्यपोहितुं शक्यः, मनोवदेकस्य वृत्तिभेदात्पृथक्कार्यव्यपदेशोपपत्तेः । आहुश्च बाह्यैकदेशिनः—*एकैकदेहेष्वेकमेवेन्द्रियम् ।

प्रदेशभेदैस्तु रूपादिप्रकाशनशक्तिनियमः। षडायतनागमोऽपि तथैव व्यवस्थाप्यः, स्वरूपभेदप्रयोजनाभावात्। *कल्प्यते शक्तिभेदश्चेच्छक्तिरेवेन्द्रियं भवेत् इति चायुक्तम्, धर्मिकल्पनातो वरं हि धर्मकल्पनम्। प्रदेशानामेव तत्तत्करणत्वोपपत्तौ प्रदेशिक्लृप्तिरनर्थिकेति चेन्न; देहव्यापिनः स्पर्शस्योभयसंमतेः, तस्य च करतल-प्रकोष्ठास्यनेत्रादिषु स्पर्शग्रहणशक्तिवैषम्यदृष्टेः। अतश्चैकस्यैव सर्वत्र देहे स्पर्श-नत्वम्, तत्रतत्र चक्षुरादित्वं चेति। तदेतदाह—एकमिति॥ किमेकेन्द्रियस्य श्रुतस्य कल्पितस्य वा शक्तिभेदव्यवस्थापनमिति विकल्पमभिप्रेत्याद्यं दूषयति प्रथम-मिति। बाधस्य दूषणान्तरादौद्भट्यसूचनाय प्राथम्योक्तिः आगमेनैव-धर्मिग्राहके-णैवेत्यर्थः। गौरवदोषश्च क्लृप्तिपक्षे वक्तव्यः, नास्मत्पक्ष इति चाभिप्रेतम्। इन्द्रियक्लृप्तिः प्रागेव निरस्ता। अत्र तदेकत्वक्लृप्तावतिप्रसङ्गमाह—नो चेदिति। यथैकमेवाकाशं तत्तत्पुरुषादृष्टोर्जितकर्णशष्कुल्यवच्छेदभेदैः प्रतिपुरुषं व्यवस्थितो-पकारकमिति वैशेषिकादिभिः कल्प्यते, तथा त्वयाऽप्येकमेवेन्द्रियं तत्तद्भोगायतन-भेदनियतशक्तिकं सर्वोपकारकं कल्प्यमिति भावः। न चैवमस्त्विति वाच्यम्; अपसिद्धान्तात्।

ननु च नानादेहमध्येषु वसतः कथमेकत्वमिति चेत्; चक्षुर्गोलकाद्यवच्छि-न्नानामिन्द्रियप्रदेशभेदानां कथम्? न कथञ्चिदिति चेत्तर्ह्यनेकेन्द्रियवादः। पुञ्जै-कत्वमस्त्विति चेत् किमतः? ग्राहकांशानां मिथो[भिन्न,विभक्तत्वात्। न च तत्ता तदन्यस्य न च तस्य ततोऽन्यता। सत्तावैजैनवद्वाच्या सर्वमानविरोधतः॥ स्पर्शनस्य पुञ्जस्य भागाश्चक्षुरादय इत्यप्यसत्; नियामकाभावात्। अत्रावयवि-सामान्यसादृश्यापोहादिभिरैक्यकल्पने अपसिद्धान्तातिप्रसङ्गौ, देहातिरिक्तेन्द्रिय-कल्पनं चास्मिन्पक्षे अपार्थम्। न ह्यत्र दृष्टहानिरदृष्टकल्पना वा; कुतस्तद्गौरवम्? अतिरिक्तेन्द्रियकल्पनेऽपि देहावयवानां नियतोपकारकत्वमिष्यते। अस्तु तर्ह्ययमेव पक्ष इत्यत्राह—भेदाम्नानादिति। अयं भावः—भौतिकाद्देहात् इन्द्रियाणां सात्त्वि-काहङ्कारोपादानकत्वेन भेदाम्नानात्—क्लृप्तिप्रसङ्गाभावात् बाधाच्च मुधाऽत्र लघुपक्षोक्तिरिति॥ ३८॥

आनन्द०—आक्षेपसंगतिमाह—नन्वेवमिति।

ज्ञानेन्द्रियाणि पञ्चापि तथा कर्मेन्द्रियाणि च।
मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः॥

इति। बौद्धैः (बाह्यकरणानां) द्वादशानामङ्गीकारादेकदेशिन इत्युक्तिः। आगम इति—

चक्षुः श्रोत्रं तथा घ्राणं रसनं स्पर्शनं मनः।
रूपादिबोधहेतुत्वादेतान्यायतनानि षट्॥

इति बौद्धविलासवचनमपि शक्तिभेदपरतया व्यवस्थाप्यमित्यर्थः। ननु शक्तिभेदो यद्यङ्गीक्रियते तर्हीन्द्रियभेद एवाङ्गीक्रियतां अविशेषादिति शङ्कते—कल्प्यते

शक्तिभेदश्चेदिति। इन्द्रियकल्पनापक्षेऽपि शक्तिभेदकल्पनाया आवश्यकत्वादिति भावः।

ननु यद्येकस्मिन् शक्तिभेदकल्पना तदा चक्षुरादिदेशव्यापीन्द्रियावयवि कल्प्यं; अन्यथा शक्तिभेदव्यवस्थायोगात्; तथाच तदारम्भकतत्तद्देशवर्त्यवयवानामेव करणत्वमस्तु किं तदवयविना तत्र शक्तिभेदकल्पनया च ? इति शङ्कते—प्रदेशानामेवेति। नेति—तादृशस्य त्वगिन्द्रियस्य त्वयाऽभ्युपगमादिति भावः। नन्वेकस्मिन् विचित्रशक्तिकल्पनं क्वचिदपि न दृष्टमित्यत्राह—तस्य चेति। दूषणान्तरादिति—नो चेदित्यादिदूषणान्तरादित्यर्थः। भिन्नेन्द्रियक्लृप्तिपक्षे तदुक्तं परिहरति—गौरवदोषश्चेति। इन्द्रियक्लृप्तिरिति—कल्प्यत्वे गोलकातिरिक्तं न सिध्येदित्यादिना निरस्तेत्यर्थः। अतिप्रसङ्गमेवोपपादयति—यथैकमेवाकाशमिति। तत्तद्भोगायतनं—तत्तच्छरीरं तत्तदिन्द्रियाधिष्ठानं वा। अपसिद्धान्तादिति—'प्रतिपुरुषभिन्नं तदायतनसंज्ञितम्' इत्युक्तेरिति भावः। नानादेहमध्येष्विति—नानादेशस्थदेहान्तरालदेशेष्वित्यर्थः।

ननु नानादेहमध्येषु सत्त्वमसिद्धं। नचानुपलम्भस्साधकः योग्यानुपलम्भाभावात्; न च मध्यदेशेऽपि तत्सत्त्वे कार्यप्रसङ्गः भोयायतनावच्छेदेनैव तदनुकूलशक्तिर्नैयत्यादिति परिहारे सत्येव प्रतिबन्द्या समाधत्ते—चक्षुर्गोलकेति। चक्षुश्श्रोत्रगोलकमध्ये तदवयवानामभावात् तत्प्रदेशावयवानां कथमैक्यमित्यर्थः। तर्हीति—तत्प्रदेशानां भिन्नानामिन्द्रियत्वादिति भावः। किमत इति—ग्राहकांशैक्यानुपपादनादिति भावः। ननु प्रदेशानां मिथो भिन्नत्वेऽपि पुञ्जैक्यमस्तु इति चेत् तत्राह—नचेति। तदन्यस्य—तद्भिन्नस्य तत्ता—तत्तादात्म्यं, तदात्मनो वा तद्भिन्नत्वं न संभवतीत्यर्थः। ननु भिन्नस्याप्यभिन्नताऽस्तु 'स्यादस्ति' इति न्यायेनेत्यत्राह—सत्त्वाद्यैरिति। तथा सति सर्वमानविरोधात् जैनमतवद्दूषणवचनार्हमित्यर्थः। पुञ्जैक्यमपि नास्तीत्याह—स्पर्शनेति।

ननु तव स्पर्शनेन्द्रिय (वि)भा(गभेदेऽपि)गादेरपि स्पर्शनेन्द्रियावयविवत् ज्वालानां भेदेऽपि सामान्यसादृश्यापोहादिनैक्यवदैक्यमस्त्विति चेत्; अत्राह—अवयवीति। अवयविसामान्यपक्षेऽपसिद्धान्तो बौद्धस्य; तदभावात्सामान्यादिषु त्रिष्वतिप्रसङ्गः। एतादृशैक्यकल्पनं च (कल्पनस्य च न किंचित्प्रयोजनं भेदाविरोधित्वात्) नेन्द्रियभेदविरोधीत्यपि ध्येयम्। कल्पनपक्षेऽपि देहस्यैवावश्यकतया इन्द्रियत्वमस्त्वित्यत्राह—अतिरिक्तेति। नन्विन्द्रियाणि देहभिन्नानीति न क्वचिदप्याम्नातमित्यत्राह—अयं भाव इति। साक्षाद्भेदाम्नानाभावेऽपि उभयोर्भिन्नोपादानकत्वदेहाश्रितत्वादिबोधनात् तत्सिद्धमिति भावः। क्लृप्तिपक्षे लाघवन्यायेन देहस्येन्द्रियत्वप्रसङ्गो नात्र क्लृप्तिरित्यत्राह—क्लृप्तिप्रसङ्गाभावादिति ॥ ३८ ॥

अक्ष०—ननु यथा मनसः एकस्यैव वृत्तिभेदात्त्रैविध्यम् तद्वत् प्रतिशरीरमेकस्यैवेन्द्रियस्य प्रदेशभेदाद्वृत्तिभेदेन एकादशत्वादिकमिति बाह्यैकदेशिनां मतं निरसितुमनुवदति—**एकमिति** । **तत्तत्प्रदेशेति** । चक्षुश्श्रोत्रादिप्रदेशेत्यर्थः । **शक्तिभेदमिति** । रूपशब्दादिग्राहकशक्तिभेदमित्यर्थः । **देहव्यापीति**—त्वगिन्द्रियवदिति भावः । दूषयति—**प्रथममिति**—बाधस्य दोषेषूद्भटत्वात्प्राथम्योक्तिः । **आगमेनैवेति**—अनुमानतः इन्द्रियसिद्धिर्नसंभवतीति पूर्वमेवोक्तम् । आगमेन सिद्धस्यैकत्वसाधने धर्मिग्राहकमानेनैव आगमेन एकादशत्वबोधाद्बाधइति भावः ।

अथ अन्तःकरणत्रैविध्यस्येव श्रौतस्य इन्द्रियैकादशत्वस्यापि वृत्तिभेदाभिप्रायेणापि निर्वाहसंभवादतीन्द्रियेन्द्रियविषये लाघवन्यायेन सिद्ध्यत एकत्वस्य न बाधसंभव इत्यत्राह—**नोचेदिति**—बाधानभ्युपगम इत्यर्थः । अतिप्रसंगमाह—**देहभेदेति** । माभूत् प्रतिशरीरमेकैकेन्द्रियकल्पनं किन्तु सर्वशरीरसाधारणमेकमेवेन्द्रियं तत्तच्छरीरभेदप्रतिनियत प्रदेशभेदावच्छिन्नं वैशेषिकादिमते श्रोत्रवत् सर्वजन्तोरुपकारकमिति लाघवात्कल्प्यतामित्यर्थः । नचायमिष्टप्रसङ्गः अपसिद्धान्तप्रसंगात् । अवच्छेदकतयाऽभिमतानां शरीरप्रदेशभेदानामेव इन्द्रियत्वोपगमे लाघवाच्च । अस्तु तर्हि अयमेव पक्षइत्यत्राह—**भेदाम्नानादिति** । भौतिकत्वेन आहङ्कारिकत्वेन च शरीरेन्द्रिययोर्भेदाम्नानादित्यर्थः । लाघवात्तयोरैक्यमेव कल्प्यतामित्यत्राह—**अक्लृप्तेरिति** । स्फुटश्रुतिसिद्धे लाघवन्यायानवतारादिति भावः ॥ ३८ ॥

सूक्ष्माण्येकादशाक्षाण्यपि न यदि कथं देहतो निष्क्रमादि-

श्चित्ताणुत्वे तु सर्वेन्द्रियसमुदयने धीक्रमोऽप्यस्तु मानम् ।

वृत्त्याऽक्ष्यादेर्दवीयः प्रमितिजनकता वृत्तिराप्यायनार्थैः

भूतैर्जातः प्रसर्पः श्रुतिमितमपि चानन्त्यमेषां स्वकार्यैः ॥ ३९ ॥

सर्वा०—यदेतेष्विन्द्रियेषु मनसः कैश्चिन्नित्यत्वमुक्तम्, तदिन्द्रियोत्पत्तिश्रुत्यैव निरस्तम् । प्रकृत्येकदेशपरिणतिर्मन इति सिद्धे विभुत्वानुमानानि च बाधितानि ।

यत्तु मनो विभु सर्वदा स्पर्शरहितद्रव्यत्वात्, ज्ञानासमवायिसंयोगाधारत्वात्, नित्यत्वे सति द्रव्यानारम्भकद्रव्यत्वादात्मादिवदित्यादि; तदेतत्सर्वमात्माणुत्ववादिनं प्रति न शोभते । ज्ञानासमवायिसंयोगाधारत्वं चात्ममनसोरसिद्धम्; ज्ञाननित्यत्वस्य साधयिष्यमाणत्वात् । नित्यत्वे सति द्रव्यानारम्भकद्रव्यत्वादित्येतच्चोत्पत्तिश्रुत्याऽपहृतविशेषणम् । द्रव्यानारम्भकत्वं च भवतामवयव्यनारम्भकत्वम्, तच्चास्माकमणुष्वपि विद्यते । यदपि सर्वदा विशेषगुणशून्यद्रव्यत्वात्, कालवदिति; असिद्धमिदमौपनिषदानाम्, त्रिगुणद्रव्ये मनसि सत्त्वादिविशेषगुणसंमतेः । दूरस्थस्मृत्या मनोविभुत्वं कल्प्यमिति चेन्न; अनुभवसंस्कारप्रत्यासत्त्यैव तदुपपत्तेः ।

एवमन्यदपि। तदिहैकादशानाम् *अणवश्चेति सूत्राभिप्रेतमविभुत्वमातिष्ठते—सूक्ष्माणीति ।। विपक्षे बाधकं वदन्नेवात्र प्रमाणमाह—न यदीति। परोक्तानुमानानां च विपक्षे दण्डश्च नास्ति; सर्वत्र कार्योपलब्धेरिन्द्रियान्तराणामिव मनसोऽपि संचारादप्युपपत्तेः। *तमुत्क्रामन्तम्, *शरीरं यदवाप्नोति इति श्रुतिस्मृतिसंवादाच्च; आदिशब्देन देहान्तरावाप्तिगत्यागतिसंग्रहः। न चैतेषां जीववदणुत्वं विशेषतो दृश्यते; तथा सति श्रोत्रादीनामनेकाधिष्ठानवर्तित्वम्, स्पर्शनरसनयोश्च पृथुप्रदेशव्यापित्वं न स्यात्; सिद्धेऽपि ह्यणुत्वे विकासशक्त्या वृत्तिविशेषद्वाराऽऽप्यायकप्रचयाद्वा पृथुत्वमङ्गीकार्यम्। अन्यथा पिपीलिकादिशरीरस्थस्य स्पर्शनस्य गजादिशरीरप्रवेशे तादृशपृथुत्वासिद्धिप्रसङ्गात्; गजादिभ्यः कीटादिशरीरप्रवेशे तु तादृशस्सङ्कोचः। मनसस्तु परमाणुत्वेऽपि सद्वारकविषयसंबन्धसिद्धेरविरोधः। तत्र *युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति परोक्तं मनोविभुत्ववादप्रतिषेधोपयोगादनुमन्यते—चित्ताणुत्वे त्विति।

अयं भावः—व्यासङ्गदशायां समग्रैरपि बाह्येन्द्रियैर्युगपज्ज्ञानानि नोत्पद्यन्ते। दीर्घशष्कुलीभक्षणादिषु च व्यासङ्गदृष्टान्तेन धीक्रमोऽनुमेयः। क्रमभाविकारणान्तरसापेक्षो ह्यसौ; न चादृष्टभेदोऽपेक्ष्यः, तस्य दृष्टोपहारेण चरितार्थत्वात्; अन्यथाऽतिप्रसङ्गात्। प्रतिबन्धकाभावे ह्यदृष्टोपनीतदृष्टसामग्र्यैव कार्यसिद्धिर्नियता। तदिह कारणान्तरं यदि विभु स्यात् युगपदनेकेन्द्रियसंबन्धितया युगपत्पञ्चविषयज्ञानोत्पत्तिप्रसङ्गः; एवं देहपरिमाणत्वेऽपि। न च मनसस्ततोऽपि सूक्ष्ममध्यमपरिमाणत्वे प्रमाणमस्ति। विभुनोऽपि मनसः केनचिच्छरीरावयवेनावच्छिन्नतयैव कार्यकरत्वमिति चेन्न; तस्य निष्कम्पत्वेऽन्यत्र कार्याभावप्रसङ्गात्। सञ्चारित्वे तु तादृशवेगवतस्तस्य देहातिरिक्तत्वमणुत्वं च साधीयः; किमन्तर्गडुना व्यापकेन मनसा? यस्तु सर्वेषां देहावयवानां यथासंभवमवच्छेदकत्वं ब्रूयात्; तस्य प्रागुक्तप्रसङ्गानतिवृत्तिः, अतिगौरवं च।

यद्येवमिन्द्रियाणि देहान्तःस्थानि त[दा]था कथं चक्षुश्श्रोत्रयोर्दूरस्थग्राहकत्वमित्यत्राह—वृत्त्येति। वृत्तिद्वारा संबन्धादित्यर्थः ननु वृत्तिर्यदि स्वरूपं देहपरिच्छिन्नत्वान्न दूरस्थे वृत्तिः, धर्मोऽपि न धर्मिणमतिवर्ततेत्यत्राह—वृत्तिरिति। भूतैः सहेति वा चारैः पश्यन्तीतिवद्वा योज्यम्। यद्यप्यप्राप्यकारित्वं हैतुकगत्या हठात्कारेण वक्तुं शक्यम्; तथाऽपि *दिवीव चक्षुराततमित्याद्यागमिकव्यवहारस्वारस्यबाधाभावाद्वृत्तिद्वारा प्राप्त्युक्तिः। नयनरश्मिगतितत्प्रतिघातादिकं च भाष्योक्तम्। ननु प्राणशब्दनिर्दिष्टानीन्द्रियाणि प्रक्रम्य *सर्व एवानन्ता इति श्रुत्या सर्वेषामिन्द्रियाणां विभुत्वं ग्राह्यमित्यत्राह—श्रुतिमितमिति। यथोक्तं भाष्ये—*हृदयस्थानां चेन्द्रियाणां तत्तन्नाडीभेदैस्तत्तत्प्रदेशविशेषप्रसर्पात् तत्रतत्र कार्यकरत्वं चावधातव्यम्। अत्र *सर्वे प्राणा अनूत्क्रामन्तीति श्रुतेस्सङ्कोचकाभावात् *मनष्षष्ठानीत्यादेश्च न्यूनसंख्याव्यवच्छेदमात्रेणाप्युपपत्तेः, कर्मेन्द्रियाणां प्रतिशरीरमुत्पत्तिविनाशं व्यष्टिसमष्टिभावराहित्यं च वदन्तः प्रत्युक्ताः ।। ३९ ।।

आ० प्रसङ्गसंगतिं दर्शयति–यदेतेष्विति । इन्द्रियोत्पत्तीति–मनसोऽपीन्द्रियत्वादिति भावः। इदमुपलक्षणं 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' इति विशेषवचनात् । प्रकृत्येकदेशेति-अहङ्कारस्य प्रकृत्येकदेशतया तत्परिणामस्या(नामिमनसो)प्येकदेशत्वनियमादिति भावः । विशिष्य दूषणानि वक्तुम(क्तुंतदुक्ता)नुमानान्यनुभाषते— यत्त्वित्यादिना । स्पर्शरहितद्रव्यत्वादित्युक्तौ आद्यक्षणवर्तिघटादौ व्यभिचारः; तद्वारणाय सर्वदेति । यत्किञ्चिद्राहित्यवति परमाणौ व्यभिचारवारणाय स्पर्शेति । गुणे व्यभिचारवारणाय द्रव्यत्वादिति । ज्ञानासमवायीति—परमाण्वादौ व्यभिचारवारणाय ज्ञानेति । असिद्धिशङ्कावारणाय संयोगेति । विषयव्यभिचारवारणाय असमवायीति । नित्यत्वं च परमाणौ द्रव्यानारम्भकद्रव्यत्वं च घटादौ; नित्यत्वे सति द्रव्यानारम्भकत्वं च जात्यादौ व्यभिचारीति विशेषणानि । आदिशब्देन सर्वदा विशेषगुणशून्यद्रव्यत्वादिकं(विवक्षितम्) द्रष्टव्यम् । सर्वेषामनुमानानामात्मनि व्यभिचारः इत्याह—तदेतत्सर्वमिति । द्वितीयस्य स्वरूपासिद्धिरपीत्याह— ज्ञानेति । तत्र हेतुमाह—ज्ञाननित्यत्वस्येति । तृतीयस्यापि विशेषणासिद्धया स्वरूपासिद्धिमाह—नित्यत्वे सतीति । तच्चास्माकमिति—तथा च तत्र व्यभिचार इति भावः । आदिशब्दोपात्तमनुमानमनुवदति—यदपीति । सर्वदेति—आद्यक्षणे व्यभिचारवारणाय सर्वदेति । असिद्धत्ववारणाय—विशेषेति । गुणादौ व्यभिचारवारणाय द्रव्यत्वादितीति विशेषणप्रयोजनं द्रष्टव्यम् ।दूरस्थेति—अविभुत्वे सम्बन्धाभावात् स्मरणं न स्यादिति तर्कबाध इति भावः । यद्यपि शाब्दानुमित्यादिवत् सम्बन्धो नोपेक्ष्यः; तथाऽप्यभ्युपगम्याप्याह—(नेति) अनुभवेति । तदेवाह— अन्यदपीति ।

अणुत्वपक्षेऽपि आत्मनोऽप्यणुत्वात् तद्गतानुभवसंस्कारयोरपि देशान्तरस्थेन सम्बन्धाभावात्तत्संबन्धानुपपत्तेः पूर्वदोषतादवस्थ्यमित्यादिदूषणं परिहर्तव्यमित्यर्थः । परिहारस्तु विभुत्वपक्षेऽप्यतीतादिस्मरणवदिदमुपपन्नमिति । मनसो विभुत्वे सूत्रविरोधमप्याह—तदिहेति । प्रमाणमाहेति । अविभूनीन्द्रियाणि क्रियावत्त्वात् संमतवदित्यनुमानं प्रमाणमित्यर्थः । नचासिद्धिः निष्क्रमणादिमत्त्वश्रवणादिति भावः । सर्वत्र कार्योपलब्ध्यनुपपत्तिश्च न विपक्षदण्ड इत्याह—सर्वत्र कार्योपलब्धेरिति । देवतिर्यङ्मनुष्यस्थावरे(वरशरीरे)षु एकस्यात्मनो मनसो विभुत्वाभावेऽप्यु(पि चक्षुरादिवदु)पपत्ते(त्ति)रित्यर्थः ।

ननु सौभर्यादिशरीरेषु युगपत्कार्यं दृश्यते; द्वित्रिच्छि(भि)न्नगोधाशरीरेषु चलनं दृश्यते; तत् मनोऽणुत्वेऽनुपपन्नमिति चेत्; मैवम्; मनसो विभुत्वाभावेऽपि चक्षुरादिवदु(रादेरिव सौभरिशरीरेषू) पपत्तिः । द्वित्रिच्छि(भि)न्नगोधाशरीरेषु च मनोवैभवेऽपि क्षणान्तरे चलनाभावात् चलने प्राणसम्बन्धोऽप्यपेक्ष्यः । तथाच अणुत्वपक्षेऽपि स एवास्तु ! सर्वाङ्गीणसुखे च तत्तन्निमित्तविशेषः(षसंयोगः) प्रयोजक इति (व्यक्तमिति) भावः । इन्द्रियसञ्चारे प्रमाणमाह–तमुत्क्रामन्तमिति ।

'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति। प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्यादिश्रुतिः—

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥

इति स्मृतिः। सर्वोपकरणाधिष्ठातृत्वाज्जीवोऽत्रेश्वरः।

ननु 'अणवश्च' इति, सूत्रस्वारस्यात् मध्यमपरिमाण(त्वे)साधकाभावादणुत्वमित्यत्राह—तथा सतीति। ननु अधिष्ठानस्यानेकत्वे चक्षुश्श्रोत्रयोरप्यनेकत्वमस्त्वित्यत्राह—स्पर्शनरसनयोश्चेति। जीववदणुत्वा (मध्यमपरिमाणान)ङ्गीकारे गौरवदोषं चाह—सिद्धेऽपीति। अणुत्वपक्षे दूरस्थवस्तु(दूरस्थद्रव्यशब्द) ग्रहार्थं व्यापिस्पर्शरसग्रहार्थं च संकोचविकासादिरूप(साहं) वृत्तिसाधकानामिन्द्रियाणां प्रचयः संघातो वा वाच्यः; तथा च अणुरूपेन्द्रियाणि तेषामणूनां विकासासंभवाद्विकासवृत्तिमद्द्रव्यं च किञ्चित् संघीभावार्थं (संघीभूतं) चक्षुरादीनामेकस्मिन्नेव शरीरे बाहुल्यं च कल्प्यमिति गौरवम्। (इन्द्रियाणां) मध्यमपरिमाणत्वे (तु) तेषामेव तादृशवृत्तिविशेषोऽङ्गीकर्तुं शक्य इति(विशेषार्हत्वात्) लाघवमिति भावः। अन्यथा—परमाणुत्वाङ्गीकारे। मनसस्त्वित—अपिशब्देन इन्द्रियत्वसाधर्म्येण मध्यमपरिमाण(त्वमेव)त्वं अणुत्वे च बाधकाभावमात्रं न साधकमिति (त्यस्वरसः)सूच्यते। परोक्तमिति। इन्द्रियाणामनुमेयत्वं नास्तीत्युक्तमेव; तथाऽप्यनुकूलत्वान्मनोऽनुमानं न दूषितमिति भावः। ननु (धी) क्रमासिद्धेः कथं तन्मानम्? इत्यत्राह—अयं भाव इति। दीर्घेति—दीर्घशष्कुलीरसगन्धरूपादिधियः क्रमवत्यः (एकदा)स्वस्वविषयसन्निहिततत्तदिन्द्रिय(यान्तर)कालोत्पत्तिकज्ञानत्वात् तादृशेन्द्रियकालिकव्यासङ्गदशोत्पन्नक्रमिकधीवदिति केचिदाहुः।

अन्येतु (केचित्तु) उक्तधियो न युगपदुत्पत्तिमत्यः धीत्वात् इन्द्रियजन्य(धी)त्वाद्वा संमतवत् इति वदन्ति। परेतु रूपधीर्न रसकालसमुत्पन्ना रूपधीत्वात् संमतवदिति प्रत्येकमेवानुमानमित्याहुः।

ननु त्र अदृष्टक्रमादेव धीक्रमोपपत्तौ न क्रमभाविकारणापेक्षेत्यत्राह—न चादृष्टेति। दृष्टसंपत्तावदृष्टविलम्बेन कार्यविलम्बाभावात्; अन्यथा सहकारिमात्रस्य दृष्टकारणमात्रस्य वा विलोपप्रसङ्गादिति भावः। नन्वस्तु; मनसस्तावताऽणुत्वं कथम्? इत्यत्राह—तद्विहेति।

नन्वस्तु मनसो मध्यमपरिमाणत्वम्? इत्याशङ्क्य किं देहपरिमाणत्वेन मध्यमपरिमाणत्वं उत ततोऽपि न्यूनपरिमाणत्वेन? इति विकल्पमभिप्रेत्य क्रमेण दूषयति—एवं देहपरिमाणत्वेऽपीत्यादिना। विभुत्वेऽपि धीक्रमं शङ्कते—विभुनोऽपि मनस इति। तस्य—शरीरावयवस्य। साधीय इति—यदि इन्द्रियैस्संबन्धार्थं मनोऽवच्छेदकोऽवयवोऽवयवान्तरदेशं गच्छति तदा पूर्वावयवसंयोगनाशाच्छरीरनाश-

स्स्यात् । इन्द्रियाणामेव यदि तद्देशप्राप्तिः, विषयसम्बन्धो न स्यात् । यदि तावदिन्द्रियदेशव्याप्यवयवः; तदा शरीरमेव स्यात् । यदि समवायिकारणभिन्नमवयवान्तरं; तर्हि तस्यैव मनस्त्वोपपत्तौ ततोऽतिरिक्तविभुकल्पनं व्यर्थमित्यर्थः । प्रागुक्तेति—युगपत्ज्ञानोत्पत्तिप्रसङ्गः । 'युगपत्ज्ञानानुत्पत्तिर्लिङ्गम्' इति व्यतिरेकमुखेनोक्तत्वादित्यर्थः । गौरवं चेति—शरीरावयवविशेषाणामावश्यकत्वात् तैरेव मनःकार्यसिद्धौ तत्कल्पनं गौरवमित्यर्थः । भूतैस्सहेति—इन्द्रियस्य भूतैस्सहितस्य यो विसर्पो—विकारः स वृत्तिरित्यर्थः ।

अन्ये तु—आप्यायकभूतानां यो विसर्पः स वृत्तिरित्याहुः । अस्मिन् पक्षे चारैः पश्यन्तीति सुसंगतम् ।

ननु इन्द्रियाणां परमाणुत्वेऽपि भवदुक्ताप्यायनभूतद्वारा प्रागुक्तं सर्वमुपपन्नमिति किमर्थं मध्यमपरिमाणत्वमभ्युपगम्यत इति चेत्; सत्यम्; इन्द्रियाणां कार्यत्वात् कार्यस्य मध्यमपरिमाणत्वनियमादिति भावः । तथापीति—परिणामद्वारा प्राप्तिः । वृत्तिर्हि विकारविशेषः; स च इन्द्रियव्याप्तिरेवेति भावः । ननु आगमिकव्यवहारस्वारस्यबाधाभावादित्यनेन रश्मिद्वारैव हैतुकवत् प्राप्तिस्सूच्यते । अत एव न्यायसिद्धाञ्जने 'दूरस्थग्रहणे तु चाक्षुषमहः प्रसरात् सम्बन्धसिद्धिः । तच्च करणपादद्वितीयाधिकरणे प्रपञ्चितम् । प्रतिबिम्बग्रहणे तु स्वच्छद्रव्यप्रतिहतस्य नयनमहसः प्रतिप्रसरादि (मूलत्वं) भ्रान्त्यधिकरणे पूर्वपक्षेऽभिहितम्' इत्यादिना नयनरश्मि (गमना) प्रसरादिकमुक्तम्; तत्कथं भाष्यानुमतम् ? इत्यत्राह—नयनरश्मीति । 'त एते सर्व एव समाः सर्वेऽनन्ताः' इति श्रुतेः 'अथ यो ह वैतानन्तानुपास्ते' इत्युपासनोपक्रमात् उपास्यप्राणविशेषणभूतकार्यबाहुल्यपरत्वमित्याह—यथोक्तं भाष्य इति । 'अणवश्च' इति सूत्रभाष्य इत्यर्थः । अत्र 'सर्वे प्राणा अनूत्क्रामन्ति' इति श्रुतेस्संकोचकाभावादिति—

ननु कर्मेन्द्रियाणां शरीरेण सहोत्पत्तिविनाशौ; न पुनस्तेषां जीवेन स(तेनैव स)ह गमनम्; तथाच कथं न संकोचः ? अन्यथा सारे हस्तादयोऽपीन्द्रियाणि जीवे देहान्तराव(न्तर) स्थिते उपकारकत्वाविशेषात्' इति वचनं विरुध्येत; देहान्तरावस्थितस्य जीवस्योपकारकाणि न तु सहागतानीति प्रतीतेः । तथा भाष्येऽपि 'न सप्तैवेन्द्रियाणि; अपि त्वेकादश; हस्तादीनामपि शरीरेऽवस्थिते जीवे तस्य भोगोपकरणत्वादिति' अत्रापि सहागमनाप्रतीतेर्विरोधः । तथा दीपे व्यक्तमेवोक्तम्—'श्रोत्रादीनि जीवेन शरीरान्तरगमनेऽपि गच्छन्ति; वाग्घस्तादीनि कर्मेन्द्रियाणि तु स्थिते शरीरे तेनैव सहोत्पत्तिविनाशयोगीन्युपकारकाणि' इति; तथा च दीपविरोधश्चेति चेत्;

अत्राहुः—नैव विरोधः 'प्राणगतेश्च' इति सूत्रे 'सर्वे प्राणा अनूत्क्रामन्ति' इत्युदाहृतत्वात् । 'सप्तगतेः' इत्यधिकरणे च 'यानि त्वितराणि विषयाणां ग्राहक-

त्वेन तेषामौपचारिकः प्राणत्वव्यपदेशः' इति पूर्वपक्षं कृत्वा 'हस्तादयस्तु स्थितेऽतो नैवम्' इति तेषामपि प्राणत्वसमर्थनात् प्राणत्वमिन्द्रियत्वं 'प्राणगतेश्च' इत्यस्यैव समनन्तरे 'अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्' इति सूत्रे भाष्यम्—'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वाचं प्राणः चक्षुरादित्यं इत्यादिना प्राणानां जीव-मरणकाले अग्न्यादिष्वप्ययश्रवणात् न तेषां जीवेन सह गमनमिति गतिश्रुतिरन्यथा नेयेति चेन्न; भाक्तत्वादग्न्यादिष्वप्ययश्रवणस्य' इत्यादिकम्। अतः कर्मेन्द्रियस्य वाचोऽत्र गतिरभ्युपेतेति तदन्येषामपि सममेव। तथा सारेऽप्युक्तम्—'सप्तानां गतिश्रवणं योगकाले विशेषणं च ज्ञानेन्द्रियाणां मनसः तत्प्रवृत्तिरूपबुद्धेश्च प्राधान्यात् इत्यादि। न च आहङ्कारिकेन्द्रियवादिनः प्रतिशरीरमिन्द्रियोत्पत्तिलयावुपपद्येते; पाण्याद्यधिष्ठानानि त्वनिन्द्रियाणीति तदुत्पत्तिलयोपपत्तिः। कथं तर्हि श्रोत्रादीनीत्यादेर्निर्वाहः ? इत्थम्—परमतवत् प्रतिशरीरमुत्पत्तिविनाशाभ्युपगमेऽपि तेषामिन्द्रियत्वं सिध्यतीति 'हस्तादयस्तु स्थितेऽतो नैवम्' इति सूत्रस्य योजनान्तराभिप्रायेणैवमुक्तम्। अत एकादशेन्द्रियाण्यपि शरीरान्तरेष्वप्यनुवर्तन्त इति भाष्यकाराभिप्रायं प्रतीम इति।

अन्ये तु - उत्क्रमणशब्दस्य क्रियया पूर्वदेशविभागपूर्वकदेशान्तरसंयोगपरस्य विभुत्वपक्षे देशान्तरसंयोगमात्रे संकोचो वाच्यः; तत्र मानं नास्तीत्यर्थः। नचानन्त्यश्रुतिरेव मानम्; आनन्त्यश्रुतेः कालपरिच्छेदाभावस्य उत्पत्तिश्रुतिबाधेन देशपरिच्छेदाभावपरतया संकोचस्यावश्यकत्वात् अनन्तशब्दस्य बहुव्रीहिसमासत्वेन लक्षणयाऽन्यपरत्वस्य स्वतः प्राप्तत्वात्। वाक्यत्वाच्च उत्क्रान्तिश्रुतेर्जघन्यत्वात् न तत्र तद्विरुद्धार्थप्रतिपादनसामर्थ्यमिति न संकोच इत्याहुः।

मनष्षष्ठानीति—इन्द्रियाणामेव गतागतश्रवणात् कर्मेन्द्रियाणामिन्द्रियत्वाभावशङ्केत्याहुः। अन्ये तु उत्क्रान्तिप्रकरणे 'मनष्षष्ठानि' इति ज्ञानेन्द्रियाणामेवोक्तेः कर्मेन्द्रियेषु प्रतिशरीरमुत्पत्त्यादिशङ्कां परिहरति—मनष्षष्ठानीति। व्यष्टिसमष्टीति—तत्त्वोत्पत्तिकाल एव सर्वेषां संघीभूयावस्थितिर्व्यष्टिः। तत्तच्छरीरेषु पृथगवस्थानं समष्टिः।

इदमुपलक्षणम्—सौगतकल्पितं स्त्रीन्द्रियादिवि(भ)भाजनं मानाभावान्निरस्तम्। अन्यैर्मनस्तैजसत्वं राजसाहङ्कारजन्यत्वं कर्मेन्द्रियत्वमित्यादि क(ज)ल्पितमपि मानाभावान्निरस्तम्। तानीन्द्रियाणि प्रतिनियतानि, आमोक्षं आसृष्टेः परकायप्रवेशेऽपि तैस्सह प्रविशति; मृतशरीरप्रवेशे तथा दर्शनात् 'गृहीत्वैतानि संयाति' इति स्मृतेरन्यदीयकरणस्यान्योपभोगकरणत्वायोगाच्च जीवच्छरीरेऽपि तैस्सह प्रवेश इति।

अन्ये तु—प्रकृष्टादृष्टवशादन्यदीयभोगायतनस्यान्यदीयभोगायतनत्ववदन्यो-

पकरणत्वं संभवतीति जीवच्छरीरे तैर्विनाऽपि प्रवेश इति वदन्ति। इन्द्रियेषु प्राकृताप्राकृतविभागान् केचिदाचार्या आहुः।

अपरे तु—नित्यमुक्तादिज्ञानस्य करणाधीनत्वाभावात् प्रयोजनशून्याऽप्राकृतेन्द्रियक्लृप्तिः। 'कप्यासं पुण्डरीकमेवमक्षिणी' इत्यादिव्यपदेशस्तु संस्थानमात्राभिप्राय इत्याहुः॥ ३९॥

अक्ष०—अथ एकादशानामपीन्द्रियाणां "अणवश्चे" ति सूत्रोदितमणुत्वमविभुत्वं साधयति—सूक्ष्माणीति। अविभूनीत्यर्थः। आत्मवदणुत्वे प्रमाणाभावात् श्रोत्रद्वयादिवृत्तित्वानुपपत्तेश्चेतिभावः। विपक्षे वाधकमाह—न यदीति। निष्क्रमादिरिति। "प्राणमनूत्क्रामन्तं सर्वे प्राणाअनूत्क्रामन्ति" "शरीरं यदवाप्नोति त्वक्चाप्युत्कामतीश्वरः गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्" इति श्रुति स्मृतिसिद्धगत्यागत्योः विभुत्वे अनुपपत्तेरिति भावः।

मनोऽणुत्वे "युगपज्ज्ञानानुत्पत्तिर्मनसोलिङ्गम्" इति परोक्तमप्यविरोधादनुमन्यत इत्याह—चित्ताणुत्व इति। सर्वेन्द्रियसमुदयने। सर्वेन्द्रियाणां तत्तद्विषयसन्निकर्षे सति दीर्घशष्कुलीभक्षणादावपि अन्यव्यासंगस्थल इव क्रमेणैवरूपरसादिप्रतीतेतिरिति भावः।

चक्षुरादेस्सूक्ष्मत्वे तेन दूरस्थवस्तुग्रहणं कथमुपपद्यत इत्यत्राह—वृत्येति। दवीयः प्रमितिजनकता। दूरस्थवस्तुप्रमाजनकता। का नाम वृत्तिरित्याह वृत्तिरिति—इन्द्रियाप्यायकतैजसादिभूतैस्सहचक्षुरादेर्यः प्रसर्पः प्रसरणं—रूपादिविषयगामी सैव वृत्तिरित्यर्थः। वृत्तिद्वारासंवन्धादणोरपि दूरस्थवस्तुग्रहणमुपपन्नमिति भावः।

ननु "सर्वएवानन्ता" इति श्रुत्या सर्वेषामपीन्द्रियाणां विभुत्वं गम्यत इत्यत्राह—श्रुतीति। इन्द्रियकार्याणां आनन्त्याद्वहुत्वात् इन्द्रियेषु आनन्त्यव्यपदेशः। नतु विभुत्वात् गत्यागतिश्रुतिविरोधापत्तेरिति भावः।

इन्द्रियाणासूक्ष्मत्वम्॥ ३९॥

प्राप्यग्राहीन्द्रियत्वाद्विमतमितरवत्प्राप्तिरुक्तप्रकारा
वृत्तिं वृष्टेर्निरुन्धे विरलपटनयादम्बुकाचादिरच्छः।
नो चेद्गृह्येत योग्यं सममिह निखिलं निष्फले छादकावौ
स्थैर्ये तद्योग्यभावो न हि गलति समा सन्ततिस्त्वन्मतेऽपि॥४०॥

सर्वा०—यदुक्तं *वृत्त्याऽक्ष्यादेर्दवीयः प्रमितिजनकतेति, तत्र वाह्यैरेवमुच्यते—वृत्तिप्रसरणे क्रमयौगपद्यविकल्पायोगाद्दूरस्थविषया प्राप्तिर्न भवतीति;

अतो यद्रूपग्राहकं यच्छब्दग्राहकमिन्द्रियं तदप्राप्यग्राहि यथा मन इति; तत्र तावत् प्रत्यनुमानमाह—प्राप्येति ॥ ननु गृह्यमाणस्य वर्तमानक्षणस्य पूर्वक्षणवर्तीन्द्रियसंबन्धायोगादिन्द्रियान्तराणामप्यसंबन्धग्राहकतया साध्यविकलो दृष्टान्तः। मैवम्; क्षणभङ्गकुसृतेः प्रागेव निरासात् ॥

अतिप्रसङ्गोऽसंबन्धग्रहणे स्यात्समं त्विदम्।
संबन्धग्रहणेऽपीति न सद्योग्यान्वितग्रहात् ॥
गृहीतस्येष्यते कश्चित्संबन्धो व्यभिचारतः।
न संबन्धस्य सर्वस्य ग्रहणं व्यभिचारतः ॥

नात्र कर्मेन्द्रियैरनैकान्त्यम्, यथास्वं व्यापारेण स्पृष्टेर्ग्राहिशब्देन विवक्षितत्वात्; तस्य च सर्वत्र प्राप्तविषयत्वात्। न च मनसा यस्यापि बाह्येन्द्रियद्वारा बहिर्विषयप्राप्तेः; यद्वा बाह्यज्ञानेन्द्रियत्वादिति मनःकर्मेन्द्रियव्यवच्छेदः।

ननु उन्मिषितमात्रं चक्षुश्चन्द्रं गमयति। न चैकस्मिन्क्षणे तावान्देशो वृत्त्या लङ्घयितुं क्षमः। क्रमे तु प्रतिपरमाण्ववच्छेदं विलम्ब्य गमनात् प्रतीतिरपि विलम्बेत, दूरासन्नग्रहणकालतारतम्यं च स्यात्। मैवम्; उदयत्येव सवितरि सकलदिग्व्यापिन्यां प्रभायामिव इन्द्रियवृत्तेस्तादृशवेगातिशयस्याविस्मयनीयतया पद्मपत्रशतवेधनीत्या यौगपद्याभिमानोपपत्तेः। ननु सिद्धे गमने यौगपद्याभिमानक्लृप्तिः, नात्र तत्सिध्यतीति चेन्न; स्वाभ्युपगतसाम्यात्। बुद्धिसन्ततेश्शरीरान्तरगमनं दीपालोकादिगमनं च दृष्टं कल्प्यं वा? नाद्यः, त्वयाऽप्यनभ्युपगमात्। द्वितीये तु तथेहापि किं न स्यात्? न देहान्तरादौ गतिः प्राप्तिर्वा। किंतु तत्रतत्र देशकालनैरन्तर्येणोत्पत्तिमात्रमिति चेत्तथेहापि त्वया कल्प्यताम्; अविशेषात्।

ननु प्राप्तिः कल्प्या, तद्भावस्त्वनुपलम्भमात्रेण सिध्यतीति चेन्न; योग्यानुपलब्धेरभावात्। अतीन्द्रियस्य हि प्राप्तिरपि तथैव। अतो नात्र बाधशङ्का। ननु दूरस्थत्वाद्विषयेन्द्रिययोः प्राप्तिर्बाधितेत्यत्राह—प्राप्तिरिति। वृत्तिद्वारेति शेषः। उक्तप्रकारेति पुनरनुवचनं बाह्यन्तरोक्तप्राप्तिप्रकारनिरासार्थम्। अथापि क्वचिद्व्यवहितग्रहणदर्शनात्प्रमाणतस्तर्कतश्च बाधः स्यादित्यत्राह—वृत्तिमिति। अच्छः—आलोकाद्यनुप्रवेशानुगुणसन्निवेशवानित्यर्थः दृश्यते ह्यनाविलसलिलमूलप्रविष्टस्सूर्यालोकः; तत्रत्यं च तत्प्रतिफलनदीप्तं शिलाविशेषादि। यथावत्प्रसरमत्यन्तनिरोधं च परिहर्तुं विरलपटनिदर्शनम्। अत एव हि तत्राविशदप्रतिभासः। सरन्ध्रत्वे स्फटिकादिषु सलिलगलनादिप्रसक्तिः स्यादिति चेन्न; आलोकप्र[वे]काशवत्सु सर्वेषु सलिलप्रवेशस्य त्वया दुर्वचत्वात्। अच्छिद्रपरुवकसंपुटस्थगितकर्पूरकस्तूरिकादिगन्धनिस्सरणन्यायाच्च द्रव्यविशेषप्रवेशानुगुणसन्निवेशवत्त्वं काचादेरङ्गीकार्यम्। अप्राप्यग्रहणेऽपि हि कुड्यादिव्यवहितं न ग्राह्यम्; काचादिव्यवहितं तु ग्राह्यमिति वस्तुस्वभाववैचित्र्यं त्वयाऽपि स्वीकृतम्।

नीरन्ध्रेऽप्यम्बुकाचादौ दृक्प्रभादेः प्रवेशनम् ।
वस्तुस्वभाववैचित्र्यादिति केचित्प्रचक्षते ।।

सर्वत्र स्वरूपयोग्यत्वाभ्यामेव ग्रहणाग्रहणे । तत्र छादकतदभावौ निरर्थकाविति वदतां बाधकं स्वोक्तानुमानस्य विपक्षे बाधकम् । अयस्कान्तनिदर्शनेऽपि छादकनैष्फल्येऽतिप्रसङ्गमभिप्रेत्याह—नो चेदिति । इह योग्यं निखिलं सर्वस्मिन् जगति स्वरूपयोग्यं सर्वं समं गृह्येत—अविशेषाद्युगपदेवेत्यर्थः । आदिशब्देन अतिदूरत्वकालविप्रकर्षादिकं दृष्टान्ततया गृह्णाति । छादकाभावः स्वरूपतस्सहकारी, न तु प्राप्तिविरोधिप्रत्यनीकतयेति चेन्न; आलोकादिप्राप्तिविरोधिच्छत्रादित्यायस्यात्रानपायात् । न च यत्रक्वचिच्छादकाभावः सहकुर्यात्; अतिप्रसङ्गात् । किन्तु नयनार्जवदेशे । अयं च नियमः प्राप्तिविरोधिनिवृत्तिरूपतयेति युक्तमुत्पश्य । रूपग्रहणसामग्र्यामेव प्रदीपादिछादकं प्रभाप्रतिघातार्थं दृष्टम् । उन्मीलितनिमीलितचक्षुषः पिठरकावृतदीपप्रभान्यायेन पूर्वप्रसृतनयनप्रभाया विनाशादतिक्रमाद्वा ग्राह्यग्रहणाभावः । अत्र गृहीतच्छन्नमपि गृह्येतेति प्रसङ्गारूढम् । तदा सममिति पूर्वमिवेत्यर्थः । तच्च क्षणभङ्गेन योग्यायोग्यभेदकल्पनया परिजिहीर्षतः सर्वलोकप्रसिद्ध्यनुसारिणा स्वमतेनोत्तरमाह—स्थैर्य इति ।

अयं भावः—छादनदशायां पूर्वगृहीतस्य स्वरूपयोग्यत्वं स्थितं नष्टं वा ? आद्ये कथं न गृह्येत ? प्राप्तेरप्रयोजकत्वात् । द्वितीये नाशकं न दृष्टम् । छादकमेव स्वरूपयोग्यतानाशकमिति चेन्न; अव्यवहितदेशस्थैरप्यग्रहप्रसङ्गात् । यं प्रति व्यवधिस्तं प्रति योग्यता नष्टेति चेत्, छादकापगमेऽप्यग्रहप्रसङ्गात् । तदपगमात्पुनरुत्पद्यत इति चेत्; हन्त ! अदृश्यमानानन्तोत्पत्तिनाशकल्पनात् प्रतिपुरुषनियतानन्तयोग्यताभेदकल्पनाच्च वरं प्रदीपप्रभान्यायेन प्राप्तिविघातकतया छादकसाफल्यस्वीकारः । परपक्षेणाऽपि प्रसङ्गस्थैर्यमाह—समेति । अपिरन्वारोहद्योतकः । क्षणभङ्गपक्षेऽपि योग्यक्षणादयोग्यक्षणोत्पत्तौ कारणक्षणस्य सर्वैरदृष्टस्तत्तत्स्वरूपातिरिक्तश्शक्तिभेदो वा सहकारिभेदो वा कल्प्यः । उभयमपि स्वमतबाधकं दृष्टम् । छादकमेवायोग्यक्षणोत्पादनसहकारीति चेन्न; अपसिद्धान्तात्, छादकस्य किञ्चित्करत्वानपायात् तोयादिव्यवहितेऽप्यग्रहप्रसङ्गात् छन्नस्य च सर्वदृश्यत्वप्रसङ्गात् नेत्रसन्निकृष्टेन पक्ष्मकरतलादिना दवीयस्तरदिवाकरे क्षणोत्पत्तेरत्यद्भुतत्वाच्च । तस्मादस्मदुक्तमेव छादकसाफल्यम् । उक्तातिप्रसङ्गस्सांख्यादिपक्षेऽपि समः । यदि ह्यहङ्कारविकारयोश्चक्षुश्श्रोत्रयोर्यावद्देशस्थविषयग्राहित्वं दृष्टं तावत्पृथुत्वं तत्तच्छरीरोत्पत्तिसमयसिद्धम्, तत्राधिष्ठानाद्बहिरवस्थितांशो वृत्तिरित्युच्यत इति, तदा निमीलनाद्यवस्थायामपि ग्राहकत्वप्रसङ्गः, अथ पृथ्वग्रा संतताऽपि बहिर्वृत्तिर्दीपप्रभान्यायेन विनश्यति; अत एव छन्नग्रहणाभाव इति; तथात्वेऽप्येकस्यादृश्यमान पृथुत्वाणुत्वाद्यनन्तावस्था, स्वतो भिन्नाभिन्नवृत्त्यंशनाशः, तन्नाशेऽपि स्वरूपावस्थानमित्यादिबहुविधकल्पनापात इति ।

यत्तु कैश्चिदुच्यते—निष्क्रान्तमात्रमेव चाक्षुषं तेजो बाह्येन बहुदेशव्यापिना चन्द्रसूर्यादिज्योतिषा संवलितं तावत्प्रथिमानमवयविनमारभते, तेन च सम्बन्धादुन्मिषितस्य दूरस्थग्रहणं दूरासन्नयोर्युगपद्ग्रहणं च सिध्येदिति। तदयुक्तम्, निष्क्रमणकल्पनस्य गुरुत्वात्। अनिष्क्रान्तमेव किं नावयविनमारभेत, आन्तरनिष्क्रमणवद्बाह्यप्रवेशोपपत्तेः? अपि चास्मिन्पक्षे त्रिभुवनविवरव्यापिना तेजसा सह चाक्षुषतेजस्संवलनात्तेन सम्बद्धं सर्वं युगपद्भासेत पश्चाद्भागादिस्थितं च। अथार्जवावस्थानमपेक्षणीयमित्युच्येत, तदाऽस्मन्व्याप्तेस्सिद्धत्वात्; अन्यथा दर्पणतरङ्गादिसन्निधाने स्वमुखादिग्रहणं न स्यात्। किं च निमीलिताक्षस्यापि प्राङ्निष्ठ्यूतनयनमहस्संभवबाह्यालोकानुवृत्त्या दृश्यदर्शनानुवृत्तिः स्यात्। अतः प्रागुक्तप्रकारैव प्राप्तिरिति ॥ ४० ॥

आनन्द०—आक्षेपसंगत्याऽऽह—यदुक्तमित्यादिना। यदिन्द्रियं तदप्राप्यप्रकाशकं यथा मनः रूपादिग्राहकं चक्षुरादिकमपीन्द्रियमित्यनुमानाभिप्रायेणानुग्राहकं तर्कमाह—वृत्तिप्रसरणे इति। ननु दूरसन्निकृष्टार्थैरिन्द्रियं क्रमेण संबध्यते युगपद्वा? नाद्यः? परमाणुदेशक्रमेण संबन्धे विलम्बेन ग्रहणप्रसङ्गात् दूरसन्निकृष्टार्थयोर्युगपद्ग्रहणं न स्यात्। न द्वितीयः; अयोगात् इति, क्रमयौगपद्यविकल्पेन संबन्धस्यायोगात् वृत्तिनिर्गमनकल्पनमयुक्तमित्याह—वृत्तिप्रसरण इति। प्रत्यनुमानं प्रतिपक्षः; चक्षुरिन्द्रियं प्राप्यकारि बाह्येन्द्रियत्वात् त्वगिन्द्रियवदित्यर्थः। परानुमाने तर्कबाधश्चेत्याह—अतिप्रसङ्ग इति। ननु स्वकीयानुमानेऽपि संबद्धानां परमाण्वादीनां ग्रहणं स्यादित्यतिप्रसङ्गबाधस्सम इति शङ्कते—समं त्विदमिति। परमाण्वादीनामिन्द्रियसंबन्धे सत्यपि अयोग्यत्वान्नातिप्रसङ्ग इति वदति न सत् योग्यान्वितेति। नन्वस्मिन् पक्षे योग्यत्वविशेषणे गौरवमित्यत्राह—गृहीतस्येति। अन्वयव्यतिरेकाभ्यां तत्प्रवेशस्य प्रामाणिकत्वात् न गौरवं दोष इत्यर्थः। गृहीतस्य पदार्थस्य अव्यभिचारात्; तथा च योग्यविषयसंबन्धो ग्राहक इति कल्पने न गौरवं दोषायेति भावः। ननु कर्मेन्द्रियाणां ज्ञानरूपग्रहणजनकत्वाभावादव्यभिचार इत्याशङ्क्य परिहृति—नात्र कर्मेन्द्रियैरिति। ग्राहीत्यत्र क्रियासाधारण्येन व्यापारस्पर्शस्य विवक्षितस्य तेष्वपि सत्वात् न तैर्व्यभिचार इति भावः। तस्येति—ग्रहणरूपादानक्रियादेः कर्मेन्द्रियादिप्राप्तविषयत्वादित्यर्थः। मनसि व्यभिचारं परिहरति—नच मनसीति।

ननु स्वव्यापार(रातिरिक्त)द्वाराऽपि प्राप्तग्राहित्वेऽतिप्रसङ्गः; व्यवहितस्यापि(स्याप्येवं)सम्बन्धात् इत्यस्वरसादाह—यद्वेति। परानुमानानुग्राहकं स्वानुमानप्रतिकूलं प्रागुक्ततर्कं क्रमयौगपद्यविकल्पानुपपत्तिरूपमाशङ्कते—नन्न्मिषितमात्रमिति। इष्टापत्तिं परिहरति—दूरासन्नेति। तारतम्यं गृह्येत चेदित्यर्थः। तारतम्यमिति—प्रत्ययानुकरणादर्थलाक्षणिकात् ष्यञ्। वेगातिशयेन क्रमसम्बन्धेन

क्रमेण ग्रहणेऽपि शतपत्रशतं मया भिन्नमिति क्रियादिसंयोगात् न शतयौगपद्याभिमानवत् ज्ञाने यौगपद्याभिमान इत्यर्थः। नचैवमनेक(नेन)ज्ञानोत्पत्तिः:; इष्टापत्तेः। न च ज्ञानभेद(दा)ग्रहप्रसङ्गः; भ्रमरूपा(भ्रम इवा)संसर्गाग्रहवादिनः तदग्रहैक-(तद्दुर्ग्रहैक) (तदेकग्रहैक)त्वव्यवहारयोरुपपत्तेरिति भावः। स्वाभ्युपगतेति—क्षणिकत्ववादि(भिः)ना निरन्तरोत्पद्यमानशरीरक्षणेषु बुद्धिक्षणानामपि तत्तच्छरीरकाल एवोत्पद्यमानानां तत्तदुत्पत्तिकाल एव सम्बन्धाङ्गीकारादित्यर्थः। ननु तत्र प्रमाणसत्त्वादङ्गीकार इत्यत्राह—बुद्धिसंततेरिति। त्वयाऽपीति। प्रत्यक्षरूपगमनाभ्युपगमादित्यर्थः। द्वितीये त्विति। इन्द्रियेष्वपि शीघ्रसम्बन्धकल्पनासंभवादित्यर्थः। प्रतिबन्दि(वन्दीः) परिहरति— न देहान्तरादाविति। न बुद्धिसंततेर्दीपालोकादेश्च देशान्तरे उत्पन्नस्य तत्तद्देश(द्देह)तत्तद्विषयप्राप्तिः, अपि तु तद्देश एवैकस्मिन् काले उत्पत्तिरित्यर्थः। तथेति—चक्षुरादिवृत्तेरपि तावद्दूरव्यापिन्या नैरन्तर्येणोत्पत्तिरि(रस्त्वि)त्यर्थः।

ननु बुद्धिसंतानादिप्रतिबन्दिर(रधिका) युक्ता; तयोस्स्वप्रकाशप्रत्यक्षसिद्धत्वात्, चक्षुरादीनामतीन्द्रियतया तद्वृत्तेः तद्व्यापार(तत्प्राप्ति) रूपसंयोगस्य च प्रत्यक्षत्वायोगादिति वैषम्यं शङ्कते—ननु प्रा(व्या)प्तिरिति। तथाच अनुपलम्भबाध इति भावः। योग्येति—नानुपलम्भमात्रं बाधकमिति भावः। योग्यानुपलब्धिमेवाह—अतीन्द्रियस्येति। अतीन्द्रियेन्द्रियप्राप्तेरतीन्द्रियत्वान्न योग्यानुपलब्धिरित्यर्थः। नन्विति—विप्रकृष्टयोः प्राप्त्यसंभवादिति भावः। बाह्यन्तरेति—सांख्याद्युक्तमित्यर्थः। तन्निरसनमनन्तरमेव दर्शयिष्यते। ननु प्राप्त्यभावेऽपि काचादिव्यवहितस्थले प्रकाशदर्शनात् प्राप्यप्रकाशतानुमानस्य व्यभिचारः; प्राप्यप्रकाशत्वे काचादिव्यवहितस्य प्रकाशो न स्यादिति तर्कबाधश्चेति शङ्कामनूद्य परिहरति—अथापीति। संनिवेशः—स्थानम्। ननु पटदृष्टान्तत्वे तद्वद्दृश्यमानरन्ध्रता स्यादित्यत्राह—यथावदिति। परु(पुरु)वकं—अत्यन्तस्वच्छद्रव्यविशेषः। (करण्ड इति केचित्।) निर्मितकरण्डः। नन्वेवं स्वभावविशेषकल्पनं गौरवान्निरस्तमित्यत्राह—अप्राप्यग्रहणेऽपीति।

केचित्तु दृक्प्रभादेरेवाम्बुकाचादिप्रवे(प्रका)शनसामर्थ्यं कल्प्यत इत्याहुरित्याह—नीरन्ध्रेऽपीति। ननु व्यवधानतदभावाभ्यां ग्रहणाग्रहणदर्शनात् प्रा(तत्प्रा)प्त्योस्तत्प्रयोज्य(जक)त्वादिन्द्रियाणां प्राप्त(प्राप्य)ग्राहकत्वं सिध्यतीत्यनुकूलतर्कोऽनुपपन्नः ग्रहणाग्रहणयोः ग्राह्ययोग्यत्वायोग्यत्वप्रयुक्तत्वात् व्यवधानाव्यवधानयोरप्रयोजकत्वम्; छा(तच्छा)दकं च न प्राप्तिविघटकं; तदभावश्च न तत्प्रयोजक इति शङ्कते—सर्वत्रेति दृष्टान्ततयेति—यथा (दूरत्व)कालविप्रकर्षादेस्सन्निकर्षप्रतिबन्धकत्वं तद्विरहस्य तदापादकत्वं च नास्ति(किन्तु) अयोग्यत्वमात्रेण ग्रहणाग्रहणे इ(ग्रहणमि)ति तयोर्निष्फलत्वं तथेत्यर्थः। छादकाभाव इति—व्यवधायकाभाव (इत्यर्थः)। प्राप्तिविरोधिरूपप्राप्त्यभावप्रत्यनीकतया प्राप्तिसंपादकतया

न प्रयोजकं किं तु स्वयं कारणमित्यर्थः। **आलोकादीति**—अन्यत्र क्लृप्ता(दृष्टा) कारकल्पनस्योचितत्वादिति भावः। तन्नचायमेवोपपादयति—**नच यत्र क्वचिदिति**।

ननु विषयप्राप्त्यर्थमिन्द्रियवृत्तेर्विषयदेशव्यापने सति निमीलिताक्षस्यापि विषयग्रहणं स्यात् निर्गताया वृत्तेस्सत्त्वाद्विषयप्राप्तिसत्त्वादित्यत्राह—**उन्मीलित-निमीलितेति**। पिठरकं—वैतसादिपात्रविशेषः। अति(प्रति)क्रमाद्वेतिविषयदेशा-क्रमणेन तदा विषयप्राप्त्यभावादित्यर्थः। (इदमभ्युपगम्योक्तम्)। यद्वा-प्राप्तिपक्षे गृहीतच्छन्नमपि गृह्येतेति प्रसङ्गारूढं—प्रसङ्गेनापादितमपि **तदा समं**—छादकनैष्फल्यपक्षेऽपि समं—अम्बुकाचादिस्थलवदिति। प्रकारान्तरेणाप्यर्थमाह—**गृहीतचछन्नमपीति**। तथा च मूलस्यायमर्थः—नो चेत् काचादीनामिन्द्रियप्रवेशन-योग्यसंस्थानवत्त्वाभावे तव्द्यवहितग्रहणवत् पिठरादिव्यवहितमपि योग्यं निखिलं गृह्येत छादकानामप्रतिबन्धकत्वादिति सममित्यर्थः।

ननु गृहीतस्य पिठर (स्य) व्यवधानं नास्त्येव तस्य क्षणिकतया नाशात्; तदनन्तरोत्पन्नं च पूर्वं (पूर्वपूर्वं) स्माद्भिन्नमिति तदयोग्यत्वादेव न गृह्यत इत्यत्राह—**तच्च क्षणभङ्गेनेति**। तच्च उक्तप्रसञ्जनमित्यर्थः? **तद्योग्यभाव इति मूलम्**। तद्योग्यभावः—इन्द्रिययोग्य (स्य)भावः—सत्त्वं व्यवहितस्थलेऽपीत्यर्थः। प्रतिज्ञामात्रेण नार्थसिद्धिरित्यत आह—**अयं भाव इति**। **अव्यवहितदेशस्थैरिति**—छादकेन योग्यताया नाशादिति भावः। **हन्तेति**—छादकस्य किञ्चिद्विघातकतया प्रतिबन्धकत्वस्य कल्पने गौरवपरिहारेण लघुपक्ष एवाश्रयितुं युक्त इति भावः। क्षणभङ्गपक्षेऽपीदं समानम्; छादकान्तर्हितस्य क्षणस्य पूर्वगृहीतक्षणापेक्षया भिन्नत्वेऽपि तस्यायोग्यत्वे समीपस्थैरन्तरितैरपि न गृह्येत; गृह्येत चेत् योग्य-त्वादन्तरितैरपि गृह्येत। यदि प्रतिपुरुषं योग्यताभेदः कल्प्यते तदा प्राप्तिर्वा लाघवात्कल्प्यतामिति ध्येयम्।

परपक्षेणेति—क्षणिकपक्षेणापीत्यर्थः—**अन्वारोहो**ऽभ्युपगमः। **योग्यक्षणा-दिति**—अव्यवधानस्थले योग्यकारणक्षणस्य योग्यक्षणोत्पादकत्वस्यैव दर्शनात् व्यवहितस्थले शक्तिवैलक्षण्यं कल्प्यमित्यर्थः। ननु तत्र क्षणस्वरूपमेव हेतुरस्तु न तदतिरिक्तशक्तिकल्पनेति चेन्न; वैजात्यस्यावश्यकल्प्यत्वात्; अन्यथा घटादि-(घटाधार)(अन्याधार)क्षणस्यान्य(स्यपटादि)क्षणोत्पादकतापातात्। **स्वमतबाधक-मिति**—स्वरूपात्तिरिक्तशक्तिभेदाङ्गीकारे धर्मधर्मिभावभेदरहितस्वमतबाधः। सह-कार्यङ्गीकारे च सहकारिणा सहकार्ये किञ्चित्कार उत्पद्यते न वेत्यादिविकल्पने (ल्पिते) न सहकारिनिरासात् स्वमते तद्बाध इत्यर्थः।

केचित्तु इन्द्रियाणां प्राप्तिकल्पने गौरवादिति स्वापादितमतस्य बाधकमि(त्यर्थः) त्याहुः। . . . .

ननु कल्प्यत्वे गौरवं किंतु दृष्टमेवाङ्गीक्रियते इत्याशङ्कते—दृष्टं छादकमेवेति। अपसिद्धान्तमेवोपपादयति—छादकस्येति। तोयादीति—तत्रापि छादकसहकारिणा योग्यताशून्य (स्यक्षण) स्योत्पत्तेरिति भावः। अत्यन्तमिति—कारणानां कार्यदेशसन्निहितानामेव जनकत्वात् अन्यथाऽतिप्रसङ्गादिति भावः। प्रागुपक्षिप्तं परोक्तं प्राप्तिप्रकारं दूषयति—उक्तातिप्रसङ्ग इति। अतिप्रसङ्गमेव दर्शयति—तदा निमीलना (लिता) द्यवस्थायामिति। तथात्वेऽपीति—एकस्येन्द्रियस्य विषयग्रहणकाले विषयदेशव्यापिपृथुत्वावस्था निमीलनकाले नाशात्मकसंकोचरूपाणुत्वावस्था च अदृश्यमाने कल्प्ये इत्येको गौरवदोषः। बहिर्गतांशस्यावयविना समं भिन्नाभिन्नत्वाद्वा भिन्नांश भिन्नाभिन्नतात्स्वांश (भिन्नाभिन्नत्वात्स्वाभिन्नांश) नाशेऽपि तदभिन्नेन्द्रियस्वरूपस्यावस्थानं चात्यन्तादृश्यमानं कल्प्यमित्यपरो दोषः। तथा (तदा)पि (वि) नष्टावस्थस्य च चक्षुरुन्मीलनानन्तरं तावद्व्यापिनश्चक्षुष उत्पत्तिरित्यादिबहुदोष इत्यर्थः। यत्तु कैश्चिदिति—रसेश्वरादिसि (श्वरसि) द्धान्तिभिरित्यर्थः॥

निष्क्रान्तं चाक्षुषं तेजो बाह्यालोकेन वर्धितम्।
दूरासन्नार्थयोर्नित्यं गृह्णाति युगपत्क्वचित्॥

इत्युक्तेः। नैयायिकैकदेशिन इत्यप्याहुः।

चाक्षुषं तेज इति—चक्षूरूपं तेज इति विवक्षितं उत तत्संबन्धि? इति विकल्पमभिप्रेत्याद्यं दूषयति—निष्क्रमणेति। चाक्षुषं चक्षुरेव। प्रज्ञादित्वात् स्वार्थिकोऽण् प्रत्ययः। गौरवमेवोपपादयति—अनिष्क्रान्तमेवेति। तद्देशाप्रविष्टस्य कथं तत्रारम्भकत्वम्? इत्यत्राह—आन्तरेति। अन्तस्स्थस्य (विकारावस्थाशून्यस्य) तद्देशापरित्यागेन निष्क्रमणकल्पनायां निष्क्रमणं विनाऽपि बाह्यदेशप्रवेशोऽस्तु आन्तरदेशपरित्यागकल्पने चान्धतापत्तिरित्यर्थः।

ननु भवतां वृत्तेरि (विवृत्तेरि)व चाक्षुषतेजःप्रभाया निर्गमने को दोषः? इत्यत्रा (निर्गमने दोष इति द्वितीयं पक्षमाशङ्क्या) ह—अपिचेति तदा अस्मदुक्त्याप्तेरिति—तथाच अस्मदुक्तप्राप्तेरावश्यकत्वात्तन्मात्रेणैव ग्रहणोपपत्तौ(वा)बाह्यतेजसासमामवयव्यन्तरं न कल्प्यमित्यर्थः। अस्मदुक्तप्राप्तेरावश्यकतामाह—अन्यथेति। आभिमुख्येन तेजोऽन्तरोत्पत्तावपि नयनवृत्तीनां परावृत्य प्राप्त्यनभ्युपगमे स्वमुखव्यापित्वाभावादभ्युपेततेजसा मुखग्रहणं न स्यादिति भावः। नन्वाभिमुख्येनोत्पन्नस्यापि दर्पणादिसन्निधौ परावृत्तिरस्त्विति चेत् न; तथात्वे नयनवृत्त्यैवोपपत्तौ अतिरिक्तकल्पने गौरवप्रसङ्गात्। नच दूरासन्नार्थयुगपद्ग्रहणा(य)र्थं तदभ्युपगमः! तथाऽप्यवयव्यन्तरं विना स्वनयनतेजस्संवलितबाह्यतेजस एव ग्राहकत्वकल्पनोपपत्तेः। किं चान्धकारस्थपुरुषेण योजनदूरस्थालोकमध्यवर्तिपर्वतादिकं मध्ये च समीपस्थितालोकमध्यस्थमपि वस्तु युगपदेव गृह्यते। नच

दूरासन्नपदार्थंव्यापि किंचित्तेजोऽन्तरं जन्यते ! मध्येऽन्धकारस्थले बाह्यालोकाभावात्। क्रमेण दूरासन्नयोस्तेजसोर्द्वयोरुत्पत्तौ क्रमिकत्वेन यौगपद्यग्रहो न स्यात्। तत्र चेत् झाडित्यादिना समर्थनं तदा नयनवृत्तेरेवोपपत्तिरिति भावः ॥ ४० ॥

अक्ष०—अथ वृत्तिप्रसरणे क्रमयौगपद्यविकल्पायोगात् द्रुतं दूरस्थवस्तुप्राप्तेरसंभवात् रूपग्राहकं चक्षुः शब्दग्राहकं श्रोत्रं वा न प्राप्यग्राहि दूरस्थग्राहीन्द्रियवत्—यथा मन इति बाह्योक्तानुमाने प्रत्यनुमानमाह—प्राप्यग्राहीति। विमतं—चक्षुरादि प्राप्यग्राहि—इन्द्रियत्वात् त्वगादिवदिति प्रयोगो विवक्षितः। प्राप्यग्राहीत्यत्र प्राप्तिः साक्षात्परम्परा साधारणी ग्रहणञ्च ज्ञानतदितरक्रियासाधारणं तेन साक्षात् बाह्यविषयासंबन्धिनि मनसि ज्ञानाजनके कर्मेन्द्रिये वा न व्यभिचारः। यथा तैजसे उदयत्येवादित्ये तत्प्रभायाः दिगन्त व्याप्ति (मत्वम् ?) : तथा चक्षुर्वृत्तेरप्युन्मीलनक्षण एव वेगातिशयेन दूरस्थसंबन्धे न विस्मयः कश्चित्।

दूरस्थयोः विषयेन्द्रिययोः संयोगरूपा प्राप्तिर्दुर्घटेत्यत्राह—प्राप्तिरिति। उक्तप्रकारेति। चक्षुरादेरिन्द्रियस्य दीपप्रभान्यायेन स्वनिर्गतवृत्तिसंबन्ध एव विषयसंबन्ध इत्यर्थः। व्यवधाने सति प्रभाया इव वृत्तेरपि विनाशात् न विषयग्रहणमिति भावः। तर्हि जलादिना व्यवधानेऽपि वृत्तेर्विनाशात् तदन्तर्गत शिलादेरालोके सति चाक्षुषं न स्यादित्यत्राह—वृत्तिमिति। न रुन्धे—न विनाशयतीत्यर्थः। अच्छः। सूर्यालोकादेरिव दृग्वृत्तेरपि प्रवेशार्हाणां छिद्राणां सूक्ष्माणां सत्वात् तद्वारा वृत्तिप्रसरणमस्त्येवेति नानुपपत्तिरितिभावः।

नन्वसत्यपि छादके चक्षुर्वृत्या फलरूपादिग्रहणेऽपि रसाद्यग्रहात् योग्यतातद्भावाभ्यामेव ग्रहणाग्रहणयोरुपपादनीयतया छादकतद्भावावनर्थकावित्यत्राह—नोचेदिति—छादकतदभावयोरप्रयोजकत्वे सर्वमपि योग्यं व्यवहितमपि युगपद्गृह्येतेत्यर्थः। व्यवधायकेन योग्यतायाः नाशाभ्युपगमान्नोक्तातिप्रसङ्ग इत्यत्राह—स्थैर्य इति। योग्यतायाः आश्रयस्य स्थिरत्वेन योग्यतापगमो न भवति सर्वस्यापि क्षणिकत्वं प्रागेव निरस्तं। स्थिरएव वस्तुनि योग्यतामात्राच्छादकबलान्नेक्ष्यतीति कल्पने छादकेऽपनीतेऽपि तदग्रहणं स्यात्। तथा व्यवधानरहितस्याऽपि अन्यस्य पुंसः तदग्रहप्रसङ्गः इत्यादिदोषवारणाय पुरुषभेदेन कालभेदेन च योग्यतोत्पत्तिविनाशादिकल्पने महागौरवमिति भावः।

क्षणभंगपक्षाभ्युपगमेऽपि उक्तप्रसंगो दुर्वार इत्याह—समा सन्ततिरिति। प्रायेण पूर्वक्षणेन सजातीयोत्तरक्षणस्यैवोत्पत्तिदर्शनात् छादके सति अयोग्यक्षणस्य उत्पत्तिवचनेन प्रसंगपरिहारो न भवितुमर्हतीति भावः। त्वन्मतेऽपीत्यपिना सांख्यमतस्याऽपि परिग्रहः। तन्मते आहंकारिकस्याऽपि चक्षुरादेः स्वतएव तत्तद्ग्राह्यदेशव्यापिप्रथिमोपगमेन तत्राधिष्ठानात् बहिरवस्थितांशस्यैव वृत्तित्वोपगमात् छादके सत्यपि तदुक्तवृत्तेरनपायात् उक्तप्रसङ्गो दुर्वार इति भावः॥ ४० ॥

शब्दं गृह्णाति दूराभ्युदितमपि बहिस्सन्तता श्रोत्रवृत्ति-
र्दिग्भेदासन्नतादिग्रहणमपि तदा तत्र तत्सन्निधानात् ।
इत्येकेऽन्ये तु दूरान्तिकगतजनताशब्दधीकालभेदात्
श्रोत्रायातस्य तस्य ग्रहमनुमितिमप्याहुरस्मिन्निगादेः ॥ ४१ ॥

सर्वा०—भवतु चक्षुषस्तेजसाऽऽप्यायितत्वान्मणिप्रभान्यायेन काचिद्वृत्तिः, श्रोत्रस्य त्वाकाशाप्यायितस्य सा कथमित्यत्राह—शब्दमिति ॥ विकारिद्रव्यस्य तावत्स्वरूपत आप्यायकद्वारा वा तत्रतत्र वृत्तिरविरुद्धा । न चानुपलम्भविरोधः; योग्यत्वाभावात् । अन्यथा स्वेष्टमपि भज्येत । तवापि हि बुद्धिसन्ततेः शरीरान्तरगमनमालोकादिगमनं च दृष्टं कल्प्यं वा ? नाद्यः, अशक्यत्वादनभ्युपगमाच्च । न द्वितीयः, तद्वदत्रापि कल्पनोपपत्तेः । न हि तत्र गतिः प्राप्तिर्वा कल्प्यते । किन्तु तत्रतत्रोत्पत्तिमात्रमिति चेत्तथाऽत्रापि त्वया कल्प्यम्; अविशेषात् ।

न च शब्दात्मकाः पुद्गलाः श्रवणदेशमायाता दृश्यन्त इति युक्तम्; शब्दस्य रूपादिवद्गुणत्वोपपत्तेः पुद्गलत्वायोगात् । नापि शब्दस्यैवागमनम्, बाह्यैकेन्द्रियग्राह्यतया श्रुत्यादिभिश्च रूपादेरिवाद्रव्यस्य क्रियानुपपत्तेः । न च शब्दस्य तद्व्यञ्जकस्य वा वीचीतरङ्गकल्पना; अत्यन्तगौरवात् । न च व्याप्तं श्रोत्रम्, युगपत्सार्वत्रिकशब्दोपलम्भप्रसङ्गात् । न च प्रतिनियतैः प्रदेशैश्शक्तम्; नियामकाभावात् । श्रोत्रसमवायेन शब्दो गृह्यत इति पक्षस्तु इन्द्रियाणामभौतिकत्वस्थापनयाऽपास्तः । अतो यथोपलम्भं तत्तज्जन्तुषु स्ववृत्त्या तावद्देशव्याप्तं श्रोत्रं तत्तद्देशे शब्दं गृह्णातीति । एवमनभ्युपगमे दोषमभिप्रेत्याह—दिग्भेदेति । यदि श्रोत्रवृत्तिस्तत्रतत्र न स्यात् कथं तद्विशिष्टः शब्दो गृह्येत ? न ह्यत्र प्राच्यादिप्रतिनियतं लिङ्गं दृश्यते; नापि दूरासन्नत्वनियतम् । अतश्शब्दस्वरूप इव तदुत्पत्तिदेशविशेषेष्वपि श्रोत्रवृत्तेः शक्तिः कार्यकल्प्या । आसत्तितारतम्यानुरोधेन विशदाविशदावभासश्च चक्षुर्वृत्तिनयेन नेतव्यः । अत्र पक्षान्तरं स्थापयितुं सांख्यानुसारिणां पक्षोऽयमिति निगमयति—इत्येक इति । बुद्धयन्तरानुगुणमतान्तरमाह—अन्ये त्विति । दूरस्थस्ताड्यमानभेर्या दशकोणाभिघातात्पश्चाद्विलम्बेन शब्दं शृणोति, वादकास्तदासन्नाश्चाविलम्बितम्, तदेतद्गन्धाश्रयद्रव्यविसर्पन्यायमन्तरेण कथं स्यात् ? अत एवानुवातप्रतिवातयोरतिदूरानतिदूरं च शब्दो गृह्यते; बहिरन्तर्गृहगतानां च दूरस्थशब्दग्रहणे स्फुटास्फुटधीश्च । अतः * श्रोत्रप्रदेशायातभूतधर्मस्य शब्दस्य ग्रहणम्, तस्यायातत्वमाश्रयद्वारजम् । *शब्दगन्धसूर्यालोकरत्नप्रभादयो धर्म्यंतिवर्तिनो गतिमन्तश्च इत्यात्मसिद्धिवाक्ये शब्दशब्दो गन्धशब्दवदाश्रयलक्षकः ।

गुहासौधादिसंक्षोभः प्रतिशब्दश्च जृम्भते ।
निस्साणादिप्रणादेन तदेतत्पक्षसङ्गतम् ॥

नन्वेवं दिगादिविशिष्टोपलम्भः कथमित्यत्राह—अनुमितिमिति। आदिशब्देन दूरासन्नत्वग्रहः दृष्टान्तप्रदर्शनं च।

यथा मयूरवीणादेः शब्दोऽयमिति गृह्यते।
तथा प्राच्यादिजातोऽयमिति लिङ्गात्तथाविधात्॥

तत्र यद्यपि शब्दस्य विशेषः कोऽपि दुर्वचः।
तथाऽपि विदितस्तैस्तैर्लिङ्गं स्यात्सम्मतेष्विव॥

नन्विमौ द्वावपि पक्षौ हार्दिकौ, पूर्वत्र दिगादिषु श्रोत्रस्य शक्तिकल्पनागौरवात्, उत्तरत्र दुर्वचलिङ्गदर्शनक्लृप्तेरिति। हन्तः! एवं वदन् किं शब्दग्रहे दिगादिग्रहणमेव नास्तीति मन्यते? सदपि वा निष्कारणकम्? सकारणमपि वा निष्कारणकम्? सकारणमपि वा कारणान्तरसिद्धमिति? नाद्यः, सर्वलोक[धी]विरोधात्; सामग्रीवैकल्यात्तु कदाचिद्दिगादिरहितधीः। न द्वितीयः, आगन्तोरहेतुकत्वविरोधात्। न तृतीयः, आगमादेरत्रासंभवात्। भ्रान्त्याऽत्र दिगादिधीरिति चेन्न; प्रतिपुरुषनियतदिगध्यासहेतुभूतधर्मविशेषग्रहाभावात्, भावे वा तत एव तत्तदनुमानोपपत्तेः। तद्वदेव च दिगादेरप्युपलम्भोपपत्तेः। न चाबाधितांशे भ्रान्तिक्लृप्तिर्युक्ता। अतः प्रत्यक्षतोऽनुमानतो वाऽत्र दिगादिग्रह इत्यन्यतरपक्षोऽनतिक्रमणीयः। शब्दस्य नित्यविभुत्वात्तदाश्रितत्वाद्वा श्रोत्रेण नित्यसम्बन्ध इति वादस्त्वद्रव्यसरे निरसिष्यते [इति]॥ ४१॥

आनन्द०—अत्राप्याक्षेपसंगतिमाह—भवत्विति। आकाशाप्यायितस्येति—आकाशस्य नित्यतया वृत्त्य (शस्यप्रभा) भावादिति भावः। विकारिद्रव्यस्येति—कार्यत्वाद्वृत्तिस्स्यादिति (प्रभाया अभावेऽपि परिणामविशेषस्यापि विरोधादिति) भावः। अन्यथेति बौद्धपूर्वपक्ष्यनुसारेणेदमिति (बौद्धोऽत्रपूर्ववादीति) भावः। इष्टभङ्गमेवाह—बुद्धिसंततेरिति। अशक्यत्वादिति—दर्शनायोग्यत्वादित्यर्थः। जैनमतानुसारेण शङ्कते—नचेति। पूरयन्ति गलन्ति चेति पृथिव्यादि (द्रव्याणि पुद्गलः) परमाणुरूपं द्रव्यं पुद्गलशब्दार्थः। शब्दोऽपि परमाण्वात्मकद्रव्यपुञ्जमिति शब्दस्यैव गतिमत्तया श्रोत्रदेशगमनसंभवात् न वृत्तिः कल्प्येति भावः। न च शब्दस्य पुद्गलत्वमस्त्वित्याशङ्क्याह—नापीति।

शब्दो गुणः बाहचे(ह्यैके)न्द्रियग्राह्यजातिमत्त्वात् रूपादिवत् इत्यनुमानं द्रष्टव्यम्। आदिशब्देन पुराणादिग्रहः। न च शब्दस्येति—वीचीतरङ्गवदुपपत्तिकल्पनेत्यर्थः। ननु श्रोत्रस्य व्यापकस्यैवोत्पत्तिकल्पनास्त्वित्यत्राह—नचेति। न च प्रतिनियतैरिति—कदाचित्कुत्रचित् शब्दग्रह इति नानादेशव्यवस्थया शब्दग्रहात् नियतप्रदेशशक्तिकल्पनमित्यर्थः। अन्यथा दूरस्थशब्दस्याग्रहणेन तत्र देशे शक्त्यभावे तत्र गतेऽपि शब्दग्रहो न स्यादिति भावः। श्रोत्रसमवायेनेति—वैशेषिकपक्ष

इत्यर्थः। भूतगुणस्य शब्दस्याहङ्कारिकेणेन्द्रियेण समवायायोगादित्यर्थः। श्रोत्रेणाग्रहणेप्यनुमानात्तद्ग्रह इत्यत्राह—न ह्यत्रेति। दूरासन्नत्वनियतं—दूरासन्नत्वव्याप्तम्।

ननु श्रोत्रस्य वृत्त्यङ्गीकारेऽपि देशग्रहणासामर्थ्यात् कथं तत्तद्देशविशिष्टशब्दग्रहः? इत्यत्राह—अत इति। प्रकारान्तरेण तद्विशिष्टप्रतीत्यनिर्वाहादिति भावः। ननु तत्तच्छब्ददेशव्यापिवृत्तिस्वीकारे दूरासन्नयोः शब्दग्रहतारतम्यानुपपत्तिरित्यत्राह—आसत्तितारतम्यानुरोधेनेति। ग्राह्यशब्दापेक्षया ग्राहकपुरुषस्येति शेषः। बुद्ध्यन्तरं—दूरासन्नयोःक्रमेण बुद्धिरित्यर्थः। बुद्ध्यन्तरमेवोपपादयति—दूरस्थस्ताडयमानेति। गन्धाश्रयेति—तथाच शब्दाश्रयद्रव्यस्य श्रवणदेशविसर्पः कल्प्यत इति भावः। अत एवेति—अतिदूरोऽप्यनुवाते शब्दो गृह्यते प्रतिवाते अनतिदूर एव गृह्यत इत्यर्थः। भूतधर्मस्येति—शब्दस्य द्रव्यत्वं येऽभ्युपगच्छन्ति तन्मतसंगतमिति भावः।

ननु तस्याद्रव्यत्वे कथमागमनमित्यत्राह—तस्यचेति। सिद्धान्तविरोधं परिहरति—शब्दगन्धेति। गन्धस्य गुणत्वं सर्वसिद्धमिति भावः। शब्दशब्द इति—ननु गुणत्वे धर्म्यतिवर्तिन इति विरोध इति चेन्न; धर्मिशब्देन समुदायस्याभिधानात् तदेकदेशरूपाश्रयद्वारा तदतिवर्तित्वं सम्भवतीति (समुदायरूपधर्म्यतिवर्तित्वस्य विवक्षितत्वादिति) भावः। ननु आश्रयद्वारा शब्दस्य कर्ण (अन्य)देशागमनं किमर्थं कल्प्यते? तावद्व्यापी शब्द एव प्रथममुत्पद्यतामित्यत्राह—गुहासौधादौति। शब्दस्य तावद्देशव्यापिन उत्पत्तौ गुहासौधप्राकारादीनाम (रादिष्व) भिधातरूपसंक्षोभा(भाभावात्)त् प्रतिशब्दो नोपपद्यते शब्दाश्रयद्रव्यस्यागमनपक्षे तु तीव्रतरशब्दाश्रयद्रव्याभिघातेन गुहादौ प्रतिशब्द(उत्पद्यत इत्यर्थः) स्सम्भवतीति भावः। नन्वस्मिन् पक्षेऽपि तत्तद्देशविशिष्टशब्दग्रहो न स्यादित्याशङ्कते—नन्विति।

ननु अस्मिन्पक्षे मयूरवीणादिशब्दविशेषग्रहेऽपि सामर्थ्यं श्रोत्रस्य कल्प्यताम् तथाच नायं दृष्टान्तः; अन्यथा तत्र तत्तत्प्रतिनियतविशेषस्याभावादानुमानिकत्वानुपपत्तेरित्यत्राह—यद्यपीति। विशेषस्य शब्दे (दुर्वचत्वेऽपि) दुरभिलपत्वेऽपि तैस्तैः पुरुषैर्विदितोऽनुभवसिद्धस्संमतेष्विव—इक्षुक्षीरादिमाधुर्येष्विव विशेषो लिङ्गं भवत्वित्यर्थः; अन्यथा इक्षुक्षीरादिमाधुर्येष्वपि विशेषो न स्यादिति भावः। हाठिकौ—हठात्सिद्धौ—आपातसिद्धाविति यावत्। अध्यात्मादित्वाट्ठञ्। ननु शब्दग्राहकस्य दिगादिग्राहकत्वे कदाचिदयं (ग्राहकेष्वयं) शब्दः कुत्रत्य इति सन्देहो न स्यात् इत्यत्राह—सामग्रीति। दोषादिना लिङ्गादिप्रतिसन्धानादि सहकारिवैकल्यादिति भावः आगन्तोः—कार्यस्येत्यर्थः। आगमादिः—तद्बोधकश्रुत्यादिः। भ्रान्त्येति—भ्रान्तिः-दोषः तेनेत्यर्थः। यद्वा (केचित्तु) द्विद्रोणेन धान्यं क्रीणाति

पञ्चकेन पशून् इत्यादिवत् प्रकृत्यादित्वात्स्वार्थे तृतीया। तथाच दिगादिधीर्भ्रान्तिरित्यर्थः(इत्याहुः)। प्रतिनियतेति—सादृश्यज्ञानस्याध्यासकारणत्वादिति भावः। तद्वदेवेति—प्रतिनियतधर्मवच्छ्रोत्रेणैव शब्दगतप्रतिनियतधर्मवद्दिगादिग्रहणोपपत्तेरित्यर्थः। एतच्च प्रथमपक्षानुसारेण; किञ्च बाधकाभावादपि न भ्रान्तिरित्याह—नचाबाधितेति। ननु शब्दो नित्यो विभुः श्रोत्रेण सर्वदा सम्बद्ध एव। यद्वा विभ्वाश्रितत्वादपि श्रोत्रेण सम्बद्ध एव; तथाच तद्ग्रहार्थं श्रोत्रवृत्तिशब्दागमनकल्पनाऽनर्थिकेत्यत्राह—शब्दस्येति॥ ४१॥

अक्ष०—अथ श्रोत्रेन्द्रियस्याऽपि वृत्त्या प्राप्तिपूर्वकमेव साश्रयशब्दग्राहकतां वदतां मतमनुवदति—शब्दमिति। विकारिद्रव्यत्वात् स्वरूपतो वा आप्यायकद्वारा वा विकाररूपावृत्तिरविरुद्धेतिभावः। अन्यथा दूरोत्पन्नशब्दग्रहणं न स्यादिति प्रसङ्गसूचनायाह—दूरेति। बहिस्सन्ततेति—श्रोत्रदेशादारभ्य ग्राह्यशब्ददेशपर्यन्तव्यापिकेत्यर्थः। अत एव क्वचित् शब्दे प्राच्यत्वादिग्रहणमासन्नत्वादिग्रहणमप्युपपद्यत इत्याह—दिग्भेदेति। कथमित्यत्राह—तदेति। वृत्त्युपगमे दिग्भेदादौ तस्यास्सन्निधानादिति भावः। नच श्रोत्रस्य द्रव्यग्राहकत्वाभावात् कथं प्राच्यासन्नत्वादिदेशविशिष्टग्राहकत्वसंभव इति वाच्यम्। उक्तप्रत्ययस्य बाधाभावेन द्रव्यग्रहेऽपि श्रोत्रवृत्तेः शक्तिकल्पनात्।

नच लिङ्गादेव तद्ग्रह इति वाच्यम् दूरत्वासन्नत्वादिनियतलिङ्गस्य दुर्वचत्वात् सांख्यानुयायिनामयं पक्ष इत्याह—इत्येक इति। पक्षान्तरमाह—अन्येत्विति। श्रोत्रदेशंप्रत्यागतस्यैव शब्दस्य स्वदेशस्थितेन श्रोत्रेण ग्रहणं नतु श्रोत्रवृत्त्या बहिर्गतया। सन्निकृष्ट विप्रकृष्टजनैः प्रस्फुटेन कालभेदेनैव ग्रहणस्य शब्दस्य साश्रयस्यागमनोपगमएवोपपत्तेरित्याह—दूरान्तिकेति।

अस्मिन्नेव पक्षे भेर्यादिशब्देन सौधादिष्वभिघातात्प्राप्तिशब्दश्रवणमप्युपपद्यते, वेगागतशब्दाश्रयद्रव्याभिघातादेव शब्दजननसंभवः नतु गुणरूप शब्दमात्रागमात् नापिश्रोत्रवृत्तिप्रसरणाद्वा। दिक् दूरान्तिकादिक्भेदादिदेशविशिष्टशब्दग्रहः कथमित्यत्राह—अपीति। अत्रापिना साश्रयशब्दगमनोपगमात् प्रत्यक्षमपि संभवेदिति व्यज्यते। नच दिगादिनियतलिङ्गस्य दुर्वचत्वात् कथमनुमितिरिति वाच्यम्। दुर्वचत्वेऽपितत्तत्पुरुषानुभवसिद्धं तत्तत्प्रतिनियतं लिङ्गं इक्षुक्षीरादिमाधुर्यभेदवत् दुपरह्नवमिति भावः॥ ४१॥

शब्दग्रहणविषयेविशेषः

प्रत्यक्षं व्योम नीलं नभ इति हि मतिश्चक्षुषैवास्मदादेः
कूपोऽसौ रन्ध्रमेतत्पतति खग इहेत्यादिधीश्चात्र मानम् ।
आधारोऽत्रातपादिर्यदि भवति कथं तस्य चेहेति बोध-
स्तत्यांशश्चेत् त्र्यणौ तच्छिथिलगति न च व्योमवागातपादौ ॥४२॥

सर्वा०—इन्द्रियचिन्तानन्तरं भूतचिन्ताप्राप्तौ प्रथममाकाशे चार्वाकैरपि संमन्तव्यं प्रमाणविशेषं पुरस्करोति—प्रत्यक्षमिति ॥ कथमित्यत्राह—नीलमिति । धूम्रादेरुपलक्षणमेतत् । आरोपितं नभसि तलत्वादिवन्मलिनत्वादिकमिति चेत्; असावारोपश्चाक्षुषोऽन्यो वा ? आद्येऽधिष्ठानमपि चाक्षुषमेष्टव्यम्, अन्यथाऽतिप्रसङ्गात् । द्वितीयस्त्वसंभवी, निमीलिताक्षस्य तादृशारोपादृष्टेः । अत एव अनुमिते नभसि नैल्यारोप इत्यपि निरस्तम् । न च नीलं नभ इति धीरेव नास्ति; विश्वविसंवादात् । नाप्यसावचाक्षुषः, अस्मदादिचक्षुर्व्यापारानुविधानात् । नभसि विततानां पार्थिवात्रयवानां कृष्णगुणमात्रं चक्षुषा गृह्यत इति चेन्न, नीलं नभ इति धर्मिपर्यन्तबुद्धेः, गुणिलिङ्गत्वाच्चात्र नीलादिशब्दनाम्; एतेन नीलरूपस्मृतिप्रमोषोऽयमिति पक्षोऽपि निरस्तः ।

ननु नभसि स्वतो नैल्याभावात् पञ्चीकृतेऽप्यस्मिन्नैल्यस्य पार्थिवांशमात्रनिष्ठत्वात् तस्मिन्नेवांशे स्यादसौ चाक्षुषधीः । मैवम्; तस्य नभश्शब्दार्थत्वायोगात् । नीलपटन्यायस्य चात्र ग्राह्यत्वात्, वालातपसन्निधावरुणं नभ इत्यादिबुद्धेः । तत्राप्यरुणातपग्रहणमात्रमिति चेत्; कस्तर्हि तत्र नभश्शब्दार्थः ? न ह्यनेकार्थोऽयं शब्दः, अनुवृत्तमनतिप्रसङ्गि च निमित्तं दुर्लभम्; पृथिव्यूर्ध्वत्वादेस्तथात्वाभावात् । चन्द्रिकादिविशेषानादरेण विरलावस्थितद्रव्यमात्रं नभ इति चेन्न; वियति विरला चन्द्रिकेत्यादिपृथग्व्यपदेशात् । वैरल्यदर्शनमपि नभःप्रत्यक्षतामन्तरेण न घटते । तत्तन्मध्यप्रदेशानां तैस्तैरस्पृष्टता हि विरलता; तथा च मध्यदेशभूतं नभः प्रत्यक्षम्; परस्परासंयोगमात्रं वैरल्यमिति चेन्न; भिन्नकालेषु गुणादिषु च विरलधीप्रसङ्गात् । वर्तमानानामासन्नदेशस्थानां द्रव्याणामसंयोगो विरलतेति चेन्न । चन्द्रिकादिष्वसंयुक्ततेजःकणानामासन्नदेशतया नभस एव ग्राह्यत्वात् । विरलविरलतरादिबुद्धौ असंयोगाविशेषे मध्यदेशाल्पत्वभूयस्त्वग्रहणमन्तरेण का गतिः ? दूरदूरतरादिस्थितिरिति चेत् तथाऽपि दूरासन्नदेशतया नभः प्रत्यक्षमेव । दिशस्तत्र देशत्वं स्यादिति चेत्, न, उपाध्यतिरेकिण्यामपि तस्यां प्रत्यक्षत्वस्य नभस्समानचर्चत्वात् । दीर्घेण ह्रस्वेन च स्प्रष्टुं योग्यत्वमेव दूरत्वमासन्नत्वं च । अतो नात्र प्रदेशबुद्ध्यपेक्षेति चेन्न; तयोस्तत्तत्स्वरूपत्वेऽतिप्रसङ्गात् । अतिरेके तु देशविशेषस्थित्युपलम्भमन्तरेण तदसिद्धेः ।

अत्र चाक्षुषमेवोपलम्भान्तरमप्युदाहरति— कूपोऽसाविति । कूपरन्ध्रादयो हि तत्तद्देशविशेषतया सर्वलोकप्रत्यक्षसिद्धाः । आवरणाभावमात्रं तु निरसिष्यते ।

पत्रिणश्च पतनदेशतया नभः प्रत्यक्षयामः; तत्र इहप्रत्ययस्यान्यथासिद्धिमाशङ्कते—आधार इति। इहेति प्रतीयमानत्वमात्रमिहाधारत्वम्। परिहरति—कथमिति। इह नभस्यातपादिरिति व्यतिरेकानिर्देशान्नातपादिरिहशब्दार्थः स्यादिति भावः। अत्रोदयनाद्युक्तमाशङ्कते—तस्यांशैरिति। आतपाद्यंशांस्तदाधारीकृत्येत्यर्थः। दूषयति—त्र्यणाविति। परैस्त्र्यणुकानामप्रत्यक्षात्व्द्यणुकाश्रितत्वस्वीकारादंशैरिह प्रतीतिनिर्वाहस्तत्र कुण्ठित इत्यर्थः। माभूत्वांशैः त्र्यणुकानामिहेति धीः, त्र्यणुकसमुदायमिहेति निर्दिश्य प्रत्येकं तदाधेयतयोपचर्यतामित्यत्र क्लिष्टगतो लोकव्यवहारं प्रतिपक्षयति—न चेति। इह नभसि त्र्यणुकम्, इह व्योम्न्यातपः इत्यादिव्यवहारं त्र्यणुकतत्समुदायादिव्यतिरिक्ते कुत्रचिन्नभः पर्यायाणां प्रयोगः प्रसिद्धः। सर्वलोकप्रतीतिव्यवहारोल्लङ्घनं तु सर्वसंक्षोभकं साहसमिति भावः। चशङ्काद्योतकोऽवधारणार्थो वा ॥ ४२ ॥

आनन्द० —अवसरसंगतिं दर्शयति—इन्द्रियेति। भूतोत्पत्तिक्रमे आकाशस्य प्राथम्यात् (प्राधान्यादाकाशस्य) तन्निरूपणे कर्तव्ये तत्र निरूपणस्य लक्षणप्रमाणाधीनत्वात् धर्मिसाधकं प्रमाणमाहेत्यर्थः। चार्वाकैरपीति—तस्य प्रत्यक्षमात्र(क्षेत्र) प्रमाणवादित्वादिति भावः। तलत्वं(कठिन)कार्यदेशत्वम्। अन्यथेति—अधिष्ठानस्य चाक्षुषत्वाभावेऽपि चाक्षुषरूपाद्यारोपे ह्या(रोपआ)त्मादावपि तथाऽऽरोपप्रसङ्गादिति भावः। असंभवीति—चक्षुर्व्यापारनिरपेक्षो न सम्भवतीत्यर्थः। तदेवोपपादयति—निमीलितेति। अत एवेति—अचाक्षुषे चाक्षुषारोपासम्भवादित्यर्थः। किञ्च नीलधियो गुणमात्रविषयत्वे तदधीनव्यवहारस्यापि तन्मात्रविषयत्वान्नीलशब्दस्य नैल्यमात्रविषयस्य नीलं नभ इति क्लीबता न स्यादित्याह - गुणिलिङ्गत्वाच्चेति। एतेनेति—धर्मिपर्यन्तधी (न्तत्व) दर्शनात् गुणिलिङ्गत्वाच्च नीलादिशब्दानामित्यनेनेत्यर्थः। स्मृतिप्रमोषः—तत्तानवगाहिस्मृतिः। ननु तर्हि स्वतोऽपि नीलरूपस्य विरहात् कथं नीलं नभ इति प्रतीतिस्स्यात् इत्यत्राह—नीलपटन्यायस्येति। स्वतोऽभावेऽपि पार्थिवसम्बन्धात्तथा धीरित्यर्थः। ननु रूपशून्यस्य कथमन्यरूपसम्बन्धेनाऽपि चाक्षुषरूपारोपाधिष्ठानत्वमतिप्रसङ्गादित्यत्राह—बालातपेति। अतिप्रसङ्गस्त्वनुभवबलाद्वार्य इति भावः। नन्वत्रान्य एव नभश्शब्दार्थ इत्यत्राह—न ह्यनेकार्थोऽयमिति। नन्वेकप्रवृत्तिनिमित्तत्वे न नानार्थत्वदोष इत्यत्राह —अनुवृत्तमिति। पृथिव्यूर्ध्वत्वादेरिति। पक्षितरण्यादिगतत्वेनातिप्रसक्तस्य प्रवृत्तिनिमित्तत्वायोगादित्यर्थः;

ननु विरलसंस्थानश्चन्द्रिकावयवसङ्घो नभश्शब्दार्थः। वियति विरला चन्द्रिकेति प्रतीतिस्तु वने वृक्षप्रतीतिन्यायेन स्यादित्यत्राह—वैरल्यदर्शनमपीति। वैरल्यस्यैव नभश्शब्दार्थपर्यवसानादिति भावः। ननु संयोगाभाव एव वैरल्यमिति न (भावरूप) नभस्सापेक्षत्वमिति शङ्कते—परस्परेति। भिन्नकालेष्विति। तत्र

संयोगाभावस्य सत्त्वादिति भावः। चन्द्रिकादिष्वपि तत्रासन्नदेशः पृथिव्यादिर्न भवतीति नभ एव स देशस्स्यादिति भावः। नन्वस्तु देशस्तत्र नभः; तथाऽपि तद्ग्रहो मास्त्वित्यत्राह—विरलविरलतरेति। अभावे भूयस्त्वाल्पत्वरूपतरतमभावानां स्वतोऽसंभवादिति भावः। ननु संयोगरहितावयवानां दूरदूरतरादिस्थितिरेव संयोगाभावे तारतम्यमिति शङ्कते—दूरदूरतरादीति।

ननु दिगेव तत्र देशः स्यादित्याशङ्कते—दिश इति। तत्र किं दिगुपाधिरेव देशस्स्यात् उत तदतिरिक्ता दिगिति विकल्पमभिप्रेत्य तत्राद्ये वियति चन्द्रातपादिवैरल्ये पृथिव्यादीनामुपाधीनामसंभवाद्दिगुपाधिर्देशो न संभवतीति मत्वा द्वितीयं दूषयति—उपाध्यतिरेकिण्यामिति। रूपशून्यतया समानन्यायत्वादित्यर्थः। दीर्घेणेति—दण्डादिनेत्यर्थः। तयोरिति—तथाच देशविशेषज्ञानपूर्वकप्रतीत्या तदतिरिक्तत्द्योग्यत्वेन किमिति भावः। नन्वावरणाभावमात्रत्वाद्रन्ध्रस्य न तत्प्रत्यक्षसाधकमित्यत्राह— आवरणाभावमात्रमिति। पतनदेशतयेति—इह विहगः पततीति पतनाधारतयेत्यर्थः। नन्वातपादेः कथमाधारत्वम्? वैरल्यात्; अन्यथा तत्र क्षिप्तपाषाणादेः पतनाभावप्रसङ्गात् इत्यत्राह—इहेति। कुण्ठित इति—द्व्यणुकसमुदायातपादिष्वाकाशव्यवहारादर्शनात् प्रत्युत भेदव्यवहारात् तत्र विशेषस्यादृष्टचरत्वात् दृष्टविलक्षणातपादिकल्पने तस्यैवाकाशत्वमित्याह—इह नभसीति। अन्यथा घटादिकमपि पटादिधीगोचर इति साहसेन सर्व (लोक) व्यवस्थोच्छेदप्रसङ्ग इति प्रतीतिव्यवहारौ नातिलङ्घ्यावित्याह—सर्वलोकप्रतीतीति ॥ ४२ ॥

अक्ष०—इन्द्रियचिन्तानन्तरं भूतानि चिन्तयन् आकाशे प्रत्यक्षप्रमाणं दर्शयति—प्रत्यक्षमिति—व्योम प्रत्यक्षेणैव सिद्धमित्यर्थः। किन्तत्प्रत्यक्षमित्यत्राह—नीलमिति। अस्मादादीनामेवोर्ध्वं दर्शने नीलं नभ इति या मतिर्जायते तदेव (सैव) आकाशविषयकं चाक्षुषं प्रत्यक्षमित्यर्थः। आकाशस्य नीरूपत्वेऽपि रूपस्येवानुभवबलात्प्रत्यक्षत्वमभ्युपेयमितिभावः। एवं चाक्षुषान्तराण्यप्यत्र प्रमाणानीत्याह—कूपोऽसा विति। कूपादयः देशविशेषतया प्रसिद्धाः अत्र अन्यथासिद्धिमाशङ्कते—आधार इति। परिहृति—कथमिति—इह—पक्षी पततीत्यत्र इहेत्याधारतया आतपादेर्मानोपगमे इह आतपोऽस्तीत्यत्र तस्य आतपस्याधारतया कथमातपस्य बोधः स्यात् स्वस्यैव स्वाधारत्वायोगादिति भावः। तत्र आतपाधारतया तदवयव एव इहेति प्रतीयत इति शंकामनुवदति—तस्यांशश्चेदिति। परिहरति—त्र्यणाविति। इहत्र्यणुकमित्यत्र त्र्यणुकावयवस्य द्व्यणुकस्य अप्रत्यक्षतया इहेतिभानमनुपपन्नमिति भावः। अथापि त्र्यणुकसमुदायमिहेति निर्दिस्य तदन्तर्गतया तदाधेयत्वेन प्रत्येकत्र्यणुकं निर्दिश्यत इतिचेत्तत्राह—नचेति। इह व्योम्नि आतपः इत्यादौ व्योमशब्दस्यातपादौ वृत्यभावात् व्योम शब्देन आतपाभिधानासंभवात् तदरिक्ताकाशसिद्धिरवर्जनीयेति भावः ॥४२॥

रूपस्पर्शोज्झितत्वान्न भवति गगनं दर्शनस्पर्शनार्हं
घ्राणश्रोत्रे रसज्ञाऽप्यवगमयति न द्रव्यमन्यत्त्वबाह्यम् ।
तस्मान्नाध्यक्षवेद्यं वियदिति यदि न प्रत्ययस्यापरोक्ष्यात्
पञ्चीकारेण नैल्यं पटमलिनिमवद्भाषितं वोपकुर्यात् ॥ ४३ ॥

आकाशस्य प्रत्यक्षत्वे परोक्तं बाधकं शङ्कते— रूपेति ॥ नभो न चाक्षुषम्, रूपशून्यद्रव्यत्वात्; नापि स्पार्शनं स्पर्शशून्यद्रव्यत्वादिति हेतुद्वयविभागः। अन्येषां तु बाह्येन्द्रियाणामत्रासंभवमाह—घ्राणेति। घ्राणादीनि हि स्ववेद्यगुणाश्रयमपि नावगमयन्ति, किं पुनर्द्रव्यान्तरमिति भावः। मानसप्रत्यक्षमिह दूरनिरस्तमित्याह—अन्यदिति। तुशब्दोऽत्रात्यन्तासंभवपरः। अबाह्यम् आत्मतद्धर्मव्यतिरिक्तेषु न स्वातन्त्र्येण प्रवर्तत इत्यर्थः। संकलितमाह—तस्मादिति। अस्मदादीति विशेषणीयम्। चोद्यस्य दत्तोत्तरत्वाभिप्रायेण प्रतिवक्ति—नेति। अभिप्रेतं व्यनक्ति—प्रत्ययस्येति।

अयं भावः—न रूपादिविरहाच्चाक्षुषत्वादिहानिः, रूपादिप्रत्यक्ष[त्व]वद्यथादर्शनं व्यवस्थोपपत्तेः। प्रतिप्रयोगश्च—विमतमस्मदादिबाह्येन्द्रियग्राह्यं बाह्यत्वे सत्यस्मदाद्यपरोक्षधीविषयत्वात्, अविगीतवत्। नात्र हेतुरसिद्धः, परिशेषप्राप्तेः। न तावदत्रागमिकी नभःप्रतीतिः, तदनभिज्ञानामपि संभवात्। नाप्यानुमानिकी, सिद्धेऽपि तदनुमाने अनधिगततादृशानुमानानां नभःप्रतीतेः। तदेवमाकाशस्यात्रानुमानादिविषयत्वायोगात् आबालपण्डितमनुभूयमानत्वाच्च तद्बुद्धिरपरोक्षेति सिद्धम्।

नन्वसिद्धस्य सिद्धस्य वा नभसः प्रत्यक्षत्वसाधनम्? नाद्यः, अनुमानकथाबाह्यत्वात्। न द्वितीयः, अनुमानतस्तत्सिद्धेस्त्वदनभ्युपगमात्, प्रत्यक्षतस्तत्सिद्धेरस्मदनभ्युपगमादिति। मैवम्; उभयसंमतादागमतोऽपि तत्सिद्धेः। आस्तामागमः, पृथिव्याद्यतिरिक्तस्य नभःप्रतीतिविषयस्य कस्यचिदुभयसंमत्या पक्षीकारोपपत्तेः। अन्यथा कथम[न्य]त्र त्वदुक्तमप्रत्यक्षत्वानुमानं जीवेत्? सर्वलोकप्रत्यक्षविरुद्धं च तत्। तथाऽपि तत्स्वीकारे बुद्धिव्यतिरिक्तया बाह्यार्थस्सर्वोऽप्यप्रत्यक्ष इति वदन् सौत्रान्तिक एव समर्थः स्यात्। तदेवं नीरूपस्यापि नभसश्चाक्षुषत्वं भाष्ये त्वस्य पञ्चीकरणेन रूपवत्तया चाक्षुषत्वाविरोधवचनं वैभवात् स्यात्। यथा रूपरूपिरूपसमवेतरूपैकार्थसमवेतानां चाक्षुषत्वमविशिष्टमङ्गीक्रियते, तथा रूपिद्रव्यसंवलितस्यापि क्वचित्स्यात्। न चातिप्रसङ्गः, समचर्चत्वात्। न हि रूपिद्रव्यं वा सर्वं चक्षुर्ग्राह्यम्, योग्यतानियमस्य दुर्घट्टत्वादिति। तदेतदभिप्रेत्याह—पञ्चीकारेणेति ॥ ४३ ॥

आनन्द०—आक्षेपसंगतिमाह—आकाशस्येति। नभो न चाक्षुषमिति। लौकिकचाक्षुषधीविषयो नेत्यर्थः। रूपेति—घटरूपादौ व्यभिचारवारणाय विशेषणविशेष्ये। एवमुत्तरत्रापि द्रष्टव्यम्। मनो न बाह्यग्राहकं भवतीत्यभिप्रायेणाह—अबाह्यमिति। ननु मनसः सर्वज्ञानहेतुत्वात् कथं न बाह्यग्राहकत्वमित्यत्राह—स्वातन्त्र्येणेति। इन्द्रियान्तरादिसहकारितां विनेत्यर्थः। संकलितमिति—संगृहीत(मर्थं)मित्यर्थः। योगिप्रत्यक्षवेद्यत्वाद्बाध इत्यत्राह—अस्मदादीति।

ननु प्रत्ययस्यापरोक्ष्यमसिद्धं इन्द्रियग्राह्यत्वसंदेहे हि तस्यापि संदेह एवेति चेत्; तत्राह—अयं भाव इति। विगीतमिति—योगिबाह्येन्द्रियग्राह्यत्वेन (ह्यत्वमादाय) सिद्धसाधनवारणायास्मदादीति। अन्तरिन्द्रियग्राह्यत्वमादाय सिद्धसाधनवारणाय बाह्येति। हेतावप्यात्मादौ व्यभिचारवारणाय बाह्यत्वेति। परमाणौ व्यभिचारवारणाय अस्मदादीति। पारिशेष्यमेवोपपादयति—न तावदित्यादिना। नभःप्रतीतिरपरोक्षा स्मृत्यनुमितिशाब्दान्यत्वे सति प्रतीतित्वात् संप्रतिपन्नवत् इति परिशेषानुमानं द्रष्टव्यम्।

ननु नभः—प्रतीतिसिद्धौ तस्याः पारिशेष्यादापरोक्ष्यं सिध्येत् त(देव नास्ति)स्या एवासिद्धिः, इत्यत्राह—आबालेति। ननु नभसो बहिरिन्द्रिय(बहिः) प्रत्यक्षसाधनं न संभभवती(वति आश्रयासिद्धेरि)त्याशङ्क्ते—नन्विति। आबालपण्डितमनुभूयमानत्वाच्चेति नभस्सि(संभवत्सि)द्धेरुक्तत्वादियं शङ्का न युक्ता, तथाऽपि तत्सिद्धि(प्रमाण)निरूपणे उभयसिद्ध(संमत)प्रमाणसिद्धत्वाभावादाश्रयासिद्धिरि(द्धिमाशङ्कत इ)ति द्रष्टव्यम्।

आस्तामिति। उभयसंमतसिद्धिमत्त्वं पक्षताप्रयोजकम्; न तु उभयसंमतप्रमाणसिद्धत्वमपि, गौरवादिति भावः। प्रतिबन्दिमाह—अन्यथेति। नन्वेवमपि म(त)दुक्तानुमानेन प्रतिरुद्धत्वात् प्रत्यक्षत्वसिद्धिरपि न स्यादित्यत्राह—सर्वलोकेति। तथाच त्वदुक्तस्य बाधितत्वेन न्यूनबलत्वान्न प्रतिपक्षतेति भावः। ननु श्वैत्यानुमानात्पीतप्रत्यक्षबाधवत् सर्वेषामाकाशप्रतीतेरेव बाधोऽस्त्वित्यत्राह—तथाऽपीति। दोषमूलत्वनिर्णयात् पीतप्रत्यक्षं न्यूनबलम्, इह तु न तथा, तथाऽपि बाधोक्तौ सौत्रान्तिकपक्ष एवाङ्गीकर्तुं शक्य इत्यर्थः।

ननु नभसो रूपवत्त्वं भाष्य उक्तं; कथमत्र नीरूपत्वं सिद्धं कृत्वा प्रत्यक्षत्वसाधनम्; अपसिद्धान्तात् इत्यत्राह—भाष्य इति। ननु कथं तस्य वैभवत्वमुक्तम्; पञ्चीकरणेन रूपवत्त्वाद्? इति चेत्; अत्रोक्तं कैश्चित्—'न चक्षुषा सन्मात्रं गृह्यते; तस्य रूपरूपिरूपैकार्थसमवेतपदार्थग्राहित्वात्' इति भाष्ये साक्षाद्रूपाश्रयस्यैव प्रत्यक्षत्वप्रतीतेः; अन्यथा संयुक्ताश्रयत्वादिसंबन्धेन सन्मात्रस्यापि रूपवत्त्वात् तद्भाष्यानुसाराद्वैभवत्वमिति।

अन्येतु—वैभवात्स्यादित्यस्य युक्तिवैभवादित्यर्थः। न च संयुक्ताश्रयत्व-सम्बन्धेन रूपवतो ग्रहे आत्मादेरपि ग्रहप्रसङ्गः; पञ्चीकरणसम्बन्धेन तद्वत्त्वस्य प्रयोजकत्वात्।

यद्वा—पञ्चीकृतभूतव्य(सृ)ष्टयादीनामेव(वा)तत्संबन्धेन तद्वत्त्वप्रयोजक-त्वम्। अत एवान्यरूपमादाय शङ्खस्य पीतप्रत्यक्षविषयत्वम्। न च वायोरपि चाक्षुषत्वप्रसङ्गः; तन्निष्ठरूपस्यानुद्भूतत्वात्। उद्भूतरूपवत एव प्रत्यक्षत्वात्। नचैवमपि 'अद्यजातस्य चक्षुरपि न ह्यरूपं वायुं गृह्णाति' इति प्रमेयसंग्रहे रूपा-भावत्रवचनाद्विरोधः, तस्योद्भूतरूपाभाववत्परत्वादित्याहुः। ननु रूपशून्यस्यान्य-रूपमादाय चाक्षुषत्वेऽतिप्रसङ्ग इत्यत्राह—यथेति। रूपसमवेतं रूपत्वादि। रूपैकार्थसमवेतं—परिमाणादि। समानचर्चत्वमेवाह—न ह्येति यद्यन्यरूपसंवलितस्य कस्यचित् बाह्यप्रत्यक्षत्वमापाद्यते तदा रूपैकार्थसमवायात्परिमाणादेश्चाक्षुषत्ववत् रसगुरुत्वादेरपि चाक्षुषत्वं स्यादित्यतिप्रसङ्गापादनं समानम्, तत्समाधानं च समानमित्यर्थः। योग्यतानियमस्य—प्रत्यक्षयोग्यतानियमस्य। दुर्लङ्घत्वात्—उभयाभ्युपेयत्वात् ॥ ४३ ॥

अक्ष०—अथाकाशस्य प्रत्यक्षत्वे बाधकं शंकते—रूपेति। "नभो न चाक्षुषं रूपशून्यद्रव्यत्वात् नापि स्पार्शनं स्पर्शशून्यद्रव्यत्वात्" इतिप्रयोग-विभागो विवक्षितः। अन्येषामपि बाह्येन्द्रियाणामत्र गमकता न संभवतीत्याह—घ्राणमिति। घ्राणश्रोत्ररसना न द्रव्यग्रहे शक्ता इत्यर्थः। एवं बाह्यप्रत्यक्षे बाधक-मुक्तं मानसे बाधकमाह—अन्यत्त्विति। अन्तरं—मनः अबाह्यं—बाह्यविषयेषु स्वातन्त्र्येण न प्रवर्तत इति भावः। अतोऽस्मदीयप्रत्यक्षावेद्यमित्याह—तस्मादिति। परिहृति—नेति। नीलं नभः पश्यामीत्यपरोक्षप्रत्ययसत्वात् तेन उक्तानुमानस्य न चाक्षुषमित्यस्य बाध इति भावः। रूपरहितत्वेऽपि रूपवदेवास्य नभसोऽपि प्रत्यक्षत्वं नानुपपन्नमिति भावः। नचातिप्रसंगः यथादर्शनं व्यवस्थोपपत्तेः। अन्यथा रूपैकार्थसमवायेन संख्यादेरिव रसादेरपि चाक्षुषत्वापत्तेरनिवार्यत्वात्। एवं नभसो नीरूपत्वाभ्युपगमेऽपि प्रत्क्षत्वमुपपादितं अथ रूपवत्त्वमप्यस्तीत्याह—पञ्चीकारेणेति। पञ्चीकृते नभसि पृथिव्यंशस्य नीलरूपवत्वात् तत्संसर्गेण तद्रूप-रहितांशस्यापि प्रत्यक्षे दृष्टान्तमाह—पटमलिनिमवदिति। शुद्धस्यापि पटस्य नीलरूपवन्नीली संसर्गेण नीलः पटः इति प्रतीतिवत् "नीलं नभः" इति प्रत्ययः नीलरूपवत्पृथिवीसंवन्धेन स्यादिति श्रीभाष्ये साधितम् प्रत्यक्षत्वमिति संसर्ग-द्रव्यगतं रूपं स्वाश्रय संयुक्तद्रव्यप्रत्यक्षेऽप्युपकरोतीति भावः ॥४३॥

इत्याकाशस्यास्मदादिप्रत्यक्षत्वम्

शब्दस्याधारभूतं कथमपि गगनं शक्यते नानुमातुं
स्वेच्छातः पारिशेष्यक्रम इह कथितोऽतिप्रसङ्गादिदुःस्थः ।
निष्क्रान्त्यादेर्न तद्धीस्सति नभसि यतो नास्ति कुड्यादिकेऽसौ
रोधस्त्वावारकंश्चेत्तदभवनवशान्निष्क्रमादिश्च सिध्येत् ॥४४॥

सर्वा०—अथाकाशस्यानुमानतस्सिद्धिं निराकरोति—शब्दस्येति ॥ शब्दः क्वचिदाश्रितो गुणत्वादित्येतावता तावन्न पृथिव्याद्यतिरिक्तशब्दाश्रयसिद्धिः; सर्वस्य किंचिद्भावात् परिशेषहेतूनां तु विपक्षे बाधकाभावात् । न हि शब्दस्य पृथिव्याद्याश्रितत्वे किंचिदनिष्टं स्यात्; पुष्पादिगन्ध इतिवद्भेर्यादिशब्द इति सर्वलोकबुद्ध्यनुविधाने कल्पना च लघ्वी । शब्दो विभुगुणो न भवति, बाह्यचे- न्द्रियग्राह्यगुणत्वादिति विपरीतपरिशेषस्यापि सुशकत्वात् । स्पर्शो न पृथिव्या- दिधर्मः, नीरूपेन्द्रियग्राह्यत्वादिभिः पृथिव्याद्यतिरिक्तस्पर्शाधारकल्पनप्रसङ्गाच्च । तदेतदभिप्रेत्याह--स्वेच्छात इति । आदिशब्देन विपरीतप्रसङ्गसंग्रहः । निष्क्रमणं प्रवेशनमित्याकाशलिङ्गमिति परोक्तं—निष्क्रान्त्यादेरिति उपपादयति— सतीति । यत्राकाशस्तत्र सर्वत्र निष्क्रमणादिकं न सिध्यति, आकाशव्याप्ते कुड्यादौ निष्क्रमणादेरशक्यत्वात् । न च कुड्यादिष्वाकाशो नास्तीति वाच्यम्; तस्य सच्छिद्र[त्वाभाव]त्वप्रसङ्गादिति भावः । सहकारिवैकल्यात्कुड्यादिषु निष्क्रमणादिकार्यप्रतिरोध इति शङ्कते—रोध इति । तुशब्दः केवलाकाशाद्विशेष- द्योतकः । एवं सति निष्क्रमणादेरन्यथासिद्ध्या निर्मूलं नभः कल्पनमित्यभिप्राये- णाह—तदभवनेति । न हि निष्क्रमणादेराकाशं समवायि; देहादिक्रियाया नभो- निष्ठत्वाभावात् । नाप्यसमवायि; द्रव्यस्य तथाऽनभ्युपगमात्, समवायिकारण- प्रत्यासन्नत्वायोगाच्च । निमित्तं तु ईश्वराद्यतिरिक्तपूर्वमिह नापेक्ष्यमिति भावः ॥ ४४ ॥

आनन्द०—प्रासङ्गिकीं सङ्गतिमाह—आकाशस्येति । सर्वस्य किञ्चिद्भावा- दिति । शब्दः क्वचिदाश्रित इत्यत्र किंशब्दार्थत्वादित्यर्थः । परिशेषेति । शब्दः पृथिव्याद्याश्रितो न भवति श्रोत्रग्राह्यगुणत्वात् इत्यादिपरिशेषाणामित्यर्थः । विपक्षे बाधकाभावमेवाह—न हीति । पृथिव्याद्यनाश्रितत्वसाधने सर्वलोकप्रतीति- मप्याह—पुष्पादीति । तथाच लोकप्रतीतिबाधकल्पनाभावाल्लाघवं चेत्यर्थः । परिशेषानुमाने प्रतिपक्षमप्याह—शब्द इति । ज्ञाने व्यभिचारवारणाय बाह्येति, गुणत्वादिति जातौ व्यभिचारवारणायेति प्रयोजनं द्रष्टव्यम् । आभासयोगक्षेमता मप्याह--स्पर्श इति । रूपादौ व्यभिचारवारणाय नीरूपेति । नीरूप(परामर्श) शब्दात्मादिग्राह्यतया व्यभिचारवारणायेन्द्रियेति । ननु मनसा आत्मनिष्ठसत्ता (द्रव्यत्वादि) समवायादिग्रहणात् त्वगिन्द्रियेण घटत्वादिजातिपरिमाणग्रहणाद्व्य- भिचार इति चेन्न; नीरूपेन्द्रियग्राह्यविशेषगुणत्वादित्यर्थत्वात् । आदिशब्देन

रसगन्धौ न पृथिवीजलाश्रितौ द्रव्यग्राहकेन्द्रियग्राह्यगुणत्वात् अचक्षुरिन्द्रियग्राह्यत्वात् शब्दवत् रूपं न पृथिव्याद्याश्रितं द्रव्यग्राहकेन्द्रियग्राह्यविशेषगुणत्वात् ज्ञानवत् इत्यादयो गृह्यन्ते । तदेतदभिप्रेत्याह स्वेच्छात इति । विपरीतप्रसङ्गेति । शब्दो विभुधर्मो न भवतीति प्रागुक्त इत्यर्थः ।

यद्वा शब्दः पृथिव्यादिचतुष्टयान्यतमाश्रयः बाह्येन्द्रियग्राह्यविशेषगुणत्वात् बहिरिन्द्रियव्यवस्थापकगुणत्वात् इत्यादिप्रसङ्गः । निष्क्रमणमित्यादि । एतत्सूत्रेण गौतमोक्तमित्यर्थः । सच्छिद्रत्वेति—तथा च तस्याकाशस्य सरन्ध्रतया सावयवत्वानित्यत्वादिकं स्यादित्यपसिद्धान्त इत्यर्थः । सच्छिद्रत्वाभावप्रसङ्गादिति क्वचित्पाठः । तदा तस्य सरन्ध्रकुडयादेराकाशात्मकच्छिद्रवत्त्वं न स्यादित्यर्थः । सहकारीति । कुडयस्य प्रतिबन्धकतया तदभावोऽपि कारणमित्यर्थः । अन्यथासिद्धयेति । अपेक्षणीयकुडयाभावेनेत्यर्थः । (ननु)कुडयाद्यभावस्य निमित्तत्वेऽपि समवायादिसापेक्षतया तत्सिद्धिरित्यत्राह—न हीति । अथवा तदेवोपपादयति—न हीति ॥ ४४ ॥

अक्ष०—अथाकाशस्यानुमानतस्सिद्धिर्न भवतीत्याह—शब्दस्येति । शब्दः क्वचिदाश्रितः गुणत्वादित्यनुमानेन न पृथिव्याद्यतिरिक्ताकाशसिद्धिस्स्यात्परोक्तानां परिशेषानुमानानां विपक्षे बाधकतर्काभावेनाप्रयोजकत्वात् । प्रयोजकत्वोपगमेऽतिप्रसङ्गमाह—स्वेच्छात इति । शब्दो विभुगुणो न भवति बाह्येन्द्रियगुणत्वात् रूपादिवदिति विपरीतपरिशेषस्यापि प्रसङ्गात् ।

"निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्ग"मिति परोक्तं प्रत्याह—निष्क्रान्त्यादेरिति । आकाशस्य व्यभिचारान्निष्क्रमणकारणत्वाभावेन निष्क्रमणकार्येण तदनुमानं न भवतीति भावः । कुत्र व्यभिचार इत्यत्राह—कुड्यादिक इति । तत्र—आवारकैः । रोधः—प्रतिबन्धः क्रियते तदभावरूपकारणान्तराभावात् न निष्क्रमणमिति चेत् तर्हि आवरणाभाव [एक]एव निष्क्रमण कारणमस्तु किं गगनेन तत्कारणतया कल्पितेनेत्याह तदभवनेति । आवरणाभावेत्यर्थः । निष्क्रमादिरित्यादिना प्रवेशपरिग्रहः । सिद्धयेदिति । न तदतिरिक्तं गगनमपेक्षेतेति भावः । तस्मादनुमानतः गगनसाधनमशक्यमिति सिद्धम् ॥ ४४ ॥

इत्याकाशानुमेयत्वभङ्गः

यत्त्राकाशोऽवकाशप्रद इति कथितं शास्त्रतस्तत्रयाऽसा-
वन्योयं स्पर्शभाजां विहतिरिह न सा प्राच्यतत्त्वेष्विव स्यात् ।
इत्यैदंपर्यमूह्यं न यदि कथमिवान्येषु लभ्योऽवकाशः
सिद्धादेः स्वप्रभादाऽज्जल इव कथितो युज्यते मज्जनादिः ॥४५॥

सर्वा०—ननु शरीरादिष्वाकाशोऽवकाशदानेनोपकरोतीति तत्तच्छास्त्रसिद्धम्;

अतोऽस्य निष्क्रमणादिलिङ्गत्वं ग्राह्यम्। तदिदमनुभाषते यस्त्विति ।। शास्त्राभिप्रेतमस्योपकारकत्वं शिक्षयति—तत्रेति। पृथिव्यादिचतुष्कस्येव स्पर्शवत्प्रतिघातित्वमाकाशस्य नास्ति; तत्पूर्वेषामिवाहङ्कारादितत्त्वानाम्। अतः प्राणिसञ्चारादिप्रतिघातकत्वाभावादस्योपकारकत्वकथनमिति तात्पर्यं निपुणनिरूपणीयम्। न ह्याकाशेन देयमवकाशाख्यं द्रव्यान्तरमस्तीति भावः। आकाश एव तर्ह्यवकाशः स्यादित्यत्राह—न यदीति। अस्पर्शत्वाविशेषान्महदादिप्रदेशानामप्यवकाशत्वं ग्राह्यम्। ननु स्पर्शवतां मिथःप्रतिघातकत्वनियमो नास्ति, भूमावुन्मज्जति निमज्जतीत्यादिसिद्धप्रतिपादनादित्यत्राह—सिद्धादेरिति। अनेन जन्मौषधिमन्त्रतपस्समाधिभूतसिद्धिमतां तत्तदुपष्टब्धानां च संग्रहः। जलदृष्टान्तेन विभज्य प्रवेशनं पुनश्शीघ्रसंभेदश्च सूच्यते। केचित्तु-सिद्धादीनां प्रभावविशेषेण भूम्यादिषु प्रवेशप्रतिघात एव नास्तीति मन्यन्ते काचादिषु नीरन्ध्रेषु नयनप्रभादेरिवेति ।।४५।।

आनन्द०—पूर्वाक्षेपेण संगतिमाह—नन्विति। शास्त्रेति।

शरीरेष्ववकाशं च नभः कुर्यात्तथा परः।

इति शास्त्रसिद्धमित्यर्थः। अतोऽस्य निष्क्रमणादीति। (ननु) आकाशस्य शास्त्रसिद्धत्वात् कथं निष्क्रमणादिलिङ्गत्वमिति चेत्; न; निष्क्रमणादिलिङ्गत्वं निष्क्रमणादिकारणत्वमेवेत्यर्थः। पृथिव्यादीति। तथा च प्रतिघातकत्वाभावमात्रान्न तद्धेतुत्वमित्यर्थः। नन्ववकाशाख्यस्य कस्यचिद्द्रव्यस्य तद्धेतुत्वे तद्द्वारा तद्धेतुत्वमाकाशस्यास्तु इत्यत्राह न ह्याकाशेनेति। नन्ववकाश इत्याकाशादिदेयद्रव्यान्तरं माऽस्तु, तथाऽपि तस्य निष्क्रमणादिहेतुत्वमवश्यं वाच्यम्। तथाच आकाश एवावकाशोऽस्तु, तथा (एवं)च आकाशस्य निष्क्रमणलिङ्गकत्वं युक्तमित्यत्राह—आकाश एव तर्हीति। आकाशाभावस्थलेऽप्यवकाशसत्त्वान्नाकाशस्यावकाशत्वम्। अप्रतिघातकत्वमात्रेणाकाशस्य तत्त्वे महदादीनामपि तथात्वात्तत्त्वप्रसङ्गादि(ङ्ग इ)ति भावः। ननु--

सिद्धयोगस्तदा(था)भूमावुन्मज्जति निमज्जति।

इति योगरहस्यादावुक्तेः स्पर्शवद्द्रव्यस्यापि प्रतिघातकत्वनियमो नास्ती त्याशङ्क्य परिहरति--ननु स्पर्शवतामिति। तदुपष्टब्धानामिति। तादृशोपष्टम्भवतां (दृगौषधवतां) तदनुगृहीतानां चेत्यर्थः। विभागसम्भेदौ विनैव विवक्षा)न्तरमाह—केचित्त्विति ।। ४५ ।।

अक्ष०—यदुक्तं निष्क्रमणादिकारणत्वमाकाशस्य नेतितदयुक्तं "आकाशोऽवकाशप्रद" इति शास्त्रेणैव तदभिधानादित्याक्षेपमनुवदति—यत्त्विति। अवकाशः निष्क्रमणानुगुणः प्रदेशः। शास्त्रतः। "शरीरेष्ववकाशश्च। नभः कुर्या"

दित्यादितः । इममाक्षेपं परिहर्तुं तस्य शास्त्रस्य आन्यपर्यमाह—तत्रेति । स्पर्शवतां पृथिव्यादीना मन्योन्यं या प्रतिहतिः सा । इह—आकाशे नास्ति । स्पर्शरहितत्वात् । प्राच्यतत्त्वेषु—महदादिष्विव इत्यैदम्पर्यं—तात्पर्यमूह्यम् । तेन द्रव्यान्तरप्रतिघातकं न भवतीत्युक्तम् भवति नतु निष्क्रमणाद्यनुगुणप्रदेशजनकमिति ।

प्रतिघातकत्वाभावश्च महदादीनामस्पर्शवतामपि साधारणः नत्वाकाशासाधारणः । तथाऽनभ्युपगमे महदादीनामप्यन्योन्यमप्रतिघातकत्वं कथमुपपद्येत् तत्राकाशाभावादित्यत्राह—न यदीत्यादिना । अन्येषु—महदादिषु । तेषु प्रतिघात प्रयोजिकायाः स्पर्शवत्तायां अभावेन स्वतस्सिद्धः प्रतिघाताभावरूपावकाशः कथमेवं सत्युपपद्येतेति भावः ।

ननु स्पर्शवत्तायाः प्रतिघातप्रयोजकत्वे स्पर्शवति भूम्यादौ सिद्धादेः कथं मज्जनोन्मज्जनव्यवहारस्संगच्छत इत्यत्राह—सिद्धादेरिति । अनेन जन्मतः मन्त्रौषधितपस्समाधिभिर्वा भूतसिद्धिमतां सर्वेषामपि संग्रहः । स्वप्रभाववदिति—सिद्धादीनां मन्त्राद्यधिगतमाहात्म्यात् स्पर्शवन्त्यपिभूतानि न प्रतिघातकानि भवन्ति । तेषां विषये जलादिवत् विभज्य प्रवेशयोग्यानिभूत्वा पुनः पूर्ववत् संगतानि भवन्तीत्यर्थः ॥ ४५ ॥

इत्यवकाशनिरूपणम् ।

सद्रूपेणैव भानान्न भवति वरणाभावमात्रं विहायः
संसर्गाभावमात्रं न च भवति यतो नास्ति संसर्गिबोधः ।
अत्यन्ताभावनाशावजननिरपि वा सत्सु तेष्वेव न स्यु-
स्तादात्म्याभावसिद्धिः कथ[मिव]मपि च भवेत्तंतमर्थं विहाय ॥४६॥

सर्वा०—अत्र केचिच्चार्वाकास्सौगताश्च प्राहुः—*चत्वार्येव भूतानि । आकाशस्त्वावरणाभाव एव । स निस्स्वभावः । तुच्छतयैवोपलम्भात् । यत्र चावरणं न तत्राकाशः । अभित्त्वा दुर्दर्शत्वात् भेदे त्वावरणाभावस्यैव सिद्धेः । यदि तत्राकाशः स्यात् निरवकाशं न किंचित्स्यात् । अतो घटतदभावन्यायादावरणेष्वसत्त्वादयमावरणाभावः । तदिह शून्यधातुसंज्ञिते च निस्तत्त्वेऽप्यावरणाभावे खपुष्पादिषु तत्तच्छब्द[ादि]वन्मिथ्याजले मृगतृष्णिकादिशब्दवच्च व्यामोहैकनिबन्धना व्योमादिशब्दाः । अत्र ननुपश्लेषाभावादसद्रूपतातिरस्कारः । अत्र च तलत्वविपुलत्वमलिनत्वादिकमध्यासमन्तरेण न कथंचिदप्युपपद्यते । प्रतियोगिगतानां च स्मर्यमाणानां गृह्यमाणेऽस्मिन्नध्यासः । अस्ति चासौ सिद्धः; दुःखाभावे सुखाभिमानात्, आलोकाभावे च नीलत्वबहलत्वाद्यध्यासस्य वैशेषिकादिभिरङ्गीकारात्, शशशृङ्गं तीक्ष्णमित्यादिशब्दजन्याध्यासदृष्टेश्च । वदन्ति च शब्दज्ञानानुपातो वस्तुशून्यो

विकल्प इति; एष वन्ध्यासुतो यातीत्यादिषु । अतो नास्त्येव नभ इति । तत्राह—सद्रूपेणेति ॥

अयं भावः—सर्वं हि वस्तुजातं संविद्व्यवस्थाप्यम्, संविद्यते च भावरूपतयैव नभः, भावान्तरमेवाभाव इति स्थापयिष्यते । अन्यथाऽपि ब्रूमः—नाभावस्य निस्स्वभावता, अभावस्वभावतयैव तत्सिद्धेः । स्वान्यस्वभावतया सिद्धिस्तु न कस्यापि । न च स्वेन स्वभावेन सिद्धस्य परस्वभावविरहादसत्त्वम्, अतिप्रसङ्गात् । उक्तं च न्यायभाष्ये—*असच्चासदिति गृह्यमाणं तथाभूतं विद्यमानमविपरीतं च तत्त्वमिति । तुच्छतयैवोपलब्ध्याऽपि निरस्तं निस्स्वभावत्वम् । तुच्छता ह्यभावप्रतियोगित्वम्, अभावत्वम्, वस्त्वन्तरशून्यत्वम्, अन्यद्वा किंचिद् ? न प्रथमः, स्वकालादिषु सतामभावप्रतियोगिनां यथाप्रमाणं तत्तत्स्वभावविशिष्टत्वात् । न द्वितीयः, दत्तोत्तरत्वात् । न तृतीयः, ईदृशतुच्छत्वस्य स्वरूपाविरोधिनस्सर्वत्र सुलभत्वात् । न चतुर्थः, अस्मन्मतविरोधिनस्त्वदिष्टस्य कस्यचित्कुतश्चिदत्रासिद्धेरिति ।

यत्त्वावरणेष्वाकाशो नास्तीति, तदसत्, त्वदुक्तयुक्त्यैव तत्सिद्धेः । अभित्त्वा दुर्दर्शत्वं हि व्यवहितत्वात् । अत एव तत्र नास्तीति न निश्चाय्यम् । भित्त्वा तु प्रेक्षणे नभस्तत्र दृश्यत एव । न चात्रावरणाभावमात्रोपलम्भः, इहावरणं नास्तीति साधिकरणस्य तस्योपलम्भात्; इहाकाश इतिवत्स्वात्मन्येव भेदोपचारात्स्यादिति चेन्न; बाधकाभावात् । अधिकरणानवस्थाप्रसङ्गो बाधक इति चेन्न; आकाशादेस्साधिकरणतयैवोपलम्भ इत्यनभ्युपगमात् । इहाकाश इतिवदित्यत्र चाकाशशब्देनावरणाभावविवक्षायां पक्षदृष्टान्तभेदाभावः, त्वदनभ्युपगतस्य परमसिद्धस्य त्वया दृष्टान्तीकर्तुमयुक्तत्वात् । प्रतिबन्दिग्रहणमात्रमिदमिति चेन्न; इह मूर्ते वस्तुनि आकाशसंबन्ध इति प्रतीतौ विरोधाभावात् । आवरणाभावधीरपि तथैव स्यादिति चेत्, अस्त्वेवम्; तथाऽपि कदाचिदिह तारकेत्यादिवन्निरधिकरणतया गगनोपलम्भे तदतिरिक्तनभस्सिद्धिनिषेधः । आवरणेषु निरवकाशत्वं च विशेषणराहित्यात्, आवरणरहितमेव ह्याकाशमन्यद्वा किंचिदवकाशः, न त्वाकाशमात्रम् । आवरणेष्वविद्यमानतया तदभाव आकाश इति चायुक्तम्; सर्वेषां स्वस्मिन्नविद्यमानतया स्वाभावत्वप्रसङ्गात् ।

यत्तु व्योमादिशब्दा व्यामोहैकनिबन्धना इति, तदसत्; प्रमाणसिद्धे क्वचिद्वस्तुन्येव सर्वशब्दानां व्युत्पत्तेः, तद्विषयतयैव च व्यवहारात्; खपुष्पादिषु त्वयोग्यसमभिव्याहारादन्यथाधीः । मृगतृष्णादिशब्दा अपि जलाध्यासादिकरणार्हमरीचिव्यूहादिविषयाः । यद्यपि तलत्वादिकमाकाशेऽध्यस्तम्, अल्पत्वविपुलत्वादिकं त्ववच्छेदकभेदायत्तम्, तथाऽपि सत्येवारोपः ।

यत्त्वसति दुःखाभावे सुखाध्यासो दृष्ट इति, तदर्भकवाक्यम्; सत्येव दुःखाभावे सुखारोपात् । अभावस्य भावान्यत्वमात्रमेव ह्यसत्त्वं सिद्धम्; तेन च स्वरूप-

सन्निवासौ। आलोकाभावे नीलत्वाध्यासस्त्वस्मान् प्रति नोदाहर्तव्यः। अत एवाध्यस्तनैल्यमालोकाभावमात्रमेव नीलं नभ इति भातीति निरस्तम्; आलोकदेशे च नभःप्रतीत्यनुवृत्तेः।

नन्वस्मदिष्टक्षणिकत्वादिकं क्वचित्ते सिद्धमसिद्धं वा? उभयथाऽपि कथं तत्प्रतिक्षेपः? कथं वा तस्मिन् केषां चित्सत्यताभ्रमं निर्वक्ष्यसि? इत्थम्—एतदुत्तरक्षणवृत्तित्वाभावो हि यत्र क्वचिदन्यत्र सिद्धः, स सर्वस्मिन् कुतश्चिदारोप्यते प्रतिक्षिप्यते चेति सुस्थमेतत्। एवमन्यत्सर्वमपि चिन्त्यम्।

शशशृङ्गं तीक्ष्णमित्यादिषु च प्रमिते शशादौ शृङ्गवत्त्वारोपः, शृङ्गादौ च प्रमिते सत्याऽसत्या वा तीक्ष्णधीः इत्येतावत्सहृदयहृदयारूढम्; नात्रासति किंचिदारोप्यते। एवमनभ्युपगमे वर्णक्रमनिर्देशवत्स्यात्। एतेन शशस्तीक्ष्णशृङ्गवानित्यपि निरूढम्। भूतेषु भाविषु च कथं भ्रम इति चेत् कथं वर्तमानेषु? तेषां सत्त्वादिति चेन्न; स्वकालसत्त्वस्य कालान्तरासत्त्वस्य च साधारणत्वात् इति।

आवरणाभावश्च सत्योऽसत्यो वा संसर्गाभावादिविभागे नातिक्रामेदिति मत्वा तत्रतत्र दूषणमाह —संसर्गेत्यादिना पद्यशेषेण। संसर्गाभावस्तावन्निरूप्यमाणः संसर्गिनिरूप्यसंसर्गप्रतियोगिकतयाऽधिकरणप्रतियोगिभूतसंसर्गिबोधाभावे कथं बुध्येत्? अत्यन्ताभावोऽपि संसर्गाभावभेद एव। यथा अश्वे गोत्वस्य शशे वा शृङ्गस्य। तथा च अत्रावरणं नास्तीति साधिकरणभूताभावधीरनिवार्या। खपुष्पवदावरणानामत्यन्तासत्त्वे तु शून्यवादश्शरणम्। वर्तमानेषु चावरणेषु तत्प्रध्वंसप्रागभावौ दुर्वचौ। तौ हि किमन्यत्र विद्यमानानाम्? उताविद्यमानानाम्? नाद्यः, तेषां तदुभयायोगात्। न द्वितीयः, तत एव; न हि शशे शृङ्गस्य नाशप्रागभावौ। तदिह सर्वावरणनाशादिकं दुर्वचम्; असंभवात्। कतिपयावरणनाशादिकं चावरणदेशेऽप्यस्तीति तत्रापि निष्क्रमणादिप्रसङ्गः।

ननु संसर्गे तु विधिरेकेनापि, तन्निषेधस्तु सर्वप्रतियोगिकः। तद्वदत्रापि सर्वावरणाभावे व्योमधीः स्यात्। न, असंभवस्योक्तत्वात्। एवं सति च संसर्गाभाव एव नामान्तरेणोच्यते; तत्र च दत्तमेवोत्तरम्। अस्तु तर्ह्यावरणतादात्म्याभावोऽसौ स्यात्। स ह्यसिद्धप्रतियोगिकतया स्वयमप्यसिद्धः। तदात्मनश्चाकाशस्य तुच्छत्वं युक्तमिति। तत्राह—तादात्म्येति। चो दूष्यसमुच्चये; श्रुत्यादिविरोधरूपदूषणसमुच्चये वा। असिद्धप्रतियोगिकत्वमस्य क्वचिदपि तादात्म्यपदार्थाभावाद्वा? आवरणद्वयस्य तदभावाद्वा? नाद्यः, अभावप्रतियोगित्वेन तत्कल्पनस्यासिद्धिप्रसङ्गात्। न हि क्वचित्सिद्धिमनपे[क्ष्य]क्षकस्य क्वचिदपि कल्पना, माध्यमिकमतोत्थानप्रसङ्गात्। नोत्तरः, संसर्गाभावस्याप्यसिद्धप्रतियोगिकत्वापातात्; न ह्येतत्कालीनैतद्भूतलघटसंसर्गो निषिध्यमान इहान्यत्र च सिद्धः। घटसंसर्गमात्रं

यत्रक्वचिदसिद्धमिति चेत्, घटतादात्म्यमपि तथैव। अस्तु तर्ह्युभयत्राप्यसिद्धप्रतियोगिकत्वम्; किं नश्छिन्नमिति चेन्न; अतिप्रसङ्गस्योक्तत्वात्। अत्यन्ताभावोऽप्यसिद्धप्रतियोगिक इति पक्षश्च निरस्तः।

तत्रतत्र स्वतादात्म्यं सिद्धमन्यत्र कल्प्यते।
बाधकैः क्षिप्यते चेति नास्माकमिह विप्लवः॥

सर्वत्र तादात्म्याभावस्तत्तद्वस्तुनिष्ठतयैव सिध्येत्; न तु तन्मध्यादिदेशतया। यथा मिथस्संयुक्ते वियुक्ते वा सिंहे गजान्यत्वं गजे च सिंहान्यत्वमिति। इदमावरणं न भवतीति तादात्म्यनिषेधश्च कस्यचिदावरणस्य वा? अनावरणस्य वा? आद्ये विरोधः। आवरणान्तरं न भवतीति विवक्षायामविरोध इति चेत्; सत्यम्, तथाऽपि न तत्राकाशप्रतीतिविषयावरणाभावसिद्धिः। द्वितीये त्वावरणान्यद्रव्यमिदङ्कारास्पदं सिध्यत्येव। नन्वावरणाभाव एवेदंकारगृहीतः आवरणतादात्म्याभावाधिकरणतया बुध्यताम्, न हि तत्तदभावयोस्तादात्म्यमिति। मैवम्; न ह्यावरणतादात्म्याभावस्यावरणान्यत्वं बुध्वा कश्चित्तत्र नभःपर्यायान्प्रयुङ्क्ते, निष्क्रमणादौ वा प्रयतत इत्यलमतिविस्तरेण। *आकाशे चाविशेषादिति सूत्रभाष्ये चैतत्सर्वमनुसन्धेयमिति॥ ४६॥

आनन्द०—आक्षेपसंगतिं दर्शयति—अत्र केचिदिति। तुच्छतयेति। शून्यतयेत्यर्थः। आवरणाभावत्वे युक्तिमाह—यथावरणमिति। अभित्त्वेति। आवरणे सत्यनुपलम्भादावरणाभावस्यैवावकाशत्वादिति भावः। घटतदभावन्यायादिति। विरोधित्वादपि आकाशावरणयोर्भावाभावरूपतेत्यर्थः। नन्वाकाशस्य शून्यत्वे तत्राकाशादिशब्दानां व्युत्पत्तिग्रहो न स्यात्, सर्वत्र सत्ये(सत्य ए)व व्युत्पत्तिग्रह इत्यत्राह—तदिहेति। भ्रान्तिसिद्धेषु खपुष्पादिशब्दव्युत्पत्तिग्रहवत् भ्रान्तिसिद्धे तस्मिन् तच्छब्दस्य तद्ग्रह इत्यर्थः। नन्वारणाभावरूपत्वमेवाशङ्कितम्, न च तथात्वे तुच्छता, घटाभावस्य तुच्छत्वाभावात् तुच्छत्वे च सप्रतियोगिकत्वायोगा(त्वाभावा)दिति चेन्न, तन्मते चतुर्धातुव्यतिरिक्तस्य तुच्छत्वात्। आवरणाभावत्वोक्तिः तस्य भावत्वनिरा(निरासार्था)सपरा, न तु नैयायिकादिवत्पारमार्थिकाभावपरा। तुच्छत्वे च "प्रतियोगिकत्वमविरुद्धम्। असतोऽत्यन्ताभाव इति मते तुच्छस्याभावप्रतियोगित्ववत् केवलान्वय्यभाववच्चे(वदि)ति ध्येयम्।

ननु तर्हि अभावरूपतया पदात्प्रतीतिस्स्यादित्यत्राह—अत्रेति सद्रूपताभ्रान्तिरित्यर्थः। नञ एवासत्त्वबोधकत्वादिति भावः। नन्वारोपे बाधनियमात् तदभावे कथमारोपरूपत्व(रूपवत्त्व)मित्यत्राह—तलत्वविपुलत्वादिकमिति। प्रत्यक्षबाधाभावेऽपि यौक्तिकबाधोऽस्त्येवेति भावः। नन्वभावे(नभसि) कथं भावधर्माध्यास इत्यत्राह—अस्ति चासाविति वदन्तीति। बौद्धा इति शेषः। शब्दज्ञानानुपाती—

शब्दज्ञानस्य शब्दश्रवणस्य आनुपाती अनन्तरभावी—वस्तुशून्यः—शून्यवस्तु-विषयकः—विकल्पः सविकल्पक इत्यर्थः। 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' एष इति। आदिशब्देन 'शशशृङ्गधनुर्धरः' इत्यादिवाक्यशेषसंग्रहः। ननु नत्रुपश्लेषाभावमात्रेण सद्रूपेण प्रतीतावपि तलत्वादिवत् शशशृङ्गादिवच्च तुच्छता स्यादित्युक्तस्य नोत्तरमित्यत्राह—अयं भाव इति। ननु भावरूपत्वाभावात्तद्रूपतया भानं भ्रम इति चेत्; तत्राह—भावान्तरमिति। तथाच अभावत्वे (बुद्धे)ऽपि भावत्वबुद्धेर्न भ्रमत्वमिति भावः। अन्यथाऽपीति—भावादभावस्यान्यत्वेऽपीत्यर्थः।

यदुक्तमाकाशस्यावरणाभावत्वान्निस्स्वभावत्वमिति; तदयुक्तमित्यत्राह—नाभावस्येति। नन्वभाव (स्वभाव)त्वेपि भावस्वभावत्वाभावान्निस्स्वभावतेति चेत्; तत्राह—स्वान्येति। घटादीनामपि स्वान्यपटादिस्वभावत्वाभावान्निस्स्वभावतापात इति भावः। असच्चेति। अभावत्वेन गृह्यमाणं तथाभूतं अविपरीतं च तत्त्वं तादृशस्वभावं वस्तु न निस्स्वभावमित्यर्थः। तत्र किं तुच्छमेव निस्स्वभावत्वम् उत तदन्यन्निस्स्वभावत्वम्, इति विकल्पे प्रथमस्य सिद्धसाधनग्रासात् द्वितीयं विकल्प्य प्रथमं दूषयति—न प्रथम इति। स्वकालादिषु तत्तत्स्वभाववदभावप्रतियोगिषु व्यभिचार इति भावः। दत्तोत्तरत्वादिति। अभावस्वभावतयैवेत्यनेनेत्यर्थः। ईदृशेति। सिद्धसाधनमिति भावः। न चतुर्थ इति। (तत्)किमस्मन्मताविरोधि उताविरोधि, इति विकल्पमभिप्रेत्य आद्ये तन्न बाधकमिति, द्वितीये(त्व) सिद्धिः, तादृशस्य त्वदिष्टस्य निस्स्वभावत्वसाधकस्य कस्यचित् तुच्छपदा(शब्दा)ख्यस्य कुतश्चिदपि प्रमाणादसिद्धेरित्यर्थः।

यत्तु—आकाशस्यावरणाभावत्वसाधनार्थं उपलम्भानुपलम्भोप(सदनं)न्यसनम्; तद्दूषयितुमनुभाषते—यस्त्विति। तत्सिद्धिमेवोपपादयति—अभित्त्वेति। नन्वभावेऽपि दुर्दर्शत्वमुपपद्यत इति कथं तस्य साधन(क)त्वम्? इत्यत्राह—अत एवेति। कुड्यादौ दुर्दर्शदशायामाकाशमत्रास्ति न वेति सन्देहस्य दर्शनादभावत्वे प्रतियोगिनिश्चयेन सन्देहो न स्यादिति भावः। तथा च आकाशो नावरणाभावः आवरणवत्तया निश्चयसमानकालीनतदधिकरणधर्मिकसंशयविषयत्वात्; यत् यद्वत्तया निर्णयसमकालीनतदधिकरणसंशयविषयः स न तदभावः यथा रूपस्य रस इत्यनुमानमावरणाभावस्य आकाशाभावाद्भेदे प्रमाणमिति ध्येयम्।

प्रत्यक्षमपि प्रमाणयति—नभस्तत्रेत्यादिना। अन्यथासिद्धिमाशङ्कते—इहाकाश इति। बाधकाभावादिति—अन्यथा भूतले घट इत्यादावुप(वप्युप)चारप्रसङ्ग इति भावः। अधिकरणानवस्थेति—तथा सति आकाशस्याप्यधिकरणं तस्याप्यधिकरणान्तरं तस्यापीत्यनवस्थेत्यर्थः। ननु मास्तु साधिकरणतयोपलम्भनियमः; साधिकरणतयोपलम्भमात्रमधिकरणसाधकं स्यात्; नच नियमोऽपि

साधककोटौ प्रविष्टोऽप्रयोजकत्वात्; अन्यथा घटादीनामप्यधिकरणासिद्धिप्रसङ्गात् इति चेत्;

अत्राहुः—इहाकाश इति व्यपदेशमात्रमुपदेशमात्रादपि भवति: नचावरणाभावादपि तथा; अभावस्याधिकरणसापेक्षत्वात् तत्र नोपचारः। किञ्चाभावप्रतीतावधिकरणप्रतीतिरङ्गम्; तथाच अभावात्पूर्वमेव प्रतीयमानस्याधिकरणस्य नाभावतादात्म्यमिति तत्र प्रतीतिर्भेदसाधिकैवेति नोपचार इति।

अन्ये तु—इहाकाश इति बुद्धिराकाशैकदेशाधिकरणिका सामान्यविशेषाकारेण तत्तदधिकरणिका वा (न) निर्वोढुं (ढुम) शक्येति सम्भावितान्यथासिद्धिकतया नाधिकरणान्तरसाधिका। इहावरणाभाव इति बुद्धिस्तु स्वाधिकरणसाधिका। तत्र चाधिकरणमभावैकदेशः ? उतावरणैकदेशस्याभावः ? यद्वा आवरणाभाव एव ? पक्षत्रयेऽपि सर्वस्याधिकरणत्वेन वर्णितस्याभावतया तस्याधिकरणसापेक्षतया तद्‌बुद्धावनवस्थापातात् अभावबुद्धिरेव न स्यात्। अभावेऽप्येकदेशादिकमनुपपन्नमित्याहुः। एके तु 'आकाशबुद्धिस्सर्वदा साधिकरणिकेति नियमो नास्ति; अभावबुद्धिस्तु साधिकरणिकेति नान(नतावदन)वस्थेत्याहुः। एतदस्वरसादेव युक्त्यन्तरमाह—इहाकाश इतिवदिति' इत्यप्याहुः।

इहाकाश इति प्रतीतेरन्यथासिद्ध्युपवर्णनायोक्ते 'इहाकाश इतिवत् इति वाक्ये इत्यर्थः। अत्र किमाकाशशब्देन आवरणाभावो विवक्षितः उत तदन्य इति विकल्प्य आद्यं दूषयति—आवरणाभाव इति। द्वितीयं दूषयति—त्वदनभ्युपगमस्येति। उभयसंमतस्य पक्षत्वं वाच्यमिति भावः। प्रतिबन्दीति – तथाच न दृष्टान्तासिद्धिर्दूषणमिति भावः। आवरणाभावेति—तत्रापि मूर्तवस्तुनि सम्बन्धधीस्स्यादित्यर्थः। तथागेति – यथेह तारकेति धीस्तथा कदाचिदाकाशे तारकेति धीः। तथा च आकाशस्याधिकरणप्रतीतिनियमाभावादभावात्मकत्वे तदयोगान्निरधिकरणतया प्रतीयमानस्यावरणा(मानस्याकाशा)भावातिरिक्तत्वेन सिद्धौ तदतिरिक्तनभोनिषेधस्सम्भवति त्वत्पक्षे तु न संभवतीत्यर्थः।

नन्वावरणाभावातिरिक्तत्वे आकाशस्य आवरणे सत्यपि सत्त्वात् तत्र तदभा(तदाकाशाभा)वो न स्यात् तस्यैवाकाशत्वादित्युक्तत्वादित्यत्राह—आवरणेष्विति। आकाशसत्त्वेऽपि नाकाशमात्रमवकाशः; अपि तु आवरणाभावविशिष्टमि(ष्टम्; तत्र विशिष्टं नास्ती)त्यर्थः। सर्वेषामिति—ननु आवरणेष्वविद्यमानतयेत्यत्र आवरणेषु सत्सु अविद्यमानतयेत्यर्थः। तथाच न सर्वेषां स्वाभावत्वप्रसङ्गः; स्वस्मिन्नसत्त्वेऽपि स्वाधिकरणे सत्त्वादिति चेत्; न; गोत्वाश्वत्वयोः परस्पराभावत्वप्रसङ्गात्। नच भावान्तराभाववादे इष्टप्रसङ्गः इति चेन्न; पीतत्वशङ्खत्वयोर्व्यभिचारात्। नच तयोरप्य(रपिपरस्परा)भावत्वम्; सामानाधिकर-

ण्यधीविरोधादिति भावः । खपुष्पादिष्विति–प्रामाणिक एव व्युत्पन्नानां पुष्पादिशब्दानां भ्रान्तिजनकत्वमित्यर्थः ।

नन्वस्तु खपुष्पादौ यौगिकत्वात् प्रत्येकव्युत्पन्नानां समभिव्याहाराद्धीः । मृगतृष्णादिषु रूढमतिः कथमित्यत्राह – मृगतृष्णादीति । तत्रापि मरीचिकाव्यूहस्य प्रमाणसिद्धत्वादिति भावः । अल्पत्वेति – तथाच तदध्यासवचनं भ्रान्तिनिबन्धनमिति भावः । सत्त्वमेवोपपादयति – अभावस्येति अस्मान् प्रतीति—अन्धकारस्य नीलरूपाश्रयद्रव्यतयाऽस्माभिरङ्गीकारान्न तत्र रूपाध्यास इत्यर्थः । ननु तदालोकाभावस्यापि प्रतीतेस्तत्राध्यास इति चेन्न; तत्प्रतीतावपि तस्य नीलतया प्रतीतौ मानाभावन्नीलबुद्धेरन्धकारविषयत्वादिति भावः । अत एवेति—अभावे आरोपाभावादित्यर्थः । वस्तुतस्तु मध्याह्नेऽपि वियति विसर्पति सौरालोके नीलं नभ इति प्रतीतेर्ना(सावा)लोकाभावो विषयः इत्याह - आलोकेति । ननु प्रमाणसिद्ध एव सत्ये(पदार्थे) पदानां व्युत्पत्तिः । तर्हि क्षणिकादिशब्दानां व्युत्पत्तिग्रहो न स्यादिति शङ्कते—नन्विति उभयथापीति – सिद्ध्यसिद्धिव्याघातादिति भावः । तथाच सत्येव सत्यतारोपोऽस्मिश्चासत्ये व्युत्पत्तिश्च वक्तव्येति भावः । नात्रासति सत्यतारोपो नापि तत्र व्युत्पत्तिरित्यभिप्रायेण परिहरति—इत्थमिति । उत्पत्तिकालिकघटानन्तरकालसत्त्वं मृत्पिण्डावस्थायां सदेव घटे आरोप्यते; स्वोत्पत्तिक्षणानन्तरक्षणासत्त्वमेव स्वस्मिन् निषिध्यते; तदन्यत्र सदेवेति नानुपपत्तिरिति भावः । अन्यदपि—अनिर्वचनीयत्वादिकमपीत्यर्थः । सत्याऽसत्या वेति—प्रमितस्य शृङ्गस्य तैक्ष्ण्यवत्त्वे धियस्सत्यता; तदभावे भ्रान्तिरित्यर्थः । नात्रासतीति—तथाच व्योम्नोऽसत्त्वे तस्मिन् नैल्याद्यध्यासोऽनुपपन्न इति भावः ।

अन्यथाख्यातिमवलम्ब्य परिहार उक्तः; इदानीमख्यातिपक्षमवलम्ब्याह—एवमनभ्युगमे इति । यथा नैरन्तर्येण प्रतीतिमात्रेण वर्णक्रमव्यवहार; तथा शशशृङ्गादीनां प्रत्येकं स्वरूपतः प्रतीतानां शशशृङ्गं तीक्ष्णमिति व्यवहारो नात्र विशिष्टतया कस्यचित् प्रतीतिरित्यर्थः । नच नभसस्सत्त्वव्यवहारोऽपि तथाऽस्त्विति वाच्यम्; असतः प्रतीत्यनर्हत्वात् । एतेन – असंसर्गाग्रहेणेत्यर्थः । ननु भूतभाविनोरसत्त्वात् तत्राध्यासो दृष्टान्तस्स्यादिति शङ्कते – भूतेष्विति । गूढाभिसन्धिः प्रतिबन्द्या समाधत्ते—कथमिति । अभिसन्धिमजानान आह—तेषामिति । अभिसन्धिमुद्घाटयति—स्वकालसत्त्वस्येति । आरोपसमकाले सत्त्वमसत्त्वं च नारोपतदभावयोः प्रयोजकम्; अपि तु सत्त्वमात्रम्; तच्च भूतभाविनोरस्त्येव प्रामाणिकत्वात् । तथा च न त्वदभिमतासत्त्वारोपः कुत्रापि;

इयांस्तु विशेषः—भूतभाव्यधिकरणकभ्रमो न प्रत्यक्षः; किं तु व्याप्त्यादिज्ञानमूल इति ।

निरूप्यमाणः—ज्ञायमानः। **संसर्गिनिरूप्यः**— सबन्धिनिरूप्यः। **अधिकरणप्रतियोगीति**—तत्प्रतीतिनियतप्रतीतिक इत्यर्थः। तथाच अधिकरणप्रतियोगिभिन्नो (प्रतियोगिनोः)यस्संसर्गः तत्प्रतियोगिकतया (तत्प्रतीतिपूर्वकतया) अभावप्रतीतेस्तद्बुद्ध्यभावेऽभावबुद्धिर्न स्यादित्यर्थः। केचित्तु – प्रतियोग्यधिकरणसंसर्गप्रतियोगिकत्वमेव संसर्गाभावस्य; तेनैव विरोधात्। तत्प्रतियोगिकत्वमेव (तद्बलादेव) घटादिप्रतियोगिकत्वमि (त्वव्यवहारइ)त्याहुः।

सामान्यतो दूषणमुक्त्वा अत्यन्ताभावादिविकल्पमुखेन विशिष्य दूषणमाह—**अत्यन्ताभावोऽपीति**। तथाच आकाशस्यात्यन्ताभावत्वे इहाकाशे तारकेति निरधिकरणाकाशधीर्न स्यादित्यर्थः। ननु खपुष्पं नास्तीति खपुष्पाभावप्रतीतौ प्रतियोग्यधिकरणसंसर्गप्रतीत्यपेक्षा नास्त्येव; तद्वदत्रापि स्यादित्यात्राह – **खपुष्पवदिति**। तथा च प्रतीयमानानामावरणानामत्यन्तासत्त्वे पदार्थमात्रस्यात्यन्तासत्ता स्यादिति आवरणानां सत्त्वं वाच्यमेव; तथा च सत्प्रतियोगिकाभावप्रतीतौ अधिकरणनियम इति भावः। यद्यपि ख(खे)पुष्पं नास्ति श(शे)शश्शृङ्गं नास्तीति तत्रापि सत्प्रतियोगिकत्वमेव; तथा अत्यन्तासत्त्वेऽपि तदभावप्रतीत्यभ्युपगमे अधिकरणधीनैयत्यमस्त्येव; तथाप्यभ्युपगम्योक्तमिति ध्येयम्।

दुर्वचत्वमेवोपपादयति—**तौ ह्रीति**। **अविद्यमानानां**—तुच्छानामित्यर्थः। **तेषामिति**—प्रतियोगिकाले ध्वंसप्रागभावयोर्विरोधादित्यर्थः। **तत एवेति**। अविद्यमानत्वादेवेत्यर्थः। अविद्यमानत्वं तुच्छत्वम्। प्रतियोगिनोऽसत्त्वेऽपि तौ भवेतामित्यत्राह—**न ह्रीति**। **शृङ्गस्य**—शशशृङ्गस्य। नन्वावरणन्यायेन तावभावौ (भावाभावौ)भवेतां विरोधाभावादित्याशङ्क्य यत्किंचिदावरणाभावो नाकाशं अपि तु यात्रदावरणाभावसमूहः; अन्यथा कुडययादावपि यत्किंचिदावरणाभावसत्त्वात्तद्धीप्रसङ्गात्। तथा च यत्किंचिदावरणस्य सर्वकालेऽपि सत्त्वेन(विद्यमानतया) तद्ध्वंसप्रागभावासम्भवात्तद्घटितयावदभावासम्भव इत्याह—**तदिहेति**। आशयमविदित्वाशङ्कते—**नन्विति**। **असंभवस्योक्तत्वादिति**। सर्वेषां ध्वंसप्रागभावानामेकदैकत्र सत्त्वे सत्येकप्रतियोगिसंसर्गबोधादपि धीः स्यात्; तदेव न सम्भवतीत्युक्तमित्यर्थः। एवं तर्ह्यत्यन्ताभाव एवास्त्वित्यत्राह **एवं सति चेति**। **असिद्धप्रतियोगिकतयेति**। प्रतियोग्यधिकरणयोस्तादात्म्यस्य तुच्छत्वात् तुच्छप्रतियोगिकाभावस्य तुच्छत्वादित्यर्थः। **तदात्मनः**—तादृशाभावात्मनः। **दूष्यं**—संसर्गाभावादि। **श्रुत्यादीति**। आकाशाद्वायुरित्यादिभिर्भावरूपत्वमित्यर्थः। **अभावेति**। प्रतियोगित्वधर्मस्य तद्वृत्तित्वायोगादिति भावः। अन्यथा गगनसूने सौरभादिप्रसङ्गात्। तदेवोपपादयति—**न ह्रीति**। असिद्धप्रतियोगिकत्वमेवोपपादयति—**न ह्यतत्कालीनेति**।

एतत्कालिकेति क्वचित्पाठः। प्रचुरप्रयोगसत्त्वादवृद्ध्यभावः; (ठन्वा।)

एतत्कालीनेति पाठान्तरम्। स च तदा पूर्वकालीनवत्साध्यः। **अतिप्रसङ्गस्येति**। तादृशतादात्म्यस्य तुच्छत्वेन तदभावस्यावरणादेरपि सत्त्वेनाकाशधियोऽतिप्रसङ्गस्योक्तप्रायत्वादित्यर्थः। यद्वा प्रसङ्गमुक्तमतिक्रान्तमतिप्रसङ्गं तुच्छे प्रतियोगिनि प्रतियोगित्वस्य दुर्वचत्वमिति यावत्; तस्योक्तत्वादित्यर्थः। स्वपक्षं कारिकयोपपादयति—**तत्रेति** अन्यत्र कल्प्यत इति—आरोप्यत इत्यर्थः। **सर्वत्रेति**। तथाचान्तराले द्वयोरावरणयोस्तादात्म्याभावादाकाशबुद्धि रधिकमाकाशं साधयतीति भावः। **आद्यइति** स्वस्य स्वापेक्षया भेदासम्भवादिति भावः। **तथाऽपीति**। तथा सति कुड्यादावावरणे सत्यप्यावरणान्तरभेदसत्त्वात्तत्राकाशबुद्ध्यादि स्यादित्यर्थः। **द्वितीय इति**। आवरणप्रतियोगिकभेदाश्रयस्य (येषु) द्रव्यस्यावश्यकत्वे अन्तरिक्षे प्रदेशे पृथिव्यादेरयोगादिदङ्काराश्रय आकाशस्सिद्धि इति भावः।

ननु इदमारवणं न भवतीत्यत्रेदमर्थोऽप्यावरणाभाव एव न भवतीति तादात्म्याभावो भेदो नञर्थोऽपि स एवेति तादात्म्याभावास्पदत्वेन नाकाशसिद्धिरिति शङ्कते—**नन्विति**। तादात्म्यप्रतियोगिकाभावाश्रयो नावरणाभावे अभावासम्भवादित्यत्राह–**न हीति**। अनन्यगत्या भावेऽप्यभावोऽभ्युपेत्य इत्यर्थः। **आवरणतादात्म्याभावस्येति**। तथा सति आकाशत्वमावरणान्योन्याभावत्वं पर्यवस्यति। न च तज्ज्ञानादेवाकाशादिव्यवहारः; तथा च तदन्य आकाशादिपदवेदनीयः सिध्यतीत्यर्थः। 'अत्यन्ताभावनाशावजननिः' इति मूलस्यात्यन्ताभावश्च नाशो ध्वंसश्च अजननिः प्रागभावश्चेत्यर्थः॥ ४६॥

अक्ष०—पृथिव्यादिभूतचतुष्टयात्मकावरणाभाव एवाकाशः स तुच्छएवेति सौगत चार्वाकमतं निराकरोति—**सद्रूपेणवेति**। आकाश इति भावरूपेणैव भासते नत्वसत् अनावरणं वेति। सर्वत्र वस्तुस्वरूपं प्रतीत्यनुगुणमेव व्यवस्थाप्यम्। तस्मादावरणाभाव एव विहायः—आकाशो न भवितुमर्हतीत्यर्थः। अभावरूपत्वाभ्युपगमेऽपि न तुच्छत्वं अभाव स्वभावस्य तस्य निस्वभावत्वरूपतुच्छत्वायोगात् नह्यन्यस्वभावविरहादपि निस्वभावत्वं अतिप्रसंगापत्तेः।

अपिचाभावरूपत्वे संसर्गाभावो वा स्यात् अन्योन्याभावो वा? तत्राद्यः कल्पो न कल्पत इत्याह—**संसर्गाभावमात्रमिति**। कुत इत्यत्राह—**यतो नास्तीति**। कइत्याह—**संसर्गिबोध इति**। संसर्गप्रतियोग्यनुयोगिबोध इत्यर्थः। "इहाकाशे तारका" इति प्रत्यये आवरणसंसर्गाभावभानस्य संसर्गप्रतियोग्यनुयोगिधीसापेक्षस्य तद्धीविरहेण अनुपपत्तेरिति भावः। किञ्च संसर्गाभाव इति प्रागभाव प्रध्वंसाभावात्यन्ताभावास्त्रयोऽपिव्यपदिश्यन्ते तादात्म्यातिरिक्त संबन्धावच्छिन्नप्रतियोगिताकत्वेन तादात्म्यानवछिन्नप्रतियोगिताकताकत्वेन वा त्रयाणां तद्व्यपदेशः। ते त्रयोऽपि आवरणेषु प्रतियोगिषु सत्सु न भवेयुरित्याह—**अत्यन्ताभावेति**। **अजननिः** प्रागभाव इत्यर्थः। **तेषु**—आवरणेष्वित्यर्थः। यत्किञ्चिदावरणाभावस्याऽकाशत्वे तस्यावरणदेशेऽपि सत्वेन निष्क्रमणाद्यापत्तेः। सर्वावरणाभावस्याऽकाशत्वे

कतिपयावरण दशायां तत्सद्भावानुपपत्तिरित्यसंभव इति भावः। तादात्म्याभावस्यैवाऽकाशत्वे सर्वतादात्म्याभावस्य प्रतियोग्यप्रसिद्ध्या अप्रसिद्धेः। यत्किञ्चिदावरणतादात्म्याभावस्य आवरणान्तर एव प्रसिद्ध्या तदन्तराले तत्सत्वे मानाभावमाह—तादात्म्येति। तंतमिति। तत्तदावरणविशेषमित्यर्थः॥ ४६॥

इत्याकाशस्यावरणाभावमात्रत्वभङ्गः॥

नित्यत्वाद्यम्बरादेर्यदि निरवयवद्रव्यताद्यैः प्रसाध्यं
कः स्याद्बाधो विपक्षे कथमिव निगमे बाधकेऽत्रानुमा स्यात्।
बाधस्सामान्यदृष्ट्या श्रुतिसमधिगते नैव कुत्रापि शक्य-
स्तेनामूर्तत्वलिङ्गान्न सृजति विमतो मूर्तमित्याद्यपास्तम्॥४७॥

सर्वा०—सोऽयमाकाशस्सर्वव्यापी नित्यश्चेति वैशेषिकादयः। जैनास्तु तत्र लोकाकाशः अलोकाकाशश्चेति विभागमप्याहुः। मूलप्रकृतिर्विभ्वीति सांख्याः। मनो विभ्विति भाट्टाः। तेषां पक्षं सहेतुकमनुभाषते—नित्यत्वादीति॥ नित्यत्वं व्यापित्वं च पृथक्साध्यम्। प्रत्येकं तयोरेते हेतवः—विगीतं नित्यं विभु च निरवयत्वे सति महत्त्वात्, सर्वदा निष्पन्दत्वे सति महत्त्वात्, सर्वदा स्पर्शरहितद्रव्यत्वात् इत्यादयः; निरवयवेन्द्रियग्राह्यगुणत्वादित्याकाशस्यैव; ज्ञानासमवायिसंयोगाधारत्वात् इति मनस एव। एतेषां साधारणमप्रयोजकत्वमभि—प्रेत्याह—कः स्यादिति। न ह्येषामनित्यत्वादौ किञ्चिदनिष्टं स्यात्; स्वाच्छन्द्येनानिष्टकल्पने विपरीतकल्पनस्यापि शक्यत्वात्। अक्षोभ्यं दूषणान्तरमाह—कथमिवेति। येष्वनित्यत्वम् अविभुत्वं च सृष्टयादिवा[क्यै]दैसतत्त्वान्तरावृतत्वादिवाक्यैश्च सिद्धं, तेषु तद्विरुद्धसाधनमागमबाधितमित्यर्थः। उक्तेषु च हेतुषु निरवयत्वादिकं पञ्चीकरणवादिशास्त्रविरुद्धम्। सर्वदा स्पर्शरहितद्रव्यत्वादिति विभुत्वसाधने अणुत्वेन श्रुतिसिद्धैर्जीवैरनैकान्त्यम्, ज्ञानासमवायिसंयोगाधारत्वम् आत्ममनसोरसिद्धं च। ज्ञानद्रव्यत्वादेर्वक्ष्यमाणत्वात् ज्ञानावस्थानां चात्ममनस्संयोगासमवायिकारणकत्वाभावात्। किं चात्र नित्यत्वसाधनमाकाशादिद्रव्यपक्षीकारेण वा? आकाशत्वाद्यवस्यापक्षीकारेण वा? आद्ये सिद्धसाध्यता; द्वितीये तु स्वानभ्युपगतपक्षीकारो न युक्तः। श्रुत्यैव तदङ्गीकारे तयैव बाधः। अनुमानेन श्रुतिबाधे तु हैतुकप्रलापैश्श्रुतिप्रमाणस्य निश्शेषोच्छेदप्रसङ्गमभिप्रेत्याह—बाध इति। प्रत्यक्षविरोधरहितानन्यपरश्रुत्या यथावदधिगतेऽर्थे येनकेनचित्सामान्यतोदृष्टेन बाधशङ्कायां श्रौतहिंसा न धर्मः हिंसात्वात् संमतवत्, विगीतमस्थि पवित्रम् अस्थित्वात् शङ्खवत्, इत्यादेरपि प्रसङ्गः स्यादिति भावः। उक्तं दूषणं प्रस्तुते पक्षे साध्यान्तरविषयहेत्वन्तरेष्वपि दर्शयति—तेनेति। आकाशो न स्पर्शवदुपादानम्; स्पर्शशून्यत्वात्। एवं वाय्वादिकमपि न तेजःप्रभृत्युपादानम् रूपशून्यत्वात् रसशून्यत्वात् इत्यनुमानजातं श्रुत्यादिविरोधादपास्तमित्यर्थः॥ ४७॥

आनन्द०—प्रसङ्गसंगतिमाह—सोऽयमिति ।

पङ्कलिप्तं तृणं यद्वज्जले मग्नं तदत्यये ।
ऊर्ध्वमुद्गच्छति तथा जन्तुः कर्मात्यये पुनः ।।

ऊर्ध्वमाक्रमतेऽजस्रं लोकाकाशं विहाय सः ।
सततोर्ध्वगतिर्मुक्तिरलोकाकाश ईरिता ।।

व्यापि नित्यं द्विधाऽऽकाशमेकमेव विभज्यते ।

इत्युक्तपक्षमाह—जैनास्त्विति । लोकाकाशः—जन्तुसंचारविशिष्टाकाशः । तद्रहिताकाशः—अलोकाकाशः । मूलप्रकृतिरिति । उत्तरावधिराहित्यमाहुरित्यर्थः ।

आदिशब्दार्थमाह—व्यापित्वं चेति । आदिशब्देन हेतुविशेषणानि हेत्वन्तराणि च विवक्षितानीत्याह—एते हेतव इत्यादिना । निरवयवत्व इति तावत्युक्ते गुणे व्यभिचारः, अतो महत्त्वादिति । तावताऽपि घटे व्यभिचारः, अत उक्तं—निरवयवेति । ननु महत्त्वं परिमाणविशेषः; तथाच परिमाणत्वमेव गुणादौ व्यभिचारवारकमिति विशेष्यांशो व्यर्थं इति चेन्न; महत्त्वस्य जातितया परिमाणत्वाघटिततया वैयर्थ्योक्त्ययोगात्, बहुत्वे साध्ये परमाणौ व्यभिचारवारकत्वाच्चेति भावः । सर्वदेति । निस्स्पन्दत्वं क्रियारहितत्वम् । कदाचित्क्रियारहिते घटादौ गुणादौ व्यभिचारवारणं विशेषणानां द्रष्टव्यम् । सर्वदेति । पूर्ववदेव विशेषणप्रयोजनं द्रष्टव्यम् । निरवयवेति । निरवयवेन्द्रियजन्यलौकिकप्रत्यक्षविषयगुणत्वादित्यर्थः । आकाशस्येति । आकाशपक्षकानुमानस्येत्यर्थः; मनस्यसंभवादिति भावः । एवमुत्तरत्रापि । अप्रयोजकत्वमेवोपपादयति—न ह्येतेषामिति । ननु नित्यत्वाद्यनभ्युपगमे निरवयवत्वे सति महत्त्वादिकं न स्यादिति विपक्षे बाध इत्यत्राह—स्वाच्छन्द्येनेति । अप्रयोजकत्वेन तस्य प्रयोजकत्वाभाव उक्तः सत्यप्रयोजकव्यतिरेकापादनस्यैव विपक्षबाधकता यद्युच्येत तर्ह्यनित्यत्वाभावे साध्ये इन्द्रियग्राह्यगुणत्वं न स्यादित्यापादनेन विपरिवृत्तिप्रसङ्गादिति विपरिवृत्तापादनस्यापि सुवचत्वादित्यर्थः । सृष्ट्यादीत्यादिशब्देन प्रलयग्रहः । आवृतत्वादीत्यादिशब्देन प्रकृतेरप्युत्तरावधिपरिच्छिन्नत्वप्रतिपादकवाक्यसंग्रहः । स्वरूपासिद्धिदूषणमप्याह—उक्तेष्विति । निरवयवत्वे पञ्चीकरणायोगादिति भावः । व्यभिचारमप्याह—सर्वदेति । व्याप्यत्वासिद्धिं स्वरूपासिद्धिं चाह—ज्ञानेति ।

ननु ज्ञानद्रव्यस्य नित्यत्वेऽपि तदवस्थानां च जन्यत्वात्तदसमवायिकारणसंयोगाधारत्वं विवक्षितमिति नासिद्धिरित्याह—ज्ञानावस्थानां त्विति । नन्वात्ममनस्संयोगस्य तदसमवायिकारणत्वाभावेऽपि ज्ञानद्रव्यमनस्संयोगोऽसमवायिकारणमस्तु; तथा स एव हेतुः, ज्ञानद्रव्यमेव दृष्टान्तोऽस्त्विति चेत्; आत्मज्ञानद्रव्यसंयोगो वा आवश्यकप्राणमनस्संयोगो वा असमवायिकारणमस्तु; मनस्संयोगः

कारणमित्यत्र मानाभावात् । न च विनिगमकाभावात्सर्वेषां संयोगानामसमवायिकारणत्वं; तथाच नासिद्धिरिति वाच्यम्; तर्हि व्यभिचारापातात् । इदं ज्ञानस्य अनित्यत्वाङ्गीकारेऽपि समानम् । वस्तुतस्तु समवायिकारणाभावादसमवायिकारणमेव नास्तीति ध्येयम् ।

द्वितीये त्विति । तथाच परस्याश्रयासिद्धिरपि दोष इति भावः । ननु प्रसाध्याङ्गस्याप्यनुमानस्य संभवान्न दोष इति चेन्मैवम्; अवस्थायाः प्रसाधनं नानुमानेन; लिङ्गाद्यभावात्; तथाच श्रुत्यैव वाच्यम् । तया जन्यत्वविनाशित्वबोधेनानित्यतयैव सिद्धेर्बाध इत्याह—श्रुत्यैवेति । ननु श्रुतेरेवानुमानतो बाधः किं न स्यादित्यत्राह—अनुमानेनेति । निश्शेषोच्छेदप्रसङ्गमेव दर्शयति—प्रत्यक्षेति । विगीतमिति । पवित्रत्वेन संदिग्धनरास्थ्यादिकमित्यर्थः । साध्यान्तरविषयहेत्वन्तरं दर्शयति—आकाश इति । न स्पर्शवदिति । स्पर्शवतो वायोर्नोपादानमित्यर्थः । तेनामूर्तत्व लिङ्गान्न सृजति विमतो मूर्तमिति–विमत आकाशादिः अमूर्तत्वस्य विभुत्वस्य लिङ्गात् साधकत्वेनाभिमतात् निरवयवत्वे सति महत्त्वादिलिङ्गात् अमूर्तं विभु न सृजति न साधयतीत्यर्थः । यद्वा—'अमूर्तत्वलिङ्गान्न सृजति विमतं मूर्तमित्याद्यपास्तम्' इति पाठः । तथाचायमर्थः—अमूर्तत्वलिङ्गं निरवयवत्वे सति महत्त्वादिकं विमतममूर्तं न सृजति न जनयति महत्त्वे सति निरवयवद्रव्यत्वादित्याद्यपास्तमित्यर्थः ॥ ४७ ॥

अक्ष०—आकाशादेर्नित्यत्वं विभुत्वञ्च वदतां वैशेषिकादीनां पक्षमनुभाषते—नित्यत्वादीति । आदिशब्देन विभुत्वपरिग्रहः । अम्बरादेरित्यादिना प्रकृति मनः परिग्रहः । निरवयवद्रव्यताद्यैरित्यत्र आद्यशब्देन निष्पन्दद्रव्यत्वादिपरिग्रहः ।

अत्र वैशेषिकाः । नभो नित्यं विभु च निरवयवत्वे सति महत्वात् सदा निष्पन्दत्वे सति महत्वात् सर्वदा स्पर्शरहितद्रव्यत्वाद्वा" इति । एवं प्रकृतौ सांख्याः मनसि भाट्टाश्च साधयन्ति । तत्र विपक्षे बाधकं नास्तीत्याह—कस्स्यादिति । श्रुतिबाधमप्याह—कथमिवेति । निगम इति—सृष्टिप्रलय तत्वान्तरावृतत्वबोधक इत्यर्थः । एवं वैशेषिकाद्युक्तानुमाने अप्रयोजकत्वं बाधितत्वञ्च दूषणमुक्तम् । अथानुमानेन श्रुतेरेव बाधस्स्यादित्यत्राह—बाध इति । सामान्यदृष्ट्या—सामान्यतोदृष्टेन लिङ्गेनेत्यर्थः । नैव कुत्रापि शक्य इति । श्रौतहिंसा न धर्मः हिंसात्वादिति—श्रुतिप्रामाण्यस्यैवोच्छेदप्रसंगादिति भावः । उक्तं दूषणमीदृशानुमानान्तरेऽपि दर्शयति तेनेति । सामान्यतोदृष्टेन श्रुतिप्रतिपन्नार्थबाधकत्वायोगेनेत्यर्थः । आकाशः न स्पर्शवतो मूर्तस्य वायोरुपादानम् स्पर्शशून्यत्वात् अमूर्तत्वात् "वायुर्वा न रूपवतस्तेजसो हेतुः रूपशून्यत्वात्" "नाप्यपां तेजस्तथा रसशून्यत्वात्" "एवं न पृथिव्या उपादानमापः" इत्यनुमानजातं "आकाशाद्वायु" रित्यादि श्रुतिविरोधादेव निरस्तमवगन्तव्यमित्यर्थः ॥ ४७ ॥ इत्याकाशादेरनित्यत्वाव्यापित्वादि ॥

प्राक्प्रत्यक्त्वादिभेदं भजतु वियदिदं भानुयोगादिभेदा-
दस्यैवोपाधिभेदादधिकदिश इव स्तां परत्वापरत्वे ।
व्योमोत्तीर्णेऽपि देशे प्रभवतु तदुपाध्यन्वितैस्तत्तदर्थै-
र्दूरत्वादिव्यवस्था स्वयमुत विभुना ब्रह्मणा किं परैर्नः ॥ ४८ ॥

सर्वा०—अथ विश्वव्यापिनीं पराभिमतां दिशमनभ्युपगच्छंस्तत्कल्पकानामन्यथासिद्धिमाह—प्रागिति ॥ यदि प्रागादिधीव्यवहारसिद्ध्यै दिक्तत्त्वं कल्प्यते तत्संप्रतिपन्नं व्योमैव भवतु । सूर्योदयाद्युपाधिभेदेन तद्विभागात् पूर्वदक्षिणपश्चिमाद्युपाधिक्लृप्तिश्चाधिकेऽनधिकेऽपि समाना । अप्रत्यक्षायां च दिशि प्रत्यक्षैरुपाधिभिरवच्छेदधीर्दुर्लभा । सूर्योदयादिविशेषितातपादिभिरेव प्रागादिधीव्यवहारसिद्धौ किं तदन्यकल्पनया ? शाखाचन्द्रनयाच्चातपादेस्सूर्योदयादेश्च संबन्धधीर्युज्येत । उपहितस्य शब्दार्थत्वान्न दिक्छब्दस्य व्योमातपादिपर्यायिता स्यात् ।

ननु साक्षात्संबन्धरहितसंयुक्तसंयोगभूयस्त्वाल्पत्वनिबन्धने दूरासन्नपरत्वापरत्वे तत्तत्संबन्धोपनायकव्यापकद्रव्ययोगमन्तरेण कथं स्यातामित्यत्राह—अस्यैवेति । न हि त्वया कल्प्यमानमपि दिक्तत्त्वं तदुपाधियोगमन्तरेण परत्वापरत्वे जनयेत् । तथा सति तैरेवोपाधिभिरुपहितं व्योमाद्येव परत्वादिसिद्धौ पर्याप्तम् । अधिकशब्देन कल्पनागौरवं सूच्यते । नन्वाकाशः परिच्छिन्न इति भवत्सिद्धान्तः; तथा च कथमाकाशरहितप्रदेशे दूरत्वादिक्लृप्तिरित्यत्राह—व्योमेति । दूरत्वादिसिद्ध्यनुगुणोपाधिमद्भिर्महदादिभिस्तत्सिद्धिः स्यात् । व्योमोत्तीर्णं इत्युपलक्षणम्, व्योमसंपृक्तद्रव्यादिभिरपि तदुपपत्तेः । अनियमेन बहूनां दिक्त्वकल्पने गौरवं स्यादिति चेन्न, असिद्धकल्पनादनेकैरपि सिद्धैरेव निर्वाहस्य लघुत्वात् । यद्येकमेव सर्वत्र दिग्व्यवहारकारणमिष्यते, तदा सर्वव्यापिना सर्वहेतुभूतेन परमात्मनैव सर्वं सिध्येत्; तस्यैव सन्तु उपाधिभेदास्सहकारिणः । अथवा तत्तदुपाधयस्तावत्प्रत्यक्षाः । तत्संबन्धोऽपि साक्षात्परंपरया वा दूरासन्नादेर्दृष्ट एव; तद्दृष्ट्या च परत्वादिसिद्धौ किं तदुपहितगवेषणया ? कार्यविशेषाणामन्यतस्संभवे च न क्वचित्तदतिरिक्तं कल्प्यमित्यभिप्रायेणाह–किं परैर्न इति । परैः–व्यापकेश्वरव्यतिरिक्तैः उपाधिमात्रव्यतिरिक्तैर्वेत्यर्थः । नः—ईश्वरमिच्छतां गौरवभीतानां चेति यावत् ॥ ४८ ॥

आनन्द०—प्रसङ्गसंगतिरित्याह—अथेति । दिक्तत्वानङ्गीकारे आकाशादेरुपाधिभेदेन भेदक्लृप्तिर्गुर्वीत्यत्राह—पूर्वदक्षिणेति । अधिकदिगङ्गीकारेऽपि सूर्योदयास्तमयादितस्तद्भेदक्लृप्तिरवर्जनीयेत्यर्थः । अप्रत्यक्षायामिति । देहाद्यवच्छिन्नेश्वरस्योपाधिप्रत्यक्षमात्रेण प्रत्यक्षा(क्षत्वा)दर्शनाद्दिशोऽपि नोपाधिप्रत्यक्षमात्रेण प्रत्यक्षतेत्यतिरिक्तदिक्पक्षेऽपि प्रागादिप्रत्यक्षव्यवहार उपाधिमात्रविषय

इति भावः। ननु आकाशस्याप्यस्मन्मते प्रत्यक्षतया कथं प्राच्यादिबुद्धेरुपाध्यवच्छिन्नतद्विषयताऽस्त्वित्यत्राह— सूर्योदयादीति। शाखाचन्द्रेति। परम्परासम्बन्धधीरित्यर्थः।

ननु व्योमादीनामेव दिक्त्वे व्योमादिशब्दानां दिक्शब्दपर्यायता स्यादित्यत्राह— उपहितेति। परोक्त-(पराभिहित) दिक्साधकोपपत्तिमनूद्य परिहरति— नन्वित्यादिना। नहि त्वयेति। अतिप्रसङ्गादिति भावः। तथासतीति। उपाधिसापेक्षत्व इत्यर्थः। अधिकशब्देन—मूलस्थाधिकशब्देन। व्योमसंपृक्तद्रव्यादिभिरिति- तत्संपृक्तप्रकृत्यादिभिरित्यर्थः। आदिशब्देन सत्वादीनां संग्रहः। नेति— व्योमादिसम्भवस्थले व्योमादि तदुत्तीर्णस्थले तदन्यदिति अनेककल्पने गौरवमित्यर्थः। असिद्धेति— असिद्धस्य धर्मिणः कल्पने गौरवमिति भावः। नन्वेकं दिग्व्यवहारनिमित्तमेषितव्यम्; नानाभूतेष्वनुगतधर्माभावेनानुगतव्यवहारासम्भवादित्यत्राह—यद्येकमेवेति। तस्यैकत्वे कथं प्रागादिभेदः? इत्यत्राह- अथवेति। यद्वा दिगुपाधीनामेवावश्यकत्वाद्दिग्व्यहारहेतुत्वमस्तु न तदुपहितापेक्षेति पक्षान्तरमाह—अथवेति। तेषामननुगतत्वेऽपि प्राच्यादिव्यवहाराणामननुगतत्वान्न दोषः। यद्यपि दिगिति व्यवहारोऽननुगतः; तथाऽपि तेषामेवोपाधीनां दिग्विषयकव्यवहारहेतुत्वेन कालकृतपरत्वादिहेतुत्वेन वाऽनुगतिसम्भवादुपपन्नतरः॥ ४८॥

अक्ष०—अथ वैशेषिकाद्यभिमतायां दिशि न मानमस्तीत्याह—प्रागिति। प्रागादिधीव्यवहारसिद्ध्यर्थं नातिरिक्तंदिक्त्वं कल्पनीयं क्लृप्तेन वियदादिनैव तत्सिद्धेरिति भावः। नन्वेकस्य वियदादेः कथं प्राक्प्रत्यक्त्वादिभेदः। कथं वा अतिरिक्ताया दिशः। उपाधिभेदादिति चेत् वियदादेरपि तथोपपत्तेः। अत्रोपाधिः कः इति चेत्तत्राह—भानुयोगेति। सूर्योदयास्तमयादिना उपाधिभेदेन दिग्भेद व्यवहारकल्पनं पक्षद्वयेऽपि समानमित्याशयवानाह—अधिकदिशइवेति। अतिरिक्तदिक्त्वकल्पनेऽपि एकस्या एव तस्याः प्राक्प्रत्यगादिविरुद्धव्यवहारनिर्वाहकत्वं परत्वापरत्वहेतुत्वमित्यादिकं स्वस्वरूपमात्रेण न घटेत। अतस्तत्तदुपाधिवैशिष्ट्येनैव निर्वोढव्यम्। तद्वत् वियदादेरेकत्वेऽपि दृष्टैरेवोपाधिभेदैः तत्तद्व्यवहारभेदनिर्वाहो भवतीति वक्तुं शक्यम्।

इयांस्तु विशेषः। अतिरिक्ताया दिशः प्रत्यक्षत्वानभ्युपगमेन प्रागादिप्रत्यक्षे दिगुपाधीनामेव विषयत्वं स्यात्। अनतिरेके तु वियदातपादेः प्रत्यक्षत्वेन उपाधिविशिष्टस्याऽपि विषयत्वमुपपद्येत इति। भवन्मते वियदादेरविभुत्वेन तद्रहितदेशे कथं दिग्व्यवहार इत्यत्राह—व्योमेति। तत्तदर्थैरिति। तत्र विद्यमानैः महदादिभिरेव तत्तदुपाधिविशिष्टैः दूरान्तिकादिव्यवस्था आस्थेयेति भावः। तदुपाधिभिरेव वा अतिरिक्तदिगभ्युपगमापेक्षया अनेकेष्वपि सिद्धेष्वेव दिक्त्वकल्पनं लघीयः। एकस्यैव सर्वत्र दिग्व्यवहारविषयत्वं वक्तव्यमित्यभिनिवेशेऽपि सर्वव्यापकेन ब्रह्म-

णैव—तत्तदुपाधिविशिष्टेन सर्वव्यवहारनिर्वाहो भवतीत्याह—स्वयमुत विभुनेति। [स्वयमिहविभुनेति] परैरिति। ईश्वरातिरिक्तैरित्यर्थः। न इति। ईश्वरवादिनामस्माकमित्यर्थः। परत्वापरत्वौपयिक तत्तद्देशावयवसंयोगभूयस्त्वाल्पीयस्त्वाद्युपनायकत्वं व्यापकतया क्लृप्तस्यैव यस्य कस्यचित् कल्पयितुं युक्तमितिभावः॥४८॥

दिशस्तत्वान्तरत्वाभावः।

अन्यस्मिन्नन्यधर्मान् घटयतु वियदाद्यत्र नातिप्रसक्तिः
सिध्यत्कार्योपयुक्तोपनयननियमोपेततच्छक्तिक्लृप्तेः।
एवं ह्याधिकायामपि दिशि भवतोऽतिप्रसङ्गो निषेध्यो
धर्मी धर्मश्च कल्प्यौ तव तदितरता स्यात्तु काले स्वमानात्॥४९॥

सर्वा०—ननु यद्याकाशादयः परधर्मं परत्र घटयेयुः, ततः पाण्ड्यदेशस्थितेन जपाकुसुमेन पाटलिपुत्रस्थितं स्फटिकमणिमुपरञ्जयेयुः; विश्वमपि व्यामिश्रसर्वस्वभावं स्यादिति प्रसक्तिमुद्भाव्य परिहरति—अन्यस्मिन्निति॥ हेतुमाह—सिध्यदिति। यथा कलमबीजस्याङ्कुरजननशक्तिकल्पनेऽपि न कोद्रवाङ्कुरजनकत्वं दृश्यमानकार्यानुगुणकारणशक्तिकल्पनात्, तथा वियदादिष्वपि परत्वादिसिद्ध्युपयुक्तोपनायकतयैव तच्छक्तिक्लृप्तेरित्यर्थः। अत्र प्रतिबन्दिमभिप्रेत्याह—एवं हीति।

नन्वधिकाया दिशस्तावदर्थंत[यैव]या धर्मिग्राहकेणैव सिद्धिः; न तथा वियदादेः, तत्स्वरूपस्यान्यतस्सिद्धत्वादिति चोद्यं विपरीतफलमित्यभिप्रायेणाह—धर्मीति। नावश्यं धर्मिग्राहकेणैव सर्वत्र शक्तिसिद्धिः। गृहीतेष्वपि धर्मिषु तत्तत्कार्यदर्शनेन तन्नियतशक्तिक्लृप्तेः। अत एव नातिप्रसङ्गः, अयस्कान्तादिवत्तन्नियमात्। यन्निबन्धनस्त्वतिप्रसङ्गः, स सिद्धे कल्प्येऽपि समः समाधिः। एवं स्थिते वरमुभयकल्पनादेककल्पनम्। ननु शक्तिरपि कल्प्यमाना न निराधारा कल्प्यते। तस्मात्साधारशक्तिकल्पने शक्तिविशिष्टाधारकल्पने वा समं गौरवम्। तन्न; यद्यपि शक्तितद्वन्तौ मिथोऽवच्छिन्नौ, तथाऽपि सिद्धांशस्य कल्प्यत्वायोगादसिद्धांशनियतैव क्लृप्तिरिति विशेषसिद्धिः स्यादिति भावः। नन्वेवं वियदादेरेव सूर्यपरिस्पन्दाद्युपनायकत्वसंभवात्तदन्यः कालो न सिध्येदित्यत्राह—तदितरतेति। न हि वयं परत्वादिलिङ्गैराकाशाद्यतिरिक्तं कल्पयामः, किंत्वागामिकमभ्युपेमः। अतो न तस्यासिद्धिरिति भावः॥ ४९॥

आन०—आक्षेप संगतिमाह नन्विति। आकाङ्क्षा ह्यन्यबुद्ध्यपेक्षया परत्वापरत्वसिद्धये तत्तद्देशावयवसंयोगभूयस्त्वाल्पीयस्त्वे दूरनिकटस्थयोः पिण्डयोरासञ्जयतीत्यन्य धर्मोपरञ्जकमिति वाच्य (वक्तव्य) मित्यर्थः। तत इति—अविशेषादिति भावः। यथा कलमेति—अन्यथा अङ्कुरजननशक्तिकल्पनाऽविशेषात् सर्वत्राङ्कुरज-

नकतापि स्यादिति भावः। अत्र प्रतिबन्दिमभिप्रेत्येति—अतिरिक्तदिक्परिकल्पनापक्षेऽपि तस्यान्यधर्मोपनायकत्वेऽतिप्रसङ्गस्समान इति प्रतिबन्दि (न्दी) मित्यर्थः। प्रतिवन्द्याः परिहारमाशङ्कते—नन्विति। विपरीतफलम्—अफलमित्यर्थः। तदेवोपपादयति—नावश्यमिति। धर्मिग्राहकमानेन सधर्मकसिद्धिर्भवतु तदतिरिक्तमानेन वा धर्म (र्मि) क्लृप्तिरस्तु तत्रान्वयव्यतिरेकएव नियामकः; अन्यथा धर्मिग्राहकस्यैवासिद्ध्या धर्मिण एवासिद्धिप्रसङ्गात्। तथा च क्लृप्तेष्वेव शक्तिकल्पनान्नातिरिक्तदिक्सिद्धिरित्यर्थः। अयस्कान्तादिवदिति—यथाऽयस्कान्तेऽयःकर्षणशक्तिरेव नान्याकर्षणशक्तिरित्यर्थः।

ननु धर्मिकल्पनमुभयत्रापि सममिति शङ्कते—नन्विति। साधारणस्य कल्प्यत्वे विशेषणांशेऽपि विशिष्टकल्पनायाः प्राप्तत्वादित्यर्थः। सिद्धांशस्येति—विशिष्टकल्पना हि विशेषणमपि व्याप्नोति! नात्र विशिष्टकल्पना। विशेषणे धर्मिणि पाकादिना रूपन्यायेन विशेष्यभूतशक्तेः (शक्तिमात्रस्य) कल्पनमित्यर्थः। नन्वेवमिति—दिगादिवदित्यर्थः। 'तदितरता स्यात्तु काले समाना' इति मूलस्यायमर्थः—दिक्साम्याभावात्काले तदितरता—व्योमेतरतेत्यर्थः॥ ४९॥

अक्ष०—दूरान्तिकस्थवस्तुनोः परत्वापरत्वव्यवहारसिद्धये वियदादेरेव स्वघटितपरम्परासंबन्धेन तत्तद्देशावयवगतसंयोगभूयस्त्वन्यूनत्वोपनायकत्वकल्पने तद्वत् स्फटिके जपालोहित्योपनायकत्वमपि स्यादित्यतिप्रसङ्गस्स्यादित्यत्राह—अन्यस्मिन्निति। दूरस्थिते वस्तुनि तत्पर्यन्तदेशावयवसमुदायगतभूयस्संयोगान् वियदादिकं स्वघटितसंबन्धेन संबद्धान्करोतु इत्यभ्युपगमेऽपि नोक्तातिप्रसंग इत्यर्थः। कुत इत्यत्राह—सिद्ध्यदिति। कारणस्य दृश्यमानकार्यानुगुणधर्मोपनायकशक्तिमात्रकल्पनात् कार्यादर्शने तच्छक्तिकल्पनस्यैवाऽभावेन नोक्तातिप्रसङ्ग इत्यर्थः। अतिरिक्तदिक्कल्पनेऽपि उक्तरीत्यैव उक्तातिप्रसंगवारणं कर्तव्यमित्याह—एवंहीति। निषेध्यः—वारणीयः।

नन्वतिरिक्ताया दिशः परापरव्यवहारौपयिकधर्मोपनायकतयैव कल्पनात्तावन्मात्रोपनायकत्वं धर्मिग्राहकमानसिद्धम् अन्योपनायकत्वन्तु अनन्तरमेव कल्पनीयतया न धर्मिग्राहक मानसिद्धं अत एव तत्र न विनिगमना विरहादतिप्रसङ्गस्स्यात्। वियदादेस्तु—मानान्तरतस्सिद्ध्यनन्तरमेवोक्तधर्मोपनायकत्वकल्पने तद्वदन्योपनायकत्वमपि विनिगमनाविरहात्स्यादित्यतिप्रसङ्गस्स्यादेवेत्यत्राह— धर्मीधर्मश्चेति—

अयमाशयः। न सर्वत्र धर्मिग्राहकमानेनैव शक्तिक्लृप्तिः। गृहीतेष्वपि धर्मिषु अयस्कान्तादिषु तत्तत्कार्यदर्शनेन तत्तन्नियतशक्तिक्लृप्तेः। तत्र धर्मिग्राहकमानसिद्धत्वं न विनिगमकं भवितुमर्हति— तन्नातिप्रसङ्गो दर्शनानुरोधेनैव वारणीयः

अतो दर्शनमेवत्रिनिगमकमनुगतमभ्युपेत्यम् नतु धर्मिग्राहकमानसिद्धत्वं अतस्त-दभ्युपगमे धर्मधर्म्युभयकल्पनात् गौरवमेव स्वमते संपादितमिति ।

एवं सूर्यपरिस्पन्दादि कालोपाधिविशिष्टतया वियदादेरेव कालिकपरापर-व्यवहारादिनिर्वाहकत्वसंभवात् कालोऽप्यतिरिक्तो माभूदित्यत्राह—तदितरतेति । वियदाद्यतिरिक्ततेत्यर्थः । स्वमानादिति । अनन्यथासिद्धागमप्रमाणसद्भावा-दित्यर्थः । अतो न तस्यासिद्धिरिति भावः ॥ ४९ ॥

दिशांवियदादित्वायोगभङ्गः ।

संख्यानं तत्त्वपङ्क्तौ क्वचिदपि न दिशः कालवद्वा न भेदः
कण्ठोक्तो व्याक्रियादिव्यवहरणमपि ह्यन्यथैवोपपन्नम् ।
श्रोत्रादुक्तस्तु लोकप्रभृतिवदुदयस्तस्य तत्राप्ययो वा
नैतावत्तत्त्वभेदं गमयति न च तच्छ्रौत्रतामान्यपर्यात् ॥ ५० ॥

सर्वा० - यदि पृथक्त्वेन लोकवेदप्रसिद्धा दिगपह्नूयेत तथा वायुरपि । अस्य ह्युपलभ्यमानः स्पर्शं उष्णश्शीतोऽनुष्णाशीतोवा ? त्रेधाऽपि न छान्दो-ग्याधीततेजोबन्नातिरेकस्सिध्येत् । तिर्यक्पवनमप्यदृष्टवशात्तेषामेव स्यात्; शब्द-धृतिकम्पैरपि नातिरिक्तमनुमातव्यम्; तैरेव तत्संभवात् । वातोपनीततत्तद्भूतान्त-रावयवन्यायादनुद्भूतरूपतया दुर्दर्शत्वं स्यादित्यत्राह—संख्यानमिति ॥

अयं भावः –न हि वयमप्रत्यक्षस्य वायोः स्पर्शशब्दधृतिकम्पलिङ्गैस्सिद्धि-रिति वदामः, येन तेषामन्यथासिद्धिरुच्येत । किंतु तेषुतेषु शास्त्रेषु तत्त्वपङ्क्तौ परिगणनात्; नैवं दिक्तत्त्वं गण्यत इति । तत्र कालप्रतिवन्दिं निस्तरति—कालवद्वेति । अस्ति हि *रूपान्तरं तद्द्विज कालसंज्ञम् इत्यादि । ननु *दिग्देश-कालेष्वस्तातिः इत्यादिषु देशाद्भिन्ना दिक् कालवच्छास्त्रेषु व्यवह्रियत इत्य-त्राह—व्याक्रियेति । प्रमाणसिद्धदिक्तत्त्वानुसारेण तत्कार्यविशेषविधायिनां शास्त्राणां तत्स्वरूपनिष्कर्षे तात्पर्याभावान्न ततस्तत्त्वदिष्टसिद्धिरित्याशयः ।

अथ स्यात् *प्राणाद्वायुरजायत इत्यादौ वाय्वादितत्त्वैस्सह दिशः पृथक्सृष्टि-रुच्यते; अतस्तद्वद्दिशोऽपि तत्त्वान्तरत्वं स्यात्; एवं *दिशः श्रोत्रम् इति; तद्वदप्ययोऽपि श्रूयत इत्यत्राह—श्रोत्रादिति । लोकप्रभृतिवदिति प्रतिबन्दिवचनम् । अत्र हि *नाभ्या आसीदन्तरिक्षम् इत्यादिभिर्न तत्त्वसृष्टिश्श्रूयते । किंतु ब्राह्मण-क्षत्रियचन्द्रसूर्यादिव्यष्टिसृष्टिप्रकरणे अन्तरिक्षस्वर्गादिकल्पनम् । अतो दिक्सृष्टिरपि व्यष्टिविषया न तत्त्वान्तरं कल्पयितुं शक्नुयादित्याह—नैतावदिति । अथापि दिशः श्रोत्रोपात्तस्य व्यष्टिविशेषत्वं स्यादित्यत्राह—न चेति । श्रौत्रतां—श्रोत्रोपादानतामित्यर्थः । न हीन्द्रियाणि कस्यचिदुपादानानीति प्रागेवोक्तम् । गत्यभावादत्र विशेषः कल्प्यतामित्यत्राह—आन्यपर्यादिति । अत्र हि दिगुपाधीनां तद्देवतानां वा भगवतः श्रोत्रात् चन्द्रादेरिव सृष्टिः स्यात् अतस्तत्त्वान्तरकल्पनं निर्मूलमित्यर्थः ॥ ५० ॥

आनन्द०—आक्षेपसंगतिमाह—यदि पृथक्त्वेनेति। उष्ण इत्यादि—उष्णतया शीततया अनुष्णाशीततयोपलभ्यमान इ(इति) त्यर्थः। छान्दोग्याधी(धिग)त इति—'हन्ताहमिमास्तिस्रो देवता' इति छान्दोग्याधीतपृथिव्यप्तेजोऽतिरेकेण न सिध्येदित्यर्थः।

ननु पृथिव्यादिविलक्षणधर्मवत्त्वादतिरिक्तस्सिध्येदित्यत्राह—तिर्यक्पवनमिति। ननु पृथिव्याद्यन्यतमत्वे रूपवत्त्वापत्तिरित्यत्राह—भूतान्तरेति। वायू (वातो) पनीतगन्धावयवतप्तवारिगतवह्न्यवयववदनुद्भूतरूपवत्त्वसंभवादित्यर्थः। ननु दिशस्तत्त्वपङ्क्तिपरिगणनाभावो दिक्सिद्धिबाधको न तु वायुसाधक इत्यत्राह—अयं भाव इति। 'आकाशाद्वायुः' इति तत्वपरिगणनादपि तत्सिद्धिरिति भावः ननु 'आत्मन आकाशः' इति तत्वपङ्क्तौ कालस्या (काला) परिगणनात् तत्सिद्धिरपि न स्यादिति प्रतिवन्दि परिहरति—अत्र कालप्रतिबन्दिमिति।

ननु 'रूपान्तरं तद्द्विज कालसंज्ञम्' इति पौराणिकभेदव्यवहारवत् (व्याकरणे) 'दिक्छब्देभ्यस्सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' इति दिशोऽपि भेदेन व्याकरणव्यवहारात् तत्सिद्धिरपि स्यादित्याशङ्क्ते—नन्विति। प्रमाणसिद्धेति—दिशस्तत्वान्तरत्वाभावेऽपि क्लृप्ततत्वविषयकदिग्व्यवहारमादायाप्यस्तातिविधानसंभवान्न ततोऽतिरिक्तदिक्सिद्धिरिति भावः। अथापीति—उक्तानन्तर्गतत्वात् अर्था (तत्वा)न्तरं स्यादित्यर्थः। दिगुपाधीनामिति सूर्यादीनां चक्षुरादिजन्यतया तत्प्रमाणगम्यत्वेऽपि न तेषां तेजःप्रभृत्यतिरिक्ततत्वान्तरत्वं; तथाऽत्रापीति भावः। ननु प्रमेयसंग्रहे 'गगनस्य दिशां च त्रिवृत्करणेन रूपवत्त्वं; अतश्चाक्षुषं सर्वम्' इति दिशः पृथग्गणनमस्ति। तथा वरदविष्णुमिश्रैः—'द्रव्यं च षड्विंशतिविधम्—सत्वरजस्तमांसीत्यारभ्य दिग्द्रव्यं पृथगेव संख्यातम्। आकाशकालदिशश्चक्षुरिन्द्रियेणेति चाक्षुषत्वं चोक्तम्। तथा सूत्रकारानिरस्तत्वाच्च तत्त्वान्तरमिति शङ्कामुपसंहारव्याजेन निराकरोति—अत इति।

अयं भावः—न तावत्प्रमेयसंग्रहानुरोधात्तत्वान्तरत्वं पञ्चीकृतभूतारब्धत्वप्रतीत्या महदादिवत्तत्वान्तरत्वायोगात्। नापि वरदविष्णुमिश्रवाक्यबलात्तत्वान्तरत्वम्; भाष्यविरुद्धसत्वादिद्रव्यपरिगणनवत् तत्वान्तरत्वसाधकत्वाभावेन अन्यपरतया नेतव्यत्वात्, नापि सूत्रकारानिरस्तत्वात्तत्वान्तरम्; 'न वायुक्रिये पृथगुपदेशात् इत्यधिकरणे पृथक् सृष्ट्याद्युपदेशवतोऽपि प्राणस्य वाय्वन्तर्भावोक्तेः। तन्न्यायस्य दिगादावपि समत्वेन पृथग्दर्शनार्थत्वादिति। नैतावत्तत्वभेदं गमयतीति मूलस्य एतावत्तत्वभेदं गमयतीति वाक्येन किमुच्यते ? इत्युक्ते अप्ययो वेति वाक्यभेदेन योजना। 'क्षुदुपहन्तुं शक्यमिति पस्पशाभाष्यदर्शनान्न क्लीबतानुपपत्तिरिति। यद्वा—एतावद्भ्यस्तत्वेभ्यो भेदं न गमयतीत्यर्थः॥ ५०॥

अक्ष०—ननु यथा वायुः प्रत्यक्षाभावेऽपि प्रत्यक्षस्पर्शाश्रयत्वेनाङ्गीक्रियते नतु तेजोवन्नावयवैरेवानुद्भूतैरन्यथासिद्धिरुच्यते तद्वत् दिगप्यतिरिक्ता परत्वादि-हेतुतया कुतो नाङ्गीकार्येत्यत्राह—संख्यानमिति। "आकाशाद्वायु"रित्यादिषु तेषु तेषु शास्त्रेषु तत्वपङ्क्तौ परिगणनं वायोरस्ति नत्वेवं दिश इति वैषम्याद-नङ्गीकार इत्यर्थः। वायुवत् तत्वपङ्क्तौ परिगणनाऽभावेऽपि कालस्य यथा-ऽङ्गीकारः तद्वद्दिशोऽपि स्यादित्यत्राह—कालवद्वेति। "रूपान्तरं तत् द्विजकाल-संज्ञं" इत्यादौ कालस्य तत्वान्तराद्भेदः कण्ठोक्तः नचैवं दिश इति तदनङ्गीकार इत्यर्थः।

ननु "दिग्देशकालेष्वस्ताति"रित्यत्र देशाद्भिन्ना दिक् कालवत् व्याकरण-शास्त्रे व्यवह्रियत इत्यत्राह—व्याक्रियावीति। अन्यथैवेति—लोकसिद्धदिग्व्यव-हारविषय दिगुपाधिविशिष्टवियदादिमात्रविषयतयाऽपि तदुपपत्तेरित्यर्थः। अथापि "प्राणाद्वायुरजायत" पद्भ्यां भूमिर्दिशश्श्रोत्रात् "दिशश्श्रोत्र"मित्यादिषु दिशः सृष्टिप्रलय श्रवणात् वाय्वादिवत् तत्वान्तरमित्यत्राह—श्रोत्रादिति। लोकप्रभृति-वदिति। "नाभ्याआसीदन्तरिक्ष" मित्युक्तान्तरिक्षादि लोकोदयवदित्यर्थः। यथा अन्तरिक्षादेस्तत्वान्तरत्वं नेष्टं तथा दिगादेरपीत्याह—नैतावदिति। व्यष्टिसृष्टे-रेवात्राभिधानादिति भावः।

व्यष्टिसृष्टावपि दिशः श्रोत्रोपादानकत्वं नाभिधीयत इत्याह—नचेति। तर्हि किमभिधीयत इत्यत्राह—आन्यपर्यादिति। दिगुपाधीनां तत्तदभिमानिदेव-तानां वा भगवतश्श्रोत्रात् चन्द्रादेरिव सृष्टयादौ तात्पर्यादित्यर्थः। अतो दिशस्त-त्वान्तरकल्पनं निर्मूलमिति भावः ॥ ५० ॥

॥ दिशोऽनन्यत्वेश्रुत्यविरोधः ॥

वातो वातीति साक्षान्मतिरितरसमा स्पर्शतो नानुमाऽसा-
वन्धेऽन्येषु प्रसङ्गान्न पुनरगमकं स्पर्शनं रूपशून्ये।
अन्याक्षग्राह्यतावृग्विधगुणविरहो ह्यन्यदक्षं न रूपे
निर्गन्धो नीरसोऽपि स्फुरति यदनलो दर्शनस्पर्शनाभ्याम् ॥ ५१ ॥

सर्वा०—आकाशे चिन्तिते प्रसङ्गाद्दिगन्तर्भाव उक्तः। अथाकाशानन्तर-भाविनि वायौ स्वरूपतस्संप्रतिपन्ने प्रमाणविप्रतिपत्तिं निरस्यति—वातो वातीति॥ त्वगिन्द्रियपवनसंयोगे सति सावधानस्य वातो वातीति धीस्तावद् दुरपलपा। सा साक्षात्काररूपा क्षित्यादिधीसमत्वादित्यर्थः। यदत्र गुणेन गुण्य-नुमानमाहुः तत्प्रतिषेधति—स्पर्शत इति। न हि गन्धादिवदिह गुणमात्रोपलम्भ इति भावः। अन्यथाऽतिप्रसङ्गमाह—अन्ध इति। अन्धे—पुरुषे, अन्येषु—पृथिव्या-दिषु भूतेषु त्वगिन्द्रियेण या स्पर्शधीस्सा स्पर्शमात्रविषया तत्तद्द्रव्यानुमिति-

हेतुस्स्यात्। अन्धोक्तिश्चक्षुषा द्रव्यग्रहणनिवृत्त्यर्था। उपलक्षणमेतदन्धतमसमध्यस्थस्य; सालोकेऽपि निमीलितचक्षुषश्च। न चैतद्युक्तम्, दर्शनस्पर्शनाभ्यामेकार्थग्रहणाभ्युपगमात् अन्यथा द्रव्यापह्नवप्रसङ्गाच्च।

ननु नीरूपं कथं प्रत्यक्षम्? आत्मादीन् पश्य। कथं वाह्याक्षग्राह्यम्? रूपादीन्निरूपय। कथं स्पार्शनवेद्यम्? स्पर्शमेव परामृश, इत्यभिप्रायेणाह - न पुनरिति। तथाऽपि नीरूपद्रव्यं कथं वाहचंन्द्रियग्राह्यं त्वगिन्द्रियग्राह्यं वेत्यत्राह— अन्याक्षेति। इन्द्रियाणां स्वग्राह्यविशेषगुणोपधानेन हि द्रव्यग्राहकत्वमिति वः कल्पना। ततश्चेन्द्रियान्तरग्राह्यविशेषगुणविरहेऽपि वायोस्त्वगिन्द्रियग्राह्यत्वमविरुद्धमित्यर्थः। यदि रूपशून्यद्रव्यत्वाद्वायुरप्रत्यक्ष इत्युच्येत तदा रसशून्यद्रव्यत्वात्तेजोऽपि किं तथा गन्धशून्यद्रव्यत्वाद्वा। अतोऽवादि इन्द्रियान्तरग्राह्यविशेषगुणविरहो नेन्द्रियान्तरवेद्यत्वविरोधीति। अत्राविगीतमुदाहरणमाह निगन्ध इति॥ ॥ ५१॥

आनन्द०—अवसरलक्षणसंगत्या वायोर्निरूपणीयत्वेन प्रसक्तौ (क्तेः) मध्ये दिङ्निरूपणस्य का संगतिरित्याशङ्कां परिहरन्नवतारयति—आकाशे इति। ननु वायुस्वरूपे विवादाभावात् तत्र निरूपणीयं किमित्यत्राह—अथेति। अनुमानतस्सा धीरस्त्वित्यत्राह—सेति। क्षित्यादिधीवत् वायुं स्पृशामीत्यनुव्यवसायादिनि भावः। अन्यथेति—गुणमात्रोपलम्भे इत्यर्थः। तदेवोपपादयति—त्वगिन्द्रियेणेति। इष्टापत्तिं परिहरति—न चैतदिति। तेनैव द्रव्यसाधनादिति भावः। आत्मादीनिति - नीरूपस्याप्यात्मनः प्रत्यक्षत्वदर्शनात् तेनाप्रत्यक्षत्वसाधनमनुपपन्नमिति भावः। शङ्कते—कथमिति। उत्तरमाह—रूपादीनिति। तद्बाह्येन्द्रियग्राह्यत्वाव्याप्यमपि न भवति रूपे व्यभिचारादित्यर्थः। पुनर्विशे(पुनरपिविशे)षव्याप्तिमभिप्रेत्याशङ्कते—कथं स्पर्शनेति। उत्तरमाह—स्पर्शमेवेति इन्द्रियाणामिति—तथाच स्वग्राह्यगुणाभावे तदिन्द्रियग्राह्यता न स्यात्; न चात्र तदभावः· इति भावः। यदीन्द्रियान्तरग्राह्यगुणाभावादपि (दव्यग्राह्यत्वम्;) इन्द्रियान्तरग्राह्यत्वमपि न स्यात् तदाऽतिप्रसङ्गमाह—यदीति॥ ५१॥

अक्ष०—आकाशनिरूपणानन्तरं निरूपयितव्ये वायौ प्रमाणं दर्शयति—वात इति। त्वगिन्द्रियसन्निकर्षे सति जायमाना "वातिवात" इति धीः—साक्षान्मतिः—साक्षात्काररूपा। इतरसमा—पृथिव्यादिस्पार्शनप्रत्यक्षसमेत्यर्थः। ननु सा स्पर्शलिङ्गकानुमितिरेवेत्यत्राह·–स्पर्शत इति। अनुमितिरित्यत्र बाधकमाह—अन्ध इति। रूपग्रहणशून्य इत्यर्थः। अन्येषु—पृथिव्यादिषु—विषयेषु इत्यर्थः। प्रसंगादिति वातोवातीति मतेरिव रूपानवगाहि पृथिव्यादि स्पार्शनस्यापि अनुमितित्वप्रसङ्गादित्यर्थः। न चैतदिष्टं दर्शनस्पर्शनाभ्यामेव कार्यग्रहणस्य त्वयाऽभ्युपगमात्।

ननु स्पार्शनप्रत्यक्षे रूपग्रहणनियमाऽभावेऽपि रूपवत्वमपेक्षितं रूपवत एव पृथिव्यादेस्तद्दर्शनात् इत्यत्राह—न पुनरिति। नीरूपगोचरं स्पार्शनं न भवतीति न शक्यं वक्तुं स्पर्शमात्रस्याऽपि तदभ्युपगमादितिभावः।

ननु तथाऽपि नीरूपद्रव्यं कथं त्वगिन्द्रियग्राह्यं स्यादित्यत्राह अन्याक्षेति। इन्द्रियाणां स्वग्राह्य विशेषगुणोपधानेन हि द्रव्यग्राहकत्वमिति वैशेषिकाः। नत्विन्द्रियान्तरग्राह्यविशेषगुणोपधानेन; अतो चक्षुर्ग्राह्यविशेषगुणविरहो न त्वचा स्पर्शवद्द्रव्यग्रहणं विरुन्ध्यादिति भावः। इन्द्रियान्तरग्राह्य विशेषगुणाऽभावेऽपि स्वग्राह्यगुणोपधानमात्रेण बाह्येन्द्रियजन्यद्रव्यप्रत्यक्षे संप्रतिपन्नमुदाहरणमाह—निर्गन्ध इति। घ्राणग्राह्यगन्ध रसनाग्राह्यरसरहितोऽपि वह्निः—यथा चाक्षुषस्पार्शनाभ्यां गृह्यते तथा रूपरहितोऽपि वायुः स्पार्शनप्रत्यक्षेण गृह्यत इत्यत्र न किञ्चिद्बाधकमितिभावः॥ ५१॥ वायुनिरूपणम्॥

संख्याद्यास्स्पर्शनास्स्युस्तदधिकरणकास्स्पर्शने गन्धवाहे

तेषां द्रव्योपलम्भप्रतिनियतनिजाध्यक्षयोग्यत्वतश्चेत्।

इ ष्टंत्वं| ष्टस्त्वंशेन चात्मप्रभृतिषु सहते तैः प्रसिद्ध्यन्ति सर्वे

तद्बाह्ये व्याप्तिरिष्टा यदि सततगतेरप्यसावस्तु बाह्ये॥५२॥

सर्वा०—वायुप्रत्यक्षतायां परोक्तमनिष्टं शङ्कते—संख्येति॥ वायौ त्वगिन्द्रियग्राह्ये तन्निष्ठसंख्यापरिमाणादिद्वीन्द्रियग्राह्यवर्गोऽपि तेन सह त्वचा गृह्येत। तेषां संख्यादीनां स्वाधारद्रव्योपलब्धियोग्यतासमानयोग्यताकत्वादित्यर्थः। अत्रांशत इष्टप्रसङ्गतामाह—इष्टमिति। उपलभ्यते ह्येका वह्निशिखा, एका वारिधारेत्यादिवत् एकोऽयं वायुरिति। रन्ध्रभेदनिष्क्रान्तेषु च वायुषु सावधानं स्पृशतो द्वित्वद्विपृथक्त्वादयो भान्ति। यावता च त्वगिन्द्रियभागेन वायुस्संबध्यते, तावदवच्छिन्नं तत्परिमाणं च गृह्यत एव। न हि घटादावपि त्वगिन्द्रियसंबद्धप्रदेशाभ्यधिकवर्ति परिमाणं तेन गृह्यते। स्पृष्टापसृते वायौ संयोगविभागौ स्फुटौ। एकस्मिन् शरीरे अनेकैर्वंशरन्ध्रादिभिरनेकेषु वायुस्रोतस्सु प्रवर्तितेषु तत्तदपेक्षया परत्वापरत्वे अपि सुलभे; कर्म च, वातीति प्रत्ययात्। अन्यथा सरित्प्रवाहे स्यन्दनं च त्वचा न गृह्येत। यस्तु वायोः संमूर्च्छनाद्यवस्थासु संख्यादेरग्रहः स तोयादावपि समः। प्रसङ्गस्य व्याप्तिभङ्गमप्याह—न चेति। आत्मनि तावद्यद्यप्यहमेक इति धीस्स्यात्, तथाऽपि तत्परिमाणं न गृह्यते। अत एव ह्यणुत्वविभुत्वदेहपरिमाणत्वसन्देहः। एवमन्यदपि। तथा बाह्येष्वपि द्रव्योपलम्भेऽपि द्वित्वत्रित्वाद्यग्रहो दृष्टः। उक्तव्यतिरिक्तेष्वयं नियम इति शङ्कते—तद्बाह्य इति। सान्तर्हासमाह—सततगतेरिति। यथादर्शनं व्यवस्था त्वयाऽपि दुस्त्यजेति भावः॥ ५२॥

आनन्द०—आक्षेप(पिकी)संगतिं दर्शयति—**वायुप्रत्यक्षतायामिति**। संख्यापरिमाणादीत्यादिग्रहणेन संयोगविभागपरत्वादिसंग्रहः। **स्वाधारेति**—संख्यादेः स्वाधारभूतद्रव्यप्रत्यक्षत्वयोग्यताव्यापकप्रत्यक्षत्वयोग्यताकत्वादित्यर्थः। वायुगतसंख्यादिमात्रपक्षीकारे अंशत इष्टापत्तिरित्याभासत्वं तर्कस्येत्याह **अत्रांशत इति**। ननु सर्वप्रदेशावच्छेदेनापि परिमाणं गृह्यते सन्निकृष्टत्वादित्यत्राह—**न हीति**। अन्धकारस्थह्रस्वा(ह्रस्वदीर्घा)दिस्तम्भैकदेशस्पर्शे अयमस्मादधिकपरिमाणवान्न वेति संशयदर्शनादिति भावः। **अन्यथेति**—अविशेषादिति भावः। **समूर्छनं**—विरुद्धगनिमतो(राभिमुख्येन सम्बन्धः)स्समूहीभावः। आदिशब्देन निरन्तरस्रोतोभाव उच्यते। तोयादिवत् सजातीयसम्मेलनस्य प्रतिबन्धकत्वात् राशिवन्याद्यवयव(न्यागत)व्रीहिवृक्षादिगतसंख्यादिप्रत्यक्षव(स्याद्यप्रत्यक्षत्वा)दित्यर्थः। अनिष्टप्रसङ्गरूपाङ्गहानिमुक्त्वा अङ्गान्तरहानिमप्याह—**प्रसङ्गस्येति**। नन्वह(न्त्वात्मन्यह)मेक इति संख्याया ग्रहणात्तत्र व्यभिचाराभावात् कथं व्याप्तिभङ्ग इत्यत्राह—**आत्मनीति**। तथा च संख्याव्यतिरिक्तेषु प्रत्यक्षत्वापादने आत्मगतपरिमाणा(दौ)दिषु व्याप्तिभङ्ग इत्यर्थः। मूलोक्तप्रभृतिशब्दार्थं विवृण्वन् संख्यायामपि व्याप्तिभङ्गं दर्शयति—**तथा बाह्ये (ब्वपो)ष्विति**। राशिसेनावनस्पतिवन्याद्यवयवगतद्वित्वादावित्यर्थः॥ ५२॥

अक्ष०—वायोः प्रत्यक्षत्वे परोक्तमनिष्टं शङ्कते - **संख्येति**। **गन्धवाहे**—वायौ। **स्पर्शने**—स्पार्शनप्रत्यक्षविषये सति। **तदधिकरणकाः**—वायुवृत्तयः। **संख्याद्याः**—संख्यापरिमाणादयः। **स्पर्शनास्स्युः**—स्पार्शनप्रत्यक्षविषयास्स्युरितिप्रसज्यत इत्यर्थः। कुत इत्यत्राह—**तेषामिति**—संख्यापरिमाणादीनामाश्रयद्रव्यप्रत्यक्षे स्वप्रत्यक्षस्य नियतत्वादित्यर्थः। अतः अयोग्यत्वात् तत्प्रत्यक्षं न भवतीति परिहारो न घटत इनि भावः। अत्र अंशतो इष्टप्रसङ्गतामाह—**इष्टमिति**। क्वचिदुपलभ्यते एकोऽयं वायुरिति। वंशादिषु रन्ध्रभेदेन निष्क्रान्तेषु च वायुषु सावधानं स्पृशतां द्वित्व (द्वि) पृथक्त्वादयोऽपि भान्ति। शरीरावयवे क्वचिदेव संसर्गदशायां तावत्परिमाणपि गृह्यत एव। एवं संयोगादिरपीति भावः।

अथ परोक्तप्रसङ्गस्य व्याप्तिभङ्गमाह—**नचेति**। अहमित्यात्मोपलम्भेऽपि तत्परिमाणं न गृह्यते—अत एवाणुत्व विभुत्वादि विवादादयः। एवं आत्मगत संयोगादयोऽपीति भावः। प्रभृतीत्यनेन बाह्यद्रव्यस्यापि परिग्रहः। घटादिसमुदायग्रहेऽपि द्वित्व- त्रित्व दशत्वादिसंख्याया अग्रहाद्व्यभिचार इति भावः। उक्तव्यतिरिक्तविषयेष्वयं नियम इति शङ्कते—**तद्बाह्य इति**। तर्हि वायुव्यतिरिक्त एव सा व्याप्तिरस्त्विति परिहरति—**सततगतेरपीति**॥ ५२॥

वायुप्रत्यक्षत्वम्।

न प्राणो वायुमात्रं सह परिपठनान्न क्रिया द्रव्यतोक्ते-
स्तेजोवद्वा न तत्त्वान्तरमगणनतो वायुतानुज्झनाच्च ।
तस्माद्वातो विशेषं घनजलकरकान्यायतः प्राप्य कंचि-
द्देहान्तर्दाशविध्यं भजति बहुविधोपक्रियो वृत्तिभेदैः ॥५३॥

सर्वा०—अथ राजसमहान् प्राण इति वदतः प्रतिवक्तुं प्राणस्य वायुविशेषतां विवक्षुस्तत्र विशेषापह्नवं प्रतिषेधति—न प्राण इति ॥ वायुत्वप्रसिद्ध्याऽसौ वायुमात्रमिति चेन्न, सर्वत्र सामान्यप्रसिद्ध्या विशेषत्यागप्रसङ्गात् । अयोग्ये च नानुपलम्भबाधः । श्रुतिप्राप्तं हेतुमाह—सहेति । *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च, खं वायुर्ज्योतिराप इति सृष्टिवाक्ये वायुप्राणयोस्सहपाठात् । न चात्र प्राणशब्दोऽन्यार्थः; अबाधे प्रसिद्धत्यागायोगात् । न च वायुसामान्ये प्राणशब्दप्रसिद्धिः । जगत्प्राण इति समाख्या तु न तदंशस्य शक्तिं गमयेत् । देहावच्छेदमात्रेण विशेषात्पृथगुक्तिरिति चेन्न; तत्सृष्ट्युक्तेः प्रयोजनमान्द्यात् । अस्तु तर्हि वायोः क्रियाविशेषः प्राणः स्तिमितवायौ प्राणशब्दप्रयोगाभावात्, उच्छ्वासादौ प्रयोगाच्चेत्यत्राह—न क्रियेति । हेतुमाह—द्रव्यतोक्तेरिति । वायुर्द्रव्यमिति तावत्सिद्धम् । प्राणे च तदुक्तिस्सार्वत्रिकी; प्राणस्स्पन्दत इति च पृथग्व्यपदिशन्ति । उक्तश्च सहपाठो न तत्क्रियायाः, अग्रचप्रायनयविरोधात् । नच मनःप्रभृतीनां क्रिया तैस्सहात्र पठ्यत इति भावः । यद्यसौ वायुविकारविशेषः वह्निरिव तत्त्वान्तरं स्यादित्यत्राह—तेजोवदिति । यदि तत्त्वपङ्क्तौ निविष्टः प्राणो भूतान्तरवत् पृथक्संख्यायेत; न ह्येवमसावित्याह—अगणनत इति । तत्त्वपरिगणनं च पूर्वपूर्वनियतस्वभावपरित्यागेन विकारान्तरसृष्टौ; न तु विकारमात्रे *पृथिव्या ओषधयः इत्यादिषु तत्प्रसङ्गात्; प्राणे च वायुत्वं न निवृत्तम् । अतश्च न तत्त्वान्तरमित्याह—वायुतानुज्झनाच्चेति । तथाऽपि देहोपादनत्वावस्थापन्नो वायुः प्राणस्स्यात् किमधिककल्पनयेत्यत्राह—तस्मादिति अयं भावः—*यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः, *अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचामीत्यादिषु देहात्पृथक्त्वेन प्राणवायुः प्रसिद्धः । अतो न देहोपादानवायुरसौ । किंतु योगाद्युपयुक्तशास्त्रवेद्यविशेषवान् कश्चिद्वायुरयमिति वायुत्वानुवृत्तिव्यक्त्यै जलमयकरकानिदर्शनम् । दाशविध्यं—प्राणापानादिभेदैर्नागकूर्मादिभेदैश्च दशविधत्वम् । तत्तद्वृत्तिभिरुपकारप्रपञ्चस्तत्तदागमेषु ग्राह्यः । अयं चार्थः *न वायुक्रिये पृथगुपदेशादित्यधिकरणसिद्धः । *आपोमयः प्राण इति तु, *अन्नमयं हि सौम्य मनः, *तेजोमयी वागितिवदाप्यायनपरम्; अन्यथाऽनेकशास्त्रविरोधात् ॥ ५३ ॥

आनन्द०—राजसमहान् प्राणो देहं धत्ते वाय्वधिष्ठातेति साङ्ख्यपक्षं वायुमात्रं तत्क्रिया वा प्राण इति योगपक्षं आकाशादिति पञ्चकं रजःप्रकृतिकं (शादिः-

रजःप्रकृतिकः) प्राण इति माय्येक(यिमतैक)देशिपक्षं च प्रसङ्गसङ्गत्या निराकरोतीत्याह—अथेति । विशेषो—वायुत्वावान्तरजातिः । अयं प्राणो वायुमात्रं वायुत्व प्रसिद्धिमत्त्वात्; यद्यत्प्रसिद्धिमत् तत्तन्मात्रं यथा समुद्रजलम् । जल(मात्र)प्रसिद्धिमज्जलमात्रमित्यनुमानमभिप्रेत्य व्या(व्यभिचारमाह—)चष्टे—सर्वत्रेति । तेजस्त्वेन प्रसिद्धवह्न्यादेर्विशेषता न स्यादिति भावः । विशेषत्वस्य प्राणादावनुपलम्भबाध इत्यत्राह –अयोग्ये चेति । ननु बाधकाभावमात्रान्नानुपलम्भ(लब्धि) त्रिशेषसिद्धिरित्यत्राह—श्रुतीति । सहपाठो हि नानार्थानां सामान्यविशेषार्थानां वा दृष्टो न पर्यायाणां; अतो न वायुशब्दपर्यायिना प्राणशब्दस्येति । प्राणो वायुत्वातिरिक्तवायुत्व (तत्व) व्याप्यप्रवृत्तिनिमित्तकशब्दबोध्यः तत्सहपठितवायुत्वा(न)तिरिक्त(वायु)वृत्तिप्रवृत्तिनिमित्तकशब्दबोध्यत्वात् । प्राणशब्दो वायुत्वातिरिक्त(धर्म)प्रवृत्तिनिमित्तकः तत्सहप्रयोगविषयत्वात् फूत्कारमन आ(फूत्कार उदका)दि(शब्द)वदिति विशेषसिद्धेरित्यर्थः ।

ननु (साङ्ख्योक्तरीत्या) वाय्वन्यत्वमेवास्तु ! तत्राह—न चेति । प्राणो वायुरिति प्रसिद्धेर्घटो द्रव्यमिति प्रसिद्धिवद्बाधकाभावात् प्रत्यक्षतो वायुत्वस्योपलम्भाच्चेति भावः। ननु वायुप्राणशब्दौ पर्यायावेव; अत एव 'जगत्प्राणसमीरणाः' इति नामानुशासनं; सहपाठश्च कथञ्चिन्नेय इत्यत्राह—न च वायुसामान्य इति । बाह्यवायौ प्राणशब्दप्रयोगाभावात् नामानुशासनस्याश्वकर्णादिवत् विशिष्टशक्तिग्राहकस्यावयवशक्तिग्राहकत्वाभावान्न पर्यायत्वमिति भावः । ननु प्राणशब्दस्य देहावच्छिन्नत्वाकारेण लक्षणया प्रयोगोऽस्तु; तथा च न भेदसिद्धिरिति शङ्कते—देहावच्छेदेति । तत्सृष्टेरिति—तत्सृष्टयुक्तेरित्यर्थः। वायुसामान्यसृष्टयैव तत्सृष्टेरुक्तत्वादिति भावः ।

न च सिद्धान्तेऽपि प्रयोजनमान्द्यम्; प्राणत्वस्य विशेषतया तदवच्छेदेनोत्पत्तेर्ज्ञाप्यत्वात् । न चैवं शरीरावच्छिन्नत्वेनात्रापि ज्ञाप्यभेदः शरीरावच्छिन्नवायुत्वस्य वायुत्वशरीराद्यतिरिक्तत्वाभावेन तदतिरिक्तज्ञाप्याभावात् । ननु क्रियैव प्राणः; तथा च पृथगुक्तिर्यु(क्तैव)ज्यत एव । न च प्राणो वायुरिति प्राणे वायुशब्दप्रयोगानुपपत्तिः; उपचारादुपपत्तेरिति शङ्कते –अस्तु तर्हीति । द्रव्यतोक्तिः —द्रव्यवाचकवायुशब्देनोक्तिरित्यर्थः । क्रियात्वे अनन्यथासिद्धहेत्वभावेन वायुव्यपदेशस्य औपचारिकत्वाभावादिति भावः । द्रव्यत्वे सौत्रमाह-प्राणस्स्पन्दत इति । सौत्रोपदेशशब्दस्वारस्याद्विवक्षितहेतुमाह —उक्तश्चेति । यद्यसाविति—वायुविकारत्वाविशेषादिति भावः । ननु तर्ह्यस्य वायुविकारत्वे 'चतुर्विंशा प्रकृतिः पञ्चविंश आत्मा' इत्यादिपरिगणनमयुक्तं अधिकस्य सत्वादित्यत्राह—तत्वपरिगणनं चेति । हेतुमाह—पृथिव्या ओषधय इति । यावद्विकाराणां परिगणनासम्भवात् परिगणननिमित्तं किञ्चित्प्रयोजकं वाच्यम्; तच्च पूर्वतत्वपरिगणननिमित्तासाधारणधर्मनिवृत्तिपूर्वकरूपान्तरं परिगणननिमित्तमाश्रयणीयमिति प्राणे

स्वोपादान (गत) वायुत्वापरित्यागान्न तत्वान्तरतेत्यर्थः । तथापीति तावता प्राणे वायुत्वप्रतीतिसहप्रयोगयोरुपपत्तेरि(त्यर्थः) ति भावः ।

तस्मादित्यादिना देहोपादानावस्थाविशिष्टाद्भेदाप्रतिपत्तेराह—अयं भाव इति । किन्त्विति—कुण्डल्यादियोगाद्युपयुक्तशास्त्रवेद्यवायुतिरोधिसाधन (वेद्यवायु-निरोधस्थान) विशेषवानित्यर्थः । घनस्य—मेघस्य जलं घनजलं । दाशविध्यं—दशविधत्वम् । गुणवचनत्वात् ष्यञ् । प्राणादीति—अपानोदानव्यानसमाना आदिशब्दार्थः प्राणः—प्रागननवान् हृदयवर्ती । आसनादिस्थानवर्ती अपानः अवा-गननशीलः । पायुस्थानो व्यानः विषवत्संचारी सर्वशरीरव्यापकः । उदानः कण्ठस्थानः । उत्क्रमणवायुस्समानः शरीरमध्यग(रावयवनाभिस्थानः) शीतपित्ता-दिसमीकरणपरः । नागकूर्मादिभेदैश्चेति —'कृकलदेवदत्तधनञ्जया आदिशब्दार्थः । नागः—उद्गिरणकरः । कूर्मः उन्मीलनहेतुः । कृकलः क्षुधासाधनः । देवदत्तो जृम्भणहेतुः । धनञ्जयः पोषणकरः' इति योगरहस्ये शास्त्रे उपयोग उक्त इत्यर्थः । सूत्रकार एवामुमर्थं निर्णीतवानित्याह—अयं चार्थ इति । नन्वविशेषः प्राणस्स्यात्; तथा श्रुतेरित्यत्राह—अ.पोमय इति । प्रत्यक्षविरोधाभावे तदुपादान-कत्वविवक्षायामाह– —अन्यथेति ॥ ५३ ॥

अक्ष०—अथ प्राणो वायुसामान्यमुततदन्यः । तद्विशेषो वेति चिन्तायां तत्स्वरूपं निर्वक्ति – न प्राण इति । वायुमात्रं वायुसामान्यमित्यर्थः । कुत इत्यत्राह-सहेति । वायुपर्यायत्वे "एतस्माज्जायते प्राणः" इति सृष्टिवाक्ये "खं वायु"रिति सह परिपठनं पौनरुक्त्यप्रसङ्गान्नघटेतेतिभाव; । तर्हि वायोः क्रियैव प्राणस्स्यादि-त्यत्राह—न क्रियेति । हेतुमाह द्रव्यतोक्तेरिति । प्राणवायुरिति वायुद्रव्यसामा-नाधिकरण्यात् द्रव्यत्वं प्राणस्याप्युक्तमेवेति भावः । अस्तु तर्हि तेजोवत्तत्वान्तर-मित्यत्राह—न तत्वान्तरमिति । कुत इत्यत्राह—अगणनत इति । वायोरग्निरिति तेजोवत् गणनाभावादित्यर्थः । कुतो न गण्यत इत्यत्राह—वायुतानुज्ज्ञनाच्चेति । न विकारमात्रं तत्वान्तरं परिगण्यते किन्तु पूर्वं पूर्वनियत स्वभावपरित्यागेन विका-रान्तरसृष्टावेव अतो वायुत्वपरित्यागाभावात्प्राणो न तत्वान्तरतया परिगण्यत इतिभावः । तर्हि कोऽसौ "यः प्राणः" इति व्यपदिश्यत इत्यत्राह - तस्मादिति । वायुमात्रस्य तदन्यस्य क्रियादेर्वा असंभवादित्यर्थः । वातः—वायुरेव भोगाद्युपयुक्तं-शास्त्रवेद्यं कश्चिद्विशेषमापन्नः प्राणः । प्राणापानादिवृत्तिभेदैः बहुविधोपकारकृत् । शरीरान्तः दाशविध्यं भजतीति भावः । अत्र दाशविध्यं प्राणापानादिभेदैः । नाग-कूर्मकृकलदेवदत्त धनञ्जयादिभेदैश्च ध्येयम् । प्राणे वायुत्वानुवृत्तिव्यक्त्यर्थं जल पयः करकानिदर्शनम् ॥ ५३ ॥

प्राणस्य वायुविशेषत्वम् ।

प्राणोऽक्षं प्राणशब्दादुपकरणतया क्षेत्रिणश्चेत्ययुक्तं
शब्दैक्यं ह्यौकजात्यं व्यभिचरति न च प्राणताऽक्षेषु मुख्या ।
देहस्यानक्षभावेऽप्युपकृतिरधिका तत्समाक्षोक्त्यवृष्टे-
र्न प्राणो सात्त्विकाहंकरणविकृतितालक्षणं तद्धि तेषाम् ।। ५४ ।।

सर्वा०—अत्र कश्चिदाह प्राणसंवादादिष्विन्द्रियैस्सह प्राणः पठितः, प्राणशब्दश्च साधारणः प्रयुक्तः; क्षेत्रज्ञोपकरणत्वं च समानम्; अतः प्राण इन्द्रियमिति । एतदनूद्य परिहरति—**प्राण इति** ।। सहपाठमात्रं न तज्जातीयत्वसाधकमित्यभिप्रायः । प्राणशब्दवाच्यत्वं नेन्द्रियत्वसाधकमित्याह—**शब्दैक्यमिति** । अन्यथा अनेकार्थशब्दलोपप्रसङ्ग इति भावः । अत्र च प्राणशब्दः क्वचिन्मुख्यः क्वचिद्भाक्तः । एवमप्येकशब्दप्रयोगमात्रात्साजात्ये वैजात्यमेव जगति लुप्येतेत्यभिप्रायेणाह—**न चेति** । क्षेत्रज्ञोपकरणत्वस्य व्यभिचारमाह—**देहस्येति** । क्षेत्रज्ञोपकारकत्वं देहे [भूयसा] संदृश्यते; न तत्रेन्द्रियत्वमिष्यते । इन्द्रियशब्दप्रयोगाभावात्तत्रानिन्द्रियत्वमित्यत्राह—**तत्समेति** । इन्द्रियत्वोक्तेरदर्शनं देहे प्राणेऽपि समम् । अतः प्राणोऽपि नेन्द्रियमित्यर्थः । इन्द्रियलक्षणनिवृत्त्या च प्राणे तच्छब्दवाच्यत्वनिवृत्तिरित्यभिप्रायेणाह—**न प्राण इति** । सात्त्विकाहङ्कारोपादानकत्वमेवेन्द्रियलक्षणम्, परोक्तलक्षणानुपपत्तेरित्यभिप्रायेणाह—**लक्षणमिति** । यत्तु शरीरयोगे सत्येव साक्षात्प्रमितिसाधनमिन्द्रियमिति, अत्र कर्मेन्द्रियेष्वव्याप्तिस्तावदास्ताम्; स्वेदादिशैत्याभिव्यञ्जकव्यजनवातादेरुक्तलक्षणयोगादतिव्याप्तिर्दुर्वारा । शरीरसंयुक्तमतीन्द्रियमिति विशेषणेऽपि चाक्षुषतेजःकणानां चूर्णविक्षेपवद्विसर्पे मूलस्कन्धस्य प्रमितिसाधनत्वाभावात्, अग्रस्कन्धस्य शरीरसंयुक्तत्वायोगात्, नोभयत्राप्येतद्विशिष्टमिन्द्रियलक्षणमस्ति । परंपरया संबन्धस्त्वतिप्रसञ्जकः आद्रष्टुराचन्द्रमसश्च कश्चिच्चक्षुरिन्द्रियावयवी तदानीमेव निष्पन्न इत्यत्र न किंचित्प्रमाणमन्यत्र संप्रदायात् । इन्द्रियदोषवदिन्द्रियगुणाश्च शरीरसंयुक्तास्साक्षात्प्रमितिसाधकास्सन्ति; तैश्चानैकान्त्यं सुवचम् । शुद्धेष्वपि परोक्तलक्षणेषु न प्रस्तुते तत्सिद्धिरिति ।। ५४ ।।

आनन्द०—प्रसङ्गसंगत्याऽऽह —**अत्र कश्चिदिति** । प्राणसंवादो नाम छान्दोग्ये प्रकरणविशेषः; तत्प्रायपाठात्तज्जातीयत्वमित्यर्थः । **प्राणशब्दश्च साधारण इति**--इन्द्रियाणां प्राणस्य च प्राणशब्दवाच्यत्वे इन्द्रियत्वमेव प्रवृत्तिनिमित्तं लाघवात् । तथाच समानवृत्तिनिमित्तकैकशब्दवाच्यत्वात्तज्जातीयत्वमित्यर्थः । किंच—प्राणादय इन्द्रियाणि चेतनोपकरणत्वात् चक्षुरादिवत् इत्यभिप्रायेणाह—**चेतनोपकरणत्वं चेति** । **सहपाठमात्रमिति**—सहपाठमात्रस्य प्रत्युत भेदकत्वमेव; अन्यथा वैयर्थ्यादितिभावः । अग्रचप्रायनयश्च सहपाठप्रयोजकधर्मातिरिक्तधर्मेण

साजात्यप्रयोजको न तु तद्धर्मेणापीति भावः। एकशब्दप्रयोगविषयत्वमपि मुख्यवृत्त्या प्रयोगविषयत्वं विवक्षितम् ? उतैकशक्त्या ? उत प्रयोगविषयत्वमात्रम् ? इति विकल्प्य आद्ये दूषणमाह—अन्यथेति। अक्षादिपदप्रयोगविषयेषु व्यभिचारः इत्यर्थः। द्वितीये आह—अत्र च प्राणशब्द इति। तथा(चा) सिद्धिरिति भावः। तृतीयं दूषयति—एवमपीति।

अत्र च साजात्यं शब्दप्रवृत्तिनिमित्तमादाय वाच्यम्; अन्यथा प्रमेयत्वादिना सर्वेषां साजात्यात्सिद्धसाधनात्; तथाच सर्वशब्दानां सर्वत्र यया कयाच(न)वृत्त्या प्रयोगसंभवात् तत्तत्प्रवृत्तिनिमित्तधर्ममादाय सर्वस्यापि सर्वशब्दप्रवृत्तिनिमित्तधर्मवत्त्वे वैजात्यमुच्छिद्येत। उच्छिद्येत च पदानां वृत्यन्तर(लक्षणादिक)मित्यर्थः। प्राणस्येन्द्रियत्वे किं क्षेत्रज्ञोपकारकत्वं हेतुः ? उतेन्द्रियशब्दप्रयोगसहितमिति विकल्पं मनसि कृत्वा आद्यं दूषयति–क्षेत्रज्ञोपकारकत्वमिति। द्वितीयं दूषयति–इन्द्रियत्वोक्तेरिति। इन्द्रियत्वस्योक्तिः—इन्द्रियत्वप्रतिपादकवाक्—इन्द्रियशब्द इति यावत्। तस्य प्रयोगादर्शनं तुल्यमित्यर्थः। तथा च स्वरूपासिद्धिः; लक्षणया तद्‌द्वारे देहेऽपि सम इति भावः। ननु प्रमितिसाधनत्वमिन्द्रियत्वम्; तच्च प्राणेऽप्यस्त्येव, प्राणस्याप्यन्वयव्यतिरेकाभ्यां मनोवत्साधनत्वादित्याह—परोक्तेति। नोभयत्रापीति—मूलाग्रस्कन्धयोः शरीरसंयुक्तस्य विषयसंयुक्तस्य चैकस्याभावादित्यर्थः। यत्प्रमितिकरणं विषयसंयुक्तोऽग्रभागः तत्(त्वं) परम्परया शरीरसंयुक्तमित्यत्राह—परम्परयेति। स्व(स्पर्श) प्रत्यक्षहेतुसंबन्धघटकवाय्वादौ त्र्यणुकपरिमाणप्रत्यक्षहेत्ववयवसंयोगव्द्यणुकादौ अतिव्याप्तमित्यर्थः।

ननु साक्षाच्छरीरयोग एव विवक्षितः; स च मूलस्कन्धस्यास्त्येव। नच तस्य प्रमितिसाधनत्वाभावः! अग्रद्वारा साधनत्वादिति चेत्; उच्यते—अग्रभागस्य प्रमितिजनकत्वस्यावश्यकत्वे तज्जनकस्यान्यथासिद्धत्वान्न तस्य साधकत्वं मानाभावाच्च न तद्‌द्वारत्वमिति भावः। ननु आद्रष्टुराविषयादेकोऽवयवी जन्यते; तच्छ(च्च श)रीरसंयुक्तं प्रमितिसाधनं चेत्यत्राह—आद्रष्टुरिति।

ननु भवन्मते यथा तावव्द्यापिवृत्त्युत्पत्तिः; यथा वा सौरा(द्या)लोकः; तथाऽवयव्यप्यस्त्विति चेत्; उच्यते—किमवयवि प्रमित्यन्यथानुपपत्त्या कल्प्यते ? उत तेषु(उतेन्द्रिय)लक्षणनिर्वाहार्थम् ? नाद्यः; आवश्यकतावद्दूरव्यापितेजोमात्रेणापि ज्ञानसंभवे तत्क्लृ(तत्रक्लृ)प्त्यनपेक्षणात्। न द्वितीयः, लक्ष्यानुसारित्वाल्लक्षणस्य तत्कल्पकत्वायोगात्। अनैकान्त्यं—अतिव्याप्तिरित्यर्थः। यद्वा उक्तमिन्द्रियलक्षणं न भवति; व्यावृत्तिव्यवहारयोस्साधनेऽनैकान्त्यमित्यर्थः। गुणानां संयोगाभावादतिव्याप्तिर्नास्तीत्यतो दोषान्तरमाह—प्रस्तुते इति। प्राणादेः प्रत्यक्षत्वात् तदुक्तलक्षणं नास्तीति न ततस्तेषामिन्द्रियत्वसिद्धिरित्यर्थः॥ ५४॥

अक्ष०—अत्र वायुविशेषः प्राणः किमिन्द्रियेष्वन्यतमः ? उत भिन्नः ? इति चिन्तायां इन्द्रियेष्वन्यतम इति कस्यचिच्छुकामनूद्य निरस्यति—**प्राणोऽक्षमिति**। प्राणः इन्द्रियमेवेत्यर्थः। कुत इत्यत्राह—**प्राणशब्दादिति**। प्राणसंवादादिषु इन्द्रियैस्सह—प्राणशब्देन निर्दिश्यमानत्वात् एकशब्देन एकजातीयत्वं गमयतीति भावः।

हेत्वन्तरमाह—**उपकरणतयेति**—चक्षुरादिजीवोपकरणत्वादित्यर्थः। परिहरति—**अयुक्तमिति**। हेतुमाह—**शब्दैक्यमिति**। ब्रह्मशब्दस्य चिदचिदीश्वरेषु प्रयोगदर्शनात् मुख्यवृत्तिविवक्षायामपि ऐकजात्यं विनाऽपि नानार्थके एकशब्दनिर्देश्यत्वसत्वात्प्रथमो हेतुरनैकान्तिक इति भावः। अथ असिद्धिमाह **नचेति**। इन्द्रियेषु प्राणशब्दः उपचारात्प्रयुज्यते न मुख्यतया अतो मुख्यवृत्या इन्द्रियसाधारणशब्दनिर्देश्यत्वरूपो हेतुः पक्षे नास्तीति स्वरूपासिद्धिरिति भावः।

अथ द्वितीयहेतोः क्षेत्रज्ञोपकरणत्वस्य व्यभिचारमाह—**देहस्येति**। **अनक्षभावेऽपि**—इन्द्रियत्वाभावेऽपि। **उपकृतिः**—उपकारः। **अधिका**। इन्द्रियापेक्षया अधिकोपकारकत्वमस्तीति उक्त हेतुसत्वाद्व्यभिचार इति भावः।

इन्द्रियशब्द प्रयोगादर्शनाद्देहे अनिन्द्रियत्वमित्यत्राह—**तत्समेति**। **अक्षोक्त्यदृष्टिः**—इन्द्रियोक्त्यदर्शनं देहप्राणयोस्समानमित्यर्थः। अतः प्राणोऽपि नेन्द्रियमिति भावः। इन्द्रियलक्षणाभावाच्च प्राणस्य नेन्द्रियत्वमित्याह—**न प्राण इति**। सात्विकाहङ्कार विकारत्वमेवेन्द्रियाणां लक्षणं नतु परोक्तं अव्याप्त्यतिव्याप्तिदर्शनात्। उक्तलक्षणस्य च परम्परया तामसाहङ्कारविकारे वायुविशेषे प्राणे अभावाच्च नेन्द्रियत्वमिति भावः॥ ५४॥

प्राणस्यानिन्द्रियत्वम्

प्राणापानाख्यभस्त्रारभसविसृमरः प्राप्य वैश्वानराख्यां
मध्येदेहं हुताशो वसति जलनिधावौर्ववत्सर्वभक्षः।
तत्तद्विद्यासु वे[द्यस्त्वन]द्यं त्वन इव हि परज्योतिषः सोऽपि रूपं
नात्मानौ तौ जडत्वाज्जनिविलयमुखैर्भेदकण्ठोक्तिभिश्च॥ ५५॥

सर्वा०—वायोरनन्तरं वह्निनिरूपणे प्राप्ते प्राणसङ्गत्या वैश्वानरं तावच्छिक्षयति—**प्राणेति** *तस्य मध्ये महानग्निरित्यादिकमिहानुसन्धेयम्। वारिनिर्वाप्यत्वनिवृत्त्यै वाडवनिदर्शनम्। प्राणवैश्वानरविचारस्य प्रधानशास्त्रार्थोपयोगमभिप्रेत्याह—**तत्तदिति**। अनः—प्राणः। *अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यारभ्य *इदं वाव तत् यदिदमस्मिन्नन्तः पुरुषे ज्योतिरित्याद्यामनन्ति छन्दोगाः। प्रसङ्गान्नास्तिकयोगिजननिरासाय द्वितीयसरवक्तव्यमुपक्षिपति—**नात्मानाविति**। अजडो नित्यो भूतभौतिकविलक्षणश्चात्मा स्थापयिष्यते॥ ५५॥

आनन्द०—वैश्वानरनिरूपणे संगतिमाह— **वायोरनन्तरमिति** । प्राणविद्यायां प्राणस्येव वैश्वानरविद्यायां वैश्वानरस्य वेद्यत्वादिति भावः । प्रमाणं दर्शयति—**तस्य मध्ये इति** । हृदयमध्ये इत्यर्थः । काकदन्तपरीक्षावैषम्यं दर्शयति—**प्राणवैश्वानरेति** । तदेव शास्त्रमुदाहरति - **अथ यदत इति** । वैश्वानरविद्यायामामनन्तीत्यर्थः । नन्वात्मनः प्राणवैश्वानराभ्यां भेदसाधनमप्रस्तुतमित्याशङ्क्याह—**प्रसङ्गादिति** । मूलस्य प्राणापानाख्यो यो भस्त्रायाः-चर्मविकारस्य देहस्य रभसो—वेगयुक्तो वायुः तेन विसृमरो—व्यापनशीलस्सन् समुद्रमध्ये और्व इव देहमध्ये वैश्वानरनाम प्राप्य वसति; स च प्राणविद्यासु प्राण इव वैश्वानरविद्यायां परज्योतिषः परमात्मनः वेद्यं रूपं—शरीरम् । तौ प्राणवैश्वानरौ जडत्वात् जनिप्रध्वंसादिमत्वाच्च नात्मानौ-जीवपरौ न भवतः ।। ५५ ।।

अक्ष०—वायु तद्विशेषनिरूपणान्तरं तेजोन्तर्भूतः प्राणसहचारी वैश्वानरः प्राणसङ्गत्या निरूप्यते—**प्राणेति** ।

अयमर्थः । प्राणापानाख्यो यो भस्त्रायाः सरन्ध्रचर्मवेष्टितस्य देहस्यान्तर्वर्ती रभसः वेगवान्वायुः तेन विसृमरः--प्रसारितः वैश्वानराख्यां प्राप्य देहमध्ये हुताशनः जलधिमध्ये वडवाग्निरिव जलांशानिर्वाप्यः **सर्वभक्षः वसति**—देहिभुक्तान्नादि जीर्णताकरोऽस्तीत्यर्थः ।

अयमेव वैश्वानरः कतिपयविद्यासु प्रतर्दनादिषु **प्राण इव । परमात्मनो रूपतया**—शरीरतया । शास्त्रवेद्यआम्नायते "इदं वावतत् यदिदमन्तः पुरुषे ज्योति" रित्यादिषु । उक्तौ प्राणवैश्वानरौ जडत्वात् उत्पत्तिविनाशश्रवणात् भेदकण्ठोक्तिभिश्च नात्मानाविति । न जीवात्मानावित्यर्थः विशेष्यद्वित्वात् द्विवचनम् प्राणो न जीवात्मा; वैश्वानरश्च--न जीवात्मेति यावत् । अजडो नित्यो भूतभौतिकविलक्षणश्च जीवात्मा द्वितीयसरे स्थापयिष्यते ।। ५५ ।।

तेजोनिरूपणम्

धर्मो भाति प्रभैका बहलविरलताद्यत्र दृष्टानुसारात्
सा दीपांशा विशीर्णा इति यदि बहुधा कल्पनागौरवादिः ।
रत्नादीनां स्थिराणां विशरणविहृतेर्निष्प्रभत्वादि च स्यात्
तेजस्तत्सप्रभाकं तिमिरहरतया साऽपि तेजोविशेषः ।। ५६ ।।

सर्वा०—अथात्र धर्मधर्मिणोः सजातीयत्वे निदर्शनार्थं लोकबुद्ध्यनुगुणं भाष्यस्थं प्रभानिरूपणं प्रदर्शयति—**धर्म इति** ।। प्रदीपादिधर्मभूता तद्वत्स्वयमप्येका विष्वक्प्रसृता सूक्ष्मांशुकन्यायेन सुघटितसङ्घातलक्षणा प्रभा सर्वेषां भाति । तत्र मूलाग्रयोर्बहलत्वविरलत्वोष्णत्वानुष्णत्वाद्युपलम्भस्तत्तद्वस्त्वन्तरेष्विव नैक्यबाधक इत्याभिप्रायेणाह—**बहलेति** । अन्यथा स्थूलमूलत्वादिना दीपादिष्वपि नैक्यं

सिध्येदिति भावः। अवयवविशरणवादमनूद्य प्रतिवक्ति—सेति। विशरणक्रिया, तत्स्वभावानां वेगवतां तेजोवयवानामनुपशान्तवेगानामेव संभूय किञ्चिदुद्गमनेन दीपाद्यवयव्यारम्भणम्, घनीभूतानामनन्तरक्षणे विशरणम्, ऊर्ध्वगमनशीलानां च तेषां तत्तदंशतश्च तिर्यगूर्ध्वमधश्च प्रसरणम्, तादृशप्रसरणहेतुवैचित्र्यं बहल-विरलत्वादिसिद्ध्यै केषांचिद्वेगातिशयः इत्याद्यनुपलब्धविविधार्थकल्पनागौरवं प्रसज्यते। आदिशब्देन सर्वलोकोपलम्भशास्त्रविरोधसंग्रहः। बाधकान्तरमाह—रत्नादीनामिति। प्रत्यभिज्ञाविषयप्रधानोदाहरणतया प्रसिद्धेषु स्थिरतरेषु रत्नादिषु प्रतिक्षणविनाशोऽवयवविशरणं च न कल्पयितुं शक्यम्। अतस्तेषु त्वदुक्तप्रकारेण प्रभोत्पत्तिकल्पनायोगान्निष्प्रभत्वप्रसङ्ग इत्यर्थः। परिशेषतः स्वाभिमतमाह—तेज इति। उक्तानुपपत्त्या दीपादितेजः प्रभाविशिष्टमेवोत्पद्यते इत्यर्थः।

ननु प्रभाद्रव्यं न तत्त्वपङ्क्तौ गण्यते, तद्बहिर्भावश्चापसिद्धान्तः। अन्तर्भावश्च न वायुपर्यन्तेषु, रूपवत्त्वात्। न तोयपृथिव्योः, रसगन्धादिरहितत्वात्। न तेजसि, तद्धर्मतयाऽभ्युपगमात्। अतो विशीर्णतेजोतिरिक्ता प्रभा नास्तीत्यत्राह—तिमिरहरतयेति। तिमिरहरत्वं तेजस्त्वमात्रे हेतुः। विशेषशब्दस्तु प्रतीतिसिद्धावान्तरवैषम्यव्यक्त्यर्थः। तिमिरहरत्वं चात्र भास्वररूपविशिष्टतया, न तेजस्त्वमात्रेण। अतो न साध्याविशेषशङ्का। एवं नीरसत्वे सति रूपवत्त्वादित्यपि हेतुः॥ ५६॥

आनन्द०—प्रभानिरूपणस्य प्रयोजनं दर्शयन् अवसरसंगतिमाह—अथात्रेति इति केचिदाहुः। प्रसङ्गसंगतिरित्यपरे। तेनात्मनो ज्ञानात्मकस्यापि ज्ञानधर्मकत्वमुच्यमानं सुगम (सुसंगत) मिति भावः। प्रदीपादिधर्मत्वैकत्वादौ प्रमाणमाह—सर्वेषामिति। भातीति सर्वलोकप्रत्यक्षं तत्र प्रमाणमिति भावः। तत्र मूलाग्रयोरिति—अवच्छेदकभेदेन वृक्षे संयोगतदभावयोरिवाविरोधान्नैकत्वबाधकतेति भावः। यद्यवच्छेदभेदेन विरोधपरिहारो न स्यात्; तदा बाधकमाह—अन्यथेति। विशरणं—विशीर्णता। गौरवमुपपादयति—विशरणक्रियेत्यादिना। बहलविरलत्वादीति—दीपसामीप्ये बहलत्वं दूरे विरलता। तत्सिद्धिश्च सर्वावयवानां तुल्यवेगत्वे न स्यादित्यर्थः।

प्रभा भासयते (चार्थान्) सर्वान् यथैका दीपसंश्रिता।

इति शास्त्रम्। नन्विति—अतिरिक्तत्वानुपपत्तौ उ(त्वमनभ्युपेत्यो)क्तान्तर्भावस्य वक्तव्यत्वे प्रकारान्तरेणान्तर्भावस्य वक्तुमशक्यत्वा(र्भावस्यानुमतत्वा)दिति भावः। अवान्तरवैषम्यं—प्रभात्वम्। ननु प्रभा तेजो भवितुमर्हति तिमिरहरत्वात् दीपवदित्यत्र साध्याविशेष इत्यत्राह—तिमिरहरत्वमिति। भास्वररूपविशिष्टतयेति—प्रकृत्यादित्वात् स्वार्थे तृतीया। तथाच भास्वररूपविशिष्टतयेति—प्रकृत्यादित्वात्

स्वार्थे तृतीया। तथाच भास्वररूपविशिष्टत्वात्तेजस्त्वमित्यर्थः। यद्वा तिमिरहरत्वात्तैजसमित्यत्र तैजसत्वाज्ञाने तिमिरहरत्वज्ञानं न संभवति तेजस्त्वेनैव तिमिरहरत्वात्। तज्ज्ञाने च सिद्धसाधनं तदज्ञाने च साध्याविशेष इत्यत्राह—तिमिरहरत्वमिति। तैजसत्वसाधकमनुमानान्तरमप्याह—नीरसत्व इति। प्रभा तेजः नीरसत्वे सति रूपवत्त्वात् दीपवदिति प्रयोगः। रूपादौ जलादौ च व्यभिचारवारणाय विशेषणविशेष्ये ॥ ५६ ॥

अक्ष०—अथ तेजोविशेषभूतां निरूपयति—धर्म इति। प्रदीपादिधर्मभूता तद्वदेका विष्वक्प्रसृता सुघटितसंघातलक्षणप्रभा सर्वेषां भातीत्यर्थः। अनेन प्रत्यक्षमेव तत्र प्रमाणमित्युक्तं भवति।

बहलत्व विरलत्व विशदत्वाविशदत्वोष्णत्वानुष्णत्वादि विरुद्ध धर्माणां दूरान्तिकदेश भेदेन प्रभायामुपलम्भात् कथमेकत्वमित्यत्राह बहलेति। दृष्टानुसारादिति। एकस्यामेव प्रभायां दर्शनानुरोधादुक्तधर्माणां अवच्छेदक इति भावः। सा—प्रभा। दीपांशा विशीर्णा इति यदि+एवमभ्युपगमे इत्यर्थः। बहुधाकल्पनागौरवादिरिति। विशरणस्व भावानां दीपावयवानां चतुरङ्गुलोर्ध्वदीपावयविनिष्पत्तिर्यन्तमविशरणं ततः परमेव विशरणं विष्वगूर्ध्वमधश्च प्रसरणं वेगातिशयमान्द्यादि दीपावयविनाशे विशीर्णानामपिनाश इत्यादिकं वहु कल्पनीयमित्यर्थः। बाधकान्तरमाह—रत्नादीनामिति। ऐक्यावगाहिप्रत्यभिज्ञा विषयप्रधानोदाहरणतया प्रसिद्धानां स्थिरतराणां रत्नसूर्यादीनां दीपप्रभायां त्वदुक्तरीत्या प्रतिक्षणविनाशावयवविशरणानुपपत्या निष्प्रभत्वप्रसङ्गस्स्यादिति भावः।

स्वाभिमतमाह—तेज इति। तदिति। अवयविकारणादीनामनुपपत्तेरित्यर्थः। प्रभारूपधर्म विशिष्टमेव तेज उत्पद्यत इति भावः। प्रभायाः कस्मिन्द्रव्ये अन्तर्भावस्स्यादित्यत्राह—तिमिरहरतयेति। तमोनिवर्तकत्वात् सा प्रभाऽपि। तेजोविशेषः—तेजस्येव अनन्र्भूतेत्त्यर्थः तिमिरहरत्वं च भास्वर रूपविशिष्टतया न तेजस्त्वेन अतो न साध्याविशेषः। एकजातीययोरपि धर्मधर्मिभावः क्वचित्प्रत्यक्षसिद्धो नापह्नोतुं शक्य इति भावः ॥५६ ॥

प्रभायाः प्रभावदवयवातिरेकतेजस्त्वे

भाष्ये भास्वत्प्रभादौ प्रतिहतिबहलीभावपूर्वं यदुक्तं
तेन स्रोतस्समाधिं परमतनयतः प्राहुरेके प्रभायाम्।
वस्तुन्यस्ते विकल्पे स्फुटविघटनयोर्वक्तुराप्तस्य वाचो-
स्तात्पर्यं तर्कमानानुगुणमधिगुणैश्चिन्त्यमन्तेवसद्भिः ॥ ५७ ॥

सर्वा०—अत्र ग्रन्थान्तरसिद्धमतान्तरमाह—भाष्य इति॥ करतलेनाहि-

मकररश्मीनां गतिप्रतिहतिः। तथैव तत्र बहलतया स्फुटोपलम्भश्चाभाष्यत। प्रतिबिम्बनिरूपणे च नयनरश्मीनां दर्पणे प्रतिहतिरुक्ता। तदेतत्प्रभाप्रभावतां सहोत्पत्तिनाशपक्षे नोपपद्यते। दृश्यते च रत्नप्रभादेरपि प्रतिघातकसन्निधौ सङ्कोचस्तदपगमे विकासश्च। अतः पाञ्चभौतिकस्य रत्नादेः पार्थिवाद्यंशेन दृढावस्थितस्यापि तेजोंऽशेन गन्धादिन्यायवता विशरणप्रसरणादिकं युज्यते। आतपवारणादिवृत्तान्तश्च वर्षवारणादिन्यायात्किरणगतितत्प्रतिघातावनुमापयति। निवृत्ते चातपे क्षितिजलयोरौष्ण्योपलम्भात्तेजोंशविशरणसंक्रमेण गम्यते। प्रभातद्वतोराश्रयाश्रयित्वादिभाषणं तु परसम्मत्यैव तन्मतनिदर्शनम्। प्रभा हि प्रदीपादिना सह जनिध्वंसिनीती केचित्। तथा हि साङ्ख्या इन्द्रियवृत्तिनिदर्शनतया आहुः—

* दीपप्रभा यथा तस्मिन्विनश्यति विनश्यति।
तथा बहिर्गताऽप्येषा मूलच्छेदाद्विनश्यति॥ इति॥

ननुविरुद्धभाषणादुभयं त्यक्त्वा सौगतगतिरिह संग्राह्येत्यत्राह—वस्तुनीति। न तावदिह सिद्धे वस्तुनि विकल्पः। नच वाक्ययोरैकार्थ्यं क्लिष्टगत्या कल्प्यम्, विरोधस्फोटघात्। आप्तवाक्ये च नोभयत्यागः; सहजक्षणिकपुञ्जद्वयपक्षस्य क्षणभङ्गनिरासेनैव निरस्तत्वाच्च। अतोऽन्यतरवाक्यस्य अन्यपरत्वे प्राप्ते प्रमाणतर्कानुगुणं परमार्थतात्पर्यं प्रज्ञाशालिभिश्छात्रैः प्रतिबोद्धव्यमिति॥ ५७॥

आनन्द०—ननु प्रथमसूत्रभाष्ये क्वचित् 'प्रभाप्रभावद्द्रव्यगुणभूता' इत्यारभ्य 'अतस्सप्रभाका एव दीपा भवितुमर्हन्ति' इति विशीर्णपक्षनिराकरणं दृश्यते। क्वचित् करतले रश्मीनां गतिप्रतिहतिः तथै(तयै)व तत्र स्फुटोपलम्भश्च। तथा च क्वचिन्नयनरश्मीनां दर्पणे प्रतिहतानां परावृत्तिश्च। तेन विशीर्णानामवयवानामेव प्रभावत्वमिति गम्यते। तथा च भाष्यग्रन्थविरोधद्वयं परिहरन् स्वोक्तस्यैतद्भाष्यविरोधं परिहरति—अत्रेतीत्येके। आक्षेपसङ्गतिरित्येके। प्रसङ्गसङ्गतिरित्यपरे। तदेतदिति—दीपस्य प्रतिक्षणविनाशात् तेन सह प्रभाया अपि नाशात् सप्रभस्योत्पत्तिपक्षे बहुलीभावपरावृत्त्योरसम्भवादित्यर्थः। स्थिर (दृढ) तररत्नादिस्थले अवयवविशरणाभावात् प्रभा न स्या (न स्यात् तत्र विशीर्णावयवासम्भवा) दित्यत्राह—भौतिकस्येति। यथा स्थिरतरगन्धद्रव्यस्य सर्वत्र गन्धोपलम्भेनावयवविशरणं; तथाऽत्रापि विशीर्णतेत्यर्थः किरणगतीति—आतपादिगतीत्यर्थः। सहोत्पन्नत्वपक्षे युगपदेव तावद्देशव्याप्यु(व्यापितयो)त्पत्तिमतो गतिमत्त्वाभावात् गतिप्रतिबन्धकत्वलक्षणातपवारणादिव्यपदेशो न स्यादिति भावः।

निवृत्ते चेति—सहोत्पत्तिविनाशपक्षे विशीर्णतेजोऽवयवसंक्रमणाभावादौष्ण्योपलम्भानुपपत्तिरिति भावः। विशीर्णपक्षे आश्रयाश्रयिभावाभावात् सजातीयस्य धर्मधर्मिभावे प्रभाश्रयदीपनिदर्शनं भाष्यस्थविरुद्धं चेदित्यत्राह— प्रभातद्वतोरिति।

यद्यप्ययमपि ग्रन्थो भाष्यस्थः सप्रभोत्पत्तिग्रन्थतुल्य इति न विरोधोऽत्र परिहार्यः; परपक्षानुसारेण परिहारस्तु सप्रभग्रन्थेऽपि समः; तथाऽपि अयं ग्रन्थो निदर्शनार्थो यथावस्त्वीकार्योऽन्यथा सजातीयधर्मधर्मिभावो न सिद्धचेदिति यथाश्रुतार्थमभिप्रेत्य समाहितमिति ध्येयम् ।

केचिदित्युक्तानां ग्रन्थमुदाहरति—**दीपप्रभेति** । **सौगतगतिः**— क्षणिकपुञ्जद्वयपक्षः । यद्यप्यस्मिन्(सहजनिप्रध्वंस)पक्षे बहुलीभावपरा(वप्रतिनिविष्ट)वृत्त्यादिगतिमत्त्वं न सम्भवति; तस्य कथंचिन्निर्वाहे सप्रभपक्ष एव श्रेयान् घटादिन्यायेन तथा निर्वाहस्य मुख्यत्वात्तथोक्तमिति भावः । **अत इति**—विशीर्णपक्षस्य प्रत्यक्षादिप्रमाणविरोधात् बहुकल्पनागौरवप्रसङ्गात् क्षण(णिकवाद)भङ्गनिरासेन कंचित्कालमवस्थाने विरोधाभावेन बहुलीभावसम्भवात् दीपादीनामन्यस्य निरन्वयविनाशनिराकरणेनाविरोधाच्च धर्मिणः स्थिरत्वे प्रभाया अपि स्थिरत्वं तन्निरोधे च ह्रासः तदभावे विकासः अस्थिरदीपःदौ च तत्समानकालीनप्रभागतिमत्त्वाङ्गीकाराच्च वारणादिकं च युज्यते इति भावः ॥ ५७ ॥

अक्ष०—अत्र ग्रन्थान्तरसिद्धमतान्तरमाह—**भाष्य इति** । **भास्वत्प्रभादाविति**—सूर्यप्रभादावित्यर्थः । आदिशब्देन नायनरश्मयो गृह्यन्ते । **प्रतिहतिबहुलीभावपूर्वं यदुक्तमिति** । प्रतिघात बाहुल्यपरावृत्ति पाश्चात्यग्रहणादिकमित्यर्थः ।

संविदः स्वाभिव्यञ्ज्याहंकाराभिव्यञ्जकत्वसाधने रविकरनिकराणां स्वाभिव्यञ्जकरतलाभिव्यञ्जकत्ववदिति परोक्तनिदर्शन निरसनाय"करतलप्रतिहतगतयो हि रश्मयः बहुलास्स्वयमेवोपलभ्यन्त" इति भाषितम् तथा यथार्थख्यातिसमर्थने "दर्पणादिषु निजमुखादिप्रतीतिरपि यथार्था दर्पणादि प्रतिहतगतयोहि नायनरश्मयः दर्पणादि देशग्रहणपूर्वकं निजमुखादि गृह्णन्ति" इति च भाषितमितिभावः । **तेन** । **प्रभायां स्रोतस्समाधिः** । प्रवाह इव भिन्नभिन्नानामेवावयवानां विचरण प्रसरणादिक मवगम्यते तत्कथं धर्म्येव भाति—प्रभैकेति तद्विरुद्धमुक्तमित्याक्षेपे परमतरीत्या स्रोतस्समाधि केचिदाहुः स्वमतत्वाभावान्न पूर्वोक्तविरोधश्शङ्क्य इतिभावः । विकल्प एवात्र स्वाभिमतस्स्यादित्यत्राह—**वस्तुनीति** । सिद्धरूप इत्यर्थः । **अस्ते**—क्षिप्ते । **विकल्प इति**—कृतिसाध्यानुष्ठानविषय एव विकल्पो भवितुमर्हति नतु सिद्धवस्तु विषय इति भावः । विरोधस्यास्पष्टत्वात् समुच्चयस्स्यादित्यत्राह—**स्फुटेति** । **विघटनं**—विरोधः । सच स्फुटः । प्रभैक्यपक्षे प्रतिहतेरयोगात् अतोऽत्र स्पष्टविरोधयोः वाचोः त्याग एव स्यादित्यत्राह – **वक्तुराप्तस्येति** । आप्तोक्तत्वादुभयोस्त्यागोऽपि न युक्त इति भावः । तर्हि कथं निर्वाह इत्यत्राह—**तात्पर्यमिति** । परमार्थतात्पर्यम् । अन्यतरस्यान्यपरत्वमित्यर्थः । तत्कस्येत्यत्र किं नियामकमित्यत्राह—**तर्कमानानुगुणमिति**—प्रमाणोपपत्योरविरोधे स्वार्थपरत्वं अन्यथा अन्यपरत्वमित्यवधेयमित्यर्थः ।

तत्कुतो नोक्तमित्यत्राह—अधिगुणैश्चिन्त्यमिति—बुद्धिमद्भिश्शिष्यैरेव बोद्धुं शक्यमित्यर्थः।

अयं भावः। अवयवविशरणपक्षे प्रत्यक्षादिप्रमाणविरोधः बहुकल्पनागौरवञ्च पूर्वमुक्तं प्रभाधर्म्यैक्यपक्षे तदुभय प्रसक्तिर्नास्ति तथा प्रभाया अपि द्रव्यत्वेन अवयवतत्प्रसरणसंकोचविकासविनाशाभ्युपगमे प्रमाणादिविरोधाभावात् प्रतिहतिप्रयुक्त बहुलीभाव प्रतिनिवर्तनादिकं(अपि)रविमण्यादेरवय व विशरणाभावे (प्यु)उपपद्यत इति प्रभा प्रभावतोर्धर्मधर्मिभाव एव परमार्थतात्पर्यमिति मेधाविनामतिरोहितमिति। अग्निसूर्यकराभितप्तशिलातलजलाशयादा वौष्ण्योपलम्भस्तु तत्र सूर्यकिरणमुक्ताग्न्यवयवसंक्रमनिबन्धनः नतु किरणसंक्रमणाधीनः। तदुक्तं श्रुतप्रकाशिकायां—"अग्नितप्तेषु अग्न्यवयवसंक्रान्त्यैव औष्ण्योपलम्भः सलिलादौ संक्रामन्तस्तेजोवयवा एव प्रभेति न वाच्यम्। दीपप्रभया अहोरात्र संक्रमेऽपि सलिलभूतलादौ औष्ण्यानुपलंभात्। आतपतप्तेष्वपि न किरणविशरणादवयव—संक्रमः तुहिनकणानामिप रविकिरणोपात्तमुक्तानां अग्न्यवयवानां संक्रमणादुष्णोपलम्भोपपत्तेरिति। अत्र प्रमाणमवि पुराणवचनं तत्रोदाहृतमस्ति। अतस्तदनुरोधादपि प्रभायाः न विशीर्णावयवात्मताकल्पनावश्यंभाव इति ध्येयम् ॥ ५७॥

प्रभावविषयग्रन्थद्वयगमनिका

प्राच्ये स्नेहादिनाशे चरम इव दृढोऽन्तरं दीपनाशः
सामग्रचन्यान्यकार्यं जनयति च न चानेकदीपप्रतीतिः।
साम्यादेः स्यात्तु तद्धीः प्रवहणभिदुरास्सप्रभास्तत्प्रदीपा
निर्बाधा भास्करादौ प्रथयति नियतं प्रत्यभिज्ञास्थिरत्वम् ॥५८॥

सर्वा० – ननु दीपादीनां स्थिरतया गृहीतानामपि क्षिप्रविनाशित्वमभ्युपगतम्। तच्चावयवविशरणपक्ष एवोपपद्यते। तथाऽऽहुः—*अवयवविशरणलिङ्गजबोधसहायेन चक्षुषा भेदम्। ज्वालासु निर्णयामः इति। पक्षान्तरेषु तु प्रत्यभिज्ञा दुर्बाधेत्यत्राह—प्राच्य इति॥ दाह्यविनाशानन्तरं वह्निनाश इति चरमदीपादिषु दृष्टम्; इष्टं च सर्वेषाम्। प्रतिक्षणं च दीपदशादिप्रक्षयो दिपादिषु प्रत्यक्षः। प्रयोगश्च—प्राच्यस्नेहदशादिनाशः स्वानन्तरभाविस्वजनकदीपनाशवान् दीपारम्भकस्नेहादिनाशत्वात्, अन्त्यवत् इति। सावधानं प्रपश्यद्भिश्च प्रवाहवद्दीपो दृश्यते; दशाग्रमारभ्य तन्मूलपर्यन्तं प्रतिकलमन्योऽन्यो दीपः प्रवर्तमानो निवर्तमानश्च दृष्टः। प्रयोगान्तरमभिप्रेत्याह—सामग्रीति। द्वितीयादिस्नेहादिसामग्री दीपजनिका; अविकलदीपजनकजातीयसमुदायत्वात्, आद्यवत्। अन्यथा प्रथमाऽपि नोत्पादयेत्। तथा च जितं चार्वाकैः। नन्वस्तु प्रतिक्षणदीपारम्भः,

प्रतिक्षणविनाशस्तु कुतस्त्य इत्यत्र पूर्वानुमानसिद्धेऽपि युक्त्यन्तरबाधमाह—न चेति। यदि द्वितीयादिक्षणे पूर्वपूर्वदीपनाशो न स्यात्, अनेकघटाद्युत्पत्तिनयाद्युगपदनेकदीपोपलब्धिः स्यात्; न चैवमस्ति। निगयति—साम्यादेरिति। प्रभया सहोत्पत्तिपक्षेऽप्येवं दीपादेराशुतरविनाशित्वं सिद्धम्। यत्र तु सामग्र्यनुवृत्त्यादिहेतुविरहः तत्र स्थिरत्वप्रसङ्गो न दोष इत्यभिप्रायेणाह—निर्बाधेति॥ ५८॥

आनन्द०—आक्षेपसङ्गतिमाह—नन्विति। अवयवेति—विशेषदर्शनसहितप्रत्यक्षेणेत्यर्थः। पक्षान्तरे इति—अवयवविशरणानङ्गीकारात् उत्पाद(उत्पन्न)-विनाशप्रत्यक्षस्य प्रत्यभिज्ञातोऽधिकत्वाभावात् विनाशित्वं न साधयतीत्यर्थः। दाह्यविनाशानन्तरमिति—दाह्यभूतदशाविनाशानन्तरं वह्नेर्दीपस्य विनाश इत्यर्थः।

तथाचेदृशविशेषदर्शनबलाज्जात्यादिविषयतयाऽन्यथासिद्धा प्रत्यभिज्ञा न विरोधिनीत्यर्थः। दीपदशादीत्यादिपदेन तैलादिसंग्रहः। अनुमानतोऽपि विनाशस्सिध्यतीत्याह—प्रयोगश्चेति। दिङ्मोहादिवत् प्रत्यभिज्ञा न बाधिकेति भावः। अन्त्यस्नेहादिनाशस्य सपक्षत्वात्तद्वारणाय—प्राच्य इति पक्षविशेषणम्। स्वानन्तरभावीति सिद्धसाधनवारणाय। स्वानन्तरभावित्वं च स्वोत्पत्त्यव्यवहितक्षणभावित्वम्। स्वजनकेति वर्त्याग्निसंयोग(दीपान्तर) नाशमादायार्थान्तरवारणाय दीपारम्भकेति। अदृष्टादिनाशे व्यभिचारवारणाय स्नेहेति। आदिशब्देन वर्तिनाशसंग्रहः। अन्त्यवदिति—अन्त्यस्नेहादिनाशवदित्यर्थः। दीप (भेदे नाशे) प्रत्यक्षमुदाहरति—सावधानमिति। यथा प्रवाहः प्रबलान्य(पूर्वपूर्वजलान्य)जलपरम्परारूपो दृश्यते; तथा पूर्वपूर्वदीपान्यदीपपरम्परावत्त्वेन भेदो(पि)दृश्यत इत्यर्थः। भेदप्रत्यक्षादपि प्रत्यभिज्ञा दुर्बलेति भावः। उत्पत्तिविनाशप्रत्यक्षमुदाहरति—दशाग्रेति। प्रवृत्तिरुत्पत्तिः। निवृत्तिर्विनाशः। प्रयोगान्तरं—अनुमानान्तरम्। आद्यादिपदेन तृतीयादीनां ग्रहणम्। द्वितीयेन वर्त्यग्निसंयोगादयो गृह्यन्ते। प्रथमे सिद्धसाधनतानिवृत्त्यर्थं पक्षविशेषणम्। अविकलं अन्यूनं—सर्वकारणमिलितमिति यावत्। वर्तितैलसमुदाये व्यभिचारवारणाय तद्विशेषणम्। घटादिसामग्र्यां व्यभिचारवारणाय दीपजनकेति। समुदायत्वं च सामग्रीत्वम्। प्रमेयत्वेन(सजातीय)घटसामग्र्यां व्यभिचारवारणाय तत्। तथाच दीपजनकसामग्रीत्वेन सजातीयत्वादित्यर्थः। आद्यवदिति—आद्यदीपजनकसामग्रीवदित्यर्थः अप्रयोजकत्वं परिहरति—अन्यथेति। प्रथमाऽपि दीपसामग्री द्वितीयाविशेषान्नोत्पादयेदित्यर्थः। युक्त्यन्तरबाधं—अनुमानान्तरव्याप्तिमित्यर्थः पूर्वोत्पन्नदीपो द्वितीयादिकाले नष्टः उत्पन्नत्वे सति देशान्तरासत्त्वे सति योग्यत्वे सति द्वितीयादिप्रतीतिसमयेऽप्रतीयमानत्वात् यद्देशन्तरासत्त्वे सति द्वितीयादिकाले न प्रतीयते तत् तत्काले नष्टं यथा तमः इ (त्यनुमानान्तरं द्रष्टव्यम्)ति प्रयोगो द्रष्टव्यः। साम्यादेरित्यादिमूलस्य; तद्धीः—तदेवेति प्रत्यभिज्ञा

साम्यात्—अत्यन्तसादृश्यात् स्यात्। तस्मात्—उक्तहेतोः सप्रभाः प्रदीपाः प्रवहणभिदुराः प्रवाहवत् प्रतिक्षणभिन्ना इत्यर्थः ॥ ५८ ॥

अक्ष०—अथ सेयं दीपज्वालेति प्रत्यभिज्ञया स्थिरतया गृहीतानामपि दीपादीनां क्षिप्रविनाशित्वं अवयवविशरणमन्तरेण नोपपादयितुं शक्य मित्यत्राह—प्राच्य इति। यथा चरमस्नेहनाशे दीपनाशः संप्रतिपन्नः तद्वदाद्यस्नेहनाशेऽपि तदनन्तरं दीपनाशः दृढस्सम्प्रतिपत्तव्यः। प्रत्यक्षसिद्ध इत्यर्थः। प्रतिक्षणं दीपवर्ति स्नेहादिविनाशः। सर्वेषां—सावधानं पश्यतां प्रत्यक्षसिद्ध इति यावत्। अवयवविशरणानभ्युपगमेऽपि कारणविनाशेन कार्यदीपविनाशः अनुमानेनाऽपि साधयितुं शक्यत इति भावः।

प्रयोगश्च—प्राच्यस्नेहवर्त्यादिनाशः स्वानन्तरभाविस्वजनकदीपनाशवान्—स्वजनकदीपनाशाव्यवहितपूर्वभावीति यावत्। दीपारम्भकस्नेहादिनाशत्वात् अन्यस्नेहादिनाशवदिति। अत्र प्रयोगान्तरमपि वक्तुं शक्यमित्यभिप्रायेणाह—सामग्र्यन्यान्यकार्यं—जनयति चेति। अन्या द्वितीयादिः। सामग्री—तैलादिः। अन्यकार्यं—दीपान्तरं जनयतीत्यर्थः। द्वितीयादिस्नेहादिसामग्री दीपजनिका अविकलदीपजनक जातीयसमुदायत्वात् दीपजनकतावच्छेदकनिखिलजातिमत्समुदायत्वादिति वा आदिमस्नेहादिसामग्रीवदिति प्रयोगोभाव्यः। अनेन प्रतिक्षणं दीपारम्भसिद्धावपि प्रतिक्षणं तन्नाशः कथं सिद्ध्येदित्यत्राह—नचेति द्वितीयादिक्षणे पूर्वदीपनाशाभावे अनेकदीप प्रतीतिस्स्यात् नचैवं प्रतीयत इति तद्बलादपि प्रतिक्षणविनाशस्सिद्ध्यतीति भावः। तर्हि कथं सेयमिति प्रत्यभिज्ञेत्यत्राह—साम्यादेरिति—सादृश्यादेरित्यर्थः। तद्धीरिति—तत्वेन धीः—सेयमिति धीरित्यर्थः। सोऽयंगकार इतिवत्सादृश्यावलम्बिनी नत्वैक्यावलम्बिनीति भावः। तत्—तस्मात्। सेयमिति प्रतीतेस्सादृश्यनिबन्धनत्वात् सामग्रीभेदाच्च सप्रभाकाः प्रदीपाः प्रवाहवत्प्रतिक्षणंभिन्ना इत्याह—प्रवहणेति। तर्हि प्रत्यभिज्ञायाः स्थैर्यसाधकत्वं क्वचिदपि न स्यादित्यत्राह—निर्बाधेति। उक्तरीत्या बाधो यत्र भास्करादौ नावतरति तत्रैव प्रत्यभिज्ञा स्थिरत्वं साधयतीत्यर्थः ॥ ५८ ॥

स्थिरास्थिरतेजोविभागः

वर्णानां तादृशत्वादतिकठिनतया गौरवस्यापि भूम्ना
धात्रीभागैः प्रभूतैस्स्फुटमिह घटिता धातवो हाटकाद्याः।
तादृक्त्वेऽपि स्फुरत्ताद्यनितरसुलभं किंचिदन्वीक्ष्य तज्ज्ञैः
व्याख्यातं तैजसत्वं विधितवितरयोस्तन्त्रसौकर्यसिद्ध्यै ॥ ५९ ॥

सर्वा०—यत्तु हेमादेस्तैजसत्वमाहुः *त्रपुसीसलोहरजतसुवर्णानां तैजसा-

नामग्निसंयोगादद्रवत्वमद्भिस्सामान्यमिति, तत्प्रागेव पाञ्चभौतिकत्वसाधनात्प्रत्युक्तम्। विशेषतश्च परोक्तेर्भङ्गाय ब्रूमः—वर्णानामिति।। हेमरूप्यादिवर्णाः पार्थिवत्वाभिमताभ्रकशुक्त्यादिसमा दृश्यन्ते। अन्यथा कथं तत्तद्भ्रमः काठिन्यं च तेष्वधिकम्? तच्च स्वतः पृथिव्या एव, *काठिन्यवान् यो बिभर्ति इत्यादिदर्शनात्। गुरुत्वं च तेषुतेषु भूयिष्ठम्। तेजोमात्रे तु न तत्प्रसङ्गः। जले तु सदप्येतन्नैवं क्वचिदतिशयितम्। नचाप्यत्वं तेषामिच्छसि। तदिह पञ्चीकृतारब्धव्यष्टिप्रपञ्चे हेमादिषु पार्थिवांशः प्रभूत इति निश्चीयते। कथमन्यथा *निष्के तु सत्यवचनमित्यादि निरुह्येत; तथात्वे तैजसत्वस्मरणं कथमित्यत्राह—ताद्रूक्त्वेऽपीति। स्फुरत्तादि—तेजस्समानं वर्णविशेषं स्वतश्शुद्धत्वं चेत्यर्थः तज्ज्ञैः—तथाभूतवेदिभिः। व्याख्यातं विशेषतः प्रकथितम्। किमर्थमित्यत्र तैजससमाख्यातेषु विधिनिषेधसाधारण्यसौकर्यार्थमित्याह विधीति।

ननु सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामत्यन्ततापलुप्तद्रवत्वं दृष्टम्, न तथा हेमादौ ततस्तेषामपार्थिवत्वम्। मैवम्; एवमपि तोयान्यत्वस्य दुस्साधत्वात्। द्रवत्वविशेषात्तैजसत्वसाधने च न कश्चिद् दृष्टान्तः। पाकजद्रवत्वेन पार्थिवत्वसाधने तु सर्पिराद्यस्ति; अलुप्तद्रवत्वं च हेमादेस्तदुपष्टम्भकपार्थिवांशेऽप्यस्ति। अन्यथा तत्र तदानीं काठिन्यानुवृत्तिप्रसङ्गात्। अतः पक्षविपक्षमात्रवृत्तित्वाद्विरुद्धता।।

अवान्तरविशेषाच्च नातज्जातीयता भवेत्।
अतिप्रसङ्गसाम्राज्यादशेषापह्नवेन वा ।।
न च हेमादिशब्दानां युक्तं दृष्टप्रमाणतः।
अलोकव्यवहारार्हे कुत्रचिद्वृत्तिकल्पनम् ।। ५९ ।।

आनन्द०— प्रसङ्गसङ्गतिमाह—यत्त्विति। गौतमसंमतिमाह— त्रपुसीसेत्यादि। अद्भिस्सामान्यं—अप्सु सामान्यं स्वाभाविकमित्यर्थः। नैयायिकैरपि हेमादेः तेजस्संसृष्टत्वमात्रसाधनं सिद्धसाधनग्रस्तमित्याह— तत्प्रागेवेति। नन्वेवमपि वह्न्यादेस्तैजसत्वं यादृशं तादृशं साध्यत इत्याह—विशेषत इति। शुक्त्यादिसमा इति शुक्त्यादिवर्णसमा इत्यर्थः। तथाच हेमादि[वृत्ति?]पार्थिवं जलवृत्तित्वरहितजातिविशेषेण पार्थिवरूपसजातीयरूपवत्त्वात् अभ्रकादिवदित्यनुमानात् पार्थिवत्वमित्यर्थः। अभ्रक स्वर्णवर्णः पार्थिवविशेषः।

ननु प्रतीयमानो वर्णःशुक्त्यादिसजातीयो न भवति हेत्वसिद्धेरित्याह—अन्यथेति। तत्समत्वाभावे अभ्रकशुक्त्यादौ सुवर्णरजतादिभ्रमः सादृश्यनिमित्तो न स्यादित्यर्थः। काठिन्याच्च हेमादि पार्थिवमित्याह – काठिन्यं चेति। अभ्रकशुक्त्याद्यपेक्षयेत्यर्थः। ननु काठिन्यं करकादौ व्यभिचारीति तत्राह—तच्चेति।

करकादावौपाधिकमिति स्वाभाविकं काठिन्यं हेतुरित्यर्थः। पृथिव्याः स्वाभाविकतद्वत्त्वे वैष्णववचनं प्रमाणयति—'काठिन्यवान् यो बिभर्ति' इति कठिनपृथिवीशरीरकत्वेन भगवतः काठिन्यवत्त्वमिति भावः। किञ्च सुवर्णादि तैजसं न गुरुत्वाधिकरणत्वात् यत्तैजसं न तद्गुरुत्वाधिकरणमिति परिशेषात्पार्थिवत्वमित्याह—गुरुत्वं च तेष्विति।

ननु परिशेषात्कथं पार्थिवत्वम्? जलस्यापि गुरुत्वात्; इत्याशङ्क्य समानपरिमाणानां (जलानां न) तारतम्यवद्गुरुत्वाश्रयत्वमित्येवम्भूतगुरुत्वं पृथिव्या एव; अन्यथा समानपरिमाणजलान्तरन्यूनाधिकगुरुत्वाधिकरणं न भवति; यथा तुल्यपरिमाणंजलद्वयमिति। किञ्च स्वर्णस्याप्यत्वं तव सिद्धान्तविरुद्ध(त्वत्वमपसिद्धान्तावह)मित्याह- न चाप्यत्वमिति। ननु सिद्धान्ते हेमादेस्तेजोंऽशसंवलनमङ्गीक्रियते; (एवञ्च कथं तैजसत्वनिषेधः? इत्यत्राह—तदिह पञ्चीकृतेति—यद्यपि तेजोंऽशोऽपि विद्यत एव; तथाऽपि घटादिभ्योऽभिमतपार्थिवेभ्यो न वैलक्षण्यमित्यर्थः। कथमन्यथेति—सर्वात्मना तैजसत्वे प्रभादाविव निष्कादिव्यवहारप्रयोजकगुरुत्वाभावात् 'निष्के तु सत्यवचनं वाच्यं नापह्नवः कार्योऽधिकदोषात्; इत्यादिधर्मशास्त्रव्यवहारो न स्यादित्यर्थः। तथात्वे इति - पार्थिवत्वे इत्यर्थः। विधिनिषेधेति—'तैजसं शोधकैश्शुद्धम्' 'आयसात्तैजसं शस्तम्' 'भुञ्जीत तैजसे पात्रे एक एव श्रियं लभेत्' 'तैजसं शुध्यते नित्यम्' इति विधिः। 'न हरेत्तैजसं विद्वान्' 'तैजसं न यते(र्गृहे)र्ग्राह्यम्' 'न यतिस्तैजसे पात्रे' इत्यादिनिषेधः।

ननु स्वर्णं न पार्थिवं अत्यन्तानलसंयोगे सत्यप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् व्यतिरेकेण सर्पिजंत्वादिवत् इत्यनुमानात् पार्थिवत्वं बाधितमित्याशङ्कते—नन्विति। सुवर्णं नाप्यं नैमित्तिकद्रवत्वाधिकरणत्वात् जतुवत् इति जलभेदे रूपवतः परिशेषात्तैजसत्वमिति चेत्; तत्राह - द्रवत्वविशेषादिति। ननु द्रवत्वविशेषाज्जलभेदमात्रं साध्यते; परिशेषात्तैजसत्वं सिद्धमिति चेत्; तत्राह-पाकजद्रवत्वेति। नैमित्तिकद्रवत्वेन पार्थिवत्वं साध्यते। नन्वनुच्छिद्यमानद्रवत्वाधिकरणत्वादपार्थिवत्वमिति चेत्; तत्राह—अलुप्तेति। उपष्टम्भके पृथिव्यंशे विपक्षे पक्षे स्वर्णे च तव मते वृत्तेर्विरुद्धत्वमपीत्याह—अत इति। अयं भावः अनुच्छिद्यमानद्रवत्वं चास्यासिद्धम् सुवर्णभस्मादिदर्शनात्। अनुच्छिद्यमानद्रवत्वेऽपि पार्थिवत्वे न किञ्चिद्बाधकम्। स्वेच्छाकल्पितभेदमात्रादपार्थिवत्वे द्रवत्वात्तैजसत्वमपि न स्यात्। यदि तेजो विशेषस्य द्रवत्वं कल्प्यते तदा लाघवादष्टगुणत्वनैमित्तिकद्रवत्वपीतरूपाद्यनुरोधात् पार्थिवविशेषस्यानुच्छिद्यमानद्रवत्वमभ्युपगन्तव्यम्। ननु पृथिवीत्वेन संप्रतिपन्नजत्वादिविलक्षणानुच्छिद्यमानद्रवत्वरूपधर्माधिकरणत्वात्पृथिवीभेद इत्यत्राह - अवान्तरेति। गुरुत्वादिभिः पृथिवीत्वे सिद्धे तद्विशेषत्वादुक्तधर्मस्य ततोऽतज्जातीयता पृथिव्यतिरिक्तजातीयता न भवेत्— न साधयितुं शक्ये-

त्यर्थः। तत्र हेतुमाह—अतिप्रसङ्गेति। सर्पिर्जत्वादावप्येवं प्रसङ्गात् सर्वस्यापि किञ्चिद्विशेषत्वात् सर्वस्य सर्वबहिर्भावे सामान्यविशेषभावो न स्यादिति न निर्विशेषं सामान्यमिति सर्वव्यवहारोच्छेद इत्यर्थः। तैजसत्वे बाधकान्तरमाह—नच हेमादिशब्दानामिति। दृष्टप्रमाणत इति ल्यब्लोपे पञ्चमी। दृष्टं—प्रत्यक्षं तेन सिद्धमुपष्टम्भकं परित्यज्य लौकिकव्यवहारानर्हे वस्तुनि शक्तिकल्पनं विरुद्धमित्यर्थः॥ ५९॥

अक्ष०—"त्रपु सीस लोह रजत सुवर्णानां तैजसानामग्नि संयोगाद्द्रवत्वमद्भिस्सामान्यम्" इति वैशेषिकाद्युक्तं सुवर्णादीनां तैजसत्वं निराकरोति—वर्णानामिति। तादृशत्वादिति—पार्थिवत्वेन संप्रतिपन्नानामभ्रकादीनां ये वर्णाः तत्सजातीयत्वादित्यर्थः। अतिकठिनतयेति अत्यन्तकाठिन्यादित्यर्थः। काठिन्यञ्च पृथिव्या एव स्वतस्सिद्धमिति भावः। गौरवस्यापि भूम्नेति—अतिशयितगुरुत्वादित्यर्थः। समपरिमाणद्रव्यान्तरापेक्षया गुरुत्वातिशयो विवक्षितः। तेन जलव्यावृत्तिः। पार्थिवेष्वेव समपरिमाणेषु गुरुत्वतारतम्यदर्शनादिति भावः। धात्रीभागैः—पृथिव्यवयवैः। प्रभूतैः—अधिकैः। घटिताः। हाटकाद्याः—सुवर्णाद्याः। धातवः। इति। इह—सुवर्णप्रतीतिविषये। स्फुटं—निश्चितमित्यर्थः। आद्यशब्देन रजतादिपरिग्रहः। पृथिव्यसाधारणपीतिमगुरुत्वकाठिन्यातिशयैः सुवर्णपदवाच्यं पार्थिवभागभूयिष्ठतया निश्चितत्वात्पार्थिवमित्येव वक्तव्यम् नतु तैजसमिति भावः पाकजद्रवत्वात्सर्पिरादिवत्पार्थिवमेव।

नच पार्थिवद्रवत्वस्य अग्निसंयोगनाश्यतया सुवर्णस्यात्यन्तानलसंयोगे सत्यप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वं तैजसत्वसाधकमिति वाच्यम्। पीतिमाश्रयपार्थिवभागे जलेचारक्तहेतोस्सत्वेनासाधकत्वात्। हस्तावस्थे सुवर्णेअभावादसिद्धेश्च। सर्पिरादिव्यावृत्तद्रवत्वविशेषसत्त्वेऽपि तावताऽपार्थिवत्वानापत्तेः। अन्यथा सर्पिरादेरपि घटादिव्यावृत्तद्रवत्ववत्वात् पार्थिवत्वानुपपत्तेः।

कथन्तर्हि सुवर्णस्य तैजसत्वस्मरणमितिचेदत्राह - तादृक्त्वेपीति—पार्थिवत्वेऽपीत्यर्थः। स्फुरत्तादि। अनितरसुलभमिति। इतरस्मिन्पार्थिवे उपलब्धुमलभ्यं तेजस्समानं वर्णविशेषमित्यर्थः आदिना स्वतश्शुद्धत्वं जिघृक्षितम्। एवं रूपं किञ्चित्साम्यमन्वीक्ष्य। तज्ज्ञैः स्मृतिकारैः सुवर्णस्य तैजसत्वं। व्याख्यातं—विशेषेण कथितमित्यर्थः। तत् किमर्थमित्यत्राह—विधितदितरयोरिति—विधिनिषेधयोरित्यर्थः। "भुञ्जीत तैजसे पात्रे" "तैजसं शुद्धयते नित्यम्" इत्यादिः विधिः। "न हरेत्तैजसं विद्वान्" "तैजसं न यतेर्ग्राह्यम्" इत्यादिः निषेधः। अत्र सुवर्णादीनां तैजसत्वोपगमादेकेनैव तैजसपदेन तन्त्रेण सुवर्णरजतादिग्रहणसौकर्यं सिद्धयति। अन्यथा पृथक्पृथगेवनिर्देशः आवश्यकस्स्यात् ततश्च प्रयासातिशयः। पार्थिवत्वेन निर्देशेत्वतिप्रसङ्गो दुर्वारस्स्यादिति भावः॥ ५९॥

हेमादेस्तैजसत्वोक्तितात्पर्यम्

नैल्याद्भौमं तमिस्रं चटुलबहुलताद्यन्वयात्तत्र नैल्यं
छायावत्पारतन्त्र्यं त्वयस इव मणौ दृष्टिसिद्धात्स्वभावात् ।
स्पर्शाख्यातिर्न रूपं हरति हरिशिलालोकवत्तत्र चाक्ष्णो-
र्नालोकोऽर्थ्यस्ससिद्धाञ्जननयनदिवाभीतदृष्ट्यादिनीतेः ।। ६० ।।

सर्वा०—तेजोऽनन्तरे तोये विप्रतिपन्नार्थाभावात्तदुल्लङ्घनेन तमसः पृथिव्या-मन्तर्भावमाह—नैल्यादिति ।।

* तमः खलु चलं नीलं परा[व]परविभागवत् ।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ।।

इति य एवं वदन्ति तान्प्रत्युभयसम्मतेन नीलत्वेन पार्थिवत्वं साध्यते, द्रव्यान्तर-कल्पने गौरवात् । अवान्तरविशेषश्च न वैजात्यहेतुरित्युक्तम् । प्रभातुल्यत्वपक्षे पित्तवद्दृक्प्रभापसर्पपक्षेऽपि नीलत्वाद्भौमत्वं सिद्धमेव । ये त्वाहुः—*वियति विततानां सूक्ष्माणां पृथिव्यवयवानां कृष्णो गुणस्तम इति तेषां निराधारनैल्योप-लम्भोऽशक्यसाधन इत्यभिप्रायेणाह—तत्र नैल्यमिति । हेत्वन्तरमाह—चटुलेति । चटुलत्वबहुलत्वविरलत्वादिकं हि द्रव्यधर्म एव । न च तदुपलम्भो नास्ति, नीलोपलम्भो वा, विश्वविरोधात् । न चात्रालोकापसर्पणादिहेतुभेदैश्चटुलत्वमा-रोपितम्; प्रत्यक्षप्रमेषु गुणमात्राधिष्ठानत्वादृष्टेः । गन्धो वातीत्यादिष्वपि द्रव्याभिप्रायेण प्रयोगः । यदि स्वतन्त्रद्रव्यं तमः तदा तत्तद्गत्यागत्यनुविधानं कथमित्यत्राह—छायावदिति । यथाऽयस्कान्तस्थितिगत्यनुविधानं पृथग्द्रव्यस्या-प्ययसो दृश्यते तथाऽत्रापि स्यात्; यथादृष्टि स्वभावव्यवस्थापनात् ।

ननु पार्थिवत्वरूपवत्त्वे स्पर्शवत्त्वव्याप्ते; न च ध्वान्ते स्पर्श उपलभ्यते; अतस्ते उभे तस्य न स्त इत्यत्राह—स्पर्शाख्यातिरिति । तमःस्पर्शस्यायोग्यत्वा-दित्यभिप्रायेण नीलत्वसाम्याच्च हरिशिलालोकदृष्टान्तः । यन्नीलं तदालोकसह-कृतचक्षुर्ग्राह्यम्; तमश्च न तथा; ततश्चाक्षुषप्रत्ययाभावे नीलत्वाभिमान इत्यत्राह—तत्र चेति । आलोकोपलब्धावालोकान्तरं न सहकारि, तथाऽत्र स्यात्; विषयस्य सतस्तत्र सहकारित्वमिति चेत्; अथापि वस्तुभेदे वैरूप्यं सिद्धम्? एवं ध्वान्तेऽप्यालोकनैरपेक्ष्यं स्यात् । अलङ्घनीयनिदर्शनान्तरमाह--ससिद्धाञ्जनेति । अञ्जनविशेषसहकृतं हि चक्षुरन्धतमसेऽपि पदार्थान्दर्शयति, तथेहापि स्यात् । तत्र सहकार्यन्तरप्रभावादिति चेत्; अत्राप्यालोकाभावस्य सहकारिणः प्रभावा-दित्यङ्गीकुरुष्व । यथा च किंचिद्बहुलालोकग्राह्यं किंचिन्मन्दालोकेनापि, तथा किंचिदालोकग्राह्यं किंचिन्न तथेति यथादर्शनं नियमः । दृक्स्वभावाच्च; यथा दिवाभीतादिदृष्टेरालोकनैरपेक्ष्यम्, तथा दृश्यस्वभावादिहापीति किं नेष्यते ?

अस्त्वेवम्, तथाऽप्यालोकमध्ये किं नोपलभ्यत इति चेत्; आलोकनाश्यत्वादिति केचित्; उत्सारितत्वादित्यन्ये; मध्यन्दिनोल्काप्रकाशादिवदभिभवादित्यपरे।

अद्रव्यत्वादिपक्षाणामत्रासंभवसिद्धये ।
आद्यमेव तमो ध्वान्तमिति केचिदुपाचरन् ॥

किंच तेजस इव तमसोऽपि शरीरत्वाम्नानादालोकमध्ये तमस्सृष्टिवचनादेकस्मिन् काले तमस्तेजःप्रलयपाठाच्चास्य द्रव्यत्वप्राकृतत्वसिद्धौ रूपवत्त्वेन वायुपर्यन्तव्यपोहः। कृष्णरूपवत्त्वाच्च वह्निजलव्यावृत्तिः सिध्येत्; *यत्कृष्णं तदन्नस्येति श्रुत्यनुसाराच्च। तदिदं तमः परब्रह्माच्छादकाविद्यानिदर्शनतया विषयावारकं कैश्चिदुक्तम्। तदसत्;

तमोव्यवहितालोकस्थितनानार्थदर्शनात् ।
दृग्गतेरविरुद्धस्य दृश्यच्छादकता कथम् ॥

अतो मर्त्यादिदृष्टीनां दृश्यसंबन्धमात्रतः।
दर्शनप्रतिघातित्वं स्वभावात्तमसि स्थितम् ॥ ६० ॥

आनन्द०—अवसरसंगतिमाह - तेजोऽनन्तरमिति। तमसः क्रियावत्त्वात् परत्वापरत्वविभागादिगुणवत्त्वाद्द्रव्यत्वे सिद्धे स्पर्शासमानाधिकरणनीलरूपात्मकवैधर्म्यात् पृथिव्यादिनवद्रव्येभ्यो भेद इति मीमांसका आहुः। तत्र तदभिमतं पृथिव्यादिभ्यो भेदं प्रतिक्षेप्तुमनुभाषते – तमःखल्विति। उक्तेष्वन्तर्भावप्रकारमाह–उभयसंमतेनेति। तमः पार्थिवं नीलत्वात् संमतवदित्यनुमानेऽनुकूलं तर्कमाह—द्रव्यान्तरेति। स्पर्शरहितत्वे सति रूपवत्त्वं विशेषो भेद(नभेद)क इत्याह—अवान्तरेति।

केचित्तु—प्रभातुल्यं द्रव्यं तम इत्याहुः।

अन्ये तु पीतश्शङ्ख इत्यादौ नयनगतपित्तद्रव्यस्येव चक्षुषःकृष्णतारस्य विसर्पिप्रभा तम इति वदन्ति।

तन्मतेऽपि पार्थिवत्वमविरुद्धमित्याह—प्रभा तुल्यत्वेति। निराधारेति—सूक्ष्मत्वेन पार्थिवावयवानामुपलम्भासंभवात्(गुणस्य) धर्मिभावनियतत्वेन तदभावान्नैवमित्यर्थः। यदि विततानां पार्थिवानामेव तमस्त्वं तदा सिद्धान्तविरोधः; आतपादावभानं च कल्प्यमित्यवधेयम्। चटुलत्वं—क्रियावत्त्वम्। तदुपलम्भश्चटुलत्वाद्युपलम्भः। प्रत्यक्षभ्रमेष्विति—अन्यथा श्वैत्ये पीतिमत्वाद्यारोप(त्वाद्युपलम्भ)प्रसङ्गात्। नचेष्टापत्तिः! रूपप्रकारकत्वाभावप्रसङ्गात्। न च धर्मिणोऽपि भानात् पीतरूपस्यापि प्रकारता! तथाऽपि तमःप्रतीतौ नैल्यप्रकारतानुपपत्तेः। कदाचित् क्रियायामपि रूपत्वाद्यारोपप्रसङ्गे गच्छत्यपि स्वस्मिन् गमनाभावप्रतीतिप्रसङ्गः। न च नीलरूपस्यैवारोपात्तत्प्रकारताप्रतीति (तीतेरुपपत्ति)।

प्राप्तिः ! तथा सति यथा आश्रयस्यैव प्रतीतिसंभवेना(वेतथा)रोपकल्पनायोगादि (नानुपपत्तेरि)ति भावः।

ननु गन्धो वातीतिवदत्रापि चटुल(लत्वादि)धीस्स्यादित्यत्राह—गन्धेति। गन्धशब्दस्य द्रव्यपरत्वेन तत्रापि द्रव्य एव चटुलत्वधीरित्यर्थः। छायायाः द्रव्यत्वादन्यगत्यनुविधानं युक्तमित्यत्राह—यथेति। तमस्स्पर्शंस्येति—इन्द्रनीलप्रभावदनुद्भूतस्पर्शं तम इति अस्पर्शत्वासिद्धेरित्यार्थः। चाक्षुषेति—यद्यपि तत्प्रतीतिरपि चाक्षुषीति न चाक्षुषप्रतीतिसामान्याभावस्संभवति; विशेषाभावश्चेत् सर्वदा तमः प्रतीतिप्रसङ्गः; तथाप्यालोकाभाव आरोपसहकारीति तमश्चाक्षुषप्रत्यया(चाक्षुषप्रतीत्यतिरिक्तचाक्षुषप्रत्यया)भावे तथा(तदा)रोप इति भाव(इतिकेचित्) इत्याहुः। वस्तुभेद इति—सर्वत्र विषयातिरिक्तालोकसापेक्षत्वनियमेऽपि तेजसि वैरूप्यमङ्गीक्रियते; त(द्व)त्पार्थिवत्वेऽपि वैरूप्यमि(प्यमस्त्व)त्यर्थः।

यद्वा-(केचित्तु-)वस्तुभेदे तमसः पार्थिवविशेषत्वानङ्गीकारेऽपि नीलरूपस्यालोकासहकृतचक्षुर्ग्राह्यत्वरूपं वैरूप्यं सिद्धमिति लाघवात् पृथिव्यन्तर्भावोऽस्त्वित्यर्थः(इत्याहुः)। यदुक्तं चाक्षुषप्रत्ययाभावेऽपि नीलत्वा(नीलिमास्तित्वा)भिमान इति; तदयुक्तम्; ज्ञानस्य तदभावस्य वा चाक्षुषत्वायोगात्। बाधकाभावे(च) आरोपकल्पनायोगाच्च। आलोकासहकृतचक्षुर्ग्राह्यत्वं च तमसो न पार्थिवत्वविरोधीत्याह—अञ्जनविशेषसहकृतमिति। नीलाद्यध्यासहेतुत्वेन आलोकाभावस्यासहकारित्वं तथाऽपि वाच्यम्; तथा च लाघवानुरोधात् तमोग्रहे सह(तत्सह)कारि भवत्वित्यर्थः।

ननु विषयव्यञ्जकालो(ञ्जकस्यालो)कस्याभावे कथं चक्षुषा ग्रहः ? तत्र तस्य सहकारित्वादित्यत आह—यथेति। आलोकस्य सहकारित्वेऽपि विषयभेदेन वैषम्यदर्शनेन नैकरूप्यं सर्वत्रेति भावः। ननु तथाऽपि सर्वत्र चाक्षुषज्ञाने आलोकमात्रस्य न व्यभिचार इत्यत्राह—वृक्स्वभावादिति। अस्त्वेवमिति—तम(सा)सो विरोधाभावेन सत्त्वाविरोधादित्यर्थः। आलोकेति—यथा दीपो वातविनाश्यः तथा अन्धकार आलोकनाश्य इत्यर्थः। अभिभवादिति स्वावच्छेदेनालोकस्तमोज्ञानप्रतिबन्धक इत्यर्थः।

ननु तत्वरत्नकरो 'आलोकाभावस्तम इति काश्यपीयाः। नीलभानरूपस्मृतिप्रमोष इति प्राभाकराः। द्रव्यान्तरमिति कौमारिलाः। प्रधानतत्वमेव तम इति तत्वविदः' इत्युपक्रम्य प्राथमिकमतद्वयमथनपूर्वकम्:—

अत्र तत्वविदः प्राहुः स्थूलसूक्ष्मात्मना स्थिता।
दैवी गुणमयी माया बाह्यान्तरतमो(मयी)मता॥

इत्युक्तम्; तत्कथं पार्थिवत्वं भवद्भिरुच्यते ? इत्यत्राह अद्रव्यत्वादिपक्षाणामिति। आदिशब्देनालोकाभाव(पक्ष)परिग्रहः। अद्रव्यत्वादिनिरासाय प्राकृत-

त्वात् प्रकृतित्वोक्तिरित्यर्थः। तत्र हेतुमाह—किंच तेजस इति। 'यस्य तमश्शरीरम्' इति शरीरत्वोक्तेः 'तमस्ससर्ज दिवसे' इत्यादिना भारतादौ आलोकदशायामेव तमस्सृष्टेश्श्रवणात् तेजसा सह तमसोऽपि प्रलयवचनात्त(चने त)दभावत्वाभावावगमाच्च द्रव्यत्वं प्राकृतत्वं च सिद्धमित्यर्थः।।

ननु 'नासदासीन्नो सदासीत्तदानीम्' तम आसीत्तमसा गूढमग्रे प्रकेतम्' 'यदा तमस्तन्न दिवा न रात्रिः' 'तमः परे देवे' आसीदिदं तमोभूतम्' इति श्रुतिस्मृतिवचनानि प्रकृतेस्तमस्त्वं वदन्तीति चेत्; (न) प्रकृतेः रूपवत्त्वाभावेन अस्मदादिचाक्षुषतमस्त्वासंभवात्तस्याः प्रकृतेरतीन्द्रियत्वोक्तेः (क्तेश्च) तत्र तमश्शब्द उपचाराच्छक्त्यन्तराद्वेति दृश्यमानतमसः प्राकृतत्वमेवेति भावः।

ननु तमसो द्रव्यत्वे तत्वान्तरत्वापत्तिः; क्लृप्तेष्वन्तर्भावे महदादिषु वा-(दिष्वेवा)न्तर्भावोऽस्तु! कथं तस्य पार्थिवत्वमित्यत्राह—रूपवत्त्वेनेत्यादिना। वह्निजलव्यावृत्तत्वेऽपि पार्थिवत्वे किं प्रमाणमित्यत्राह—यत्कृष्णमिति। प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्तु (वस्त्वन्तर-) पूर्वकम् अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत् इत्यनुमानेन अज्ञानसाधनं दूषयितुमनुभाषते—तदिदमिति। हेतुमाह—तमोव्यवहितेति ननु व्यवधायकस्य कथं नेन्द्रिय(दृष्टि)वृत्तिप्रतिबन्धकत्वमित्यत्राह—दृग्गतेरविरुद्धस्येति। आच्छादकत्वे दृग्गतिविघातप्रसङ्ग इति भावः।

ननु मनुष्यादिदृग्गतिप्रति(गतिदि)घातकत्वाभावे कथमन्धकारे दृग्गतवस्तुग्रहाभाव इत्यत्राह —अत इति। दृशो दृश्यसम्बन्धेऽपि चाक्षुषधीप्रतिबन्धकत्वस्ये-(त्वं तस्ये)त्यर्थः। वस्तुतस्तमोऽतिरिक्तचाक्षुषप्रत्यक्षे आलोकस्य सहकारित्वात् तदभावान्न तत्प्रत्य(न तत्र प्रत्य)क्षमि(क्षत्वमि)ति भावः।। ६०।।

अक्ष०—अथ जले वक्तव्यविशेषाभावात् पृथिव्यां तमसोऽन्तर्भावं साधयति—नैल्यादीति। नीलरूपस्य पृथिव्यसाधारणत्वात् तमसि तद्वत्त्वस्य "तमः खलु चलं नील" मिति परस्याऽपि संमतत्वात्तेन पार्थिवत्वं सुसाधमित्याशयेनाह—भौमं तमिस्रमिति। तमः पार्थिवमित्यर्थः। दृक्प्रभा प्रसरणपक्षेऽपि नीलत्वाद्भौममेव। नभसि विकीर्णानां सूक्ष्मतया दुर्ग्रहाणां पृथिवीपरमाणूनां नीलरूपमेव तम इति केषाञ्चित्पक्षं निराकरोति—तन्न नैल्यमिति। निराधारनैल्योपलम्भो न संभवतीति भावः।

हेत्वन्तरमप्याह—चटुलेति—चटुलत्व बहलत्वादि द्रव्यधर्मान्वयान्न नैल्यगुणमात्रं तमो भवितुमर्हतीति भावः। चटुलत्वं—चलनवत्वं। बहलत्वं–निबिडत्वं। आदिना विरलत्व संग्रहः।

नच चटुलत्वादिकमालोकापसर्पणहेतुकमारोपितमेव तमसीति शङ्क्यम्। प्रत्यक्षभ्रमे गुणमात्राधिष्ठानादृष्टेरिति हि सिद्धिः। स्वतन्त्रद्रव्यत्वे आलोकगत्यागत्यनुविधानं कथमित्यत्राह—छायावदिति। पृथक् द्रव्यस्य पारतन्त्र्ये दृष्टान्तमाह-अयस इति . मणौ—अयस्कान्तमणावित्यर्थः। यथादृष्टि स्वभावो व्यवस्थाप्य इत्याह—दृष्टिसिद्धादिति अयसः पृथग्भूतद्रव्यस्य अयस्कान्तस्थितिगत्याद्यनुविधानवत्तमसोऽपि आलोकस्थितिगत्याद्यनुविधानस्वभावः प्रत्यक्षसिद्धः द्रव्यत्वेऽपि न विरुद्ध इति भावः।

ननु पार्थिवत्व रूपवत्त्वयोः स्पर्शवत्त्व व्याप्यतया तमसि स्पर्शोपलब्ध्यभावेन तदुभयाभाव इत्यत्राह—स्पर्शाख्यातिरिति। स्पर्शस्यानुद्भूतत्वेन योग्यताविरहादनुपलब्धेरुपपत्तेः। स्पर्शाभावासिद्ध्या च पार्थिवत्वाभावानापत्तिरिति भावः। तत्र दृष्टान्तमाह—हरिशिलाऽऽलोकवदिति—इन्द्रनीलप्रभावदित्यर्थः।

ननु यन्नीलं तत् आलोकसहकृतचक्षुर्ग्राह्यं दृश्यते तमस्तु आलोकमन्तरेणैव चक्षुषा गृह्यते अतस्तत्र चाक्षुषप्रत्ययाभावे नैल्यारोप इत्यत्राह तत्रचेति। आलोको नार्थ्य इति। आलोकः तमश्चाक्षुषे नापेक्षित इत्यर्थः। चाक्षुषसामान्ये आलोकसहकारनियमादर्शनादिति भावः। कुत्रायं नियमो न दृश्यत इत्यत्राह—ससिद्धाञ्जनेति—यथा सिद्धाञ्जनाक्तचक्षुषां दिवाभीतादिनिशाचरजन्तूनामपि रात्रावालोकनिरपेक्षचाक्षुषं तथा तमोविषये सर्वेषामपि तदनुभवसिद्धमबाधितत्वाद्दुरपह्नवमिति भावः। क्वचित् दृक्स्वभावादिव क्वचिद्दृश्यस्वभावादपि कारणवैरूप्यमनुभवानुरोधादभ्युपगन्तव्यमेवेति भावः॥ ६०॥

तमसः पार्थिवत्वम्

नालोकाभावमात्रं तिमिरमविरतं नीलमित्येव दृष्टे-
नैल्यं त्वारोपितं चेत्कथमिव न भवेत्क्वापि कस्यापि बाधः।
आरोपे चात्र नैल्यं न भवति नियतं भास्वरान्यत्वसाम्या-
न्नात्रादृष्टं नियन्तृप्रतिनियतगुणारोपवक्लृप्तेर्गुरुत्वात्॥ ६१॥

सर्वा०—ये त्वाहुः—आलोकाभाव एवालोकविरोधित्वलक्षणसमानधर्मःस्मारितनैल्योपरक्तो नीलं तम इति गृह्यते; नञुपश्लेषरहितशब्दवाच्यत्वं तु प्रलयादिशब्दन्यायेन स्यादिति; तान्प्रतिवक्ति—नालोकेति॥ अबाधितं नीलोपलम्भं हेतुमाह—अविरतमिति। आरोपितं नीलरूपत्वं नाभावत्वविरोधीत्यभिप्रायेणाशङ्कते—नैल्यं त्विति। आरोपस्य कालभेदेन पुरुषभेदेन वा बाधव्याप्तिमभिप्रेत्याह—कथमिवेति। अविरतमिति सूचितमेतेन व्यञ्जितम्। ननु तमो न नीलम् असत्यालोके चक्षुषा प्रतीयमानत्वादिति बाध इति चेन्न; दृष्टान्तासिद्धेः। आलोकाभाव एव दृष्टान्त इति चेन्न; त्वत्पक्षे पक्षदृष्टान्तभेदाभावात्, अस्मन्मते

तु भावातिरिक्ताभावासिद्धेः, आलोकाभावे दिवाभीतादिचक्षुर्ग्राह्यैर्नैल्यैर्व्यभिचाराच्च। दृग्वैषम्यवद्दृश्यवैषम्यं च व्यवस्थापकं स्यादित्युक्तम्। अतोऽस्मदादिविशेषणेऽप्यनिस्तारः; तमोधर्मभूतनैल्यादिदृष्टान्तस्तु तदभावसाधने विरुद्धः आरोपितनैल्यादिदृष्टान्तस्तु शुक्तिरूप्यशशशृङ्गादिवदनादेयः। अनारोपितं तु सत्येवालोके चक्षुषा गृह्यते; तथाऽपि भ्रान्तिदशायां गृह्यमाणारोपाभावेऽपि चाक्षुषभ्रान्तिविषयत्वादादेवायं हेतुस्सिद्ध इति चेन्न; तमसि नैल्यारोपसिद्धिमन्तरेणास्य हेतोरनुत्थानात्। भवति हि बाधाद्दृष्टान्तलाभः; तेन च स इति मिथःसंश्रयः। अस्पर्शत्वादिर्बाधकान्तरं तु निरस्तम्। अत्र नीलमित्येवेत्यवधारणतात्पर्यभेदसिद्धं दूषणान्तरमाह—आरोपे चेति। अयं भावः—आरोप एवात्र न संभवति। अभावस्य हि स्वरूपमेव हि भेद इति मन्यसे; अतस्तद्ग्रहे तदग्रहे वा कथमारोपः ? एवं च ब्रूषे। आलोको हि भास्वरः, तद्विरोधी च तदभावः, कृष्णद्रव्यमपि भास्वरान्यत्वात्तथैव। अत आलोकविरोधित्वसाधर्म्यात्कृष्णे कृष्णधर्माध्यास इति। एवं सति रक्तपीतादीनामपि तथात्वाविशेषात्तत्र तदारोपः किं न स्यादिति।

अत्र यदुक्तं काणादैः—आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति, तदयुक्तम्। आरोपे सतीत्यसिद्धेः निमित्तस्य चातिप्रसङ्गिनोऽनुसरणायोगात्। यथा च रज्जौ सर्पाध्यासः तथा कदाचिदम्बुधाराद्यध्यासोऽपि किं न भवति ? सत्यां च सामग्र्यां कार्यानुत्पत्तिरिति न लौकिकमेतत्, नच यौक्तिकम्। यच्चोक्तमदृष्टादिकं चात्र नियामकमवसेयमिति; तद्दूषयति—नात्रेति। विचित्रादृष्टभेदविषमिते जगति सर्वजन्तुसाधारणस्य दुरुपशमतावन्मात्रभ्रमहेतोरदृष्टविशेषस्य कल्पनेऽतिगौरवं स्यादित्यभिप्रायेणाह—प्रतिनियतेति ॥ ६१ ॥

आनन्द०—आक्षेपसङ्गत्या न्यायमतमनूद्य दूषयतीत्याह—ये त्वाहुरिति। अलोकवैधर्म्यलक्षणधर्मस्मारितमित्यर्थः।

केचित्तु—(यद्वा)आलोकशब्दः आलोकवत्पर इत्याहुः।

नन्वभावत्वे नञुपश्लिष्टपदबोध्यत्वं न स्यादित्यत्राह—नञुपश्लेषेति। प्रलयस्सर्वकार्य(वि)नाशो ह्यभावरूपः। अविरतपदतात्पर्यमाह—अबाधितेति। बाधितत्वे कदाचिन्नीलान्यत्वेनापि प्रती(तेः)त्य अविरतत्वायोगादिति भावः। तथाचायं प्रयोगः—न तम आलोकाभावः अबाधितनीलबुद्धिविषयत्वात् सम्मतवदिति। प्रत्यक्षबाधविरहेऽपि यौक्तिकबाधेन हेत्वसिद्धिमाशङ्कते नन्विति। व्याप्यत्वासिद्धिमाह—दृष्टान्तेति। पक्षभिन्नस्यैव दृष्टान्तत्वादिति भावः। अस्मन्मत इति। तथा च चाक्षुष द्रव्यस्य रूपवत्त्वात् तस्यैव तमसोऽन्यस्य वा

दृष्टान्तत्वादि(त्यर्थः)ति भावः। अ(त)तोऽस्मदादीति– असत्यालोके(आलोकाभावेपि)अस्मदादिचक्षुर्ग्राह्यत्वादित्युक्तेरि(त्युक्तेपी)त्यर्थः। दृष्ट(ष्टि) वैषम्यानुरोधेनेव दृश्यवैषम्यानुसारेणाऽपि सङ्कोचसम्भवादिति भावः। तमोनैल्यमसदेव किंचित्? उत सदेव? नाद्य इत्याह—आरोपितेति। तथात्वे अतिप्रसङ्ग इति भावः। न द्वितीय इत्याह—अनारोपितं त्विति। तथाचासिद्ध्यसाधारण्ये इति भावः।

ननु बाधाभावेऽपि तमः प्रतीतौ विषयस्य रूपस्य नी(ल)रूपत्वाद्दृष्टान्तत्वसम्भवान्नोक्तदोष इति चेन्न? तथात्वे प्रत्यक्षस्य बलवत्तया बाधप्रसङ्गात्। ननु तमो न रूपवत् अस्पर्शत्वादित्यादिना बाधात् न मिथस्संश्रय इति तत्राह—अस्पर्शत्वादीति। इन्द्रनीलप्रभादौ व्यभिचारादि(रस्स्यादि)ति भावः। अनुद्भूतस्पर्शवत्त्वकल्पने तमस्यपि तद्बाधकाभावात्। ननु भास्वरान्यत्वरूपसादृश्यस्य नीलद्रव्याभावसाधारण्येनारोपहेतुत्वात् कथं नियतारोपाभाव इत्यत्राह—अयं भाव इति।

अत्र मूलस्य–आरोपे च—आरोपपक्षे च अभावे नीलारोपो नियतं–नित्यं न भवत्येव–आरोप एव न सम्भवतीत्येकोऽर्थः। नियतं–नियमेन नीलरूपस्यैवारोपो न रक्तरूपस्येति नियमो न सम्भवनीति द्वितीयः। तदुभयमाह—आरोप एवात्रेत्यादिना। कथमारोप इति—अभावस्य ग्रहे तस्यैव विशेषदर्शनत्वात् तदग्रहे धर्मिज्ञानाभावान्नारोप इति भावः। आरोपनियमे तदुक्तं नियामकमाशङ्कते—अत्र यदुक्तमिति। तथा च न रक्ताद्यारोप इति भावः। निमित्तस्य चेति—एकत्रारोपे सति तदनुसारेण कल्प्यस्य निमित्तस्यातिप्रसक्तत्वे आरोपापादनासम्भवात्; अन्यथा सर्वत्र प्रमेयत्वस्यैव निमित्तत्वकल्पनापत्त्या अवान्तरदोषादिकल्पनावैयर्थ्यादिति भावः। तदेवोपपादयति—यथा चेति। सादृश्यस्योभयारोपसाधारणत्वादिति भावः। किञ्चारोपसामग्र्यां सत्यामप्यारोपाभावः किं दृष्टः? उत कल्प्यः? इति विकल्प्य आद्यं दूषयति—सत्यां चेति। द्वितीयं दूषयति—नच यौक्तिकमिति। व्याप्त्यभावादिति भावः।

ननु सत्यां सामग्र्यां कार्यनियम इति; सत्यम्; तत्रादृष्टविरहात्तदारोपो नेत्याशङ्कते—यच्चोक्तमिति। विचित्रेति – सर्वेषामेकरूपादृष्टसत्त्वे मानाभावात् (दिति भावः।) अन्यत्र सर्वत्र तत एव कार्यसम्भवे दृष्टकारणविलोपप्रसङ्गश्चेति (भाव) द्रष्टव्यम्॥ ६१॥

अक्ष०—आलोकाभाव एव तमः न द्रव्यमिति मतं निरस्यति—नालोकाभावमात्रमिति। कुतइत्यत्राह—अविरतं—नीलमिति—सर्वदा नीलं तम इत्येव प्रतीतेः न नीलमिति कदाचिदप्यप्रतीतेरित्यर्थः नीलत्वमभावत्वविरोधीति भावः।

नन्वारोपितं नीलत्वं नाभावत्वविरोधि आलोकविरोधित्वसाधर्म्यादेव अनीलेऽपि आलोकाभावे नीलत्वारोपः। प्रकृते आलोकोहि भास्वरः तद्विरोधी

च तदभावः नीलमप्यभास्वरं वस्तु भास्वरान्यत्वात्तद्विरोध्येव। अतस्साधर्म्यादेवारोपितं नीलत्वं नाभावत्वं विरुन्ध्यादित्यत्राह—नैल्यंत्विति। आरोपितञ्चेत् कालभेदेन वा बाधस्स्यादित्याशयेनाह—कथमिवेति। कदाचिदपि कस्यचिदपि बाधाभावादनारोपितमेवेदं नैल्यमभावत्वविरुद्धमिति भावः। पूर्वमविरतमित्यनेन सूचित एव बाधाभावः इदानीं व्यञ्जितः।

यद्वा पूर्वं प्रत्यक्षबाधो नास्तीति सूचितः इदानीं प्रत्यक्षातिरिक्तप्रमाणेनापि बाधो नास्तीति व्यज्यते। नचालोकाभावेप्यस्मदीयचक्षुर्ग्राह्यत्वेन लिङ्गेन न नीलमिति बाधोऽनुमीयत इति शङ्क्यम्। दृष्टान्ताभावेन व्याप्तिग्रहानुपपत्तेः। असत्यस्यालोके ससिद्धाञ्जनास्मच्चक्षुषा ग्राह्ये नीले व्यभिचाराच्च। नीलमित्येवेत्यवधारणसूचितं दूषणान्तरमाह—आरोपेचेति—आलोकाभावगतनीलभेदस्य आलोकाभावस्वरूपतया आलोकाभावज्ञाने नीलभेदज्ञाने सतीव नैल्यारोपो न भवत्येवेति भावः। नैल्यं न भवति नियतमिति—नियमेन नैल्यारोपादेव भवतीति वक्तुं न शक्यमित्यर्थः। कुत इत्यत्राह—भास्वरान्यत्वसाम्यादिति। आलोकविरोधित्व साधर्म्यादित्यर्थः। आलोको भास्वरः तदन्यत्वं तद्विरोधित्वं तच्च यथा आलोकाभावस्य नीलस्य च समं तथा रक्त पीतादेरपीति तथाविधसाधर्म्यादारोपे रक्त पीतादेरपि कदाचित्कस्यचिदारोपसंभवात् नैल्यस्यैवारोप इति न नियन्तुं शक्यमिति भावः। अदृष्टविशेष एवात्र नियामक इत्युक्ति निराकरोति—नात्रादृष्टमिति—नियन्तृनियामकादृष्टमेवात्र नियामकमिति कल्पनं न युक्तमित्यर्थः। कुत इत्यत्राह—प्रतिनियतेति—विजातीयादृष्टशालिनां सर्वेषामपि जनानां तमोनैल्यगुणारोपनियामकसजातीयादृष्टकल्पने अतिगौरवादिति भावः॥ ६१॥

ध्वान्तं तेजश्च नासीदिति मुनिभिरुपाख्यायि संवर्तवार्ता
भावाभावौ निषेद्धुं तदुभयविधिवद्व्याहतत्वादशक्यम्।
अन्तर्यन्तुश्च तेजःसहघटिततमो देह इत्यामनन्ति
स्याच्चाभावोऽपि भावान्तरमतिमथने वक्ष्यमाणक्रमेण॥ ६२॥

सर्वा०—आलोकाभावपक्षस्यागमवैगुण्यमाह—ध्वान्तमिति॥ अर्थोपादानमेतत्—शब्दस्तु *नासीत्तमो ज्योतिरभून्न चान्यदिति। कथमस्य प्रकृतविरोधित्वमित्यत्राह—भावाभावाविति। न हि कस्यचिदेकदैकत्र भावाभावविधिश्शक्यते; तद्वदुभयनिषेधोऽप्यशक्यः। अन्तत उभयनिषेधस्य उभयविधिविश्रमणेन व्याघातादिति भावः॥ ६२॥

आनन्द०—प्रसङ्गसंगतिमा(पूर्वसंगत्याऽऽ)ह—आलोकाभावस्येति। मूलस्यायमर्थः—मुनिभिः—पौराणिकैः 'नासीत्तमो ज्योतिरभून्न चान्यत्' इत्यत्र नमस्तेजश्च नासीदिति। संवर्तवार्ता—प्रलयवचनम्। एकस्मिन् काले भावाभावविधिवन्निषेधोऽप्यशक्यः। शक्यमिति विभक्तिप्रतिरूपकमव्ययमिति न विशेष्यनिघ्नतेति केचित्। अपरे तु—'निषेद्धुं व्याहतत्वादशक्यम्' इति भिन्नं वाक्यम्। तत्किमित्यपेक्षायां भावाभावावित्यपरं वाक्यम्। अत एव महाभाष्ये पस्पशायां श्वमांसादिभिरपि क्षुदुपहन्तुं शक्यमित्यत्र कैयटः उपहन्तुं शक्यं इत्येकं वाक्यम्। तत्किमित्यपेक्षायां क्षुदित्यपरम्; तथा च सामान्ये नपुंसकत्वमेकवचनत्वं चेति वदन्ति।

वस्तुतस्तु (अन्येतु--)—भावाभावाविति तुमुन्नन्तकर्म। कृदन्तत्वेऽप्यव्ययत्वान्न षष्ठी। तथा च तुमुन्नन्तार्थ एव प्रधानमिति तत्रैव विधेयाशक्यत्वान्वये भावाभावनिषेधनमशक्यमिति(वाक्यार्थः) पर्यवस्यति। तुमुनोऽव्ययत्वेन क्लीबत्वं चाशक्यमित्यस्योपपन्नमिति ध्येयम्। अन्तर्यन्तुः—अन्तर्यामिणः। देहैः 'यस्यात्मा शरीरम्' 'यस्य तमश्शरीरम्' इत्यादिभिः सहपठितो ध्वान्तो देह इत्यामनन्ति—निश्चिन्वन्ति। निर्वन्धेन तेजोऽभाव इति पक्षेऽपि भाव एव सः। तत्र हेतुः वक्ष्यमाणक्रमेणेति ॥ ६२ ॥

अक्ष०—तमसः आलोकाभावरूपत्वे प्रत्यक्षप्रमाणविरोधमुक्त्वा संप्रत्यागमविरोधमाह—ध्वान्तमिति। तमः तेजश्च प्रलये नासीदिति पुराणकारैर्मुनिभिः "नासीत्तमो ज्योतिरभून्नचान्यदि"ति प्रलयश्रुतिः व्याख्यातेत्यर्थः। ततः किमित्यत्राह—भावाभावाविति—तेजस्तदभावोभयमपि निषेद्धुमेकदा तदुभयविधिवद्विरुद्धत्वादशक्यमित्यर्थः। प्रतियोगितदभावोभयनिषेधस्य तदुभयविरुद्धविधौ पर्यवसानादिति भावः।

अन्तर्यामिब्राह्मणे "यस्य तमश्शरीर" मित्यन्तर्यामिणं प्रति शरीरत्वाम्नानादपि तमसो द्रव्यत्वमभ्युपेतव्यमित्याह—अन्तर्यन्तुश्चेति। तमश्शरीरमित्यत्र तमश्शब्दस्य अव्यक्तसूक्ष्मपरत्वशङ्काव्यावृत्तये तेजस्सहपठितेति स्थूलभूततृतीय सहपाठात् तद्विरोधिस्थूलतमः परत्वमेव युक्तमिति भावः। देह इत्यामनन्तीति—शरीरमित्यभिधीयत इत्यर्थः द्रव्यस्यैव हि शरीरत्वमिति भावः। अभावत्वाभ्युपगमेऽपि तमसो भावरूपत्वमेवेत्याह—स्याच्चेति। अभावोऽपि भावान्तरमिति गवादिनिष्ठः अश्वत्वाद्यभावः गोत्वादिरूप एव नातिरिक्त इति भावः। अतिमथन इति—सम्यग्विवेचने इत्यर्थः तत्कथमित्यत्राह—वक्ष्यमाणेति-ग्रन्थान्ते "सोऽभाव" इत्यादिना वक्ष्यमाणेत्यर्थः। यथा अतिरिक्ताभाववादिभिरपि द्वितीयाद्यभावस्य प्रतियोगिरूपत्वमुपगम्यते तथा प्रथमाभावस्याऽपि स्वविरुद्धभावरूपत्वमेव लाघवादभ्युपगन्तुं युक्तमिति भावः ॥ ६२ ॥

तमस आलोका भावत्व निरासः

तिष्ठत्युर्वीभचक्रं पवनरयवशाद्भ्राम्यतीत्युक्तमाप्तै-
भ्रान्तैः क्लृप्तं त्रिलोकीभ्रमणमिह तथा मेदिनीभ्रान्तिपातौ ।
तद्भ्रान्तौ प्राक्प्रतीचोः प्रसजति पतने पत्त्रिणोस्तारतम्यं
पाते गुर्व्यास्तु तस्याः प्रलघु दिवि समुत्क्षिप्तमेनां न यायात् ॥६३

सर्वा०—भूप्रसङ्गाद् तद्भ्रमणादिपक्षं निराकर्तुं स्वपक्षं तावदाह-तिष्ठतीति ॥ आप्तैः—पुराणादिकर्तृभिस्तदनुसारिभिश्च । आप्तिश्च तेषां *हिरण्ययेन सविता रथेनेत्यादिश्रुत्यनुसारात् । अस्मिन् पक्षे सर्वलोकोपलम्भस्वारस्यमस्ति । न च गणितादिविरोधः । कक्षीकृतश्चायं पक्षः कार्तान्तिकैरपि । यथाऽऽह आर्यभटः—

उदयास्तमयनिमित्तं नित्यप्रवहेण वायुनाऽऽक्षिप्तः ।
लङ्कासमपश्चिमगो भपञ्जरस्सग्रहो भ्रमति ॥ इति ।

केचित् *उत्ताना ह वै देवगवा वहन्ति इत्यादिनिर्वहणाय त्रैलोक्यभ्रमणं स्वीकृतम्, तदुपालभ्यते—भ्रान्तैरिति । यथा स्वयं भ्राम्यन्तो बालिशा भुवं भ्राम्यन्तीमभिमन्यन्ते तथेदमिति भावः । यदि स्थिरतयैव दृष्टानां ग्रहनक्षत्राणां भ्रमणं कल्प्यते तदविशेषाद्भुवोऽपि कल्प्यतामिति चेन्न; अपेक्षितस्यान्यथैव सिद्धेः । अत्र *अनुलोमगतिर्नौस्थ इत्यादिषु स्थापितस्य भूभ्रमणवादस्य जनोक्तस्य च भूपतनस्य भ्रान्तिकल्पितत्वमतिदिशति—तथेति । इषीकाप्रोतपत्त्रिकादिवत्स्वदेशं मुञ्चन्ती द्रुततरमधरोत्तरवृत्त्या भूः भ्रमतीति हि तद्भ्रान्तिपक्षः । अत्रोत्क्षिप्ताश्शरशिलादयः स्वदेशे तदासन्ने वा कथं निपतेयुः, नित्यं च स्वदेशपश्चिमभाग एव तेषां निपातस्स्यात् । उड्डीनाश्च पक्षिणो न कुलायमासीदेयुः, प्रत्यङ्मुखं पततां च तेषां गन्तव्यानि स्वयमपि तूर्णं प्रतिगच्छेयुः । प्राङ्मुखं गच्छतां तु दुःखेनापि न सन्निकृष्येरन् । एकदेशस्थिते च वर्षति बलाहके मुहूर्तमात्रान्मही शतयोजना सिच्येत । अतिकुशलानामपि धन्विनां दक्षिणोत्तरदिग्देशावस्थितस्थिरलक्ष्यवेधो न स्यात् । शरविहङ्गादीनामपि धरणीसममेव वायुना नोदनान्नोक्तप्रसङ्ग इति चेन्न, तथाविधस्य प्रबलमारुतस्यानुपलम्भनिरस्तत्वात्, सर्वेषां प्रत्यङ्मुखगतिप्रतिरोधप्रसङ्गाच्च । यो हि महापृथिवीं प्रभञ्जनः प्रसभमार्तयति तं कथं लघीयांसो विहङ्गादयः प्रतिसरेयुः ? किंतु पृथिव्याः पूर्वमेव प्राङ्मुखं दूरमपनीयेरन् ? किंच ज्योतिर्गणभ्रमणहेतुर्मारुतश्शास्त्राभ्यनुज्ञानात् प्रत्यक्षविरोधाभावाच्च संगृह्यते, भूभ्रमणहेतुस्त्वसौ शास्त्रोपलम्भविरोधान्न कल्प्यः; भुव एव वायुवददृष्टवशात्तादृशभ्रमणोपपत्तेः । स्यादेवं किं नश्छिन्नमिति चेन्न; उपलम्भानुसारस्य छिन्नत्वात् । अत एव अनन्ततारागृहभ्रमणकल्पनादेकभ्रमणकल्पनं वरमित्ययुक्तम्; ताराभ्रमणादेरागमिकस्याकल्प्यत्वाच्च । तदेतत्सर्वमभिप्रेत्याह—तद्भ्रान्ताविति । भूपतने दोषमाह—पात इति ।

अयं भावः—पातो हि भुवो न तावदुपलम्भागमाभ्याम्, तयोरिह तद्वि-

परीतत्वात् । नाप्यनुमानतः, गुरुत्वात्पतनस्य प्रतिबन्धके निरोधोपपत्तेः । निरालम्बने निरवधौ नभसि नित्यं निपतन्तीमलब्धप्रतिष्ठां भुवं कः प्रतिरुन्ध्यादिति चेन्न; *वासुदेवस्य वीर्येण विधृतानीत्यादिना तत्सिद्धेः । भूपतने चोत्क्षिप्ताशिलादयो न कदाचिद् भुवं प्राप्नुयुः । गौरवप्रकर्षकाष्ठाभूताद्भूमण्डलादतिलघीयसां रजःप्रभृतीनामधिकपतनकल्पनं चोपहास्यम्; पोतवालुकादिन्यायस्त्विह दुर्वचः, उपष्टम्भकादिविशेषस्यानभ्युपगमात्; तत्कल्पने च तस्याप्यन्यत्कल्प्यम् इत्यनवस्थानात्, वायुविशेषस्योपष्टम्भकत्वकल्पने तेनैव नित्यमपतनमिति किं न रोचते ? तदिह युक्तिमात्रशरणानां निराधाराऽपि स्वभावादेव तिष्ठति भूमिः । आगमानुविधायिनां तु सर्वाधारेण ब्रह्मणा सोपधानं निरुपधानं च विधृतेति । अत एव पृथिव्याधारस्थिरतरकर्परक्लृप्तिर्निरस्ता । कर्परस्यापि निराधारस्य स्थित्यनुपपत्तेः, चतुरुदधिसंक्षोभसहत्वस्य पृथिव्यामेव कल्पयितव्यत्वात् ।

ये च पतनोत्पतनस्वभावभूतचतुष्टयमयत्वान्न पतति नोत्पति च भूपिण्ड इत्याहुः, तेषामन्यूनानतिरिक्ततादृशावस्थानोचितपरिमाणैर्भूतैरारब्धः परिदृश्यमानमृच्छिलादिविलक्षणश्चागत्याऽन्य एव भूपिण्ड इत्यादिकल्पना केवलमूहमात्रसिद्धा ।

अन्ये—दक्षिणोत्तरध्रुवयोरयस्कान्तसमाधिं भूगोले चायस्समाधिमारोपयन्ति,; तेऽपि कल्पनागौरवोपहताः; भूगोलस्यैव हि तादृशशक्तिकल्पनं युक्तम्; न तु दवीयसोरात्मस्थितिनिर्वाहसापेक्षयोः ध्रुवयोः ।

केचिद्भूगोलघनमध्यदेश एव सर्वेषामधोऽधोदेशः, तदभिमुखदत्तचरण एव स्थलजलचरः सर्वो जन्तुवर्गः । भूमिस्तु तदाश्रिता नानाकेसरपरिवृतकदम्बकुसुमग्रन्थिवन्मक्षिकावृतमधुगोलवच्च तिष्ठति । अमरा नराश्च परस्परमधःस्थितान् मन्यन्ते । पतनं च सर्वेषां भूगोलमध्यदेशाभिमुखमेव । पृथिव्यंशास्त्ववकाशालाभान्न तत्र प्रविशन्ति । अतो महापृथिव्या न कदाचित्पतनम्, तामपेक्ष्य कस्यचिदधोदेशस्याभावात् इति । तदेतद्भुवोऽधस्तादुपरि च लोकानुपदिशद्भिश्शास्त्रैरुपरुध्येत ।

यत्तु—*पातालदेशाः क्षितिगोलमध्ये सप्तोपदिष्टास्तलपूर्वकास्ते इति, यदपि *मेरुर्योजनमात्रः प्रभाकरो हिमवता परिक्षिप्तः । नन्दनवनस्य मध्ये रत्नमयस्सर्वतोवृत्तः ।। इत्यादि, तदिदं गणितविसंवादाभावेऽपि शास्त्रान्तरविरुद्धं न कल्प्यं न चोपदिष्टमिति श्रद्धातव्यम् ।। ६३ ।।

आनन्द०—प्रसङ्गसङ्गतिरित्याह—भूप्रसङ्गादिति । तदनुसारिभिश्चेति । आर्यभटादिभिश्चेत्यर्थः । हिरण्म(ण्य)येनेति – देव आयातीत्यागमनादिकं भचक्रभ्रमणानुगुणमिति भावः । उपलम्भश्च भूम्याः स्थिरतया भचक्रस्य गतिमत्त्वेनेत्याह - अस्मिन्निति । ज्योतिश्शास्त्रे चायं पक्षः स्वीकृत इत्याह—कक्षोकृतश्चाय-

मिति। तदेवाह—यथेति। उदयास्तमयनिमित्तं उदयास्तमयार्थम्। लङ्कायाः पश्चिमगस्सग्रहः। भचक्रस्य हि लङ्काद्वीपस्थान् प्रति पश्चिमगतयोपलब्धिरिति सम्प्रदायः। भपञ्जरः—भचक्रम्। नित्यप्रवहेण—सदागतिमता। वायुना क्षिप्तः परिभ्रमतीत्यर्थः।

नित्यं त्रिलोकी भ्रमति श्रुतिवाक्यानुसारतः।
अतो भचक्रं भ्रमति विपरीतं ग्रहान्वितम्॥

इति गणितैकदेशिमतमनुवदति—कश्चिदिति। भ्रमणेनोपर्यधोभावे देवगवानामुत्तानतासम्भवादुतानत्वं भ्रमणे लिङ्गमिति भावः। यथा स्वयमिति—'उत्ताना ह वै' इत्यादेः 'प्रजापतिरात्मनो वपामुदक्खिदत्' इत्यादिवदर्थवादतयाऽन्यपरत्वादिति भावः। अपेक्षितस्येति—उदयास्तमयादेरित्यर्थः। यद्वा उत्तानादिवाक्यनिर्वाहस्येत्यर्थः। निर्वाहस्तूक्त एव।

अनुलोमगतिर्नौस्थः यद्वज्जन्तुश्चरति भूमध्ये।
नित्यं भ्राम्यति भूमिः नित्यप्रवहेण वायुना नुन्ना॥

इति ज्योतिश्शास्त्रैकदेशिनां मतं;

निराधाराभूमिः नित्यमधः पातिनी यस्मात्।

इति जैनमतं च दूषयितुमनुभाषते—अत्रानुलोमगतिरित्यादिना। भूभ्रमणपक्षे दूषणमाह—तत्रोत्क्षिप्ता इति।

यत्र स्थितेनोत्क्षेपः कृतः भ्रमणे सति तदन्यदेशस्यैव तदाकाशऋजुप्रदेशत्वात् तदन्यदेशे पतनं स्यात्। प्राग्देशपतनार्थं क्षिप्तस्य पाषाणादेः इषुयन्त्रक्षिप्तपाषाणादिवत् क्षेपः परभागे पातप्रसङ्गश्चेत्यर्थः। उड्डीनाश्चेति—तीव्रतरं भ्रमणेन प्रतिक्षणं कुलायादिपुरो धावन्ने(न्नि)वानुधावता दूरस्थ एव स्यादित्यर्थः। प्रत्यङ्मुखं पततामिति—यत्र पक्षी तत्र कुलायादेस्सन्निध्यसम्भवादिति भावः। प्राङ्मुखमिति—उद्देश्यदेशस्य पूर्वन्यायेन दवीयस्त्वादिति भावः।

ननु शरविह(शरतर)ङ्गादि क्षिप्तं तीव्रतरेण वायुना नोदनात् यत्र स्वगन्तव्यदेशः तत्र गच्छतीति नैते दोषा इति शङ्कते-शरविहङ्गादीनामिति। तथाविधस्येति-तथाच पूर्वोक्तदोषास्स्युरिति भावः। तदङ्गीकारे बाधकमप्याह—सर्वेषामिति। आकाशसंचारिणामित्यर्थः। तदेवोपपादयति—यो हीति। किञ्च भूभ्रमणे कारणाभावमप्याह—किञ्चेति। शास्त्रदृष्टविरुद्धकल्पनेऽपि भुव एव तादृशभ्रमणसामर्थ्यं कल्प्यतां किं तादृशवायुनेत्याह— भुव एवेति। किं नश्छिन्नमिति—भूभ्रमणस्याभीष्टस्य सिद्धत्वादिति भावः। उपलम्भेति—भुवः स्थैर्यस्योपलम्भादित्यर्थः। अत एवेति —उपलम्भविरोधादेवेत्यर्थः।

ननु तर्हि भचक्रभ्रमणमपि न स्यादित्यत्राह—ताराभ्रमणादेरिति।

इदमुपलक्षणम्—तारादेर्विदेशप्राप्तिश्च दृश्यत इति भ्रमणलिङ्गं तत्रास्ति; न च भूभ्रमणे लिङ्गं वास्तीति भावः।

ननु तारादेः देशान्तरस्थतया दर्शनं न तल्लिङ्गं भवितुमर्हति; भूभ्रमणेन द्रष्टुः विप्रकर्षमात्रादपि तत्प्रतीतेरिति चेन्न; तारादेर्देशान्तरस्थताज्ञानं तत्रैव गतिमनुमापयति। परामर्शस्य स्वविषयसमानाधिकरणस्यै(णतयै)वानुमापकत्वात्। स्थिरस्य पर्वतादेर्निकटदृष्टस्य दूरे दृष्टिस्तु न पर्वतस्य गतिमनुमापयति; तत्र द्रष्टुर्गतिमत्त्वस्य प्रत्यक्षदृष्टत्वेन अन्यथासिद्धत्वात् न च तारादेरनेकस्य भ्रमणकल्पनागौरवम्; चक्रस्यैकस्यैव भ्रमणकल्पनादिति भावः। तद्भ्रान्ताविति मूलस्य प्राक्प्रतीचोः पत्रिणोः पतने तारतम्यं—व्यत्यासः प्रसजति—प्राक्पततः पश्चिमत्वं प्रत्यक्पततः प्राक्त्वं प्रसजतीत्यर्थः। ननु पतनस्य प्रामाणिकत्वे दोषः कथञ्चित्परिहर्तव्य इत्यत्राह—**अयं भाव इति**। पतने प्रमाणाभावादिति भावः।

नन्वनुमानमेव प्रमाणमित्याह—**गुरुत्वात्पतनस्येति**। गुरुत्वेऽपि दृढतरबद्धस्य पतनाभावाद् व्यभिचार इति भावः। प्रतिवन्धकाभावविशेषितं गुरुत्वं पतनलिङ्गमिति चोदयति—**निरालम्बे इति**। **निरवधित्वं**—सन्ततपतनहेतुः। तथा च सर्वदा निरालम्बत्वे सति गुरुत्वात् सन्ततपतनमनुमीयत इत्यर्थः। हेत्वसिद्धिमाह—**वासुदेवस्येति**—

वासुदेवस्य वीर्येण विधृतानि महात्मनः।

इति विष्णुपुराणादौ भूम्यादेर्विधृतत्वप्रतीतेरित्यर्थः। प्रमाणाभावमुक्त्वा बाधकतर्कमप्याह—**भूपतने चेति** उत्क्षिप्तशिलादेः पतनेन भूप्रदेशप्राप्तिसमयेऽन्धकूपादौ प्रथमपतितशिला(तल)वत् भुवोऽतिवेगेनाधःपातात् पश्चात्पतच्छिलायाः प्राक्पतच्छिलाप्राप्त्यभाववत् भूप्राप्तिरेव कदाऽपि न स्यादिति भावः। ननु प्रथमं पतत्तृणादितः पश्चात्क्षिप्तपाषाणादिकं पतनकाल एव वेगातिशयात्प्राप्नुवद्दृष्टमित्यत्राह—**गौरवप्रकर्षेनि**। नन्वत्यन्तगुरुभूतस्यापि पोतस्य जलधेः पतनं मन्दं दृश्यते; वालुकायास्तु लघीयस्याः शीघ्रं दृश्यत इति कथमपहास्यता? इत्यत्राह—**पोतवालुकेति**। तत्र युक्तं गुरुतरस्यापि पोतस्य पृथुतया जलेन प्रतिवन्धात् पतने वेगाभावः; न चात्र तथा प्रतिबन्ध इति भावः। नन्वत्राप्युपष्टम्भकमस्त्वित्यत्राह—**तत्कल्पने चेति**। तथाच गौरवमिति भावः।

ननु वायुविशेष उपष्टम्भकनिरपेक्षउपष्टम्भको भवत्वित्यत्राह—**वायुविशेषस्येति**। वायुविशेषस्योपष्टम्भकस्य कल्पनापेक्षया स्वभावादवस्थानं कल्प्यताम्! लाघवात् इत्याह—**तदिहेति**। भवद्भिः किमिति नाभ्युपगम्यते? इत्यत्राह—**आगमानुविधायिनामिति**। **सोपधानं**—कूर्मदिग्गजनागराजादिशरीरद्वारकम्; सङ्कल्पमात्रेण च धृतिरित्यर्थः। ये तु शैवाः—

सामुद्राम्भसि विन्यस्तकर्परस्था तु मेदिनी।
संक्षोभं सा तु नायाति तरङ्गावर्तसंकुला ॥

इत्याहुः, तन्मतमनुवदति—अत एवेत्यादिना।

दूषणमाह—कर्परस्यापीति। बाधकं परिहरति—चतुरुदधीति। ये चेति—वायुतेजसोरुत्पतनस्वभावत्वात् भूजलयोः पतनस्वाभावत्वात् परस्परकार्यप्रतिबन्धेनावस्थानमित्यर्थः। तेषामिति—दृश्यमानस्य भूपिण्डस्य पृथिवीभूयस्त्वेन भूतान्तरावयवसमत्वादिति भाव;।

'उभयोर्भूम्ना ध्रुवयोः विधृतेयमयस्कान्तनित्या भूः।

इति ज्योतिर्मतमनूद्य दूषयति—अन्ये इत्यादिना। मरीचिसिद्धान्तं दूषयति—केचिदित्यादिना।

भूगोलस्य पिण्डस्य मध्यदेशः कठिनीभूतपिण्डाकारेण परितश्च घनीभूतो भूगोलो मध्यस्थसौरमण्डलकसौरप्रभान्यायेन वर्तते। तन्मध्यस्थकठिनप्रदेशन्यस्तचरणास्तदभिमुखाश्च सर्वे जन्तवो वर्तन्ते। अत एव सर्वेषामुपर्यधोभावबुद्धिः नरामराणां भवति। भूलोकादयश्च तदाश्रिताः। तथाच कदम्बग्रन्थिः केसरपरिवृत इव कठिनीभूतभूगोलमध्यदेशो जन्तुवर्गं (लोक) परिवृतो भवति। जन्तूनामपि पततां पतनमपि भूगोलमध्यभूतकठिनप्रदेशाभिमुखमेव। तेषां च भूम्यंशभूतानां न तत्र भूमध्यभागे प्रवेशः। काठिन्येन निबिडतया परिसरप्रदेश इवावकाशाभावादित्यर्थः। अत इति—यतोऽवकाशे नास्ति महापृथिव्याः ततो न पतनमित्यर्थः। अवकाशाभावे हेतुः—तामपेक्ष्येति। यथा भवतां प्रकृतिरध उपरि (तः) च व्यापिनी ततोऽतिरिक्तप्रदेशो न; तथा भुवः सर्वत इत्यर्थः।

भूगोलमध्य एव ज्योतिश्शास्त्रे पातालादय उपदिष्टा इति पक्षान्तरेऽपि शास्त्रविरोधस्समान इत्याह—यस्त्विति। तदिदमिति—तस्यान्यपरत्वेन *लोकोपदेशपरत्वाभावादित्यर्थः ॥ ६३ ॥

अक्ष०—प्रसङ्गात् भूभ्रमणपक्षं निरसितुं स्वपक्षमाह—तिष्ठतीति-उर्वी—भूमिः। न भ्रमति स्थिरैव भवतीत्यर्थः। भचक्रं—नक्षत्रग्रहचक्रम्। पवनरयवशात्—तत्रत्यवायुवेगबलात्। भ्राम्यति—परिभ्रमतीत्यर्थः प्रत्यङ्मुखं गच्छतीति यावत्। इत्युक्तमाप्तैः—पुराणकर्तृभिः। तदनुसारिभिः आर्यभटादिभिश्चेत्यर्थः। यथाहार्यभटः—

"उदयास्तमयनिमित्तंनित्यप्रवहेण वायुनाऽऽक्षिप्तः।
लङ्कासम पश्चिमगोभपञ्जरस्सग्रहो भ्रमती" ति ॥

नक्षत्रग्रहचक्रं ऊर्ध्वं सदागतिना वायुनाप्रचलितं लङ्काद्वीपस्थानां पश्चिमगामितयोपलभ्यमानं भ्रमति ततएव उदयास्तमय व्यवहार इति तदर्थः। एषामाप्तत्वं "हिरण्ययेन सविता रथेना देवो याति" इति श्रुत्यनुसारात्।

अत्र केचित् "उत्तानाहवै देवगवा वहन्ति" इत्यादिनिर्वहणाय त्रिलोकीभ्रमण-मुपयन्ति। भ्रमणेन उपर्यधोभावे देवगवानामुत्तानत्वसंभव इति तेषामभिमानः। सतु स्वयं भ्राम्यतां बालिशानां भूभ्रमणप्रत्ययवत् भ्रमएवेत्याशयेन तानुपालभते— भ्रान्तैरिति। "उत्तानाहवै" इत्यादि वाक्यं सन्निहितायाः पृथिव्याः स्थैर्यदर्शनेन बाधितं भ्रमणं कल्पयितुमक्षमम्। आदित्योयूप इत्यादि वाक्यवत् न यथाश्रुतार्थे प्रमाणं भवतीति भावः।

अथ कण्टकादिप्रोततालपत्रिकादिवदधरोत्तरं परिभ्रमति भूरिति वादिनां निरालम्बनत्वात् गौरवातिशयाच्च सदा पतन्त्येवास्ते इति वादिनाञ्च भ्रान्तत्व-मतिदिशति—तथेति। मेदिनीभ्रान्तिपाताविति—पृथिव्याः प्राङ्मुखं भ्रमणमिति ज्योतिर्विदेकदेशिनः। नित्यं पतनमिति जैना वदन्ति। उभयेऽपि भ्रान्ता एवेति भावः। कुत इत्यत्राह—तद्भ्रान्ताविति। प्राक्प्रतीच्योरिति—प्राक्प्रत्यग्देशयोः सप्तमीयं प्राक्प्रत्यग्देशोद्देशेनेत्यर्थः। पतने—गमने। पक्षिणोः—प्राङ्मुखं गच्छतः प्रत्यङ्मुखं गच्छतश्चेति भावः। तारतम्यं प्रसजतीति—प्रत्यङ्मुखं गच्छतः पक्षिणः गन्तव्यदेशप्राप्तिः प्राङ्मुख पृथिवीभ्रमणेन अविलम्बेन स्यात्' प्राङ्मुखं गच्छतस्तु प्राङ्मुखभूभ्रमणवेगेन गन्तव्यदेशस्य विप्रकर्षातिशयात् विलंबेनापि तत्प्राप्तिर्दुर्घटैव स्यादिति भावः। पतनपक्षे दोषमाह—पात इति—गुर्व्या इति—गुरुत्ववत्या इत्यर्थः। तस्याः भुव इत्यर्थः। प्रलघु—प्रकृष्टलाघवोपेतः। अत्यन्त-लघुक्षुद्रलोष्टादिकमित्यर्थः। दिवि—आकाशे। समुत्क्षिप्तम्—ऊर्ध्वं क्षिप्तम्। एनां—पृथिवीम्। न प्राप्नुयादित्यर्थः। अत्यन्तलघुवस्त्वपेक्षया गुरुवस्तुनः गौरवाधिक्येन पतनातिशयस्य दुरपह्नवत्वाद धोदेशादेव पतन्त्याः पृथिव्याः गुर्व्याः ऊर्ध्वदेशात्पततः लघुवस्तुनो योग एव न भवितुमर्हतीति भावः॥ ६३॥

भूभ्रमण-पतन पक्ष भङ्गः

ज्योतिश्शास्त्रं पुराणाद्यपि न हि निगमग्राह्यमन्योन्यबाध्यं
विद्यास्थानं तु सर्वं प्रतिनियतनिजोपक्रियांशे प्रमाणम्।
तात्पर्यं तर्कणीयं तदिह बहुविदा भूपरिध्यादिभे[दे]दैः
दुर्ज्ञानं सर्वथा यन्मुनिभिरपि परैस्तत्र तूदासितव्यम्॥ ६४॥

सर्वा०—भूपरिधिकल्पनादिषु वैदिकशास्त्रद्वयविरोधं परिहर्तुमाह—ज्योति-रिति॥ निगमग्राह्यमिति हेतुगर्भम्; यद्युभयबाधोऽन्यतरबाधो वा, न तत्र बाधितस्य वेदोपकारकत्वं स्यादिति भावः। कथं वा विरुद्धयोस्साकल्येन प्रामाण्य-मित्यत्राह - विद्यास्थानमिति। येनयेनोपकारेण दशविद्यास्थानानि वेदैरुपजीव्यन्ते, तत्रांशे विरोधाभावात्प्रामाण्यं प्रतिष्ठितमित्यर्थः। अंशान्तरे कथमित्यत्राह—तात्पर्यमिति। न ह्यन्यपरवाक्यैरापातप्रतीतार्थस्थापनम्; यत्र च तात्पर्यं तत्र च

न विरोध इति भावः। ननु ज्योतिरागमे पञ्च सिद्धान्ताः प्रवृत्ताः, पुराणेष्वप्येवं मतभेदा दृढाः। तत्रान्यतमप्रतिक्षेपे मुनयोऽपि यदि मुह्यन्ति किं कर्तव्यमित्यत्राह— दुर्ज्ञानमिति। परैः—ऋषिव्यतिरिक्तैरस्मदादिभिरित्यर्थः॥ ६४॥

आनन्द०—प्रसङ्गस्सङ्गतिरित्याह—भूपरिधीति। भूपरिधिः—भूगोलमित्यन्ये। भुवो मर्यादित्यपरे। पूर्वोक्तन्यायेन ज्योतिश्शास्त्रपुराणयोर्विरोधादिति भावः। ननु तत्र कस्यचिद् बाधोऽस्त्वित्यत्राह—अन्यतरबाध इति। न तत्रेति— तथाच विद्यास्थानेषु परिगणनविरोध इति भावः। येनयेनेति—ज्योतिश्शास्त्रं कालनिर्णायकत्वेनोपकरोतीति तत्र कृत्स्नं प्रमाणम्; पुराणादीनि तत्वांशादिनिर्णाकत्वेनेति तत्र प्रमाणम्; विरोधाभावादिति भावः। ननु विरोधस्थले कथं निर्वाहः? इत्यत्राह—न ह्यन्यपरेति। तत्रान्यपरवाक्यानुसारेण नयनमित्यर्थः; तथा च सर्वमपि स्वतात्पर्यांशे बाधाभावात् प्रमाणमिति भावः। पुराणेष्वेवान्योऽन्यं यदि विरोधः तथा ज्योतिश्शास्त्रेषु च यदि विरोधः तदा कथम्? इत्याशङ्क्य तत्तन्निर्णायक ऋषिवचनानुसारेण निर्णयः कार्योऽन्यथा विकल्प इत्यभिप्रायेणाह— नन्वित्यादिना। यदि तत्वांशविरोधो दुष्परिहरः तदा कल्पभेदेन विकल्पः। यदि कालांशे विरोधः तदा देशभेदेनेति भावः॥ ६४॥

अक्ष०—भूगोलमानादि विषये ज्योतिश्शास्त्रपुराणादिविरोधे किं प्रमाणं किमप्रमाणमित्यत्राह—ज्योतिश्शास्त्रमिति। पुराणाद्यपीति—आदिशब्दादितिहासग्रहणं। निगमग्राह्यमिति—अङ्गतया उपबृंहणतया वा स्वोपकारकतया वेदैरपेक्षणीयमित्यर्थः। हेतुगर्भमिदं विशेषणं उभयोरपि वेदोपकारकत्वात्। नान्योन्यबाध्यं—नान्यतरेण तदितरबाध इति भावः। कथं विरुद्धयोरुभयोरपि प्रामाण्यमित्यत्राह—विद्यास्थानमिति। सर्वं प्रतिनियतेति—चतुर्दशसु विद्यास्थानेषु चतुर्भिर्वेदैरवशिष्टानि दश विद्यास्थानानि येन येनोपकारेण उपजीव्यन्ते तत्र तत्र अंशे विरोधाभावात् सर्वेषामपि प्रामाण्यं प्रतिष्ठितमित्यर्थः। ज्योतिश्शास्त्रस्य वैदिककर्मानुगुणकालाद्यवबोधनं; पुराणादेस्तु वेदोदित परावरतत्वनिर्धारणादिकं उपकार इति नियमो विभावनीयः। इतरांशे कथमित्यत्राह—तात्पर्यमिति। तर्कणीयं—ऊहनीयं। तत्। तस्मात् प्रतिनियतांश एव तात्पर्यात्। इह—अंशान्तरे आपातविरोधप्रतीतिविषये। बहुविदा—अनेकग्रन्थदर्शिनेत्यर्थः अन्यपरोक्तीनां तत्परग्रन्थान्तरोक्त्यनुरोधेन भूपरिध्यादिभेदे तात्पर्यं निर्धारणीयं नत्वापातप्रतीतिमात्रमवलम्ब्य यत्किञ्चिद् बाधितव्यमिति भावः।

ननु ज्योतिश्शास्त्रे पुराणादौ च क्वचिद्विरुद्धानेक मतप्रदर्शने सत्यपि कस्याप्यप्रतिक्षेपात् किं तत्र कर्तव्यमित्यत्राह—दुर्ज्ञानमिति। ज्ञातुमशक्यमित्यर्थः। सर्वथेति—कालदेशभेदेनाऽपि दुर्ज्ञानमित्यन्वयः। यत्—भूगोलमानादिकं। मुनि-

भिरपीति—अस्य दुर्ज्ञानमित्यत्रान्वयः। तत्र—तस्मिन्विषये। परैः—अस्मदादिभिः। उदासितव्यं—उदासीनैः भवितव्यम् नैकतरनिर्णये प्रवर्तितव्यमिति भावः ॥६४॥

भू-परिमाणादिवाक्येषु परस्परविरोधपरिहारः

सूर्यावृत्त्याद्युपाधिव्यतिकरवशतः कालताऽस्त्वम्बरादे-
रन्यस्मिन्नन्यधर्मोपनयननियमः प्राग्वदत्रेति चेन्न।
कल्पान्तेऽप्येककालः प्रकृतिपुरुषवद्ब्रह्मणोरूपमन्य-
न्निर्दिष्टोऽनाद्यनन्तो मुनिभिरिति ततः कार्यता चास्य भग्ना ॥६५॥

सर्वा०—उद्दिष्टलक्षितेषु त्रिगुणानन्तरं कालः परीक्ष्यते। तत्र *अपरस्मिन्परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि इति परोक्तेरानुमानिकः काल इति मन्वानः साङ्ख्यसौगतचार्वाकवञ्चितः कश्चित्कालं निह्नुते—सूर्येति ॥ आदिशब्देन विभुद्रव्यान्तरम् उपाधिबुद्धिविशेषाश्च संगृह्यन्ते। स्थविरयुवादिषु परत्वापरत्वनिर्वाहाय तत्कारणभूतबुद्धिविशेषविषयसूर्यपरिस्पन्दप्रकर्षनिकर्षादिघटकतया कालः कल्प्यते। तत्र संप्रतिपन्नैराकाशादिभिरेव तत्तदुपाधिव्यतिकरितैः, उपाधिभिरेव वा, बुद्धिसन्निकर्षघटितैः, तादृशोपाधिबुद्धिभिरेव वा, अपेक्षितसिद्धौ किमिह तदतिरिक्तकल्पनया? यद्यतिप्रसङ्गभयाद् बुद्धिविशेषसंबन्धानादरेण कालोऽन्यः कल्प्यते, तथाऽप्यतिप्रसङ्गस्तदवस्थः, यथादर्शनं व्यवस्था च समानेति भावः। कालता—परत्वादिनिर्वाहकतेत्यर्थः। अत्र दिङ्निरूपणे दर्शितमतिप्रसङ्गं तद्वदेव परिहरति—अन्यस्मिन्निति। शास्त्रोक्तं न लाघवतर्कबाध्यमित्यभिप्रायेणाह—नेति। कथं शास्त्रे तदुक्तिरित्यत्राह—कल्पान्तेऽपीति। उक्तं हि वैष्णवे पुराणे—*विष्णोः स्वरूपात्परतोदिते द्वे इत्यारभ्य *रूपान्तरं तद्द्विज कालसंज्ञम् इति। कार्यभूताकाशाद्यन्तर्भावश्चानेन भग्न इति व्यनक्ति—तत इति। एतेन त्रिविधा प्रकृतिः, कालः परमाकाशोऽव्यक्तमिति केषांचित्कल्पनाऽपि निरस्ता। ननु जैननिराकारणे *कालस्यत्वित्यादिना भाष्येण कालो निराकृत इव भाति। मैवम्, सर्वप्रतिपत्तिषु तत्तत्पदार्थविशेषणतया सर्वलोकानुभूतस्य न बौद्धादिभिर्नास्तित्वं वक्तुं शक्यम्। न त्वया पृथक् तदस्तित्वं साध्यम्। कालोऽस्तीत्यादिपृथग्व्यवहारस्तु अपृथक्सिद्धविशेषणानां निष्कृष्य व्यवहारवदिति तन्निर्धारणे तात्पर्यात्; अन्यथा शास्त्रैः स्वग्रन्थान्तरैस्संप्रदायैश्च विरोधस्स्यादिति ॥ ६५ ॥

आनन्द०—अवसरसंगतिमाह—उद्दिष्टेति। प्राच्यमव्यक्तकालावित्यत्रेत्यर्थः। उद्दिष्टलक्षितेति स्नातानुलिप्तवत् पूर्वकालेति समासः। परत्वापरत्वादिलिङ्गैः कालस्यानुमेयत्वं नैयायिकोक्तं दूषयितुमनुभाषते—इहापरमिति।

सांख्यादीनां कालतत्वं न वस्त्वन्तरम्; किं तु क्लृप्तैरेवोपाधिभिस्तव्द्यवहार इति मतम्; तदाह—सांख्येति। विभुद्रव्यान्तरमाकाशादि। उपाधिबुद्धिविशेषः—सूर्यावर्तादिगोचरबुद्धिविशेषः। क्लृप्तैरन्यथासिद्धया न कालोऽतिरिक्तः कल्प्य इत्यत्राह—स्थविरयुवादिष्विति। उपाधिभिरेवेति—बुद्धिसन्निकर्षघटितैः बुद्धि-विषयतया सन्निकृष्टैरुपाधिभिर्वा। उपाधिबुद्धिभिर्वेति—विशेषणविशेष्यभाव-भेदाभ्यां भेदः। पूर्वत्र तपनावृत्तेरतीतत्वाद्बुद्धिविषयतयेदानीन्तनपरत्वादिजनकत्वं वाच्यम्। उत्तरत्र बुद्धेस्साक्षादेव सन्निधिरिति ध्येयम्।

ननु बुद्धयादीनामनेकेषां परत्वादिप्रयोजकत्वे गौरवम्; यून्यपि बुद्धिविशेष-संघटितोपाध्यादिभिः परत्वादेर्जननापत्त्या अतिप्रसङ्गश्चेत्याशङ्कय अतिरिक्तकाल-कल्पनेऽपि प्रसङ्गस्समानः; यूनि(कालेन) सूर्यावर्तबाहुल्यो(ल्यस्यो) पनयसंभवात्। यदि दर्शनादिना कथञ्चित्परिहारः सोप्युपाधिपक्षे समान इत्याह—यद्यतिप्रस-ङ्गेति। कालस्य पूर्वपक्षिणाऽभ्युपगमे कथं कालताऽभ्युपगम इत्यत्राह कालतेति। आदिशब्देन क्षणलवादिव्यवहारनिर्वाहकत्वम्। नन्वाकाशादिविभुद्रव्यस्य स्थविरादौ सूर्यगत्युपनायकत्वे अन्यधर्मोपनायकत्वाविशेषात् काशीस्थेन जपाया रक्तिम्ना सेतुस्थ(सेतुगत)स्फटिको परागप्रसङ्ग इत्यत्राह—अत्र दिङ्निरूपणे इति। दर्शनानुरोधेन व्यवस्थेति तत्रोक्तमनुसन्धेयम्। शास्त्रोक्तमिति—कल्प्यत्व एव लाघवतर्कावतार इति भावः।

ननु कालस्वरूपस्य शास्त्रोक्तिमात्रादतिरिक्तत्वे दिशोऽपि तथात्वापत्तिरि-त्याशङ्कते- कथमिति। कार्यवर्गाभावकाले इति प्रलये उक्तत्वान्न कालस्य दिक्समतेति भावः।

एतेनेति—परमात्मनः प्रकृतिजीवौ रूपद्वयं(परमात्मनः)स्वरूपाद्विलक्षण-मुक्त्वा ततोऽपि विलक्षणं रूपान्तरं तद्द्विज कालसंज्ञमित्युक्तत्वादित्यर्थः। नन्विति—'नैकस्मिन्नसम्भवात्' इत्यधिकरणे कालस्य विशेषणतयैव प्रतीतेः तस्य पृथगस्तित्वनास्तित्वादयो न वक्तव्या इति भाष्येण कालासत्त्वप्रतीतेरिति भावः। भाष्यस्य तात्पर्यवर्णनहेतुमाह अन्यथेति॥ ६५॥

अक्ष०—त्रिगुणानन्तरमिह कालो निरूप्यते। तत्र क्लृप्तेष्वेव द्रव्येषु कस्यचिदुपाधिविशेषविशिष्टतया परत्वापरत्वाद्युपपादकत्वे संभवति तदर्थमति-रिक्तकालकल्पना माभूदित्याशंकते—सूर्येति। आवृत्तिः—परिस्पन्दोदयाद्यभ्यासः। आदिना चन्द्रग्रह तारकावृत्त्यादिः क्षणदिनादि कालोपाधिः। तस्य व्यतिकरः तद्वशतः तद्वलात्। कालता—परत्वादिनिर्वाहकता। अम्बरादेः—सिद्धस्यैव आकाशादेरस्त्वित्यर्थः। आदिशब्देन सर्वगतस्यान्यस्यापि कस्यचिदस्त्वयमिति सूच्यते। सूर्यादिवृत्त्यावृत्त्यादिक्रियायाः परत्वादिकार्याधिकरणज्येष्ठादौ संबन्ध-सिद्धयर्थं परम्परासंबन्धघटकतया कालादिकल्पनापेक्षया लाघवात्सिद्धपूर्वमम्ब-रादिकमेव तथा कल्प्यतां नत्वतिरिक्तकालकल्पनमिति भावः।

एवमसति दिङ्निरूपणे दर्शितमतिप्रसङ्गं तद्वदेव परिहरति—अन्यस्मिन्निति—अन्यस्मिन् ज्येष्ठादौ। अन्यधर्मोपनयन नियमः– सूर्यावृत्यादिसंबन्धापादनहेतुता ननु विप्रकृष्टस्फटिकादौ जपालौहित्यसंक्रमहेतुतेति व्यवस्था।

प्राग्वदत्रेति—दर्शनानुरोधेन व्यवस्थेति पूर्वोक्तमत्रानुसन्धेयमिति भावः। एव मनुमानत एव कालकल्पनेत्यभिमानेन कृतामाशङ्कां शास्त्रेऽपि तदुक्ति प्रदर्श्य परिहरति नेति। कल्पान्त इति प्रलयेऽपीत्यर्थः अनेन कार्यभूताकाशादेरनवकाश इति व्यज्यते। एककालः। सूर्यपरिस्पन्दाद्युपाध्यभावात् क्षणदिनादिभेदरहितः काल इत्यर्थः प्रकृतिपुरुषवत्–ब्रह्मणो रूपमन्यन्निर्दिष्टं "रूपान्तरं तत् द्विजकालसंज्ञं" इति पुराणे प्रकृतिपुरुषौ यथा ब्रह्मणो रूपं तथा कालोऽपि रूपान्तरं प्रलयेऽप्यस्तीत्युक्ता अनाद्यनन्तः कार्याकाशाद्यतिरिक्तः कालः पराशरादिमुनिभिः कण्ठोक्त इति तमपह्नोतुं न लाघवादिन्यायः प्रभवतीति भावः। एवं प्रलयेऽपि कालस्य वर्तमानतया तस्य कार्यत्वशङ्का दूरोत्सारितेत्याह—ततः कार्यतेति ॥ ६५ ॥

इत्याकाशाद्यतिरिक्तकालसिद्धि

कालोऽस्मीति स्वगीता कथयति भगवान्काल इत्याप्तवर्यो
हेतुः सर्वस्य नित्यो विभुरपि च परः किं परेणेति चेन्न।
कालान्तर्यामितादेः स खलु समुदितः संप्रतीते तु भेदे
साधर्म्यं नैक्यहेतुः स हि तदितरवद्घोषितस्तद्विभूतिः ॥ ६६ ॥

सर्वा—एवमपि कालस्य परमात्मव्यरिक्तत्वं न सिध्यति, रूपान्तरमिति स्वरूपविवक्षोपपत्तेः, तत्स्वरूपैक्ये प्रमाणसद्भावाच्चेत्यभिप्रायेणाह—काल इति ॥ स्वशब्दोऽत्र परमात्मविषयः। गीयते हि—*कालोऽस्मि लोकक्षयकृत्प्रवृद्धः इत्यादि तद्वत् *अनादिर्भगवान्काल इति पराशरेणोक्तमपि ख्यापयति—कथयतीति। आप्तवर्यत्वमस्य *देवतापारमार्थ्यं च इत्यादिभिस्सिद्धम्। नित्यविभुना परमात्मनैव त्रैकालिकसार्वत्रिकसर्वव्यवहारसिद्धिमभिप्रेत्याह—हेतुरिति। तदतिरिक्तकालकल्पनस्य निरर्थकत्वमाह—किं परेणेति। रूपान्तरमित्यत्र क्लिष्टा गतिरयुक्तेत्यभिप्रायेण प्रतिवक्ति–नेति। कालेऽपि सामानाधिकरण्यं तत्तत्पदार्थान्तिरेष्विव निर्वहतीत्याह—कालान्तर्यामितादेरिति। आदिशब्देन कालाभिमानिरूपसंग्रहः। सन्ति हि जीवमनोहङ्काराभिमाननियतानुबन्धानि संकर्षणादिरूपाणि, तद्वदिहापि स्यात्; *को भवानुग्ररूप इति प्रश्नसंघटनाच्च। सर्वकार्यहेतुत्वनित्यत्वविभुत्वैस्तदैक्यसाधनं निरस्यति–संप्रतीते त्विति। वस्त्वन्तर इव भेदकण्ठोक्ति व्यनक्ति—स हीति। *ब्रह्मा दक्षादयः काल इत्यादिभिरिति शेषः। *विष्णुमन्वादयः काल इत्यत्र तु विष्णुशब्दोऽवतारपरः; तस्य तद्विभूतित्वं च तादृशरूपेण ॥ ६६ ॥

आनन्द०—आक्षेपसंगतिमाह—एवमपीति। रूपान्तरमिति यद्यप्यन्तरशब्दो भेदकोऽस्ति; विष्णो रूपमित्यादिषष्ठीवन्नेतुं शक्यमिति भावः। एवं नयने हेतुमाह—तत्स्वरूपैक्ये इति। कालोऽस्मीत्यादिप्रमाणसद्भावादिति भावः। 'अनादिर्भगवान्' इत्यत्र भगवान्- परं ब्रह्म। सिद्धमिति—विष्णुपुराण एवेत्यर्थः।

ननु परमात्मव्यतिरिक्तकालाभावे क्षणलवपरत्वादिव्यवहारः कथम्? इत्यत्राह—नित्यविभुनेति। किं परेणेति—परमात्मनः परेणातिरिक्तेन कालेनेत्यर्थः। क्लिष्टगतिरिति—रूपान्तरमिति भेदकशब्दस्य कथञ्चिन्नयनमित्यर्थः। इदमुपलक्षणं अन्तरशब्दवैयर्थ्यं च। नन्वभेदसाधकप्रमाणसत्त्वे क्लिष्टगतिरपि युक्तेत्यत्राह—कालेऽपीति। तत्राश्वत्थाद्यचेतनसामानाधिकरण्यस्यापि प्रतिपादनेन प्रकरणस्य विभूतिप्रतिपादनपरत्वेनाभेदप्रतिपादनपरत्वाभावादित्यर्थः। काले कालशरीरकत्वेन सामानाधिकरण्यमुक्त्वा कालाभिमानिदेवतात्वेनापि सामानाधिकरण्यमाह—आदिशब्देनेति। जीवादीनां संकर्षणप्रद्युम्नानिरुद्धादिरूपमभिमानि तद्वत्कालाभिमानि रूपान्तरमपि संभवतीत्यर्थः। वस्तुतः(केचित्तु)संकर्षणस्यैव कालाभिमानित्वमिति (वदन्ति)भावः।

संकर्षणस्यैव कालाभिमानित्वे हेतुमाह—को भवानिति। उग्ररूपः—तीक्ष्णरूप इत्यन्ये। केचित्तु उग्ररूपः—क्रुद्धरूप इत्यर्थमाहुः। संकर्षणस्यैव रुद्राभिमानित्वाच्च। अभिमानद्वारा सामानाधिकरण्ये प्रश्नोपपत्तिः। कालः परमात्माभिन्नः सर्वकार्यहेतुत्वात् परमात्मवत् व्यतिरेकेण घटवच्च। नित्यत्वाद्विभुत्वाद्वेत्यादि परमात्माभेदसाधकान्यागमवाधितानीत्याह—सर्वकार्येति। नित्यत्वं विभुत्वं च जीवादौ व्यभिचारीति ध्येयम्। ब्रह्मादक्षादय इति—यद्यपि चेतनदेवताभिस्सह पाठात् कालो यमोऽत्रेति वक्तुं शक्यम्; तथाऽपि कालशब्दाभिधेयस्य ततो भिन्नत्वं सिद्धम्। यमादीनां कालशब्दवाच्यत्वं च तदभिमानितया। तथा च तस्य भेदे तदभिमा(न्यस्य)नस्य सुतरां भेदस्सिध्यतीति भावः।

नन्वत्रापि कालशब्दः परब्रह्मपर एवास्तु न च विभुत्वानुपपत्तिः; विष्णुर्मन्वादय इत्यत्र विष्णुवदुपपत्तेरित्यत्राह—विष्णुर्मन्वादय इति। तादृशरूपेणेति—उपेन्द्राभिधानतादृशविग्रहरूपेणेत्यर्थः॥ ६६॥

अक्ष०—एवं प्रलयावृत्तेः कार्यभूताम्बरादेः कालत्वासंभवेऽपि नित्यस्य परमात्मनस्तत्संभवात् तदैक्ये प्रमाणसत्वाच्च न तदतिरिक्तः कालः इति शङ्कते—कालोऽस्मीति। "कालोऽस्मि लोकक्षयकृत्प्रवृद्धः" इति। स्वगीता—भगवद्गीता। परमात्मानमेव कालस्वरूपमिति बोधयतीत्यर्थः। अत्र-स्वशब्दः परमात्मपरः। तद्वत् भगवान् आप्तवर्यः—देवतापारमार्थ्ययथावद्वेदनादिकृताप्तत्यतिशयवान् पराशरोऽपि अनादिर्भगवान् काल इति भगवन्तमेव काल इति कथयतीत्यर्थः। हेतु-

रिति—नित्यो विभुः परमात्मैव त्रैकालिकसार्वत्रिकसर्वव्यवहारसाधकोऽपि भवितुमर्हतीति भावः। अतस्तदतिरिक्तकालकल्पनं निरर्थकमित्याह—किं परेणेति चेदिति सूचितामाशंकां निराकरोति - नेति। कालोऽस्मीत्यादौ कालत्वं कालान्तर्यामित्वपरमित्याह—कालान्तर्यामितादेरिति । आदिना अभिमानित्वपरिग्रहः। दृश्यते हि—"सच्च त्यच्चाभवत्" "तं पृथिव्यब्रवीत्" "संकर्षणो नाम जीवोजायत" इत्यादिषु भेदे सत्यपि अन्तर्यामित्वाभिमानित्वादिना अभेदव्यपदेशः तद्वदयमपीति न कालत्वसाधकः किन्तु अन्तर्यामितया। स खलु काल एवेति समुदितः—संप्रोक्तः। अतः परमात्मभिन्न एव तदन्तर्यामिकः काल इत्युक्तं भवति नह्येकस्यैव स्वान्तर्यामित्वमपि घटेतेति भावः। एवं संप्रतिपन्ने भेदेसति सर्वकार्यहेतुत्वादिसाधर्म्यं नैक्यं साधयितुमलमित्याह—संप्रतीते त्विति। "ब्रह्मा दक्षादयः कालः" इत्यादौ ब्रह्मदक्षादीनामिव कालस्याऽपि विभूतितया भेदः स्फुटमधिगम्यत इत्याह—सहीति। हिः हेतौ। सः—कालः यतः तदितरवत्—कालेतरदक्षादिवत्। तद्विभूतिः—परमात्मनियाम्यः। घोषितः—सुस्पष्टमुक्तः। अतस्साधर्म्यं नैक्यहेतुरिति भावः॥ ६६॥

कालस्येश्वरैक्यशङ्कानिरासः

कालस्योत्पत्तितः प्राक् परमपि च लयात् कालनास्तित्ववादी
स्वोक्तिव्याघातभग्नो न वदति यदि तत्को वदेत्कालसृष्टिम्।
आप्तस्तत्सृष्टिवादस्तदुपधिपरिणत्यादिभिस्सार्थकस्स्या-
न्नोचेत्तत्रापि पूर्वापरवचनहतिर्दुर्निवारप्रसङ्गा॥ ६७॥

सर्वा०—ये तु महदादिवत्कालतत्त्वमुत्पत्तिनाशवदिति तन्त्रा[न्तरा]नुसारिणो वदन्ति, तान्प्रतिक्षिपति—कालस्येति॥ उत्पत्तेः पूर्वं नाशतः पश्चाच्च कालो नास्तीति वदन् किं तत्र पूर्वशब्दस्य पश्चाच्छब्दस्य च निरर्थकत्वं मन्यते? सार्थकत्वं वा? पूर्वत्र निरर्थकनिग्रहस्थानापत्तिः। उत्तरत्र कालस्यैव तदर्थत्वात्तत्र कालनिषेधे स्ववचनविरोधः। अथ काले कालो नास्तीत्यविरोधं मन्येत, तर्हि सृष्टिप्रलयमध्यकालेऽपि कालाभावात्तत्रापि कालनास्तितां ब्रूयादिति कथ कालसिद्धिः? गत्यभावान्मौनमाश्रित्य यः पूर्वं पश्चाच्च नास्तीति न ब्रूयात् तदाऽस्मन्मतं न निषेधतीति नास्माभिरुत्तरं देयम्। अथ पार्श्वस्थो यदि कश्चिद् ब्रवीति तस्याप्युक्तदोषस्सम इत्यभिप्रायेणाह—तत्को वदेदिति। *सदेव सोम्येदमग्र आसीत्, *नासदासीन्नो सदासीत्तदानीम् इत्यादिश्रुतिविरोधश्चात्राभिप्रेतः। *विद्याकालौ भवत्कृतौ इत्यादिषु कालोत्पत्तिवचनं कथमित्यत्राह—आप्त इति। आप्तवाक्यस्थ इत्यर्थः। यथा निमेषादिसंवत्सरान्तजनिश्रुतिः पक्षमासादिष्वागमापायिताप्रख्यातिश्च उपाधीनां तत्संयोगादिपरिणतीनां तदभिमानिदेवतानां

वा सृष्टया अर्थवती, तथाऽसावित्यर्थः। अन्यथा तत्रापि विरोधमाह—नो चेदिति। पूर्वापरवचनहृतिः—पूर्वं परं च कालो नास्तीति वचनस्य बाध इत्यर्थः। अथवा पूर्वापरग्रन्थविरोधः, प्रलयादिकालमनूद्य हि प्रकृतिविकारास्सर्वे सृष्टि-वाक्येषु प्रतिपाद्यन्ते।

कालोपश्लिष्टवेषेण ह्यभूदस्तिभविष्यतीन्।
प्रयुञ्जतेऽर्थभेदेषु सदा चास्तिमनेहसः॥ ६७॥

आनन्द०—प्रसङ्गतिमाह—ये तु महदादिवदिति। तन्त्रान्तरानुसारिणः—योगमतानुसारिणः। कालस्यैव तदर्थत्वादिति-पूर्वपश्चाच्छब्दार्थतया काल(त्वातदर्थं) मभ्युपगम्य तत्र तन्निषे(धे)धव्याघात इति भावः। अथेति--अभेदे आधारा-धेयभावाभावात् काले स्वस्य वृत्त्यभावात् घटे घटनिषेधवदविरोध इति भावः। सृष्टिप्रलयमध्ये इति—तथा च कालत्वमेव न स्यात् सर्वदा तस्यासत्त्वादित्यर्थः। गत्यभावादिति—व्याघातस्य परिहाराभावादित्यर्थः। तदेति—कालस्य निषेधा-सम्भवान्नासौ बाध इति भावः। को वदेदित्यस्य प्रकृतवादिपरत्वे निर्धारणार्थं-किंशब्दानुपपत्तिं मत्वाह——अथ पार्श्वस्थ इति। श्रुतिविरोधश्चेति—सदेव सौम्य' 'तम आसीत्' इत्यादौ च अग्रशब्दस्य,सृष्टिप्राक्कालवाचित्वेन तेन विरोधः। नासदासीदित्यादौ तदानीमित्यनेन विरोध इत्यर्थः। यथेति—

'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि। कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः। अहोरात्रे मासाश्च संवत्सरा अजायन्त' इत्यादिश्रुतयः। पक्षो गतः मासो गतः आगतश्चेत्यादिलौकिकव्यवहाराश्च। कालोत्पत्तिवादिनाऽपि सृष्टि-प्रलयमध्ये कालस्यैकत्वेऽपि तदुपाध्यादिकमादाय यथा निवहणीयास्तथेत्यर्थः। यद्यप्यत्र स्वारसिकार्थे बाधाभावादभिमानि देवतोपाध्युत्पत्त्या निर्वाहो न शक्य इति न्यायसिद्धाञ्जनविरोध इव; तथाऽपि अत्र मायिवत् स्वरूपेणोत्पत्तिर्निषि-ध्यते न तु कलामुहूर्तादिरूपेण परिणाम इति न विरोध इति ध्येयम्।

पूर्वापरेत्यस्य तद्ग्रन्थपूर्वापरवाक्यपरत्वे स्वारस्यादाह—अथवेति। तथाच यथाश्रुतस्वीकारे विरोध इति भावः। ननु कालस्यानुत्पत्तिविनाशत्वे अभूदस्ति भविष्यतीति काले अतीतत्वादिव्यवहारः कथं स्यादित्यत्राह—कालोपश्लिष्ट-वेषेणेति। कालोपश्लिष्टवेषेण पदार्थानामेवात्ययादिविषयता न कालस्य; स तु पदार्थात्ययादिष्वपि स(सन्नेव)हैव व्यवह्रियते इत्यर्थः॥ ६७॥

अक्ष०—अथ कालस्यानित्यत्वं निरस्यति—कालस्येति। उत्पत्तितः प्राक्—उत्पत्तेः पूर्वं। परमपि च लयात्—नाशादनन्तरमपि। कालनास्तित्ववादी—सर्वे-निमेषा जज्ञिरे" इत्यादौ निमेषादिसंवत्सरान्तकालोत्पत्तिश्रवणात् जन्यभावस्य च नाशावश्यम्भावात् "नाहो न रात्रि"रिति प्रलये अहरादिकालनास्तित्व

श्रवणाच्च दुरभिलपयोरुत्पत्तिविनाशयोः पुरस्तात्परस्ताच्च काल एव नास्तीति ब्रुवाण इति भावः। तान्निगृह्णाति—स्वोक्तीति। उत्पत्तेः प्राक्लयात्परमपि कालो नास्तीति वदन् किं तत्र प्राक्परशब्दयोः अर्थवत्तां मन्यते ? नवेति ? विकल्पे प्रथमकल्पे कालस्यैव तदर्थत्वात् तत्र कालनिषेधे स्वोक्तिव्याघातः। द्वितीयकल्पे निरर्थकनिग्रहस्थानञ्चेतिभङ्गं प्राप्नुयादित्यर्थः। अतो न वदति। यदि गत्यभावात् मौनमाश्रित्य प्राक् परपदे न ब्रूयाच्चेदित्यर्थः। तदा नास्माभिरुत्तरं देयं। पार्श्वस्थः पुनर्ब्रूयादित्याह—को वदेदिति—उक्तदोषप्रसंगस्य तेनापि दुष्परिहरत्वात् तत् कालसृष्टिं—न वदेत् इत्यर्थः।

"विद्याकालौ भवत्कृतौ" इत्यादिषु कालोत्पत्तिवचनस्याशयमाह—आप्त इति। आप्तवाक्यस्थ इत्यर्थः। तत्सृष्टिवादः - कालसृष्टिवादः। तदुपधीति—कालोपाध्युत्पाद विनाशादिभिस्सार्थकस्स्यादित्यर्थः। अन्यथा तत्रापि विरोधमाह—नोचेदिति। पूर्वापरेति—पूर्वापरवचनविरोधप्रसङ्गो दुर्निवार इत्यर्थः। कालनिषेधवाक्य पूर्वापरवाक्ययोरपि प्रलयकाल विशेषवचनात् कालस्वरूपस्यैव निषेधे तद्विरोधप्रसङ्ग इतिभावः ॥ ६७ ॥

कालोत्पत्तिवादनिरासः

कालोऽध्यक्षावसेयः क्षणलवदिवसाद्यंशतोऽर्थान्विशिषन्
साक्षाद्धीस्तत्तदर्थेष्विव भवति हि नः क्वापि कालान्वयेऽपि।
तत्संयोगाः परत्वादय इति च ततोऽप्येष नैवानुमेयो
नो चेन्न क्वापि लोकव्यवहृतिविषयोऽव्यक्तवत्स्यादनेहा ॥ ६८ ॥

सव०—नीरूपद्रव्यस्यापि प्रत्यक्षत्वसंभवः प्रागेव साधित इति कृत्वा कालप्रत्यक्षत्वं लोकोपलब्ध्या नियमयति—काल इति॥ अवसीयमानप्रकारमाह—क्षणेति। क्षणमयं तिष्ठतीत्यादिप्रकारेण तत्तदर्थविशेषणतयाऽवसीयत इति यावत्, अभिज्ञायां क्षणरूपेण प्रत्यभिज्ञायां दिवसादिरूपेण चेति विभागः। अनुमीयमानो विशिष्यादित्यत्राह—साक्षादिति। प्रत्यक्षप्रतीतौ विशेषणतया दृश्यमानस्य कालस्यानुमेयत्वे तत्तत्पदार्थानामपि सौत्रान्तिकोक्तनयादानुमानिकत्वं प्रसज्यत इति भावः। न चासावनुमातुं शक्य इत्याह—तत्संयोगा इति। कालमनभ्युपगच्छतां बुद्धिविशेषसंघटितसूर्यावृत्त्याद्युपाधिभिरेव वैशिष्ट्यं वस्तूनां परत्वादि। अभ्युपगच्छतां तु तत्तदुपहितकालसंयोगाः। न च तदतिरिक्तं दृष्टं कल्प्यं वा इत्यद्रव्यसरे स्थापयिष्यते। कालस्यानुमेयत्वेऽनिष्टं प्रसञ्जयति—नो चेदिति। न हि परत्वापरत्वादिभिः; कश्चित्कालोऽस्तीत्यनुमाय तद्विशिष्टतया पदार्थान् व्यवहरन्ति लौकिकाः। अतः कालोऽप्यव्यक्तवच्छास्त्रैकवेद्य इति; तद्वदेव लोकव्यवहारविषयो न स्यादित्यर्थः।

नन्वस्मदादिप्रत्यक्षमप्रत्यभिज्ञारूपं वर्तमानमात्रविषयमिति सर्वसंमतम्। अतोऽस्य पूर्वापरकालविशिष्टविषयत्वमसंभवि, पूर्वापरव्यतिरिक्तं तु वर्तमानं न पश्यामः; अतः कथं कालप्रत्यक्षत्वम्? इत्थम्—किं भवान् वर्तमानधियमेव नानुभवति? सतीमपि वा निर्विषयाम्? सविषयामपि वा कल्पितविषयाम्? न प्रथमः, इदं पश्यामीत्यादिव्यवहारोच्छेदप्रसङ्गात्। अतएव न द्वितीयः, अस्वविषयधियां त्वनभ्युपगमाच्च। न तृतीयः; क्वचित्सिद्धस्यैवान्यत्र कल्प्यत्वात्; तथा च तत्सिध्येत्। रूपादिषु दृष्टं वर्तमानत्वं काले कल्प्यतामिति चेन्न; क्षणिकरूपादिसन्ततावपि पूर्वापरातिरिक्तवर्तमानत्वस्य त्वया दुर्वचत्वात्, अन्यथा कालेऽपि तदुपपत्तेः। कालमनिच्छतश्च ते काले कथं कल्पना? निरधिष्ठानाऽसौ कल्पनेति चेन्न; ईदृशकल्पनाऽभ्युपगमे माध्यमिकागमप्रवेशप्रसङ्गात्। स्थिरवादे तु रूपादिष्विव केनचिद्रूपेण कालेऽपि वर्तमानत्वं सिद्धम्। ननु रूपादीनां वर्तमानकालसंबन्धो वर्तमानत्वम्, नाऽसौ कालस्य स्यात्। मैवम्; त्वयैव कालस्य वर्तमानत्वेन रूपादिवर्तमानत्वनिर्वाहात्॥

वर्तमाननिषेधे च भवित्री विश्वनिह्नुतिः।
न ह्यतीतं भविष्यद्वा प्रत्यक्षविषयोऽस्ति नः॥

वर्तमानभ्रमश्चात्र तत एव न सिध्यति।
पौर्वापर्यातिरिक्ता तु दुस्त्यजा वर्तमानता॥

अतीतागामिधीरेव वर्तमानमतिर्यदि।
भूतभाविसमस्ताप्तया न शोकादिसमुद्भवः॥

पूर्वापरत्वसंभेदे वर्तमानमतिर्यदि।
त्रिकालस्थेऽपि तत्सिद्धेः क्वातीतागामिता भवेत्॥

प्रारब्धश्चासमाप्तश्च वर्तमानो य उच्यते।
व्यापारसमुदायोऽसौ विवक्षितफलावधिः॥

तत्रापि क्षणभेदेन नष्टत्वादिविकल्पतः।
वैवक्षिकमिहान्यच्च वर्तमानत्वमक्षतम्॥

ननु सतो विनाशप्रागभाव एव वर्तमानत्वम्। तद्विशिष्टेषु पदार्थेषु दृश्यमानेषु किं सतो वाऽसतो वा कालस्य दृश्यमानतया? मैवम्; कालासत्त्वपक्षस्य निरस्तत्वात्, तत्सत्त्वे तु तत्साध्यानां पूर्वापरयुगपदादिव्यवहारविशेषाणां तत्प्रतीतिपूर्वकत्वस्य स्वरसप्राप्तत्वात्। किंचात्र सत इति वर्तमानत्वविवक्षायां किं विनाशप्रागभावोपश्लेषेण? वर्तमानत्वमेव च वर्तमानत्वमित्युक्तं स्यात्। अथ प्राणसिद्धत्वादिरूपं सत्त्वम्; तदाऽपि विनाशस्य प्रागभावः प्रतियोगिस्वरूपमेवेति। तेन रूपेण योगिभिर्गृह्यमाणं त्रैकालिकमपि वर्तमानं स्यात्। अतोऽन्यदेव वर्त-

मानत्वं; तच्च कालोपश्लेषेणैव गृह्यते। वर्तमानकालोपाधिसंबन्ध एवं वस्तूनां वर्तमानत्वमित्यपि न वाच्यम्; उपाधौ तदभावादवर्तमानत्वप्रसङ्गात्; उपाधिभिरेव सर्वव्यवहारनिर्णये किमप्रत्यक्षकालकल्पनया ? ॥ ६८ ॥

आनन्द०—कालसद्भावे प्रत्यक्षमपि प्रमाणमित्याह—नीरूपस्येति। यद्यपि क्षणस्य प्रत्यक्षत्वमस्ति अयं घट इति; तथाऽपि दिवसादीनां (दीनामपि) न पदार्थविशेषणतया प्रत्यक्षत्वमित्यत्राह-अभिज्ञायां क्षणरूपेणेति। सोऽयमिति प्रत्यभिज्ञायां पूर्वदिवसेऽनुभूतोऽयमित्यादिना विशेषणत्वादित्यर्थः। प्रत्यक्षप्रतीताविति—

ननु दिवसादीनामतीतानां संस्कारसन्निधापितानां प्रत्यक्षत्वं वाच्यम्; न च दिवसादयः प्रागभिज्ञयाऽनुभूताः! तथात्वेऽभिज्ञायामित्याद्युक्तिविरोधात्। किञ्च दिवसादिकालस्य प्रत्यक्षत्वेऽपि न दिवासाद्युपाधीनां प्रत्यक्षत्वम्; तेषां तपनावृत्त्याद्यात्मनां युगपत्सन्निकर्षाभावेन प्रत्यक्षत्वाभावात्। अतोऽनुमेयस्यैव कालय विशेषणत्वमिति चेत्;

अत्राहुः—कालस्वरूपं प्रत्यक्ष मित्यत्र न विवादः। यथा प्रत्यक्षसामग्री वर्तमानकालं (कालस्वरूपं) गृह्णाति तथा तदुपाधिमपि; अन्यथा कालसम्बन्धमात्रग्रहेऽपि (ग्रहमात्रेऽपि) काले विशेषरूपोपाध्यग्रहणात् घटादेर्वर्तमानतया सन्देहस्स्यात् तथा प्रत्यभिज्ञासामग्र्यपि पूर्वसंस्कारसहिता प्रागनुभूतमासादिकालोपाधिरूपतपनपरिस्पन्दादिकमप्यसन्निकृष्टमावेदयति। तस्यास्तथास्वभावात्। न चातिप्रसङ्गः; प्राक्तनानुभवक्षणावधिकस्वक्षणपर्यन्तकालोपाध्युपनायकत्वे तदभावात्। अत एव सन्निकर्षाभावादित्याद्यपास्तम्। न चानुमानात्काल- (नात्तादृशकाल)धीः। तस्य प्रत्यक्षागोचरत्वे सामान्यतो विशेषतो वा व्याप्त्यग्राहकत्वात्। त(अ)थाप्यनुमाने पदार्थमात्र एव तथाऽनुमानसंभवेन सौत्रान्तिकमतावतारप्रसङ्ग इति न तदुपहितकालप्रत्यक्षत्वानुपपत्तिरिति। तत्र हेतुमाह—न चेति। तथाचोपाधिसंयोगाद्यतिरिक्तं तज्जन्यं वा परत्वं न दृष्टं कल्प्यं च कल्पकाभावात्। तथाच कालानुमानं न संभवतीत्यर्थः। परत्वापरत्वयोरतिरिक्तगुणत्वात् कथं तयोरुपाध्यादियोगमात्रत्वमित्यत्राह—अद्रव्यसरे इति। लोकव्यवहारविषयो न स्यादिति—लिङ्गप्रतिसन्धानाभावात्तद्व्याप्तिग्रहासंभवादित्यर्थः। बौद्धश्शङ्कते—नन्विति। अतोऽस्येति—पूर्वापरयोस्तदा सत्त्वाभावे सन्निकर्षाभावादिति भावः। नन्वस्तु वर्तमानस्य कालस्य प्रत्यक्षत्वमित्यभिप्रायेणाह—पूर्वापरव्यतिरिक्तं त्विति। ग्रहणक्षणावधिकस्य पूर्वत्वादागामित्वाच्च ततोऽतिरिक्तस्य मध्यवर्तिनः कालस्याभावादित्यर्थः। वर्तमानधियमिति—वर्तमानकालविशिष्टविषयामित्यर्थः। अत एवेति—इदं पश्यामीति कालविशिष्टस्य धीविषयत्वानुभवविरोधादेवेत्यर्थः। दूषणान्तरमाह—अस्वविषयेति। स्वविषयधीरात्मा;

आत्मातिरिक्तधीमात्रस्य निर्विषयत्वानभ्युपगमात्; अन्यथा विश्वमात्रस्य निह्नव-प्रसङ्गादिति भावः।

केचित्तु—सविषयकत्वाद्धियां त्वदनभ्युपगमाच्चेति पाठान्तरम्; तदा सविषयत्वनियमात् त्वन्मतविरोधाच्चेत्यर्थ इत्याहुः।

क्वचिदिति—अन्यत्रसिद्धरजतादेश्शुक्तावारोपदर्शनादित्यर्थः। तथाचेति—वर्तमानकालस्सिद्धश्चेदित्यर्थः। ननु वर्तमानत्वं न कालस्वरूपं किं तु रूपादिवत् कश्चिद्धर्मः। स काले आरोप्यताम्! तावता न वर्तमानकालसिद्धिरिति शङ्कते—रूपादिष्विति। क्षणिकेति—केषां चित् क्षणानां पूर्वत्वात् केषाञ्चिद्रूपादिक्षणानां परत्वात् न रूपादावपि वर्तमानता संभवतीत्यर्थः। अन्यथेति—रूपादिक्षणा(ण)विशेषादित्यर्थः। कालमनिच्छत इति—रूपादिक्षणातिरेकेण तैः कालक्षणानभ्युपगमादित्यर्थः। मध्यमागमेति माध्यमिकमतप्रवेशप्रसङ्ग इत्यर्थः।

ननु सर्वत्र वर्तमानत्वं माभून्नाम! तथा कालस्यापि क्षणिकत्वात् पूर्वापर-कालव्यतिरिक्तः कालो न स्यादित्यत्राह—स्थिरवादे इति। सर्वस्यापि स्थिरत्वस्य साधितत्वेन रूपादाविव काले वर्तमानत्वं युक्तमित्यर्थः। नन्वस्तु कालः स्थिरः क्षणिको वा! तावतापि न रूपादिवद्वर्तमानता सम्भवति वर्तमानत्वं हि वर्तमान-कालसंयोगित्वम्। न च वर्तमानकाले वर्तमानकालसम्बन्धः! स्वस्य स्वेन योगासम्भवात्; नापि कालान्तरेण अनवस्थाप्रसङ्गादिति शङ्कते—नन्विति। मैवमिति—रूपादीनां वर्तमानत्वं न कालसम्बन्धमात्रे भाति अतीतादेरपि वर्तमान-त्वप्रसङ्गात्। किं तु वर्तमानकालसम्बन्धेन; तथाच कालस्य वर्तमानत्वं सिद्धम्। न चानवस्थादिदोषः स्वपरनिर्वाहकत्वादिति भावः। ननु रूपादीनामपि वर्तमानता मा भूत्! का नो हानिः? इत्यत्राह—वर्तमाननिषेधे इति। तत्र हेतुमाह—अतीतमिति। सर्वस्यापि वर्तमानतया प्रत्यक्षप्रतीतेरित्यर्थः।

नन्वतीतादिकमेव प्रत्यक्षविषयः। तत्र वर्तमानतया भ्रान्तिरेवेत्यत्राह—वर्तमानभ्रमश्चेति। अप्रसिद्धवर्तमानत्वस्याभावादेवेत्यर्थ इत्यन्ये।

केचित्तु—अतीतानागतयोरिन्द्रियसन्निकर्षाभावेन अप्रत्यक्षत्वादेव वर्तमान-तया भ्रमश्च न सम्भवतीत्यर्थ इत्याहुः। ननु पौर्वापर्यमेव क्षणानां वर्तमानता; तदुभयसमुदायस्य न समुदायापेक्षयाऽन्यत्वमित्यत्राह—पौर्वापर्येति। अत्र हेतुमाह-अतीतेति। पौर्वापर्यं नाम अतीतागामित्वमेव। तद्धिय एव वर्तमानबुद्धित्वे भूतभविष्यत्सर्ववस्तूनामप्यबाधितवर्तमानविषयत्वेन सर्वस्वस्त्रीपुत्रादीनामतीता-नामागामिनामपि वर्तमानबुद्धया तदत्ययप्राप्तिनिमित्तकश्शोकः कस्यापि न स्यादित्यर्थः।

ननु पूर्वत्वापरत्वयोस्समाहारो वर्तमानत्वं न तु पूर्वत्वपश्चात्त्वमात्रम्। तथा च अतीतस्य केवलं पूर्वत्वादागामिनचागामित्वान्न दोष इत्यत्राह—पूर्वापरत्वसंभेदे

इति। तथाच सति सर्वस्यापि किञ्चिदपेक्षया पूर्वत्वात्परत्वाच्च तत्संभेदस्य सर्वत्रापि सत्त्वेन अतीतादेरपि वर्तमानत्वप्रसङ्गस्तदवस्थः। ननु पूर्वापरत्वसंभेदो न यत्किंचिदपेक्षया किं तु स्वापेक्षयैव विवक्षितः। स एव वर्तमानता। प्रारब्धा-परिसमाप्त इति शाब्दैश्चोक्तः। अतो नातिप्रसङ्ग इत्यत्राह—**प्रारब्धश्चेति**। तत्र दूषणं वक्तुं शाब्दोक्तं तत्स्वरूपमाह—**व्यापारसमुदाय इति**। तत्रापि नैकस्य प्रारब्धत्वमसमाप्तत्वं च। अपि त्वेकफलावच्छिन्नस्य कस्यचिद्व्यापारसमुदायस्य। तत्र कस्यचिद्भूतत्वं कस्यचिद्भावित्वमेव। तथाच फलोत्पत्तिपर्यन्तस्य समुदायस्य तदवयवभूतत्वभावित्वाभ्यामुपचारात्प्रारब्धापरिसमाप्तत्वमुच्यत इति न कुत्रापि त्वदुक्तस्य सम्भव इति भावः।

इदं च शब्दसाधुत्वनिमित्तं वर्तमानत्वं शाब्दैर्विवक्षितमिति न तस्यातीता-दिसाधारणस्य प्रत्यक्षविषयतासम्भव इत्याह—**वैवक्षिकमिति**। अन्यथा अतीता-गामित्वाविशेषात् भूतभाविसमस्तस्यापि तथा धीप्रसङ्ग इति प्रागुक्तदोषानतिवृत्ति-रिति भावः।

ननु सतो विनाशप्रागभाववत्ता(वत्तया) वर्तमानता। तद्रूपेणैव प्रत्यक्ष-विषयत्वात्। तदतिरिक्तस्य (कालस्य) विषयत्वाभावात्त (वात्काल)स्य सत्त्वमस्तु मा वा किं (मावा क्रिया) प्रत्यक्षत्वं साध्यते? इति शङ्कते—**नन्विति**। **मैवमिति**—किं कालमात्रस्यापह्नवः? उत वर्तमानकालस्येति विकल्पमभिप्रेत्य आद्य आह—**कालासत्त्वपक्षस्येति**। कालाभावे भूतादिव्यवहारो न स्यादिति प्रागेव निरस्त-त्वादित्यर्थः। **तत्सत्त्वे त्विति**—तत एव सर्वव्यवहारस्य स्वरसतस्सिद्धत्वेन क्लिष्टकल्पनाया अन्याय्यत्वादिति भावः।

द्वितीयं दूषयति—किञ्चेति। तत्र किं सत इति वर्तमानत्वं विवक्षितम्? उत प्रमाणसिद्धपदार्थस्वरूपमात्रत्वम्? आद्ये आह—**अत्र सत इति**। तथा च विनाशप्रागभावोपश्लेषो व्यर्थः आत्माश्रयश्चेति भावः। **द्वितीयं दूषयति—अथेति**। ननु वर्तमानकालस्योपाधिर्यस्तत्सम्बन्ध एव वर्तमानताऽस्तु किं काल-विशेषकल्पनयेत्यत आह—**वर्तमानकाल इति**। वर्तमानकालोपाधेः स्वेन सम्बन्धा-भावाद्वर्तमानव्यवहारो न स्यादिति भावः। **उपाधिभिरिति**—न चेष्टापत्तिः! कालस्यागमिकत्वेन श्रुत्या च पूर्वं साधितत्वादिति भावः॥ ६८॥

अक्ष०—अथ कालसद्भावे प्रत्यक्षमपि प्रमाणमित्याह **काल इति अध्यक्षा-वसेयः**—प्रत्यक्षेणाधिगम्यः कथमधिगम्य इत्यत्राह—**क्षणलवेति**—क्षणमयं तिष्ठ-तीत्यादिप्रकारेण तत्तदर्थविशेषणतयाऽधिगम्यत इत्यर्थः। तत्रायं घटः इत्यभिज्ञा-प्रत्यक्षे क्षणरूपेण। सोऽयमिति प्रत्यभिज्ञायां दिवसमासादिरूपेणेतिविभागो विभावनीयः।

अनुमीयमानो विशिष्यादित्यत्राह—साक्षादिति। यथा घटपटाद्यर्थेषु साक्षात्काररूपः प्रत्ययः तथा कालान्वये -कालसंबन्धेऽपि क्वापि—परोक्षविलक्षणा साक्षात्काररूपा धीः। नः—अस्माकं भवतामपीत्यर्थः। भवति हि—हिः प्रसिद्धौ। सर्वेषामप्ययं घट इति प्रत्यक्षप्रत्यये सति घटे वर्तमानकालीनत्वसंशयानुदयेन कालस्य प्रत्यक्षाधिगमः प्रसिद्ध इति भावः। प्रत्यक्षप्रतीतौ पदार्थविशेषणतया दृश्यमानस्य कालस्य अनुमेयत्वकल्पने तत्तत्पदार्थानामपि सौत्रान्तिकवदनुमेयत्वकल्पनमपरिहार्यं स्यात्।

वस्तुतस्तु कालस्यानुमेयत्वं न संभवति लिङ्गाभावात्। नच परत्वादिकं लिङ्गं तस्य सूर्यावृत्त्याद्युपाधिसंबन्धसत्वे कालापेक्षाभावेन तद्गमकत्वं न संभवतीत्याह—तत्संयोगा इति—कालतदुपाधिसंयोगाः। परत्वादय—इत्यादिना अपरत्वादिग्रहणं। नच तदतिरिक्त गुणान्तरकल्पने प्रमाणमस्तीति। ततश्च लिंगतयाऽभिमत परत्वादिगुणान्तराभावादपि। एषः—कालः। नैवानुमेयः—अनुमातुं न शक्य इत्यर्थः। अनुमेयत्वे अनिष्टमाह—नोचेदिति। अनुमानत एव कालप्रतीतौ। अव्यक्तवत्—प्रकृतिवत्। अनेहाऽपि—कालोऽपि। लोकव्यवहारविषयो न स्यात्। यथा अव्यक्तं क्वचिदपि प्रत्यक्षप्रतीतौ पदार्थविशेषणतयाऽपि न भाति तथा कालोऽपि न क्वाऽपि विषयस्स्यात्। तथाच पदार्थानां प्रत्यक्षेण वर्तमानत्वमपि न गृह्येतेति भावः॥ ६८॥

कालप्रत्यक्षत्वम्

कालस्योपाधिभेदात्कतिचिदभिदधत्यब्दमासादिभेदं
तत्तद्रूपेण कालः परिणमत इति प्राहुरेके तदा तु।
ये तत्रोपाधयः स्युस्त इह परिणतिं प्राप्नुयुस्सानुबन्धाः
नित्यो व्यापी च तादृक्परिणतिभिरसौ सर्वकार्ये निमित्तम्॥६९॥

सर्वा०—यदि नित्य एकः कालः तस्य कथं परिच्छन्नानेकस्वरूपत्वमित्यत्र प्रसिद्धं पक्षमाह—कालस्येति॥ आदिशब्देन भूतभविष्यत्त्वादेरपि संग्रहः। नित्यस्यापि कालस्य द्रव्यान्तराणामिवावस्थाभेदेस्सर्वमिदं स्यात्। अवस्थाश्चात्रोपाधिसंबन्धमात्ररूपा इति लघीयान्पक्षः। पक्षान्तरमाह— तत्तद्रूपेणेति। यादवप्रकाशैरप्यभ्युपगतोऽयं पक्षः—*कालोऽनाद्यनन्तोऽजस्रक्षणपरिणामी मुहूर्ताहोरात्रादिविभागयुक्सर्वेषां परिणामस्पन्दहेतुः इति वचनात्। अयं भावः—क्षणरूप एव कालस्य सर्वदा परिणामः; तत्संख्याप्रकर्षतारतम्यान्मुहूर्तादिविभागः; तत एव चाब्दादीनामाद्यन्तमध्यमाद्युत्पत्तिक्षणविकल्पचोद्यं निस्तीर्णम्। प्रतिपुरुषमिष्टक्षणारम्भेणाब्दादिगणनाऽपि युक्तैव। अत्र च स्वतः क्षणादिभेदानभ्युपगमे कथमुपाधिभिरपि भेदः स्यात् तेषां कालमात्रेण संबन्धे तद्विशेषकत्वायोगात्, तदंशेन

संबन्धे तु स्वत एव कालांशभेदसिद्धेः। ननु कालविकारेष्वपि कृत्स्नैकदेशसंबन्धविकल्पदोषस्समानः; विकारान्तरेण भेदेऽनवस्थाप्रसङ्गश्चेति चेन्न; आश्रयैकदेशवृत्तिगुणादिन्यायेन निर्वाहादिति। अयं परिहार उपाधिसंबन्धमात्रपक्षेऽप्यविशिष्ट इत्यन्ये मन्यन्ते। अत्र परिणतिपक्षमनूद्य तत्राप्युपाधिव्याप्तिमाह— तदा त्विति।

स्पन्दसन्ततिसिद्ध्यर्थं कालस्याणुत्वकल्पनम्।
आशावसानतोकानां दुराशामात्रजृम्भितम्॥

क्रियासन्ततिवत्काले परिणामपरम्परा।
किं न स्यात्स्वप्रकर्षाद्यैः परत्वादिप्रसाधिका॥

एकाश्रयक्रियासंख्या काल इत्याप्तभाषितम्।
कालोपाधिविशेषाणां सर्वेषामुपलक्षणम्॥

अनुबन्धाः—ऋतुलिङ्गादयः। आनन्तर्यनियमादुत्तरोत्तरकार्याणामुपाधिमूलत्वं च सिद्धम् ऋतुलिङ्गादीनां नु न कालकार्यहेतुनियमः। ये तु शैवादयः कालमनित्यमव्यापिनं परिमितकार्यहेतुं च प्राहुः, तान्प्रत्याह—नित्य इति। क्षणाद्यंशस्यागन्तुकत्वेऽपि स्वरूपतो नित्यः। नित्यत्वं चात्र प्रध्वंसविरहमात्रम्; न तु सर्वदा सत्ता, कालान्तराभावात्। व्यापित्वं तु क्षणतोऽपि स्यात्; सार्वत्रिकाणामपि केषांचिद्यौगपद्यसिद्धेः। नित्यत्वे प्रागेव प्रमाणं दर्शितं। व्याप्तिश्च—*कालं स पचते तत्र न कालस्तत्र वै प्रभुः इत्यादिभिस्सिद्धा। त्रिगुणविभूतिवत्कालप्रतिनियतविकारास्तत्र न सन्तीत्यर्थः। स्वविकाराणामुपादानतयाऽन्येषां निमित्ततया वाऽस्य सर्वहेतुत्वं *कालः पचति भूतानीत्यादिभिर्गम्यते। तदपि सर्वत्र सन्निहितस्य।

ननु *अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः, *सर्वव्यापी सर्वभूतान्तरात्मा इत्यादिषु एकस्य सर्वव्यापकत्वं श्रूयते; अतस्तद्व्याप्यस्य कालस्य कथं विभुत्वम्? इत्थम्—न हि न्यूनदेशवर्तित्वमेव व्याप्यत्वम्; तथा सति समव्याप्तिभङ्गप्रसङ्गात्। तर्हि तद्वदन्योन्यव्याप्यत्वमिह स्यादिति चेत्, किमत्रानिष्टं परस्परप्रवेश्यत्वाद्यनभ्युपगात्। द्वयोरपि सर्वसंयोगित्वे वि[वादा]रोधाभावात्। अतो यत्र कालस्तत्र सर्वत्र परमात्माऽस्तीति तस्य कालव्यापकत्वम्। इदं च तस्य धर्मभूतज्ञानेऽपि द्रष्टव्यम्। परमात्मन[नः] स्वरूपैकदेशे विश्वं व्यवस्थितमित्येतदपि तादृशव्यतिरिक्तविषयम्। अन्यथा तस्य ज्ञानानन्दत्वादेरपि एकदेशित्वप्रसङ्गात्। न चैवं सति सर्वजीवानां व्यापित्वेऽप्यविरोधः स्यादिति वाच्यम्; अणुत्वश्रुत्या तत्प्रतिषेधात् इति। ननु कालतो देशतो व्यतिरेकग्रहणस्याशक्यत्वान्नित्यविभूनां कारणत्वमेव न सिध्यति, कुतस्सर्वकारणत्वमित्यनुयोगश्च धर्मिग्राहकेणैव निरस्तः। अस्ति हि लोकेऽप्युपदेशतोऽपि तत्तद्वस्तुषु कारणत्वग्रहणम्। अथ स्यात् - नियतपूर्वसत्त्वं कारणत्वम्, नियमश्चास्मिन्सत्येवेदं भवतीत्येवंरूपः; तत्रावधारणसिद्धोऽन्यदा नास्तीत्ययमर्थो नित्येषु च विभुग्रहण इति। मैवम्;

प्रसङ्गतोऽपि नियमसिद्धेः; तथा हि। इदं सर्वकारणमिति बोधयतामयमाशयः—यद्येतन्न स्यात् सर्वं नोत्पद्येत। अतस्सर्वोत्पत्तिप्रयोजकमेतदिति; न पुनर्यदा यत्रेदं नास्ति तदा तत्र सर्वं नास्तीति। अतस्सुष्ठूक्तं नित्यव्यापिनः कालस्य सर्वकार्य-हेतुत्वम् ॥ ६९ ॥

आनन्द०—आक्षेपसंगतिमाह—यदीति। परिच्छिन्नेति—क्षणादिरूपेण परिच्छेदः न तु देशपरिच्छेद इति भावः। प्रसिद्धमिति—उपाधिपरिच्छेदस्य काणादादितन्त्रसिद्धत्वादिति भावः। आदिशब्देन वर्तमानत्वादिसंग्रहः। द्रव्यान्तरा-णामिवेति। तन्त्वादीनां पटाद्यवस्थाभेदेनेवेत्यर्थः। लघीयान् पक्ष इति—अतिरिक्तपरिणामपक्षेऽप्यावश्यकत्वाल्लघुतरत्वमस्येति भावः। यादवप्रकाशवचन-मुदाहरति—कालोऽनाद्यनन्त इतीति केचित्।

श्रुतिवाक्यमित्यन्ये।

परिणामपक्षे क्षणलवादिव्यापिपरिणामो न स्यात्। युगपत्परिणामद्वयस्य विरुद्धत्वात्। न चेष्टापत्तिः। संवत्सरादिपरिणामकाले क्षणादिपरिणामाभावेन तद्व्यवहाराभावप्रसङ्गादित्यत्राह - अयं भाव इति। क्षणरूप एवेति—तथा च परिणामान्तरस्यानभ्युपगमात् क्षणादिव्यवहारविरोधोऽपि नास्ति माससंयवत्सरा-दिव्यवहारश्च तत्तत्संख्याप्रकर्षतारतम्याद्युज्यत इति भावः।

एतेन अब्दादिपरिणामो द्वादशमासादिपरिणामव्यापकः किमादिमासप्रथम-दिवस उत्पद्यते ? उत मध्यमासमध्यदिवसे ? यद्वा अन्त्यमासान्त्यदिवसे ? नाद्यः; आदावेवोत्पन्नत्वे तस्मिन्नेव दिवसे मासादिषु संवत्सरव्यवहारप्रसङ्गः। किं च क्षणे संवत्सरादिपरिणामो वर्तते न वा ? तत्र वृत्तौ क्षण एव संवत्सरस्स्यात्। तत्रावृत्तौ ततोऽतिरिक्तकाले संवत्सरव्यवहारो न स्यात्। न च तदोत्पन्नसंवत्सर-रूपपरिणामो द्वादशमासपर्यन्तस्थायी(ति)तावता परिसमाप्यत इति नैकदिवसादौ व्यवहारप्रसङ्ग इति वाच्यम्; तथात्वे व्यासज्यवृत्तिता स्यात्। तथाच तावद्दिव-सानामभावात् केवलकालमात्रप्रतीतिर्न स्यात्। न च पूर्वं(पूर्वं) दिवसानुसन्धान-पूर्वकान्त्यदिवसप्रतीतिकाले प्रतीयत इति वाच्यम्; तथात्वे तावद्दिवसपरिणामस्यैव संवत्सरत्वोपपत्तौ तदतिरिक्तपरिणामकल्पने प्रमाणाभावात्। अत एव न द्वितीयतृतीयावपीति संवत्सराद्युत्पत्तिरनुपपन्नेति शङ्कापि निरस्तेत्याह—अत एवेति। क्षणसङ्ख्याप्रकर्षविशेषस्यैवाब्दादित्वादित्यर्थः। क्षणपरिणामे सर्वप्रत्ययं प्रमाणयति—प्रतिपुरुषमिति। इष्टः—प्रमाणेनाभ्युपगतः।

ननु क्षणादिप्रतीतिरप्युपाधिभिरस्तु किंपरिणामेनेत्यत आह–अत्र चेत्य दि। तदेवोपपादयति—तेषामिति। तथाच कालमात्रस्य क्षणोपाध्यवच्छिन्नत्वात् सङ्ख्यापरिमाणाद्यवच्छिन्नघटस्येव भेदो न स्यादित्यर्थः। स्वत एवेति—स्वतोंऽशा-

भावे औपाधिकस्याप्यसम्भवादिति भावः। नन्विति—उपाधिपक्ष एव ज्यायानित्यर्थः। आश्रयैकदेशेति—स्वपरनिर्वाहकतया कालभेदकत्वमिति भावः। ननु परिणामपक्षे क्षणपरिणामस्य क्षणिकत्वावश्यम्भावात् क्षणिकत्वानुमाने(साध्याप्रसिद्धया)व्याप्यत्वासिद्ध्युद्भावनं न स्यात्। नचोपाधिपक्षेऽप्ययं दोषः ! क्षणोपाधीनां क्षणिकत्वाभावस्योपपादितत्वादित्यस्वरसादुपाधिपक्षमुपक्षिपति—अयं परिहार इति। कालसम्बन्धप्रकर्षः परत्वम्। तन्नयूनत्वमपरत्वम्। सम्बन्धश्च संयोगः। स च क्रियाधीनः। क्रिया च विभुत्वेऽनुपपन्ना। तथाच न तन्निबन्धनसंयोगादिसम्भवः। न च कालस्य निष्क्रियत्वे(यस्या)प्यन्यस्य परिच्छिन्नत्वात् तत्क्रियातस्संयोग इति वाच्यम्; तथाऽपि प्रथमसंयोगानन्तरं निष्क्रियस्य स्थिरस्य तत्प्रकर्षायोगात्। विभुनश्च द्रव्यस्य संयोगमात्रस्याभावात्। तथाच परत्वादेरसम्भवप्रसङ्गात्। अणुः कालः स्पन्दसंततिसिद्ध्यर्थमङ्गीकरणीय इति जैनपक्षमनुभाषते—स्पन्देति। स्पन्दसंततिः—परत्वापरत्वहेतुक्रियासंततिः। आशावसानाः—दिगम्बराः। क्रियासंततिवदिति—यथा क्रियाप्रकर्षः कालनिष्ठः परत्वादिहेतुः तथा विभुत्वेऽपि कालस्य तन्निष्ठः परिणामपरम्पराप्रकर्षः परत्वादिहेतुरस्तु ! तथाच परत्वादेरन्यथाऽप्युपपत्तेः न तदर्थमणुत्वं कल्प्यम्।

यद्वा कालसम्बन्धप्रकर्षो न परत्वं तन्नयूनता वा अपरत्वम्; अपि तु परिणामपरम्पराप्रकर्षावच्छिन्नकालयोगः परत्वं तन्नयूनतावच्छिन्नतद्योगोऽपरत्वम्। योगश्च न संयोगः; अपि तु आधाराधेयभा(व इति)वादिरूपसम्बन्धविशेष इति न तदर्थं कालस्याणुत्वं कल्प्यमिति भावः। नन्वणुत्वविभुत्वयोरन्यतरनिर्णयः कथम् ? इति चेत्; लाघवेनैकत्वनिर्णयेन; अन्यथा समस्तदेशवर्तिनां कालयोगे कल्प्यमाने अनन्तकालकल्पनाप्रसङ्गेन गौरवप्रवङ्गात्। ननु—

एकाश्रयक्रियासङ्ख्या कालस्तस्य तु मानतः।

इति ज्योतिश्शास्त्रे परिस्पन्दसंततेरेव कालत्वाभिधानात् तद्विरुद्धोक्तिर्विरुद्धेत्यत आह एकाश्रयेति। एकः तपनादिः। तत्क्रियासङ्ख्या कालोपाधिरित्यर्थः। नन्वेवं परिणामाद्युपाध्यङ्गीकारविरोध इत्यत्राह—सर्वेषामिति। ननु क्रियासंख्यैव कालोऽस्तु किमर्थं तदुपाधित्वमङ्गीकरणीयमिति चेत्; मैवम्; क्रियादीनां कालत्वे पौर्वापर्यव्यवस्थाया अभावेन सर्वेषां यौगपद्यप्रसङ्गात्। ननु परिणतिपक्षे उपाध्यभावात् कथं तदात्वित्यादिना उपाधिरुच्यते ? इत्यत्राह—परिणतिपक्षमनूद्येति। ननु तत्पक्षस्यानुपाधिपक्षत्वात्कथमुपाधिसम्बन्ध इत्याशङ्क्य परिणामस्यापि कादाचित्कतया सामग्रीसापेक्षतया तासामेवोपाधित्वादित्यत्राह—तत्रापीति। ननु ऋतुलिङ्गादिकमेव कालव्यवहारहेतुरस्त्वि(लोपाधिरस्त्वि)त्यत्राह—ऋतुलिङ्गादीनामिति। व्यभिचारित्वमित्यर्थः।

ये तु शंवादय इति—क्षणलवादिभिन्नस्य पूर्वोत्तरकालेष्वभा(कालेऽभा)-

वादनित्यत्वमव्यापित्वं च । अत एव न शर्वहेतुत्वमिति भावः । क्षणाद्यंशस्येति—क्षणलवादीनामौपाधिकत्वपरिणामाभ्यामुपपन्नत्वादिति भावः । ननु नित्यत्वं हि सर्वकालसम्बन्धः । स च कालस्य कालान्तराभावान्न सम्भवतीत्यत्राह—नित्यत्वं चेति । प्रागभावाप्रतियोगिनः कालस्येत्यर्थः । ननु सर्वस्याप्येकक्षणसम्बन्धो न सम्भवत्यतीतादेस्संवन्धायोगादित्यत्राह—सार्वत्रिकाणामपीति । तत्काले वर्तमानानामित्यर्थः । ननूक्तेन प्रमाणेन नित्यविभूतौ कालाभाव एव प्रतीयत इत्यत्राह—त्रिगुणविभूतिवदिति । 'कालं स पचते' इत्यंशेन कालसत्त्वप्रतीतेरिति भावः । हेतुत्वबलादपि व्यापित्वं सिद्धमित्याह—तदपि सर्वत्रेति । ननु सन्निधानाभावेऽपि कारणत्वमस्तु को दोषः ? इति चेन्न; अतिप्रसङ्गाभावाय कारणसन्निधानस्यापेक्षितत्वात् । विभुत्वे श्रुतिविरोधं शङ्कते—नन्विति । परिहरति इत्थमिति । द्वयोरपीति—विभुनाऽपि संयोगसम्भवादिति भावः । अत इति—यत्र कालसम्बन्धस्तत्र परमात्मसम्बन्ध इत्यर्थः । अन्यार्थं चेदं वक्तव्यमित्याह—इदं चेति । धर्मभूतज्ञानस्य विभुत्वादिति भावः । ननु—

तस्य स्वरूपैकदेशे विश्वमेतद्व्यवस्थितम् ।
तस्यायुतायुतांशांशे विश्वशक्तिरवस्थिता ॥

इति वचनविरोधस्स्यादित्यत्राह—परमात्मन इति । विश्वशक्तिः—विश्वमित्यर्थः । अन्यथेति । ज्ञानस्य प्रादेशिकत्वे क्व (किं)चित्प्रदेशे जडत्वप्रसङ्गादिति भावः । ननु व्याप्यत्वान्यथानुपपत्त्या जीवाणु(वान्य)त्वं न स्यादित्यत्राह न चैवमिति । ग्राहकाभावेन ग्राह्याभावं शङ्कते—नन्विति । असिद्ध्या परिहरति—निरस्त इति । असिद्धिमेवोपपादयति—धर्मिग्रहण इति । ननूपदेशो योग्यताविरहान्न बोधक इति शङ्कते—अथेत्यादिना । ग्राह्यस्य बाधादिति भावः । तर्कस्वरूपमाह—तथा हीति । आरोपितेनाभावेनापादनसम्भादिति भावः । न पुनरिति व्याप्तिरिति—तथा व्यतिरेकव्याप्तिसत्त्वं नापेक्षितमिति भावः ॥ ६९ ॥

अक्ष०—एकस्य कालस्य कथमब्दमासादिभेद इत्यत्राह—कालस्येति । उपाधिभेदादिति—एकानेकान्यूनाधिक सूर्यपरिस्पन्दाद्युपाधिभेदादित्यर्थः । कतिचित्—कतिपये । अब्दमासादिभेदम् । अभिदधति—वदन्तीत्यर्थः । यादवप्रकाशीयास्तु "कालोऽनाद्यनन्तः अजस्रपरिणमी मुहूर्ताहोरात्रादिविभागयुक् सर्वेषां परिणामस्पन्दहेतुः" इतिवचनात् तत्तद्रूपेण—अब्दमासादिरूपेण कालः परिणमत इति प्राहुः । प्राहुरेके—इत्यभिधीयन्ते । परिणामपक्षेऽपि कालोपाधय एव परिणामं प्राप्नुयुरित्याह—तदात्विति—परिणामाङ्गीकारेऽपीत्यर्थः । सानुबन्धाः—ऋतुलिङ्गादिसहिताः । नित्यः—स्वरूपतो नित्यः । व्यापीच—क्षणादितोऽपि व्यापित्वं स्यादिति भावः । असौ—कालः । तादृक्परिणतिभिः अब्दादिपरिणामैः । सर्वकार्यनिमित्तम्—हेतुर्भवति ।

अत्र नित्यत्वं ध्वंसाप्रतियोगित्वं नतु सर्वकालसत्वं तदतिरिक्तकालाभावात्। नाशाभावेन सर्वव्यापित्वेन च सर्वकार्यनिमित्तत्वं। व्याप्तिश्च—"कालं स पचते यत्र न कालस्तत्र वै प्रभुः"। इति नित्यविभूतावपि सत्वादवगम्यते। सर्वहेतुत्वञ्च—"कालः पचति भूतानि" इत्यादि धर्मिग्राहकमानसिद्धम्। अतो नित्यविभोरन्वयग्रहणायोग्यत्वेऽपि न क्षतिः। अस्ति हि लोकेऽप्युपदेशतोऽपि तद्वस्तुषु-कारणत्वग्रहणमिति भावः॥ ६९॥

कालस्यावच्छेदकप्रकारविभुत्वसर्वकार्यहेतुत्वानि

वायुर्दोधूयते यद्यदयमुडुगणो बम्भ्रमीति द्रुतं खे
तेजो जाज्वल्यते यद्यदपि [जलनिधि,न जलधिर्माधवीं दोधवीति।
सूर्यद्वा बोभवीति स्थिरचरधृतये तच्च तादृक्च सर्वं
स्वायत्ताशेषसत्तास्थितियतनपरब्रह्मलीलोर्मिचक्रम्॥ ७०॥

सर्वा०—प्रकृतचिन्तावर्गस्य परब्रह्मवैभवव्यञ्जकतया सार्थकत्वं प्रथयति—वायुरिति॥ माधवीं—पृथिवीम्। *मेघोदयस्सागरसन्निवृत्तिरित्यादिसूक्तं स्मारयति—तच्च तादृक्चेति। यतनं—व्यापारः। सुग्रहमन्यत्॥ ७०॥

॥ इति श्रीसर्वार्थसिद्धिसमेते तत्त्वमुक्ताकलापे जडद्रव्यसरः प्रथमः॥ १॥

आनन्द०—उत्तरश्लोकस्य तत्वानिरूपकत्वादसाङ्गत्यमाशङ्क्य संगतिमाह—प्रकृत(ति)चिन्तावर्गस्येति॥ ७०॥

तुरगवदनशक्त्या बृंहिताश्चर्यशक्तिः
कविकथकमृगेन्द्रो वेङ्कटाचार्यवर्यः।
अधिहृदयगुहं मे वासमासाद्य नित्यम्
व्यलिखिदखिलमर्थं ह्याद्यमुक्तासरस्य॥

इति कौ(कु)शिककुलजलनिधिसुधाकरस्य निगमान्त(निगमशिखरपर)-विद्याकुमुदिनी-
संमोद(दिनीनिशा)करस्य वेदान्ताचार्यस्य भागिनेयेन वत्सकुलतिलक
(वत्सकुलकलशजलधिकौस्तुभ) श्रीनृसिंहगुरुतनयेन नृसिंहदेवेन
विरचितायां सर्वार्थसिद्धिव्याख्यायां आनन्ददायिन्यां
जडद्रव्यसरः प्रथमः॥

अक्ष०—एतावता निरूपितानां जडद्रव्याणां स्वरूपस्थिति प्रवृत्ति विशेषाः परब्रह्माधीना इत्याह—वायुरिति। दोधूयते—सदागतिर्भवति। इति यत्। अयमुडुगण—नक्षत्रचक्रं। बंभ्रमीति—भृशं भ्रमति। द्रुतं खे—आकाशे। इति

यत्। तेजः—सूर्यादिः। जाज्वल्यते—अधिकं ज्वलति। इति यत्। जलनिधिः। माधवीं—पृथिवीं। दोधवीति—सम्यक्पुनाति। इति यदपि—भूर्वा—पृथिवी वा। स्थिरचरधृतये—स्थावरजङ्गमधारणाय। बोभवीति—प्रभवतीति यत्। तच्च तावृक्च—"मेघोदयस्सागरसन्निवृत्तिः" इत्यादिषूक्तं सर्वं—क्रियाजातमपि। स्वायत्तेति—स्वाधीनाखिलस्वरूपस्थितिप्रवृत्तिभेदस्य परब्रह्मणः लीलाप्रवाहतरङ्गसङ्घात इत्यर्थः॥ ७०॥

सर्वतत्त्वस्थितिप्रवृत्तीनामीश्वरेच्छायत्तत्वम्॥

इति नावल्पाक्कं अय्याश्रीदेवनाथतातयार्यं महादेशिकविरचिते अक्षरार्थनाम्नि व्याख्याने जडद्रव्यसरस्सम्पूर्णः॥

जीवसरः द्वितीयः

योमे हस्तादिवर्ष्मेत्यवयवनिवहाद्भाति भिन्नस्स एकः
प्रत्येकं चेतनत्वे बहुरिह कलहो वीतरागो न जातः ।
तत्सङ्घातातिरिक्तेऽप्यवयविनि कथं तेष्वसिद्धा मतिस्स्यात्
सङ्घातत्वादिभिर्वा घट इव तदचित्स्यान्ममात्मेत्यगत्या ॥ १ ॥

सर्वा०—अथ प्रत्यगर्थे जीवस्तावन्निरूप्यते । तत्र चार्वाकेणापि दुरपह्नवं प्रमाणमाह—य इति ॥ हस्तादिवर्ष्म—हस्तादिरूपं शरीरमित्यर्थः । मम हस्तादि मम वर्ष्मेति वा पृथगुदाहर्तव्यम् । अस्ति तावदयं व्यतिरेकप्रत्ययः; तत्र न तावदेकोऽवयवोऽवयवान्तराणि ममेत्यभिमन्यते, तथाऽनुपलम्भात्, व्यवस्थापकाभावाच्च । सर्वावयवविषयश्चासौ ममकारः । न चावयविनोऽयं स्वावयवाभिमानः, तन्निरासात् । नापि सङ्घातस्सङ्घातिनोऽभिमन्यते, संसर्गस्य तदयोगात्, संसर्गिणां तु दत्तोत्तरत्वात् । एवमवयवेषु बहुष्वभिमन्तव्येष्ववाधितैकप्रत्ययविषयोऽभिमन्ता हस्तादिभ्यस्तत्सङ्घाताच्चान्य इत्यभिप्रायेणाह—स एक इति । स्मर्यते च *पिण्डः पृथग्यतः पुंसश्शिरःपाण्यादिलक्षण इत्यादि । अवयवोपचयापचयविनाशादिकालेष्वपि स एवाहमिति प्रत्यभिज्ञाविषयः कालभेदेऽप्यभिन्न इति चात्र भाव्यम् । अन्यथा पाण्याद्यवयवच्छेदे हि तदनुभूतस्मरणं न स्यात्; अन्यदृष्टस्यान्येन स्मरणायोगात् । न च तदनुभववासनासंक्रमादन्योऽपि स्मरति, मात्राद्यनुभूतस्य गर्भादिभिः स्मरणप्रसङ्गात् । न च संसर्गे वैषम्यं कल्प्यम्, नियामकाभावात् । वासनासंक्रमश्च पटादिषु मृगमदादेर्द्रव्यस्य संक्रमः । न चेह तथा, त्वयैदानभ्युपगमात् । गुणसंक्रमो न क्वचिदपि । न चात्ररुमाक्षिप्तकाष्ठान्यायः, दुःखादेरपि तथोत्पत्तिप्रसङ्गात् । कल्प्येषु च नियामकादृष्टेः ।

सर्वबोधैश्च हृत्कोशे संस्काराधानमित्यपि ।
न दृष्टं न च तत्क्लृप्तौ लिङ्गं किमपि दृश्यते ॥

स च संस्कारकोशस्ते सङ्घातात्मा प्रतिक्षणम् ।
प्रचयापचयाभ्यां स्याद्भिन्नः स्मर्ताऽत्र को भवेत् ॥

प्रत्येकचैतन्यपक्षे दूषणान्तरमाह—प्रत्येकमिति । अयं भावः—बहूनां हि चेतनानां कार्यवशात्संहतानामपि परस्परमीर्ष्यासूयादयो दृश्यन्ते । नात्र कदाचिदपि तथा । मिथश्चैते किमर्थमुपकुर्युः ? न तावददृष्टार्थम्; त्वया तदनभ्युपगमात् । न चैकग्रामवर्तिनामिव कार्यतोऽन्योन्यमुपकारः; क्वचिदपि देहे तादृगभिसन्धेर-

दर्शनात्। एक एवाहं सर्वैरवयवैर्यथार्हमधिष्ठितैः स्वात्मन उपकरोमीति सर्वेषां स्वसंवेदनसिद्धमिति।

ननु स्वोपकारनिरपेक्षपरोपकर्तारः पराभ्यसूयारहिताः स्वपाण्यादयः स्वहेतुशक्त्या यदृच्छातो वा सिद्धा इत्यत्राह—वीतरागा इत्यादि। जातः कश्चिच्चेतनः; स च रागद्वेषादिरहितः, तदा सर्वप्रवृत्तिनिवृत्तिभङ्ग इति भावः। आवृत्त्याऽन्योऽप्यर्थः। जातमात्रो हि जन्तुः स्तन्यादिवाञ्छायुक्तस्तदर्थप्रवृत्त्या निश्चीयते। तदवस्थस्य च रागादयो भवान्तरीयसंस्कारोद्बोधमन्तरेण न युज्यन्ते। ततश्च देहतदंशव्यतिरिक्त आत्मेति। एवं मनुष्यादिशरीरप्राप्तिदशायामदृष्टविशेषात्पूर्वजन्मानुभवसंस्कारभेदैरेव मतिरुचिभेदाश्च युज्यन्ते। अवयविवादमन्वारुह्याप्याह—तत्सङ्घातेति। अयं भावः—अवयवगतविशेषगुणपूर्वका एव ह्यवयविनि विशेषगुणास्तद्वादिभिरिष्यन्ते। प्रत्यवयवचैतन्यं च निरस्तमेव। नन्ववयवनिष्ठं चैतन्यं सूक्ष्मवर्तित्वात्सूक्ष्मम्। अवयविनिष्ठं तु स्थूलवर्तित्वात् स्थूलम्; तदेव व्यवहारयति। मैवम्; त्रसरेणुकल्पानामपि जन्तूनां प्रवृत्तिदर्शनात्, अतोऽपि स्थूलतमानां मनुष्यमातङ्गाद्यवयवानां पृथक् स्वधीपूर्वप्रवृत्तिप्रसङ्गात्। न च मनुष्याद्यवयवेषु चैतन्यमनुद्भूतमिति वाच्यम्, अनुद्भूतैरुद्भूतारम्भायोगात्।

यत्तु सूत्रितं सुरगुरुणा *पृथिव्यापस्तेजो वायुरिति तत्त्वानि, तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवदिति; इदमपि प्रत्येकसमुदायादिविकल्पदोषोक्त्या दत्तोत्तरम्। अस्ति हि प्रत्यवयवं किण्वादीनां संसर्गविशेषे मदशक्तिः, अम्लकर्पूरादिषु विषशक्तिश्च। एतेन चूर्णहरिद्रासंसर्गजरागादयोऽपि निरूढाः। ननु चैतन्यमिति न कश्चिद्गुणः यस्याधारोऽपेक्ष्यः, किंतु याऽसौ युष्माकं चैतन्यसामग्री सैव चैतन्यपदार्थस्स्यात्; व्याहारव्यवहारयोस्तयैवोपपत्तौ मध्ये गुणविशेषकल्पने गौरवादिति; तन्न, तस्याः प्रत्यक्षत्वायोगात्। प्रत्यक्षाप्रत्यक्षसमुदायो हि सर्वत्र सामग्री। प्रत्यक्षश्च जानमीति बोधः। न च तद्धीरानुमानिकी, त्वया कथमप्यतीन्द्रियानुमानानभ्युपगमात्; प्रवृत्तिरहितदशायामपि जानामीति धीसद्भावाच्च।

देहधातुविशेषो वा विकासो वाऽस्य कश्चन।
ज्ञानमित्यपि वक्तुं ते न युक्तं तददर्शनात्॥

हृदयस्थः पित्तविशेषः प्रकाशक इति वैद्यागमस्त्वन्यपरः। ये तु लोकायतमित्यत्रायतशब्दविवक्षितमनुमानमपि प्रत्यक्षान्तर्भावेण तत्फलतया वा गृह्णन्ति, तान्प्रत्यनुमानान्यप्याह—सङ्घातत्वादिभिरिति। तदिति वर्ष्मपरामर्शः। अचित्—न चैतन्याश्रय इत्यर्थः। विमतमचेतनं सङ्घातत्वाद्घटवत्। आदिशब्देन बाह्येन्द्रियग्राह्यत्वाच्चाक्षुषत्वाद्भूतत्वाद्रूपवत्त्वादित्यादीनां ग्रहणम्; तथा विगीता धीश्चैत्रव्यतिरिक्तविषया, धीत्वात्, मैत्रधीवत् इति। नचैषां प्रत्यक्षबाधः शङ्क्यः;

देहात्मबोधस्यान्यथासिद्धिसंभवात् व्यतिरेकधीप्राबल्याच्च। ननु भेदधीबलादेषां प्रत्यक्षविरोधः परिजिहीर्षितः; सा तु न भेदसाधिका; ममात्मेत्यभेदेऽपि तद्दृष्टेरित्यत्राह—स्यादिति। अयं भावः—मम हस्तः, शरीरमित्यादिप्रत्ययाः मम गृहमित्यादिवद्व्यक्तव्यतिरेकाः। ममात्मेति धीस्तु घटस्य स्वरूपमितिवदभेदेऽपि निर्दिष्टविशिष्टांशनिष्कर्षगोचरतया तन्मात्रभेदस्थापिकाऽगत्या स्वीकृता, नान्यत्रापि, अतिप्रसङ्गादिति ॥ १ ॥

नरसिंहभुजान्तराल[1] राजन्मसृणालक्तकपादपङ्कजां ताम्।
कलयामि कटाक्षलेशलक्ष्या विबुधानामधिपा भवन्ति यस्याः ॥

आनन्द०— उद्देशक्रम एव निरूपणे क्रम [2]इत्यभिप्रेत्याह—**अथेति**। उद्देशे वा कथं क्रम इत्यपेक्षायामाह—[3]**चार्वाकेणापीति** तथा च सकलप्रमाणसिद्धस्य प्रथमोपस्थितेर्जीवस्येशात्प्रथममुद्देश इति भावः। यो मे हस्तादिवर्ष्मेत्यत्र हस्तादिरूपं [4]वर्ष्मेत्यङ्गीकारे विशेषणवैयर्थ्यमित्यभिप्रायेणाह—**मम हस्तादीति**। **अनुपलम्भादिति**। [5]हस्तादिषु नियतस्याभिमन्तुरयमित्यनुपलम्भादित्यर्थः। **व्यवस्थापकेति**। [6]अनुपलम्भे युक्तितो हस्तादिष्वयमिति व्यवस्थापनायोगादित्यर्थः। **सर्वावयवेति**। मम हस्तो मुखं पादः शिर उदरमित्यादिरि[7]त्यर्थः। तथा च सर्वस्याभिमन्तुर्भेदभानात् तत्रैकस्य [8]नाभिमन्तृत्वमितिभावः। [9]न च भिन्नोऽहमर्थो भासतां येभ्यः स त्ववयवीत्यत्राह—**न चावयविन इति**। नन्ववयव्यभावेऽपि सङ्घातस्तादृशोऽस्त्वित्यत्राह—**नापीति**। सङ्घातः किं संसर्गः उत संसर्गिण एवेति विकल्पमभिप्रेत्य आद्यं दूषयति—**संसर्गस्येति**। धर्मभूतस्य तस्याभिमानरूपधर्माश्रयत्वा[10]योगादित्यर्थः; अन्यथा तस्यैव द्रव्यत्वावयवित्वादिप्रसङ्गादिति भावः। द्वितीयं दूषयति—**संसर्गिणामिति**। तथाऽनुपलम्भाव्द्यवस्थापकाभावाच्चेत्यनेनेत्यर्थः। [11]**अबाधितप्रत्ययबलादपि** हस्तादिभ्योऽन्य इत्याह—**अबाधितेति**। ननु सङ्घातस्यैक्यात्कथमेकत्वप्रत्ययस्य ततो भेदकत्वमिति चेत्; मैवम्; सङ्घातस्य सङ्घात्यतिरेकित्वाभावात्। भावे वा संसर्गरूपस्यापि हस्तादिभेदेन भिन्नत्वात्। न च गौण एकत्वव्यवहार इति वाच्यम्; न हि वयमेकत्वव्यवहारमेक[12]त्वप्रत्ययं वा प्रमाणं

---

१. राजद्घुसृणा-क,　　२. इत्यभिप्रायेणाह—ग-घ, इत्यत्राह—क-ख।
३. चार्वाकादिभिरपीति—क-ख,　　४. वर्ष्मेति कर्मधारयाङ्गीकारे—क, ख।
५. हस्तादिभिन्नस्याभिमन्तु—ग, हस्तादिष्वभिमताभिमन्तु—घ।
६. अनुपलम्भयुक्तितो—क,　　७. त्यर्थः। सर्वस्याभि—ग, घ।
८. नाभिमन्त्रहमर्थाभिन्नत्व—ख,　　९. नचैभ्यो भिन्नो भासतां सत्ववयवी—ग।
१०. त्वायोगात्; अन्यथा तस्यैव द्रव्यत्वावयविवादातिप्रसङ्गादिति भावः—ख।
११. अबाधितैकत्वप्रत्यय—क,　　१२. त्वसङ्ख्याप्रत्ययं वा—ख।

ब्रूमः; अपि तु यस्य मे हस्तादिस्तस्य मे पादादीत्यभेदप्रत्ययम्; न चैषोऽन्यथा नेतुं शक्य इति भावः। पिण्डः—शरीरम्।

[1]अस्थिरभावेभ्योऽवयवेभ्यः स्थिरत्वेन भेदं साधयितुं तस्य स्थैर्यं साधयति—अवयवेति। उपचयो—वृद्धिः। अपचयो—ह्रासः। विनाशो—विध्वंसः। [2]भेदादिरादिशब्दार्थः। त्वय्येवानभ्युपगमादिति—अवयवान्तरे अवयवान्तरसंक्रमाभावात्[3] सर्वत्र [4]संक्रान्तस्यावयविवत् अवयवत्वाभावादिति [5]त्वदीयटीकाग्रन्थे दर्शनादिति भावः। ननु संस्काररूपवासनायाः संक्रमोऽस्त्वित्यत्राह—गुणेति। ननु रुमायां लवणाकरे क्षिप्तस्य काष्ठस्य तत्संसर्गाल्लवणतासंक्रान्तिवद्वासनाश्रयसम्बन्धादवयवान्तरेऽपि वासनाऽस्त्वित्यत्राह—नचेति। तथा सति [6]पाणौ दुःखेन सम्बन्धात् पदेऽपि तदुत्पत्तिप्रसङ्ग इत्याह—दुःखादेरपीति। नचातिरिक्तात्मपक्षेऽपि [7]दोषः! पाण्याद्यवच्छेदेन [8]दु;खोत्पादेऽपि पादावच्छेदेन तदुत्पादे हेत्वभावादिति भावः। ननु वासनामात्र एव रुमान्याय इत्यत्राह—कल्प्येषु चेति। वासनायामेवेत्यत्र नियामकादृष्टेरित्यर्थः। ननु सर्वबोधजन्यानां संस्काराणां हृदय[9]कोशवृत्तित्वादेकैकावयवनाशे प्रतिसंधानं युक्तमित्यत्राह—सर्वबोधैश्चेति। हृत्कोशे संस्काराधानमित्यत्र किं प्रत्यक्षं प्रमाणम्? उतानुमानम्? इति विकल्पाभिप्रायेणाद्ये दोषमाह—न दृष्टमिति। द्वितीयं दूषयति—नच तत्त्वक्लृप्ताविति। न च स्मरणान्यथानुपपत्तिरेव प्रमाणमित्यत्राह—स चेति। संघातात्मकत्वाभावे तस्यैव देहातिरिक्ततयेष्टसिद्धिः। अन्यथा [10]प्रचयापचयाभ्यां संभिन्नस्संघातस्स्यात्। तस्मात् स्मर्ता कोऽपि न स्यात्। ननु प्रत्येकं चेतनत्वमस्तु; कथं बहूनां? प्रत्येकमेकत्वादित्यत्राह—अयं भाव इति। त्वयेति—देहात्मवादित्वादित्यर्थः। त्वया तदनभ्युपगमादिति भाष्यप्रयोगात्साधुः। क्वचिदपीति—परस्परमुपकुर्यामिति प्रतिसन्धानादर्शनादित्यर्थः। प्रत्युत विरुद्धप्रतिसन्धिरित्याह—एक एवाहमिति। तदा सर्वप्रवृत्तीति—तद्धेतुभूतरागाद्यभावादिति भावः। जातमात्रो हीति—ननु जातमात्रस्य[11]क्षुत्पिपासाबाधात्तन्निराकरणेच्छामात्रं ततो रोदनादिव्यापारः भक्षणादि-

---

१. स्थिरत्वादस्थिरभावेभ्योऽवयवेभ्यो भेदस्सिध्यतीति भावः—क, I स्थिरत्वादस्थिरत्वाभावेन स्वावयवेभ्यो भेदस्सिध्यतीति तस्य स्थैर्यं साधयति—अवयवेति II ख।

२. विकारभेदादि,

३. भावादवयवत्सर्वत्र।

४. संक्रान्तं स्यादवयवत्वाभावादिति,

५. त्वदीयग्रन्थे—ख, त्वदीयग्रथितटीका—क।

६. दुःखे तत्सम्बन्धात्पदेऽपि तत्प्रसङ्गः—ख।

७. दोषः! निमित्तयोग्यावयवावच्छेदेन ॥ १ ॥ पाण्याद्यवयवावच्छेदेन ॥ २ ॥

८. दुःखोत्पादेऽपि तदन्यावच्छेदेन,

९. कोशवृत्तित्वादेवैकैकावयवनाशेऽपि—ख।

१०. प्रचयापचयवतस्संभिन्न—ख, ग,

११. क्षुत्पिपासामात्रात्तन्निरा—ख।

व्यापारश्च नेष्टसाधन[1]ताज्ञानात्। यथा वह्न्यादिस्पर्शमात्रेण तज्जनितदुःखात् हस्तादिना संमार्जनव्यापारः। तथा च मात्रादिभिरास्ये स्तन्यादि[2]क्षारणे कृते जिह्वास्पर्शान्माधुर्यानुभवे ततो [3]निगरणम्। न तु पूर्व[4]संस्काराद्युद्बोधेष्टसाधनतास्मृतिरिति चेत् न, तर्णकादेः स्तन्यपानादौ प्रवृत्तिबलात् जन्मान्तरीय[5]संस्कारोद्बोधनस्यावश्यकत्वात्। न च तत्रास्ये क्षीरादिक्षारणं मात्रा क्रियते! नचैवं गवां पदद्वयान्तराले स्तनसत्त्वस्य तत्र [6]क्षीरस्य चेत्यादिवहुसंस्कारोद्बोधकल्पनापत्तिरिति वाच्यम्; यावता विनाऽनुपपत्तिर्न शाम्यति तावतस्सर्वस्य कल्पनादिति भावः। भवान्तरीयसंस्कारवत्त्वं [7]देहाद्यतिरिक्तमात्मानं साधयतीत्याह-अतश्चेति। अहेतुवादस्य निरस्तत्वात् ततोऽतिरिक्तकारणाभावादिति भावः। अवयव्यनभ्युपगमात् कथमवयव्यङ्गीकार इत्यत्राह—अवयविवादमिति। प्रत्यवयवमिति—ऐक्यानुभव[8]प्रसङ्गादित्यर्थः।

ननु अवयवेष्वपि चैतन्यमस्त्येव; नचैवं कलहादिप्रसङ्गः; सूक्ष्मत्वेन व्यवहारानर्हत्वात्। तथाच अवयवचैतन्यादवयविनि चैतन्यं स्यादेवेत्याशङ्क्य त्रसरेणुकल्पेषु जन्तुषु विद्यमानसूक्ष्मचैतन्यस्य व्यवहारादिहेतुत्वदर्शनात् गजादि[9]स्थूलरूपावयवानां चैतन्यस्य व्यवहारहेतुत्वं कैमुत्यसिद्धमिति। तथैक्यानुभवविरोधकलहादिप्रसङ्गस्तदवस्थ इति परिहरति—नन्ववयवेति। [10]नन्ववयवचैतन्यानामभावेऽपि [11]समुदायचैतन्यं स्यादेव किण्वादिसमुदाये मदशक्तिवदिति शङ्कते—यत्तुसूत्रितमिति। 'अथ लोकायतं शास्त्रम्; इत्यारभ्य [12]प्रथमपादे इतिशेषः। किण्वादिः—यवाङ्कुरादिः बाधकत्वगादिरिति केचित्। आदिशब्देन जलादिपरिग्रहः। दृष्टान्तेऽपि प्रत्येकमवयवेष्वेव शक्तिरित्याह—अस्ति हीति। जम्बीररसस्य कर्पूररस्य च संसर्गे प्रत्यवयवं विषशक्तिरित्यर्थः। ननु चैतन्यस्याभ्युपगमे प्रत्येकसमुदायादिविकल्पस्स्यात्; तदेव नास्ति व्यवहारादेरन्यथासिद्धत्वात्; कुतस्तत्प्रयुक्ता दोषा इत्यत्राह—ननु चैतन्यमिति। व्याहारः—उक्तिः। व्यवहारः-प्रवृत्तिः। प्रत्यक्षाप्रत्यक्षेति—

ननु प्रत्यक्षकारणविषया [13]जानामीति धीरस्तु; न तु समुदायविषया। नचैवं यत्किञ्चित्कारणगोचरत्वे सर्वदा घटादिकं जानामीति प्रतीतिस्स्यात्।

---

१. ताज्ञानं यथा—ख, २. क्षारणे जिह्वा—ख, ३. निगरणादि—ख;
४. संस्कारादिष्टसाधनतादि वोधतनादिस्मृतिरिति-ग, घ ङ,
५. संसारवोधन—ग, घ, ङ, ६. क्षीरस्य च वह्वर्थकल्पना—ग, घ, ङ,
७. देहादिव्यतिरिक्त—ग, घ, ङ, ८. वकलहादिप्रस—ग, घ,
९. स्थूलतमावयवानां—ख, १०. नन्ववयवेचैतन्या—ग,घ,ङ,
११. समुदाये चैतन्यंस्यादेवेति—ग, घ, ङ, १२. पादशेष इति शेषः—ख,
१३. न, तत्काले जानामि—क, ख,

सर्वदा देहादेस्सत्त्वादिति वाच्यम्; सर्वदा यत्किञ्चित्कारणसत्त्वेऽपीतरातीन्द्रियकारणसमवधानकाल एव तथा धीविषयत्वात् इति चेत् न; तथाऽपि जानामीत्यनुभवविषयो यः तन्मात्रस्यैव ज्ञानत्वेन तदन्यकालेऽपि तत्त्वेन भानप्रसङ्गात्। न च पटसमवधानकाले घटत्वेन भातस्य तदन्यकाले तत्त्वेन न भानमित्यस्ति; [1]किंच जानामीति ज्ञानमपि सामग्र्यैव विषयस्य पूर्वसामग्र्या एव तथात्वे अयं घटः घटं [2]जानामीत्यतिप्रसङ्गोऽनुभवविरुद्धो दुर्वारस्स्यादिति भावः। जानामीति बोधस्य प्रत्यक्षत्वमेव नास्तीत्यत्राह—नचेति। अतीन्द्रियानुमानाङ्गीकारेऽपि लिङ्गाप्रतिसंधानेऽपि तद्धीदर्शनान्नानुमानिकमित्याह प्रवृत्तीति। ननु देहस्य धातुविशेषः—[3]पित्तधातुविशेषः तस्य पित्तस्य विकासविशेषः परिणामविशेषः चैतन्यम्। तथाच देहावयवातिरिक्तो न चैतन्याश्रय इति शङ्कते–देहधास्विति। तत्र प्रमाणं नास्तीति परिहरति—तददर्शनादिति। आगमः प्रमाणमिति पररीतिमभ्युपगम्यान्यथासिद्ध्या परिहरति—हृदयस्थ इति। प्रकाशः—प्रकाशजनकः। नन्वनुमानेन देहाद्यतिरिक्तात्मसाधनमयुक्तम्; तेन तत्प्रामाण्यस्यानभ्युपगमात् इत्यत्राह—ये त्विति। 'अथ लोकायतं शास्त्रम्' इति [4]सूत्रं कैश्चिदेवं व्याख्यातम्;—तत्र आयतम्—अन्तर्गतम्। लोक्यते अनेनेति लोकः—प्रत्यक्षम्। तत्रान्तर्गतमनुमानमि[5]त्यर्थः। तस्मादागतं फलतया; प्रत्यक्षगृहीतव्याप्तिकमनुमानमपि प्रमाणमेव। [6]शास्त्रम्—शासनस्य प्रत्यक्षादेः प्रयोजकमित्यर्थः। [7]भवानन्दादयस्तु लोकस्यायतं—विस्तारः इत्याहुः। तथाच अनुमानादेरपि प्रत्यक्षाद्यन्तर्भात्रेण प्रामाण्याङ्गीकारादनुमानोपन्यासो युक्त इत्याहुः। चेतनपरामर्शो नपुंसकत्वानु[8]पपत्तिमाशङ्क्याह—तदिति। न चैतन्याश्रय इति। चेतते जानातीति चित् चैतन्याश्रयः। अचित्—चिद्भिन्नः। न चैतन्याश्रय इत्यर्थः। विमतमिति—ननु सिद्धान्ते विमतमचेतनं संघातत्वात् परमाणुवदिति तुल्यः प्रयोगः इति चेत्; देहातिरिक्तस्यासंघातद्रव्यस्य सिद्धौ [9]धर्मिग्राहकेण चेतनतयैव सिद्धेः तदसिद्धावाश्रयासिद्धिरिति न तुल्यतेति ध्येयम्। आदिशब्देन जन्यत्वात् विनाशित्वात् स्पर्शवत्त्वात् इत्याद्यूह्यम्। विगीतेति—ननु देहरूपादावपि विगीतं रूपं चैत्रपिण्डव्यतिरिक्ताश्रयं रूपत्वादित्यादिप्रसङ्ग इति चेत् मैवम्; प्रत्यक्षेण बाधितत्वात्। ननु चैवमत्रापि बाधप्रसङ्ग इत्यात्राह—देहात्मबोधस्येति। देहचैतन्या[10]श्रयत्वबुद्धेरित्यर्थः: नन्वन्यथासिद्धिर्न सम्भवति बाधकाभावादित्य-

---

१. किंचिज्जानामी–ख,
२. जानामि घटज्ञानज्ञानं जानामीत्यतिप्रसङ्गो–ख,
३. पित्तादेः विकारविशेष–ख,
४. सूत्रेकैश्चित्–ग, घ, ङ,
५. त्यर्थः। यद्वा लोकादागतं–ग, घ, ङ,
६. शास्त्रं शास्त्रार्थभूतं–ग, ख, ङ,
७. अन्येतु–क, ख,
८. नुपपत्त्याऽऽह–ग, घ, ङ,
९. धर्मिग्राहकबाधात्तदसिद्ध। वाश्रयासिद्धिरिति न तुल्यः प्रयोग इति ध्येयम्–ग, घ,
१०. श्रयद्धेवु–ग, घ,

त्राह—व्यतिरेकेति—भेदे भासमाने सत्यभेदबुद्धेरन्यथासिद्धेरावश्यकत्वादिति भावः। ननु भेदधीरेव नास्ति। येन तद्वलादभेदबुद्धेरन्यथासिद्धिरित्याशङ्कते—नन्विति। न भेदसाधिका—न भेदगोचरा। नन्वगतिरुभयत्रापि समेत्यत्राह—अयं भाव इति। मम हस्त इत्यादिप्रत्ययो न गौण इति सिद्धम्। तत्समानयोगक्षेमत्वात् मम शरीरमित्यपि न गौणः। ममात्मेति तु न तादृश इति भावः। निर्दिष्टेति—ममेति शरीरविशिष्टनिर्देशः। आत्मेति केवलस्य निष्कर्ष इत्यर्थः। तथाच विशिष्टाविशिष्टभेदात् वनस्याम्रवृक्ष इतिवत् भेदव्यपदेशो मुख्य इति भावः। नन्वेवं देहात्मपक्षेऽपि मम शरीरमिति व्यपदेशोऽप्युक्तविधया संगतस्स्यात् इति चेत्; अत्राहुः;—ममेत्यस्यावयवपरत्वे विनिगमकाभावेन सर्वावयवपरामर्शे ममेत्येकत्वपरामर्शानुपपत्तेः अस्माकमिति बहुत्वपरामर्शापत्तेश्च न संगतिरिति ॥ १ ॥

श्रीनिवासं नमस्यामि धीविकासमिहार्थयन्।
यस्समिन्धे सतां स्वान्तेऽञ्जनाद्रौ जम्बुधाम्न्यपि ॥

अक्ष०—इह जडद्रव्यनिरूपणानन्तरमुद्देशक्रमादजडान्तर्गतप्रत्यगर्थे बहुप्रमाणसिद्धत्वात् बहुवादिसंप्रतिपन्नत्वाच्च आदौ जीवात्मनो निरूपणमारभमाणाः प्रथमं हस्ताद्यवयवतत्सङ्घातेभ्यो व्यतिरेकमाचक्षते—यो म इत्यादिना। मे हस्तादि, मे शरीरमित्येवं प्रत्यये व्यतिरेकस्वरसषष्ठ्यन्तपदोल्लेखेन अवयवतत्संघातादिभिन्नतया योऽवभासते स एकः नतु हस्तादिवदनेकः विभिन्नानां हस्तपादादीनामभिन्नोऽभिमानीत्यर्थः। यस्य मे हस्तादिः, तस्यैव मे पादादिरिति ह्यस्त्यभिमानः स हि न हस्तादिष्वभिमन्तव्येषु अन्यतमस्य संभवति, स्वं प्रति स्वस्याभिमन्तृत्वायोगात्, एवमवयवानामुपचयापचयविनाशकालेष्वपि स एवाहमिति प्रत्यभिज्ञानादप्येकः, अतश्च न भिन्नास्थिरावयवाद्यात्मा भवितुमर्हति। अवयवात्मकत्वे तदवयवविनाशे तदनुभूतस्मरणानुपपत्तिश्च स्यात्। वासनासंक्रमस्यासंभवात्, संभवे मात्राऽनुभूतस्य गर्भेणापि स्मरणप्रसङ्गात्-अविशेषादिति भावः। अवयवानां प्रत्येकं चैतन्ये दूषणान्तरमप्याहुः—प्रत्येकमिति। बहूनामवयवानां प्रत्येकं चैतन्योपगमे परस्परं कलहोऽपीह बहुस्स्यात् नैकमपि कार्यमविकलं निष्पद्येत प्रायेण परस्परमीर्ष्यासूयादिभिरैकमत्यानुवृत्तेरसंभवादिति भावः।

नन्वेककुटुम्बिन इव एकशरीरावयवाः परस्परमीर्ष्यादिरहिताः स्युरित्यत्राह—वीतराग इति। न हि जातः कश्चित् चेतनः वीतरागः—रागद्वेषरहितः स्यात् सर्वप्रवृत्तिनिवृत्तिभङ्गप्रसङ्गात् रागादिसत्वे च ईर्ष्यादिराहित्यासंभवात् ऐकमत्यानुपपत्ते रन्तरङ्गाणामपि कदाचिदवर्जनीयः कलहस्स्यादिति भावः।

यद्वा देहतदवयवातिरिक्तचेतनानभ्युपगमे जातमात्रस्य स्तन्यपानादि-प्रवृत्तिरपि नोपपद्येतेत्याशयेनाहुः—वीतराग इति। जातमात्रो हि तर्णकादिः जन्तुः स्तन्यपानप्रवृत्त्या तदिच्छावश्यंभावात् वीतरागो न भवतीति निश्चीयते। जातमात्रस्य चेच्छाहेतुज्ञानं पूर्वजन्मवासनामन्तरा न घटत इति पूर्वजन्मानुयायी शरीरावयवाद्यतिरिक्तः कश्चिदात्मा दुरूपह्नव इति भावः। यद्यप्यतिरिक्ता-वयविपक्षेऽप्युक्तदोषादनिर्मोक्षः— जन्मान्तरानुयायित्वाभावात्— तथाप्यनुपपत्त्य-न्तरमप्यस्तीत्याशयेनाहुः—तत्सङ्घातेति। अवयविवादिभिस्तद्गुणानामवयवगुण-पूर्वकत्वोपगमात् तेष्ववयवेष्वसिद्धा मतिः चैतन्यगुणः कथमवयविनि स्यादित्यर्थः। अपिना सङ्घातारिक्तावयवी नास्तीति सयुक्तिकं पूर्वमुक्तमिहापि स्मारितं भवति।

अथ लोकायतमित्यत्र लोके प्रत्यक्षे आयतमन्तर्गतमिति व्युत्पत्त्या वह्न्या-द्यनुमानमपि धूमसंयुक्तेन्द्रियेणैव वह्न्यादिग्रहणात्, लोकात्—प्रत्यक्षादायतमिति व्युत्पत्त्या वा प्रत्यक्षफलं प्रत्यक्षगृहीतव्याप्तिकमनुमानमपि प्रमाणमिति च वद-तश्चार्वाकैकदेशिनः प्रति देहचैतन्यबाधकान्यनुमानान्यप्याहुः। सङ्घातत्वादि-भिर्वेति। अत्र तत्त्वचर्मादिकं अचेतनं सङ्घातत्वात्, बहिरिन्द्रियग्राह्यत्वात् भूतत्वात् रूपवत्वाच्चेति प्रयोगाः विवक्षिताः। अत्र मम हस्तादिकमिति व्यति-रेकप्रतीतिप्राबल्यात् देहात्मभावप्रत्यक्षं न बाधकं भवितुमर्हतीति भावः। ममा-त्मेत्यत्र ममेतिप्रतीतेर नतिरेकेऽपि दर्शनात् हस्ताद्यवयवे कथं भेदसाधकत्वमित्य-त्राहुः—स्यादिति। घटस्य स्वरूपमितिवत् अभेदेऽपि क्वचिद्व्यतिरेकधीरस्ति-तत्र गत्यन्तराभावात् विशिष्टतदेकदेशविशेष्यांशभेदोऽवभासत इति क्लिष्टा-गतिराश्रीयते तद्वत् प्रकृतेऽपि शरीरादिविशिष्टात्मा ममेत्युल्लेखेन प्रतीयते आत्मेति तु निष्कृष्टात्मस्वरूपं तयोर्विशिष्टकेवलयोरमुख्यः भेदः प्रतीयते इत्युपगमेऽपि प्रमाणान्तराधिगत स्वरूपभेदयोरपि अमुख्य एव भेदः प्रतीयत इति कल्पयितुं युक्तमिमि भावः॥ १॥

स्याद्वाऽसौ चर्मदृष्टेरयमहमिति धीर्देह एवात्मजुष्टे
निष्टप्ते लोहपिण्डे हुतवहमतिवद्भेदकाख्यातिमूला।
श्रुत्यर्थापत्तिभिश्च श्रुतिभिरपि च नस्सर्वदोषोज्झिताभिः
देही देहान्तराप्तिक्षम इह विदितस्संविदानन्दरूपः॥ २॥

सर्वा०—अथ स्यात्—अस्ति तावत् स्थूलोऽहं जानामीत्यादिधीः। तत्र स्थौल्यं शरीरस्थं ज्ञानादिकं तदन्यनिष्ठमिति दुर्विवेचम्। ममेति भेदधीश्च नाभेदधियं बाधितुमर्हति, अविशेषात्। अनुमानानि च वह्न्यनुष्णत्वानुमानवत्स्युः। तत्र निषेध्यं ह्यनुष्णत्वं वह्नावेव सिद्धमिति चे[द]त्तत्रापि निषेध्यंचेतनत्वं देह एव ग्राह्यम्। नच प्रत्यक्षप्रतिपन्ने वादिविमतिमात्रादबाधकानुमानावकाशः,

अतिप्रसङ्गात्। विप्रतिपत्त्या सन्देहः, सन्देहे न्यायप्रवृत्तिस्स्यादिति चेन्न; दृष्टे कस्मिंश्चिद्विगायति वह्नावनुष्णत्वानुमानप्रसङ्गात्। एतेन शास्त्रतोऽतिरिक्त-बोधात्सन्देहः, ततश्चानुमानमिति निरस्तम्। तत्प्रामाण्यव्यवसायाव्यवसाययोरत्र सन्देहानुदयात्, सन्दिग्धशास्त्राद्दृढप्रत्यक्षं हि बलीयः। अन्यथा अग्निरनुष्ण इति कस्यचिद्वाक्येनापि सन्देहेऽनुष्णत्वानुमानस्य निर्बाधत्वप्रसङ्गात्। ऐक्यभेदधीभ्यामेव सन्देह इति चेन्न; अग्नेर्ज्वालेति भेदधियाऽग्नेरुष्णत्वेऽपि केनचिद्धेतुना ज्वाला-नुष्णत्वानुमानप्रसङ्गात्।

साङ्ख्याद्युक्तान्यनुमानानि त्वसाधकतमानि। पठन्ति हि *सङ्घातपरार्थ-त्वादिति। अत्राद्ये पत्यादिशरीरार्थैर्भार्यादिशरीरैस्सिद्धसाधनता। न च तावद-तिरिक्तं खट्वादिदृष्टान्तेऽपि दृष्टम्। स्वाभिमतात्मपारार्थ्यसाधने त्वप्रसिद्ध-विशेषणः पक्षः। दृष्टान्तश्च साध्यविकलः। खट्वादौ च संहतपरार्थत्वनियम-दृष्ट्या तत्रापि संहतः परः प्रसज्येत। अनवस्थाभयात्तस्यासंहतत्वकल्पनाद्वरं शरीरस्यानन्यार्थत्वकल्पनम्। एवमधिष्ठेयत्वभोग्यत्वाभ्यामधिष्ठातृभोक्तृकल्पनं चायुक्तम्; स्वाभिमतात्माधिष्ठेयत्वभोग्यत्वयोस्सर्वत्रासिद्धेः, साध्याविशेषाच्च। अधिष्ठेयत्वादिमात्रे हेतावाकारभेदेन स्वेनैव स्वस्य तदुभयसंभवात्। अधिष्ठेयत्वं हि कस्यचिद्व्यापारेण व्यापार्यत्वम्। तच्च स्वस्य परस्य चेति न विशेषः। भोग्यत्वमप्यनुकूलबुद्धिविषयत्वम्। तच्च स्वेनैव स्वस्य देहातिक्तत्वेऽप्यनुमतम्।

यच्चाहुः—*नेदमनात्मकं जीवच्छरीरम्, अप्राणादिमत्त्वप्रसङ्गादिति; तत्र जीवच्छरीरं सात्मकं प्राणादिमत्त्वादिति प्रसङ्गानुग्राह्यः प्रयोगः। तस्मिन्नप्रसिद्ध-विशेषणः पक्षः, त्वदिष्टस्यात्मनः क्वचिदप्यसिद्धेः। आत्मशब्दवाच्ययत्किंचिद्योग-विवक्षायां स्वभावयत्नादियोगात्सिद्धसाधनता। किंचानेनैव हेतुना जीवच्छरीरं खपुष्पवदित्यपि साधयन्नपि दुर्वारः स्यात्। अप्रसिद्धसाधनस्याभ्युपगमात्। अस्ति किंचित्खपुष्प[ादि]शब्देनोपस्थाप्यं तदेवात्मेति चेन्न; असत आत्मत्वसाधना-योगात्। यत्किंचिन्मात्रस्य साधने च सिद्धसाधनता, विवक्षितविशेषस्य दुस्साध-त्वात्। अपि च सर्वेषु वस्तुषु तत्तदसाधारणधर्मेण सात्मकत्वं साध्यं स्यात्, विपक्षे तत्तदसाधारणधर्मविरहप्रसङ्ग इत्यनुग्राहकसिद्धेश्च। अनुपलम्भबाधादिकं तु समा-नम्। अतोऽनन्याधिष्ठितस्वयंवाहकयन्त्रन्यायाद्विचित्रभूतपरिणतिविशेषसंभवोऽयं देहयन्त्र इति। अत्र प्रत्येकसमुदायादिविकल्पदौःस्थ्यादिप्रागुक्तप्रबलबाधकप्रति-क्षिप्तेऽपि पक्षे गाढाभिनिवेशस्य सोपपत्तिकं भेदबुद्धेरनुमानानां च बलीयस्त्वं पुनरनुद्घाटयन्निष्कम्पामैक्यधियमन्वारुह्य मानान्तरेण विबाधयिषुः परेष्टं तद्बल-मन्वाह—

स्याद्वेति॥ अन्यथासिद्धिसूचनाय चर्मदृष्टेरिति मौढ्यपरम्। अयमिति गुणक्रियादिविशेषविशिष्टपिण्डावमर्शः। संसर्गविशेषादयं भ्रम इति बोधयितुमात्म-

त० मु० क० ३८

जुष्टत्वोक्तिः। तन्निदर्शनेन शोधयति—निष्टप्त इति। संसर्गजत्वात्संभावितान्यथासिद्धिकमैक्यप्रत्यक्षं शास्त्रेण बाधितुं शक्यमित्याशयः। संसृष्टेष्वपि सर्वत्र कथं न भ्रम इत्यत्राह—भेदकेति। यत्र हि सामग्री तत्र कार्यं स्यादिति भावः। नन्वैक्यधीरिह दृष्टा, तदन्यथासिद्धिस्तु शङ्किता; नैतावता विवक्षितसिद्धिरित्यत्राह—श्रुतीति। श्रुत्या भाविता अर्थापत्तयः श्रुत्यर्थापत्तयः, ताभिः; श्रुतार्थापत्तिभिरिति यावत्। सन्ति हि देहान्तरानुभाव्यस्वर्गस्वाराज्यादिसाधनविधायिन्यो यमनरकादिप्रापकश्रुतयश्च। न च तत्रानाश्वासः, श्रुतिप्रामाण्यस्थापनात्। अतोऽर्थादापद्यते देहान्तरानुयायी भोक्ताऽस्तीति। पश्वादिदृष्टफलसाधनविषयश्च तत्तत्फलोपायदशानुवृत्तभोक्तृसापेक्षाः।

नचात्र सङ्घातस्य भोक्तृत्वम्; उपायसाधकसङ्घातस्योपचयादिना भिदुरस्यानुवृत्त्यसंभवात्। अहमुपायानुष्ठाता तत्फलं भुञ्ज इति च स्वरूपतः कालतश्चाभिन्न एकः प्रतिसन्धीयते। मुक्त्युपायविषयश्च सर्वबन्धनिवृत्तिवदात्मस्थित्याक्षेपकाः। देहात्मभेदं कण्ठोक्त्याऽप्याह—श्रुतिभिरपीति। चः श्रुतिवदनन्ताः स्मृतीस्समुच्चिनोति। स्वतःप्रामाण्ये प्राप्ते बाधकासंभवार्थं सर्वदोषोज्झितत्वोक्तिः। *देही नित्यमवध्योऽयम्, *वासांसि जीर्णानि इत्यादिस्मारणाय देहीत्यादिकथनम्। व्यावर्तकधर्मवर्गप्रदर्शनार्थं संविदानन्दरूपतोक्तिः। रूपशब्दः स्वरूपपरः, निरूपकधर्मपरो वा॥ २॥

आनन्द०—स्थौल्यज्ञानयोस्सामानाधिकर[1]ण्यप्रतीतेर्बाधकाभावेन तयोस्सामानाधिकर[2]ण्याद्भेदधीरौपचारिकीति शङ्कामुत्तम्भयन् आक्षेपसंगतिमाह—अथ स्यादिति। एवं च व्यतिरेकधियो न प्राबल्यमिति भावः। अत एवानुमानानि दुर्बलानीत्याह— अनुमानानि चेति। निषेध्यं चेतनत्वमिति—स्थूलोहं जानामीति धियेति शेषः। ननु स्थूलोऽहं जानामीतिप्रत्यक्षेऽपि वादिविप्रतिपत्तेस्संशयात् न प्रत्यक्षस्य बाधकत्वमि[3]त्याशङ्क्याह—न चेति। प्रत्यक्षनिर्णीतमात्रेपि तथा प्रसङ्गेन निर्णयमात्रोच्छेदस्स्यादिति भावः। ननु सर्वत्र न विप्रतिपत्तिः अतो न निर्णयमात्रोच्छेद इति शङ्कते—विप्रतिपत्त्येति। पुन[4]स्सर्वस्य साम्यमाह—नेति। ननु विप्रतिपत्त्या संशयाभावेऽपि [5]प्रमाणद्वयप्रवृत्तौ सत्प्रतिपक्षस्थल इव संशय इत्यत्राह—एतेनेति। एतच्छब्दार्थमाह—तत्प्रामाण्येति। तत्प्रामाण्यव्यवसाये ततो निर्णयस्यैव भावात् तदव्यवसाये च प्रत्यक्षनिर्णयस्य सत्त्वात् नोभयथाऽपि संशय इत्यर्थः। ननु तदव्यवसाये निर्णयः परं मास्तु; प्रत्यक्षप्रतिरोधकत्वं [6]स्यादित्यत्राह—संदिग्धेति। अन्यथेति—अविशेषादिति भावः।

---

१. ण्य प्रवृत्तेर्वा—क, २. ण्येनभेद—क, ३. त्याशङ्कायामाह—ग. घ, ङ,
४. सर्वसाम्य—क, ख, ५. प्रामाण्यद्वय—क, ख, ६. स्यादिति संशय—क, ख,

नतु मास्तु शास्त्रात्संदेहः प्रत्यक्षयुगवलात्स्यात् इति शङ्कते—ऐक्यभेदधीभ्यामिति। [१]प्रत्यक्षद्वयमात्रान्न संदेहः अपि तु विरुद्धार्थे[२]ग्राहकात्। न चात्र विरुद्धार्थग्राहकः एकेन देहे चैतन्यग्रहोऽपरेणाहमर्थभेदग्रहः। यथाऽग्निभेदग्रहेऽपि ज्वालायां नानुष्णत्वग्रह इति नानुष्णत्वसंदेहेनानुष्णत्वानुमानम्; तथाऽत्रापीति परिहरति—नाग्नेर्ज्वालेति। यद्यपि [३]वह्नावुष्णत्वग्रह इव ज्वालात्वावच्छेदेनापि [४]तत्तद्ग्रहोऽस्तीति युक्तं [५]तत्रोष्णत्वानुमानबाधः; अत्र तु अहन्त्वावच्छेदेन स्थूलोऽहं जानामीति [६]ज्ञानग्रह [७]इव देहत्वावच्छेदेन नास्तीति न तुल्यत्वम्; तथाऽपि स्थौल्यसामानाधिकरण्येन ग्रहात् स्थूले देहे तद्बाधादनुमानं न संभवतीति भावः। सांख्यास्तु;—

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥

इति देहातिरिक्तात्म[८] साधने अनुमानान्याहुः। तानि दूषयितुमनुवददि—सांख्येति। शरीरं परार्थं संघातत्वात् शयनादिवत् इत्यनुमानेन देहस्य परार्थत्वे देहा[९]पेक्षया अन्यः स्वामी सिद्ध इति तदतिरिक्तात्मसिद्धिरिति। तदुक्तमाद्यमनुमानं दूषयति—तत्राद्य इत्यादिना। [१०]परार्थत्वे साधिते परस्ततस्सिध्यति न त्वात्मेति भावः। आदिशब्देन भृत्यशरीरस्य स्वामीशरीरप्रभृतिभिरिति विवक्षितम्। ननु शरीरं [११]स्वातिरिक्तात्मार्थं संघातत्वादिति प्रयोगेऽ[१२]र्थान्तरतेत्याह—स्वाभिमतेति[१३]। अत्रात्मशब्देनाहमिति प्रत्ययविषयो विवक्षितः उतदेहातिरिक्तस्सः? नाद्यः; स्वातिरिक्तस्वामिदेहमादायार्थान्तरत्वात्। द्वितीये तु एतादृशसाध्यस्यैतदनुमाना[१४]धीनत्वेन ततः पूर्वं तत्साध्यस्यानुपस्थितत्वात् तद्घटितसंदेहाभावेन संदिग्ध[१५]साध्यकत्वरूपपक्षता न स्यात्। तथा च आश्रयासिद्धिरिति भावः। ननु सिद्ध्यभाववत्त्वमेव पक्षत्वमित्यत्राह— दृष्टान्तश्चेति। तथा च व्याप्यत्वासिद्धिरिति भावः। प्रत्युत परार्थत्वव्याप्तिवत् संघातपरार्थत्वव्याप्तिरपीति विरुद्धश्चेत्याह—खट्वादौ चेति। ननु संहतपरार्थत्वकल्पना नोपपद्यते; तत्कल्पनेऽनवस्थाप्रसङ्गात्; तथाच कस्यचित्परस्यासंहतत्वमेव कल्प्यत इति चेत्; तत्राह—अनवस्थेत्यादि। यदि गौरवाद्भीतिः तर्हि शरीरव्यतिरिक्तस्यैव

---

१. प्रत्यक्षमात्रादिहसं–क, ख, घ, I प्रत्यक्षमात्रान्न सं–क, ग, ख, त्, II.
२. थंग्रहेः ३. वह्नयनुष्णत्वग्रह इव–ग, ४. तद्ग्रहो–क, ख,
५, तत्रानुष्णत्वानुमान–क, ख, ६. ज्ञानसंग्रह इव–क, ख, घ,
७, इवाहन्त्वाव I इवाहन्ताव II-क, ख, घ,
८. साधकानुमानान्याः --क. ख. ९. पेक्ष्यान्यथासिद्ध इति तदुक्तमाद्य—क.
१०. परार्थत्वे परस्सिध्येत् नवात्मेति—ग. घ. ङ. ११. स्वातिरिक्तार्थं—क.
१२. गे पदार्थान्तर—क. ग. १३. स्वाभिमतेति – तादृशात्म I—क. एतादृशात्म—ख.
१४. धीनत्वेन तदसिद्ध्या तद्घटित— ग. १५. साध्यघटितपक्षता—ग.

[१]संहतस्य परार्थत्वनियमः शरी[२]रस्य तु नेत्येव [३]कल्प्यताम् ! अतिरिक्तकल्पने गौरवादिति भावः। इदमधिष्ठातृसापेक्षं अधिष्ठेयत्वात् इदं भोक्तृसापेक्षं भोग्यत्वात् इत्यनुमानद्वयं दूषयितुमनुवदति—**एवमित्यादिना**। अत्र किमात्माधिष्ठातृत्वं आत्मभोग्यत्वं च हेतुतयोच्यते[४]? उत भोग्यत्वाधिष्ठेयत्वमात्रमिति विकल्पाभिप्रायेणाद्यं दूषयति—**स्वाभिमतेति**। तथाच व्याप्यत्वासिद्धिः। दृष्टान्ते साधनाभावेन व्याप्त्यग्रहात्। पक्षद्वये च संदिग्धतया स्वरूपासिद्धिमप्याह—**साध्याविशेषाच्चेति**। साध्यवत्संदिग्धत्वादित्यर्थः। द्वितीयं दूषयति—**अधिष्ठेयत्वादिमात्रे इति**। उपपादयति—**अधिष्ठेयत्वं हीति**। स्वेन स्वस्य भोग्यत्वं परस्यापि मतमित्याह—**देहेति**। जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् इदं निरात्मकं न भवति तथात्वे प्राणादिमत्त्वाभावप्रसङ्गादिति तर्कानुगृहीतेनानुमानेन देहातिरिक्तात्मसिद्धिरिति नैयायिकादय आहुः; तद्दूषयितुमनुभाषते—**यच्चाहुरिति**। अनेन किं स्वाभिमतात्मयोगस्साध्यते? उत आत्मशब्दवाच्यमात्रयोगः इति विकल्पमभिप्रयन् दूषयति—**तस्मिन्निति** संदेहघटितपक्षतारूपविशेषणविरहादाश्रयासिद्धिरिति भावः। व्याप्यत्वासिद्धिमप्याह—**त्वदिष्टस्यात्मन इति**। द्वितीयं दूषयति—**आत्मशब्देति**—

[५]आत्मा देहेन्द्रिये बुद्धौ स्वभावे परमात्मनि।

इति स्वभावादीनामात्मशब्दवाच्यत्वादिति भावः। ज्ञानादिरादिशब्दार्थः। [६]ननु व्यतिरेकिणः साध्याप्रसिद्धिर्भूषणमेव व्याप्तिस्तु व्यतिरेक [७]योरेवेत्य त्राह—**किंचेति**। **अस्त्विति**—खपुष्पशब्दवाच्य[८]तयापि सिध्यतो देहा[९]तिरिक्तत्वे स एवात्मेति भावः। अत्र किमसत एवात्मत्वमभिमतम्? उत सत एव कस्यचित् खपुष्पशब्द[१०]वाच्यस्य? इति विकल्पमभिप्रेत्य आद्यं दूषयति - **असत इति**। तुच्छस्य चैत[११]न्याश्रयत्वासंभवादित्यर्थः। द्वितीय आह - **यत्किञ्चिदिति**। एवं व्यतिरेकिणा[१२]त्मसाधने घटादावपि तत्स्यादित्याभाससाम्यमाह—**अपि चेति**। [१३]तर्कवत्त्वाद्विशेष इत्यत आह—**विपक्षे इति**। **अनुपलम्भेति**– यद्यपि घटादौ व्यवहारादिकं नास्त्येव; तथापि कीटविशेषादावि[१४]व तदभावेऽपि सात्मकत्वोपपत्तेः

---

१. संहतत्वपरार्थत्व—क. २. रस्यनेत्येव—ग.
३. कल्प्यतामिति तत्कल्पने गौ—क. ख. ४ च्येत – क.
५. आत्मायत्नेन्द्रिये बुद्धौ स्वभावे देहजीवयोः—क. ख. ६. व्यतिरेकेण—ग.
७. योरित्यत्राह—क ख.
८. तया सिध्यतो—ख. ९. तिरिक्तत्वे स एव– क ख.
१०. वाच्यस्य ? नाद्य इत्याह —असत इति—क. ख. ११. चैतन्याश्रयासं—ग.
१२. त्मसाधने घटादौव्यवहारादिकं नास्त्येव घटादावपि—ग.
१३. तर्कत्वाद्वाविशेष इत्यत—क. ख. १४. कीटविशेषादिवत् तद्—क. ख.

इदं वैषम्यमप्रयोजकमिति भावः। अन्याधिष्ठितत्वसाधने व्यभिचारं दर्शयन्नुपसंहरति—अत इति। नन्विदं सर्वमनुपपन्नं देहस्य चैतन्यपक्षे प्रत्येकसमुदायविकल्पदूषणरूपबाधकतर्कानुगृहीततया भेदबुद्धेर्बलवत्त्वात् तत्सहितत्वेनानुमानानामपि बलीयस्त्वात् कथमैक्यधियो बलवत्त्वं कथं तरां तदनुरोधेन पूर्वपक्षः ? कथमिदं विहाय मानान्तरेण सिद्धान्तसाधनमित्यत्राह—अत्र प्रत्येकेति। इन्द्रियस्य [1]चर्मरूपत्वाभावात् तद्विवक्षितार्थं तद्विशेषणस्य [2]प्रयोजनं चाह—चर्मदृष्टेरिति। नन्वयमहमितिधीरित्यत्रायमितिधीरहमितिधीरिति [3]विवक्षितम् ? उतायमहमिति विशिष्टधीः ? नाद्य; अयमितिधियः प्रत्यक्षत्वे देहमात्रगोचरत्वेनातिरिक्तात्मगोचरत्वे मानाभावात्। न द्वितीयः अहमितिमात्रस्यैव विशिष्टगोचरत्वे अयमि[4]त्युक्तिवैयर्थ्यमित्यत्राह—अयमितीति। ननु प्रत्य[5]क्षस्यान्यप्रमाणापेक्षया बलवत्त्वस्य भवद्भिरङ्गीकारात्कथं शास्त्रेण बाधः ? तथात्वे बहुव्याकोपा[6]दित्यत्राह—संभावितेति। ननु संसर्गो भ्रमहेतुरतिप्रसङ्गादित्यत्राह—यत्र हीति असंसर्गाग्रहो न सर्वत्रेति भावः। ननु संसृष्टत्वे विशिष्टविषयकत्वं[7] तप्तलोहपिण्डवह्निन्यायेन वक्तुं शक्यते अतिरिक्तात्मसिद्धेः पूर्वं तत्संसृष्टत्वनिर्णयो नास्तीति शङ्कते—नन्विति। श्रुत्येति। ननु श्रुतिप्रमाण्यसिद्धौ तत[8] एव देहादिविलक्षण आत्मा सिद्धः। तदसिद्धौ कथं तन्मूलकार्था[9]पत्तिरपीति चेत्; सत्यम्; तथाऽपि प्रत्यक्षस्यान्यथासिद्धिर्वक्तव्येति तत्प्रदर्शनमात्रं क्रियत इति भावः।

श्रुत्यादि[10]भिः प्रत्यक्षबाधेऽतिप्रसङ्ग इति चेत्; अत्राहुः—प्रत्यक्षस्यैवानुपपत्तेः। न तावदिदं चाक्षुषम्; ज्ञानादीनां तदविषयत्वात्। नापि मानसं देहस्य तदगोचरत्वात्। न च स्वप्रकाशम्; तद्विशिष्टतया देह[11]स्य प्रकाशे सुषुप्तावपि स्थूलोऽ[12]हमिति प्रकाशप्रसङ्गात्। नचान्यतरस्योपनयः तथात्वे जानामीति वा [13]स्थूल इति वा पूर्वं प्रकाशे सत्यनन्तरं विशिष्टप्रकाशो वाच्यः; तथा च बुद्धिद्वयस्यावश्यकत्वे तयोरसंसर्गाग्रहाद्व्यहारसंभवे विशिष्टबुद्धिर्न कल्प्येति। ननु चाक्षुषमेव स्थौल्यज्ञानं जायते। तदेव [14]स्वप्रकाशत्वात् जानामीत्याकारमिति नोक्तदोष इति चेत्; न; तथाऽपि[15]संभावितदोषमूलतयाऽप्रामाण्यशङ्काकलङ्कितया श्रुत्यादिभिर्बाध इति भावः।

---

१. धर्मरूपत्वा—ग. २. प्रयोजकं—ग. ३. विवक्षितमुताहमिति—ख.
४. त्युक्ते वैय—ग. ५. क्षस्यानुप्रमाणा—ग. ६. दि प्रसङ्ग—ग,
७. त्वमनिष्टं पिण्डवह्निन्यायेन—ग, ८. एवनित्यो देहादि-ख, ९. पत्तिरिति—ग,
१०. भ्य। प्रत्यक्ष—ग, ११. स्यस्वप्रकाशे—ग. १२. हमितिस्वप्रकाशे-ग.
१३. स्थूलोहमिति वा-क, ख, १४. स्वप्रकाशत्वंजानामीति न तथाऽपि—ग,
१५. न संगतावितरदोषमूलतया-क,

ननु श्रुतयश्चार्थापत्तयश्चेत्यर्थाङ्गीकारे श्रुतिभिरित्यनेन पौनरुक्त्यमित्यत आह—भाविता इति। सन्ति हीति 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'अग्निहोत्रं जुहोति स्वर्गकामः' 'स्वराज्यकामो राजसूयेन' इत्यादय इत्यर्थः। आदिशब्देन मोक्षार्था विवक्षिताः। नरकादीति 'एष ह्येवासाधु कर्म कारयति यमधो निनीषति' 'यो ब्राह्मणायापगुरेत तं शतेन यातयात्' इत्यादय [1]इत्यर्थः। श्रुतिप्रामाण्येति। जैमिनीये[2] प्रमाणाध्याये प्रामाण्यसमर्थनादित्यर्थः। कथं श्रुतार्थापत्तिरित्यत्राह—अत इति। [3]देहान्तरानुयायिजीवाभावे स्वर्गस्वाराज्यादिसाधनत्वं श्रुतं यागादेर्नोपपद्यत इति अनुपपद्यमानं स्वर्गादिसाधनत्वं तद्योग्यं जीवं कल्पयतीति भावः। दृष्टफलसाध[4]नत्वश्रुतार्थापत्तिमाह—पश्वादीति। अन्यथासिद्धिशङ्कां परिहरति—न चेति। तत्रोपपत्तिमाह—उपायेति। अन्यार्थमन्यस्य प्रवृत्त्ययोगादिति भावः।

ननु[5] पुत्रादिभोगार्थं पित्रादिप्रवृत्तिर्दृश्यते इत्यत्राह—अहमिति। अवयवाद्युपचयापचये न [6]भिन्नत्वेन देहस्यैक्यप्रत्ययाविरोधादिति भावः। नन्विदं सर्वं स्थैर्यभ्रान्त्योपपद्यते इत्यत्राह—मुक्तीति। [7]तत्र तत्वज्ञानपूर्वकत्वेन [8]भ्रान्त्येति वक्तुमशक्यत्वादिति भावः। देहात्मेति। 'अशरीरं वाव सन्तम्' इत्यादिश्रुतिभिरित्यर्थः। च इति.—

पिण्डः पृथग्यतः पुंसश्शिरःपाण्यादिलक्षणः।

[9]इत्यादिशब्दार्थः। संवित्त्वादिनाऽपि देहभेदसाधनमित्याह - व्यावर्तकेति। अत्रानुमानोपन्यासो बौद्धादीन् प्रति; श्रुत्युपन्यासो वेदप्रामाण्यवादिनं प्रतीति केचिद्व्याचक्षते॥ २॥

अक्ष०—अथ स्यान्ममात्मेतिवत् वर्ष्मेत्यादावप्यमुख्यो व्यतिरेकः स्थूलोऽहं जानामीत्यभेदप्रतीतेः बलीयस्त्वात् स्थौल्यचैतन्ययोरैकाधिकरण्यं ह्यवगम्यते अतस्सङ्घातत्वाद्यनुमानान्यपि वह्न्यनुष्णत्वानुमानवत् स्युः इति पुनरभिवेशिनां शंकायां पराभिमताभेदप्रतीतेः श्रुत्यादिप्रबलप्रमाणबाधं प्रदर्शयिष्यन्तः प्रथममन्यथासिद्धिमावेदयति—स्याद्वेति। चर्मदृष्टेरिति—चर्मैकदृष्टेरित्यर्थः। अन्तस्थवस्तुग्रहणाक्षमस्य अविवेकिन इति भावः। अयमहमिति धीरिति—स्थूलोऽहमिति धीरित्यर्थः। अयमिति स्थूलत्वादिप्रत्यक्षगुणविशिष्टशरीरपरामर्शः।

---

१. इत्यर्थः आदिशब्देन मोक्षार्थाविवक्षिता—ग,
२. प्रथमाध्याये—ग,
३. देहान्तरानुपाधि—क,
४. साधकत्वश्रुता—क, साधकत्वज्ञाता—क,
५. नन्विदं पुत्रादि—ग,
६. भिन्नत्वाद्देह—ख,
७. तत्र मुक्तिदत्वज्ञान—ख,
८. भ्रान्तेर्वक्तुम—क, ख, ग, घ,
९. इत्याद्याः। संवित्त्वादि—क, ख,

आत्मजुष्टे देह एवेति आत्मसंसृष्टे देहरूपविषय एवेत्यर्थः। आत्मजुष्ट इति हेतुगर्भविशेषणं, आत्मसंसर्गरूपात् दोषात् अहमिति देहमेव विषयीकरोत्विति यावत्। अविवेकिनः दोषजन्यप्रत्ययेन न देहस्य ज्ञातृत्वं सिद्ध्यतीति भावः। संसर्गमात्रादन्यस्य अन्यबुद्धिं निदर्शयति। निष्टप्त इति—संसर्गनिबन्धनो ह्ययो दहतीति प्रत्ययः। न तावता दाहकत्वमयसस्सिद्ध्यतीति भावः। सर्वेषु संसृष्टेषु एवं भ्रमस्स्यादित्यत्राहुः—भेदकाख्याति मूलेति। असाधारणधर्माग्रहो हीदृश-भ्रमस्य हेतुः अतस्तेन विना नास्य भ्रमस्य प्रसङ्गस्स्यादिति भावः। एवमभेद-प्रतीतेः दुष्टकारणजन्यत्वेन अन्यथासिद्धिः प्रदर्शिता। अथ श्रुतितदर्थापत्ति-प्रवलप्रमाणवाधः प्रदर्शयते—श्रुत्यर्थापत्तिभिश्चेति—श्रुतिभाविता अर्थापत्तयः ताभिरित्यर्थः, श्रुतार्थापत्तिभिरिति यावत्। सन्ति हि देहान्तारानुभाव्यस्वर्ग-स्वाराज्य-नरकमोक्षादिसाधनबोधिन्यः श्रुतयस्ताभिरर्थादापद्यते देहान्तारानु-वृत्तो भोक्ता कश्चिदस्तीति। पूर्वोक्तानुमानादिसमुच्चयार्थश्चकारः। देहात्म-भेदकण्ठोक्ति मप्याह—श्रुतिभिरपीति। 'न जायते म्रियते वा विपश्चित् योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः तेन प्रद्योतेन एष आत्मा निष्क्रामति चक्षुषो मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः"—"एषोऽणुरात्मा नित्यो नित्याना" मित्यादि—श्रुतिभिः उत्पत्तिविनाशरहितत्व - विज्ञानमयत्व - शरीरान्तस्स्थितत्व-स्वयंप्रकाशत्व-शरीरापादानकनिर्गमनार्हत्वाणुत्व - नित्यत्वादिभिर्विरुद्धधर्मैश्शरीर-भेदो दृढं प्रतीयत इति भावः। अपि चेति स्मृतिसमुच्चयार्थः। 'न त्वेवाहं' 'बहूनि मे व्यतीतानि जन्मानि' 'बहूनां जन्मनामन्ते' देही नित्यमवध्योऽयं' इत्या-दिकं विवक्षितम्। नः—श्रुतिस्मृतिप्रामाण्यविदां। श्रुत्यादीनां स्वतः प्रामाण्ये प्राप्ते बाधरहितत्वमुच्यते सर्वदोषोज्झिताभिरिति। देहीति देहिनोऽस्मिन् देहे यथा कौमारं यौवनं जरा तथा देहान्तरप्राप्तिः इत्यादिस्मारणम्। देहान्तराप्तिक्ष-मइति देहान्तरेष्वपि 'वासांसि जीर्णानि यथा विहाय नवानि गृह्णाती'त्युक्तरीत्या अनुयायीत्यर्थः। इह देहात्मनोर्मध्ये विदितः निश्चित इत्यर्थः। संविदानन्दरूप इति—ज्ञानत्वानन्दत्वरूप-स्वरूपनिरूपक धर्मवत्तया देहव्यावृत्त इत्यर्थः ॥ २ ॥

इत्यात्मनो देहातिरेकः

बाह्याक्षेभ्योऽन्य आत्मा तदखिलविषयप्रत्यभिज्ञातुरैक्यात्
कर्तुः स्मृत्यादिकार्ये करणमिति मनो मानसिद्धं ततोऽन्यत्।
प्राणास्सङ्घातरूपा वपुरुदितनयान्न ध्रुवं चेतयन्ते
ज्ञानं च ज्ञातृधर्मः क्षणिकमपि च वस्तेन नास्यात्मभावः ॥ ३ ॥

ये पुनरेवमाहुः—चक्षुराद्यन्वयव्यतिरेकानुविधायिरूपादिज्ञानं तन्निष्ठमेवो-चितम्। व्यपदिशन्ति च चक्षुः पश्यतीत्यादि; तथा स्पर्शनसुखो वायुः, श्रवण-

कटुश्शब्द इति। इन्द्रियेषु च विकलेषु विकलोऽहमिति धीर्जायते, सकलेष्वन्यथा; परस्परानुभूतार्थप्रतिसन्धानमपि संस्कारवैचित्र्यात्; तच्चैकशरीरानुप्रवेशायत्तम्। अतो हेत्वादिप्रतिसन्धानमपि सिद्धम्। अहं पश्याम्यहं शृणोमीत्याद्यपि सर्वेषामिन्द्रियाणामहमर्थत्वात्सिद्धम्। पञ्चानामपि व्यवहारहेतुभूतं मुखं प्रवृत्तिकारणं शरीरं च साधारणम्। तेनैक एवायं व्यवहरतीति लौकिकावगमः। अनुमानमपि—चक्षू रूपग्रहणाधिकरणम्, चक्षुष्ट्वात्,यन्नैवं तन्नैवं यथाऽन्यदिति। एवं श्रोत्रादिष्वपीति।

तान्प्रत्याचष्टे—बाह्याक्षेष्व इति॥ पाण्यादिषूक्तां प्रतिसन्धानानुपपत्तिमिन्द्रियेष्वपि दर्शयितुमाह—तदखिलेति। तेषां चक्षुरादीनां प्रतिनियता विषया रूपादयः। अखिलानां तेषां प्रतिसन्धाता त्वेकः, योऽहं द्रष्टा स एव शृणोमीति। भ्रान्त्या यत्तच्छब्दाभ्यां द्वयोरेकीकार इति चेन्न; द्वयोरप्येकवदेकत्वमोहायोगात्; अन्यस्य मुह्यतोऽनभ्युपगमात्। एकश्चाहं बहुभिरिन्द्रियैरनुभवामीति भेदेन चेति। न च कस्यचिदहं चक्षुरित्यादिधीः, स्थूलोऽहमित्यादिदेहात्मबुद्धेश्चेन्द्रियात्मवादेऽपि दुस्त्यजत्वाद्वरमिह देहात्मवादः। रूपादिज्ञानस्य चक्षुराद्यन्वयव्यतिरेकानुविधानं तत्करणतयाऽपि स्यात्। तथा चाभिमानः चक्षुषा पश्यामि श्रोत्रेण शृणोमीति। अतएव चक्षुः पश्यतीत्यादिकं भाक्तम्। वैकल्यादिधीश्च चक्षुषा विकलोऽहमित्यादिरूपा; नतु चक्षुरहं नास्मीति, विरोधात्। नहि नष्टमिन्द्रियं स्ववैकल्यमनुसन्धत्ते, असत्त्वात्। नाप्यन्यत्, तस्यावैकल्यात्। अन्यथा तत्रापि विरोधात्।

यदि परमिन्द्रियान्तरविरहमिन्द्रियान्तराण्यनुसन्दधीरन्; तथाऽपि गतस्येन्द्रियस्य नाहमर्थत्वसिद्धिः। अन्यथा पाण्यादिविकलोऽहमिति बोधेऽपि पाण्यादीनामात्मत्वप्रसङ्गात्। न चेन्द्रियमिन्द्रियान्तरसदसद्वोधक्षमम्; तस्य तदप्रत्यक्षत्वात्। अनुमानतोऽपि बोद्धुस्तस्य रूपाद्यनुपलम्भात्तद्वोधककरणाभाव एवानुमेयः। ततश्चैक एव तत्तत्करणाधीनरूपादिग्रहणोऽहमर्थस्सिद्धः। मिथोऽनुभूतप्रतिसन्धानार्थं च संस्कारवैचित्र्यं किमिति चिन्त्यम्। यद्यात्मान्तरेषु स्मृत्युत्पादनशक्तिः, तन्न; सर्वेषु तत्प्रसङ्गात्। तच्छरीरवर्तिष्विति चेन्न, औदरक्रिम्यादिष्वपि तत्प्रसङ्गात्। शरीरान्तरवर्तित्वात्तत्र न प्रसङ्ग इति चेन्न; भिन्नावयवस्थित्याऽपि प्रतिसन्धानाभावप्रसङ्गात्; सन्निधानस्य चाविशेषात्। संस्काराणां सर्वेन्द्रियसाधारणहृत्कोशवर्तितया शरीरैक्याच्च विशेष इति चेन्न; त्वदिष्टसंस्कारकोशे मानाभावात्, अनेकेषामहमर्थानामेकशरीरयोगे च। ततश्च वरं यथोपलम्भमेकस्मिन्नहमर्थे सर्वैस्संस्काराधानम्। न चोपदेशचेष्टाभिर्मिथो बोधनेनान्योन्यसंस्कारार्पणम्, अदर्शनात्। अविचारितरमणीयोऽयं पञ्चानां परस्परसंस्कारादिलाभ इति, तत्त्वादृशेष्वेव वक्तव्यम्।

यदपि शरीराद्यैक्यादेकत्वावगम इति; स किं तत्रत्यानामेव? अन्येषां वा? नाद्यः, परस्परानभिज्ञत्वात्; अनुमानतस्तु भिन्नतयैव सिद्धेः; चक्षुःश्रोत्रादि-

रूपोऽहमिति भ्रमादर्शनाच्च। न द्वितीयः, स्वशरीरसिद्धप्रकारेण परशरीरेऽपि बहुत्वानुमानात्। केवलव्यतिरेकिभिरिन्द्रियाणां ज्ञातृत्वाद्यनुमानमतिप्रसङ्गाद्यनेकदोषोपहतम्। ततश्चैकस्यैव सर्वग्रहणाधिकरणत्वे त्वस्मन्मते कः प्रद्वेषः? अन्धबधिराद्यभावश्च स्यात्; ज्ञातुर्ज्ञानकरणतयैव चक्षुरादीनां सिद्धेस्तद्विपरीतानुमानानां धर्मिग्राहकबाधश्चेति। अस्तु देहाच्चक्षुरादिभ्यश्चात्माऽन्यः। स तु मन एव स्यात्, देहादेरन्यत्वात् एकत्वेन प्रतिसन्धानोपपत्तेः; असङ्घातरूपत्वेन प्रत्येकादिविकल्पानवकाशाच्च। तदतिरिक्तात्मक्लृप्तौ तु गौरवम्। अतो मम मन इति भेदोक्तिः क्लिष्टगत्येति। तत्राह -कर्तेति।

अयं भावः—किमत्र स्मृत्यादिकरणस्य मनसस्तत्कर्त्रा तादात्म्यं साध्यते? तेन वा कर्तुः? न तावदाद्यः, ततोऽन्यतयैवानुमानतश्शास्त्रतो वा तत्सिद्धेर्धर्मिग्राहकबाधात्। अत एव न द्वितीयः, स्वस्य स्वयमेव स्मृत्यादिकरणमित्यत्र मानाभावाच्च। करणमङ्गीकृत्य कर्तृनिरासः क्रियत इति चेन्न; ज्ञातृमात्रापह्नवे मनसोऽपि ज्ञातृत्वाभावप्रसङ्गात्; तदन्यज्ञातृनिरासे कल्प्येन क्लृप्तत्यागायोगात्। अथ कर्तारमङ्गीकृत्य करणत्यागः, तदा मनस आत्मत्वं न साधितं स्यात्। किंतु तस्यासत्त्वम्; तच्च तद्ग्राहकमाने सति न शक्यमिति। अन्यस्त्वाह—प्राणाधीना देहेन्द्रियमनसां प्रवृत्तिः। आत्मशब्दश्च प्राणे दृष्टः, प्राणशब्दश्चात्मनि। प्राणस्थितिगमनाभ्यां च जीवति म्रियत इति व्यवहारः सुषुप्तावुच्छ्वासनिश्श्वासप्रवृत्तौ सत्यामपि सामग्र्यभावाद्बोधाभावः। मम प्राणा इत्येदपि कथंचिन्नेतव्यमिति। अत्र देहात्मवादे निर्दर्शितान् दोषानतिदिशति—प्राणा इति। अधिकाशङ्का तु, *प्राणोऽस्मि प्रज्ञात्मा इति श्रुतिस्वारस्यात्। परिहारदार्ढ्याभिप्रायेण ध्रुवशब्दः। देहादिव्यापारहेतुत्वमनैकान्तिकम्। आत्मप्राणशब्दयोर्व्यतिहारोऽनेकार्थतया स्यात्। प्राणस्थित्यादौ जीवतीत्यादिव्यवहार आत्मान्यत्वेऽप्यविरुद्धः। प्राणोऽस्मीति तद्वैशिष्ट्यपरम्। एवमन्यपरवाक्यान्तरैरपि वायुस्वरूपत्वमात्मनो न शङ्क्यम्। सांख्ययोगिमतं तु बहिष्कार्यमेव।

अन्ये तु मन्यन्ते—न देहेन्द्रियादिकं भोक्तृ, न च नित्यः कश्चिदन्यः सुषुप्त्यादौ तेषां भोक्तृत्वादृष्टेः। सति ज्ञाने भोक्तृत्वमिति चेत्तर्हि तस्यैव तदस्तु, किमन्तर्गडुभिरन्यैः? तस्य च भोक्तृत्वमनुकूलप्रतिकूलविषयावगाहित्वम्। तच्च यदृच्छावैचित्र्यादिति नादृष्टाद्यपेक्षा। नच सुषुप्त्यादौ निर्विषयधीसन्ततिसद्भावे किंचिन्मानम्, प्रबोधारम्भसामग्रीवैचित्र्याद्यदृच्छयैव वा जागराद्यज्ञानोपपत्तेरिति।

बौद्धास्तु ग्राहकाभिमानारूढोऽनादिधीसन्तान एवात्मा, अहं जानामीत्यादिबोधस्त्वालयविज्ञानवशादाश्रयकल्पनया वा स्यात्; अतिरिक्तस्तु बाधितत्वादनादेय इत्याहुः। तदेतन्मतद्वयं तन्त्रेण निरस्यति—ज्ञानमिति। संविदधीना हि

सर्ववस्तुव्यवस्था। ज्ञानं च ज्ञातृधर्मतयैव वेद्यते। नच ज्ञानस्य भोक्तृत्वम्। अनुकूलप्रतिकूलविषयावगाहेऽपि तस्य भोगात्मकत्वं सिध्येत्। मम भोग इति मन्यमानस्तु ज्ञातैव भोक्ता। आनुकूल्यादिकं हि तदपेक्षयैव, उलम्भविरुद्धकल्पनायोगात्। आलयविज्ञानक्लृप्तिश्च निष्प्रमाणिका। उपलब्धस्य च बोद्धुः कुतो बाधः ? धर्मधर्मिभावायोगादिति चेन्न; आदावेव तत्साधनात्। प्रत्यभिज्ञातुरेकस्यासंभवादित्यप्ययुक्तम्; क्षणभङ्गादेरपि निरस्तत्वात्; ज्ञानेतरमिथ्यात्वं च निरसिष्यते। अनुपलम्भस्तु बाधकः स्वस्य चेदसिद्धः, परस्य त्वबाधकः, अन्यथा धीसन्ततिभेदादेरप्यसिद्धिप्रसङ्गात्। बुद्धेस्त्वात्मत्वानुमानमिन्द्रियादेरिवायुक्तम्।

ननु वर्तमानक्षणमात्रविशिष्टतयाऽऽत्मोपलभ्यते, पूर्वापरकालतदुपाध्यादीनामप्रत्यक्षतया तद्विशिष्टवस्तुप्रत्यक्षत्वायोगात्, अन्यथा परभागस्थितवह्निनाऽपि पर्वतस्य विशिष्टोपलम्भप्रसङ्गेऽनुमानादिप्रमाणभङ्गः स्यादिति; तदप्यसत्। प्रत्यभिज्ञायाः प्राक्कालविशिष्टग्रहणस्य दर्शितत्वात्, नित्यत्वादीनामपि तत्तत्प्रमाणैरुपस्थापनात्। नच नित्योऽहमित्युपलम्भे सर्वकालोपाधिप्रत्यक्षत्वप्रसङ्गः; प्रमाणसिद्धिमात्रेण तथा व्यवहारात्, इष्टं चैतदन्यत्रापीति ॥ ३ ॥

आनन्द० आत्मनो [१]देहान्यत्वे साधिते तदन्येषामिन्द्रियादीनामात्मत्वमस्त्वित्यु[२]त्थितेस्सङ्गतिमाह—[३] ये पुनरिति। यद्यपि देहातिरिक्तत्वसाधकश्रुत्यादिभिरिन्द्रियाद्यन्यत्वमपि सिध्यति; तथापि अनुमानतोऽपि भेदसाधनाय प्रवृत्तिरिति द्रष्टव्यम्। नन्विन्द्रियाणामतीन्द्रियत्वात् अहमिति प्रत्यक्षेण प्रकाशमा[४]नत्वं कथमित्यत्राह—चक्षुरादीति। लाघवात् ज्ञानस्य तन्निष्ठ[५]त्वे तेषां नातीन्द्रियत्वमिति भावः।

ननु रूपादिज्ञानानां कथं तन्निष्ठत्वम् ? तदाश्रयत्वेन भानाभावादित्यत्राह—व्यपदिशन्ति चेति। व्यवहारस्य ज्ञानमूलत्वादिति भावः। ननु देवदत्तः पचतीत्यत्र पाकस्य न तन्निष्ठत्वम्; तथेह ज्ञानस्येन्द्रिय निष्ठत्वे नेदं मानमित्यत्राह—स्पर्शनसुखो [६]वायुरिति। स्पर्शननिष्ठसुखहेतुरित्यर्थः। न च तत्रापि स्पर्शनसम्बन्धिसुखजनकत्वमर्थः न तावता तन्निष्ठत्वमिति वाच्यम्; सम्बन्धस्य स्वस्वामिभावत्वे [७]सुखादिभोक्तृत्वलाभादात्मत्वसिद्धिः। वस्तुतस्तु तदाश्रयस्यान्यस्यादर्शनादिन्द्रियाणामेव लाघवादाश्रयत्वमिति भावः।

---

१. देहातिरिक्तत्वेऽपि तद—क, ख,

२. स्थितेस्संङ्गतिः। यद्यपि—ग, घ,

३. ये पुनरिति- नन्विन्द्रि—क, ख,

४. मानात्मकत्वं कथ—ग, थ,

५. ष्ठत्वेन तेषां—क, ख,

६. वायुरिति—स्पर्शनं तन्नि—क,

७. सुखभोक्तृत्व—ग, घ,

इन्द्रियधर्माणामहमर्थगतत्वेन [1]भानाच्च तेषामेवाहमर्थत्वमिति दर्शयति—विकलेष्वित्यादिना। नन्विन्द्रियाणामहमर्थत्वे य एवानुभवति तस्यैव प्रत्यभिज्ञेति य एवाद्राक्षं स एव स्पृशामीति प्रत्यभिज्ञानं स्यात् दर्शनजन्यसंस्कार[2]स्य त्वगिन्द्रियानिष्ठत्वात्। चक्षु[3]रपाये च रूपादिस्मरणं न स्यात् इत्यत्राह—परस्परेति। वैचित्र्यं—सामर्थ्यम्। नन्वन्यसंस्कारस्यान्यत्र स्मृतिजनकत्वेऽतिप्रसङ्ग इत्यत्राह—तच्चेति। यच्छरीरजन्यसंस्कारः तच्छरीरजन्यस्मरणत्वावच्छेदेन जनक [4]इति जननसामर्थ्यं कल्प्यत इत्यर्थः।

ननु देवदत्त एको व्यवहरति पश्यतीत्यादिलौकिक[5]व्यवहारबलात् इन्द्रियेष्वन्यतमस्यैवाहमर्थत्वं वाच्यम्; तत्र चक्षुषोऽहमर्थत्वे अहं शृणोमीति व्यवहारो न स्यात्; श्रोत्रस्य तथा[6]त्वे च पश्यामीति न स्यात् इत्यत्राह—अहं प[7]श्यामीत्यादिना। लौकिकानामैक्यव्यवहारस्यान्यथासिद्धत्वादिति भावः। एवं श्रोत्रा[8]दिष्वपीति—श्रोत्रं शब्दग्रहणाधिकरणं श्रोत्रत्वात् यन्नैवं तन्नैवं यथा घट इत्याद्यूह्यम्। आदिशब्दार्थो रसनादिः। पाण्यादिष्विति—संस्कारवैचित्र्यादेव तथा व्यवहारः। अतिप्रसङ्गस्यैकशरीरोपाधिना निरासात्।

ननु संस्कारस्य स्मृतिहेतुत्वेऽपि य एवाहमश्रौषं स एवाहं पश्यमीति श्रवणदर्शनयोस्सामानाधिकरण्यस्यानुभवः तदाश्रयैक्यं साधयन् परस्परविलक्षणेन्द्रियवैजात्यं साधयतीति चेत्; [9]न; तयोरुपस्थितयोरसंसर्गाग्रहमात्रेण प्रत्यभिज्ञान सम्भवात्; यथानुभूतगृह्यमाणघटगोचरस्स एवायमिति प्रत्यभिज्ञा।

तत्र विषयैक्यगोचरा अत्र कर्त्रैक्यगोचरेति भिदेति चेत्; न; तत्र विष[10]य इवोभयोरैक्यमोहासम्भवात्। अत्र धर्मि[11]द्वयोपस्थितावेव [12]भेदग्रहे देवदत्तयज्ञदत्तयोरिव परस्परस्य परस्परोपस्थित्यसम्भवात्। [13]न च स्मरणकारणमेव तदवच्छिन्नात्मद्वयोपस्थितिकारणमिति परस्परस्य परस्परोपस्थिरिति वाच्यम्; तथा सति तद्भेदे मानाभावः। न च चक्षुरादिभेदस्य स्थिरत्वात् कथं नाम मानाभाव इति वाच्यम्। शक्तिभेदमादायापि रूपादिप्रतिनियत विषयव्यवस्थितौ तद्भेद[14]-

१. भानाच्चेन्द्रियाणामेव—ग, घ,
२. रस्येन्द्रियनिष्ठत्वात् चक्षु
३. रपाये स्मरणं—ग, घ,
४. इति सामर्थ्यं—ग, घ,
५. व्यपदेशव—क, ख,
६. त्वेपश्या—क, ख,
७. पश्यामीति—लौकिका—क,ख I पश्यतीत्यादिलौ—ग,ख,
८. दिष्विति—क,
९. न; तया निवसित—क, ख,
१०. षयवदुभ—ग, घ,
११. धर्मद्वयो—घ,
१२. भेदाग्रहः—ग,
१३. न च संस्काररूपस्मरणकारणमेव तदुभयोपस्थितौ कारणमिति—क,ख,
१४, स्यासिद्धेरिति कत्वभ्रनैान्तिरित्यर्थः ग, घ, ङ,

स्यासिद्धेरिति । भ्रान्त्येति—ऐक्यभ्रमात् यत्तच्छब्दाभ्यामेकत्वेन व्यवहार इत्यर्थः । इन्द्रियेभ्यो भेदबुद्धिबलाच्च नेन्द्रियस्यात्मत्वेमित्यत्राह—एकश्चाहमिति । तथा च तादृशानुभवबलात् तावज्जन्यज्ञानाश्रयः कश्चित्सिद्ध इति भावः ।

चक्षुरादेरिन्द्रियत्वसाधकं च नास्तीत्याह—न च चक्षुरहमिति । काणोऽहमिति धीस्तु नेन्द्रियगोचरा किन्त्विन्द्रियाभाववत्तया तद्भिन्नगोचरेति [१]भावः । दोषबाहुल्येऽपि चेदिन्द्रियाणामेवाहमर्थत्वं [२]साधकवत्त्वाद्देहस्यैवात्मत्वम[३]भ्युपगन्तुमुचित[४]मित्याह—स्थूलोहऽमिति । रूपादि[५]ज्ञानं प्रति चक्षुराद्यन्वयानुविधानं प्रमाणमस्तीत्यत्राह—रूपादिज्ञा[६]नस्य चेति । उक्तेऽर्थे स्वानुभवं साक्षयति—तथाचाभिमान इति । यत एव स्वानुभव[७]सिद्धोऽयमर्थोऽत एव पश्यतीत्यादिकं गौणमित्याह—अत एवेति । विरोधादिति—वैकल्यं नाम इन्द्रियध्वंसः कथं [८]तस्मिन् सति स्यादिति भावः । ननु विद्यमानमिन्द्रियमिन्द्रियान्तरवैकल्यानु[९]सन्धात्रित्यत्राह—नाप्यन्यदिति । वैकल्यस्य सम्बन्धाभावादिति भावः । अन्यथेति—स्वस्य वैकल्ये इत्यर्थः ।

ननु अतिरिक्तात्मवादे यथात्मनो वैकल्याभावेऽपि अन्यवैकल्यानुसन्धानमहमन्ध इति तथात्राप्यस्त्वित्यत्राह—यदि परमिति । ननु [१०]हतस्यापीन्द्रियस्य स्वसत्ताकाले अहंप्रत्ययवेद्यत्वात् अहमर्थत्वमिति चेत् तत्राह—अन्यथा पाण्यादीति । अविशेषादिति भावः । इन्द्रियस्यातीन्द्रियतया [११]तत्सद्भाव इवासद्भावोऽपि न प्रत्यक्षगम्यो योग्यानुपलब्ध्यभावात्; तथा च इन्द्रियान्तरस्य तद्वैकल्यानुसन्धानमिह न प्रत्यक्षेणेति नेन्द्रियस्यात्मत्वसाधकमस्तीत्यत्राह—न चेति । नन्वतिरिक्तात्मवादेपि कथं वैकल्यप्रतिसन्धानम् ? इत्या[१२]शङ्क्य परिहरन् वैषम्यमाह—अनुमानत इति । [१३]एकएवेति—अहं रूपग्रहणकरणविकलो रूपग्रहणविरहात् तथा [शब्द ?]श्रोत्रग्रहणकरणविकलः शब्दग्रहणविरहादित्याद्यनुमानैरेकस्यैव रूपादिग्राहकत्वं लाघवादिति विवक्षितसिद्धेरित्यर्थः । अन्यानुभूते अन्यस्य प्रतिसंधानानुपपत्त्या च तदन्याहमर्थसिद्धिरिति मत्वा संस्कार[१४]स्याहमर्थत्वं परोक्तं खण्डयति—मिथोऽनुभूत इति ।

---

१. भावः । चाक्षुषादेः दोष—क । २. साधकत्वाद्देह—ख ।
३. भ्युपैतुमुचित—क । ४. मित्यत्राह—ख ।
५. ज्ञानस्य चक्षुर—क, ख । ६. न स्येति—क ।
७. सिद्धोऽर्थो—ग, घ,
८. तस्मिन् सति तत्स्यादि क, I तस्मिन् सति प्रतियोगि स्यादि—ग, घ । II
९. सन्धानक्षममि—क, ख । १०. गतस्या—क ।
११. तद्भाव इवा—क । १२. त्याशङ्कां—क ।
१३. एकएवाहंरूप—क, ख । १४. स्याहमर्थ्यम्—ग, घ ।

सर्वेष्विति—देवदत्तानुभवजन्यसंस्कारात्सर्वेष्वात्मसु स्मृतिप्रसङ्गादित्यर्थः। औदरेति—तच्छ[1]रीरवर्तित्वादिति भावः। नचेष्टापत्तिः!, तत्संस्कारा[2]त्तत्सुख-दुःखप्रतिसन्धानं देवदत्तस्य स्यादिति भावः। भिन्नावयवेति—शरीरत्वं हि लाघवात् भोगायतनत्वमात्रम्; न त्वन्त्यावयवित्वमप्यत्र प्रवेश्यम्; गौरवात्; तथाच हस्ताद्यवच्छिन्नस्य भिन्नशरीरावच्छिन्नत्वात् प्रतिसंधानं न स्यादिति भावः। नन्ववयवानामेव भोगायतनत्वमस्तु तथाऽपि हृत्कोशरूपावयवस्य सर्वसाधारण-स्यैकस्यैव संस्कारायतनत्वात् सर्वेषां प्रतिसंधानं स्यात्। न च [3]क्रम्यादिसंस्कारा-दपि प्रतिसंधानप्रसङ्गः! तत्संस्कारस्य तदवयवगतहृत्कोशगतत्वेन एकहृत्कोशाव-च्छिन्नत्वाभावादिति शङ्कते—संस्काराणामिति। सर्वैरहमर्थैः हृत्कोशे संस्का[4]रा-धानमित्यत्र न प्रमाणमित्याह—त्वद्दिष्टेति। नन्वनेकेषामेकशरीरयोगान्यथानु-पपत्त्या कल्प्यत इत्यत्राह—अनेकेषामिति। तर्हि लाघवादेकस्मिन्नेवाहमर्थे संस्कारकल्पनमस्तु किं संस्कारकोशकल्पनयेत्याह—ततश्चेति।

ननु तर्हि संस्कारकोशोऽन्यो मास्तु; सर्वे[5]षां संस्कारवत्त्वमस्तु; न चाति-प्रसङ्गः; अन्योऽनुभूयान्यस्मै [6]उपदेशादिभिरावेदयति। तथा च उपदेशजन्यानु-भवजन्यसंस्कारात् स्मरणमुपपद्यते इति। न चातिप्रसङ्गः। सर्वेषां तथाऽनुभवा-भावात्। भा[7]वे वेष्टापत्तिरिति शङ्कायामाह—नचोपदेशेति। न च त्वगिन्द्रियानु-भूतं चक्षुः प्रतिसंधत्ताम्; न चातिप्रसङ्गः! पञ्चानां परस्परसंस्कारैः परस्पर-प्रतिसंधानकल्प[8]नात् इत्याशङ्क्य नियामकाभावे नियमकल्पनानुपपत्तेः; अन्यथा संस्कारकल्पनाऽपि न स्यात्। वैकल्येपि कस्यचित्प्रतिसंधानदर्शना[9]दित्यादिबहुदोष-प्रसङ्गाद्धेयमित्याह—अविचारितेति। अविचारिते—विचाराभावे रमणीयम्। सम्यग्विचार्यमाणे [10]न रमणीयमित्यर्थः। केचित्तु—अविचारितशब्दः पुरुषपर इत्याहुः। तेषामेव—अहमर्थानामेवेत्यर्थः। अन्येषां—इतरशरीरस्थानामित्यर्थः। परस्परेति—एक[11]ध्रोत्रा ऽहं पश्यामीति प्रतिसंधानं न स्यादित्यर्थः। भिन्नतयेति—रूपादिज्ञानकरणस्य परस्परावलक्षणतया सिद्धस्यैक्यज्ञानायोगा[12]दैक्याप्रतीतेर्बाधा-च्चेति भावः।

परेणेति पक्षं दूषयति—स्वशरोरेति। अतिप्रसङ्गाद्यनेकेति—प्रतिपक्षादि-दोषोपहतमित्यर्थः। किञ्चोक्तव्यव[13]हारेणैकस्यैव सर्वग्रहणाधिकरणत्वे सिद्ध स

---

१. रीरवत्त्वादिति—क। २. रात्सुखदुःख—ख।
३. कृत्यादि—क। ४. सायतन—फ, ख।
५. षां सर्वसं—ग, घ। ६. कथयति यथा च—क, ख।
७. वे चेष्टा—क। ८. नास्यादित्या—ग, घ। ९. दितिबहु—क।
१०. नसारमित्यर्थः—ख। ११. श्रोताऽहं—ग, घ, ङ।
१२. दैक्यप्रतीतिबा—क, ख। १३. हारेणैक—क।

चैकोऽहमर्थ[1]स्सिध्यन्निन्द्रियेभ्योऽन्यस्सिध्यतीत्याह—ततश्चैकस्यैवेति। उक्तव्यतिरेकिणि तर्कप्रतिरोधमप्याह—अन्धबधिरेति। चक्षुरभावे अहमर्थस्यैवाभावात् भावे अन्धत्वायोगात् इन्द्रियान्तराणामेतत्स्वामि[2]त्वायोगात् भावे वा सर्वेन्द्रियस्वामिनः कस्य[3]चिदेकस्यैवाहमर्थ[4]त्वस्योचितत्वादिति भावः।

प्रतिरोधानुमानबाधितं चेत्याह—ज्ञातुरिति। भेदवा[5]चकप्रयोगो राहोश्शिर इतिवदभेदेऽपि सम्भवतीति मम मन इति नाहमर्थस्य[6] भेदसाधक इत्याह—अतो मम मन इति। ननु स्मृत्यादिकर[7]त्वमस्तु न तावताऽहमर्थत्वबाधः। एकस्यैवाकारभेदेनोभयसम्भवादित्यत आह—अयं भाव इति। अनुमानत इति—घटादिस्मरणं करणसाध्यं क्रियात्वात् इत्यनुमानेन परिशेषात् कर्तृभिन्नतया मनस्सिद्धेः[7]। 'वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि' 'मन एव मनुष्याणाम्' इत्यादिशास्त्रम्। स्वस्येति—सर्वत्र करणस्य कर्तृभिन्नतयोपलम्भादिति भावः। अत्र किं ज्ञातृमात्रनिरासः क्रियते' उत ज्ञातृत्वं करणगतमिति साध्यते ? इति विकल्पं मनसि निधाय आद्य आह—ज्ञातृमात्रेति। द्वितीय आह– तदन्येति।

ननु ज्ञातृमात्रं सि[8]द्धम्; न तु मनोभिन्नत्वेन; तथाच कल्प्येन क्लृप्तत्याग इति चेन्न; ज्ञातुः करणसापेक्षतया करणानुमानेन तद्भिन्नत्वेनैव मनसः कल्प्यत्वे[9] ज्ञातरि तद्भिन्नत्वस्यावश्यकत्वादिति भावः। ननु मनस एव कर्तृत्वान्न करणत्वमिति चेत्तत्राह—अथेति। तथा सति संज्ञामात्रविपर्यास इति भावः। ननु मास्त्वतिरिक्तं करणमित्यत्राह—तच्चेति। क्रियात्वहेतोः श्रुतेश्च सत्त्वादिति भावः। तर्हि प्राण एवात्मास्त्विति पक्षान्तरं शङ्कते—अन्यस्त्विति। प्राणस्यात्मत्वे युक्तिमाह– प्राणाधोनेति। देहादिप्रवृत्तिप्रयोजकस्यात्मत्वादिति भावः। [10]प्राणो हीत्यादिष्वात्मशब्दादिप्रयोगात् प्राणस्यात्मत्वमित्याह– आत्मशब्दश्चेति। मुख्यत्वे बाधकाभावादिति भावः।

किं च प्राणे सति जीवतीत्युच्यते तदभावे [11]म्रियत इति। जीवनमरणे ह्यात्मस्थितितदभावौ! अतश्च प्राण आत्मेत्याह—प्राणस्थितोति। ननु तर्हि प्राणस्यात्मत्वे सुषुप्तिकालेऽपि बोधप्रसङ्गः आत्मव्यापारस्य सत्त्वात् तस्यैव बोधात्मकत्वात् बोधमू[12]लत्वं चेत्यत्राह—सुषुप्ताविति। न प्रवृत्तिमात्रं बोधसापेक्षं

---

१. ध्यन्नतीन्द्रियेभ्यो—क।
२. त्वाभावात्—क, ख।
३. चिदेवाहमर्थं – ग।
४. त्वादितिभावः—क, ख।
५. चकषष्ठीप्रयो ग, घ।
६. स्यायं व्यवहारो न भेद—ग।
७. द्धेरित्यर्थः क,
८. द्धिनं तु—ग।
९. त्वेनैवसिद्धेर्ज्ञातं—ग,
१०. प्राण आत्मेत्यादिश्रुत्यादिष्वा–ग, घ, ङ,
११. मृत इति–क।
१२. लत्वाद्वेत्यत्राह—क,

बो[1]धात्मकं वा; जीवनादे[2]रतदात्मकत्वात् तन्निरपेक्षत्वात् सामग्रीभेदाच्चेति भावः। बाधकं परिहरति—ममेति। ननु देहन्याये[3]नैव प्राणस्यानात्मत्वे पृथङ्निराकरणं व्यर्थमित्याशङ्क्याह—अधिकाशङ्केति। अन्यथासिद्धप्रयोगत्वान्न[4]साधकत्वमिति भावः। परिहारेति—सङ्घातत्वाद्यनुमानादेरन्यथासिद्ध[5]त्वमिति भावः।

पूर्वोक्तप्राणात्मत्वसाधकानां परिहारमाह—देहादीति। ज्ञानेच्छादेरिति भावः। नानार्थन्यायेन आत्मादिशब्दप्रयोगमन्यथयति—आत्मेति। इन्द्रियादिस्थितिव्यतिरे[6]कादिवत् प्राणस्थितिव्यतिरेकादिकमपि न साधकमित्याह—प्राणस्थित्यादाविति। नन्वहमर्थे 'प्राणोऽस्मि' [7]इति प्राणाभेदबोधनात् प्राणोऽहमर्थं इत्याह—प्राणोऽस्मीति। न तत्र प्राणाभेदः प्रतिपाद्यते; अपि तु प्राणवदभेद इति भावः। ननु 'वायुरात्मा भवेत्ततः' इति वाक्याद्वायुत्वनिश्चये तद्विशेषः प्राणो भविष्यतीत्यत्राह—एवमन्यपरेति। सूक्ष्मो दुर्ग्रहो भवतीति सूक्ष्मतादिपरत्वेनान्यथासिद्धत्वात् न साध[8]कत्वमिति भावः। ननु योगशास्त्रे;—

वायुर्भूत्वा ततो गच्छेत्प्राणायामेन योगिनः।

इति ज्ञानयोगिन आहुः; तत्कथं संगच्छत इत्यत्राह;—सांख्येति। श्रुतिन्यायविरुद्धत्वादिति भावः॥

चार्वाकैकदेशिन आहुः;—'न देहादिकमात्मा अपि तु चैतन्यमेव। तच्च क्षणिकमिति न नियमः; अतो बौद्धाद्भेदः' इति। तन्मतमनुवदति;–अन्ये त्विति। ज्ञानस्यात्मत्वे युक्तिमाह—नदेहेति। भोक्तुरेवात्मत्वमिति भावः। ननु भोक्तृत्वमनुभवितृत्वविशेषः। स च ज्ञानानाश्रयस्य न सम्भवतीत्यत्राह—तस्य चेति। न त्वनुकूलप्रतिकूलज्ञानाश्रयत्वं गौरवादिति भावः। ननु कस्यचिदनुकूलानुभवरूपभोक्तृत्वं कस्य चित्प्रतिकूलानुभवरूपभोक्तृत्वमिति वैषम्यं न स्यात्। तथा कदाचिद्भोक्तृत्वं कदाचिन्नेति वैषम्यं न स्यात्; नित्यस्य कस्यचिददृष्टवतोऽनभ्युपगमादित्यत्राह—तच्चेति। निर्हेतुकत्वात्कार्यस्य कण्टकतैक्ष्ण्यादिन्यायेनोपपन्नमिति भावः।

नन्वतिरिक्त आत्मा माभूत्; तथाऽपि संतन्यमानज्ञानमात्मा सुषुप्त्यादौ वर्तताम्; न तु प्रत्यङ्गं विच्छिन्नम्; तथात्वे जागराद्यज्ञानानुपपत्तिप्रसङ्गादिति

---

१. धरूपं वा—क। २. देस्तन्निरपेक्षत्वात्—ग,
३. नैव निरासे-क। ४. न्न बाधकत्व—ग,
५. त्वादिति—ग, ६. कवत्प्राण—क।
७. इत्यहमर्थभेदप्रतिपादनात्—ग, ८. कमिति–क, ग।

बौद्धपक्षं दूषयति;—न च सुषुप्त्यादाविति। ज्ञानस्य सविषयत्वनियमादिति भावः। कार्यस्य कारणाधीनत्वे हि जागराद्यज्ञानं कारणसापेक्षम्! तदेव नास्तीत्याह—यदृच्छयेति। अथ ज्ञानसंतान एवात्मा; न तस्य धर्मादिकमस्ति। तथापि दोषवशात् कर्तृत्वभोक्तृत्ववत्तया भ्रान्तिविषयो भवति। न च निर्धर्मकत्वे ज्ञानाश्रयत्वप्रतीत्यनुपपत्तिः! आलयविज्ञानमेव हि प्रवृत्तिविज्ञानवेदनास्कन्धादिहेतुतया तद्वत्तया भासते। यद्वा आधाराधेयभावोऽध्यस्यते। तद्बलात्तथा व्यवहारो भवतीति बौद्धाः प्राहुः; तदनुवदति—बौद्धास्त्विति।

तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम्।
तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्॥

इति तदुक्तेः अहमिति विज्ञानमालयविज्ञानमित्यर्थः। संविदधीनेति—पुरुषेच्छाधीनत्वे अतिप्रसङ्गादिति भावः। यथासंविद्व्यवस्थायां ज्ञानस्याहमर्थतया भासमानस्य धर्मितया कल्पनं युक्तमित्याह—ज्ञानं चेति। भोक्तृत्वान्यथानुपपत्त्या च न ज्ञानमहमर्थ इत्याह—न च ज्ञानस्येति। भोक्तृत्वं हि न भोगात्मकत्वम्! अपि तु भोगाश्रयत्वम्; तथा च मम भोग इति व्यतिरेकप्रतीतिबलाच्च न ज्ञानं भोक्तेत्याह—मम भोग इति। किंच आनुकूल्यादिकं च कस्यचिद्भोक्तुरेव न तु भोगस्य; अनुभवविरोधात्। तथा च यदपेक्षयाऽऽनुकूल्यं तस्यैवाहंत्वमिति न ज्ञानस्यात्मत्वमित्यत्राह—आनुकूल्यादिकं हीति। नन्विदं सर्वं आलयविज्ञानादेवोपपन्नं तस्य वेदनात्मकभोगादिभिन्नतया तद्वत्त्वादित्यत्राह—आलयेति। नन्वहमाकारज्ञानमेवालयविज्ञानम्। तच्च सर्वानुभवसिद्धमिति चेन्न; तादृशस्य ज्ञानस्याश्रयतया अहमर्थत्वाङ्गीकारे विवादाभावात्। केवलज्ञानमात्रस्यैव तन्मते स्वलक्षणत्वात्।

ननु ज्ञातृत्वेनोपलम्भेऽपि बाधात् स्वलक्षणमात्रं सिध्येदित्यत्राह—उपलब्धस्यचेति। बाधादर्शनादिति भावः। बाधोऽस्तीति शङ्कते—धर्मेति। आदावेवेति। प्रथमसरस्यादौ धर्मधर्मिभावस्य साधनादिति भावः। ननु क्षणिकत्वाद्धर्मधर्मिभावायोग इति बाधमाशङ्क्य क्षणभङ्गस्य निरासान्न दोष इत्याह—प्रत्यभिज्ञातुरिति। एकत्वाभावे प्रत्यभिज्ञातृत्वं नोपपद्यत इति द्योतयितुं प्रत्यभिज्ञातुरिति विशेषणम्। ननु ज्ञानेतरस्य मिथ्यात्वाद्धर्मधर्मिभावो नेति शङ्कां निराकरोति-ज्ञानेतरेति। ननु धर्मधर्मिभावोऽनुपलम्भबाधित इत्याशङ्क्य अनुपलम्भः किं स्वस्य परस्य वेति विकल्प्य आद्य आह स्वस्यचेति। द्वितीय आह—परस्यचेति। अन्यथा अन्धस्यानुपलम्भाज्जगदभावप्रसङ्ग इति भावः।

परानुपलम्भस्य बाधकत्वाङ्गीकारे परस्याप्यनिष्टमाह—अन्यथेति। धीसन्ततेः स्वव्यतिरिक्तेनानुपलम्भादिति भावः। ननु क्षणिकत्वं प्रत्यक्षसिद्धमेव क्षणावच्छिन्नस्यैव क्षणिकत्वात्। तथा च स्वानन्तरभाविसाधनानुष्ठानजन्यभोक्तृ न किंचिदिति बुद्धेरेवात्मत्वादिति शङ्कते—नन्विति। नन्वतीतादिकालीनतयाऽपि

प्रतीतिरस्तीति चेत्तत्राह—पूर्वापरेति। विशेषणसन्निकर्षो न हेतुः विशेष्यसन्निकर्षस्तु वर्तत एवेत्यत्राह—अन्यथेति। ननु विशेष्यस्य यत्रासन्निकर्षः तत्र प्रमा न स्यादिति चेत्; न; विशेषणसन्निकर्षस्य हेतुत्वे विशेष्यसनिकर्षस्यापि हेतुत्वमविशेषादिति भावः। अनुभवानुरोधेन सामग्रीव्यवस्था। पूर्वकालविशिष्टप्रत्यभिज्ञाप्रत्यक्षं च प्रत्यक्षसिद्धमिति तदनुरोधात्सामग्रीकल्पनमित्याह—तदप्यसत् इत्यादिना। एवमपि नित्यत्वं न सिध्येदित्यत्राह—नित्यत्वादोनामिति। अनुमानादिभिरुपस्थापनादित्यर्थः। प्रमाणसिद्धेति अनुमानादिसिद्धिमात्रादित्यर्थः। इष्टं चैतदिति—विभज्यवैभाषिकेण स्थिरपदार्थोऽङ्गीकृत इत्यर्थः॥ ३॥

अक्ष०—पूर्वेण श्लोकद्वयेनात्मनश्शरीराद्भेदः प्रदर्शितः। अनेन श्लोकेन बाह्यान्तरेन्द्रिय-प्राण-बुद्धिभ्योऽपि भेदः प्रसाध्यते। तत्र प्रथमपादेन बाह्येन्द्रियभेदः, अत्र अक्षशब्देन इन्द्रियाण्युच्यन्ते। बाह्यानि तानि त्वक्-चक्षु-श्रोत्र-जिह्वाघ्राणानि, तेभ्यः पञ्चभ्योऽपि भिन्न आत्मा। अत्र हेतुः तदखिलेति। तेषामखिलानामिन्द्रियाणां ये विषयाः स्पर्शरूप-शब्द-रस-गन्धाः, तेषां प्रतिसन्धातुरेकत्वादित्यर्थः। श्रुत्वा शब्दं फलं दृष्ट्वा स्पृशन् जिघ्रन् इत्यादौ एकस्यैव पुंसः वृक्षात् पतितस्य फलस्य शब्द-रूप-स्पर्श-गन्ध-रसप्रतिसन्धान दर्शनात् नेन्द्रियभेदेन भिन्ना आत्मान इति वक्तुं युक्तम्। चक्षुः पश्यतीति स्थाली पचतीतिवदौपचारिकम्। तथा योऽहं द्रष्टा स एव स्पृशामीति प्रत्यभिज्ञया द्रष्टुः स्प्रष्टुश्चैकत्वमपि गम्यते। इन्द्रियाणामेव द्रष्टृत्वादिमत्त्वे द्रष्टाऽन्यः स्प्रष्टाचान्य एव स्यात् न त्वेकः, अन्यानुभूतस्यान्येन प्रतिसन्धानोपगमे चातिप्रसङ्गस्स्यात् अनुभवसमानाधिकरणस्य संस्कारस्य अन्यगतप्रतिसन्धानं प्रतिहेतुभावश्चासिद्ध इति भावः।

आन्तरस्य मनस एकस्यात्मत्वे नोक्तानुपपत्तिस्स्यादित्यत्राह—कर्तुरिति। मनस अधिष्ठानमपि न प्रत्यक्षं कर्तुरात्मनः स्मृत्यादिकार्ये जननीये करणतया केवलमनुमानेन शास्त्रेण वा सिद्धिर्वक्तव्या। करणतया सिद्ध्यच्च मनः ततः कर्तुरन्यदेवेति धर्मिग्राहकमानसिद्धं कर्तृकरणयोरेकत्वायोगादिति भावः।

अथ 'प्राणोऽस्मि प्रज्ञात्मेति' वैदिकव्यवहारात् प्राणा एवात्मानस्स्युरित्यत्राभिधीयते-प्राणा इति। वायुसङ्घातरूपतया संप्रतिपन्ना इति भावः। वपुरिति—शरीरोक्तन्यायादित्यर्थः। यथा शरीरं सङ्घातत्वादचेतनमिति साधितं तथा प्राणा अपि संघातरूपत्वात् न चेतयन्ते न ज्ञातुं प्रभवन्तीति भावः। परिहारदार्ढ्याभिप्रायेण ध्रुवशब्दः। प्राणोऽस्मीत्यस्य प्राणविशिष्टोऽस्मीत्यर्थः प्रज्ञात्मेति समभिव्याहारादवगम्यते। अत एव मम प्राणा इति व्यवहारश्च सङ्गच्छत इति भावः।

ज्ञानशून्यदशायां भोगाभावेन क्षणिकज्ञानसन्ततेरेव भोक्तृत्वमात्मत्वं चेति

वदतां मतं निरस्यति—ज्ञानं चेति। ज्ञातृधर्मतया अहं जानामीति सिद्धस्य ज्ञानस्य ज्ञातृत्वासंभवात् भोक्तृत्वमात्मत्वं च न संभवति। क्षणिकमपि चेति। भवत्सिद्धान्ते क्षणिकतयाऽभ्युपगतस्य ज्ञानस्य योऽहमद्राक्षं स एव स्पृशामीति स्थिरतया प्रतिसन्धानानर्हत्वाच्चास्य ज्ञानस्य आत्मत्वं न संभवतीति भावः ॥ ३ ॥

इत्यात्मन इन्द्रियाद्यतिरेकः

धीर्नित्या यस्य पक्षे प्रसरति बहुधाऽर्थेषु सेवेन्द्रियाद्यै-
स्तेनात्माऽजागलस्थस्तन इव किमिह स्वीक्रियेतेति चेन्न।
कल्प्यं चेदात्मतत्त्वं कथयितुमुचितं लाघवं तत्र युक्त्या
नित्या सा यस्य तद्वानि निगममितो गौरवं नास्य भारः ॥४॥

सर्वा०—मा भूदस्थिरज्ञानानां प्रतिसन्धानाद्यनर्हत्वादात्मत्वम्। यस्यात्मवत्तद्धर्मभूता धीर्नित्या, सा प्रसरणभेदैस्तत्तदर्थान्प्रकाशयतीति पक्षः; तस्य किं तदाश्रयभूतेन नित्यात्मनेति चोद्यमनूद्य प्रत्याह—धीरिति ॥ धीतद्वन्तौ तावत्पृथग्दृष्टौ। तत्र *न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, *तथा हेयगुणध्वंसात् इत्यादिभिर्द्वयोरपि नित्यत्वं यस्य सिद्धं तस्य कल्पनागौरवरूपो भारो नास्तीत्यर्थः ॥४॥

आनन्द०—आक्षेपिकीं सङ्गतिमाह—माभूदिति। ज्ञाननित्यत्ववादिनोऽपि ज्ञानं न स्वरूपेण भोगः। किं तु अवस्थाविशेषमादाय। तथाच तादृशावस्थैव भोगोऽस्तु; तथाच भोक्तृप्रत्यभिज्ञादिकमपि युज्यत इति भावः। धीतद्वन्ताविति। तथाच उभयोर्नित्यत्वेऽवस्थातिरिक्तनित्यधियोऽभ्युपगमस्यावश्यकत्वे धियोऽन्य आत्मा सिद्ध इति भावः। विज्ञातुः—ज्ञानाश्रयस्य; विज्ञातेः—ज्ञानस्य न विपरिलोपो विद्यते—नाशो नेत्यर्थः ॥

यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो गुणाः।
तथा हेयगुणध्वंसादवबोधादयो गुणाः ॥

इत्यादिभिः ज्ञानादेर्नित्यत्वोक्त्या आत्मनोऽपि नित्यतेति द्रष्टव्यम्। मूले सा—धीः। तद्वान्—धीमानित्यर्थः ॥ ४ ॥

अक्ष०—क्षणिकविज्ञानानां प्रतिसन्धानानर्हत्वेन आत्मत्वासंभवेऽपि यस्य आत्मवत् तद्धर्मभूतज्ञानमपि नित्यं इन्द्रियद्वारा प्रसरतीति पक्षः तस्य किं तदाश्रयेण इति शङ्कामनूद्य परिहरति—धीरिति। यस्य पक्षे नित्या धीः धर्मभूता इन्द्रियादिद्वारा अर्थेषु बहुधा प्रसरतीत्युपगम्यत इत्यर्थः। तेन—नित्यां धियमभ्युपगच्छता

तदाश्रय आत्मा अजागलस्थस्तन इव निष्प्रयोजनः, स्वतः प्रसरणशीलया नित्यधिया सर्वव्यवहारनिर्वाहादितीमामाशङ्कां निराकरोति नेति। कल्प्यं चेदिति—यदि प्रतिसन्धानाद्यनुपपत्त्या ज्ञानाश्रयं नित्यं आत्मतत्त्वं अपि कल्पयेः तदा नित्यज्ञानेनैव सर्वोपपत्तौ तदाश्रयकल्पने गौरवमिति युक्त्या आत्मा-ऽनभ्युपगमे लाघवमस्तीति वक्तुं युक्तमित्यर्थः तथा न वयं कल्पयाम इति भावः। तर्हि कथमात्माऽभ्युपगम इत्यात्राह—नित्येति। सा-धीः नित्या, तद्वानपि-ज्ञानाश्रय आत्माऽपि नित्यः, यस्य निगममितः "न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते"—

तथा हेयगुणध्वंसादवोधादयोगुणः।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥

इत्यादिशास्त्रेणैव अभ्युपगतौ। अतोऽस्य गौरवं न दोषः न हि वचनस्यातिभार इति भावः ॥ ४ ॥

आत्मनो बुद्ध्यतिरिक्तत्वम्

ज्ञानत्वं वक्ति पुंसः श्रुतिरिह न पुनर्बुद्धिमात्रस्य पुंस्त्वं
प्रत्यक्षादेः प्रकोपादनुगतकथने ज्ञानमर्थप्रकाशः।
स्वस्यैवात्मा तु सिद्धिं मतिरनुभवति स्वान्ययोस्सिद्धिभावं
ज्ञातुर्जाड्यप्रसङ्गव्युदसनविषया ज्ञानमात्रोक्तयोऽपि ॥ ५ ॥

सर्वा०—ननु *द्रष्टा श्रोता इत्यारभ्य *विज्ञानात्मा पुरुष इत्यादिषु जीवस्य ज्ञानस्वरूपत्वं श्रूयते; अतस्तस्य ज्ञानादतिरेको दुस्साध इत्यत्राह—ज्ञानत्वमिति ॥ न ह्यत्र स्वधर्मतादात्म्यं विधीयते, अशक्यत्वात्। किंतु धर्मवद्ध-र्मिणोऽपि विज्ञानात्मत्वं नाम धर्मान्तरमुपदिश्यते। ज्ञानानुवादेनात्मत्वस्य विधिः स्यादित्यत्राह—न पुनरिति। अन्यथा बाधकमाह—प्रत्यक्षादेरिति। आदिशब्देना-नुमानशास्त्रयोस्संग्रहः। ज्ञानत्वविधानेऽपि तद्विरोधस्स्यादित्यत्राह—अनुगतेति। कस्यचिदर्थस्य प्रकाशरूपत्वमुभयत्रानुवृत्तं ज्ञानशब्दनिमित्तं तद्विधौ न विरोध इत्यर्थः। अर्थप्रकाश इत्युक्तं विषयतो विभजते—स्वान्येति। स्वासाधारणेन केन-चित्स्वभावेन विशिष्ट इह स्वशब्दार्थः। धर्मभूतज्ञाने तु तावदतिरिक्तग्राहित्वं विशेषमाह—मतिरिति। *विज्ञानघन एवेत्यादिभिर्ज्ञानमात्रत्वोक्त्या ज्ञातृत्व-निषेधात्कथमुभयत्रानुवृत्तधर्मक्लृप्तिरित्यत्राह—ज्ञातुरिति। नात्रावधारणमन्ययो-गव्यवच्छेदार्थम्; किंतु *विज्ञानघन इत्यादिपूर्ववाक्यपरामर्शादंशतोऽपि ज्ञान-त्वायोगव्यवच्छेदपरमिति भावः ॥ ५ ॥

आनन्द०—ननु तद्वानपि निगममित इत्ययुक्तम्; श्रुतिषु ज्ञानमात्रस्यैवात्मत्वोक्तेः। तस्य नित्यत्वेऽपि बुद्ध्यतिरिक्तत्वाभावात् इत्याक्षेपसंगतिं दर्शयति;—ननु द्रष्टा श्रोतेति। विज्ञानात्मा – विज्ञानस्वरूपः; ज्ञानमितियावत् [१]धीरूपत्वे तद्भिन्नरूपत्वं विरुद्धमिति भावः। न ह्यत्रेति—स्व [२]धर्मभूतज्ञानेन भेदस्य ज्ञातत्वात् कथं [३]तदभेदो विधातुं शक्यत इति भावः। किं त्विति—ज्ञानत्वविधाने न विरोध इति भावः।

नन्वात्मोद्देशेन ज्ञानत्वविधिरिति कुतः? ज्ञानोद्देशेन वा तत्त्वविधिः किं न स्यात्? तथा च धीव्यतिरिक्तात्मसिद्धिर्न स्यादित्यत्राह;—ज्ञानानुवादेनेति। अन्यथा बाधकमिति—अहं जानामीत्यहमर्थस्य [४]धर्मभूतज्ञानाद्भेदप्रत्यक्षादौ विरोधादित्यर्थः। अनुमानेति। धीरात्मा न तद्धर्मत्वात्। यो यद्धर्मः न स सः, यथा घटरूपम् इत्यनुमानम्; 'न विज्ञातुर्विज्ञातेः' इति शास्त्रम्।

ननु ज्ञानत्वं धियोऽसाधारण[५]धर्मः। तद्विधाने धीत्वमप्यापतितमिति[६] धर्मधर्मिभेदधीविरोधः इति शङ्कते;—ज्ञानत्वेति। कस्यचिदिति—ज्ञानत्वं [७]धर्मभूतज्ञानमात्रासाधारणधर्मः अपि तु सत्तादिवत् धर्मधर्म्यनुगत इति न विरोध इति भावः। प्रकाशरूपत्वं धर्मधर्मिसाधारणम्, न तु धर्मस्यैवासाधारणमिति दर्शयति—अर्थप्रकाश इत्युक्तमिति। ननु स्वस्यैवेत्यसिद्धम्, अहन्त्वादेरति[८]रिक्तस्यापि प्रकाशात् इत्यत्राह—स्वासाधारणेनेति। [९]यद्यपि धर्माणामपि स्वप्रकाशत्वो[१०]क्तेः धर्मिणैव धर्मभानोक्तौ विरोधः; तथाऽपि मतभेदेन तस्य प्रवृत्तेर्न दोषः। आत्मोद्देशेन ज्ञानत्वविधौ श्रुतिविरोधं परिहरति – विज्ञानघन इति। आदिशब्देन 'प्रज्ञानघन एव' इत्यादिसंग्रहः। नन्वात्मनो ज्ञानात्मकत्वे ज्ञानमहमितिधीः किमिति न स्यात्? इति चेत् न; ज्ञानत्वं किं प्रकाशात्मकत्वम्? उत प्रकाशकत्वम्? नाद्यः प्रकाशात्मकत्वेनाप्रतीयमानत्वात्। ज्ञानादिशब्दानां धियि प्रसिद्धेः प्राचुर्यात् सास्नादिमति गोशब्दस्येवात्मनि ज्ञानमिति प्राचुर्येण व्यवहाराभावः। क्वाचित्कव्यवहारस्तु भवत्येव। अत एव परमात्मनि 'सत्यं ज्ञानम्' इति व्यवहारः। ननु अहमर्थस्य ज्ञानत्वे न प्रत्यक्षत्वे ज्ञानत्वविधिर्न युक्तः अत्यन्ताप्राप्त एव विध्यङ्गीकारात् इति चेन्न;ज्ञानत्वेन भानेऽपि नीलादिबुद्धिवत् परम्परासम्बन्धेन भानसम्भवात् तद्व्युदासार्थं साक्षात्संबन्धो विधीयते इति न दोषः। न चैवं 'तद्गुणसारत्वात्तद्व्यपदेशः' इति सूत्रवैयर्थ्यमिति वाच्यम्; तद्गुणसारत्वादपीत्यर्थात्। अन्यथा प्राज्ञस्यापि तत्त्वाभावापत्तेरिति ॥ ५ ॥

---

१. विरूपत्वे—क। २. धर्मताज्ञा—घ। ३. तत्भेदो ग।
४. धर्मताज्ञा—ग, घ। ५. धर्मतः तद्वि—क। ६. ति तद्धर्मधर्मि—ख।
७. धर्ममात्रासाधारण—ग। ८. रिक्तस्यैव प्र—ग।
९. यद्यपि पूर्वं धर्माणां—क, ख, ग। १०. क्तेरिदानी धर्मिणैव—ग, घ।

अक्ष०—'विज्ञानात्मा पुरुष' इति पुरुषस्य ज्ञानरूपत्वश्रवणात् न तदतिरिक्तत्वमात्मन इत्यत्राह—ज्ञानत्वमिति। धर्मभूतज्ञानवत् धर्मिणोऽपि पुरुषस्य ज्ञानत्वरूपधर्मान्तरयोगं वदतीयं श्रुतिः, नत्वत्र ज्ञानसामान्यस्य पुरुषत्वं, धर्मधर्मितादात्म्यस्य वक्तुमशक्यत्वादिति भावः। ज्ञानानुवादेन पुरुषत्वविधानोपगमे वाधकमाह—प्रत्यक्षादेरिति। अहं जानामीति प्रत्यक्षस्य ज्ञानधर्मितया अहमर्थावगाहिनः विरोधस्स्यादित्यर्थः। आदिशब्देन धीर्नात्मा तद्धर्मतया प्रतीयमानत्वादित्यनुमानस्य, जानात्येवायं पुरुष इत्यादिशास्त्रस्य च सङ्ग्रहः। तर्हि कथमात्माज्ञानमित्युच्यत इत्यत्राह—अनुगतेति। अर्थप्रकाशत्वरूपं ज्ञानत्वं धर्मधर्मिणोः ज्ञानात्मनो रक्षतं कथितमिति भावः। अर्थप्रकाशने ज्ञानात्मनोर्विशेषमाह—स्वस्यैवेति। स्वासाधारण प्रत्यक्त्वानुकूलत्वैकत्वविशिष्टात्मन इत्यर्थः। आत्मासिद्धिमनुभवति—सिद्धिर्भवतीत्यर्थः। मतिः—धर्मभूतज्ञानं तु स्वस्वव्यतिरिक्तार्थयोःसिद्धिभावं सिद्धिरूपतां अनुभवतीत्यर्थः सिद्धिर्भवतीति यावत्। विज्ञानघन एवेत्यादिनाऽऽत्मनो ज्ञानमात्रत्वोक्त्या ज्ञातृत्वनिषेधात् कथं ज्ञातृज्ञानोभयसिद्धिरित्यत्राह—ज्ञातुरिति। अत्र विज्ञानघन एवेत्यवधारणघटिताः ज्ञानमात्रोक्तयोऽयोगव्यवच्छेदपराः ज्ञातुरात्मनः किञ्चिदंशेऽपि ज्ञानत्वायोगरूपजडत्वं नास्तीति बोधयितुं प्रवृत्ताः नत्वन्ययोगव्यवच्छेदपरा इति भावः॥ ५॥

आत्मनः स्वयंप्रकाशत्वम्

आत्मा स्वेनैव सिध्यत्यहमिति निगमैर्यत्स्वयंज्योतिरुक्तः

स्वापेऽप्यस्य स्वसिद्धावशयिषि सुखमित्यक्षता प्रत्यभिज्ञा।

चेतश्चान्यानपेक्षं मतिषु न हि भवेत्किं च वेदान्तदृष्ट्या

ज्ञानत्वादेव धीवत् स्वविषयधिषणानिर्व्यपेक्षस्वसिद्धिः॥ ६॥

सर्वा०—सिध्यतु देहादिभ्योऽन्य आत्मा; स कथमनन्यसाधनः? स्वानुभवबलादिति चेन्न; धर्मतोऽपि तदुपपत्तेः। आत्मत्वादित्यनुमानादिति चेन्न; युष्माभिः केवलव्यतिरेक्यनभ्युपगमात्, ज्ञानस्य च सपक्षस्याभ्युपगमात्। स्वयंज्योतिष्ट्वश्रुतेरिति चेन्न; ज्योतिश्शब्दस्यात्र भाक्तत्वात्। चक्षुस्सहकारिणि तेजोविशेषे हि तन्मुख्यता। *स्वेन रूपेणाभिनिष्पद्यते इति त्वौपाधिकरूपनिवृत्तिपरम्। इष्टं च भवतामपि स्वधर्मेणात्मनो भानम्—तावतैवान्यत्रादृष्टेन स्वयंप्रकाशत्ववादोऽस्त्विति। एतत्प्रत्याह—आत्मेति। एवकारोऽत्र परप्रकाश्यत्वनियमनिवृत्तिपरः। यद्यहंत्वादिरहितः स्वयं प्रकाशते, तदा परमतं स्यादित्यत्राह—अहमिति। अहमर्थं आत्मेति सेत्स्यति; अतस्तत्प्रकाशे कथं परेष्टावकाश इति भावः। प्रतिज्ञाते मानमाह—निगमैरिति। बहुवचनेन ज्ञानत्ववादिनोऽपि निगमास्तत्परा इति व्यज्यन्ते। यद्यपि *हृद्यन्तर्ज्योतिः पुरुष इत्यत्रापि ज्योतिश्शब्दो भाक्तः; तथाऽपि

स्वप्रकाशे प्रदीपादिवल्लोकदृष्ट्याऽन्यनिरपेक्षत्वं स्वरसावगतं न बाध्यम्। स्वधर्मेणान्यप्रकाशकत्वमुपचारनिमित्तं स्यादिति चेन्न; बाह्यज्योतिषि स्वधर्मनिरपेक्षप्रकाशस्यापि स्वतःप्रतीतेः। स्वधर्मेण भासमानत्वमेव ज्योतिश्शब्दोपचारनिमित्तमिति चेन्न; बाह्ये तदभावात्। स्वधर्मतः प्रकाशकत्वं च, *योऽयं विज्ञानमयः प्राणेषु इति पदान्तरसिद्धतया पुनरुक्तं स्यात्। उपचारनिमित्तव्यञ्जनमात्रं पदान्तरकृत्यमिति तु मन्दम्। स्वयंप्रकाशत्वे सुषुप्त्यादावपि प्रकाशेतेत्यत्राह—स्वापेऽपीति।

अयंभावः—प्रत्यभिज्ञाबलात्सुषुप्तावप्यहमर्थोऽस्तीति सिद्धम्। श्रुतिस्वारस्याच्च प्रकाशमानत्वमपि ग्राह्यम्। तथा च सुखमहमस्वाप्समिति प्रबुद्धपरामर्शस्वारस्यं च न बाध्यमिति। ननु यदि सुषुप्तावात्मा प्रकाशते तन्मनसैवास्तु कृतं स्वप्रकाशत्वेनेत्यत्राह चेत इति। अयं भावः—बाह्यविषयेषु तावच्चक्षुरादीन्यनुमानागमसंस्कारान् वा संगृह्य प्रवर्तते, आत्मनि च तत्तदुपहितं जनितं वा किंचिदुपधायैव; स्वापे तु दृष्टविरुद्धमनोवृत्तिकल्पनाद्वरं श्रुतिस्वारस्यानुरोध इति। अनुमानरुचीनां तदप्यस्तीत्याह—किं चेति। वेदान्तदृष्टचेति ज्ञानत्वहेतोरसिद्धिपरिहारः। ज्ञानस्य स्वप्रकाशत्वं साधयिष्यत इति तद्दृष्टान्तोक्तिः ॥ ६ ॥

आनन्द०—नन्वात्माऽस्तीत्युक्तम्। तथा च आत्मनः प्रकाशात्मकत्वं स्वप्रकाशत्वेन वाच्यम्। तदेवासिद्धमित्याक्षेपसंगतिमभिप्रेत्याह—सिध्यतु इत्यादिना। अनन्यसाधनः—स्वप्रकाशः। स्वानुभवः—स्वस्य आत्मनः—स्वात्मनः प्रकाशः। आत्मनोऽनुभूयमानत्वमात्रात् स्वप्रकाशत्वं स्वधर्मभूतज्ञानेनाप्यनुभूयमानत्वसंभवात् इत्याह—धर्मतोऽपीति। धर्मभूतज्ञानेनेत्यर्थः। आत्मा स्वप्रकाशः आत्मत्वात् इति व्यतिरेकेण घटवदिति साधने अपसिद्धान्त इत्याह—युष्माभिरिति। यन्मते व्यतिरेक्यभ्युपगमः तन्मतेऽप्यसाधारण्यं दोष इत्याह—

ज्ञानस्य चेति—

सपक्षे सति चाभासः स्यादसाधारणस्त्वसौ।

इत्युक्तेरिति भावः। ज्योतिश्शब्दस्य चेति—ज्योतिश्शब्दो हि तेजोवचनः! न च तस्य ज्ञाने लक्षणाः मानाभावात्; अपि तु स्वधर्मे प्रकाशकत्वे उपचार इति भावः। मुख्यतैवास्त्वित्यत्राह—चक्षुरसहकारिणीति। आदित्यादितेजसीत्यर्थः।

ननु स्वेन रूपेण-स्वात्मना अभिनिष्पद्यते-प्रकाशते इति श्रुतिबलात् स्वप्रकाशत्वसिद्धिरित्यत्राह—स्वेनेति। स्वेन रूपेण-स्वरूपेण-अनौपाधिकस्वरूपवत्तयेत्यर्थः। स्वयंप्रकाशशब्दः तत्र तत्रात्मनि कथं प्रयुज्यते इत्यत्राह—तावतैवेति। स्वधर्मेण प्रकाश एव स्वयं प्रकाश इत्यर्थः। स्वेन सिध्यत्येवेति एवकारोऽत्र भिन्नक्रम इत्याह—एवकारोऽत्रेति। स्वरूपमात्रप्रकाशे मायिमतप्रसङ्ग इत्याह;—

यद्यहन्त्वादिरहितः इति। अहमित्येव प्रकाशोऽत्र विवक्षितः स तु सधर्मप्रकाश इत्याह—अहमर्थं आत्मेति। प्रतिज्ञात इति स्वप्रकाशत्व इत्यर्थः। ज्ञानत्व वादिन इति - ज्ञानस्य स्वप्रकाशत्वादिति भावः।

ननु 'सत्यं ज्ञानम्' इति अन्तोदात्तबलात् युजन्तत्वं अर्शआद्यजन्तत्वं वा वाच्यम्। तथाच ज्ञानत्वस्य तदाश्रयत्वस्य वा सिद्धिः। तथा 'विज्ञानमयः' इत्यत्र रसघनदृष्टान्तस्वारस्यात् ज्ञानव्याप्तिः प्रतीयते। 'विज्ञानं यज्ञं तनुते' इत्यादिषु तद्गुणसारत्वादिति सूत्रोक्तगतिरिति न कुत्रापि ज्ञानत्वाभिधानमिति चेत्? अत्रोक्तमाचार्यैः;—'एष हि द्रष्टा श्रोता रसयिता मन्ताबोद्धा कर्ता विज्ञानात्मा पुरुषः' इत्यत्र विज्ञानात्मशब्दस्वारस्यात् विशेषतस्सामान्यतश्च प्रपञ्चितस्य ज्ञातृत्वस्य पुनर्वचने प्रयोजनाभावात् ज्ञानस्वरूपत्वे सिद्धे 'विज्ञानं यज्ञं तनुते' इत्यादावपि सूत्रोक्तैव गतिरिति। 'प्राणेषु हृद्यन्तर्ज्योतिः' इति न ज्ञानवचनो नापि स्वप्रकाशवचनः। उपचारे च अन्यनिरपेक्षप्रकाशकत्वं स्वेन प्रकाशत्वं वोपचारनिमित्तमित्यत्र न नियामकम्। स्वधर्मेणान्यप्रकाशकत्वस्योपचारनिमित्तस्य विद्यमानत्वादिति शङ्कते—स्वधर्मेणेति। स्वधर्मनिरपेक्षप्रकाशत्वस्य लाघवेन शीघ्रोपस्थितिकत्वात् तदेव निमित्तमित्याह—बाह्यज्योतिषीति। ननु तर्हि ततोऽपि लाघवात् स्वधर्मेण प्रकाशमानत्वमेव निमित्तं स्यादिति शङ्कते—स्वधर्मेणेति। बाह्येति—बाह्यज्योतिषः स्वेनैव प्रकाशमानत्वेन स्वधर्मेण प्रकाशमानत्वाभावाच्च। विद्यमाना प्रभा न स्वधर्मेण प्रकाशते प्रभायाः प्रभान्तराभावात्। नापि दीपः तन्निरपेक्षत्वात्। तथाच स्वेन प्रकाशमानत्वमेव लघ्विति भावः। स्वधर्मेण प्रकाशमानत्वं न निमित्तमित्यत्र युक्त्यन्तरमाह—स्वधर्मत इति।

ननु 'विज्ञानमय' इत्यस्य प्रचुरविज्ञान इत्यर्थतया तेन ज्ञानवत्त्वलाभेऽपि तज्ज्ञानेन प्रकाश्यत्वं 'हृद्यन्तर्ज्योतिः' इति विवक्षितमितिचेत् मैवम्; तेनैव प्रकाश्यत्वस्यापि तत एव लाभात्। तर्हि 'हृद्यन्तर्ज्योतिः' इत्यस्यार्थो 'विज्ञानमय' इत्यनेन व्याख्यायत इत्यत्राह—उपचारेति। तदा वैयर्थ्यमिति भावः॥

ननु स्वयंप्रकाशस्य सर्वदा सत्त्वे सर्वदा प्रकाशप्रसङ्गात् कदाचित्प्रकाशे स्वयंप्रकाशत्वबाध इति बलादपि पदद्वयस्य एकार्थत्वं वाच्यमिति शङ्कते;—स्वयं प्रकाशत्वे इति। ननु स्वयंप्रकाशत्वे स्वापकालेऽपि प्रकाशे आपादिते स्वापानन्तरप्रत्यभिज्ञाया इष्टापादनमयुक्तं इत्यत्राह—अयं भाव इति। प्रत्यभिज्ञायास्सुषुप्तिकालेऽपि प्रकाशेन भाव्यम्। अन्यथा सुखमहमस्वाप्समिति स्वापकालीनपरामर्शायोगात्। नचायमानुमानिकः स्मृतिरूपत्वात्। प्रत्यभिज्ञाबलात् स्मृतिबलादित्यर्थः। ननु बहिरर्थग्रहणे चेतसः स्वातन्त्र्याभावेऽपि आन्तरग्रहणे स्वातन्त्र्यमस्त्विति शङ्कायामाह; अयं भाव इति। तदुपहितं—अनुमानाद्युपहितम्। [1]जनितं वा। ननु तद-

१ जनितं ज्ञानं संस्कारं वा—ग।

भावेऽपि मनोवृत्तिरस्तु मनसः करणत्वात् 'मनसा तु विशुद्धेन' 'दृश्यते त्वग्र्यया बुद्ध्या' इत्यादिना करणत्वाभ्युपगमात्। नाहमीश्वर इत्यादिबुद्धीनां मनःकरणत्वाच्चेति चेत्; तत्राह—स्वापे त्विति ॥

ननु सुषुप्तिकाले मनोवृत्तिर्यदि न स्यात् तदा स्वरूपज्ञानस्य [1]सूक्ष्मरूपसंस्कारत्वानुपपत्तेः नैयायिकव[2]दात्मधर्मान्तराभावान्न परामर्शस्स्यादिति चेत्[3]; अत्र केचित्—स्वरूपज्ञानेन धर्मभूतज्ञानस्य सूक्ष्मरूपो विकारस्संस्कारो नाम जायत इत्याहुः ॥

अपरे तु सुषुप्तिर्हि ज्ञानाभावरूपो धर्मभूतज्ञानस्यात्मस्वरूपमात्रगोचरोऽवस्थाविशेषः। स चात्मरूपानुकूलवस्तुगोचरतयाऽनुकूलसुखरूपत्वात् सुषुप्तेरेव सुखमहमस्वाप्समिति परामर्शश्चोपपन्न इति वदन्ति। स्वविषयधिषणानिर्व्यपेक्षस्वसिद्धिरिनिमूलस्य स्वव्यतिरिक्तज्ञाननिरपेक्षप्रकाश इत्यर्थः ॥ ६ ॥

अक्ष०—अथ देहाद्यतिरिक्तस्यात्मनः स्वयं प्रकाशत्वं साधयति आत्मेति। आत्मा स्वेनैव—स्वेतरज्ञानापेक्षानियमं विनापि अहमित्यहन्त्वेन सिद्ध्यति—भासत इत्यर्थः। तत्र प्रमाणमुच्यते निगमैरिति। स्वयं ज्योतिरन्तर्ज्योतिरात्मज्योतिः विज्ञानात्मा इत्यादिनिगमा एव प्रमाणं ज्योतिःपदस्य प्रकाशकार्थकत्वादिति भावः। एतेन सदा धर्मभूतज्ञानेनैव भातीति क्लृप्ते नावकाश इति सूचितम्। धर्मभूतज्ञाननिरपेक्षमात्मनो भानाङ्गीकारे सुषुप्तावपि तद्भानं स्यादिति प्रसङ्गस्त्विष्ट एवेति भावेनाहुः स्वसिद्धौ—अहंत्वानुकूलत्वादिविशिष्टस्वसिद्धौ सत्यामेव जागरारम्भे सुखमहमस्वाप्समिति प्रत्यभिज्ञा उपपद्येत अन्यथा नोपपन्ना स्यादिति भावः। स्वापकाले सुखरूपात्मानुभवाभावे संस्कारायोगात् जागरे सुखमहमस्वाप्समिति स्वापकालीनाहमर्थसुखस्य प्रत्यवमर्शो न संभवितुमर्हतीति भावः। स्वापकाले मनसैव भानं स्यादित्यत्राह—चेतश्चेति। मनश्च बाह्येन्द्रियानुमानागमादीनि तज्जन्यानि वाऽन्यानि कानिचिदुपधायैव ज्ञानेषु प्रभवति न तु निरपेक्षमिति भावः। स्वापकाले तादृशस्य सहकारिणः कस्याप्यभावात् न मनो गृह्णाति किन्तु स्वयमेवात्मा गृह्यत इति भावः। अत्र (सिद्धान्त) वेदान्तरीत्या अनुमानमपि वक्तुं शक्यमित्याह किंच वेदान्तेति। ज्ञानस्य स्वयं प्रकाशत्वाभ्युपगमेनेत्यर्थः एष आत्मा स्वयं प्रकाशः स्वविषयकज्ञानान्तरनिरपेक्ष स्वप्रकाशः ज्ञानत्वात् धर्मभूतज्ञानवत् इति प्रयोगसंभवादिति भावः ॥ ६ ॥

इत्यात्मनः स्वयंप्रकाशत्वम्

---

१. सूक्ष्मरूपस्संस्कारस्य अवस्थारूप-ग। २. वत्तज्जन्यधर्मा-क।
३. स्वरूपज्ञानेन धर्मभूतज्ञानस्य सूक्ष्मावस्थारूपसंस्कारोत्पत्त्यङ्गीकारात्-ग।

प्रत्यक्त्वं पुंसि केचित् स्वविषयधिषणाधारतामात्रमाहुः

स्वस्मै स्वेनैव भानं तदिति समुचितं तत्स्वतस्सिद्धिसिद्धेः ।
प्रत्यङ् स्वापेक्षयाऽसौ त्वमयमिति मितः स्वेतरैः स्वस्य बुद्धया
भातं नित्यं परस्मै जडमजडमपि स्यात्परागर्थ एव ।। ७ ।।

सर्वा—०*कश्चिद्धीरः प्रत्यगात्मानमैक्षत् इत्यादावात्मनः प्रत्यक्त्वं गम्यते । तत्किमिति विमर्शे प्रत्येतुः प्रत्येतव्यादव्यतिरेक इति कैश्चिदुक्तं तावदाह–प्रत्यक्त्वमिति । स्वप्रकाशपक्षे तु प्रत्यक्त्वद्वैविध्यमाह–स्वस्मा इति । यदि प्रत्यक्त्वमात्मनः स्वभावः, तदा परेणापि गृह्यमाणोऽहमिति गृह्येतेत्यत्राह—प्रत्यङ्ङिति । स्वेतरबुद्धया गृह्यमाणत्वं न स्वस्मै भासमानत्वम् । अतस्तद्बुध्या गृह्यमाण आभिमुख्ये त्वमिति, अन्यदा अयमिति च गृह्येत । स्वापेक्षया तु स्वबुद्धया स्वरूपेण वा भासमानतया प्रत्यङ्ङित्युच्यते । तेन रूपेणाहमर्थं इति दृशा अहंत्वं च सर्वात्मानुवृत्तम् । त्वंभावादिना तु न तस्य बाधः । तर्हि तत्र पराक्छब्दोऽपि किं न प्रवर्तेत इत्यत्राह—भातमिति । जडमजडं वा यन्नित्यं परस्मै भासते तत्परागर्थं एव । न तस्य स्वस्मै भासमानत्वप्रसङ्गः । व्यपदेशनियमश्च तत एवेति ।। ७ ।।

आनन्द०—प्रत्यक्त्वद्वैविध्यमिति—स्वस्मै भासमानत्वमेकं स्वेनैव स्वस्मै भासमानत्वमपरम् इति विशिष्टाविशिष्टभेदेन भिदा ।।

केचित्तु स्वस्मै भासमानत्वं स्वेनैव भासमानत्वं चेति वदन्ति । तत्पक्षे धर्मभूतज्ञानादावपि प्रत्यक्त्वमस्ति[१] । न चैवमहमिति प्रकाशप्रसङ्गः ! तत्रात्मत्वाभावात् तत्सहितस्यैवाहंप्रत्ययविषयत्वादिति केचित् ।।

अपरे तु अहमिति भासत एव; सौभर्यादौ तत्तच्छरीरावच्छेदेनाहमितिभासमानस्य ज्ञानत्वात् । आत्मनस्सर्वशरीरेऽप्यभावात् । न चाहंप्रत्ययाभावश्शरीरान्तरे इति समस्ति ! इति वदन्ति ।।

ननु यत्किञ्चिदस्तु प्रत्यक्त्वम् ! इदं च सर्वात्मानुवृत्तमिति स्वस्मिन् प्रत्यगितिव्यवहारवत् परस्मिन्नपि दर्शनात् । तथाच देवदत्तस्य स्वस्मिन्निव यज्ञदत्तेऽप्यहमिति व्यवहारस्स्यात् अविशेषात् इति चेत्; अत्रोक्तमस्मदाचार्यैः—यद्यपि सर्वेषां प्रत्यक्त्वमस्त्येव; तथापि स्वस्य सर्वगतत्वात् साधारण्येऽपि 'स्वेनेदं भासते कृतम्' इत्यादौ यथा प्रतियोगिनियतव्यवहारः तथा स्वस्मै भासमानत्वादेरपि प्रत्यक्षतया[२] भान एव तथा व्यवहारः ।।

---

१. मत्रात्मत्वं नास्तीति द्रष्टव्यम् ।

२. ननु स्वापेक्षया स्वबुध्या स्वेनवा गृह्यमाणत्वं प्रत्यक्त्वमस्तु इदं च सर्वात्मानुवृत्तमिति स्वस्मिन् प्रत्यक्त्वव्यवहारवद्यज्ञदत्तेऽपि व्यवहारदर्शनात् तथाहमिति व्यवहारस्स्यादिति चेत्–ग ।

किञ्च[1] [2]आत्मशब्दपर्यायो नास्मच्छब्दः। अन्यथा देवदत्त आत्मेतिवत् अहमिति व्यवहारप्रसङ्गः। न चास्ति देवदत्त एवाहं तदीयमेव मदीयमिति! तस्याचेतनसाधारण्येन स्वस्मिन्नध्यासरूपत्वात्। अन्यथा देवदत्ते गच्छति यज्ञदत्तस्याहं गच्छामीति प्रयोगप्रसङ्गात्। तथाच यदेवास्मच्छब्दप्रवृत्तिनिमित्तम् तदेव प्रत्यक्त्वम्। तच्च साधारणमपि साक्षात्कृतमेव प्रवृत्तिनिमित्तमिति यदा यस्मिन् प्रवृत्तिनिमित्तं तदा तस्मिन् प्रयोग इति नातिप्रसङ्गः तथाचायं निर्गलितार्थः—अपरोक्षताविशिष्टं स्वस्मै स्वयं भासमानत्वादिकं प्रवृत्तिनिमित्तमहंप्रयोगस्येति ॥

ननु अपरोक्षता प्रयोक्तृसंबन्धिनि वाच्या; अन्यथा सर्वत्रापि तत्तदपरोक्षत्वात् प्रत्यक्त्वस्य; एवं चैतादृशापरोक्षताविशिष्टमात्मत्वमेवाहंप्रयोगनिमित्तमस्त्वितिचेत्; अत्राप्याहुः—आत्मत्वं नाम ज्ञातृत्वं विवक्षितम् ततोऽन्यद्वा ? नाद्यः सुषुप्तिकाले ज्ञातृत्वाभावेन अहन्त्वाभावे तात्कालिकतया तथा परामर्शाभावापत्तेः; द्वितीयं चेत् अस्मदुक्तमेवेति। स्वेतरेति—प्रवृत्तिनिमित्ताभावान्नाहंशब्दप्रयोग इति भावः। अत इति—इदन्त्वमेवाभिमुख्यविशिष्टं युष्मच्छब्दप्रवृत्तिनिमित्तमिति तेन तथा व्यवहार इति भावः। तथा च स्वगतमेवेदन्त्वं स्वेन गृह्यमाणमहन्त्वं आभिमुख्येन गृह्यमाणं त्वन्त्वमिति वदन्ति ॥

[3]अन्ये तु अयमहमिति भेदेन ग्रहणादाभिमुख्यादिविशिष्टं त्वंशब्दप्रवृत्तिनिमित्तं स्वस्मै भासमानत्वमात्रं अहंपदप्रवृत्तिनिमित्तमिति मन्यन्ते। तद्बुद्ध्या—अन्यदीयबुद्ध्या [4]गृह्यमाणः पुरुषः प्रत्यक्त्वेन न भासत इत्यर्थः। यद्वा तद्बुद्ध्या—स्वस्मै भासमानत्वविषयिण्या [5]बुद्ध्या। त्वमिति प्रत्यक्त्वरूपं स्वस्मै भासमानत्वं विशिष्ट एव गृह्यते। अन्यदा—स्वस्मै भासमानत्वग्रहणाभावकाले। स्वापेक्षया त्विति—सर्वदा प्रत्यक्त्वस्य भासमानत्वादहमिति व्यवह्रियत इति भावः। तेन रूपेण—स्वसाक्षात्कृतस्वस्मैभासमानत्वेन। अहमर्थः अहंपदवाच्यः ॥

नन्वहन्त्वंपदयोर्न पर्यायत्वम् नियतप्रयोगवत्त्वात् तथाच त्वंपदविषयस्याहंपदप्रवृत्तिनिमित्ताभावात् कथं सर्वात्मसाधारण्यमित्यत आह—त्वंभावेति। प्रत्यक्त्वमेवाभिमुख्यादिविशेषितं प्रवृत्तनिमित्तमिति न दोष इत्यर्थः ॥

१. भासमान एव-ग।
२. आत्मच्छब्दः प्रत्यक्षशब्दो वा नास्मच्छब्दपर्यायः—ग। अन्यथा देवदत्त आत्मेतिवदहमिति व्यवहारप्रसङ्गः न चास्ति देवदत्त एवाहं तदीयमेव मदीयमितिवाच्यम्; तस्याचेतनसाधारण्येन स्वस्मिन्नध्यासरूपत्वात्। अन्यथा देवदत्ते गच्छति यज्ञदत्तस्याहंगच्छामीति प्रयोगप्रसङ्गात्—क, ख।
३. तथा सति अयमहमिति भेदेन ग्रहो न स्यात्। तस्मादाभिमुख्यादिविशिष्टं त्वंशब्द—क, ख, ग, घ।
४. ऊह्यमानः—ग।
५. अन्यदाऽयमिति च—मु, पु।

यद्वा त्वंपदप्रयोगेण तत्पदप्रवृत्तिनिमित्तमवगम्यते। न तेन प्रत्यक्त्वस्य बाधः विरोधाभावात्। नचैवं त्वमहमिति व्यतिकरप्रसङ्गः! प्रयोगस्यान्यतोऽवगतत्वादिति। ,ननु विरोधाभावे पराक्त्वमपि स्यादिति शङ्कते—तर्हि तत्रेति। ननु तर्हि सर्वस्यापि पराक्त्वात् परागिति व्यवस्थितव्यपदेशो न स्यादित्यत्राह—व्यपदेशनियमश्चेति। प्रत्यक्त्वविधुराणां[1] पराचां पराक्त्वेनैव व्यपदेशः प्रमेयत्वेन यथा प्रमाणताविधुराणामेव व्यपदेशः इति॥ ७॥

अक्ष०—"कश्चित् धीरः प्रत्यगात्मानमैक्षत्' इत्यादावात्मन उक्तं प्रत्यक्त्वं किंरूपमित्यत्राह—प्रत्यक्त्वमिति। पुंसि आत्मनि केचित् उदयनाचार्याः। स्वविषयेति—स्वविषयकज्ञानाश्रयत्वमात्रमित्यर्थः। आहुरिति प्रत्येतुः प्रत्येतव्यादव्यतिरेक" इति आत्मतत्त्वविवेक इति शेषः। ज्ञानाश्रयस्य ज्ञानविषयस्य च भेदाभावे कथिते स्वविषयकज्ञानाश्रयत्वमेव कथितं भवतीति भावः। मात्रपदेन वक्ष्यमाण-? द्वैविध्यव्यवच्छेदः तन्मते जडत्वादात्मनः। स्वयंप्रकाशत्वपक्षे तु प्रत्यक्त्वं द्विविधमित्याह—स्वस्मैस्वेनैवेति। स्वस्मै भासमानत्वं स्वेनैव भासमानत्वमिति द्विविधं प्रत्यक्त्वमिति वक्तुमुचितमित्यर्थः। कुत इत्यत्राह तदिति। आत्मनः स्वयंप्रकाशत्वसाधनादित्यर्थः। तार्किकमते आत्मनां जडत्वेन स्वेनैव भानासम्भवेऽपि स्वयं प्रकाशत्वमते परागर्थव्यावृत्तस्य तस्य सम्भवादिति तस्य भावः। धर्मभूत ज्ञानव्यावृत्त्यर्थं स्वेनैवेत्यवधारणं स्वेतरानधीनेत्यर्थकं धर्मभूतज्ञानस्य स्वयं प्रकशात्वमपि धर्म्यधीनमेव तथाच भगवता भाषितं[2] अहमर्थं एवात्मा ज्ञानस्यापि प्रकाशता तत्सम्बन्धायत्ता, तत्कृतमेव हि ज्ञानस्य सुखादेरिं व स्वाश्रयं-(चेतनं) प्रति प्रकटत्वं इतरं प्रत्यप्रकटत्वं च' इति। एवं अहं जानामीत्यादावहमर्थः घटाद्यवभास इव स्वावभासेऽपि प्रतिसम्बन्धितया अञ्चति भासत इति व्युत्पत्त्या परागर्थवैपरीत्येन स्वेतरनिरपेक्षमेव स्वभानात् प्रतीपमञ्चतीति व्युत्पत्त्या वा प्रत्यक्छब्दस्याहमर्थे आत्मनि प्रवृत्तिनिमित्तं दर्शितं, उक्तविधं प्रत्यक्त्वं अहमित्यहंत्वेन आत्मनो भाने भासत एवेति भावः। यथोक्तं—[3]अहंबुद्धया परागर्थात् प्रत्यगर्थो हि भिद्यत इति। उक्तप्रत्यक्त्वस्य सर्वात्म साधारणत्वात् परात्माऽपि अहमिति स्वस्य प्रतीयेतेत्यत्राह—प्रत्यगिति। अहमिति प्रतीयत इत्यर्थः। स्वापेक्षयेति—स्वशब्दस्तद्व्यक्तिपरः। असावात्मा तत्तदात्मन एव प्रत्यक्त्वेन भासत इति अहमिति प्रतीतो भवति स्वेतरैस्तु स्वस्वबुद्धया,—तत्तद्धर्मभूतज्ञानेन। त्वमयमिति—अभिमुखे त्वमिति अनभिमुखे अयमिति मितो भवतीति भावः। तर्हि तत्र पराकृशब्दो घटादाविव कुतो न प्रवर्तत इत्यत्राह नित्यमिति। नियमेन परस्मै भातं यत् घटादिवत् जडं धर्मभूतज्ञानादिवदजडं वा तदेव परागर्थं इति नियमेन व्यपदिश्यते। स्वस्मै

---

१. णां पराक्त्वेनैव—क।

२. श्रीभाष्ये जि. अ. पृ० १५६, ३. श्रीभाष्ये जि० अ० पृ० १५६;

भासमानत्वाभावे सति परस्मै भासमानत्वमेव पराक्छब्दव्यपदेशनिबन्धनमिति भावः ।

अत्रेद मवधेयम्—स्वस्मै भासमानत्वरूपं स्वप्रकाशफलित्वं अन्यानधीन प्रकाशवत्वं वा अहंत्वविवरणमेवेति अहंत्वमेव सर्वत्रात्मप्रकाशे भासते । यत्र अहं प्रत्यगितिप्रतीति स्तत्राहमर्थो धर्मिमात्रं, तच्चाहंत्वमात्मप्रकाशेनैव भासत इति केचिदाचार्याः । स्वस्यैवात्मा तु सिद्धि मित्यत्र स्वपदस्य विशिष्टपरतया सर्वार्थसिद्धौ व्याख्यातत्वात् ।

अन्ये तु प्रत्यक्त्वाद्यपि स्वयंप्रकाशमेव । धर्मभूतज्ञानस्य स्वयं प्रकाशस्याप्यात्मनि अहं जानामीत्यत्र विशेषणत्वेन भानवत् प्रत्यक्त्वादीना मपि आत्मनि विशेषणतयैव स्वयं प्रकाशत्वं न तु तेन रूपेण सर्वत्राहमर्थो भासते किन्तु अहन्त्वेन सामान्यरूपेणैव "स्वमात्रप्रकाशस्याप्यहमर्थस्वरूपस्यास्माभिः प्रत्यक्त्वानन्दत्वादि विशेषवत्तयैव स्वतः प्रकाशत्वाभ्युपगमेन" इत्यादिना ग्रन्थेन शतदूषण्यां संविदनुत्पत्तिदूषणभङ्गवादे आत्मनः स्वमात्र प्रकाशत्वमभ्युपगम्य प्रत्यक्त्वादिविशेषवत्तया प्रतीतेरुक्तत्वात् प्रत्यक्त्वादीनां भासकान्तराभावेन स्वयं प्रकाशत्वाभ्युपगमावश्यंभावादित्याचक्षते । अतश्च प्रत्यक्त्वस्य प्रकाशविषये मतभेदो वर्तत इत्यवगम्यते ॥ ७ ॥

इति प्रत्यक्त्वादिप्रकारः

बोद्धा कर्ता च भोक्ता दृढमवगमितः प्रत्यगर्थः प्रमाणैः
कर्तृत्वाभाववादे स्वयमिह भगवानान्यपर्यं त्वगायत् ।
कर्ता शास्त्रार्थवत्त्वात्कृतिषु च स पराधीन आभाषि सूत्रै-
श्चित्रैः कर्मप्रवाहैर्यतनविषमता सर्वतन्त्राविगीता ॥ ८ ॥

सर्वा०—अत्र केचिदाहुः—ज्ञातृत्वादिकमन्तःकरणस्यैव; आत्मनस्तु साक्षितामात्रम् । यद्वा प्रकृतेः कर्तृत्वम्, आत्मनो भोक्तृत्वमात्रम्; गीतं चैतत् *कार्यकारण इत्यादिनेति । तान्प्रत्याह—बोद्धेति ॥ त्रिभिरपि प्रमाणैर्ज्ञातृत्वादिप्रकारत्रयवानात्मा निस्संशयं बोधितः; अतो न तत्रैकमपि निह्नोतुं शक्यम्, किं पुनस्त्रितयम् । कुतर्कैस्तु किं नाम दुरपलपमिति भावः । शास्त्रैरात्मनः कर्तृत्वनिषेधे का गतिरित्यत्राह—कर्तृत्वेति । स्वयमिति—कर्तृत्वनिषेधक एव स्ववाक्यतात्पर्यमाहेति भावः । भगवानित्याप्ततमत्वव्यञ्जनम् । अगायत्—*पञ्चैतानीत्यारभ्य, *न स पश्यति दुर्मतिरित्यन्तेनेति शेषः । शारीरके च कर्तृत्वं प्रसाध्य तस्य पराधीनतामात्रं स्थापितमित्यत्राह—कर्तेति । यदि कर्तृत्वमात्मधर्मः, स चेत्पराधीनः, तस्य तर्ह्यात्मत्ववदेकरूपः किं न स्यादित्यात्राह—चित्रैरिति । नात्र केनापि चोदनीयमिति भावः ॥ ८ ॥

आनन्द० ननु भोक्तृत्वादिविशिष्ट आत्मा; अतोऽस्ति धीतो भेद इति साधितम्। तन्न युज्यते इत्याक्षेपसंगतिमाह—अत्र केचिदित्यादिना। ज्ञातृत्वादिकमिति—मिथ्यावादिनो मतम्। 'पुरुषोऽस्ति भोक्तृभावात्' प्रकृतिगतभोक्तृत्वादि चिच्छायापत्त्या आत्मनि भासते इति सांख्यसप्ततिटीकाद्युक्तं सांख्यमतमाह—यद्वेति। त्रिभिरपीति—अहं जानामि अहं भुञ्जे अहं करोमीति प्रत्यक्षेण; आत्मा ज्ञातृत्वादिमान् तद्वत्तया अबाधितोपलम्भविषयत्वात् इत्याद्यनुमानेन; 'स्वर्गकामो यजेत' इत्यादिश्रुत्या चेत्यर्थः। न तत्रैकमपीति—ज्ञातृत्वादिषु न किंचिदपीत्यर्थः। प्रत्यक्षादिष्वेकमपीत्याहुः नन्ववाधितैरेव प्रत्यक्षादिभिरर्थसिद्धिर्वाच्या; अन्यथा शङ्खपीतिमभ्रमेणापि तत्वप्रसङ्गात्; तथाच तर्कवाधितत्वान्नैतत्सिद्धिरित्यत्राह—कुतर्कैस्त्विति। तर्काभासानां सर्वत्र सुलभत्वा[1]त्तैरेव तद्बाध इति भावः। ननु कठवल्ल्याम्—जीवस्य 'न जायते म्रियते' इत्यादिना जन्मजरामरणादिकं प्रतिषिध्य हननादिक्रियासु कर्तृत्वमपि प्रतिषिध्यते—

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥

इति। तेन सामान्यतः कर्तृत्वाभावस्सिद्धः। तथा च गीतायाम्—

प्रकृतेःक्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥

नान्यं गुणेभ्यःकर्तारं यदा द्रष्टाऽनुपश्यति।
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते॥

पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते।

इत्यनेन पुरुषस्य भोक्तृत्वमेव प्रकृतेः कर्तृत्वमेवेति प्रतिपादनात्तद्विरोधः इत्याशङ्क्य गीतायामेव—

पञ्चैतानि महाबाहो कारणानि निबोध मे।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥

तत्रैवं सति कर्तारमात्मानं केवलं च यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥

---

१. I त्वात्तादृशैरेव बाधकत्वेनोपन्यस्ततर्काणां बाधः—ग, II त्वात्तैरेव तर्कैर्बाध—घ।

इति सांसारिककर्तृत्वस्य प्रकृत्याद्यनुबन्धिनः केवलात्मानुबन्धित्वाभावात् तथा पश्यतो भ्रान्तत्वोक्त्या कर्तृत्वनिषेधस्य केवलात्मानुबन्धित्वनिषेधपरत्वाभिप्रायस्य स्फुटमवगमात् न दोष इत्याह[१]—शास्त्रैरित्यादिना ।

एवमनभ्युपगमे शारीरकशास्त्रेण विरोधोऽपीत्याह—**शारीरके चेति ।** 'कर्ता शास्त्रार्थवत्त्वात्' इत्यनेनेति शेषः ।

ननु 'परात्तुतच्छ्रुतेः' इति सूत्रे पराधीनत्वप्रतिपादनात् [२]अचेतनवदकर्तृत्वमित्यत्राह ;—**तस्य पराधीनतामात्रमिति ।** ननु 'स्वतन्त्रः कर्ता' इत्युक्तेः कर्तृत्वं पराधीनत्वं च विरुद्धमितिचेन्न ; [३]राजभृत्यादीनामपि लोके[४] तत्तद्व्यापारे कर्तृत्वदर्शनात् । 'तत्प्रयोजको हेतुश्च' इति, कर्तुरेव प्रयोज्यत्वोक्तेश्च । पराधीनत्वं च परस्य निवर्तनेच्छायां कर्तृत्वस्य निवृत्तेरितिध्येयम् । **स चेश्वराधीन इति—** स्वाधीनत्वे [५]स्वेच्छानुरोधेन वैषम्यं शङ्क्यं [६]ईश्वराधीनत्वे तस्य समतया वैषम्यं न स्यादिति शङ्कते ;—तर्हीति ॥ ८ ॥

अक्ष०—ये पुनः अन्तःकरणस्यैव ज्ञातृत्वं आत्मनस्साक्षित्वमेवेत्याहुः । ये वा प्रकृतेरेव कर्तृत्वं आत्मनां तु भोक्तृत्वमेवेति वदन्ति तानुभयान् प्रत्याह—**बोद्धेति ।** ज्ञातृत्वादिविशिष्ट एव प्रत्यगात्मा प्रत्यक्षादिप्रमाणैस्त्रिभिरपि निस्संशयं प्रतिबोधित इत्यर्थः । अहं जानामि करोमीत्यादि प्रत्यक्षादिना ज्ञानकर्तृत्वादिमत्तया अहमर्थात्मन एव प्रत्यायनादिति भावः । तर्हि—

"प्रकृतेः क्रियमाणानि गुणैः कर्माणिसर्वशः ।
'अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते' ॥

इति कर्तृत्वाभाववचनं कथं संगच्छत इत्यत्राह—**कर्तृत्वाभावेति ।** तद्वाक्यस्यार्थान्तरतात्पर्यं वक्ता भगवानेव स्वयमन्ते गीतायामुक्तवानित्यर्थः । "अधिष्ठानंतया कर्ता' इत्यारभ्य पञ्चैते तस्य हेतवः ।

'तत्रैवं सति कर्तार मात्मान केवलं तु यः ।
पश्यत्यकृतबुद्धित्वात् न स पश्यतिदुर्मतिः ॥

रित्यन्तेन निरपेक्षकर्तृत्वनिरास एव तात्पर्यावगाहनादिति भावः ॥

---

१. (ननु कठवल्ल्यामित्यादेरेतदन्तस्य स्थाने)—ननु गीताशास्त्रे कर्तृत्वनिषेधः कथमित्याशङ्क्य तस्मिन्नेव शास्त्रे निषेधशास्त्रस्य संसारदशायां तत्करणकलेवरात्मकप्रकृतिविकाराधीनं अन्यतः प्रकृतिसंबन्धवशात् सङ्कुचितमित्येवंपरतया प्रतिपादितत्वान्न दोष इत्याह—शास्त्रैरित्यादिना इति पाठः–ग, घ. ङ. पुस्तकेषु ।

२. अचेतनवत्कर्तृत्वं–क, ख,
३. त्यादेरपि–ग, क ।
४. लोके कर्तृत्वदर्शनात्–क,
५. स्वेच्छानुरोधि–ग, घ, ङ ।
६. ईश्वरस्य वैषम्याद्यभावा त्तदधीनस्य न तारतम्यं युक्तमिति भावः–ग, घ, ङ ।

शारीरके च आत्मनो विधिनिषेधशास्त्रसार्थक्याय कर्तृत्वं तस्य चेश्वराधीनत्वं च सूत्रकृतैव समर्थितमित्याह--कर्तेति । पुरुषस्य कर्तृत्वाभावे तत्प्रवर्तनाय प्रवृत्तं शास्त्रं विफलमेव स्यादिति भावः । स्वतन्त्रकर्तृत्वं तु नास्तीत्याह—कृतिष्विति । 'परात्तु तच्छ्रुतेरिति' पराधीनकर्तृत्वमेवोक्तमिति भावः । एतेन गीताशारीरकयोरैकण्ठ्यं दर्शितम् । सर्वात्मनामीश्वराधीनकर्तृत्वे कथं प्रवृत्तिभेद इत्यत्राह—चित्रैरिति । जीवकर्मणामपि तद्धेतुत्वात् तद्वैचित्र्येण प्रवृत्तिवैषम्यमिति भावः । एवमेव सर्वैरपि वक्तव्यमित्याह—सर्वेति ।। ८ ।।

इत्यात्मनः कर्तृत्वादि

यद्भव्यं तन्न न स्याद्यदभवितृ न तद्यत्नकोट्यापि सिद्ध्येद्
द्वेधाऽपि व्यर्थयत्ना नर इति यदि न स्वोक्तियत्नादिबाधात् ।।
यद्यत्नेनैव भव्यं भवति यतनतस्तत्स्वहेतूपनीता-
द्दुस्साधा यत्नलभ्ये प्रति यदि यतते तत्र नैष्फल्यमिष्टम् ।।९।।

सर्वा०—अथ *यदभावि न तद्भावि यद्भावि न तदन्यथा, इति मन्यमानैरुक्तं यत्ननैष्फल्यम् । तदिदमनूद्य परिहरति—यद्भव्यमिति ।। नर इति बहुवचनम् । हेतुमाह—स्वोक्तीति । सर्वयत्ननैष्फल्यं वदन्किमिति साफल्यवादिनं क्षेप्तुमीहते ? नैष्फल्यवाक्यं च किमर्थं प्रयुङ्क्ते ? किमर्थं च स्वयं भीतो बुभुक्षुर्वा धावति ? अतोऽन्वयव्यतिरेकाद्यवसितं यत्नफलमप्रणोद्यम् । आदिशब्देन प्रमाणत्रयसंग्रहः । बाधं सिद्धसाध्यतां च वक्तुं सफलनिष्फलयत्नौ विभजते—यद्यत्नेनेति । यतनमयत्नतस्सिद्धमिति शङ्कां परिहर्तुं स्वहेतूपनीतादित्युक्तम् । प्राचीनयत्नजनितादृष्टतो हि तत्सिद्धेरिति भावः । दुस्साधेत्यादिना दुष्कर्ममूलनिष्फलयत्नानुवादः । तत्र नैष्फल्यमिष्टं तस्मिन्नंशे नैष्फल्यं त्वया न साध्यम्, साध्यमपि तद्विषयमिति भावः ।। ९ ।।

आनन्द०—जीवस्वरूपादिनिरूपणस्योपासनार्थतया तस्याश्च मोक्षार्थत्वात् मोक्षस्यायत्नसिद्धत्वे [1]तन्निरूपणमसंगतमित्याशङ्कापरिहारार्थत्वेनोपोद्घातसंगत्या यत्नसाफ[2]ल्यमाह—'अथ यदभावीति । व्यर्थयत्ना नर' इत्येकवचनबहुवचनयोः कथं सामाधिकरण्यमित्यत्राह ;—नर इति । फलशब्देन साध्यमात्रं विवक्षितं उत पुरुषार्थः ? नाद्य इत्याह साफल्यवादिनामिति । ईहाया यत्नस्य [3]क्षेपे करणत्वाभावात् । न द्वितीय इत्याह—नैष्फल्यवाक्यं चेति । [4]उन्मत्तस्य तथा प्रवृ[5]त्त्ययोगादिति भावः । किंच यत्नस्य कारणत्वाभावे समीहितसाधनत्वा[6] भावात्

---

१. णस्यप्रयोजनाभाव इत्याशङ्क्य तत्प–ग । २. ल्यमि त्याह–ग, ल्यमाहेत्याह ।
३. क्षेपे कारण–ग, II क्षेपकारण–क, I ४. उन्मत्तादन्यस्य–ग ।
५. त्तियोगा–ख ६. त्वाभावे वा–ग, घ ।

धावनादियत्नेन धावनादेरनुत्पत्तेः अहेतुकोत्पत्त्यादिप्रसङ्ग इत्याह—किमर्थं चेति। यत्नस्य समीहितसाधनत्वे मानं नास्तीत्यत्राह—अत इति। प्रत्यक्षादिप्रमाणावसितमित्यर्थः ॥

किञ्च—[1]यत्नमात्रं पक्षीकृत्य साध्यते ? [2]तद्विशेषमात्रम् ? इति विकल्प्य आद्ये बाधोऽन्त्ये सिद्धसाधनमिति दूषयति—बाधमिति। यत्नेन [3]भव्यं यत् यद्यतनतस्सिध्यतीति मूलस्यार्थः। ननु [4]यत्नादेरयत्न [5]लभ्यत्वे कार्यं सर्वमहेतुकं स्यादित्युक्तमयुक्तम्; यत्नस्यायत्नसाध्यत्वात्; अन्यथा अनवस्थाप्रसङ्गादित्यत्राह—यतनमिति। तदपि स्वहेतुसाध्यम् न तु निर्हेतुकमित्यर्थः ॥ ९ ॥

अक्ष०—ननु यत्नसामान्यस्य निष्फलत्वे आत्मनः कर्तृत्व साधनमनर्थकमेवेति आक्षिपति—यल्लभ्यमिति। यत्-कार्यं भव्यं सत्तायोग्यं तत् न न स्यात् नासत् भवति विनाऽपि यत्नमुत्पद्येतैवेति भावः। यदभवितृ-यत् सत्तानर्हं तत् यत्नकोट्याऽपि नोत्पद्येत, उभयथाऽपि व्यर्थयत्ना नरः मनुष्या इति तेषां किं कर्तृत्वेनेत्याक्षेपः। परिहरति—नेति। यत्नसामान्यस्यानर्थकत्वनिश्चये सति स्वोक्तिबाधः, तद्यत्नस्यापि निरर्थकत्वात् वक्तुमेव न यतेतेति भावः। भोजनादौ प्रयत्नश्च क्रियमाणो बाध्येत, घटादिषु प्रयत्न साध्यतागमकप्रत्यक्षादि प्रमाणबाधश्चादिपदग्राह्यः, तदुपपादयति यदिति। यत्-कार्यं यत्नेनैव भवतीति प्रत्यक्षादि प्रमाणसिद्धं तत् यत्नादेव भवतीति तत्रायत्नसाध्यत्वसाधने बाधस्स्यादिति भावः। तद्यत्नस्यापि यत्नसाध्यत्वेऽनवस्था, अयत्नसाध्यत्वे तद्वत् सर्वेषामप्ययत्नसाध्यत्वं स्यादित्यत्राह—तदिति यतनमित्यर्थः। स्वहेतु यत्नान्तरोपनीतादृष्टादिकारणान्तराद्भवतीति बीजाङ्कुरन्यायादनवस्था नदोष इति भावः।

यद्धि कार्यं चन्द्रानयनादिवत् स्वकृत्यसाध्यं यच्च स्वयत्नमन्तरैव साध्यं तदुभयं प्रति स्वप्रयत्नस्यनैष्फल्यसाधने इष्टापत्त्या सिद्धसाधनमेवेत्याह—दुस्साधेति ॥ ९ ॥

इति यत्नसाफल्यम्

भिन्ना जीवाः स्वतस्स्यु प्रतिनियततया धीस्मृतीच्छासुखादेः
चेतोभेदाद्व्यवस्था न तु भवति यथा देहबाह्याक्षभेदात्।
नित्यान् भिन्नांश्च जीवान्कथयति निगमस्तद्धि नोपाधितस्स्यात्
आत्माद्वैतश्रुतीनामितरहृदयता तत्रतत्रैव सिद्धा ॥ १० ॥

सर्वा०—जीवः परस्य ब्रह्मण। औपाधिकांशः। घटाकाशमहाकाशवत्तयो-

---

१. कार्यमात्रं—क, ख २. कार्यविशेषमिति विकल्पमभिप्रेत्य—क, ख।
३. भाव्यम्—क, ४. धावनादेर—क, ग। ५. साध्यते—क।

भेदः। जीवानां मिथो भेदस्तु घटकरकाद्याकाशवदिति पक्षं दूषयति—भिन्ना इति ॥ स्वतः—न तूपाधितः। हेतुमाह—प्रतिनियततयेति। ननु कोऽयं प्रतिनियमः ? न तावद्बुद्ध्यादीनां स्वरूपभेदः, एकस्मिन्नप्यात्मनि तदुपगमात्। नापि भिन्नाधारत्वम्, तस्यैव साध्यत्वात्। अत एव नासाधारण्यम्, तत्खल्वाश्रयभेदसापेक्षम्। नापि परस्परप्रतिसन्धानाभावः, परस्परभावस्यैवासिद्धेरिति। अत्र ब्रूमः—यथैकशरीरावच्छिन्नबुद्ध्यादीनामेकाश्रयतयैव प्रतिसन्धानं न तथा शरीरान्तरजानाम्। अन्यथा गुरुशिष्यभावादयोऽपि न स्युः। तदेवं गम्यते—चैत्रात्मा मैत्रतादात्म्यरहितः, तदनुभवजन्मस्मृत्यनाधारत्वात्, कदाचिदपि तद्गत-सुखादिप्रतिसन्धानरहितत्वादित्यादि। अत्र परोक्तामन्यथासिद्धिं परिहरति—चेतोभेदादिति। तुरवधारणे। अस्ति हि कल्पभेदेन चेतोभेदः। सन्ति च कल्पादौ जातिस्मराः. *स्वयमागतविज्ञाना इत्यादेः। तत्र प्रतिबन्द्यभिप्रायेणाह—यथेति। न हि देहभेदे प्रतिसन्धानाभावः, पूर्वजन्माभ्यस्तप्रतिसन्धानदृष्टेः। न च बाह्येन्द्रियभेदे, सर्वधीविरोधात्। तद्वच्चेतोभेदोऽपि न व्यवस्थाहेतुरिति। ईश्वरान्मिथश्च जीवानां निरुपाधिकभेदः, *पृथगात्मानं प्रेरितारं च मत्वा, *जुष्टं यदा पश्यत्यन्यमीशम्, *नित्यो नित्यानाम् इत्यादिश्रुतिस्वारस्यसिद्ध इत्याह—नित्यानिति। मुक्तावपि भेदश्रुतिमभिप्रेत्याह—तद्धीति।

ननु *अयमात्मा ब्रह्म *तत्त्वमसि इत्यादिभिर्जीवब्रह्मतादात्म्ये सिद्धे भेदस्यौपाधिकत्वं ग्राह्यमित्यत्राह—आत्माद्वैतेति। अयं भावः—शरीरशरीरिभावेन सामानाधिकरण्यं स्थापयिष्यते। आस्तामेतत्। यथा यूपादित्यसामानाधिकरण्यं प्रत्यक्षविरोधादन्यपरं, तथेहापि स्वरूपैक्यविधानं तावदशक्यमिति। तत्रतत्रेति वीप्सायाः क्वचिद्विशिष्टवृत्तिः क्वचित्तूपचार इत्यादितात्पर्यभेदस्सूच्यते ॥ १० ॥

आनन्द०—ननु जीवस्वरूपस्यातिरि[१]क्तस्य वादिविप्रतिपत्त्या अनेकविरुद्धाकारग्रस्तत्वात् वस्तुनो [२]द्वैरूप्याद्यसंभवात् इदमित्थमिति निर्णयासंभवेन देहातिरिक्तपक्षस्य दुष्टत्वात् देहस्यैवैकरूपेण प्रत्यक्षसिद्धस्यात्मत्वमस्तु ? इत्याशङ्क्य [३]तन्निर्णयार्थं पर[४]पक्षान् दूषयिष्यन् प्रथमं भास्करपक्षं दूषयति ;—जीव इति। अखण्डचिद्रूपमेकं वस्तु सन्मात्रं परं ब्रह्म। अपरं चोपाधिरूपं अचिद्वस्तु। तद्द्वयव्यतिरिक्तं[५] च नास्ति। [६]तद्द्वयं च सत्यमेव। अचिद्रूपोपाधि[७]श्च सांशः। अंशाश्चानन्ताः। तदवच्छि[८]न्ना जीवाः। अनवच्छि[९]न्नं ब्रह्म। तत्स्वरूपोपासने-

---

१. क्तावयववादि—ख,
२. नैरूप्या—ख।
३. तन्निराकरणार्थं—क, ख,
४. क्षान् क्रमतो—क, ख।
५. क्तंतुनवस्त्वन्तरमस्ति—ग, घ, ङ,
६. तदुभयं—क, ख।
७. धिस्तु—ग, घ, ङ,
८. न्ना एव—ग, घ, ङ।
९. न्नं परं—ग, घ, ङ,

नोपाधिविगमो मोक्षः। स [1]'एवोपाधिर्महदादिविकारवान् प्रकृत्यादिशब्दवाच्यः' इति[भट्ट ?]भास्करमतम्। तदिदमाह—जीव इति। उपाध्यैक्ये जीवभेदः कथमित्यत्राह;—जीवानामिति। उपाध्यंशानां बहुत्वादिति भावः। न तूपाधित इति। [2]एकस्य देवदत्तस्यैवानुभवेच्छा [3]स्मृतीनां [4]भेदः आश्रयभेदको न दृष्ट इति भावः॥

तस्यैवेति—साध्याविशेषादिति भावः। आश्रयभेदेति;—[5]तदन्यावृत्तित्वे सति तद्वृत्तित्वमित्यादिना साधारण्यं निर्वाच्यमित्याश्रयभेदसापेक्षमित्यर्थः। परस्परप्रतिसंधानाभाव इति—देवदत्तयज्ञदत्तयोर[6]न्योन्यधर्मवत्तया प्रतिसंधानाभाव इत्यर्थः[7]।

ननु धीस्मृतीच्छादीनामेकाश्रयगतानामपि कदाचित्प्रतिसंधानाभावसत्त्वाद् व्यभिचारइति चेत्; न; एकाश्रयगतत्वाभाव[8]वत्त्वेन प्रतिसधा[9]नाविषयत्वादित्यर्थः। न चैवं एकाश्र[10]यभाववत्त्वेन प्रतिसंधानविषयीभूतैकधर्मिकरूपरसादौ व्यभिचारः! न च धीस्मृतीच्छात्वं वा आत्मगुणत्वं वा विवक्षितुं शक्यम्? तथा भूतधीस्मृत्यादौ व्यभिचारात् व्याप्यत्वासिद्धेश्चेति वाच्यम्; तादृशलौकिकप्रत्यक्षविशेष्य[11]त्वस्य विवक्षितत्वात्। न च[12]स्वधीस्मृती[13]च्छादौ स्वापेक्षया[14]स्वस्य तथा प्रति[15]संधानम्। अन्यधी[16]स्मृत्यपेक्षयैव स्वधीस्मृत्यादीनां तथाधीविषयत्वात्; तदेवाह;—न तथेति। अन्यथेति—[17]भिन्नाश्रयत्वेन प्रतिसंधानाभावेनैकाश्र[18]यत्वेन प्रतिसंधाने शिष्यस्य चाचार्यस्य च परस्पर[19]गतज्ञानादावेकाश्रय-

---

१. स उपाधि–ग।
२. एकस्मिन्नपि देवदत्तस्यैवा–ग,
३. स्मृत्यादीनां–क, ख।
४. भिन्नानां भेदः–ग, I भेदो नाश्रयभेदको–ख, II
५. तत्तद्धर्मानधिकरणाधिकरणत्वं तदधिकरणान्याधिकरणत्वम् इत्यादिना साधारण्यं वाच्यम् तद्द्वयस्याश्रयभेदसापेक्षत्वादित्यर्थः।
६. रन्योन्यप्रतिसंधाना–ग।
७. यथेति–एकाश्रयतया प्रतिसंधाना (भाव) विपयत्व इत्यर्थः-ग।
८. भावपरत्वेन–क, ख,
९. धानवि–ग, घ।
१०. श्रयत्वाभाव–क, ग,
११. विशेपत्वस्य–क, ख।
१२. न चधी–ख,
१३. स्मृत्यादौ–ख।
१४. या स्वस्य प्रतिसंधानम्–ख, यातथास्वस्य परस्य च प्रतिसं–क।
१५. प्रतिसन्धानं संभवति अन्य–ख,
१६. स्मृताद्य–क, ख।
१७. भिन्नाश्रयत्वेप्रति–घ,
१८. श्रयकत्वेन–ख, घ,
१९. गन्तव्य–क।

त्वज्ञानस्य स्वगतप्रतिसंधानरूपतया ज्ञानार्थं गुरूपसदनं[१] बोधार्थमुपदेशश्च न स्यातामित्यर्थः ।

ननु जीवाः भिन्नाः धीस्मृत्यादीनामेकाश्रय[२]गतत्वेन प्रतिसंधानाविषयत्वात् इत्यादिरूपप्रयोगोऽनुपपन्नः[३] हेतुसाध्ययोर्वैयधिकरण्यादित्यत्राह ;—तदेवमिति । मैत्रतादात्म्यरहित इति—मैत्रात्मतादात्म्यरहित इत्यर्थः । तदनुभवेति—नन्वसिद्धोऽयं हेतुः मैत्रस्य चैत्राद्भेदसिद्धेः पूर्वं[४] तस्य संदिग्धत्वादिति[५] चेत्; अत्राहुः ;—तदनुभवजन्यस्मृतिसमानकाली[६] नतद्गोचरस्मृतिसामान्याभाववत्तया प्रतिसंधान[७]वत्त्वात् [८]एतच्छरीरान्यधर्मावच्छेदेन तदनाधारत्वाद्वा तदनुभवजन्यस्मृतिमत्तया कदाऽपि प्रतिसंधानविषयत्वाभावाद्वेत्यर्थः । कदाचिदपीति—तद्गतसुखादिसाक्षात्काररहितत्वादित्यर्थः । तदीयसुखसमानकालीनसुखाभाववत्तया प्रतिसंधानविषयत्वादिति वाऽर्थः ।

ननु प्रतिसंधानमत्र प्रत्यक्षं वाच्यम् अन्यथा सुखकालेऽपि तदभाववत्तया प्रतिसंधानसंभवात् ; एवं च घटादौ तादृशप्रतिसंधानासंभवेन व्याप्त्यभाव इति चेत् ; अत्र केचित् ; [९]योग्ययद्वत्तया यन्न प्रतिसंधीयते तत्तद्वतो भिन्नम् यथा पटत्ववत्तया न प्रतिसंधीयमानो घटः पटाद्भिन्न इति सामान्यव्याप्तिरित्याहुः ।[१०] परे तु ; यथाश्रुतमेवास्तु नचैवमप्रसिद्धिः ; प्रतिसंधानराहित्यं हि संशयेन निश्चीयते ; देवदत्तो यज्ञदत्तीयप्रतिसंधानरहितः तत्कालीनतद्गोचरसंशयवत्त्वात् यो यत्कालीनयद्गोचरसंशयवान् स न तत्कालीनतन्निर्णयवान् यथा घटसंशयवान्[११] देवदत्त इत्याहुः । अन्ये तु तदनुभवजन्येत्यादि यथाश्रुतमेव सम्यक्; नचासिद्ध्यादिः ! देवदत्तशरीराद्यवच्छेदेन तदनुभवस्य सिद्धत्वात् । तत्राभेदस्य संदिग्धतया भेदसिद्धेर्न व्याप्यवृत्त्यभावन्यायेन साधकत्वाभाव इति वदन्ति । अस्तु को दोषः । इत्यत्राह ; सन्ति चेति । तथाच स्मरणं न स्यादिति भावः । तत्र प्रमाणमाह—स्वयमागतेति । पूर्ववासनया उपदेशात्यन्ताभावेऽपि ज्ञानिन इत्यर्थः निर्हेतुकत्वानभ्युपगमात् । सनकादयो हि कल्पादौ प्रथममुत्पन्नाः पूर्ववासनातो निवृत्तिधर्मनिष्ठा इति हि पुराणादौ प्रसिद्धमिति भावः । तत्र प्रतिबन्ध्यभिप्रायेणेति । यथा देहभेद इन्द्रियभेदो वा जन्मान्तरीयादिप्रतिसंधानानुरोधेन नाप्रतिसंधानप्रयोजकः तथा चेतोभेदोऽपि न प्रयोजक इत्यर्थः । तद्वच्चेतोभेद इत्युपसंहारः । पृथगात्मा-

---

१. सदनमुपदेशश्च—क, ख, २. श्रयविषयत्वेन—क ।
३. न्न। वैयधि—क, ख, ४. पूर्वं संदिग्ध—ग, घ, ङ ।
५. दिति चेन्न—ग ६. कालीनतद्गतसुखदुःखादिसाक्षात्काररहितत्वादित्यर्थः ।
७. धानाविषयत्वा-क, ८. तच्छरीर—क, ख ।
९. योग्ययदवभाववत्तया वा यत्प्र(यं)प्रतिसंधत्ते—क, ख ।
१०. यद्वा-क । ११. वानिति द्रष्टव्यम्—ग ।

नमित्यादि। देहात्पृथगात्मन इत्यर्थकतया जीवादीश्वरभेदो नोच्यत इति चेन्न; प्रेरितारं च पृथङ्मत्वेति वचनव्यक्तौ तत्र प्रतीतप्रतियोगिकत्वमेव [१]वक्तुं युक्तं न त्वप्रतीत देहप्रतियोगिकत्वम्[२]। अत एव चकारोऽप्यर्थवान् ॥

ननु कर्मधारयस्थलीयचकारवदभेदार्थकत्वमिति चेन्न; [३]कर्मधारयस्थले अभेदार्थत्वं समानाधिकरणविभक्त्यर्थत्वात् न चकारात्। [४]चकारस्तु वाक्यालङ्कारार्थः। अथवा समानाधिकरणविशेषणविशेष्योभयगतचकारयुगलत्वेन तथा व्युत्पत्तिः; अन्यथा नीलमुत्पलं चेत्यपि विग्रहप्रसङ्गात्। भेदार्थकत्वं तु देवदत्तो यज्ञदत्तश्चेति प्रयोगात्। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्था इति शाब्दोक्तेश्च सिद्धम्। किंच कर्मधारयस्थलेऽपि चकारस्य भेदार्थकत्वमेव। पर्यायव्यावर्तकप्रवृत्तिनिमित्तभेदार्थक एव चकारः। अन्यम्—स्वापेक्षया अन्यम्; उपस्थितत्वादित्यर्थः। जीवानामन्योऽन्यभेदे तेषां ईश्वराच्च भेदे श्रुतिमेव (श्रुतिं) दर्शयति—नित्यो नित्यानामिति।

ननु श्रुतीनामौपाधिक[५]भेदविषयकत्वेनान्यथासिद्धिरित्यत्राह;—मुक्ताविति। 'तदा विद्वान्' [६]इति वाक्येन भेदज्ञानफलत्वेन मोक्षस्य कीर्तनात् मोक्षार्थोपासनस्यौपाधिकार्थविषयकत्वायोगात् उपाध्यनिर्देशाच्चानौपाधिकत्वेन मुक्तिकालिकभेदपरत्वं चेत्यर्थः। [७]इतरहृदयतेत्युक्तं हृदयमाह—अयं भाव इति ॥

ननु भेदश्रुतीनामेवेतरहृदयतास्त्वित्याशङ्क्य मुख्यार्थविधानानुपपत्तिमाह—आस्तामिति—वलादन्यपरत्वं वक्तव्यमित्यर्थः।

क्वचिद्विशिष्टेति—तत्त्वमसीत्यादौ–क्वचिदिति—'ब्रह्म वेद ब्रह्मैव इत्यादौ इत्यर्थः ॥ १० ॥

---

१. सिध्यति देह प्रतियोगिकत्वे--ल, घ, ङ। २. त्वं कल्प्यमितिगौरवम्-ग।

३. तत्र तच्छब्दसामाधिकरण्यादेवाभेदार्थकत्वम्–ग, घ।

४. चकारस्तु प्रवृत्तिनिमित्तभेदार्थकतया सामानाधिकरण्ये उपयुज्यते। तथाच भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकार्थवृत्तित्वरूपसामानाधिकरण्यं चोपपन्नं; नच चकारस्य व्यर्थता। तस्य मुख्यत्वात्। मुख्यार्थस्तु भेद एव। अत एव द्वन्द्वसूत्रे समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः इतेरतरयोगस्तु मुख्योऽन्यस्त्वौपचारिक इति वामन इति वदन्ति-ख

५. भेदपरत्वमर्थ इत्यत्राह–क, भेदपरत्वमस्त्वित्यत्राह–ख।

६. इत्यादिवाक्येन मुक्तौ भेदावगमात् उपासनावाक्येऽपि स एव भेदो वाच्यः। स च स्वाभाविकः मुक्तिकालीनत्वादिति भावः–क, ख।

७. नन्वभेदश्रुतीनामत्यन्तबाध एव सर्वात्मना स्वार्थत्यागादित्यत्राह–क, ख।

अक्ष०—जीवानां परस्परमौपाधिकभेदवादं निरस्यति—भिन्ना इति। स्वत इति स्वाभाविकभेदवन्त इत्यर्थः न तूपाधिभिरिति भावः। कुत इत्यत्राह—प्रतिनियततयेति। एकैकशरीरावच्छिन्नानामनुभवस्मृत्यादीनां एकाश्रयतया प्रतिसन्धानवत् शरीरान्तरावच्छिन्नानामेकाश्रयकतया प्रतिसन्धानरहिततयेत्यर्थः। आत्मैक्ये सति सौभर्यादिरनेकशरीरावच्छिन्नभोगानामेकाश्रयत्वप्रतिसन्धानवत् चैत्रमैत्राद्यनुभवानामपि एकाश्रयत्वप्रतिसन्धानं स्यात् न चैवं प्रतिसन्धीयते अतो भिन्ना एवात्मान इति भावः।

अत्रैवं प्रयोगः[1] सिद्धचा दर्शितः—चैत्रात्मा मैत्रतादात्म्यरहितः तदनुभवजन्यस्मृत्यनाधारत्वात् कदाचिदपि तद्गतसुखादिप्रतिसन्धानरहितत्वात् इति।

आत्मैक्येऽपि शरीरभेदेन मनोभेदोपगमात् सौभर्यादिशरीरेषु तदनभ्युपगमाच्च चैत्रमैत्रादिशरीरभेदेनानुभवादीनां अप्रतिसन्धानोपपत्तिस्स्यादित्यत्राह—चेतो भेदादिति। कल्पभेदेन चेतोभेदसत्त्वेऽपि स्वयमागतविज्ञाना इत्यादौ जातिस्मराणां केषांचित् पूर्वानुभूतप्रतिसन्धानदर्शनात् चेतोभेदो व्यवस्थापको नैव भवतीत्यर्थः। तत्र दृष्टान्तमाह—यथेति। शरीरबाह्येन्द्रियभेदात् यथा व्यवस्था न भवति तथेत्यर्थः। चेतोभेदेन व्यवस्थाकल्पने बाह्येन्द्रिय भेदेनापि व्यवस्था—स्यात्। प्रतिसन्धानं न स्यात् चक्षुषाऽनुभूतस्य चक्षुर्वैकल्ये पश्चात् तदनुभवप्रतिसन्धानं न स्यादिति प्रतिबन्दी प्रदर्शनीयेति भावः।

'ईश्वरात् मिथश्च जीवानां निरुपाधिकभेदः पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति' 'जुष्टं यदा पश्यत्यन्यमीशं' नित्यो नित्यानां चेतनश्चेतनानां एको बहूनां यो विदधाति कामान् इत्यादिश्रुतिसिद्ध इत्याह—नित्यानिति। उक्तश्रुतीनामौपाधिकभेदपरत्वमस्त्वित्यत्राह—तद्धीति। श्रुतिषु भेदकथनं औपाधिकं न भवतीत्यर्थः, मुक्तिदशायामपि निरञ्जनः परमं साम्य मुपैतीति साम्योक्त्या भेदसिद्धेरिति भावः।

तर्हि अयमात्मा ब्रह्म, तत्त्वमसीत्यादौ तादात्म्यव्यपदेशः कथमित्यत्राह—आत्मेति। इतरहृदयतेति। शरीरशरीरिभावादितात्पर्यकत्वं सादृश्यादितात्पर्यकत्वं च तत्र तत्र समभिव्यवहारादिना अधिगतमित्यर्थः ॥ १० ॥

औपाधिकभेदवादनिरासः

जीवाः पृथ्व्यादिभूतेष्वणव इव मिथो भेदवन्तः स्वतोऽमी
सन्मात्रब्रह्मभागास्तदिह नियतयस्सुस्थिता इत्ययुक्तम्।
ऐक्यस्याप्यक्षतत्वादनवधि च सति ब्रह्मणि स्यादवद्यं
सत्यं तच्चेत्यभिन्नैर्बहिरगणि मृषावादतोऽप्येष पक्षः ॥ ११ ॥

सर्वा०—अथ स्वाभाविकजीवांशभेदाभेदं दूषयति—जीवा इति ॥ उक्तं

1. सर्वार्थसिद्धिग्रन्थेन इत्याशयः।

विरोधमेव बाधहेतुमाह—ऐक्यस्यापीति। पक्षद्वयसाधारणं दूषणान्तरमाह—अनवद्येति। सति ब्रह्मणि—सर्वात्मकसद्रूपे ब्रह्मणीत्यर्थः। अस्मिन्पक्षे निरवद्यत्वादिश्रुतिर्निर्विषया स्यात्, ईश्वरस्यापि सर्वतादात्म्यप्रतिसन्धायिनः क्लेशादिनिषेधायोगादिति भावः। एतत्पक्षद्वयादविद्याकृतदुःखादिभेदवादो वरमित्यभिप्रायेण सत्यं तच्चेत्याद्युक्तम् ॥ ११ ॥

आनन्द०—परं ब्रह्मैकमेव [1]चिदचिदीश्वरभेदेन स्वभावतो [2]भिन्नम्; तत्राचिदंशः [3]प्रकृतिः। चिदंशस्तु भूतेषु [4]परमाणव इवानन्तात्मानो जीवा उच्यन्ते। तत्र सर्वत्र [5]सदात्मनैक्यं च। तत्रैश्वरोपासनादी [6]श्वरेणाविभागापत्तिरूपमुक्तिर्भवतीति यादवप्रकाशमतं दूषयति—अथ स्वाभाविकेति। उक्तमिति - भास्करपक्षे उक्तमित्यर्थः।

ननु [7]सदात्मना भेदमात्रेण सर्वजीवगतदोषाणां प्रसक्तिरित्यत्राह—सर्वात्मकेति। एतन्मते जीवभिन्नत्वादित्यर्थः। ननु स्वाभाविकभेदवतीश्वरे, सावकाशा भवत्वित्यत्राह—ईश्वरस्यापीति। एतदिति - परमार्थतो दोषाभावादित्यर्थः। पृथिव्यादि [8]भूतेष्वणव इव मिथो भेदवन्तः परस्परं भिन्नास्सन्मात्र [9]ब्रह्मणि भिन्ना ब्रह्मणो भागा वर्तन्त इति परस्परं भेदवत्त्वात्सुखदुःखादिप्रतिसंधानव्यवस्था युक्तेति यादवमतमिति मूलार्थः ॥ ११ ॥

अक्ष०—अत्र सद्ब्रह्मणो जीवानां च स्वाभाविकभेदाभेदवादं दूषयितुमनुवदति—जीवा इति। सन्मात्रं ब्रह्म-तस्य-भागा—अंशा जीवा अमी। पृथिव्यादिभूत परमाणवइव स्वतः मिथो भेदवन्तः तस्मात् अस्मिन् पक्षे प्रतिसन्धाननियमाः नानुपपन्ना इत्यर्थः। यथा पृथिव्याद्यंशानामणूनां प्रतिनियतरूपपरिमाणादिमत्वं तथा सद्ब्रह्मांशानां स्वतोभिन्नानां जीवानां प्रतिनियतानुभवस्मृत्यादि प्रतिसन्धानमुपपन्नमिति भावः। दूषयति अयुक्तमिति। उपपादयति—ऐक्यस्यापीति। अस्मिन् पक्षेऽभेदस्यापि स्वाभाविकत्वेनाभ्युपगमात् अखिलजीवगतमवद्यजातं अनवधिकं सति ब्रह्मणि प्रसज्यते। तदपि मृषावादिपक्ष इव न मिथ्याभूतं किन्तु सत्यमेवेति मन्यते। अत एवायं पक्षः मृषवादिपक्षादपि पापीयानिति अभिज्ञैः वाह्यतया गण्यत

---

१. श्वरस्वभावभेदेन भिन्नं—ग। २. भिद्यते—क।
३. प्रकृतिभेदादिना परिणमते चिदं—ग। ४. परमाणवो जीवा उच्यन्ते—ग।
५. सन्मात्रतयैक्यमिति सन्मात्रो—ग। ६. दीश्वरानीश्वरविभागनिवृत्तौ सन्मात्रब्रह्मता—ग।
७. सद्रूपत्वमात्रेण—ग, सर्वात्मना जीवगत—क, ख।
८. भूतेष्ववयवरूपेण विद्यमाना अणवो मिथो—ग।
९. ब्रह्मणि सदात्मकत्वेन खाभिन्ना ब्रह्मणो भागा—ग।

इत्यर्थः। निर्दोषब्रह्मणो दोषाभ्युपगमादपि पारमार्थिकानन्तदोषाभ्युपगमस्य महापापावहत्वादास्तिकपक्षेष्वन्तर्भावानर्होऽयं पक्ष इतिभावः ।। ११ ।।

ब्रह्मस्वरूपस्वाभाविकांशजीवभेदभङ्गः

देहत्वाद्यैर्विगीतं निखिलमपि मया ह्यात्मवत्किं च पुंस्त्वात्
सर्वे जीवा अहं स्युर्न यदि, भवति ते गौरवादोत्यसारम् ।
श्रुत्यध्यक्षादिबाधात्प्रसजति च तदा तत्तदैक्यं घटादेः
पक्षादेर्वादिनोश्चेत्यलमिह कलहैस्तज्जिगीषादिमूलैः ।। १२ ।।

सर्वा० —अन्ये त्वाहुः—अविद्याशबलं ब्रह्मैव जीवः, स च सर्वशरीरेष्वेकः; अप्रतिसन्धानमविद्यावैचित्र्यात्, प्रतिबुद्धास्तु *सोऽहं स च त्वमिति प्रतिसन्दधते, प्रमाणं चात्र श्रुतिस्मृतय इति। एतदपि पूर्वोक्तनीत्या दत्तोत्तरम्। अविद्यास्वरूपादिकं दूषयिष्यते। अत्र चैको व्रीहिरित्यादिवज्जीवैक्यवादास्साजात्यात्स्युः, *पण्डितास्समदर्शिन इत्यादिभिस्तथात्वावगमात्। * मित्रामित्रकथा कुतः इत्यादिकं रागादिपरिहारपरम्। *यद्यन्योऽस्ति इत्यादिकं स्वरूपेऽन्यादृक्त्वनिषेधार्थम्। *एको देवस्सर्वभूतेषु गूढ इतीश्वरविषयम्। *आकाशमेकं हि यथा, * एक एव हि भूतात्मा इत्यादिनिदर्शनमपि तत्तत्संसर्गशङ्कितवृद्धिह्रासादिनिषेधार्थम्। *घटध्वंसे घटाकाशो न भिन्नो नभसा यथा इत्यादिकमौपाधिकवैषम्यनिवृत्तावत्यन्तसाम्यं व्यनक्ति। नहि घटध्वंसे घटावच्छिन्नः आकाशांशोंऽशान्तरेणैकीभवति। आकाशतामात्रं तु घटस्थितावपि सिद्धमित्येषा दिक्।

तदिह प्रतिसन्धानादिप्रसङ्गे शास्त्रतात्पर्यं च वक्तव्यशेषाभावात्तदुक्तमनुमानादिकमनूद्य दूषयति–देहत्वाद्यैरिति ।। निखिलं—सर्वज्ञदेहप्रभृति पिपीलिकादिदेहपर्यन्तम्। सर्वे जीवाः—ब्रह्मादिस्थावरान्ताः। न यदि इत्यादिना विपक्षे बाधकोक्तिः। असारत्वे हेतुमाह—श्रुतीति। सर्वैर्हि प्रमाणैर्जीवानां मिथस्तादात्म्यप्रसङ्गः प्रतिक्षिप्तः। उक्तानुमानवर्गस्याभाससमानत्वमाह—प्रसजतीति। देशान्तराणि एतद्घटेन घटवन्ति देशत्वात् एतद्देशवत्; अन्येऽपि घटा एतद्घटात्मानः घटत्वात् एतद्घटवत्, इत्यादौ किं वाच्यम्? अध्यक्षादिविरोध इति चेत् समम्। अविद्ययाऽऽत्मनि भेदधीः, ऐक्यं तु स्वभावस्स्यादिति चेत्, घटादावपि तथाऽस्तु। न चायमिष्टप्रसङ्गः, विवर्तद्वयस्य तादात्म्यानभ्युपगमात्। अन्यथा व्यावहारिकव्यवस्थाविलोपात्। प्रयुक्तानुमानावयवेष्वपि वाक्यत्वादिना तादात्म्यसंभवेऽन्यतमपरिशेषः स्यादित्यभिप्रायेण पक्षादेरित्युक्तम्। वादिनोरिति। अत्रेष्टप्रसङ्गत्वसंभवेऽपि विवादोच्छेदादौ तात्पर्यान्न वैयर्थ्यम्। तद्विवृणोति—इत्यलमिति ।।१२।।

आनन्द०—मायिमत एव सर्वशरीरैकजीववादं दूषयति—अन्ये त्वित्या-दिना। अविद्याशबलमिति। ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यते इत्युक्तेरिति भावः। ननु सर्वशरीरेषु जीवस्यैक्ये प्रतिसन्धानादिनियमो न स्यादि-त्यत्राह—अप्रतिसन्धानमिति। विचित्रशक्तिमदज्ञानमेकशरीरावच्छेदेन सुखादि-गोचरप्रतिसन्धानस्यान्यशरीरावच्छेदेनोत्पत्तिप्रतिबन्धकमित्यर्थः॥

नन्वेवं वामदेवादीनां प्रतिसन्धानं न स्यादित्यत्राह—प्रतिबुद्धास्त्विति। तेषां ज्ञानेनाज्ञानस्य छिन्नमूलतया नाप्रतिसन्धानशक्तिरिति भावः। एकजीवपक्षे प्रबुद्धानां भेदासंभवात्सर्वेषां सर्वत्र प्रतिसन्धानं स्यादिति दोषे सत्येव दोषान्तर-माह—एतदपीति। स्वरूपैक्ये प्रतिसंधानव्यवस्थापनमविद्यया न शक्यम्। अन्यथा स्वस्विन्नपि प्रतिसंधानादिकं न स्यादिति भावः। किंच अविद्यास्वरूपं च प्रमाणा-भावान्नास्त्येव कुतस्तस्य व्यवस्थापकतेत्याह—अविद्येति। जीवैक्यश्रुतिमन्यथ-यति—अत्रैक इति। कौसलो मधुरायां व्रीहिं दृष्ट्वा वदति कौसलेनैक एवायं मधुरायां व्रीहिर्यः कौसले दृष्ट इति। तत्र न स्वरूपैक्यम्, किं तु सादृश्यम्; जीवेऽपि तथा व्यपदेश इति भावः। नन्वत्र स्वरूपैक्ये बाधकाभावात् किमिति सादृश्यपरतयाऽन्यथासिद्धिरित्यत्राह—पण्डिता इति।

यद्यपि समानशब्दपर्यायस्समशब्दः तथाऽपि, साजात्यमादाय, न त्वैक्य-मादायेति भावः। केचित्तु समानशब्दोऽपि सादृश्य एव मुख्यो न त्वर्थान्तर इत्यर्थः।

ननु ज्ञानिनो मित्रामित्राद्यभाववचनात् सर्वेषामैक्यं वाच्यम्। अन्यथा स्वव्यतिरिक्तवस्तुसत्त्वे तस्यासंभवादित्यत्राह—मित्रामित्रेति। ननु स्वान्यस्य निषेधवचनेनास्यैकवाक्यत्वं वाच्यमित्यत्राह—यद्यन्योऽस्तीति। नन्वेकस्य सर्वभूते-ष्ववस्थानवचनं कथं संगच्छत इत्यत्राह—एक इति।

स्वोक्तार्थे युक्तिमाह;—न हीति। ननु विशिष्टस्य भिन्नत्वेऽपि स्वरूप-स्यैक्यं यथा वर्तते तथाऽत्रापीति वचनार्थः; नचैवमुपाधिध्वंसानन्तर्योक्तिर्व्यर्था प्रागपि तत्सत्त्वादिति वाच्यम्, तत्सत्त्वेऽपि तदनन्तरं तत्प्रतीतिर्भवतीत्यर्थतया सार्थक्यादिति चेत्; तत्राह;—दिगिति। अभिन्नशब्दस्य बुद्ध्यर्थत्वाभावाल्लक्षणया तत्परत्वे अत्यन्तसादृश्यवत्परस्य भेदवाक्यानुसारेण युक्तत्वात्; अन्यथा भेदाभेद-वाक्यमात्रस्य मुख्यार्थपरित्यागगौरवापत्तेरिति भावः।

ननु तैश्श्रुतेरपि स्वमतप्रमाणतयोपन्यासात् तद्दूषणं विहायानुमानमात्र-दूषणमयुक्तमित्यत्राह;—तदिहेति। देवदत्तशरीरपक्षीकारे विष्णुमित्रशरीरे संदिग्ध-व्यभिचार इत्यत्राह;—निखिलमिति। पक्षबहिर्भाव एव संदिग्धव्यभिचार इति भावः। सर्वैरिति;—नाहं देवदत्त इति प्रत्यक्षेण अहं[1] न देवदत्तः तदीयसुखादि-

---

1. अहं देवदत्तो न भवामि तदीयसुखादि प्रतिसंधानकालीनसुखवत्तया संशयविषयत्वादि—ग।

प्रतिसंधानाभावात् इत्यनुमानेन नित्यो नित्यानामित्यादिश्रुत्या स्वर्गनरकादिप्रतिपादकश्रुत्यर्थापत्त्यादिभिश्च बाधितत्वादित्यर्थः। **अध्यक्षादिविरोध इति ;**—बाधिता[1]न्यनुमानानि न साधकानीत्यर्थः **सममिति ;**—नाहं देवदत्त इति प्रत्यक्षबाधस्समान इत्यर्थः। अन्यथासिद्ध[2]त्वाद्भेदज्ञानं न बाधकमित्याशङ्कते;—**अविद्ययेति।** [3]बाधकाभावेऽपि भ्रमत्वे अतिप्रसङ्ग इत्याह ;—**घटादावपीति। विवर्तद्वयस्येति ;**—एकस्मिन् विवर्ते तदवच्छिन्ने वा धर्मातिरिक्तस्याध्यासाभावादिति भावः। **अन्यथेति ;**—लोकव्यवस्थानिर्वाहस्य सर्वैः कार्यत्वादित्यर्थः। बाधकान्तरमप्याह ;—**प्रयुक्तेति।** न्यूनतादिदोषप्रसङ्ग इति भावः। पक्षादिशब्दः प्रतिज्ञादिपरः। **इष्टप्रसङ्ग इति ;** सर्वात्माभेदवादिनोरैक्यस्येष्टापत्तेरित्यर्थः॥ १२॥

अक्ष०–अत्र सर्वेषु शरीरेष्वेक एव जीव इति पक्षः प्रतिक्षिप्यते। अत्र पूर्वोक्तायाः प्रतिसन्धानव्यवस्थाद्यनुपपत्तेः स्फुटत्वात् तदुक्तानुमानं दूषयतुमनुवदति–**देहत्वाद्यैरिति।** आद्यशब्देन जडत्व-कल्पितत्व-कार्यत्वादिपरिग्रहः। विगीतं–विवादाध्यासितं निखिलमपि सर्वज्ञदेहप्रभृतिपिपीलिकादेहपर्यन्तं। **मयेति** मदभिन्नात्मवत् मद्भिन्नात्मरहितमिति यावत् मच्छरीरवदिति शेषः। प्रयोगान्तरमाह—**किं चेति।** सर्वे जीवा अहमेव न मद्भिन्नाः पुरुषत्वात् यथाऽहमिति। विपक्षे बाधकमाह न **यदीति।** किं बाधकमित्यत्राह—**गौरवादीति।** आदिना आत्मैक्यश्रुतिविरोधादिपरिग्रहः। दूषयति—**असारमिति।** कुत इत्यत्राह **श्रुतीति।** उक्तानुमानयोः "नित्यो नित्यानामिति" वाक्ये जीवबहुत्वश्रवणात् बाधः, नाहं देवदत्त इति प्रत्यक्षेण बाधः नाहं देवदत्तः तदनुभूतप्रतिसन्धानाभावात् इत्याद्यनुमानेनापि बाधात् न साधकत्वमिति भावः। एवमुक्तानुमानस्य आभाससमानयोगक्षेमत्वमाह **प्रसजतीति।** देशान्तराण्यपि एतद्घटेनैव घटवन्ति देशत्वात् एतद्देशवत् अन्येऽपि घटाः एतद्घटात्मानः घटत्वात् एतद्घटवत् इत्यादिकमपि प्रयोक्तुं शक्यमिति भावः। एवं वाक्यत्व—प्रमेयत्वादिहेत्वाभासेन पक्षसाध्यादेरैक्यप्रसङ्गेऽनुमानानामाभासत्वं स्यादित्याह—**पक्षादेरिति।** पक्षप्रतिपक्षयोरप्यैक्यं वक्तुं शक्यमित्यप्यर्थस्यात्। तथा वादिप्रतिवादिनोरपि ऐक्यं स्यादित्याह **वादिनोश्चेति।** आत्मैक्यवादिनामिष्टप्रसङ्गोऽयमित्यत्राह—**अलमिहेति। कलहैरिति** जल्पवितण्डारूपैः वाक्कलहैरित्यर्थः। वादकथैव न प्रवर्तेतेति भावः। कुत इत्यत्राह—**तज्जिगीषेति।** प्रतिवादिजिगीषयैव हि जल्पादौ प्रवृत्तिः नत्वात्मजिगीषयेति भावः॥ १२॥

इति सर्वशरीरैकजीववादनिरासः

---

१. न्यनुमानानीत्यर्थः।–ग। २. द्धत्वान्नबा–ख।

३. बाधकाभावादपि भ्रमत्वेऽपि विशेषाभावाद्धटादिभेदोऽपि न स्यादित्याह–ग।

साविद्यं ब्रह्म जीवस्स च न बहुतनुर्नेतरे सन्ति जीवाः
स्वप्नादेकस्य लोके बहुविधपुरुषाध्यासवद्विश्वक्लृप्तिः ।
नेतः प्राक्कोऽपि मुक्तो न परमपि स तु प्राप्स्यति श्रेय एको
मायोत्थौ बन्धमोक्षाविति च मतमसत्सर्वमानोपरोधात् ॥१३॥

सर्वा०—अथैकशरीरैकजीववादमनुभाषते—साविद्यमिति ॥ साविद्यं ब्रह्म जीव इति पूर्वस्यास्य च साधारणम्; स चेत्यादिविशेषोक्तिः । वक्ष्यमाणपक्षाद्वैषम्यं व्यनक्ति-नेतर इति । विचित्रजीवोपलम्भं निर्वहति—स्वप्नादिति । एकमेव शरीरं जीववत्, स्वप्नदृष्टशरीरन्यायादन्यानि निर्जीवानीत्यर्थः । *शुको मुक्त इत्यादिवैघट्यं परिहरति-नेतः प्रागिति । पूर्वं मुक्ता न सन्ति चेत्पश्चादप्यद्वैतविदो न मुच्येरन्नित्यत्रेष्टप्रसङ्गतामाह—न परमपीति । तर्हि मोक्षशास्त्रं व्यर्थं स्यादित्यत्राह—स इति । नित्यमुक्तस्यैकशरीरे बन्धमोक्षभ्रमं साधयति—मायोत्थाविति । उक्तं प्रागुक्तहेतुना दूषयति—इति चेति । आत्मभेदो हि सर्वप्रमाणैस्सिद्धः । तत्र यदि देहान्तरं निर्जीवम्, एकमपि तथैव; भ्रान्तिसिद्धजीवत्वस्याविशेषात् । एकत्रात्माऽस्ति जीवत्वं तु नास्ति, अत्र तूभयं नेति चेन्न; तेष्वप्यध्यासाधिष्ठानतया आत्मसत्त्वस्य त्वया दुस्त्यजत्वात् । अन्यथा निरधिष्ठानभ्रमप्रसङ्गात् । स्वप्ननीत्या लाघवमिच्छतस्तदेव लभ्यम्, स्वप्नस्य तद्द्रष्टुश्च सत्यत्वात् । इह तु तन्मिथ्यात्वस्य त्वयैवोक्तेरिति ॥ १३ ॥

आनन्द०—पूर्वसंगत्या आह ;—अथेति । पूर्वत्रैकजीववादस्य निराकृतत्वात् पुनस्तन्निराकरणं पुनरुक्तमित्याशङ्क्याह ;—स चेत्यादीति । एकजीववादत्वाविशेषेऽपि एकशरीरैकजीववादत्वाद्भेद इति भावः । वक्ष्यमाणेति ; तोयाधारेष्वित्यादिनेति शेषः ।

ननु शरीरस्य कथं निर्जीवत्वमित्यत आह ;—स्वप्नेति । नन्वेकस्मिन्नेव शरीरे एक एव जीवश्चेत् [१]बद्धमुक्तादिव्यवस्था कथमित्यत्राह ;—शुको मुक्त इत्यादीति । स इतीति ;—एकं प्रत्येव शास्त्रं सफलमिति भावः । नित्यमुक्तस्येत्यादिः; स्वभावतो बन्धो मोक्षश्च न स्त एव । न चैवं शास्त्रवैफल्यम् । एतज्ज्ञानार्थत्वेनैव साफल्यं मोक्षशास्त्रत्वं चेत्यर्थः । प्रागुक्तेति ;—प्रतिसंधानादिव्यवस्था न स्यादित्यादिनेत्यर्थः । आत्मभेद इति ;—यदि नाहं देवदत्त इत्यादिप्रतीतेः [२]देहान्तरभेदविषयत्वं तदा आत्मसिद्धिरपि न स्यात् । सर्वव्यवहारस्य देहादेवोपपत्तेः । [३]पारलौकिकप्रवृत्त्याद्यनुपपत्तिस्तु भवन्मतेऽपि समाना । देहान्तराणां निर्जीवत्वादिति भावः ।

---

१. सिद्धमुक्तादि—ग । २. तत्तद्देहान्तर—क, ख ।
३. पारलौकिकापारलौकिक—ग ।

ननु देहादन्यस्याध्यस्तजीवस्य सत्त्वात् अध्यस्तजीवभेदमादायापि अहं देवदत्तो न तदनुभवजन्यस्मृत्यनाधारत्वात् [1]इत्यादेः पर्यवसन्नत्वात् न स्वाभाविकभेद[2]सिद्धिरित्यत्राह,—तत्र यदीति। यदि देहान्तरे स्वाप्न[3]शरीर इव अध्यस्तजीवमादायान्यथासिद्धिः तर्हि परमार्थतो जीवः [4]क्वापि [5]न स्यात्। अविशेषात्; व्यवहारादेरन्यथोपपत्तेरिति भावः। नन्वेकस्मिन् शरीरे आत्मा वर्तते तस्मिन् जीवत्वमात्रं कल्पितं अन्यत्रोभयं कल्पितं इति वैषम्यं शङ्कते एकत्रेति। आत्मनोऽधिष्ठानतया सतो न क्वापि कल्पनेति परिहरति;—नेति। अन्यथेति;—आत्मनोऽपि कल्प्यत्व इत्यर्थः॥

तदेव लभ्यमिति;—एवं प्रलपतो[6]हयज्ञत्वं लभ्यमित्यर्थः। ननु निरधिष्ठानभ्रमो[7]ऽप्यस्तु स्वाप्नवदित्याशङ्क्य तत्राह;—स्वाप्नस्येति। ज्ञान [8]द्रष्टरीव स्वाप्नाध्यासस्तत्र तदुभयं सत्यमेव। न चात्रापि तथा वक्तुं शक्यमिति भावः॥१३॥

अक्ष०—एक एव जीवः, सचैकस्मिन्नेव शरीरे, इतराणि शरीराणि निर्जीवानि इति मायामतप्रभेदं निरसितुमनुवदति साविद्यमिति। इदं पूर्वमतस्यापि साधारणम्। एतन्मतस्य विशेषमाह—स चेति। पूर्वमत इवानेकशरीरको न भवतीति भावः। वक्ष्यमाणाद्विशेषमाह—नेतर इति। तर्हि कथं विचित्रानेकपुरुषोपलब्धिरित्यत्राह—स्वप्नादिति। एकस्यैव पुरुषस्य स्वप्नावस्थायां बहुविधपुरुषभ्रमवत् जाग्रत्प्रपंचस्यापि भ्रम एवेत्यर्थः। आत्मभेदाभावे शुको मुक्त इत्यादिकं कथमिति चेत् आह—नेत इति। तर्हि पश्चादपि न मुक्ता भविष्यन्तीत्यनिष्टापत्तिरित्याह न परमिति। किमर्थं मोक्षशास्त्रमित्यत्राह सत्त्विति। य एकोजीव इत्युक्तः स एव श्रेयः मोक्षं प्राप्स्यति तदर्थमेव मोक्षशास्त्रमिति भावः। नित्यमुक्तस्य ब्रह्मणः कथं बन्धमोक्षावित्यत्राह मायोत्थाविति। परमार्थतो बन्धाभावेऽपि तत् अपारमार्थिकमिति ज्ञापनार्थमेव मोक्षशास्त्रं प्रवृत्तमिति भावः। निरस्यति—असदिति। आत्मभेदो हि सर्वप्रमाणसिद्धः तदपह्नवे सर्वमानोपरोधस्स्यादिति भावः। शरीरान्तराणां निर्जीवत्वे एकशरीरस्यापि निर्जीवत्वापत्तिः, जीवत्वाध्यासस्य सर्वत्राविशेषादित्यपि बोध्यम्॥ १३॥

उपदेशानुपपत्त्या मोक्षानुपपत्तिः

---

१. इत्यनयोः—ग। २. साधनमि—ख। ३. शरीरमिवा—ग।
४. क्वापि शरीरे—क, ख। ५. न स्यात् व्यवहारादे।—ग ६. ततोऽज्ञत्वं—ग,
७. भ्रमाङ्गीकारोऽप्यस्तु—क, ख, ८. दृष्टेरिव—क, ख;

स्वस्य स्वेनोपदेशो न भवति न परब्रह्मणा निष्कलत्वा-
ज्ञाविद्या चेतयित्री स्वतनुसमधिकं वर्ष्म निर्जीवमात्थ।
कश्चित्तत्त्वं ब्रवीतीत्ययमुपनिपतद्भ्रान्तिरुन्मुच्यते चेत्
तादृग्भ्रान्तिः पुराऽपि ह्यभवदिति न ते किं तदैवैष मुक्तः ॥१४॥

सर्वा०—एकस्य जीवस्योपदेष्टृत्वासम्भवादनिर्मोक्षप्रसङ्गमाह—स्वस्येति ॥ अत्र स्वात्मैव वा स्वस्योपदेष्टा ? अशरीरं वा परं ब्रह्म ? विश्वाध्यासहेतुरविद्यैव वा ? देहान्तरप्रतीतो जीवो वा ? इति विकल्पमनुस्मृत्य पूर्वार्धेन क्रमाद्दूषणम्। ननु * अनादिमायया सुप्तो यदा जीवः प्रबुध्यते इति वचनादुपदेशनिरपेक्ष एव कदाचिद्बोधोऽस्तु। मैवम्, नैरपेक्ष्यानुक्तेः। जीव इत्येकत्वोक्त्या जीवान्तरासम्भवान्नैरपेक्ष्यं सिद्धमिति चेन्न; एकवचनस्य जात्यैक्यपरत्वात्। नैरपेक्ष्येऽपि निस्तारं शङ्कते—कश्चिदिति। शुकादिषु मुक्तिहेतुतया पूर्वमपि तादृशभ्रमजननात्तदानीमेवास्य मोक्षः स्यादित्याह—तादृगिति। परस्मै ब्रवीतीति तदा भ्रान्तिरिति चेत्; तथाऽप्यद्वैतं ब्रवीतीत्यवगतेरर्थतः स्वार्थोपदेशभ्रमफलसिद्धेः। तदेवं हेत्वनुपपत्त्या नित्यमनिर्मोक्षः; अहेतुकमोक्षे नित्यमुक्तौ च शास्त्रनैष्फल्यमिति। तदभ्युपगमे सिद्धान्तत्यागात्कृतं वादेनेति ॥ १४ ॥

आनन्द०-एकशरीरवादे दोषान्तरमाह;—एकस्येति;—अशरीरं परं ब्रह्म-शुद्धं ब्रह्मेत्यर्थः। विश्वाध्यासहेतुरविद्येति;-विश्वाध्यासकारणभूताज्ञानमित्यर्थः। तस्य तन्निवर्तनोपयुक्तत्वं विरुद्धमिति ध्वन्यते। मनसिकृत्येति- अनत्याधान इति गतिसमासः।

न च तस्मिन् निधायेत्यर्थः। उपदेशनिरपेक्ष इति;—ननु मोक्षसाधनीभूतोपदेशस्य उपदेशनैरपेक्ष्यमस्तु न तावता उपदेशानुपपत्तिरिति परिहार इति चेत्; मैवम्; स्वप्नोपदेशतुल्यत्वादिति भावः। अस्मिन् पक्षे शास्त्रवैफल्यमिति ध्येयम्। नैरपेक्ष्येति;—अनादिमायये[1]त्यनेन नैरपेक्ष्यानुक्तेरित्यर्थः। जीवान्तरेति;—स्वस्य स्वापेक्षयोपदेशायोगात् अन्यस्योपदेश्यस्योपदेष्टुश्चाभावा[2]दित्यर्थः। ननु न कस्याप्युपदेशः अपि तु स्वत एव ज्ञानं [3]भवति। तत्रायमुपदिशति तस्मात्ज्ञानं जातमिति भ्रान्ति[4]मात्रम्। तस्मात्स्वतो ज्ञातज्ञानान्मुक्तिस्सेत्स्यतीत्याशङ्कत इत्याह;—नैरपेक्ष्येऽपीति। तर्हि शुकादीनामपि स्वतो ज्ञानस्य हेतुर्नैरपेक्ष्य स्यादावेव संभवात् तत्रोपदेशजन्यत्वभ्रमसंभवाच्च आदावेव मुक्तिस्स्यादित्याह;—शुकादिष्विति। स्वस्य यत् ज्ञानं तत्रोपदेशजन्यत्वभ्रमो न भवति येन स्वस्य

---

१. त्वस्मिन्नैर-ग, २. 'मोक्षप्रसङ्ग-इ, क, ३. भवेत्-ख।
४. न्तिमात्रात् ततो ज्ञा-ख, न्तिमात्रज्ञा-क,।

तादृशज्ञानवत्तया पूर्वमेव मोक्षस्स्यात्। अपि तु परस्मै तत्त्वं ब्रवीतीति;[१] तस्मात्तत्रोपदेशोऽपि वस्तुतो नेति नोक्त दोष इति शङ्कते;— परस्मै इति। स्वार्थोपदेश इति;—[२]अयममुमर्थं ब्रवीतीति ज्ञानमेव[३] स्वार्थोपदेश[४]पर्यवसन्नमित्यर्थः। हेत्वनुपपत्त्येति;—ननु स्वयमेव स्वस्मा उपदिशति।

न च ज्ञाने उपदेश्यत्वस्यानुपपत्तिः अज्ञाने उपदेष्टृत्वस्येति वाच्यम्; ज्ञाने विद्यमानेऽप्यन्यशरीरावच्छेदे[५]न ज्ञानार्थमुपदेशसंभवात्। न चैकज्ञानादेव मोक्षसंभवे शरीरान्तरे[६] तज्ज्ञानं व्यर्थमिति व्याच्यम्; ज्ञानस्य स्वावच्छेदकावच्छेदेनैवाज्ञाननिवर्तकत्वात्। अन्यावच्छेदेन ज्ञानाभावे अन्यशरीरावच्छेदे[७]नाज्ञाननिवृत्त्यनुपपत्तेः।

न च सौभर्यादिरेकशरीरावच्छेदेन ज्ञा[८]नेऽपि शरीरान्तराव[९]च्छेदेनाप्यज्ञान[१०]निवृत्तिर्दृष्टेति वाच्यम्; तस्यैकशरीरावच्छेदेन[११] ज्ञानोदयकाले योग[१२]महिम्ना सर्वशरीरावच्छेदेनापि ज्ञानोदयात्। तस्मात् किञ्चिदवच्छेदेन ज्ञाने सत्यपि [१३]तदन्यावच्छेदेन ज्ञानार्थमेवोपदेश इति चेत्; उच्यते; यद्येकावच्छेदेन ज्ञानेसत्यपि अपरावच्छेदेनाज्ञानं स्यात् तदा युज्यते; तदेव नोपपद्यते, एकशरीरैकजीववादे तदयोगात् नाप्यनेकशरीरैकजीववादे संभवति। यद्गोचरं ज्ञानं तत्समानगोचरसमानाश्रयाज्ञानस्य निवृत्तिरित्यङ्गीकारात्। अखण्डगोचरज्ञानेन अखण्डगोचराज्ञानस्य निवृत्तौ कथं शरीरान्तरावच्छेदेनाज्ञानम्? अन्यथा कदापि मुक्तिर्न स्यात् यावच्छरीरावच्छेदेन ज्ञानस्य कदाप्यसंभवात्। मुक्तिपूर्वकाले कदाचित्संभवतीति चेत्; न; हेत्वभावात् यावच्छरीरावच्छेदेनोपदेशासंभवात्।

न च प्रतिकल्पमेकैकशरीवच्छेदेनोपदेशे क्रमेण तावच्छरीरेऽपि ज्ञानं संभवतीति शक्यशङ्कम्[१४]; ज्ञानानां यौगपद्यासंभवे संभूयाज्ञाननिवर्तकत्वायोगात्। न च संस्कारद्वारा निवर्तकत्वम्! संस्कारस्य कल्पान्तरीयस्याश्रयाभावेन स्थित्यसंभवात् निर्हेतुकमपि तावदवच्छेदेन ज्ञानं न संभवति! तावच्छरीराणां भूतभावित्वेन यौगपद्यासंभवात्।

---

१. तीतिमत्त्वा स तत्रोपदेशोऽपि वस्तुतो नेति–ग, तीति तस्मात्तत्रोपदेशो नेति–घ, तीति वस्तुतस्तत्रोपदेशो नेति–क,
२. अयमर्थं–ख।
३. तदर्थगोचरस्वार्थो–ख,
४. शज्ञानप–ख।
५. देनतज्ज्ञाना–ख,
६. रावच्छेदेनत–ग।
७. देन निवर्तकत्वानु–क, ख,
८. नेशरीरा–ख।
९. देनैवाप्यज्ञा–ख, वच्छेदेनाज्ञा–क,
१०. निवर्तत इति–क।
११. वच्छेदेनैवज्ञानो–ग,
१२. प्रभावेनापर–घ।
१३. तदन्य तज्ज्ञानार्थमेव–ग, तदन्यावच्छेदेना–ख,।
१४. ङ्कं तावज्ज्ञानानां–ग, ख।

ननु वर्तमानयावच्छरीरावच्छेदेन तज्ज्ञानं हेतुः तच्च निर्हेतुकमित्यपि न सारम् । ज्ञानस्य निर्हेतुकत्वे[१] पूर्वमेव संभवेन संसारात्यन्ताभावापत्तेः । किं च अहेतुकत्वे मोक्षस्यैवाहेतुकत्वं वक्तुमुचितम्[२] किं ज्ञानस्याहेतुकत्वोक्त्या ? अस्तु तथेति चेत्; तत्राह—अहेतुकमोक्षे इति । शिष्यो जीवस्त्वसिद्ध इत्यादिना वक्ष्यमाणेन पौनरुक्त्यशङ्कां तदवसरे परिहरिष्यामः । मूलं;—स्वस्य स्वेनोपदेशो नोपपद्यते ज्ञानाज्ञानाभ्यां विरोधात् परब्रह्मणापि स्वस्योपदेशो न भवति निष्कलत्वात्—ज्ञातृत्वादिरहितत्वात् । अविद्ययाऽपि[३]न; चेतयितृत्वाभावात् । स्वस्य तनोरधिकमतिरिक्तं वर्ष्मंशरीर[४]—तनुस्वरूपमिति वा न उपदेष्टृ निर्जीव[५]-त्वस्य त्वयोक्तेः ।

न नूपदेशो वस्तुतो नास्त्येव । अपि तु स्वतो ज्ञानवत्त्वेऽपि अयमुपदिशतीति भ्रान्तिमतोऽपि निर्विशेष- ज्ञाना[६]त्स मुच्यते इति चेत्; उच्यते[७];—तादृग्भ्रान्तिः—अयमस्मा उपदिशतीति । [८]तेन भ्रान्तिरूपज्ञानेन तव पक्षे पूर्वमेव स एको जीवः किमिति मुक्तो न भवेत्[९] । पूर्वमेव मुक्त्या संसारस्योच्छेदस्स्या[१०]दिति भावः इति योज्यम्[११] ॥ १४ ॥

अक्ष०—ऐकात्म्यपक्षे उपदेशानुपपत्त्या मोक्षः न स्यादित्याह—**स्वस्य स्वेनेति** । उपदेशो नाम अज्ञातज्ञापनं कस्यचित् अनभिज्ञातं ज्ञापयितुं तदभिज्ञस्य वचनमिति यावत् । तत्र वक्त्राऽभिज्ञेन भवितव्यं श्रोत्रा चानभिज्ञेन; एकात्मवादे च ज्ञानाज्ञानयोरेकत्रविरोधात् उपदेशो न सम्भवतीत्यर्थः । तर्हि ब्रह्मैवोपदिशत्वित्यत्राह—**न परब्रह्मणेति** । परब्रह्मणो निष्कर्मत्वात् अशरीरत्वात् वचनक्रियैव न सम्भवतीत्यर्थः । सर्वाध्यासहेतुरविद्यैव उपदिशेदित्यत्राह—**नाद्येविति** । अचेतनत्वादविद्याया उपदेष्टृत्वं न सम्भवतीति भावः । जीवान्तरमुपदिशतीति-वचनस्य प्रसक्तिरेव नास्ति शरीरान्तरे जीवस्यैवानभ्युपगमादित्याह **स्वतनुसमधिकमिति** । स्वशरीरातिरिक्तं **वर्ष्म**—शरीरमित्यर्थः । एवं साविद्यं ब्रह्म जीव इत्यत्र विशिष्टस्य विशेष्यस्य विशेषणस्य वा उपदेष्टृत्वं न सम्भवतीत्युक्तम् अथ उपदेशाभावेऽपि स्वत एवोत्पन्नेन ज्ञानेन कस्यचिदुपदेशाधीनमिदमिति भ्रमविषयेण मोक्षः

---

१. त्वेऽपि—ख,
२. चितं; अस्तुतथे—क, ख ।
३. पि न तदुपयुक्तचैतन्याभावात्—ख,
४. शरीरान्तरं वा—क, ख ।
५. त्वाभिधानात्—ख,
६. नान्मुक्तिरिति—ख ।
७. च्यते;—अयमस्मा—ख,
८. तादृग्भ्रान्त्या—ख ।
९. वेत् तथाच पूर्वं—ख,
१०. दित्यर्थः—ख ।
११. ननु शिष्यो जीवस्त्वसिद्ध इत्यादिना उपदेशानुपपत्तिदूषणस्य वक्ष्यमाणत्वात् तत्र तदेवदूषणं किमर्थमुच्यते इति न शङ्क्यम्; तदवसरे परिहरिष्यमाणत्वादिति—ग ।

स्यादित्याशङ्कते कश्चिदिति। तत्त्वं ब्रवीति–तत्त्वमुपदिशति इति। उपनिपतद्-भ्रान्तिः—उत्पन्न भ्रमः। मुच्यते चेत्—मुक्तो भवतीति चेत् इत्यर्थः। परिहरति-तादृक्भ्रान्तिरिति—उक्तभ्रमः। पुरापि-शुकादिज्ञानकालेऽपि। अभवत्—सम्भावित एवेति। ते—भवतः—मते तदैव—भूतपूर्वशुकादिज्ञानकाल एव। एषः—एकजीवः कुतो न मुक्तोऽभूदित्यर्थः। तस्मादेको जीवश्चेत् कदाऽपि स न मुक्तो भवेदिति भावः।

आचार्यवान् पुरुषो वेद आचार्यादेव विद्या विदिता·········प्रापदित्यादिना आचार्योपदेशाधीनज्ञानस्यैव साधुत्वेन मोक्षसाधनतया बोधनात् मोक्षसम्पत्तये तत्त्वोपदेशाय शिष्याचार्यभावं निर्वोढुं आत्मनानात्वमवश्यमभ्युपेतव्यमिति भावः ॥ १४ ॥

इत्येकशरीरैकजीववादभङ्गः

तोयाधारेषु दोषाकर इव बहुधोपाधिषु ब्रह्म शुद्धं
छायापन्नं विशेषान् भजति तनुभृतस्तत्प्रतिच्छन्दभूताः।
इत्यप्यत्यन्तदुःस्थं प्रसजति च तदा जीवनाशोपवर्ग-
श्छायाच्छायावदैक्यं न भजति न च तद्दर्शनं ब्रह्मणस्ते ॥ १५ ॥

सर्वा०—अथ बहुजीवक्लृप्तिपक्षं शङ्कते—तोयेति॥ नित्यशुद्धस्य ब्रह्मणो न भ्रान्तिः। यथा नित्यशुद्धेऽपि चन्द्रमसि तत्प्रतिबिम्बेष्वाधारभेदानुगुणा विशेषाः काल्पनिकाः, एवमविद्याविवर्तेषु पृथगभिव्यक्तं ब्रह्म तत्तदनुगुणविचित्रविशेषवदिव भाति। ईदृशभेदक्लृप्त्या मुक्तादिसमस्तव्यवस्थोपपत्तिः। इमं पक्षं दूषयति—इत्यपीति। अयं भावः—यदि ते बद्धमुक्तबन्धमोचकादिव्यवस्था भ्रान्तिसिद्धा सा तर्ह्येकजीववादेऽप्यविशिष्टेति किं बहुजीवबह्वविद्याकल्पनेन? ब्रह्मणो जीवभावानुपपत्त्या पृथग्जीवाः कल्प्या इति चेन्न; मिथ्याभूतजीवत्वस्य विरोधाभावात्; अन्यथा अध्यासाधिष्ठानत्वस्य विरोधप्रसङ्गात्। न च निरधिष्ठानं भ्रममिच्छसि। *दुर्घटत्वमविद्याया भूषणमिति च पश्यन् ब्रह्माज्ञानं किं नानुमन्यस इति।

अस्मिन्पक्षे दूषणान्तरमाह - प्रसजतीति। यथा प्रतिबिम्बाधारनिवृत्तौ तत्रोत्पन्नस्यानिर्वचनीयस्य प्रतिबिम्बस्य नाशः, तथा तत्तदविद्यानिवृत्तौ ते ते जीवा नश्येयुः। मुक्तौ जीवानां ब्रह्मणैकीभावमात्रं नतु नाश इत्यत्राह—छायेति। छायावत्कल्पिता जीवा इति मन्यसे। तत्र हि बाधदशायामाधारनिवृत्तिदशायां वा छायायां छायावता सहैक्यापत्तिर्न दृश्यते, तद्वदिहापि। तैमिरिकचन्द्रभेदन्यायेनाप्यत्र न भवति, तत्रापि बाधदशायां द्वितीयादिचन्द्राणां प्रथमचन्द्रैक्यापत्तेरनभ्युपगमात्। दूषणान्तरमाह—न चेति।

बिम्बप्रतिबिम्बयोर्द्वितीयादिचन्द्राणां चन्द्रद्रष्टा कश्चिदन्यस्सिद्धः; इह तु न कश्चित्; ब्रह्मणो दृङ्मात्ररूपत्वाङ्गीकारात्, अविद्यायास्तु द्रष्टृत्वप्रसङ्गाभावात्, प्रतिबिम्बस्थानीयानां जीवानां स्वाध्यासहेतुत्वायोगात्। अनादिरध्यासो हेतुनिरपेक्ष इति चेन्न, स्वरूपानादेरविद्ययाऽपि नैरपेक्ष्यप्रसङ्गात्; प्रवाहानादित्वे जीवानां भङ्गुरत्वप्रसङ्गात्। तथा च धीसन्ततिवादसमत्वम्, अकृताभ्यागमादिप्रसङ्गः, श्रुत्यादिविरोधश्च स्यात्। ईदृशभ्रमनिरासाय सूत्रितं च सुप्तोत्थितं प्रति * स एव तु कर्मानुस्मृतिशब्दविधिभ्य इति ॥ १५ ॥

आनन्द०—[1]आक्षेपसङ्गत्या वहुजीवपक्षमुपक्षिपति;—अथेति। नित्यशुद्धस्येति—शुद्धस्याविद्याश्रयत्वाभावेऽपि अविद्याविलासेषु प्रतिबिम्बसम्भवात् प्रतिबिम्बेषु जीवेषु तरङ्गचन्द्रेष्विव तद्गता विशेषास्युरित्यर्थः। एवं च एकजीववादगता[2] दोषा अत्र [3]न प्रभवन्तीत्याह—ईदृशेति। [4]अत्यन्तदुःस्स्थमित्युक्तम्; कथमित्यत्राह;—अयं भाव इति। बद्धमुक्तवन्धमोचकादिव्यवस्था[5] सिद्धा न वेति विकल्पे[6] द्वितीयस्यापसिद्धान्तनिरस्तत्वात् प्रथमं दूषयति यदि ते बद्धेति। एकजीववादेऽपीदृशभ्रान्तिस्सुलभेति भावः। ननु ब्रह्मणो नित्यशुद्धस्य[7] वन्धानुपपत्तेः ततः पृथग्भूता जीवाः कल्प्या इत्याशङ्कते;—ब्रह्मण इति। अन्यथेति;—अध्यस्तेनापि विरोधादित्यर्थः। नन्वध्यासाधिष्ठानत्वं[8] मास्त्वित्यत्राह;—नचेति। तथा सति माध्यमिकमतापात इति भावः। नन्वेकजीववादपक्षे ब्रह्मण एवाविद्या[9]श्रयतया जीवत्वात् निर्विशेषे नित्यशुद्धे अविद्याया[10] वृत्त्यानुपपत्तेरिति ततोऽतिरिक्ता जीवा अविद्याश्रयतयाऽङ्गीकार्या इत्यत्राह—दुर्घटत्वमविद्याया इति। यथा प्रतिबिम्बाधारनिवृत्ताविति;-दर्पणा[11]देर्निवृत्तौ मुखादिप्रतिबिम्बस्य निवृत्तिरित्यर्थः। ननु दर्पणादिस्थले न प्रतिबिम्बाध्यासः नयन[12]रश्मीनां परावृत्य बिम्बग्राहक[13]त्वात्। न च ग्रीवास्थस्य दर्पणस्थतानुपपत्तिरिति वाच्यम्; दर्पणस्थत्वस्य तत्राध्यासात्। तथा च प्रतिबिम्बोपाधिनिवृत्तावपि न प्रतिबिम्बस्य निवृत्तिरिति न जीवस्य निवृत्तिः। किं तु दर्पणस्थत्वादेरिव जीवभावस्य निवृत्तिः। ननु ग्रीवास्थतया साक्षात्क्रियमाणे मुखे कथं दर्पणस्थताध्यास इति

---

१. आक्षेपसंगत्याऽऽह;–अथेति–ग। २. पक्षे उक्तादोषा–ग, ३. नभवन्ती–ग।
४. ननु जीवभेदाङ्गीकारात् बद्धमुक्तादिव्यवस्थोपपत्तेः कथमत्यन्तदुःस्थत्वमित्यत्राह।
५. स्वभावसिद्धानवेति–ग, भ्रान्तिसिद्धास्वभावसिद्धावेति–ख।
६. त्यमभिप्रेत्य–ख।
७. नित्यसिद्धस्य–ग, ८. ष्ठानत्वमस्त्वि–ख।
९. श्रयत्वाङ्गीकारान्निर्विशेष–ग, १०. द्याया अनुपपत्तेरिति–ग।
११. णादिनिवृत्तौ–क, १२. वृत्तीनां–क।
१३. त्वाङ्गीकारात्–क,

चेन्न; औपाधिकाध्यासस्य विशेषदर्शनानिवर्त्यत्वात्। अन्यथा प्रातिभासिकप्रतिबिम्बाध्यासपक्षेऽपि विशेषदर्शनस्याध्यासनिवर्तकत्वं प्रातिभासिकरजताध्यासस्थले क्लृप्तमिति दोषसाम्यात् नाविद्यानिवृत्त्या जीवनाश इति शङ्कामनुवदति;—मुक्तौ जीवानामिति। भवदीयैरेव प्रतिबिम्बस्याध्यस्तत्वाङ्गीका[1]रात्। सिद्धान्तसंग्रहे 'चैत्रमुखाद्भेदेन तत्सदृशत्वेन च पार्श्वस्थैः स्पष्टं निरीक्ष्यमाणं दर्पणे तत्प्रतिबिम्बं ततो भिन्नं स्वरूपतो मिथ्यैव स्वकरगतादिव रजताच्छुक्तिरजतम्' इत्यादिना विस्तृतम्। बिम्बप्रतिबिम्बयोरप्यैक्यं बाधितमेवेत्युपाधिनाशे प्रतिबिम्बस्यापि नाश इति जीवनाशो दुर्वार इत्याह;—छायावत्कल्पिता जीवा इति। ननु चन्द्रभेदेभ्रमस्थले भेदमात्रनिवृत्तिः। तथा बिम्बप्रतिबिम्बयोरपि भेदनिवृत्तिमात्रम् न तु नाश इत्यत्राह;—तैमिरिकेति। तिमिरेण—नयनदोषेण जन्यमित्यर्थः। बिम्बस्योपाधावध्यास एव प्रतिबिम्ब इति पक्षे अध्यासकस्ततो भिन्नः पूर्वं वाच्यः दर्पणे मुखाध्यासे [2]देवदत्त इव। तथा सति जीवाध्यासको ब्रह्म वा अविद्या वा जीवो वेति विकल्पमभिप्रेत्य दूषयति;—द्वितीयादिचन्द्राणामित्यादिना। हेतुनिरपेक्षः—अध्यासनिरपेक्षः। अनादित्वं स्वरूपेण प्रवाहरूपेण वा? नाद्य इत्याह;—स्वरूपेति। कारणनिरपेक्षत्वादिति भावः। प्रवाहानादित्वे इति;—अध्यासस्य द्रष्ट्रादिनिरपेक्षत्वे पूर्वपूर्वाध्यासेनोत्तरोत्तराध्यासो वाच्यो ज्वालावत्। अन्यथा एकशरीरानेकजीवप्रसङ्गात्। [3]न च यावदेकशरीरमेकजीवस्थितिरित्यत्र नियामकमस्तीति जीवानां बौद्धकल्पितं भङ्गुरत्वमित्यर्थः। *धीसन्ततिवादसमत्वमिति;—क्षणिकत्वनिर्णयाभावादिति भावः। यद्वा;—आत्मनो धीत्वनिर्णयाभावादिति भावः। इष्टापत्तिं परिहरति;—अकृतेति। नित्यो नित्यानामित्यादिश्रुतिविरोधः। 'नित्यो व्यापी स्वतश्शुद्ध' इत्यादिस्मृतिविरोध [इत्यर्थः?]। सूत्रविरोधं चाह;—ईदृशेति। स एव त्विति;—किं सुप्त एव प्रबोधकाले उत्तिष्ठति उत स एवान्यो वेत्यनियमः? इति संशये अन्य इति पूर्वपक्षं कृत्वा सुषुप्तेः प्रागारब्धकर्मसमापनात् सोऽहमिति प्रत्यभिज्ञानात् 'त इह व्याघ्रो वा सिंहो वेत्यादिना यद्यद्भवन्तीति शब्दान्मोक्षसाधनविद्यानर्थक्याच्च स एवोत्तिष्ठतीति राद्धान्तितमित्यर्थः। एतेन 'अन्तःकारणावच्छिन्नो जीवः अन्तःकारणनानात्वाज्जीवनानात्वम्। तेन बन्धमोक्ष-

---

१. ङ्गीकारात्। विवरणकारदिमतेऽपि छायाया वृक्षादेश्चैक्यस्य बाधितत्वस्य प्रतिपादनात्। तद्वदेव बिम्बप्रतिबिम्बयोरैक्यं वा—ग, घ।

२. देवदत्तवत्—क।

३. न च यावदेकशरीरमेकजीव इति वाच्यम्; तत्र मानाभावात्; तथात्वेऽपि वा देहतुल्यतया ततोऽतिरिक्तत्वासिद्धिप्रसङ्गेन चार्वाकपक्षप्रसङ्गात्। तथाच जीवनां बौद्धकथितक्षणभङ्गुरत्वमित्यर्थः—क, ख।

व्यवस्थाच' इति पक्षोऽप्ययुक्तः, गत्वाराणां तेषां गत्वरेष्वन्तःकरणेषु गच्छत्सु तदवच्छिन्नप्रदेशस्य प्रतिबिम्बस्य च भिन्नत्वेन कृतहानादिप्रसङ्गात्। विस्तरस्तु ग्रन्थान्तरे द्रष्टव्यः॥ १५॥

अक्ष०—बद्धमुक्तादिव्यवस्थोपपत्तये बहुजीवक्लृप्तिपक्षमुपक्षिपति—तोयाधारेष्विति—जलाधारेषु निशाकर इव बहुषु अविद्यान्तःकरणाद्युपाधिषु शुद्धं निर्दोषं ब्रह्म छायापन्नं प्रतिबिम्बितं सत् जीवत्वादिविशेषान् भजति। तनुभृतः—जीवाः। ब्रह्म प्रतिच्छन्दभूताः प्रतिबिम्बभूता इत्यर्थः। एवमुपाधिभेदेन जीवबहुत्वात् बद्ध-मुक्त-व्यवस्थोपदेशाद्युपपत्तिरिति भावः। प्रतिक्षिपति--इत्यपीति। अत्रापि बद्ध मुक्त व्यवस्थायाः भ्रान्तिसिद्धत्वेन जीवैक्यपक्षात्—जीवनानात्वादिकल्पनात् गौरवं परमतिरिच्यत इति भावः। दूषणान्तरमप्याह--प्रसजतीति। आधारनाशे प्रतिबिम्बनाशदर्शनात् मुक्तावन्तःकरणाद्युपाधिनाशे प्रतिबिम्बभूतजीवनाश एव अपवर्ग इत्युक्तस्स्यादिति (स्वनाशरूपापवर्ग एव न प्रवर्तेत) इति भावः।

उपाधिनाशे प्रतिबिम्बभूतजीवः बिम्बभूतेन ब्रह्मणा ऐक्यमेव प्राप्नोति न तु नश्यतीत्यत्राह—छायेति। छायावता बिम्बेन सह छायाप्रतिबिम्बं ऐक्यं न भजति—अन्यत्रादर्शनादिति भावः।

किं च दर्पणाद्युपाधौ देवदत्तादयः प्रतिबिम्बं स्वमुखं अध्यस्यन्ति। तद्वदिह अन्तःकरणाद्युपाधौ ब्रह्माध्यासकपुरुषाभावात् च न बिम्बप्रतिबिम्बभाव इत्याह नच तदिति। ब्रह्मणस्त्वन्मते दृङ्मात्ररूपत्वोपगमात् ज्ञातृत्वाभावेन प्रतिबिम्बदर्शनं न भवतीत्यर्थः। अविद्याया अचेतनत्वात् जीवानां स्वाध्यासहेतुत्वायोगाच्च न दर्शनमित्यपि बोध्यम्॥ १५॥

एकं ब्रह्मैव नित्यं तदितरदखिलं तत्र जन्मादिभागि-
स्त्याम्नातं तेन जीवोऽप्यचिदिव जनिमानित्यनध्येतृचोद्यम्॥
तन्नित्यत्वं हि साङ्गश्रुतिशतपठितं सृष्टिवादः पुनः स्यात्
देहादिद्वारतोऽस्येत्यवहितमनसामाविरस्त्यैकरस्यम्॥ १६॥

सर्वा०—ब्रह्मदत्तादिभिरुक्तं जीवानां स्वरूपतस्सृष्टिसंहृतिविषयत्वमनूद्य दूषयति—एकमिति॥ जनिमानिति लयोपलक्षणम्। अनध्येतृचोद्यम्—कतिपयाध्येतुस्तात्पर्यानभिज्ञस्य वा चोद्यम्। साङ्गशब्दः सोपबृंहणपरः, *अजो नित्यः शाश्वतोऽयं पुराणः, *प्रकृतिं पुरुषं चैव इत्यादिश्रुतिस्मृतिशतमिह भाव्यम्। सृष्टिवादः—*तोयेन जीवान्व्यससर्ज इत्यादिः। * पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि इत्यादिलयवाद उपलक्ष्यते। ब्राह्मणो जायते, क्षत्रियो जायते, इत्यद्यतनजन्मादौ दृष्टम्। तद्वत् प्राकृतिकनैमित्तिकसृष्टयादावप्यचिदुपष्टम्भेन निर्वाह इहादिशब्दग्राह्यः। अवहितमनसां—श्रुतितात्पर्यैकाग्रमनसामित्यर्थः॥ १६॥

आनन्द०—ननु जीवानां भङ्गुरत्वं स्यादित्युक्तम्; तत्रेष्टापत्तिरिति[1] संगत्या यादवप्रकाशमतमाह;—ब्रह्मदत्तादिभिरिति। आदिशब्देन भास्करादिग्रहणम्। ननु नित्यताबोधकश्रुत्यध्ययनं विना कतिपयमात्राध्ययनं कथमित्यत्राह;—तात्पर्यानभिज्ञस्येति। नन्वङ्गानां वर्णपदशक्त्यादि[2]ग्राहकत्वात् कथं जीवनित्यताबोधकत्वम्? तद्विनाऽप्यङ्गत्वनिर्वाहात्; अङ्गसाहित्यकीर्तनमफलमित्यत्राह;—साङ्गशब्द इति। इतिहासपुराणाभ्यां वेदतात्पर्यग्रहादिति भावः—

'नित्यो नित्यानां चेतनश्चेतनानाम्'

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।

क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥

उत्तमः पुरुषस्त्वन्यः........................।

इत्यादिरादिशब्दार्थः। अद्यतनजन्मेति;—कल्पादौ सृष्टस्य कल्पान्ते प्रलयस्य च वक्तुरद्यतनब्राह्मणो जात इत्यादि[3] व्यवहारस्य[4] देहसंबन्धपरत्वं[5] भवद्भिरुच्यते [6]तथाऽन्यत्रापि वक्तव्यमित्यर्थः॥ १६॥

अक्ष०—अत्र जीवानां स्वरूपतो जन्मनाशादिमत्वमनूद्य दूषयति—एकमिति। ब्रह्म एकमेव नित्यं तद्भिन्नमखिलं तत एव जन्मनाशादिभाक् इति 'यतो वा इमानि भूतानिजायन्ते' इत्यादिवेदवाक्यसमधिगतम्। तेन जीवोऽपि अचेतनवत् स्वरूपत एव जन्मादिविकारवानिति चोद्यं पूर्णाध्ययनाभावनिबन्धनमित्यर्थः। कुत इत्यत्राह—तन्नित्यत्वमिति। यतो जीवनित्यत्वं 'नित्यो नित्यानां' 'अजो नित्यः' शाश्वतोऽयं पुराणः न हन्यते हन्यमाने शरीरे' इत्यादि सोपबृंहणानेकश्रुतिपठितं, अतः क्वचित् सृष्टिवादः तोयेन जीवान् व्यससर्ज' ब्राह्मणोजातः क्षत्रियो जातः इत्यादिको जीवस्य देहादि द्वारतस्स्यात् न तु स्वरूपत इति पूर्वापरपरामर्शशालिनां सर्वप्रमाणैककण्ठ्यं प्रतीयेतैवेति नात्र कस्यापि प्रमाणवाक्यस्य बाधप्रसक्तिरिति भावः॥ १६॥

इत्यात्मानित्यत्वादिवादानामध्यक्षादिविरोधः

स्थैर्यं चेन्नाभ्युपेतं भवभृति न भवेदैहिकार्थप्रवृत्तिः
देहान्तत्वे तु धर्म्ये पथि निरुपधिका विश्ववृत्तिर्न सिध्येत्।
आकल्पस्थायिपक्षे कृतमफलतया मुक्तिमार्गोपदेशैः
आमोक्षस्थायितायां श्रुतिरनभिमुखो पुरुषार्थे चतुर्थे॥ १७॥

---

१. रित्याक्षेपसंगत्याऽऽह्—क। २. ग्राहकाणां—क।

३. इत्याद्यद्यतन—क; ४. स्य च दे—क।

५. त्वं; तेनाप्युपपन्नं जीपोत्पत्त्यादिपरत्वमिति—क।

६. तथा श्रुत्यादावपि निर्वाह इ—क,

सर्वा०—आत्मानित्यत्ववादिनश्चतुर्विधाः। तेषु ज्ञानात्मवादिनश्शरीरस्थितावप्यात्मनो भिदुरत्वमाहुः। प्राणेन्द्रियात्मवादिन आत्मानमाशरीरस्थायिनम्। पौराणिकैकदेशिनस्तु प्रलयान्तम्। औपनिषदाभासास्तु मोक्षावधिकम्। एतेषु दूषणवर्गः किंचिदुद्ग्रहणेनोपलक्ष्यते—स्थैर्यमिति ।। तत्र स्थैर्यं चेन्नाभ्युपेतमित्याशुतरविनाशित्वानुवादः। बाधकमाह—न भवेदिति। आत्मानमुत्तरकालानवस्थायिनं मन्यमानो न किंचिदुद्दिश्य प्रवर्तेत। तत्खल्वायत्यां सुखं दुःखनिवृत्तिं वाऽभिसन्धाय। तत्कथं घटेत? फलकाले स्वाभावात्, स्वकाले फलाभावात्। सन्तानैक्यादिकुसृतयस्तु प्रागेव निरस्ताः। द्वितीयपक्षे दूषणं देहान्तत्व इति। यदि देहावधिरात्मा, तदा देहात्मवाद इव प्रेक्षावतो महाजनस्य धर्मादनपेते मार्गेऽनादिस्सार्वत्रिकी दृष्टफलाद्युपाधिरहिता प्रवृत्तिर्न घटेत; तदाहुः—

* विफला विश्ववृत्तिर्नो न दुःखैकफलाऽपि च।
दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ।। इति।

तृतीयं दूषयति—आकल्पेति। अयं भावः—यदि सर्वदुःखनिवृत्तियुक्त आत्मनाश एव मोक्षः, स तर्हि वः कल्पान्ते स्वयमेवैष्यति। नचासौ पूर्वं साध्यः। त्वरया मध्ये स्वनाशार्थमुपायग्रह इति चेन्न; स्वनाशस्य सर्वप्रमाणैरपि पुमर्थत्वासिद्धेः। एवं च भाषितम्—

* अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति।
अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ।।

इति। चतुर्थे बाधकमाह—आमोक्षेति। अनभिमुखीति—स्वनाशरूपं चतुर्थपुरुषार्थं न वक्ति। स्वेन रूपेणाभिनिष्पन्नस्य भोगादीनप्याह।

ननु *विज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यतीति जीवविनाशः श्रूयते; मैवम्; लोकधीरूढानुवादमात्रत्वात्, अदर्शनमात्रपरत्वाद्वा। स्मर्यते च—*अदर्शनादिहायातः पुनश्चादर्शनं गत इति। अन्यथा कथम् *अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मा इति तन्नित्यत्वसाधनम्?

ननु *न प्रेत्य संज्ञाऽस्तीति मुक्तस्य निस्संबोधत्वश्रुत्या नाशस्सिध्येत्; न; देहादिभिरेकीकृत्य बुद्धेः तन्निबन्धनाख्याभेदस्य वा निवृत्तौ तात्पर्यात्। ब्रह्मण्यात्यन्तिकलयः कथम्? अनात्यन्तिकवत्, स्वशिष्टे ब्रह्मण्यौपाधिकरूपेण विशेषत्यागेन श्लेषस्य विवक्षितत्वात्। अन्यथा मुक्तिदशायां भेदोक्तिभिर्विरोधात्। *यथा नद्यस्स्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरूपे विहाय इति निदर्शनान्मुक्तोऽप्यस्तमेष्यतीति चेन्न, प्रविष्टजलस्य स्वरूपनाशाभावात्; अन्यथा पयःप्रस्थद्वयसंभेदे प्रस्थशेषत्वप्रसङ्गात्, *यथोदकम् इत्यारभ्य, *तादृगेव भवतीति श्रुत्यन्तरविरोधाच्च। घटध्वंसे घटाकाशोऽपि न नश्यत्येव; घटसंयोगनाशात् नश्यतीत्यु-

पचरन्ति। मुक्तिदशायां भेदनिवृत्तिवादाश्च कर्मकृतवैषम्यनिवृत्तिपराः। साधर्म्यवादिभिरप्येतदेव व्यवस्थाप्यते। *ब्रह्मैव भवतीत्यवधारणाज्जीवनिवृत्तिर्गम्यत इति चेन्न; अत्यन्तसाम्ये तात्पर्यात्। *यथा वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमाँल्लोकानभिजयतीति, तदेतत्, *नात्मा श्रुतेर्नित्यत्वाच्च ताभ्य इति सूत्राभिप्रेतमिति ॥ १७ ॥

आनन्द० — [१]प्रासङ्गिकी संगतिरित्याह;—आमानित्यत्ववादिन इति। चार्वाको बौद्धः पौराणिकैकदेशी औपनिषदाभासश्चेति चतुर्विधा इति। केचित्। अन्ये तु देहप्राणेन्द्रियज्ञानात्मवादिनश्चतुर्विधा इत्यप्याहुः। तेषु चतुर्विधेषु ज्ञानात्मवादिनो बौद्धाश्चतुर्विधाः। **शरीरस्थितावपीति;**—मरणरूपविनाशात्प्रागपि भिदुरत्वं— क्षणिकत्वम्। अन्ये तु देहस्याक्षणिकत्वेऽपि ज्ञानस्यात्मनः क्षणिकत्वमिति बौद्धैकदेशिमतमित्याहुः;

क्षणिकभङ्गुरं संततोदयम्।

इत्युक्तेरिति भावः। **प्राणेन्द्रियात्मवादिन इति;**—

प्राणेन्द्रियमनांस्येव चेतयन्ते पृथक्पृथक्।
आशरीरमवस्थानात् नातिरिक्तात्मकल्पना ॥

इति तदुक्तिदर्शनात् चार्वाकैकदेशिन आहुरित्यर्थः। 'तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवत्' इति सूत्रवृत्तौ 'आस्त्विन्द्रियाणि चेतयमानानि सप्राणानीति पक्षा[२]न्तरस्योपक्षेपात्। **औपनिषदाभासाः**—मायिनः। नन्वेषु दूषणानि बहूनि सन्ति किमिति नोक्तानीति शङ्कायामाहः—**तेषु दूषणवर्ग इति**। उद्ग्रहणं—प्रकाशार्थमुन्नततया ग्रहणम् ॥

ननु स्थैर्याभावमात्रेण कथं दृष्टार्थप्रवृत्त्यनुपपत्तिः? यावत्फलमवस्थानस्य संभवात् इत्यत्राह;—**आशुतरविनाशित्वानुवाद इति**। **उत्तरकालमिति;**— प्रवृत्त्युत्तरकालं क्षणिकस्य स्थित्यभावनिश्चयेनेत्यर्थः। ननूत्तरकालानवस्थाननिश्चयेऽपि प्रवृत्तिस्तु? को दोषः? इत्यत्राह;—**तत्खल्विति**। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति न्यायादिति भावः। ननु स्वसन्तानस्य फलसंभवात् प्रवृत्तिरस्तु? इत्यत्राह;—**संतानैक्येति**। प्रथमसरे इत्यर्थः। अभियुक्तसंमतिं दर्शयति—; **तदाहुरिति**। **विश्ववृत्तिः**—विश्वस्य प्रवृत्तिः। **विफला नो भवति** प्रेक्षावत्प्रवृत्तित्वात्। अन्यथा दुःखैकफले प्रवृत्तिर्न स्यादित्यभिप्रायेणाह—**न दुःखैकफलेति**। देहातिरिक्तात्मवादिनो दृष्टफलप्रवृत्तिरुपपद्यते इत्यत्राह;— **दृष्टलाभफला नाऽपोति**। न किञ्चित्फलं तस्येत्यत्राह;—**विप्रलम्भोऽपीति**।

---

१. जीवानित्यत्व प्रसङ्ग संगतिमाह—ख, प्रसङ्ग संगतिमाह—क।

२. न्तरमुपक्षिप्तं—क।

प्रेक्षावतो महाजनस्य धर्मादनपेते मार्गे दृष्टफलाद्युपाधिविधुराऽनादिस्सार्वत्रिकी प्रवृत्तिरतिरिक्तं नित्यमात्मानं साधयतीत्यर्थः ॥

ननु मोक्षमार्गोपदेशस्य मोक्षफलकत्वात् प्रवृत्तेश्च तदर्थतयोपपत्तेः कथमफलतेत्यत्राह;—अयं भाव इति। स तर्हीति;—तथाऽप्युपदेशवैयर्थ्यमित्यर्थः। वैयर्थ्यपरिहारं शङ्कते;—त्वरयेति। अत्र भाष्यं संवादयति;—एवं चेति स्वनाशरूपमिति;—एवं च पूर्वपेक्षया भेदान्न पौनरुक्त्यमिति भावः। एतेन पुत्राद्युपभोगसाधनार्थं स्वनाशफलेऽपि प्रवृत्तिस्संभवतीत्यपास्तम्। न ह्यन्यस्य दुःखाभावोऽन्यस्य फलं भवितुमर्हति। न ह्यन्यस्य प्रवृत्त्याऽन्यस्य दुःखाभावलक्षणो मोक्ष उदेति ! तन्नाशप्रसङ्गेन तेनाप्यनुभवितुमनर्हत्वादिति मोक्षोपदेशश्रुतिविरोधाच्च न मोक्षान्तो जीव इत्याह;—स्वेनरूपेणेति। शङ्कते;—नन्विति। मैवमिति;—लोकस्य-म्रियमाणजनसमीपस्थस्य जनस्य अयं नष्ट इति रूढस्य बुद्धिविषयस्यानुभवमात्रमित्यर्थः। ध्वंसवाचकत्वाभावान्नात्र ध्वंसः प्रतिपाद्यते अपितु अदर्शनमात्रमेवेत्याह;—अदर्शनमात्रमिति णश अदर्शन इति धातुरिति भावः। ननु नाशशब्दस्य ध्वंस एव रूढत्वात् ध्वंसवाचकोऽस्त्वित्यत्राह;—अन्यथेति। साधनं—प्रतिपादनम्। ननु जीवनाशश्रुतेर्यथाश्रुतार्थ एव ग्राह्यः। न प्रेत्येत्यादिवाक्येन संज्ञाभावप्रतिपादनस्यार्थाभावनिबन्धनत्वेन जीवात्माभावावगमाच्च नाशश्रुतिर्यथार्थेत्याशङ्क्य भ्रान्तिरूपबुद्ध्यभावपरतया देहाभावप्रयुक्तब्राह्मणदेवदत्तादिसंज्ञानिवृत्तिपरतया वा अन्यथासिद्ध्या न तदनुरोधेन मुख्यार्थस्वीकार इत्याह; ननु न प्रेत्येति। नन्विति;—आत्यन्तिकलयरूपायाः मुक्तेः जीवनाशं विनाऽसंभवान्नाशसिद्धिरिति भावः। यथा सुषुप्तिमरणादौ स्वं ह्यपीतो भवती-त्यादिना देहात्माभिमानाद्यौपाधिकाकारनिवृत्तिपूर्वकसंश्लेषमात्रपरतया न नाशपरत्वं तथा मुक्तावपीति परिहरति;—अनात्यन्तिकवदिति। नन्वनात्यन्तिके यथातथा वाऽस्तु। मुक्तौ बाधकाभावात् मुख्य एव लयोस्तु इत्यत्राह—अन्यथेति। 'सह ब्रह्मणेति भेदश्रवणादिति भावः। यथानद्य इति; रूपशब्देन स्वरूपाभिधानादिति भावः। दृष्टान्तविरोधान्न स्वरूपनाश इत्याह;—न; प्रविष्टेति। तत्र युक्तिः :—अन्यथेति। श्रुत्यैव तदर्थस्य स्पष्टत्वात् न परस्यावकाश इत्याह;—यथेति—

घटध्वंसे घटाकाशो न भिन्नो नभसा यथा।

इति वचनादपि न सेत्स्यतीत्याह;—घटध्वंसे इति। मुक्तिदशायामिति;—स्वाभाविकस्य निवृत्त्ययोगात् कर्मोपाधिकानामध्यस्तभेदानामेव निवृत्तिः परस्याभिमतेति तत्पराणां न बाधकत्वमिति भावः। अभेदवचनमपि न बाधकमित्याह;—ब्रह्मं वेति। विष्णुरेवेत्यत्र सादृश्यपरत्वमेवेति भावः। जीवानित्यत्वपक्षस्त्वत्र कुदृष्टिश्चेत्याह—नात्मेति। किमात्मा वियदादिवदुत्पद्यते नवेति

संशये उत्पद्यते इति पूर्वपक्षं कृत्वा नात्मोत्पद्यते 'न जायते म्रियते वा विपश्चित्' इति प्रतिषेधात् 'अजो नित्यः' 'नित्यो नित्यनाम्' इत्यादिभ्यो नित्यत्वावगमाच्चेति राद्धान्तितमित्यर्थः ॥ १७ ॥

अक्ष०—आत्मनां नित्यत्वं साङ्गश्रुतिशतसिद्धमित्युक्तं इदानीमनित्यत्वे बाधकमाह—स्थैर्यमिति । बौद्धवत् आत्मनः क्षणिकत्वोपगमे भाविदृष्टफलमुद्दिश्यापि न कश्चिदपि प्रवर्तेत फलकाले स्वस्यैवाभावादिति भावः ।

चार्वाकवत् आशरीरस्थायित्वोपगमे बाधकमाह—देहान्तत्व इति । धर्मादनपेते वैदिके यागदानादिमार्गे दृष्टप्रयोजननिरपेक्षा महाजनप्रवृत्तिः सदा वर्तमाना न सिद्ध्येत् एतच्छरीरनाशानन्तरमेव तत्फलश्रवणादिति भावः । पौराणिकैकदेशिवत् प्रलयान्तत्वोपगमे बाधकमाह—आकल्पेति । तत्पक्षे प्रलये आत्मनाशस्यैव मुक्तिरूपतया कल्पान्ते स्वत एवावश्यं भावितया मोक्षोपायोपदेशो निरर्थकस्स्यादित्यर्थः ! आत्मनाशस्या पुरुषार्थतया तदुपायं न कश्चिदपि शृणुयादिति च भावः ।

अद्वैतिवत् मोक्षान्तत्वोपगमे पूर्वोक्तबाधकसत्वेऽपि बाधकान्तरमप्याह—आमोक्षेति । परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, स तत्र पर्येति इत्यादिश्रुतिः परं ज्योतिरुपसम्पन्नस्य भोगविशेषस्य वचनात् आत्मनाशरूपं चतुर्थपुरुषार्थं नाभिप्रैतीत्यर्थः । वैदिकभूमिकापरिग्रहादस्मिन् पक्षे वेदविरोधोऽपि बाधकः प्रसञ्जित इति भाव्यम् । 'विज्ञानघन एव एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यतीत्यत्र'' विनाश पदं नश अदर्शने इति धातोरदर्शनपरं न तु ध्वंसपरं, ''अविनाशी वाऽरेऽयमात्मा' इति श्रुतेः इत्यवधेयम् । अन्यदन्यत्र ॥ १७ ॥

व्याप्तास्सर्वत्र जीवास्सुखतदितरयोस्तत्रतत्रोपलम्भा-
न्निर्वाह्यो देहगत्यागतिरिह वितथा तद्वतोऽपीति चेन्न ।
वक्त्री पञ्चाग्निविद्याप्रभृतिषु भविनां स्वस्वरूपेण सिद्धं
यातायातप्रकारं श्रुतिरगतिरिमां लाघवोक्तिं शृणोतु ॥ १८ ॥

सर्वा०—*नित्यस्सर्वगत इति श्रुत्या आत्मनां नित्यत्वे तत्सहचरितं सर्वगतत्वमपि स्यादिति शङ्कते—व्याप्ता इति ॥ आगमस्यानुग्राहकमाह—सुखेति । तदितरशब्दोऽत्र दुःखवत् धीच्छादीनामपि संग्राहकः । अविभुत्वे सर्वत्र दुःखाद्युपलम्भो न स्यादित्यर्थः । आत्मगत्या सर्वत्र सुखादीति शङ्कां गौरवप्रसक्त्या वारयति—निर्वाह्य इति । अत्र श्रुतेरन्यपरत्वाभिप्रायेण प्रतिवक्ति—नेति । सर्वगत्वोक्तित्वात् *अग्निर्यथैको भुवनं प्रविष्टः, *वायुस्सर्वगतो महान् इत्यादिवदेकजातीयानां सर्वत्रानुप्रवेशान्नेतुं शक्या । गतेश्च श्रुतत्वान्न कल्पनागौरवमित्याह—वक्त्रीति । प्रभृतिशब्देन *तेन प्रद्योतेनैष आत्मा निष्क्रामति तमुत्क्रामन्तं

प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति इत्यादयस्संगृह्यन्ते। न च तासां श्रुतीनां प्राणानूत्क्रमणादिभिरन्यथासिद्धिरास्थेया इत्यगतिशब्दाभिप्रायः॥ १८॥

आनन्द०--आक्षेपसंगतिमाह--नित्यस्सर्वगत इति। सर्वगतत्वाभावे नित्यत्वमपि न स्यादितिभावः। मूले व्याप्तिः--विभुत्वं। आदिशब्देन द्वेषादीनां ग्रहणम्। सर्वत्रेति—स्वर्गनरकादावित्यर्थः। ननु तत्तद्देशे आत्मा गच्छतीत्यतो दुःखाद्युपपद्यते इति शङ्कते—आत्मगत्येति। आत्मनो गत्या सुखादीति शङ्कां इत्यर्थः। अत्र श्रुतेरिति—नित्यस्सर्वगत इत्यत्र सर्वगतत्वश्रुतेरित्यर्थः। भुवनं प्रविष्टः—व्याप्तः। एकजातीयानामिति तथाच प्रत्येकं व्याप्तचभावेऽपि व्यपदेश उपपद्यत इत्यर्थः। गतेरिति—आत्मस्वरूपस्येति शेषः। वस्तुतस्तु शरीरगत्या तदुपपत्तिरित्यनुपपन्नम्; इहस्थस्य शरीरस्य नाशात् स्वर्गनरकादिषु देहान्तरस्योत्पत्त्या गतिशब्दमुख्यार्थस्यानुपपादनादित्यर्थः। तेन प्रद्योतेनेति जीवस्य स्वरूपेणोत्क्रान्तिप्रतीतेरित्यर्थः। ननु सर्वे प्राणा अनूत्क्रामन्तीति प्राणापेक्षया इन्द्रियानुत्क्रान्तिप्रतिपादकतयाऽन्यथासिद्धेः नात्मनो गतिसिद्धिरित्यत्राह—नचेति। 'तेन प्रद्योतेनैष आत्मा' इति स्वरूपेणात्मन उत्क्रमणप्रतिपादनात् 'तमुत्क्रामन्तम्' इति प्राणस्यापि पृथगुत्क्रणप्रतिपादनान्नान्यथासिद्धिरित्यर्थः। अगतिः गत्यन्तरशून्या—अनन्यथासिद्धेति यावत्॥ १८॥

अक्ष०—आत्मनो नित्यत्ववत् सर्वगतत्वमपिश्रूयत इत्याशङ्कते—व्याप्ता इति। जीवास्सर्वत्र व्यापिनः विभवइत्यर्थः। सर्वगतत्वश्रुतेरनुग्राहकमाह—सुखेति। तत्र तत्र—काशीरामेश्वरादिदेशभेदेषु (स्वर्गनरकादिषु लोकान्तरेष्वपि) सुखदुःखोपलब्धेः आत्मनां सर्वगतत्वमेष्टव्यमिति भावः। अणोरप्यात्मनः सदेहस्य गमनादेव तत्र सुखाद्युपलम्भस्स्यादित्यत्राह—निर्वाह्य इति। सुखाद्युपलम्भ इत्यनुवर्तते। देहगतिमात्रेण सार्वत्रिकसुखदुःखाद्युपलम्भनिर्वाहे सति देहवतोऽपि इह—लोके गत्यागतिकल्पनं व्यर्थमेवेत्यर्थः। गौरवमिति भावः। परिहरति—नेति। सर्वगतत्ववचनं 'नित्यं विभुं सर्वगत' मित्यादाविवाणूनामेवात्मजातीयानां सर्वत्र प्रवेशार्हत्वपरम्। वायुस्सर्वत्रगो महानितिवदिति भावः। वक्त्रीति। वचनसिद्धं न लाघवादपह्नोतुं शक्यमिति भावः। पञ्चाग्नीति लोकान्तरगमनेषु शरीरस्य अत्रैव त्यागादात्मन एव स्वरूपेण गमनं सिद्ध्यति। तथैवागमनमपीति भावः। प्रभृतिशब्देन अर्चिरादि गतिश्रुत्यादिपरिग्रहः। अतो भूतसूक्ष्मगत्याप्यन्यथासिद्धिर्न भवतीत्याह—अगतिरिति। अनन्यथासिद्धेत्यर्थः। शृणोत्विति। न हि वचनस्यातिभार इति न्यायेन त्वदीयलाघवोक्तिं न शृणुयादिति भावः॥ १८॥

अव्यापित्वेऽपि पुंसोऽभिमतबहुवपुःप्रेरणे यौगपद्यं
ज्ञानव्याप्त्योपपन्नं बहुषु च वपुषोंऽशेषु निर्वाह एषः।
यच्चादृष्टं क्रियां स्वाश्रययुजि तनुतेऽन्यत्र तत्क्रुद्गुणत्वा-
दित्येतत्सिद्धसाध्यं विभुन इह हि तद्ब्रह्मणः प्रीतिकोपौ ॥ १९ ॥

सर्वा०—अविभुत्वे सिद्धैश्वर्याणां युगपदनेकशरीराधिष्ठातृत्वं न स्यादित्यत्राह—अव्यापित्वेऽपीति ॥ बहुवपुःप्रेरणं किं द्रव्यान्तरद्वारकम्? उत कर्मनिमित्तम्? आद्ये यथा पाणिपादादिद्वारनियतं युगपत्खड्गपादुकाद्यधिष्ठानम्, न तथाऽत्रेति भावः। द्वितीये स्वकर्मनियतमनेकशरीराधिष्ठानं कर्मिणः स्वसन्निधिविरहे कथं स्यादिति। ज्ञानव्याप्त्या—स्वरूपसन्निधानाभावेऽपि ज्ञानस्य युगपदनेकदेहाधिष्ठानानुगुणवृत्त्येति भावः। स्वरूपव्याप्तिर्ज्ञानतोऽधिष्ठानाभावेऽनर्थिका। तर्हि तत एव कुड्यादीनामप्यधिष्ठानं स्यात्। न स्यात्, तदधिष्ठानानुगुणकर्मातिशयविशेषाभावात्। ये तु तादृशातिशयवन्तः, ते कुड्यादीन्यप्यधितिष्ठेयुर्यथा परकायादीन्। देहैकदेशवर्तिन आत्मनो युगपदनेकावयवाधिष्ठानं कथमित्यत्रापि प्रत्येतव्यमेतदेवेत्याह—बहुष्विति। धर्माधर्मौ स्वाश्रयसंयुक्त एवाश्रयान्तरे क्रियां जनयतः क्रियाहेतुगुणत्वाद्गुरुत्ववदिति परोक्तमनुवदति—यच्चेति। तत्र सिद्धसाधनतामाह—इत्येतदिति। तद्व्यनक्ति—विभुन इति॥ इह हि धर्माधर्मशब्दः कर्मनिमित्तेश्वरप्रीतिकोपरूपबुद्धिद्योतकः। अस्ति हि *शुभे त्वसौ तुष्यति दुष्कृते तु न तुष्यतेऽसौ परमश्शरीरी इति॥

न च प्रीतेरपूर्णत्वं न च कोपात्सदुःखता।
फलप्रदित्सारूपत्वादुभयोरपि कर्मणोः॥

अतो न दोषः॥ १९॥

आनन्द०—आक्षेपिका संगतिरित्याह—अविभुत्व इति। अनेकशरीराधिष्ठातृत्वं—अनेकशरीरप्रेरकत्वम्। यथेति—नियतं पाणिना खड्गस्य पादेन पादुकाया नैयत्यमित्यर्थः। स्वकर्मनियतं—स्वादृष्टनियतमित्यर्थः। स्वसन्निधिविरह इति—सन्निहितस्यैव कारणस्य कार्यजनकत्वात्। सन्निधेराश्रयद्वारकत्वेनाविभुत्वे तदयोगात् विभुत्वमावश्यकमिति भावः। कथं स्यादिति – शङ्कायामिति शेषः। ज्ञानव्याप्त्येति—स्यादितिशेषः। अनुगुणवृत्त्येति—तत्तद्देहसंबन्धिन्येवेति भावः। स्वरूपव्याप्त्यङ्गीकारेऽपि ज्ञानाभावे देवदत्तादिशरीरप्रेरकत्वाभावात् ज्ञानस्य व्याप्तेरावश्यकत्वे किं स्वरूपव्याप्त्येत्यत्राह—स्वरूपत इति। ननु ज्ञानव्याप्त्यङ्गीकारे कुड्यादिद्रष्टुस्तत्प्रेरकत्वं स्यात् भवन्मते ज्ञानप्रसराद्यङ्गीकारादिति शङ्कते—तर्हीति। तदधिष्ठानानुगुणेति—स्वरूपव्याप्त्यङ्गीकारेऽपि तदधिष्ठानानुगुणज्ञानं तदवच्छेदेन वाच्यम्। तच्च न सर्वेषाम्, किंतु येषां अदृष्टविशेषः

तेषामेवेति तादृगदृष्टविशेषजन्यज्ञानं प्रत्येवाधिष्ठानमिति तदभावान्न कुड्याद्यधिष्ठानम्। तत्सत्त्वे तदिष्टमेवेति भावः।

ननु अणुभूतस्यात्मनो देहनिष्ठसमस्तावयवव्यापित्वाभावात् कथं हस्तादीनां युगपच्चलनादिकम्? इति शङ्कामनूद्य निराचष्टे— देहैकदेशेति। धर्माधर्माविति— स्वाश्रयसंयुक्तदेहादिक्रियाजनकत्वेनाप्युपपत्तेरुक्तम्—आश्रयान्तरेति। स्वान्याश्रय इत्यर्थः। ननु संयोगादौ व्यभिचारः आश्रयान्तरे क्रियाजनकत्वाभावादिति चेत्? अन्याभावविरोधिक्रियाहेतुगुणत्वस्य विवक्षितत्वात्।

केचित्तु—आश्रयान्तरे—स्वाश्रयप्रतियोगिकान्योन्याभाववतीति विवक्षितम्। तथाच स्वाश्रयेऽन्यस्मिन् क्रियाहेतुत्वमस्त्येवेति न व्यभिचारः। न च विभागे व्यभिचारः! क्रियाहेतुत्वाभावात्। तदन्यत्वेन वा विशेषणमित्याहुः। सिद्धसाधनतामिति—परमात्मनः स्वाश्रयस्य विभुत्वमङ्गीकृतमेव। तत्संयुक्तमपि सर्वपदार्थानामिति भावः। इह हीति—धर्माधर्मशब्दयोर्विहितप्रतिषिद्धक्रियावाचकत्वादिति भावः। शुभे विहितकर्मणि कृते प्रीतिर्भवतीत्यर्थः। दुष्कृते—प्रतिषिद्धे। न तुष्यति—कुप्यतीत्यर्थः। ननु परमात्मनः प्रीतिकोपवत्त्वे प्रीतिमतोऽपूर्णत्वदर्शनात् कोपवतो दुःखित्वदर्शनात् अस्यापि तद्दोषप्रसङ्ग इति चेत्? तत्राह— नचेति। सदुःखतेति—अतिशयितदुःखवत्त्वमित्यर्थः। दुःखशब्दस्य प्रत्येकमन्वये कर्मकृतसुखदुःखवत्त्वमित्यर्थः इत्यप्याहुः। प्रीतिकोपयोरिष्टानिष्टप्राप्त्यप्राप्तिनिमित्तयोरेव तद्व्याप्तिः; न चात्र तन्निमित्ततेति नोक्तदोष इत्यर्थः। यथाच प्रीतिकोपरूपत्वं पुण्यपापयोः तथोत्तरत्र वक्ष्यते॥ १९॥

अक्ष०—आत्मनोऽणुत्वे सौभर्यादेः युगपदनेकशरीराधिष्ठानं कथमित्यत्राह—अव्यापित्वेऽपीति। पुंस आत्मनोऽविभुत्वेऽपि स्वीयत्वेनाभिमतानेकशरीरप्रेरणे यौगपद्यं—स्वधर्मभूतज्ञानव्याप्तिविशेषेण आत्माभिमानानुगुणेनोपपद्यत इत्यर्थः। एकशरीरावयवेषु बहुष्वपि शिरः-कर-पादादिकेषु एष एव ज्ञानव्याप्तिरूप एव निर्वाहः युगपत्प्रेरणोपपादकः इत्याह—बहुषुचेति। आत्मनो विभुत्वसाधकं परोक्तमनुमानं दूषयितुमनुवदति। यच्चेति। अदृष्टं—धर्माधर्मौ स्वाश्रयसंयुक्त एवान्यत्राश्रयान्तरे क्रियां जनयतः। तत्कृदित्यत्र तच्छब्देन पूर्वोक्तक्रियापरामर्शात् आश्रयान्तरे क्रियाहेतुगुणत्वात् इति प्रयोगः, गुरुत्वादिकमत्र दृष्टान्तः गुरुत्वं स्वाश्रय इव स्वाश्रयसंयुक्तेऽपि क्रियां जनयति तद्वददृष्टमपि स्वाश्रय इव स्वाश्रय संयुक्तेऽपि क्रियां जनयति पित्रादिकृतसुकृतेनापि पुत्रादेः शुभक्रियाजननात् अदृष्टस्य समवाय समवायि संयोगान्यतर सम्बन्धेन क्रियां प्रतिकारणत्वं कल्पनीयमिति स्वाश्रयस्य आश्रयान्तरसंयोगाय विभुत्वमङ्गीकर्तव्यमिति भावः। एतद्दूषयति—इत्येतदिति। सिद्धसाध्यमिति सिद्धसाधनमित्यर्थः। कथमित्यत्राह—

विभुन इति। इह अस्मत्सिद्धान्ते आशुतरविनाशिसुकृतदुष्कृतजन्यब्रह्मगतप्रीति-कोपयोरेवादृष्टरूपत्वात् तदाश्रयस्य ब्रह्मणो विभुत्वस्येष्टत्वादिति भावः।

न च जीवकर्मणा ब्रह्मण्यदृष्टजनने न मानमिति वाच्यं, "शुभेत्वसौ तुष्यति, दुष्कृते तु न तुष्यतेऽसौ परमः शरीरी" इति वचनात्॥ १९॥

इष्टं प्रादेशिकत्वं विभुषु जनिमतां बुद्धिशब्दादिकानां
तेनादृष्टं च तादृङ् न यदि तव सुखाद्याश्रयव्यापकं स्यात्।
तस्मात्तत्स्वप्रदेशान्वयवति जनयेत्स्वं फलं यत्ननीत्या
भ्रातृव्यादौ च पीडां न घटयितुमलं किं विभुत्वेन भोक्तुः॥२०॥

सर्वा०—उक्तानुमानस्य दूषणान्तरमाह—इष्टमिति॥ विभुष्वात्माकाशादिषु जायमानानां बुद्धिशब्दादिकानां स्वाश्रयैकदेशवर्तित्वं युष्माभिरिष्यते, सार्वत्रिकत्वे प्रत्यक्षादिबहुप्रमाणविरोधात्। अदृष्टं च तादृशमिष्टम्। तच्च स्वाश्रयसंयोगिनि क्रियां जनयत् स्वावच्छिन्नप्रदेशसंयुक्त एव जनयेत्; अन्यथा प्रयत्नेनापि दूरस्थप्रेरणप्रसङ्गात्। न चादृष्टं तत्र तत्र गच्छति, अमूर्तत्वात्। अतोऽदृष्टकारितदूरस्थकार्याणामनुत्पत्तिप्रसङ्गः। ननु प्रत्यात्मनियतान्यनन्तान्यदृष्टानि विप्रकीर्णवृत्तीनि विद्यन्ते; अतस्सर्वक्रियोपपत्तिरित्यत्राह—भ्रातृव्यादाविति। अयं भावः—अद्यतनाभिचारक्रियानिष्पाद्यमानमदृष्टं कर्तुरात्ममनस्संयोगावच्छिन्ने प्रदेशे स्यात्। तच्च भ्रातृव्यदेहभेदादीन्करोति। एवं देशान्तरानुभाव्यस्वर्गादिफलसाधनेऽपि भाव्यम्। न च दूर एवेदमदृष्टमुत्पद्यते, असमवायिदेशावच्छेदेन तदुत्पत्तेः स्थापनात्। अतः कथं देशान्तरस्थे भ्रातृव्यशरीरादौ पीडां जनयेत्? तस्मादात्मनस्सर्वत्रावस्थानं निरर्थकमिति निगमयति—किं विभुत्वेनेति॥ २०॥

आनन्द०—पूर्वसङ्गतिरेवात्र सङ्गतिरित्याह;—उक्तानुमानस्येति। प्रत्यक्षादीति;—आदिशब्देन अनुमानशब्दादिग्रहणम्। बहुत्वं च पुरुषभेदेन व्यक्तिभेदेन च बोध्यम्। अदृष्टं च तादृशमिष्टमिति—अदृष्टं स्वाश्रयैकदेशवृत्ति जन्यविभुविशेषगुणत्वात् शब्दादिवदित्यनुमानेनेत्यर्थः। ततः किमित्यत्राह;—स्वाश्रयसंयोगिनीति। अदृष्टं स्वावच्छिन्नप्रदेशसंयोगिन्येव क्रियाजनकं क्रियाहेतुविभुगुणत्वात् यत्नवदिति भावः। ननु यत्न एव तथा न व्याप्तिः अप्रयोजकत्वादित्यत्राह;—अन्यथेति। प्रयत्नावच्छिन्नप्रदेशादन्यप्रदेशसंयोगिन्यपीत्यर्थः। ननु आत्मनामनन्तप्रदेशेष्वनुष्ठितेन कर्मणा सर्वत्र विप्रकीर्णमदृष्टं वर्तत इति शङ्कते;—नन्विति। ननु भ्रातृव्यादावपि भेदक्रियावत्येव तत्प्रदेशावच्छिन्नात्मसंयोगस्संभवतीत्यत्राह;—अयंभाव इति। न च दूर एवेति;—ननु सर्वदेशावच्छेदेनादृष्टोत्पत्तौ सर्वमुप-

पचत इत्यत्राह ;—असमवायिदेशाच्चवच्छेदेनेति । नन्वदृष्टादेरसमवायिदेश एवेति न नियमः । अन्यत्रानुभूतस्यान्यत्र स्मरणात् यत्नेऽपि न तथा नियमः : एकप्रदेशस्थेन विंशत्यङ्गुलिषु क्रियादर्शनात् इति चेत् ; न ; तथासति विभुत्वमप्रयोजकम् । यत्क्रिया विंशत्यङ्गुल्यवच्छेदेन जायते न सर्वावयवावच्छेदेन तत्र यन्नियामकं तदविभुत्वेऽपि सर्वत्र सुखादिनियामकमिति विभुत्वकल्पनमप्रयोजकमिति भावः । तदाह ;—तस्मादात्मन इति ॥ २० ॥

अक्ष०—अत्र परोक्तानुमानस्य अप्रयोजकत्वमपि दूषणान्तर मुच्यते—इष्टमिति । भवन्मते विभुषु द्रव्येषूत्पन्नानां बुद्धिशब्दादीनां गुणानां प्रादेशिकत्वमव्याप्यवृत्तित्वं इष्टं—अङ्गीकृतमित्यर्थः । तेन विभुगुणत्वेन अदृष्टमपि तादृक्—अव्याप्यवृत्ति स्यादित्यर्थः । अदृष्टं अव्याव्यवृत्ति विभुगुणत्वात् इति प्रयोगो भाव्यः । विपक्षे बाधकमाह न यदीति । विभुगुणस्य अव्याप्यवृत्तित्वाभावे इत्यर्थः । तव मते सुखादि आश्रयव्यापकं स्यादिति तदनिष्टप्रसङ्गः बाधकः । तस्मात् अव्याप्यवृत्तित्वात् तददृष्टं स्वप्रदेशान्वयवति—स्वावच्छेदकदेशसंयुक्त एव । स्वफलं—स्वजन्यं फलं जनयति । यत्ननीत्या—यथा यत्नः स्वप्रदेशान्वयवति शरीरादौ क्रियां जनयति तद्वदिति भावः । अत्र परोक्तानुमाने स्वप्रदेशान्वयवत्येव फलजनकत्वमुपाधिरित्युक्तं भवति, यत्नादौ साध्यसमव्यापकत्वमस्य साधनाव्यापकत्वमाह—भ्रातृव्यादाविति । स्पर्धमानकृताभिचारकर्मजन्यादृष्टं दूरस्थभ्रातृव्यादिशरीरपीडाकृदिति लोकवेदसिद्धं - तददृष्टस्य कर्तृजीवगतत्वेसति न घटते । दूरस्थभ्रातृव्यशरीरस्य तददृष्टप्रदेशान्वयाभावादिति भावः । अनेन अभिचारादृष्टरूपपक्षावृत्तित्वयुपाधेरुपपादितं भवति । अत्र जीवविभुत्वाङ्गीकारेण न कश्चित्परिहार इत्याह—किं विभुत्वेनेति।

यद्वा जीवविभुत्वमत्र प्रकृतं तत्साधकतयैव इदमनुमानं परैरुच्यते, तद्यदि जीवविभुत्वमन्तरा नोपपद्येत तदा प्रकृतोपयोगस्स्यात् न चैवमस्ति प्रकृतसाध्यव्यापकस्य निरुक्तोपाधेः जीवविभुत्वं विनाप्युपपन्नतया तद्व्याप्यस्य प्रकृतसाध्यस्यापि तथात्वावश्यंभावात् अतः प्रकृतानुपयुक्तत्वादर्थान्तरमपीत्याशयेनाह—किं विभुत्वेनेति ॥ २० ॥

इतिजीवविभुत्वभङ्गः।

स्वादृष्टोपार्जितत्वाद्विभुषु यदवदन्विग्रहादेर्व्यवस्था
तच्चैवं निर्निमित्तं तत इह न कथं सर्वतस्सर्वभोगः ॥
आराध्ये विश्वसाक्षिण्यनुगुणफलदे त्वस्ति राजादिनीतिस्तत्साम्ये भोगसाम्यं न हि भवति यथाकर्म भोगप्रदानात् ॥२१॥

सर्वा०—सर्वे जीवास्सर्वशरीरव्यापिनः, सर्वे देहास्सर्वेषां भोगायतनानि स्युः, इति प्रसङ्गे परोक्तं परिहारमनुवदति—**स्वादृष्टेति**। दूषयति—**तच्चेति**॥ अयं भावः—यद्यदृष्टं स्वावच्छिन्नप्रदेशे देहादिसृष्ट्या फलं जनयेत्, तदा यष्टुः स्वर्गादिकमिहैव स्यात्; प्रदेशान्तरे तु प्रयत्ननीत्या जनयितुं नालमिति। अतस्त्वत्पक्षे प्रतियतादृष्टजन्यत्वस्यैवासंभवाद्व्यवस्थाभङ्गो दुर्वार इत्यत्राह—**तत इति**। नन्वणुपक्षेऽपि फलानां जीवगतादृष्टाजन्यत्वात् परगतस्य व्यवस्थापकत्वानभ्युपगमादनियमस्तदवस्थ इत्यत्राह—**आराध्य इति**। परगतत्वेऽपि राजादिषु दृष्टेन न्यायेन तत्तदाराधकादिप्रतिनियतानुग्रहादिवैचित्र्यात्तत्तदुचितफलसर्पणे यथाप्रमाणं व्यवस्था सिध्येदिति भावः। सर्वफलप्रदानानुगुण्यार्थं विश्वसाक्षितोक्तिः। सहाधीते च कर्माध्यक्षत्वसाक्षित्वे। ननु *समोऽहं सर्वभूतेषु इति वदतः कथं विषमफलप्रदत्वमित्यत्राह—**तत्साम्य इति**। भोगसाम्यं क्षेत्रज्ञानामन्योन्यमिति शेषः। सूत्रादिसिद्धं हेतुमाह—**यथाकर्मेति**॥ २१॥

आनन्द०—पूर्वसंगतिरेव संगतिरित्याह;—**यदि जीवा इति**। पूर्वार्धेनेति शेषः। अयं भावः;—यच्छरीरं यददृष्टोपार्जितम् तत्तस्य भोगायतनम्। तथा च सर्वेषां सर्वशरीरसंबन्धे सत्यपि न सर्वत्र भोगप्रसक्तिरिति। ननु तच्चैवं निर्निमित्तमित्ययुक्तम् सर्वशरीराणां सर्वादृष्टजन्यत्वाभावात्। तत्तददृष्टजन्यत्वेन तत्तद्भोगहेतुत्वमित्येवं वक्तुं शक्यत्वात् इत्यत्राह;—**अयं भाव इति**। तत्तददृष्टस्य तत्तद्देहजनकत्वा[1]ङ्गीकारेऽपि नियमो वक्तुं न शक्यते। अदृष्टस्य हि पूर्वशरीरजन्यस्य तदवच्छिन्नप्रदेशवृत्तितया स्वावच्छेदेनैव शरीरजनकत्वं वाच्यम्। अन्यत्र प्रदेशेऽपि विद्यमानस्यादृष्टस्यान्य[2]प्रदेशे शरीरजनकत्वे अविशेषात्सर्वशरीरस्यापि सर्वादृष्टजन्यत्वं स्यात्। नचैकं शरीरमेकादृष्टजन्यमित्यत्र नियामकमस्ति! न च [3]यद्भोगायतनं यत् तत् तददृष्टजन्यमिति नियम इति वाच्यम्; तन्नियमस्यैवासिद्धेः। तददृष्टजन्यत्वे तद्भोगायतनत्वं तद्भोगायतनत्वे तददृष्टजन्यत्वमित्यन्योन्याश्रयादिति भावः। **व्यवस्थापकत्वानभ्युपगमादिति**;—अन्यनिष्ठत्वेनादृष्टस्य सर्वसाधारण्यादिति भावः। **परगतत्वेऽपीति**;—अदृष्टस्य कोपप्रीतिरूपस्य जीवव्यापारजन्यत्वात्। [4]यद्द्वारेण यद्विषयकं कोपप्रीत्यादिकं जातं तेन तस्यैव सुखदुःखाद्यनुभव इति व्यवस्थेति भावः। **सर्वफलेति**;—तत्तद्व्या[5]पारज्ञानस्य फलप्रदानहेतुत्वादिति भावः। ननु परमं साम्यमुपैति भोगमात्रसाम्यलिङ्गादित्यादिना साम्याङ्गीकारात् कथं भोगसाम्यं न भवतीत्यत्राह;—**भोगसाम्यमिति**। मोक्षातिरिक्तकाले इत्यर्थः। सूत्रं 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्' इति। अन्यत्सर्वं न्यायसिद्धाञ्जने सम्यगुपपादितं द्रष्टव्यम्॥ २१॥

---

१. ङ्गीकारपक्षेऽपि—क, ख। २. न्यदशे—ग, देशन—क। ३. यच्छरीरं यद्भो—ग।
४. यद्व्यापारेणय—क। ५. पारजन्यस्य—ग।

अक्ष०—जीवानां विभुत्वे सर्वशरीरव्यापितयाऽन्यशरीरस्यापि स्वशरीरत्वापत्त्या अन्यशरीरावच्छेदेनापि भोगप्रसङ्गे परोक्तं परिहारं दूषयितुमनुवदति—स्वादृष्टेति। तत्तददृष्टाधीनत्वात् इत्यर्थः। विभुषु—व्यापिष्वपि। विग्रहादेः आदिना इन्द्रियादिपरिग्रहः। व्यवस्थां—नियमं। अवदन्निति यत् वदनं तदित्यर्थः। शरीरं यददृष्टाधीनं तत्तस्यैव शरीरं इति नियमान्नोक्तातिप्रसङ्ग इति भावः। दूषयति तच्चेति। उक्तपरिहारवचनं चेत्यर्थः। एवमिति अदृष्टस्य स्वप्रदेशान्वित एव फलजनकत्वमिति पूर्वोक्तप्रकारेणेत्यर्थः। निर्निमित्तं अव्यवस्थापकमित्यर्थः। यागादिजन्यादृष्टस्य देशान्तरभाविफलानुभवशरीरादिकं प्रति स्वप्रदेशान्वित सम्बन्धाभावेन अजनकत्वेन तत्तच्छरीरस्य तत्तददृष्टाधीनत्वस्यैवाभावादिति भावः।

व्यवस्थापकाभावात् सर्वेषां सर्वशरीरावच्छेदेनापि भोगप्रसङ्गो दुर्वार एवेत्याह—तत इति। अणुजीवपक्षे कथमेतद्दोषपरिहार इत्यत्राह—आराध्यइति। यागादिना आराध्ये—पूज्ये विश्वसाक्षिणि—सर्वज्ञे। अनुगुणफलदे—तत्तत्कर्मानुगुण फलप्रदान सङ्कल्पवति तु राजादिनीतिरस्तीत्यर्थः। यथा राजादिः स्वाराधकेभ्यो फलं तत्तदाराधनानुगुणं व्यवस्थया प्रयच्छन् दृश्यते, तथा ईश्वरोऽपि। राजादेः तत्तदाराधकविषये तत्तदनुगुण फलप्रदित्सेव ईश्वरस्यापि यागादिकर्मणा तत्तदधिकारिविषये तत्तदनुगुणफलप्रदित्सा जायते तदेवादृष्ट मित्युच्यते। ततःफलभोगशरीरादिनियम इति न काप्यनुपपत्तिरिति भावः।

ईश्वरस्य सर्वसमत्वेऽपि तद्गतादृष्टेन न सर्वेषां भोगसाम्यप्रसङ्गः, तत्तत्कर्मानुगुण्येनैव व्यवस्थया फलप्रदानादित्याह—तत्साम्य इति। न हि राजानमाराधयतां सर्वेषां फलसाम्यं दृश्यत इति भावः॥ २१॥

जीवस्याणुत्वे प्रमाणम्

देहान्तर्मात्रदृष्टेः पथगिह विषयिप्राणजीवोत्क्रमोक्ते-
भूयोवाक्यानुसाराऽणुरिति वचने तादृशोपाध्यनुक्तेः।
ईशादाराग्रमात्रो ह्यवर इति भिदा वर्णनात्स्पन्दवाक्या-
द्वयाप्त्युक्तिर्जातिधर्मप्रतिहतिविनिवृत्त्यादिमात्रेण जीवे॥ २२॥

सर्वा०—अथाप्यणुत्वे किं प्रमाणमित्यत्राह—देहान्तरिति। अयं भावः—यद्यात्मा विभुः स्वयंप्रकाशश्च, किमिति सर्वत्र सर्वदा न प्रकाशते? अहमिति सार्वत्रिकः प्रकाशत एवेति चेन्न; अस्मिन्देहेऽहं वर्त इतिवत्सर्वत्र प्रतीतिप्रसङ्गात्। सार्वत्रिकस्याविशदप्रकाशोऽस्तीति च न प्रमाणम्। व्यञ्जकान्तरसापेक्षत्वाद्व्यञ्जकदेशे व्यक्तिरिति नियमहेतुरिति चेन्न; स्वप्रकाशत्वविरोधात्। अथ मानसप्रत्यक्षः, तथाऽपि कथं क्वाचित्कोपलब्धिः? यद्यपि सामग्रीदेशानुविधानेन ज्ञानो-

त्पत्तिः; तथाऽपि विषयत्वं न तन्निबन्धनम्, तथा अदृष्टेः। अगृहीतपरिमाणस्य स्वरूपतो ग्रहणे देहात्मभ्रमात् क्वचित्कालोपलम्भ इति चेन्न; भ्रमव्यतिरिक्त-मानसप्रत्यक्षेष्वपि तददृष्टेः। विवेकतस्समाहितानामपि परिच्छिन्नतया तदुप-लब्धेः; *हृदि ह्ययमात्मा इत्यादिदृष्टेश्च। हेत्वन्तरमाह—पृथगिति। इन्द्रियादीनां पृथगुत्क्रमणोक्तेरात्मोत्क्रमणं न भाक्तमिति भावः। सर्वगतत्वोक्तिसद्भावेऽप्यणु-त्वोक्तीनां बलीयस्त्वं व्यनक्ति—भूय इति। सन्ति हि *एषोऽणुरात्मा चेतसा वेदितव्यः, *वालग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवस्स विज्ञेयः इत्यादिका बह्वृचः।

ननु विभोरपि परमात्मनोऽणुत्वं श्रूयते, तथेह स्यात्; तन्न; तत्र हि *एष आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा इत्यादिष्वौपाधिकाणुत्वव्यक्तेः। जीवाणुत्वश्रुतौ तादृशोपाध्यनुक्तेः; प्रत्युत स्वरूपनिर्देशेनैव वालाग्रसूक्ष्मभागसत्वं ख्याप्यते। यद्यौपाधिकं जीवस्याणुत्वम्, तस्य जीवेश्वरसाधारणत्वात् *आराग्रमात्रो ह्यव-रोऽपि दृष्टः इति परव्यावर्तकपरिमाणोक्तिर्विहन्येतेत्यभिप्रायेणाह—ईशा-दिति॥ स्वप्नसुषुप्त्याादिवाक्येषु *आसु तदा नाडीषु सृप्तो भवति, *ताभिः प्रत्यपसृप्य पुरीतति शेते इत्यादिभिर्जीवस्य तत्रतत्र स्वरूपेण संचरणं श्रूयत इत्याह—स्पन्दवाक्यादिति॥ एतैर्बलीयोभिर्जीवव्याप्तिवचनानामन्यपरत्वमाह—व्याप्त्युक्तिरिति॥ *तस्यात्मपरदेहेषु सतः इत्यादौ जातितः, *स चानन्त्याय कल्पते इत्यत्र धर्मतः तथा च सूत्रं *प्रदीपवदावेशस्तथा हि दर्शयति इति। सर्वगत इत्यत्र क्रमेण सर्वविधाचेतने प्रवेशाद्वा, शिलादिष्वपि प्रतिहत्यनर्हतया वा; तथा च भाषितम्* अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावः इति। आत्मनोऽणुत्वे पृथिव्याद्यणुवत्प्रत्यक्षत्वं न स्यादिति चेन्न, विभुत्वेऽपि ते विभ्व-न्तरवदप्रत्यक्षत्वप्रसङ्गात्। यथादृष्टि व्यावृत्तिरस्तीति चेत् अणुत्वेऽपि समम्। न चास्माकं पृथिव्याद्यणूनामप्रत्यक्षत्वनियमः। एवमणुत्वे मानसप्रत्यक्षत्वं न स्यादिति प्रसङ्गोऽपि श्रुतिविरोधादिभिः प्रत्याख्येयः॥ २२॥

आनन्द०—आक्षेपसंगत्या निरूपयति;—अथेति। न विभुत्वे बाधकमात्रा-दणुत्वसिद्धिरिति भावः। ननु देहान्तर्भानमस्तु न तावता विभुत्वविरोधः [1]बहिर-भावनिश्चयाभावात्। अन्यथा घटान्त[2]र्भूताकाशस्यापि बहिस्सत्वं न स्यादित्य-त्राह;—अयं भाव इति। अस्मिन्देहे इति;—अस्मिन् देहे अहं वर्त इति प्रकाशे या सामग्री [3]तदा [4]देहान्तरादिविशिष्टतया प्रकाशेऽपि सेति भावः।

ननु देहस्य व्यञ्जकत्वाद्देहे भानं युक्तम् न तु देशान्तरे तस्य व्यञ्जकत्वा-भावादिति शङ्कते;—व्यञ्जकेति। नन्वात्मनोऽस्मन्मते मानसप्रत्यक्षत्वान्न दोष

---

१. वहिर्भाव—क। २. र्भावाकाश—ग।
३. तथा देहा—क। ४. देशान्तरादिवि—क।

इति शङ्कते ;—अथेति । तथापीति । मानसप्रत्यक्षत्वे सामग्रयास्तुल्यत्वादिति भावः । तथापि विषयत्वमिति ;—शब्दज्ञाने स्मरणादौ च देशा[1]न्तरस्थानां विषयत्वदर्शनादिति भावः । निघ्नं—अधीनम् । नन्वात्मनि [2]क्वाचित्कत्वग्रह एव नास्ति स्वरूपमात्रे गृहीते परिच्छिन्नदेहतादात्म्यग्रहात्परिच्छिन्नत्वव्यवहार इति शङ्कते ;—अगृहीतेति । भ्रमणं—भ्रमः । भ्रमव्यतिरिक्तेति ;—[3]देहाग्रहणात्तत्तादात्म्या[4]रोपायोगादिति भावः ॥

ननु गृहीतस्य वा स्मृतस्य वा तादात्म्याध्यासात्तथा भ्रमोऽस्त्वित्यत्राह ;—विवेकत इति । [5]तदभेदाध्यासासंभवादिति भावः । श्रुतिमपि साक्षयति;—हृदि ह्ययमिति । प्रत्यक्षमुक्त्वा अनुमानमप्युक्तार्थे प्रमाणयति ;—हेत्वन्तरमिति । प्रमाणान्तरमित्यर्थः । नन्वत्रोत्क्रमणं प्राणेन्द्रियादिविषयकं भवतु तथा च लिङ्गासिद्धिरित्यत्राह ;—इन्द्रियादीनामिति । नन्वणुत्वश्रुतिबलात्सर्वगतत्वश्रुतेरन्यथासिद्धि[6]र्वाच्या । तथा च सर्वगतत्वश्रुतिबलादेव अणुत्वोक्तीनामन्यथासिद्धिः किं न स्यादित्यत्राह ;—सर्वगतत्वेति । भूयसां स्याद्बलीयस्त्वमिति न्यायादिति भावः ॥

ननु वालाग्रशतभागस्येतिश्रुतिः अत्यन्तसूक्ष्मपरिमाणं वक्ति । आराग्रमात्र इति चर्मसूच्यग्रपरिमाणम् । तथा 'एषोऽणुरात्मा' इत्यणुत्वम् । तथाच विरुद्धपरिमाणार्थकत्वान्नैकस्यापि स्वार्थपरत्वम् विनिगमकाभावात् । अपितु परमात्मन[7] इव विरोधाभावादौपाधिकपरिच्छिन्नत्वपरमितिशङ्कते ;—नन्विति । तन्नेति—किमत्रोपाधिकत्वश्रवणादौपाधिकत्वमुच्यते उतानुपपत्त्येति विकल्पमभिप्रेत्य नाद्य इत्याह ;—तत्र ह्येष आत्मेति । द्वितीयं दूषयति ;—यदीति । प्रत्युत स्वाभाविकाणुत्वाङ्गीकार एवानुपपत्तिरितिभावः । ननु वालाग्रादिश्रुतीनां विरुद्धपरिमाणार्थकत्वानुपपत्त्या औपाधिकत्वमित्युक्तस्य कः परिहारः इत्यत्राह ;—परव्यावर्तकपरिमाणोक्तिरिति । न तावच्छ्रुतीनां विरोधः; आराग्रमात्र इत्यत्राराग्रमात्रत्वं नाम [8]आराग्रपरिमाणत्वेसति तदन्याधिकपरिमाणरहितत्वम् । तत्र तत्परिमाणतदन्यपरिमाणविरहोभयविधाने वाक्यभेदप्रसङ्गात् । तदन्याधिकपरिमाणनिषेधे वालाग्रश्रुत्या सूक्ष्मपरिमाणविधानेऽपि को विरोधः? विरुद्धपरिमाणविधाना-

---

१. शान्तराणाम्–ख । २. क्वाचित्कग्र–क ।
३. मनसादेहाग्रह-ग, देहाग्रहणान्मनसातत्ता । ४. रोपयोगा–क, रोहसंभवा–ग ।
५. तदभेदेतादात्म्याध्या–क, ख । ६. र्वार्या–क ।
७. परमात्मन इवोपाधिकत्वे विरोधाभावात्तत्वमेव युक्तमित्या–क, ग, घ, परमार्थं इत्यविरोधाभावादौपाधिकपरिच्छिन्नत्वपरमित्याह–क, ख ।
८. आराग्रपरिमाणातिरिक्त परिमाणनिषेधः । न च मात्रचः परिमाणार्थतया तत्परत्वम् ! तथात्वेऽपि श्रुत्यन्तराविरोधायात्रव्यवच्छेदाङ्गीकारात्–ग ।

भावात् । नचाराग्रमात्र इत्यत्र मात्रचः परिमाणार्थत्वात् न निषेधार्थत्वम्; तेन नोभयविधिप्रयुक्तवाक्यभेदगन्धः इति वाच्यम्; मात्रचा परिमाणविधानेऽपि को विरोधः ? नापि लोके तथा व्युत्पत्तेः [1]किंच नायं मात्रच्; किन्तु स्वल्पार्थं नाम; सुप्रतिना मात्रार्थं इति ज्ञापकात् । किंच आराग्रस्य यथा कुठाराद्यपेक्षया स्वल्पत्वं तथाऽस्यापि स्वल्पतेत्यर्थतया कथमत्यन्तसूक्ष्मपरिमाणश्रुत्या विरोध इति भावः । जीवः परिच्छिन्नः क्रियावत्त्वात् इत्यनुमानान्तरादप्यणुत्वसिद्धिरित्याह;—**स्वप्नसुषुप्त्यादीति** । व्याप्त्युक्तेः का गतिरित्यत्राह;—**एतैर्बलीयोभिरिति** । स्वरूपेण गतागतस्पन्दाद्यनुपपत्त्या बलीयस्त्वमिति भावः । **जातितइति**;—जीवत्वजात्यवच्छिन्नानां सर्वत्र सत्त्वमित्यर्थः । **धर्मत इति**;—धर्मभूतज्ञानेनेत्यर्थः । आदिशब्दार्थप्रदर्शनपूर्वकं तृतीयमुदाहरति;—**क्रमेणेति** । **अतिसूक्ष्मतयेति**;—सर्वाचेतनान्तःप्रवेशस्वभावत्वम् । अतिसूक्ष्मतयेत्युक्त्या प्रतिहत्यनर्हत्वं चोक्तं भवति । अन्तःप्रवेशनस्वभावत्वेन क्रमेण सर्वगतत्वं चेति द्रष्टव्यम् । ननु पूर्वं नित्यस्सर्वगत इत्यादि श्रुतेः[सर्वगतत्वोक्तेः ?] 'अग्निर्यथैको भुवनं प्रविष्टो' 'वायुस्सर्वत्रगो महान्' इत्यादिवत् एकजातीयानां सर्वत्रानुप्रवेशादित्यादिनैकजात्या सर्वगतत्वोक्तेः अत्र सर्वत्र कथं प्रतिहत्यनर्हतोच्यते ? इति चेत् न; तत्र नेतुं शक्येत्युक्त्या अन्यपरत्वमात्रे तात्पर्यात्; न त्वेकजातीयतयेति । यद्वा विनिगमनाविरहादुभयाकारेणापि सर्वगतत्वमस्तु । तर्हि तथा विभागः किमर्थं कृतः ? इति चेत्; एकस्य क्वचित्कश्चिदर्थः क्वचिदन्यश्चेदर्थं उच्यते तत्रोभयमपि ग्राह्यमिति [2]व्युत्पादनार्थमिति द्रष्टव्यम् । नन्वहमर्थो नाणुः प्रत्यक्षत्वात् योऽणुः स प्रत्यक्षो नेति बाधकसत्त्वादणुत्वश्रवणं बाधितमित्याशङ्क्यां परिहरति;—**आत्मनोऽणुत्वे इति** । यश्चोभयोस्समो दोषः परिहारोऽपि वा समः इति भावः । [3]अस्तु तर्हि मध्यमपरिमाण इति चेत्; न; तथात्वे साधकाभावात् श्रुतिविरोधात् कार्यत्वादिप्रसङ्गाच्चेत्यपि द्रष्टव्यम् । व्याप्यत्वासिद्धिं व्यभिचारं चाह;—**पृथिव्याद्यणूनामिति** । ननु प्रत्यक्षत्वं न हेतुः; अपितु मानसप्रत्यक्षत्वं [4]व्यतिरेकव्याप्तिश्चेतिचेत्; तत्राह;—**मानसेति** । विभुत्वेऽपि सममिति दूषणे सत्ये[5]व दूषणान्तरमाह ? **श्रुतीति** । 'एषोऽणुरात्मा चेतसा वेदितव्यः' इति श्रुतिस्मृत्यादिरादिशब्दार्थः ॥ २२ ॥

अक्ष०—जीवस्याणुत्वे किं प्रमाणमित्यत्राह—**देहान्तरिति** । शरीरान्तःप्रदेश एव अहमस्मीति प्रत्यक्षमस्ति अतः शरीरान्यूनपरिमाणत्वमवगम्यते । हेत्वन्तरमाह—**पृथगिति** । **विषयि**— इन्द्रियं, इन्द्रियप्राणजीवानां तमुत्क्रामन्तं

---

१. किञ्चात्रस्वल्पार्थो मात्रशब्दः । तथाचाराग्रवत्स्वल्पपरिमाण इत्यर्थः । तथाच न विरोध इति भाव.—ग ।

२. व्युत्पादनं फलं-क ।

३. अस्त्वत्रम—क, ख ।

४. व्यतिरेकीत्यत्राह—क ।

५. त्येवं-ग ।

प्राणोऽनूत्क्रामति, प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यादौ जीवस्य प्राणेन्द्रियाणामिव पृथगुत्क्रान्तिश्रवणात् स्वरूपेणैवोत्क्रान्तिः—निर्गमनमवगम्यते। तत् विभुत्वेऽनुपपन्नम्। क्वचित् सर्वगतत्वश्रवणेऽपि अणुत्वे 'एषोऽणुरात्मा' वालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवस्सविज्ञेय "आराग्रमात्रः" इत्यादीनि बहूनि वाक्यानि सन्तीत्याह—भूय इति। भूयसां न्यायेन अणुत्वमेव सिद्ध्यतीति भावः। विभुनः परमात्मनः अणीयस्त्वश्रवणवत् औपाधिकपरमस्त्वित्यत्राह—तादृशेति। 'एषम आत्माऽन्तर्हृदये' इति परमात्माणीयस्त्वे हृदयोपाधिनिर्देशवत् जीवाणुत्वे उपाधिनिर्देशाभावादित्यर्थः। औपाधिकत्वे बाधकमाह—ईशादिति। 'आराग्रमात्रोह्यवरोऽपि दृष्ट' इत्यत्र अल्पपरिमाणेन ईश्वरात् भेदो वर्ण्यते। यदि तदौपाधिकं तर्हीश्वरव्याप्यौपाधिकाल्पपरिमाणश्रवणात् तेन न तद्भेदवर्णनं घटेतेति भावः।

स्वप्नसुषुप्ति-प्रकरणे—"आसु तदा नाडीषु सृप्तो भवति' ताभिः प्रत्यवसृप्य पुरीतति शेते इत्यादिवाक्येषु जीवस्य स्वरूपेणैव संचरणंश्रूयते तदपि विभुत्वेऽनुपपन्नमित्याह—स्पन्दवाक्यादिति। तर्हि सर्वगतत्वोक्तेः को भाव इत्यत्राह—व्याप्तीति। "तस्यात्मपरदेहेषु सत इत्यादौ" जातितः, जीवत्वजात्यवच्छिन्नस्य सर्वत्र सत्त्वात्। "स चानन्त्याय कल्पत" इत्यादौ धर्मभूतज्ञानेन, मुक्तिदशायां धर्मभूतज्ञानस्य सर्वत्र प्रसरणात् सर्वगत इत्यत्र अतिसूक्ष्मतया शिलादिष्वपि प्रतिघातानर्हत्वेन क्रमेण सर्वान्तः प्रवेशसम्भवेन वा निर्वाह इति भावः॥ २२॥

आत्मविषये जैनाभिमतदेहपरिमाणवादभङ्गः

नात्मा देहानुरूपं विविधपरिणतिर्निर्विकारोक्तिबाधात्
स्थूलोऽहं मूर्ध्नि जातं सुखमिति च मतिस्तस्य देहात्ममोहात्।
नानादेहश्च योगी प्रसजति भिदुरः पुंसि देहप्रमाणे
मुक्तौ देहात्ययात्स्यात्परिमितिविरहस्तत्प्रयुक्तेऽस्य माने॥ २३॥

सर्वा०—जैनास्त्वाहुः—सर्वाणि द्रव्याणि पर्यायवन्ति, आत्माऽपि द्रव्यम्, अतस्सोऽपि तत्तद्भोगायतनागुणाणुत्वमहत्त्वादिपर्यायवानितिः तान्प्रतिक्षिपति—नात्मेति॥ यो यद्भोगायतनवर्ती स तत्समपरिमाण इति नियमस्तावन्न दृष्टः; नच कल्प्यः, कल्पकासिद्धेरिति भावः। नैगमिकाभीष्टं हेतुमाह—निर्विकारेति॥ वृद्धिह्रासौ देहस्यावेवोच्येते; आत्मनि तु न क्वचित्, प्रत्युतान्यथा। ननु स्थूलोऽहं कृशोऽहमिति सामानाधिकरण्यात्, मूर्ध्नि मे सुखमित्यादिना सर्वावयवेष्वहमर्थवृत्तिदर्शनाच्च परमितिभेदः कल्प्य इत्यत्राह—स्थूल इति॥ सामानाधिकण्यं तावद्गौरोऽहमित्यादिष्वप्यस्तीत्यनेकान्तम्। देहद्वारैवात्मनि गौरत्वादिवादः, भ्रमाद्वा; तथेहापि। देहावयवेषु सुखाद्युत्पत्तिधियश्च देहात्मभ्रमेण। सर्वत्र सन्निधानेऽपि भ्रमाङ्गीकारः।

ननु *एकां शाखां जीवो जहातीत्यादिना छान्दोग्ये जीवस्य वृद्धिसङ्कोचौ श्रूयेते; तन्न, क्षेत्रादिष्विवाभिमानत्यागेनापि तदुपपत्तेः। तत्रतत्राभिमानसदसद्भावौ च कर्मनियतौ। खण्डितारोपितशाखाप्ररोहस्तु तादात्विकजीवान्तराभिमानात्। छिन्नजन्त्ववयवविकम्पः प्राणांशक्षोभमात्रात्, न हि तत्र वेदनायां प्रमाणमस्ति बाधान्तरमाह नानादेहा इति ॥ एकस्मिन्नेव काले योगिनां विरुद्धधर्माध्यासेन स्वरूपभेदः प्रसज्येत। प्रसङ्गान्तरमाह—मुक्ताविति ॥ देहप्रयुक्ते पुंसः परिमाणे मुक्तिदशयां देहाभावादात्मनः परिमाणविरहः स्यात्, तथा च गुणवद्द्रव्यत्वमेव हीयेत। अपरिमितस्यापि द्रव्यत्वं केचिदिच्छन्तीति चेन्न; विभुत्वप्रसङ्गादिति।२३।

आनन्द०—प्रसङ्गसङ्गत्या निरूपयति ;—

यद्द्रव्यं तत्पर्यायवत् यथा घटः तथाचात्माऽपि द्रव्यमित्यनुमानेनात्मनः परिणामित्वे देहातिरिक्तपरिमाणे प्रमाणाभावात् देहपरिमाणवानात्मेत्यर्थः। **पर्यायः**—परिणामः।

कल्पकासिद्धेरिति ;—ननु यद्द्रव्यं तत्परिणामवदिति व्याप्तिरस्त्येव। यो यद्भोगायतनं स तत्तुल्यपरिमाण इति व्याप्तिस्तु परिमाणान्तरे (र) कल्पकाभावात्सिध्यतीति कथं कल्पकाभाव इति चेन्न; परमाण्वादौ व्यभिचारात् सामान्यव्याप्तिरेव नास्ति कुतो विशेषव्याप्तिस्तदधीनेति भावः। ननु निर्विकारोक्तिबाधावित्यसंगतम् तैः पर्यायस्याङ्गीकारात वेदप्रामाण्यस्यानभ्युपगमाच्चेत्यत्राह ;—**नैगमिकाभीष्टमिति**। वेदप्रामाण्यदार्ढ्याभिप्रायेणेति भावः। प्रत्युतेति 'वृद्धिह्रासौ न तस्येष्टौ' इत्यादिनेत्यर्थः। ननु प्रत्यक्षेणैवात्मनो वृद्धिह्रासभाक्त्वमनुभूयते। तथा च तद्विरुद्ध आगमो ग्रावप्लवनवाक्यवदन्यपर इति शङ्कते—नन्विति। **मूर्ध्नि मे सुखमिति** ;—मूर्धन्यहमर्थतादात्म्याध्यासेन भवति। तदध्यासश्च अहमर्थस्य मूर्धावच्छेदेन सत्त्वे युज्यते। तत्सत्त्वं च देहपरिमाणभाक्त्वे भवतीति भावः। सामानाधिकरण्यबुद्धिर्न साक्षात्संबन्धनियतेत्याह ;—**गौरोहमिति**। सामानाधिकरण्यं सामानाधिकरण्यज्ञानमित्यर्थः ननु तत्रापि साक्षात्संबन्धोऽस्तु तत्राह ;—देहेति –आत्मनो देहव्यतिरिक्तस्याचाक्षुषत्वेन परैरपि रूपाद्यनङ्गीकारात्प्रतीयमानस्य देहरूपस्य तत्तादात्म्यानभ्युपगमादिति भावः। यद्यप्यनेकान्तवादे भिन्नाभिन्नत्वाभ्युपगमात् तादात्म्यमप्यस्तीति वक्तुं शक्यम्; तथाऽपि तन्निरासात् तैरनभ्युपगमाच्च तथा वक्तुं न शक्यमिति ध्येयम्। **तथेहापीति** ;—नात्र देहावयवेषु प्रत्येकमहमर्थतादात्म्यारोपः ! येन देहपरिमाणमात्मनस्सिध्येत्; अपि तु शरीरे। तथा च तत्तादात्म्यारोपो देहसंबन्धमात्रेणैव युज्यत इति न तदर्थं देहपरिमाणकल्पना। एवं च देहतादात्म्यारोपेणैवात्मनः सर्वावयवेषु सन्निधानारोपसंभवात्तथाधीरिति भावः। ननु सन्निधानारोपः किमर्थं कल्प्यते ? सर्वत्र सन्निधिरेवास्त्वित्यत्राह ;—**सत्सन्निधानेऽपीति**। अयं भावः ;—पादे वेदना शिरसि सुखम्

इत्यादिनिर्वाहाय हि तत्सन्निधानं कल्प्यते ! तदङ्गीकारेऽपि शरीरावयवेषु सुखादिबुद्धिर्भ्रान्तिरेव। तथा च तदङ्गीकारेऽपि तदनिर्वाहात् सर्वत्रात्मसन्निधानारोप एवास्त्विति भावः।

ननु जीवस्य वृद्धिह्रासभाक्त्वं श्रूयते इत्याशङ्कते;—नन्वित्यादिना। एकस्य वृक्षस्यैकजीवाधिष्ठितत्वात् तत्रैकशाखात्यागे कृते तत्त्यागो ह्रास एव। शाखोपचये तदधिष्ठितत्वस्वीकारो वृद्धिरिति जीवस्यैव वृद्धिह्रासभाक्त्वादिति भावः। ननु क्षेत्रादिष्विवाभिमानत्यागान्न शोषादिकम्। तत्स्वीकारे वा नोपचयः इति चेन्न; अत्र ज्ञानेन व्याप्याधिष्ठानरूपाभिमानविशेषस्य विवक्षितत्वात्। अत एव न स्वेच्छामात्रात्संभवतीत्याह;—तत्रतत्रेति। तथा च मनुष्याणां स्वहस्तपादाद्यभिमानत्यागः स्वाच्छन्द्यान्न भवतीति भावः। ननु देहपरिमाणपर्यायाभावे शाखाखण्डनेनात्मनः खण्डनाभावेन खण्डितशाखायां खण्डितस्यात्मनोऽभावात् आरोपितायाः प्ररोहो न स्यात्। न च सर्वोऽप्यात्मा खण्डितशाखायां तिष्ठतीति वाच्यम्; पूर्ववृक्ष एव विद्यमानत्वात्। अन्यथा वृक्षस्य शोषप्रसङ्गात्। तत्र भिन्नगोधाशरीराणां चलनं न स्यात् आत्मनस्तत्राभावात् इत्यत्राह;—खण्डितेति। प्राणांशेति—प्राणस्य सावयवस्य खण्डितस्य तत्रावस्थानादिति भावः। ननु वेदनया कम्पः वेदना चात्मन एवेति चेत् तत्राह;—न हि तत्रेति। एकस्मिन्निति;—शरीराणां न्यूनाधिकपरिमाणवत्त्वात् तत्तद्रूपपरिमाणानां विरुद्धानां धर्मिभेदसाधकत्वादिति भावः। गुणवद्द्रव्यत्वं—गुणत्वं द्रव्यत्वं चेत्यर्थः। परिमाणरहितस्य गुणमात्रशून्यत्वादिति भावः। परिमाणशब्दस्य परिच्छिन्नार्थकत्वं मत्वा शङ्कते;—अपरिमितस्येति। परिमाणं हि द्विविधम् अणुत्वमहत्त्वभेदात्। तथा चापरिच्छिन्नत्वमपि परिच्छिन्नादितरत् परिमाणान्तरमिति परिहरति;—नेति। यद्वा विभुत्वरहितस्य परिमाणाभावे द्रव्यत्वं न स्यादिति परिहर्तुर्भावमजानतश्शङ्का; अभिसन्ध्युद्घाटनं नेति॥ २३॥

अक्ष०—प्रसंगात् जैनात्मपरिमाणं निरस्यति—नात्मेति। देहानुरूपमिति परिणतिक्रियाविशेषणं—आत्मा देहानुरूपस्थूलत्वाणुत्वादिरूपविविधपरिणतिमान्न भवतीत्यर्थः। यो यद्भोगायतनवर्ती स तत्समपरिमाणः इति नियमस्य गृहादिवर्तिनि पुरुषेऽदर्शनेनाभावादिति भावः। कथंचिद्व्याप्तिकल्पनेऽपि शास्त्रेण बाधमाह—निर्विकारेति।

प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरः।
अव्यक्तोऽयमचिन्त्योऽय मविकार्योऽयमुच्यते॥

इत्यादिशास्त्रबाधादित्यर्थः। विकाराभ्युपगमे च घटादिवदनित्यत्वापत्तेरिति भावः। स्थौल्यादिपरिमाणाभावे अणुरूपस्यात्मनः कथं स्थूलोऽहमिति, मूर्ध्नि सुखमिति च मतिरित्यत्राह—देहेति। तस्य देहात्मभ्रमात् देहस्थौल्यमात्मनि

आत्मसुखं देहे तदवयवेषु च प्रतीयत इत्यर्थः। अभ्रान्तस्य तु गौरोऽहमितिवत् स्थूलादिशरीरकत्वेन सर्वेषु शरीरावयवेषु धर्मभूतज्ञानव्याप्त्या च उक्तप्रतीतिरिति भावः। बाधकान्तरमाह—नानेति। पुंसि देहसमपरिमाणे सति सौभर्यादिवत् नानादेहस्य योगिनः देहभेदेनात्मभेदस्स्यादित्यर्थः। एकदेह समपरिमाणस्यात्मनः देहान्तरे सत्वासंभवात् अनैकात्म्येपि ज्ञानव्याप्त्यादन्यत्र भोगोपपादने अणुत्वेऽपि तत्संभवेन देहपरिमाणकल्पनं व्यर्थमिति भावः।

एवं मुक्तावात्मनो देहपरित्यागोपगमात् देहप्रयुक्तपरिमाणस्याप्यभावः प्रसज्यत इत्यत्राह—मुक्ताविति। अस्यात्मनः परिमाणे शरीरप्रयुक्तेऽभ्युपगते सति प्रयोजकशरीराभावात् मुक्तौ परिमाणं किमपि न स्यात्; परिमाणाभावे च अवस्थावत्त्वरूपं द्रव्यत्वमेव न स्यात् अपरिमितस्यापि द्रव्यत्वे विभुत्वमेव स्यादिति भावः॥ २३॥

निर्मुक्तस्त्वन्मते स्यात्कथमपरिमितो नित्यमूर्ध्वं प्रधावन्
देहः कश्चित्तदानीमपि यदि नियतस्स्यात्तु तन्निघ्नताऽस्य।
इच्छातो देहमेकं विशति स परिमित्यर्थमेवेति हास्यं
तस्मादास्माकनीत्या परिमितिरिह सा स्थायिनी या विमुक्तौ।२४।

सर्वा०—भवतु विभुर्मुक्तः, को दोष इत्यत्राह—निर्मुक्त इति॥ मुक्तस्य हि पृथिव्या नित्यपतनवन्नित्योर्ध्वगमनं युष्माभिरुच्यते, आलोकाकाशावधि वा? उभयथाऽप्यपरिमितस्य गमनं न सिध्येत्। देहविशेषपरिमित एवोत्पततीति शङ्कते—देह इति। नियतः—अवश्यंभावी, स्वकर्मनियत इति वा। तत्र बाधकमाह—स्यादिति। कर्मनियतदेहत्वे परतन्त्रस्य कथं मुक्तत्वमिति भावः।

अस्तु घातिकर्मचतुष्टयरहितस्याघातिकर्मचतुष्टयप्रभावात् गत्यर्थो देहः, तत्परित्यागक्षणे झटिति परिमाणसिद्ध्यर्थं सकललोकमस्तकस्थायिनं कंचिद्दिगम्बरं देहं सर्वे मुक्ताः प्रविशन्ति, पृथग्वा शरीराणि परिगृह्णत इति वदन्तमुपालभते—इच्छात इति। न हि मुक्तस्येच्छाभोगौ युष्माभिरिष्येते, न च स्वच्छन्दव्यापाराः। अतः परिमाणमात्रसिद्ध्यर्थं देहं परिगृह्णातीति निर्मूलकल्पनं निपुणैर्हास्यम्। तर्हि का गतिरित्यत्राह—तस्मादिति। मुक्तौ काचित्स्वाभाविकी स्वीकार्या; सैव बद्धदशायामपि स्थिरेति नित्याणुर्जीवः। तथा च सूत्रम् *अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः इति। उभयमिह जीवस्वरूपं परिमाणं च॥ २४॥

आनन्द—[1]पूर्वाक्षेपेण सङ्गतिमाह-भवत्विति। पृथिव्या नित्यपतनवदिति-पृथिवी नित्यपतन[2]शीलेति जिनमतं पूर्वं प्रतिपादितं द्रष्टव्यम्। नित्योर्ध्वगमन-

१. पूर्वशेषत्वान्नपृथक् सङ्गतिरित्याह-ग। २. शीलेत्यधस्ताज्जिन-ग।

मिति। नित्याधःपतनं संसारः नित्योर्ध्वगमनं [1]मोक्ष इति जिनोक्तेरिति भाव। अलोकाकाशावधिवेति—लोकाकाशोऽलोकाकाशश्चेत्याकाशो द्विविध इति पूर्वं प्रतिपादितं द्रष्टव्यम्। उभयथाऽपि क्रियाया मूर्तधर्मत्वादिति भावः। ननु मोक्षान्यथाऽनुपपत्त्या कश्चन देहोऽस्तु तत्तुल्यपरिमाणतया परिच्छिन्नत्वादूर्ध्वं[2]गतियुंक्तेति शङ्कत इत्याह देहविशेषपरिमित इति। नियतशब्दस्य भूतार्थकप्रत्ययान्तस्य भाव्यर्थत्वं न मुख्यमिति शेषपूरणेन योजयति—स्वकर्मेति—ननु कर्म[3]निमित्तत्वमात्रेण न बन्धकत्वं [4]किं तु वाङ्मनःकायेन्द्रियनिमित्तकपापक्रियालक्षणघातिकर्मनिमित्तत्वेन। तथाचाघातिकर्माभिधानपुण्यनिमित्तदेहयोगात्परिमाणमस्तु[5] तत्श्चोर्ध्वगमनं चेति शङ्कते;—अस्त्विति। कर्माणि द्विविधानि घात्यघाति[6]भेदात्। [7]हिंसास्तेयासत्यात्मकानि घातीनि। अहिंसाऽऽनुकूल्यसत्यवचनात्मकान्यघातीनि। सर्वाण्यपि पुण्यापुण्यान्युक्तेष्वन्तर्गतानीति तेषां प्रक्रिया। तत्परित्यागक्षण इति—घातिकर्मजदेहपरित्यागक्षणे इत्यर्थः। नहीति—

इच्छाभोगादयो मुक्तौ न विद्यन्ते कदाचन।
ऊर्ध्वगा एव सततं न [8]च स्वच्छन्दचारिणः॥
जिनोपदिष्टसिद्धान्ते [9]मुक्ता घात्यादिवर्जिताः।

इत्युक्तेरिति भावः। ननु स्वच्छन्द [10]व्यापारविशेषोऽन्यविषयः। [11]शरीरमात्रपरिग्रहे सोऽस्तीति क्लृप्त इति चेत्;—अतः परिमाणमात्रेति। घातिकर्मादिरहितस्येच्छादयश्चेत्स्युः ते स्वरूपानुबन्धिनस्स्युः। निर्हेतुकवादानभ्युपगमात्। मोक्षार्थघातिकर्मचतुष्टयादेव तेषामुत्पत्तिरिति चेत्; तथात्वे सर्वभोगादयोऽप्यत ऊर्ध्वं स्युः। शरीरपरिग्रहेच्छादयस्तत्क्षण एव भवन्ति अन्ये भोगादयश्च न भवन्तीत्यत्र मानाभावादिति भावः। ननु मुक्तचन्यथानुपपत्त्या कल्प्यते; युक्तियुक्तस्यैव सिद्धान्तत्वादित्यत्राह— मुक्ताविति। सिद्धान्तं परित्यज्य चेद्युक्तियुक्तं स्वीक्रियते तह्यस्मदुक्तमेव तादृशमिति तदेव स्वीकुर्विति भावः। ननु वरदविष्णुमिश्रैः संसारदशायां स्वरूपज्ञानयोः सङ्कोचादणुपरिमाणमात्मस्वरूपम्। मोक्षदशायां तु सर्वगतं सर्वव्यापि ज्ञानं च विस्तीर्णतया प्रकाशते। अयमर्थो 'बालाग्रशतभागस्य' इति श्रुत्याऽवगम्यते। तथा च भगवता पराशरेण—'विष्णुशक्तिः परा प्रोक्ता' इत्यादिना जीवस्यापि सङ्कोचविकासयोगित्वमुक्तम्। तथा श्रीमद्गीताभाष्ये 'अनादि-

---

१. मोक्ष इति भावः—क।
२. गतियुक्तेति—क, गतियुंज्यत इति—ग।
३. निबन्धनत्वमा—ग।
४. किं तु जीवात्मनः कर्मेन्द्रियनिमित्तकपाप—ग।
५. मस्तु ऊर्ध्वग—ग।
६. भेदेन हिंसादिष्वपि ? सास्तेयासत्या—क।
७. हिंसापीडास्तेया—ग।
८. स्वतस्स्वच्छन्दचा—ग।
९. मुक्तया घाति—वि, क, मुक्ताघाति—वि, ग।
१०. व्यापारनिषेधोऽन्य—ग।
११. शरीरमात्रपरिग्रहे भोगातथात्वे सर्वभोगाद—

मत्परं ब्रह्म' इत्यादिव्याख्याने ब्रह्म—बृहत्त्वगुणयोगि शरीरादर्थान्तरभूतम्। यतः शरीरादिभिः परिच्छेदरहितं क्षेत्रज्ञतत्वमित्यर्थः। 'स चानन्त्याय कल्पते' इतिश्रूयते शरीरपरिच्छिन्नत्वं चास्य कर्मकृतम्। कर्मबन्धनान्मुक्तस्यानन्त्यमित्युक्तम्। तथा च 'लोके सर्वमावृत्य तिष्ठति' इत्यत्र लोके यद्वस्तु जातं तत्सर्वं व्याप्य तिष्ठति। परिशुद्धस्वरूपस्य देहादिपरिच्छेदरहिततया सर्वगामित्वमित्यर्थः' इत्युक्तम्। तथा 'चरं चाचरमेव च' इत्यत्रापीति जीवस्य सङ्कोचविकासावस्थावत्त्वमभ्युपगतमित्यत्राह—तथा चेति। सूत्रविरोधान्न यथाश्रुतार्थपरत्वम्। गीताभाष्यवचनं तु ज्ञानव्याप्त्येति नात्र स्वरूपव्याप्तिपरत्वम्। सारभाष्यादिषु 'स चानन्त्याय कल्पते' इत्यादेस्तथैव व्याख्यानात्। दीपे च 'प्रदीपवदावेशस्तथाच दर्शयति' इति सूत्रे वालाग्रेत्यादिश्रुतिमुपादाय 'प्रत्यगात्मनो ह्यणुत्वमेव स्वरूपमिति सूत्रकाराभिमतम्। 'नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्' इति परस्यैव महत्त्ववचनादिति प्रतिपादित एव। वरदविष्णुमिश्रवचनमप्युक्तार्थपरमिति स्वाभाविकमणुत्वमेव जीवस्येति भावः। सूत्रस्थोभयशब्दार्थमाह—उभयमिहेति ॥ २४ ॥

अक्ष०—मुक्तस्य विभुत्वे किं बाधकमित्यत्राह—निर्मुक्त इति। मुक्तस्य तिर्यगूर्ध्वगमनं युष्माभिरुपेयते तथा नित्योर्ध्वगामी कथमपरिमितः—विभुःस्यात् विभुत्वे क्रिया सामान्यायोगेन उद्गमनप्रसक्तेरसंभवादित्याशयः।

देहविशेषपरिमित एव ऊर्ध्वं गच्छतीत्यत्राह देह इति। तदानीमपि—मुक्तिदशायामपि। नियतः—कर्मविशेषनियतो यदीत्यर्थः। तर्हि अनिष्टं प्रसञ्जयति—स्यादिति। अस्य मुक्तस्य तन्निध्नता—कर्मवश्यता स्यादित्यर्थः। मुक्तस्य कर्मवश्यत्वं व्याहतमिति भावः।

ननु कर्माणि द्विविधानि घातिकर्माणि, अघातिकर्माणीति। हिंसादिपापकर्माणि घातिकर्माणि तेषां नाशे मुक्तिः भवति। अहिंसादिपुण्यकर्माणि अघातिकर्माणि तत्प्रभावात् मुक्तस्य गत्यर्थो देहः गत्यवसाने स परित्यज्येत, तत्क्षणे स्वस्य परिमाणसिद्ध्यर्थं स्वेच्छया सर्वलोकोपरिवर्तमानं दिगम्बरशरीरं प्रविशतीति न विरोध इति वादं परिहसति—इच्छात इति। सः - मुक्तः। परिमित्यर्थं—स्वस्य परिमाणसिद्ध्यर्थमेवेत्यर्थः। परिमाणस्य शरीरप्रयुक्तत्वादिति भावः। हास्यमिति—प्रमाणाभावादिति भावः।

तर्हि का गतिरित्यत्राह—तस्मादिति। मुक्तौ भवदुक्तदिगम्बरशरीरप्रवेशस्याप्रामाणिकत्वादित्यर्थः। आस्माकनीत्या—'अन्त्यावस्थितेश्च' इत्युक्तनीत्या मुक्तावशरीरस्य शरीरसमपरिमाणाभावेनान्यादृशस्य कस्यचित्परिमाणस्यावश्यंभावे तस्य पश्चाद्देहान्तरपरिग्रहाभावेन स्थायितया—आत्मनस्तत्परिमाणस्य चोभयोर्नित्यतया तदेवात्मनः स्वाभाविकं परिमाणमिति पूर्वमपि तस्मादविशेष इति सिद्धे परिमाणाविशेषे मशकादि शरीरानुप्रवेशानुसारेण अणुपरिमाण इत्येवाभ्युपेय। इति भावः ॥ २४ ॥

कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्
मुक्तैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥२५॥

सर्वा०—यदि यथाकर्म फलप्रद ईश्वरः, कर्माणि चानन्तान्यपरिमितकालभोग्यानि, तदा प्रागिव पश्चादपि कथं मोक्षोपायादिसिद्धिरित्यत्राह—कर्मेति ॥ चित्रप्रवाहत्वानूक्तिः परिहारकाकुगर्भा । तत्तदित्यादिना कस्यचित्कर्मिणः प्रागलब्धप्रजापतिप्रभृतिपदनिदर्शनम् । विपक्तिः—कर्मणां सहकारिलाभः, फलविशेषोद्गतिर्वा । तथा च पातञ्जलम्—*जात्यायुर्भोगा विपाका इति । चार्वाकव्यतिरिक्तास्सर्वे सामग्रीप्रवाहवैचित्र्यात्संसरतां मुक्तिहेतूपनिपातमिच्छन्ति । अतो नात्रानादिसंसारवादिना केनापि विमन्तव्यमित्यभिप्रायेण सर्वसिद्धान्तसिद्धत्वोक्तिः । तच्छब्देनानुकूलविपक्तिविशेषः परामृश्यते । स्वशब्दः कृपाविषयः । सम्पदिह विवेकवैराग्यादिरूपा । अपिस्संभावनार्थस्समुच्चयार्थो वा । इत्थमिति—प्रकृतिपुरुषादितत्त्वचिन्ताप्रकारेण । यद्वा हिरण्यगर्भादिविपाकवदित्यर्थः ।

ननु हिरण्यगर्भादिपदविपक्तिः स्वस्य प्रागसिद्धाऽपि पुरुषान्तरसिद्धजातीयेति चेत्; तत्त्वज्ञानवैराग्यादिसम्पदपि तथैव । दृष्टं चैतद् गुरुशिष्यक्रमे । आद्यमुक्तस्य ततः पूर्वमदृष्टजातीयेति चेन्न; आद्यमुक्तानिरुक्तेः । यद्यसौ पूर्वमुक्त एव, उक्तोत्तरमेतत् । अथ मुक्तेष्वादिः, स कथं त्वया विदितः ? ततः पूर्वं मुक्ताभावादिति चेत्, तमपि कथं वेत्थ ? अनादिमुक्तौ व्याघातादिति चेन्न; मुक्तप्रवाहे व्याघाभावात् । न ह्यनादिमुक्तः कश्चिद्बध्यते, साध्यमोक्षो वा भवेत्, येन व्याघातस्स्यात्; किंतु, अनादिबद्धास्सर्वेऽपि लब्धोपायाः क्रमेण मुच्यन्ते । तत एव मोक्षशास्त्रप्रामाण्यं निर्बाधमिति ॥ २५ ॥

आनन्द०—ननु जीवस्य देहपरिमाणत्वे मोक्षे देहाभावात् परिमाणनियमो न स्यादिति दूषण[1]मनुपपन्नम् मोक्षस्यैवासंभवात् इत्याक्षेपसंगत्या मोक्षलाभप्रकारमाह ;—यदीति ।

अनूक्तिः—अनुवादः । काकुगर्भेति ;—चित्रप्रवाहत्वादेव कदाचित्कस्यचित्कर्मणःपरिपाको भवतीत्यर्थः । तदेव प्रतिबन्द्यभि[प्रेत्य ?]चतुर्मुखादिपदं कथं [2]प्राप्स्यतीति भावः । विपक्तिशब्दस्य विपाकशब्दसमानार्थकत्वात् विपाकः फलसंपत्तिरिति नैघण्टुकवचनान्मुख्यार्थमेवाह ;—फलविशेषोद्गतिर्वेति ।

---

१. दूषणभाषणमनु—ग ।
२. कथं प्राप्स्यथ—क. थ. कथं प्रत्स्यथ इति—ग ।

उक्तार्थे [1]योगसूत्रसं[2]मतिमप्याह ;—तथाचेति । ब्राह्मणत्वादिर्जातिः । आयुः—कालसंबन्धः । भोगस्सुखानुभवः ; एते कर्मणां परिपाका इत्यर्थः । चार्वाकस्य देहात्म[3]वादिनो निर्हेतुककार्याङ्गीकारात् कर्मणोऽभावाच्च कथं कर्मानादित्वमित्यत्राह ;—चार्वाकेति केनापीति—सर्वेषां मतेऽपि इयन्तं कालमप्राप्तस्य मोक्षादेः प्राप्स्यमानत्वादिति भावः । तच्छब्देन—उत्तरार्धगततच्छब्देन ; विपश्चितो विशेष्यत्वात् तत्परा[4]मर्शे स्वस्य स्वकृपाविषयत्वमुक्तं स्यादित्यत्राह ;—स्वशब्द इति । ऐश्वर्यादिसंपदां [5]मुक्तचर्यत्वाभावादाह ;—विवेकेति । मूलेऽपि शब्दस्सं-भावना[6]र्थस्समुच्चयार्थो वेति ;—स्वर्गाद्यैश्वर्याणामित्यर्थः ॥ २५ ॥

अक्ष॰—दुर्वारकर्मबलेन संसरतामितः पूर्वमिव पश्चादपि कथं मुक्तेरवकाशस्स्यादित्यत्राह—कर्मविद्येति । आदिना वासनारुचि-प्रकृतिसम्बन्धपरिग्रहः । पुनः पुनरेषां क्रमेण परिवर्तनात् चक्र इत्युक्तिः । इह-संसारे । प्रतिपुरुषं-संसारिपुरुष सामान्यसाधारणमित्यर्थः । अनादिः चित्रप्रवाहः । अनिवार्यसुखदुःखानुभवप्रभेदः यस्य तस्मिन् । तत्तत्काले—तत्तफलदानानुकूलकाले । विपत्तिः—कर्मणां सहकारिलाभः । फलोत्पादो वा । 'जात्यायुर्भोगा विपाका इति पातञ्जलं विविधा—इष्टानिष्टानुभयरूपा । अनादिकर्मवैचित्र्यादेव मुक्तिहेतूपनिपात इति चार्वाकेतरसिद्धान्तिनस्सर्वेऽपि अभ्युपगच्छन्तीत्याह—सर्वेति ।

तल्लब्धेति । अत्र तच्छब्देन अनुकूलविपाकविशेषस्य परामर्शः । स्वशब्देन कृपायाः । यादृच्छिक सुकृताद्यनुकूलविपाककाले लब्धः स्वावकाशः यस्याः तया प्रथमगुरुकृपया भगवत्कृपया गृह्यमाणः विषयीकृतः कदाचित् मुक्तैश्वर्यं निरतिशयभोग्यभगवदनुभवपरिवाहकैङ्कर्यसाम्राज्यं तत् अन्ते यस्याः सम्पदः विवेकवैराग्यादिरूपायाः । निधिरपि—अपिना समुच्चयः । कश्चित्-विपश्चित् प्रकृत्यात्मस्वरूपस्वभावविवेकवान् । इत्थं—प्राकृतलोके सार्वभौमेन्द्र-रुद्र-हिरण्यगर्भादिवत् भविता भवेदित्यर्थः । कर्मवैचित्र्यात् कस्यचित् कदाचिदैहिकामुष्मिकसमीचीनफलोद्गमवत् अप्राकृतलोके मुक्तैश्वर्यान्तिसम्पदपि भवेदिति भावः ।

अवसरप्रतीक्षायाः भगवत्कृपायाः इतः पूर्वं यादृच्छिक सुकृतविपाकाद्यवसरालाभेन प्रवृत्त्यभावेऽपि पश्चात् तदवसरलाभे प्रवृत्तिसंभवात् न मुक्तेरनवकाश इत्युक्तं भवति ॥ २५ ॥

इति संसरतां प्रत्यापत्तिहेतुविशेषः

---

१. पातञ्जलसूत्रं पठति–क, ख । २. मतिमाह–क, ग ।
३. वादित्वातन्मते कर्मणोऽभावात्–क ।
४. मर्शभ्रान्ति वारयति स्वशब्द इति–क, ख । ५. मुक्तचन्तत्वा–क, ख ।
६. नापरो वा समु–ग ।

कृच्छ्रात्संवर्तकष्टाद्यपगमजनितस्थूलदेहस्य जन्तो-
र्जाग्रत्स्वप्नस्सुषुप्तिर्मरणमथ मृतेरर्धसंपद्दशास्स्युः ।
सर्वं दु:खान्धकारस्थगितमिह सुखं त्वत्र खद्योतकल्पं
त्यक्त्वा शुद्धाशयास्तन्निरवधिकसुखां निर्विविक्षन्ति मुक्तिम् ॥२६॥

सर्वा०—निर्वेदं सन्धुक्षयन् मुमुक्षोत्पत्तिप्रकारमाह—कृच्छ्रादिति ॥ मृते-रर्धसंपत्—मूर्च्छा । तथा च सूत्रं *मुग्धेऽर्धसंपत्तिः परिशेषादिति । सर्वम्—अनुकूलतया भाव्यमानमपि । ननु स्वर्गस्वराज्यादिप्रभूतसुखमप्यस्तीत्यत्राह—सुखं त्विति । अल्पास्थिरत्वव्यक्त्यै खद्योतदृष्टान्तः । तत्—विषमधुकल्पं वैषयिक-सुखम् । निरवधिकत्वोक्त्या निर्दुःखत्वमपि लक्ष्यते । निर्विविक्षन्ति—भोक्तु-मिच्छन्ति ॥ २६ ॥

आनन्द०—ननु मोक्षेच्छया शास्त्रप्रवृत्तिरिदानीमपि नोपपद्यते । ऐहिका-मुष्मिकस्वर्गादिसुखाभिलाषया प्रतिबन्धात् । तथाचाननुष्ठानलक्षणाप्रामाण्यं स्थितमेवेत्याक्षेप[1]सङ्गत्याह;—निर्वेदं संधुक्षयन्निति । अनुकूलतयेति—

कलत्रपुत्रमित्रार्थगृहक्षेत्रधनादिकैः ।
क्रियते न तथा भूरि सुखं पुंसां यथा सुखम् ॥

इत्याद्युक्तप्रकारेण सुखसाधनतया भ्राम्यमाणस्य दुःखसाधनत्वादिति भावः । तुशब्दस्य विशेषार्थकत्वात् स्वर्गादिविशेषपरत्वं सामान्यशब्दस्येत्यभिप्रायेणाह;—ननु स्वर्गेत्यादिना । अल्पेति; खद्योतप्रकाशस्याल्पत्वादस्थिरत्वाच्चेति भावः । तद्विशेषेति; -स्वर्गादीनामपि वैषयिकत्वात् पुनारागवर्धकत्वेन बन्धकत्वादिति भावः । प्रवेशार्थकस्याप्युपसर्गवशाद्भोगार्थत्वमित्याह: · भोक्तुमिति । विवक्षन्तीति [2]क्वचित् पाटः ; [3]तदा वचेस्सनि रूपम् । वचनस्येच्छापूर्वकत्वादिति चोच्यते ॥

कृच्छ्रादित्यादिमूलस्य प्रलयदुःखाद्यपगमेन स्थूलशरीरं प्राप्तस्येत्यर्थः । इति दशास्स्युरितिशब्दोऽध्याहर्तव्यः । जाग्रच्छब्दो यद्यपि शत्रन्तः पुरुषवचनः तथाऽपि भावप्रधाननिर्देशप्रचुरप्रयोगाद्दशापरः इति केचित् । यद्वा जाग्रतः स्वप्नो जाग्रत्स्वप्नः जाग्रतोऽनन्तरस्स्वप्न इत्यर्थः । स्थगितं—छन्नम् ॥ २६ ॥

अक्ष०—भगवत्कृपाया अवसरलाभेऽपि संसरतामैहिकमैश्वर्यं विहाय मुक्तैश्वर्ये कथमिच्छा स्यात् इत्यत्राह—कृच्छ्रादिति । दुःखादित्यर्थः बिलम्बादिति भावः । संवर्तकष्टं—प्रलयदुःखं, आदिना नरकादिदुःखपरिग्रहः । तदपगमे सति विलम्बेन जनितः स्थूलदेहः यस्य तस्य जन्तोः जागर-स्वप्न-सुषुप्ति-मरण-मूर्च्छा-

---

१. सङ्गत्यभिप्रायेणाह-क, ख ।
२. बहुशः पाठः–ग ।
३. तदावशकान्तावितिधातुः-क, ख ।

इत्यवस्थास्स्युरित्यर्थः। जाग्रदिति भावप्रधानर्निर्देशः। जागरावस्थापरः। मृतेरर्धं-सम्पत् मूर्च्छा "मुग्धेऽर्धं सम्पत्तिः" इति हि सूत्रं अस्या अवस्थाया मरणात्पूर्व-भावित्वेऽपि मरणार्थत्वेन निरूपणीयतया मरणानन्तरं निर्देशः। इह ऐहिकं, सर्वं जागराद्यवस्थापञ्चकमपि दुःखान्धकारेण स्थगितं-छादितं दुःखमयमित्यर्थः। सुखं तु आमुष्मिकस्वर्गादि खमपीत्यर्थः। अत्र-संसारे खद्योतकल्पं—स्वल्पमपि क्षणिक-मिति भावः। तत्-तस्मात् संसारे भोगसाधन स्थूलशरीरस्यैव दुर्लभत्वात् चिर-कालानन्तरं लाभेऽपि जागराद्यवस्थासु दुःखबाहुल्येन स्थितस्यापि अत्यल्पस्य सुखस्यानुपलम्भात्, उपलम्भेऽप्यत्यल्पतया तत्र तृप्तेरनुदयात् सर्वं सांसारिक-मैश्वर्यं त्यक्त्वा परित्यज्य शुद्धाशयाः—हेयोपादेयविवेचनक्षममानसाः निरव-धिकसुखां निर्दुःखसुखैकतानां मुक्तिं मुक्तैश्वर्यं निर्विविक्षन्ति—अनुभवितुमिच्छन्ति इत्यर्थः। भगवत्कृपैव सुकृतवशे स्वपरिगृहीतचेतनानां तत्वज्ञानमुत्पाद्य सांसारिक-भोगे निर्वेदमुत्थाप्य मुमुक्षामुत्पादयतीति भावः॥ २६॥

इति मुमुक्षोत्पत्तिप्रकारः

कश्चिच्चेन्नित्यबद्धः किमयमहमिति स्यान्मुमुक्षोरुपेक्षा
मैवं युक्तस्य मुक्तिर्भवति दृढमिति प्रत्ययात्तत्प्रवृत्तेः।
नो चेत्स्यामस्यमुक्तः किमहमिति न केप्यद्य मुक्तौ यतेरन्
सर्गस्थित्यादिसन्तत्यविरतिरत इत्येवमेकेऽन्यथाऽन्ये॥ २७॥

सर्वा०—इह सयूथ्याः परे च केचिदाहुः—इतः पूर्वमिव कारणाभावात् केचित्पश्चादपि न मोक्ष्यन्ते। *एकं पादं नोद्धरति स्वलीलाद्यर्थं समुद्धरंस्तं चेत, *सततं च मृत्युजन्मनाऽमृतं भवेत, *क्षिपाम्यजस्रमशुभान्...मामप्राप्यैव इत्यादि-भिरेतत्सिद्धम्। तस्मिन्पक्षे बाधकं शङ्कते—कश्चिदिति॥ सन्देहेऽपि प्रवृत्तिस्संभव-तीत्यभिप्रायेण प्रतिवक्ति—मैवमिति। अयं भावः—

स्वरूपे योग्यभावेऽपि सहकार्यव्यवस्थितेः।
विमुक्तिर्मम सिध्येद्वा न वेति विचिकित्सते।
अनिर्धार्यापि यः कश्चित्तथ्यमात्ममनोरथः।
पाक्षिके फलभूयस्त्वे सांयात्रिकवदीहते॥
यथाकथंचिदारब्धेऽप्यापवर्गिकत्वर्त्मनि ।
प्रीणन्नीश्वरो बुद्धिं प्रयच्छेन्निश्चलामिति॥

उपायविधानशास्त्रार्थनिश्चयात्स्वस्य च तदानुगुण्यदर्शनान्निस्संशयोऽपि कश्चित्प्र-वर्ततेत्याह—युक्तस्येति। अन्यथा कथंचिन्निष्फलप्रयत्नोऽप्यस्तीति निश्चयात्स किमहमिति कृष्यादावपि न प्रवर्ततेति भावः। नोचेदित्यादिनाऽपि प्रतिबन्द्यन्त-

रोक्तिः। स्वात्मन्यमुक्तत्वशङ्कायामपि कृतांशः फलिष्यत्येवेति शास्त्रतोऽवगमात् प्रवर्तेतेति चेत्; एवं नित्यबद्धसद्भावनिश्चयेऽपि स्वयं निवृत्तिधर्मयोग्यतया दृष्टः कृतमपि फलिष्यतीति किं न प्रवर्तते ? एवं नित्यबद्धे संभवति *अव्युच्छित्रास्ततस्त्वेते सर्गस्थित्यन्तसंयमा इत्यादिशास्त्रस्यार्थवत्त्वसिद्धिरित्याह—सर्गेति। अयमेव सिद्धान्त इति निश्चयव्युदासायाह— इत्येवमेक इति। पक्षान्तरमाह— अन्यथाऽन्य इति। स्वरूपयोग्यानां शुकादिवत्कदाचित्सहकार्यागमान्मुक्तिस्स्यादेव, *तदा संसारपान्थस्य याति मोहश्रमः शममित्यादेस्सङ्कोचकाभावादिति भावः ॥ २७ ॥

आनन्द०—नन्वेवमपि मुमुक्षायां सत्यामपि मुक्तिसाधने प्रवृत्तिर्नोपपद्यते; आत्मनो नित्यबद्धत्वशङ्कया प्रवृत्त्यसम्भव इत्याक्षेपसङ्गत्याऽऽह—इह सयूथ्या इति। सयूथ्याः—श्रीराममिश्रप्रभृतयः। परे—माध्वादयः। ननु 'ब्रह्म वेद ब्रह्मैव भवति' इति ब्रह्मोपासनस्यावश्यं फलव्याप्तत्वात्[1] कारणे सति कथं न मुक्तिः ? इत्यत्राह;—कारणाभावादिति। केषाञ्चिदुपासनमेव नास्तीत्यर्थः। तत्र किं प्रमाणमित्यत्राह;—एकं पादमिति। मोक्षयिष्यन् स्वलीलारससिद्धये प्राणिजातेष्वेकांशं नोद्धरति न मोक्षयिष्यतीत्यर्थः। सततं चेति;—सततं जन्मजरामरणजन्मवत्त्वान्न मुक्तो भवतीत्यर्थः 'मामप्राप्य' इति कालविशेषानिर्देशेन सर्वकालप्रतीतेरित्यर्थः। बाधकं शङ्कत इति;—नित्यबद्धस्स्वयं चेत् मोक्षार्थस्वप्रयत्नवैफल्यादिति भावः। न हि प्रतिज्ञामात्रेणार्थसिद्धिरित्यत्राह;—अयं भाव इति। संशयो न प्रतिबन्धकः प्रवृत्ताविति भावः। अन्यथा सर्वमुक्तिपक्षेऽपि दोषस्स्यादित्याह;—स्वरूपेति। मुक्तौ स्वरूपयोग्यस्य भावः स्वरूपयोग्यता; तस्मिन् सत्यपि सहकारिणो विद्योत्पादकस्याव्यवस्थितेरप्राप्तिसंभवात् विमुक्तिः मोक्षः भवेन्न वेति विचिकित्सते—सन्दिग्धे। तथा च सर्वस्य मुक्तियोग्यतापक्षेऽपि सन्देहस्य सुलभत्वात् प्रवृत्तिर्न स्यादिति भावः। [2]ननु तर्हि पक्षद्वयेऽपि दोषे मोक्षार्थप्रवृत्तिरेव न स्यादित्यत्राह;—अनिर्धार्येति। आत्मनो मनोरथ इच्छा; तस्याः फलाभाव इति निश्चित्यापि फलस्य भूयसः पाक्षि[3]कज्ञानमात्रेणापि पोतवाणिज्ये समुद्रपतनादिवह्वपायसम्भवेन पाक्षिकविपरीतफलकत्वज्ञानेऽपि प्रवृत्तिदर्शनात् अत्र सुतरां प्रवृत्तिर्भवतीति भावः। यथा कथञ्चिदिति पद्यं गद्येनैकवाक्यम्; उपायारम्भमात्रेणोपायपूर्तिर्नियतेति प्रतिपादनात्। स्वस्य कथञ्चित्प्रारम्भनिश्चयेनोपायपूर्तेरपि निश्चयात् फलव्याप्यत्वेनोपायस्य तन्निर्णयाच्च प्रवर्तेत इत्यर्थः। केचित्तु यथाकथञ्चिदारब्धेऽपि सन्देहेनैव प्रथमं प्रवृत्तिः तदनन्तरमन्यफलसिद्धिपर्यन्तनिश्चयः। स्वयमेव भगवत्कृपा भवतीति नास्य मध्ये निवृत्तिप्रति-

---

१. त्वात् तस्मिन् सति—क, ख। २. ननु पक्षद्व—क, ख।
३. कप्राप्तज्ञान—ख।

बन्धकत्वे प्रेक्षावत्प्रवृत्तिमात्रमुच्छिद्येतेत्यत्राह ;—अन्यथेति । ननु नेहाभिक्रमनाशोऽस्तीति शास्त्रबलात् कृतस्यान्त्यमुक्तिकारणत्वनिश्चयात् प्रवृत्तिस्सम्भवतीति शङ्कते ; —स्वात्मनीति । तर्हि कृतस्य फलव्याप्तत्वनिश्चयादेव प्रवर्तत इत्याह ;—एवमिति । फलव्याप्तसाधने प्रवृत्त्यौन्मुख्यमात्रेणात्मनि नित्यबद्धान्यत्वनिश्चयस्सं-भवतीति भावः । दृष्टः—निश्चित इत्यर्थः । एवमिति ;—सङ्कोचे माना-भावादिति भावः । सङ्कोचकाभावादिति ;—संसारपान्थशब्दस्यसर्वसाधारण्या-दिति भावः । नन्वव्युच्छिन्नास्तत इत्यादिवचनबलात्संकोचः किन्न स्यादिति चेत् ; न ; एतदनुसारात्तस्यान्त्यमुक्तिपर्यन्ताविच्छेदपरतया सङ्कोचः किं न स्यादिति वैपरीत्यप्रसङ्गादिति भावः ॥ २७ ॥

अक्ष०—कर्माधीनभोगेषु दोषदर्शनेन निर्विण्णानां मुमुक्षा पूर्वमुपपादिता तामाक्षिपति—कश्चिदिति ।

क्षिपाम्यजस्रमित्यादिप्रमाणानुसारेण नित्यसंसारिणः केचित् स्युरिति रामिमिश्रादयस्सयूथ्याः, माध्वा अपि वदन्ति । तत्र के नित्यसंसारिण इति विज्ञातुं न कोऽप्युपायस्समस्ति अतः किमहमपि तादृशस्स्यामिति सर्वेषा मपि सन्देहो भवितुमर्हति । सन्देहे सति निश्चितमैहिक मल्पमपि परित्यज्य सन्दिग्ध आपवर्गिके कस्यापि नेच्छा भवतीति मुमुक्षा दुरुपपादैव । अतो भगवत्कृपाया अवसरलाभेऽपि न प्रयोजनमस्तीति भाषमाणानामाशङ्कां परिहरति - मैवमिति । फलभूयस्त्वे सति सन्देहेनापीच्छा भवेदिति भावः । निस्संशय एव कश्चित् प्रवर्तेत इत्याह—युक्तस्येति योगिन इत्यर्थः । मुक्तिः दृढं भवतीति प्रत्ययात् मोक्षोपायविधान-शास्त्रेण निश्चयात् स्वस्य तदाभिमुख्यदर्शनाच्च नाहं नित्य संसारी नित्य संसारित्वे मोक्षतदुपाययोराभिमुख्यमेव न भवेत् मम तु आभिमुख्यमस्तीति विशेषदर्शनात् केषांचित् प्रवृत्तिर्भवेदेवेति भावः ।

प्रतिबन्दीमाह—नोचेदिति । नित्यसंसार्यभावपक्षेऽपि अन्त्यमुक्तेन केनचिद्-भवितव्यं किं स एवाहमिति संशयात् केऽप्यधुना मुक्तौ न प्रवर्तेरन् इति तुल्यो दोष इति भावः । 'नेहाभिक्रमनाशोऽस्ति' इत्यादि शास्त्रप्रमाण्यनिश्चयेन कृतांश-साफल्यावश्यंभावनिश्चयात् प्रवृत्तिरिति चेत् नित्यसंसारिसत्त्वेऽपि स्वस्मिन् निवृत्ति धर्मयोग्यतामवलोक्य फलसिद्धिनिश्चयवन्तः केचित् प्रवर्तेरन्निति समस्स-माधिरिति भावः । नित्यसंसार्युपगमे—

"अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः इत्यादि सार्थकं भवतीत्याह-सर्गेति । अयं न सर्वानुमत इत्याह एक इति । पक्षान्तरमाह—अन्यथेति । तदा संसारपान्थस्य याति मोहश्रमश्शमं"

इत्यस्य संकोचकाभावादिति भावः ॥ २७ ॥

इति नित्यसंसारिसदसद्भावपक्षौ ।

नि:शेषात्मापवर्गे विरति[त]विहरणो विश्वकर्ता तदा स्यात्

नित्यं चेत्कोऽपि दुःख्येन्निरुपधिकदयाहानिरस्येति चेन्न ।

पक्षः पूर्वो यदि स्याद्विहरणविरतिः स्वेच्छया नैव दोषः

शिष्टे पक्षे निरुद्धा निरुपधिकदया कुत्रचिन्नित्यमस्तु ॥ २८ ॥

सर्वा०—द्वयोरपि पक्षयोर्दोषमाशङ्क्य प्रत्याह—निश्शेषेति ॥ उत्तरार्धं पक्षद्वयदोषपरिहारार्थम् । पुरुषान्तरप्रतिरोधादिना लीलाविरतौ हि दोषः नतु स्वेच्छया, प्रवृत्तिवत्निवृत्तेरप्यैच्छत्वात् । क्वचिन्नित्यं दयारोधोऽपि, तत्तज्जीवकर्मवशात् । अतः प्रतिबन्धरहितेषु सावकाशा कृपा, अल्पव्याजेनानन्तापराधसहनाच्च ॥ २८ ॥

आनन्द०—ननु पक्षद्वयस्यापि दोषवत्त्वेन परित्याज्यत्वे मुक्त एव न स्यादित्याक्षेपसङ्गतिमाह ;—पक्षद्वयेऽपीति । निश्शेषं यथा भवति आत्मनां—जीवानां अपवर्गे सति—मुक्तौ सत्याम् । विश्वकर्ता—ईश्वरः । विहृतं त्यक्तं विहरणं विहारो यस्य तथोक्तः । तथा लीलाविघातस्स्यादिति सर्वपक्षे दोषः इत्यर्थः । यदि नित्यबद्धपक्षः तदा नित्यमेव कश्चिद्दुःखी स्यात् तथा तद्विषयदयाहीनतया वैषम्यदोषः स्यादिति मूलस्यार्थः । क्वचिन्नित्यं दयारोधोऽपि नित्याया दयाया न प्रतिबन्ध इत्यर्थः । ननु दया नाम निरुपाधिकपरदुःखप्रहाणेच्छा । तस्याश्चे[1]त्कर्मणा प्रतिबन्धः तदा इच्छायाः फलाभावात् सत्यसङ्कल्पत्वं न स्यात् । यदि यस्याः कस्याश्चिदिच्छायास्सत्यत्वमात्रात्सत्यसङ्कल्पत्वम् तदा अस्मदादीनामपि तत्प्रसङ्गः । यदि तद्विषयकृपात्मिकेच्छैव नास्तीति ब्रूषे तदा क्वचित्कृपाविरहाद्वैषम्यतादवस्थ्यमिति चेत् ; मैवम् ; ईश्वरस्य यदीच्छा स्यात् तदा सा फलाव्यभिचारिणीति सत्यसङ्कल्पत्वम् । न च क्वचिन्नैर्घृण्यप्रसङ्गः ! तद्विषये कृपारूपेच्छायोग्यतायास्सत्वात् । मोक्षयिष्यामीत्याकारात्विच्छा कर्मणा प्रतिबन्धान्नास्त्येवेति न नैर्घृण्यप्रसक्तिः । यथा वदान्ये कस्मिंश्चित्कश्चिदगर्वादिना न प्रतिगृह्णाति समीपं वा नायाति तावताऽस्य वदान्यस्य का हानिरिति ॥ २८ ॥

अक्ष०—पूर्वोक्तयोर्द्वयोरपि पक्षयोः दोषमाशङ्क्य प्रतिवक्ति निश्शेषेति । कृत्स्नात्मनामपि मोक्षे सति ततः परं सृज्याभावात् सृष्ट्यादिलीलाया उपरमावश्यंभावात् विश्वकर्ता प्रतिहतलीलासङ्कल्पस्स्यात् इति नित्यसंसार्यभावपक्षे दोषः प्रसज्यत इति भावः । पक्षान्तरेऽपि दोषमाह—नित्यंचेदिति । कोऽपि नित्यसंसारी नित्यं दुःख्येच्चेत् तदा विश्वकर्तृः निरुपधिकदयाहानिस्स्यात् नित्यदुःखिनो दुःखानिवारणादिति भावः । प्रथमपक्षे उक्तं दोषं परिहरति पक्षःपूर्व इति । परप्रतिरोधेन लीलाविरतिरेव दोषः स्यात्, न तु स्वेच्छया विरतिरपीति भावः ।

---

१. त्कर्मणि—ग ।

द्वितीयपक्षे दोषं वारयति—शिष्ट इति। नित्यसंसारि सद्भावपक्ष इत्यर्थः। कुत्रचिदासुरप्रकृतिषु निरुपाधिकदया नित्यं तत्कर्मणा प्रतिबद्धा भवतु; भगवतः तावता न निरुपाधिकदयाहानिप्रसङ्गः, दैवप्रकृतिषु तस्याः सावकाशत्वादिति भावः। अत्र पूर्वार्धे विरति विहरण इति प्राचीन पाठ एव साधीयान् उत्तरार्धे विहरणविरतिर्नैव दोष इति दर्शनात् यस्याएव दोषत्वमाशङ्कितं तस्या एव तत्परिहर्तव्यमिति न तिरोहितं सुधियाम् ॥ २८ ॥

इति पक्षद्वयोक्तप्रसङ्गपरिहारः

भक्तिर्मुक्तेरुपायः श्रुतिशतविहितस्सा च धीः प्रीतिरूपा
तन्निष्पत्त्यै फलेच्छाद्युपधिविरहितं कर्मवर्णाश्रमादेः।
ज्ञानध्यानादिवाचां समफलविषया सैव युक्ता प्रतिष्ठा
सामान्योक्तिस्समानप्रकरणपठिता पर्यवस्येद्विशेषे ॥ २९ ॥

सर्वा० – धर्मस्य तत्त्वं निहितं गुहायाम्; किंपुनर्निवृत्तिधर्मस्य ? अतः कथं कश्चिदपि मोक्ष्यत इत्यत्र मोक्षोपायस्वरूपं निष्कर्षति—भक्तिरिति ॥ श्रुतिशतविहितो मुक्तेरुपायो भक्तिरित्यन्वयः। ननु ब्रह्मविद्ययैव मुक्तिरिति सिद्धान्तः। भक्तिशब्दस्त्वष्टविधत्वादिवचनैरन्यार्थः। *भज सेवायामिति च सामान्यतः पठ्यते। क्वचित्तु रूढिक्लृप्तौ गौरवमित्यत्राह—सा चेति। धीरित्यनेन ब्रह्मविद्यात्वाविरोधस्थापनम्। प्रीतिरूपेति रूढिनिमित्तसूचनम्। महनीयविषये प्रीतिर्भक्तिः; प्रीत्यादयश्च ज्ञानविशेषा इति वक्ष्यते। *स्नेहपूर्वमनुध्यानं भक्तिः इति चोपायो विशेष्यते।

*अपाम सोमममृता अभूम इत्यादिदर्शनात्कर्मभिरेव मुक्तिः किं न स्यादित्यत्राह—तदिति। केवलधर्माणां क्षयिफलत्वनिश्चयात्तत्रामृतत्वादिवचनमन्यपरम्। विद्याङ्गेषु तु मुक्तिसाधनत्वश्रुतिः स्तुत्यर्था। अतः *तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति इत्यादिभिरभिप्रेतं संनिपत्योपकारकत्वमिह युक्तमिति भावः। फलशब्दोऽत्र स्वर्गादिविषयः। फलसङ्गकर्तृत्वाभिमानत्यागे हि स्वरूपानुरूपफलसाधनाङ्गत्वमित्यभिप्रायेणोपाधिरहितत्वोक्तिः। उत्तरेणादिशब्देन गुणनिमित्तादिसंग्रहः। ननु वेदनध्यानोपासनादिशब्दैर्मुक्त्युपायोक्तौ यथार्हं विकल्पः स्यादित्यत्राह—ज्ञानेति। समफलविषयेति एकत्र विश्रमौचित्यप्रदर्शनम्। संभवति गत्यन्तरेऽष्टदोषविकल्पो न न्याय्यः। न चैकस्मिन्नधिकारिणि गुरुलघुविधिः स्यात्। नापिज्योतिष्टोमाग्निहोत्रादिवदिह फलतारतम्यसंभव इति भावः। प्रतिष्ठा तत्तत्सामान्याकारैः प्रतिपाद्येत्यर्थः।

ननु—* यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।

इति कठवल्लीवाक्याद्भक्तेर्ज्ञानहेतुताऽवगम्यते। गीयते च *भक्त्या मामभिजानाति इत्यादि। संजयश्चाह *शुद्धभावं गतोभक्त्या शास्त्राद्वेद्मि जनार्दनम् इति। अतो भक्तिसाध्यज्ञानविशेषान्मुक्तिः स्यादित्यत्राह—सामान्येति। अयं भावः—भक्तेर्ज्ञानसाधनत्वश्रुतिः पर्वभेदेनानेकफलतया स्यात्। अत एव हि *भक्त्या त्वनन्यया शक्यः इत्यादिना ज्ञानदर्शनप्राप्तिसाधनत्वोक्तिः। *भक्त्या लभ्यस्त्वनन्यया इति च नियम्यते। भक्तिसाध्यं प्रापकज्ञानमपि भक्तिलक्षणोपेतम् अतो वेदनादिसामान्यशब्दानामिह पश्वादिन्यायात् सन्निहितविशेषपर्यवसानं सिद्धम्॥ २९॥

आनन्द०—नन्वेवमपि मोक्षसाधननिर्णयासम्भवान्न प्रवृत्तिरित्याक्षेपसङ्गतिमाह;—धर्मस्येति। गुहायां निहितम्—अतिगूढम्; दुर्ज्ञेयमितियावत्। भक्तिरष्टविधेत्यादिना कर्मरूपत्वं क्वचित्प्रतीयते। भक्तिज्ञानमिति लोकप्रसिद्धिः। 'यस्य देवे परा भक्तिः' 'भक्त्या मामभिजानाति' 'भक्त्या वेद्मि' इति ज्ञानं प्रत्येव भक्तेर्हेतुत्वं प्रतीयते।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।

इति कर्मणां मोक्षहेतुत्वं क्वचित्। 'ब्रह्म वेद' इति ज्ञानमात्रस्य 'स्मृतिलम्भे' इत्यादौ ध्यानस्य 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति अविच्छिन्नज्ञानसन्ततेः; इत्यादिविप्रतिपत्त्या निर्णयासम्भव इति भावः॥

भक्तिशब्दार्थविचारेऽपि न ज्ञानार्थत्वनियम इत्यत्राह—भजसेवायामिति। रूढिनिमित्तसूचनमिति—प्रवृत्तिनिमित्तसूचनमित्यर्थः। गच्छतीति गौरित्यत्रेव न व्युत्पादनं वाधकमिति भावः। ननु कथं प्रीतिरूपत्वमात्रेण भक्तिरूपत्वमित्यत्राह—महनीयेति। ननु प्रीतिरूपत्वमात्रेण विद्यात्वाविरोध इत्यत्राह—प्रीत्यादयश्चेति। अनुपदमेवेति शेषः। ननु भक्तिरुपायश्चेत् सैव स्मृतिरिति भक्तिस्मृत्योः पर्यायिता स्यादित्यत्राह—स्नेहेति। स्मृतिमात्रं न भक्तिः; अपि तु स्नेहपूर्विका स्मृतिरित्यर्थः।

अपामेति—चातुर्मास्यप्रकरणश्रुतस्य कर्मफलमात्रोपलक्षकत्वादिति भावः। क्षयिफलत्वनिश्चयादिति। आवृत्तिविधानादिभिरिति शेषः। अन्यपरमिति। वहुकालावस्थानपरमित्यर्थः। अङ्गिफलमङ्गे उपचर्यंत इति परिहारान्तरमाह—विद्येति। अङ्गिफलमङ्गे उपचर्यंत इत्यत्र किं नियामकमित्यत्राह—अत इति। श्रुत्या विद्यां प्रत्यङ्गत्वेन कर्मणां विनियोगादिति भावः।

ननु फलेच्छाद्युपाधिरहितमित्ययुक्तम्, मुमुक्षापूर्वकविद्येच्छायास्सत्त्वादित्यत्राह—फलशब्द इति। ननु फलान्तरार्थभक्त्यङ्गकर्मानुष्ठाने फलेच्छाविरहो नास्तीत्यत्राह—फलेति। यदर्था भक्तिस्तदन्यफलेच्छाराहित्यं विवक्षितमिति भावः। आदिशब्देन वयोवस्थादिसंग्रहः। नन्विति। शब्दान्तरेण भेदप्रतीतीतेरिति

भावः। ननु दहरादीनां विकल्पोऽङ्गीक्रियते, तद्वदत्राह—न चैकस्मिन्निति। युक्तं दहरादेर्विकल्प इति, तुल्यशिष्टत्वात्। न स्नानवदधिकारिभेदाद्विकल्पः, तद्भेदाश्रवणादिति भावः। ननु ज्योतिष्टोमादिवत्फलभेदाद्विकल्पोऽस्त्वित्यत्राह–नापीति। सर्वकर्मनिवृत्तौ तारतम्यासंभवादिति भावः।

तत्तत्सामान्येति। विशेष एव सामान्यशब्दविधेय इत्यर्थः। ननु सामान्यशब्दो विशेषे पर्यवस्यतु। तावता भक्तेर्ज्ञानसाधकत्वशङ्कायां कः परिहार इत्यत्राह—अयं भाव इति। अत्रापि भक्तिशब्दः पर्वविशेषविशिष्टभक्तिपरः। भक्तिसाध्यज्ञानसाध्यपर्वविशेषविविशिष्टं भक्तिरूपमेव ज्ञानं विवक्षितमिति सर्वमुपपन्नमिति भावः॥

अत एवेति। यत एव भक्तिशब्दोऽनेकावस्थाविशिष्टभक्तिरूपज्ञानपरः, अत एव भक्तित्वरूपसामान्येन ज्ञानसाधकत्वोक्तिः संगच्छत इति भावः। नियम्यत इति। भक्तिर्दर्शनाद्यवस्थापन्नैव मोक्षसाधनत्वेन नियम्यत इत्यर्थः।

एवं च भक्तिसाध्यत्वेऽपि मोक्षसाधनीभूतज्ञानस्य न ज्ञानमात्रत्वम्, अपि तु विशेषरूपत्वमिति 'भक्त्या मामभिजानाति' (गी० १८-५५) इत्युक्तेऽपि विशेषपरत्वं ज्ञानादिशब्दानां सिद्धमित्याह—अतो वेदनादीति॥ 'पशुना[1] यजेत' इति श्रुतपशुशब्दस्य 'छागस्य[2]' इत्यादिना मान्त्रवर्णिकच्छागविशेष[3]परत्ववदिति भावः। एवं च [4]स्तुतिनमस्कारादिषु भक्ति[5]शब्दप्रयोगस्तत्सवन्धादुपचारनिमित्त इति ध्येयम्॥ २९॥

अक्ष०—अथ मुक्त्युपायमाह—भक्तिरिति। 'तमेवं विद्वानमृतः' 'य एनं विदुरमृतास्ते भवन्ति' 'ब्रह्मविदाप्नोति' ब्रह्मवेदब्रह्मैव भवति' यः पुनरेतं परं पुरुषमभिध्यायीत सः··· ···परं पुरुषमुपैति दिव्यं'' इत्यादिश्रुतशतविहितः मुक्त्युपायः भक्तिरित्यर्थः।

"भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परं तप॥"

इति वचनादिति भावः। भक्तिस्वरूपमाह—सा चेति। 'प्रीतिरूपविशदस्मरणज्ञानमेव भक्तिरित्यर्थः। प्रीतिस्नेहपूर्वमनुध्यानं भक्तिरित्यभिधानादिति भावः।

तर्हि 'अपाम सोमममृता अभूम'' इत्यादौ कर्मणैव मुक्त्यभिधानं कथमित्यत्राह—तन्निष्पत्त्या इति। अत्र आदिना वयोऽवस्थापरिग्रहः। निरुक्तभक्तिरूपाङ्गि-

---

१. यथा पशुना–ख। २. छागस्य वपाया इत्यादिना–ख।
३. परत्वं तथेत्यर्थः–ख। ४. स्तुत्यादिपु-ख।
५. शब्दस्तत्संबन्धा–ख।

निष्पत्तये स्वर्गादिफलसंगादिरहितं वर्णाश्रमादिधर्मरूपं कर्म "विविदिषन्ति यज्ञेन" इत्यादिवाक्यविहितं सन्निपत्योपकारकमङ्गमित्यर्थः। प्रतिबन्धकरजस्तमोनिबर्हणेन भक्त्युत्पादके तस्मिन् स्तुत्यर्थं फलनिर्देश इति भावः।

ननु वेदन-ध्यानादिशब्दान्तरैः मुक्तिसाधनोक्तौ तेषां भिन्नानां यथार्हं विकल्प एव किं न स्यादित्यत्राह—ज्ञानेति। अत्राधिकारिभेदाश्रवणेन तुल्यफलविषये गुरुलघुविकल्पायोगेन ज्ञानध्यानादिशब्दानां ज्ञानत्वध्यानत्वादि सामान्याकारेण सैव भक्तिरेव युक्ता प्रतिष्ठा—प्रतिपाद्यतया पर्यवसानभूमिरित्यर्थः। सम्भवन्त्यां गतौ अष्टदोषदुष्टविकल्पाश्रयणस्यायुक्तत्वात्। दहरादिविद्यासु अगतिकतया तदाश्रयणमिति भावः।

ननु

'यस्य देवे पराभक्तिः यथादेवे तथा गुरौ।
तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मनः॥

'भक्त्या शास्त्रात्वेद्मि' इत्यादौ ज्ञानस्य भक्तिजन्यत्व श्रवणेन भक्तिजन्यज्ञानादेव मुक्तिस्स्यादित्यत्राह सामान्येति। समानप्रकरणस्थसामान्यवचनस्य छागपशुन्यायेन विशेष एव पर्यवसानात् भक्तेरेव पर्वभेदेन ज्ञानदर्शनप्राप्तिरूपंमुक्तिसाधनत्वमुपपन्नमिति भावः॥ २९॥

ध्यानाद्युक्त्या ध्रुवानुस्मृतिरिह विहिता ग्रन्थिमोक्षाय सैव
स्पष्टा दृष्टिस्तथैव श्रुतफलविषया सेवनत्वादुपास्तिः।
क्वाऽप्यैक्यं विद्युपास्त्योर्व्यतिकरितगिरा भक्तिमेवाह गीता
सर्वं तद्वित्तिमात्रं फलवति विफलं तेन सैवं विशिष्टा॥ ३०॥

सर्वा०—ये तु मन्यन्ते *तमेवं विद्वान्, *ब्रह्मविदाप्नोति परम् इत्यादिषु यथाश्रुति वित्तिमात्रस्य मुक्तिसाधनत्वविधिः कल्प्यः; सकृत्कृतश्च शास्त्रार्थः; अतो न विशेषपर्यवसानं युक्तमिति। तान्प्रति सफलत्वाद्युक्त्या सूचितं व्यनक्ति—ध्यानाद्येति॥ अत्र हि मुक्तिसाधनवित्तेः प्रत्ययावृत्तिरूपचिन्तावाचिध्यानशब्दशक्त्याऽनावृत्तिरूपत्वं निरस्तम्। न्यायस्तु न वचनविरोधे। आदिशब्देन ज्ञानवेदनादिशब्दसंग्रहः। ध्रुवानुस्मृतिशब्दस्तु चिन्ताया निरन्तरस्मृतिरूपत्वमाह। ग्रन्थिमोक्षायेति फलैक्यव्यञ्जनम्। तत्फलार्थे वाक्ये दृष्टिशब्दस्तु स्मृतिमेव वैशद्येन विशिनष्टि।

ननु चाक्षुषज्ञानं प्रत्यक्षमात्रं वा ब्रूयादित्यत्राह—तथैवेति। विशदध्रुवानुस्मृतौ उपास्तिशब्दनिमित्तमाह—सेवनत्वादिति। *यस्तद्वेद इत्यादिषु केषुचिद्वाक्येषु एकस्मिन्नेव विषये वेदनोपासनशब्दयोर्व्यतिकरेणोपक्रमोपसंहारदर्शनाच्च वेदनमेवोपासनतया विशेष्यत इत्याह—क्वापीति। एतेषु क्वचिदपि वाक्ये

भक्तिशब्दो न मोक्षोपायविषयः श्रूयत इत्यत्र *यमेवैष वृणुते तेन लभ्य इति श्रुत्यभिप्रेतं गीयत इत्याह—भक्तिमेवेति। फलितमनिष्टप्रसङ्गमाह—सर्वं तदिति। निगमयति—तेनेति। सा मुक्तिसाधनतयोक्ता हि वित्तिः भक्तिरूपत्वपर्यन्तविशेषणविशिष्टेत्यर्थः ॥ ३० ॥

आनन्द० पूर्वपद्योक्तस्यैव प्रपञ्चात्मकत्वादत्र न पृथक्संगतिरित्यभिप्रायेणाह—ये त्वित्यादिना॥ युक्तं सामान्यशब्दस्य विशेषपरत्वं पश्वादौ, इह तु स कुत [1]इति न्यायविरोधान्न विशेषपरत्वमित्यधिकाशङ्केति भावः॥

अत्र हीति—'तमेवं विद्वान्' इत्यादौ वेदनं प्रतीयते, न त्वनावृत्तत्वादिरूपम्। तथा च न्यायतोऽनावृत्तत्वं कल्प्यम्, तत्तु बाधितमिति भावः। आदिशब्देन मननादिशब्दसंग्रहः। ननु ध्यानशब्देनैवानावृत्तत्वनिरासे 'ध्रुवा स्मृतिः' इति ध्रुवत्वकीर्तनं व्यर्थं स्यादित्यत्राह—ध्रुवानुस्मृतीति। आवृत्तिलाभेऽपि सान्तरत्वनिरासोनेति भावः। ननु ध्यान एव गुणविधिरिति किमर्थं वक्तव्यमित्यत्राह—ग्रन्थीति॥ मोक्षफलकश्रुत्यनुवादे सम्भवति विशिष्टविधिकल्पनस्य गौरवादिति भावः। केचित्तु—ननु 'भिद्यते हृदयग्रन्थिः' (मुं० उ० २-२९) इत्यादिवाक्ये फलप्रतिपादनमनुपपन्नं, गुणविधौ फलाभावादित्यत आह—ग्रन्थिमोक्षायेति॥ प्रधानफलस्यानुवाद इत्यर्थः।

ननु भिद्यते हृदयग्रन्थिरिति वाक्येन दर्शनस्य फलं प्रतीयते न स्मृतेः। एवं च स्मृतिफलतया ग्रन्थिविमोक्षणस्य फलैक्यव्यञ्जनमनुपपन्नमित्यत्राह—तत्फलार्थ इति॥ ननूभयमपि प्रत्येकमेव साधनमस्तु, किमर्थं दर्शनसमानाकारता विधीयत इति चेत्। विकल्पस्य निरस्तत्वात्। उभयोः स्मृतिदर्शनयोरैक्यस्यासंभवात् अन्यतरशब्दस्यान्यपरत्वे वक्तव्ये स्मृतित्वप्रतिपादकानां बाहुल्यात् स्मृतिशब्दानां दर्शनपरत्वेऽतिशयितलक्ष्याकाराभावेन प्रयोजनाभावाद्दर्शनशब्दे मुख्यार्थस्य बाधेन लक्षणाया आवश्यकत्वाच्च दर्शनसमानाकारत्वमिति भावः। ननु दर्शनसमानाकारायामपि ध्रुवानुस्मृतौ क्रियावाच्युपास्तिशब्दः कथमित्यत्राह—विशदेति॥ ज्ञानात्मकत्वादिति भावः। ननु वेदनोपासनयोः शब्दभेदात्स्वविषयभेदकत्वं स्यादित्यत्राह—यस्तद्वेदेत्यादि॥ 'यस्तद्वेद यत्स वेद' इति वेदशब्दार्थ एव 'यां देवतामुपास्से' इति जानश्रुतिरुपासिनाऽन्ववददिति व्यतिकरेण निर्देश इत्यर्थः। 'मनो ब्रह्मेत्युपासीत' इति विहितमेवोपासनं 'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद' इति फलविधानार्थं विदिनाऽनूदित इत्यादिरादिशब्दार्थः। एकत्वबोधकाभाव एव [2]शब्दभेदो भेदक इति भावः। ननु मोक्षोपायस्य भक्त्यात्मकत्वं कथमित्यत्राह—एतेष्वित्यादिना। निर्धारणे सप्तमी। 'यमेवैष वृणुते' इत्यत्र वरणीयताप्रयोजकस्य वरणीयगतस्नेहस्य भक्तित्वात्तस्यैवोपासनत्वात्पर-

---

१. इत्यादिन्या-ख।　　२. शब्दो भेदक इति-क, ख।

मात्मा वृणुते तेन पुरुषेण परमात्मा प्राप्यः। परमपुरुषः स्वविषयभक्तिमन्तमेव वृणुते। तथा च तादृशभक्त्या प्राप्य इति लभ्यते। 'नान्यः पन्थाः' इत्यादि शास्त्र-बलाद्वेदान्तविहितसाधनभूतज्ञानस्य भक्तित्वं सिध्यतीति भावः।

ननु वरणीयताप्रयोजकं भक्तिरूपं मा भूत्; उपासनात्मकमेवास्त्विति चेत् 'भक्त्या त्वनन्यया' 'नाहं वेदैः' 'भक्त्या लभ्यस्त्वनन्यया' इत्याद्युपबृंहणाच्च तद्रूपत्वं सिध्यतीति ध्येयम्। फलितमिति। ज्ञानमात्रस्यैव साधनत्वे भक्ति-ध्यानाद्युक्तिर्विफलेति भावः। विस्तरस्तु शतदूषणीवेदान्तविजयादिष्वाचार्यैः प्रपञ्चितः॥ ३०॥

अक्ष०—अत्र सामान्यस्य विशेषे पर्यवसानं किमर्थमित्यत्राह ध्यानेति। ओमित्येवात्मानं ध्यायथ निदिध्यासितव्यः इत्यादिश्रुत्या इह—मोक्षोपायप्रकरणे ध्रुवानुस्मृतिरेव मोक्षार्थं विहिता। आहारशुद्धौ सत्वशुद्धिः, सत्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष इति तस्या एव मोक्षफलकत्वश्रवणात् इति भावः। सैव ध्रुवानुस्मृतिरेव स्पष्टा विशदा दृष्टिः। ध्रुवानुस्मृतिरेव श्रुतफल-विषया—ध्रुवानुस्मृतौ श्रुतफलस्यैव—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥"

इति दृष्टेरपि श्रवणादिति भावः। सेवनत्वात्—परिचर्यात्मकत्वात् प्रीति-जनकव्यापारत्वात् उपास्तिः आत्मानमेव लोकमुपासीत इत्युच्यते। वेदनोपास-नयोः शब्दान्तरात् भेद एव स्यादित्यत्राह—क्वापीति। यस्तद्वेद-यत्सवेद इत्यादि-वाक्येषु एकस्मिन्नेव विषये उपक्रमोपसंहारयोर्व्यतिकरेण मिथस्स्थानाक्रान्त्या विद्युपास्योर्वचनेन ऐक्यमेवावगम्यते। "यमेवैष वृणुते तेन लभ्य" इति श्रुत्यभिप्रेतां प्रीतिरूपापन्नां ध्रुवानुस्मृतिमेव "भक्त्यात्वनन्यया शक्य" इति गीता आह—एवं मुक्तिसाधनवेदनस्य निरन्तरचिन्तनरूपत्वं दर्शनसमानाकारत्वं उपासनरूपत्वं प्रीतिरूपतया भक्तिरूपत्वं इत्याद्युक्तं सर्वमपि वेदनमात्रे मोक्षसाधने सति विफल-मेव स्यात्। लघूपायेन शब्दजन्यज्ञानमात्रेण मोक्षसंभवे गुरूपाये विशदध्रुवानु-स्मृत्यादौ कस्यापि प्रवृत्त्यसंभवादिति भावः। तेन-मोक्षसाधनवित्तिः एवं विशद-भक्तित्वादि विशिष्टैव पर्यवस्यतीति युक्तमुपेतुमिति भावः॥ ३०॥

विद्याः पञ्चाग्निवैश्वानरदहरमधुन्याससत्पूर्वसंज्ञाः
नाना शब्दादिभेदात्तुलितफलतया तद्विकल्पश्च शिष्टः।
कर्मज्ञानाख्ययोगौ त्विह परभजनाधिक्रियार्थौ स्वदृष्ट्या
धर्मैर्वर्णाश्रमाणां त्रयमिदमवदन् सेतिकर्तव्यताकम्॥ ३१॥

सर्वा०—यदि भक्तिरेका मुक्त्युपायः, कथं परविद्याभेदक्लृप्तिरित्यत्राह—**विद्या इति** ॥ नाना—मिथो भिन्ना इत्यर्थः। शब्दादिभेदात्—द्वैतीयाद्भेदकवर्गात्। किमेतासां ज्योतिष्टोमाग्निहोत्रादिवत्फलभूयस्त्वार्थमेकस्मिन्नधिकारिणि सम्भव इत्यत्राह—**तुलितेति**। परिच्छिन्नेषु स्वर्गादिफलेषु तारतम्यवत्सु तद्भूयस्त्वापेक्षयोपायसमुच्चयसम्भवः। इह तु न तथा, अविशिष्टफलत्वात्। स्वात्मप्राप्तौ सालोक्यादिमात्रे च मुक्तिशब्दो भाक्तः। मुक्तितारतम्यं वदद्भिस्तु मुक्तिरेव शिक्षणीया। सर्वकर्मनिवृत्तौ स्वतःप्राप्तब्रह्मानुभवतारतम्यायोगात्, कतिपयकर्मनिवृत्तेः स्वर्गादावपि समत्वात्। शिष्टः *विकल्पोऽविशिष्टफलत्वात् इति सूत्रे।

ननु कर्मज्ञानयोगयोरपि मुक्तिसाधनत्वं शिष्यते; गरिष्ठस्य च भक्तियोगस्य। अतो मुक्तितारतम्यं युज्यत इत्यत्राह—**कर्मेति**। स्वदृष्टया—स्वात्मावलोकनद्वारेणेत्यर्थः। तदुक्तमात्मसिद्धौ *उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्यः इति। कर्मयोगोऽधिकारार्थः, तर्हि लब्धाधिकारस्य कर्मनैरपेक्ष्यं स्यादित्यत्राह—**धर्मैरिति**। अयं भावः—कर्मयोगो नाम नियमयुक्तः कर्मविशेषः। तन्निवृत्तिदशायामपि न वर्णाश्रमधर्मनिवृत्तिः। कर्मनिषेधोऽप्यन्यविषयः। अतस्त्रयोऽपि योगा वर्णाश्रमधर्माङ्गका इति। तथा च संगृहीतम्—*त्रयाणामपि योगानां मात्रयाऽन्योन्यसङ्गमः। नित्यनैमित्तिकानां च पराराधनरूपिणाम् ॥ इति ॥ ३१ ॥

आनन्द०—प्रत्याक्षेपेण सङ्गतिरित्याह **यदीति**। परविद्याः—ब्रह्मविद्याः। **द्वैतीयादिति**। शब्दान्तराभ्यास सङ्ख्याप्रक्रिया-गुणनामधेयरूपभेदकवर्गादित्यर्थः। **किमेतासामिति**। ननु समुच्चयो ह्येकफलापेक्षया आग्नेयादीनां षण्णां युक्तः, न तथा ज्योतिष्टोमाग्निहोत्रयोरिति कथं समुच्चय इति चेदुच्यते—एकेन तेषां क्रियमाणत्वात् समुच्चयोक्तिरिति न दोषः। ननु विशिष्टफलत्वमसिद्धं, स्वात्मप्राप्त्यादेस्तारतम्यदर्शनादित्यत्राह—**स्वात्मप्राप्ताविति**।

नन्वानन्दवल्ल्यां मुक्तौ मनुष्यानन्दभेद उक्तस्तथा परमश्रुत्यादावपि साक्षादेव मुक्तौ तारतम्यमुक्तमिति कथं तारतम्याभावः? अत एव गुणोपसंहारपादे मनुष्याधिकारितारतम्यभेदेन तत्तदाविर्भविष्यद्ब्रह्मगुणानामुपसंहारश्च तथोपास्यानामेव तत्क्रतुन्यायादाविर्भाव इति माध्वा मन्यन्त इत्यत्राह **मुक्तितारतम्यमिति**। मुक्तौ न तारतम्यमानन्दवल्ल्यां प्रतिपाद्यते, किं तु ब्रह्मगुणस्येयत्ताविरहप्रतिपादनाय स्थालीपुलाकन्यायेनानन्दाख्यगुणस्यापरिच्छेद्यतां प्रतिपादयितुं बद्धानामेव मनुष्यादीनामानन्दतारतम्यं प्रतिपाद्यते, न च श्रोत्रियस्य चाकामहतस्येत्युक्तेर्मुक्तिविषयत्वमकामहतशब्दस्य काम्यालाभप्रयुक्तदुःखाभावपरत्वात्। परमश्रुत्यादि तु परमश्रुतित्वादिभिरेव निरस्तम्। गुणो-

पसंहारपादे च शब्दादिभेदात् नानात्वे सिद्धे श्रुतिलिङ्गादिप्रमाणैर्गुणानां व्यवस्थयोपसंहारः कृतः। पुरुषभेदेनोपसंहारे तु 'नानाशब्दादिभेदात्' इति विद्याभेदसाधनायोगात् तथा पुरुषभेदेनोपसंहारो महामीमांसकेन कथं कृत इति विस्मयः। कथं वा जीवास्स्वाविर्भविष्यद्गुणानुपसंहृत्य प्रवर्तेरन्? कथं वाऽऽचार्यस्तत्तदाविर्भविष्यद्गुणज्ञो भूत्वोपदिशेत्? इति भृशं विस्मयः। तत्क्रतुन्याये चोपासितगुणादेरबहिष्कारमात्रमिति।

ननु विरजास्नानामानवकरस्पर्शमात्रेण निश्शेषकर्मक्षये सत्यपि परं ज्योतिरूपसंपद्येति पर्यङ्कारोहणानन्तरं ज्ञानादिविकासं कथं ब्रूथ? निश्शेषकर्मक्षयानन्तरमेव ज्ञानविकासप्रसङ्गात्, तत्र चेत् भगवदिच्छा नियामिका, तर्हि तत एव तारतम्यमप्यस्त्विति चेत्—अत्रोक्तमाचार्यैः—पर्यङ्कारोहणमेव ज्ञानविकासे साक्षाद्धेतुः, तत्र च राजमार्गगमनं तत्र च तत्पूर्वदेशप्राप्तिस्तत्र च सोमसज्जनादिप्राप्तिरिति कर्मक्षयस्योत्तरोत्तरदेशविशेषप्राप्तिद्वारकभगवत्प्राप्तिद्वारा ज्ञानविकासहेतुत्वं, तया च निश्शेषकर्मक्षये भगवत्पर्यङ्कारोहणावश्यंभावात् कथं तारतम्यमिति हृदयम्।

केचित्तु अमानवप्राप्तावेव ज्ञानविकासमाहुः। वासनानुवृत्तिः पर्यङ्कारोहणान्निवर्तत इति परे।

ननु विकल्पः कथमङ्गीक्रियत इत्यत्राह—विकल्पोऽविशिष्टेति।

ननु कर्मादिसाधनतारतम्यात् फलतारतम्यं वाच्यमन्यथा तुल्यत्वाभावेन विकल्पायोगादिति शङ्कते नन्विति। तदुक्तमिति। उभाभ्यां—कर्मयोगज्ञानयोगाभ्यां परिकर्मितं—परिशुद्धं स्वान्तं यस्य, तस्य तादृशस्वान्तेन स्वात्मावलोकने सति भक्तियोगो लभ्यत इत्यर्थः। तन्निवृत्तीति विनियोगपृथक्त्वेन जीवनाधिकारकादिकर्मणो नियमविशेषरूपकर्मयोगाभावेऽपि न निवृत्तिरित्यर्थः। कर्मनिषेधोऽपीति।

> न तस्य विद्यते कर्म ब्रह्मनिष्ठस्य वै मुने।
> आरुरुक्षोर्मुनेर्योगः कर्मकारणमुच्यते॥
> योगारूढस्य तस्यैव शमः कारणमुच्यते।

इत्यादिरित्यर्थः।

ननु तत्सापेक्षत्वमेव न संभवतीत्युक्ते तत्कथमवदन्निति मात्रात् परिहार इत्यत्राह—अयं भाव इति। त्रयोऽपीति—कर्मयोगज्ञानयोगभक्तियोगा इत्यर्थः। त्रयाणां योगानां—कर्म-ज्ञान भक्तियोगानामप्यन्योन्यं मात्रया सङ्गमः परस्परजनकत्वमित्यर्थः पराराधनरूपाणां नित्यनैमित्तिकानामपि त्रिषु योगेषु सङ्गम उपकारकत्वमित्यर्थः। नित्यनैमित्तिकानामधिकारापादकत्वादिति भावः॥ ३१॥

अक्ष०—ज्ञानध्यानादिवाचां समफलविषय प्रीतिरूपापन्नदर्शनसमानाकारध्रुवानु स्मृतौ पर्यवसानमुक्तं प्राक्। तद्वत् पञ्चाग्निविद्यादिवाचामपि समफलविषयत्वात् कस्यांचिदेकस्यां विद्यायां पर्यवसानं कुतो न स्यात् किमर्थं विकल्पाश्रयणमित्यत्राह विद्याः इति। पञ्चाग्निविद्या, वैश्वानरविद्या, दहरविद्या, मधुविद्या, न्यासविद्या, सद्विद्यासंज्ञकाः विद्याः नाना-भिन्ना इत्यर्थः। अत्र कतिपयविद्याग्रहणं विद्यान्तराणामप्युपलक्षणम्।

यद्वा आदिशब्दपर्यायः पूर्वशब्दः, तेन शाण्डिल्यविद्यादिसर्वविद्यासंग्रहः। भिन्नानामासां सामान्यविशेषभावासंभवेन नैकत्र पर्यवसानं भवतीति भावः। धीरूपाणामासां कथं भेद इत्यत्राह—शब्दादि भेदादिति पूर्वकाण्डद्वितीयाध्यायोक्तात् शब्दान्तरादि कर्मभेदकप्रमाणादित्यर्थः। आदिशब्देन अभ्यास संख्यागुण—प्रक्रिया—नामधेयानि गृह्यन्ते। ब्रह्मवेद ब्रह्मोपासीत इत्यादिशब्दानां ब्रह्मप्रत्ययावृत्त्यभिधायिनामपि प्रकरणभेदेन तत्तत्प्रकरणोदितगुणविशेषविशिष्टब्रह्मप्रत्ययावृत्तिप्रभेदाभिधानेन शब्दान्तरत्वमिति भावः। तर्हि अग्निहोत्राग्निष्टोमादिवत् समुच्चयस्स्यादित्यत्राह तुलितेति। अग्निहोत्रादेः स्वर्गादिफलवैषम्यात् समुच्चयेऽपि सर्वासामपि विद्यानां मोक्षफलस्य तुल्यत्वात् न समुच्चय इति "विकल्पोऽविशिष्टफलत्वा"दित्युक्तमित्यर्थः। कर्मज्ञानयोगयोः भक्त्यपेक्षया लघुभूतयोरपि मोक्षसाधनत्वाभिधानात् मोक्षेऽपि वैषम्यं स्यादित्यत्राह—कर्मेति। कर्मज्ञानयोगौ आत्मावलोकनात्मकस्वदृष्टिद्वारा मोक्षसाधनपरभक्त्यधिकारसंपादकौ। तावता मोक्षसाधनत्वं, न तु साक्षात् अतो न मोक्षे वैषम्यप्रसक्तिरिति भावः। कर्मयोगादेरधिकारसंपादकत्वे सिद्धाधिकारस्य भक्तियोगमनुतिष्ठतः यज्ञादिकर्मापेक्षा कथमुच्यत इत्यत्राह—धर्मैरिति। कर्मयोगो नाम नियमयुक्तः कर्मविशेषः। तन्निवृत्तिदशायामपि न वर्णाश्रमधर्मनिवृत्तिः, अतो योगत्रयमपीदं वर्णाश्रम धर्माङ्गक मित्यवदन्नाचार्या इत्यर्थः॥ ३१॥ इति विद्याभेदतद्विकल्पादिः।

विश्वान्तर्यामि तत्त्वं स्वयमिह चिदचिद्विग्रहैर्वा विशिष्टं
यस्यामालम्बनं सा भवभयशमनी वीतरागस्य विद्या।
यस्तूपास्ते यथोक्तं तदितरदखिलं ब्रह्मदृष्ट्या स्वतो वा
नैतस्य ब्रह्मनाड्योद्गतिरपि न पदव्यर्चिरादिर्न मोक्षः॥ ३२॥

सर्वा०—ननु मुमुक्षुमधिकृत्योपनिषदामुत्थानम्; अतस्तत्रत्यानां सर्वासां विद्यानां विकल्पः स्यादित्यत्र मुक्तिसाधिकास्तदन्याश्च विषयतोऽधिकारतश्च विभजते—विश्वेति॥ स्वयं—स्वरूपनिरूपकैर्निरूपतस्वरूपविशेषकैश्च धर्मैर्विशिष्टम्; स्वासाधारणदिव्यविग्रहैर्वा, चिदचिद्विग्रहैः इन्द्रप्राणचिदचिद्रूपैः शरीरैः। वीतरागस्येति विशेषणात् परभजनमपि रागिणः परिमितिफलसाधन-

मिति सूच्यते। संजगृहे च *भक्तियोगस्तदर्थी चेत्समग्रैश्वर्यसाधनम् इति। तथोक्तं—चिदचिद्रूपेण विभक्तम्; यद्वा तत्तद्विद्याविहितप्रकारेणेत्यर्थः। स्वतः—ब्रह्मपर्यन्ततां ब्रह्मदृष्टिं च विहाय। नंतस्येत्यादि। नाडीभेदो हि *तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति विभज्यते। स्मर्यते च *ऊर्ध्वमेकः स्थितस्तेषाम् इत्यादिना। अर्चिरादिगतिश्च ब्रह्मविद एवाधिकृत्य तत्रतत्र श्रूयते। तथा च सूत्रम् *अप्रतीकालम्बनान्नयति इत्यादि। मोक्षश्च *तमेव विदित्वाऽतिमृत्युमेति इत्यवधारितः॥ ३२॥

आनन्द०—ननु वेदान्तविद्यानामेवाधिकारकत्वे गुरुनि लघुविकल्पो नोपपद्यत इत्याक्षेपसङ्गतिमाह—नन्विति। तदन्या इति—ऐश्वर्यादिसाधका इत्यर्थः। स्वरूपनिरूपकाः ब्रह्मस्वरूपप्रतिपत्त्युपयुक्ततया वेदान्तप्रतिपाद्या इत्यर्थः। निरूपितस्वरूपविशेषकाः—स्वरूपे प्रतिपन्नेऽनन्तरं विशिष्टप्रमितिमात्रोपयुक्ता गुणा इत्यर्थः। स्वासाधारणेति। अप्राकृतदिव्यविग्रहैरित्यर्थः। इन्द्रादीनि चिद्रूपाणि प्राणादीन्यचिद्रूपाणि। वीतरागपदप्रयोजनमाह—वीतरागस्येति। तदर्थिचेत्—ऐश्वर्यार्थिचेत् तदितरदित्यनेनैव चिदचिद्रूपस्य ग्रहणात् यथोक्तमित्यस्यार्थान्तरमाह—यद्वेति। ज्यैष्ठ्यं च श्रैष्ठ्यं चेत्यादिनेति शेषः। ब्रह्मपर्यन्ततां ब्रह्मदृष्टिपर्यन्तया नाड्या तेषां नाडिमार्गाणां अर्चिरादीति। 'ये चेमेऽरण्येश्रद्धातप इत्युपासत' इत्यादिनेत्यर्थः। तथा चेति—अब्रह्मोपासकानां नार्चिरादिगतिरित्यर्थः।

ननु मुमुक्षूणां सर्वेषामर्चिरादिमार्ग इत्यंगीकारेऽपि अन्येषामपि मुक्तिरस्त्वित्यत्राह—तमेवेति। ब्रह्मज्ञानवतामेव मोक्ष इति नियमात् अब्रह्मोपासकानां तदभावात् नार्चिरादिरिति भावः॥ ३२॥

अक्ष०—मुक्तिसाधिकास्तदन्याश्च विद्या अधिकारतो विषयतश्च विभजते—विश्वेति। सर्वान्तर्यामिपरमात्मस्वरूपं स्वयं—स्वरूपनिरूपक, निरूपितस्वरूपगुणविशिष्टं स्वासाधारणविग्रहविशिष्टं चिदचिद्विग्रहैर्विशिष्टं इन्द्रप्राणादिशरीरकं यस्यां विद्यायां विषयः सा विद्या वीतरागस्य—ऐहिकामुष्मिकफलभोगविरक्तस्य भवभयशमनी—मोक्षहेतुरित्यर्थः। इहामुत्रफलभोगविरागे सत्यधिकारे ब्रह्मप्रधानमुपासनं मोक्षसाधनमिति भावः।

अथान्यादृशीर्विद्या निर्वक्ति—यस्त्विति। ऐहिकामुष्मिकफलकामनया तदितरत्—ब्रह्मेतरत् अखिलं—चिदचिद्वस्तुजातं, ब्रह्मदृष्ट्या—ब्रह्मतादात्म्येन स्वतो वा—केवलचिदचिद्रूपेण वा यथोक्तं 'नाम ब्रह्मेत्युपासीत' इत्याद्युक्तप्रकारेण यस्तूपास्ते तस्य ब्रह्मनाड्या उत्क्रमणमर्चिरादिगतिः मोक्षश्च नास्तीत्यर्थः। अपरमैकान्तिकतया च अब्रह्मप्रधानोपासनया मोक्षप्रसक्तिरेव नास्तीति भावः॥ ३२॥ इति मोक्षतदितरार्थविद्याविभागः।

स्वान्तध्वान्तप्रसूतं दुरितमपनुदन् योगिनस्सत्त्वशुद्ध्यै
सर्वो वर्णादिधर्मश्शमदममुखवत्सन्निपत्योपकारी ।
विद्यां चेत्यादिवाक्येऽप्यनुकथितमिदं नैकवाक्यानुरोधात्
कर्मापेक्षाभिसन्धिं ववचन विवृणुते तत्समुच्चित्यवादः ॥ ३३ ॥

सर्वा०—अथ कर्मणां *सर्वापेक्षा च यज्ञादिश्रुतेश्ववत् इति सूत्रसिद्धं त्रिद्यार्थत्वं द्वारप्रदर्शनेन प्रापयन् समुच्चयवादं च निरस्यति—स्वान्तेति ॥ ध्वान्तशब्द इह तमोगुणे भाक्तः। सत्त्वस्य शुद्धिः गुणान्तरसंभेदाभावः, शमदमादीनां चित्तैकाग्र्यहेतुत्वस्य दुरपह्नवत्वात्तन्निदर्शनम् । सन्निपत्योपकारी—करणशरीरनिष्पादक इत्यर्थः। वाद्यन्तरयोजनाव्यावृत्त्यै श्रुत्यन्तरस्याप्युक्तार्थपरत्वमाह—विद्यां चेति । *अविद्यया मृत्युं तीर्त्वा इति सत्कर्मणा विद्योत्पत्तिविरोधिकर्मतरणं विवक्षितम्;, *धर्मेण पापमपनुदति, *कषायपक्तिः कर्माणि इत्याद्यनेकवाक्यानुरोधात् । मृत्युं प्राप्य स्थित इति तु क्लिष्टगतिः, मृत्युतरणममृतप्राप्तिरिति साध्यद्वित्वाभावात् । अत्र साधनद्वित्वादिश्चायुक्तः । *ब्रह्मविद्यामधिष्ठाय ततुं मृत्युमविद्यया इत्युपबृंहणेन चैतत्सर्वं व्यक्तम् । *हतं ज्ञानं क्रियाहीनं हता चाज्ञानिनां क्रिया इत्यादिषु द्वयोस्समुच्चितवद्वादः कुदृष्टिमतनिवृत्त्यै कर्मसापेक्षत्वाभिसन्धि व्यनक्ति । निषिद्धकाम्यत्यागेन नित्यनैमित्तिकग्रहः । अधिकाराङ्गताज्ञासुयथार्हमवतिष्ठते ॥ ३३ ॥

आनन्द०—कर्मयोगाद्यङ्गकत्वप्रसङ्गादाह—अथेति । ध्वान्तशब्द इति तमश्शब्दस्य नानार्थत्वेऽपि ध्वान्तशब्दस्य न तथात्वमिति भावः। गुणान्तरस्य संभेदाभाव इति यज्ञेन विविदिषन्तीति कर्मणां दृष्टद्वारसंभवेऽदृष्टद्वारकल्पनायोगात् । 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तत' इत्यादिवचनैश्च सत्त्वशुद्धिद्वारमिति भावः। लोकदृष्टसजातीयतया दृष्टत्वं प्रतिबन्धकाभावस्य लोकसिद्धकारणत्वात् अत एव कारणशरीरनिर्वर्तकं चेत्याहुः। ननु विद्यां चेत्यादिवाक्यस्याप्युक्तन्यायेनार्थावगतिसंभवात् विशिष्याभिधानं किमर्थमित्यत्राह—वाद्यन्तरेति। नन्वस्मिन् वाक्ये मृत्युतरणं संसार तरणमेव न तु विद्योत्पत्तिप्रतिबन्धकनिवृत्तिरित्यत्राह—अत्र हीति । आदिशब्देन कषाये कर्मभिः पक्व इत्यादिग्रहणम् । मृत्युशब्दस्य लक्षणा किमर्थेत्यत्राह—मृत्युं प्राप्येति संसारपरत्वेऽपि देवतावाचिशब्दस्य लक्षणायास्तुल्यत्वादध्याहारे दोषस्याधिकत्वात् तरणार्थस्य प्राप्तिपरत्वेऽप्यस्वारस्यात् प्राप्येत्यन्वये च मृत्युशब्दस्य मृत्युतरणामृतशब्दयोरन्यतरवैयर्थ्याच्चाध्याहारपक्षो न युक्त इति भावः। उपब्रह्मणानुरोधा देवमेवार्थं इत्याह—ब्रह्मविद्येति। न केवलं क्रियायाः, केवलं ज्ञानस्य च निन्दितत्वात् समुच्चित्य साधनत्वसिद्धिरित्यत्राह—हतं ज्ञानमिति। ननु भवन्मतेऽपि ज्ञानसाधनत्वेनैव

कर्मणां मोक्षसाधनत्वं वाच्यं तथा च कुदृष्टिपक्षेऽपि विविदिषाद्वारा ज्ञानहेतुत्वात् साहित्यमस्त्येवेति कथं तन्निरास इति चेन्न, ज्ञानस्य चोपचयसिद्धयेऽहरहर्ज्ञानकालेप्यनुष्ठानं, तन्मते तु न विविदिषोत्पत्त्यनन्तरमिति समानकालीनत्वरूपं साहित्यं हीनशब्देन सूचितं परतमे न संभवतीति भावः।

ननु हतं ज्ञानं क्रियाहीनमित्यादिना काम्यादीनामपि साहित्यं स्यात्, किं च सन्ध्यादीनां न ज्ञानाद्यङ्गत्वं, स्वरूपोपचयहेतुत्वाभावादित्यत्राह—निषिद्धेति। ग्रहो ग्रहणं सन्ध्याहीन इत्यादिनाऽधिकारे, यज्ञेन दानेनेति अङ्गत्वे, हतमित्यादिनाऽऽज्ञायाम् ॥ ३३ ॥

अक्ष०—अत्र वर्णाश्रमधर्माणां विद्याङ्गत्वमुपपादयन् समसमुच्चयं निरस्यति—स्वान्तेति। स्वान्ते—मनसि ध्वान्तं वर्धमानं तमः, तेन जनितं दुरितं—पापं अपनुदन् निवर्तयन् योगिनः सत्त्वशुद्ध्यै सत्त्वविवृद्ध्यै। सत्त्वविवृद्ध्यापादकस्सन्नित्याशयः। सर्वः—वर्णाश्रमधर्मः। शमदमादिवत् सन्निपत्त्योपकारी विद्याशरीरनिष्पादक इत्यर्थः। वर्णाश्रमधर्माणां 'धर्मेणपापमपनुदति' इत्युक्तपापापनोदनस्य पापकारणतमोगुणनिबर्हणाधीनतया तमोगुणनिबर्हणे सत्त्वगुणविवृद्ध्या शमदमादिभिरैकाग्र्य संपत्त्यैव सुखेन विद्या निष्पद्यत इति विद्यारूपकरणशरीरनिष्पादकतया विद्यां प्रति सन्निपत्योपकारकाङ्गत्वमिति भावः।

"विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्यया ऽमृतमश्नुते ॥"

इति श्रुत्याप्ययमेवार्थः ख्याप्यत इत्याह—विद्यां चेति। अविद्यया—सत्कर्मणा विद्याविरोधिपापं तीर्त्वा अपनुद्य कारणतमोविघटनेन प्रतिरुद्ध्य सत्त्ववृद्ध्युदितया विद्यया अमृतं-मोक्षं अश्नुते इति हि तदर्थः स्वरसतः प्रतीयत इति भावः। एवं सत्येवानेकवाक्यसंवादो भवतीत्याह—नंकेति। 'धर्मेण पापमपनुदति', कषायपक्तिः कर्माणि' 'कषाये कर्मभिः पक्वे ततो ज्ञानं' 'ब्रह्मविद्यामधिष्ठाय ततुं मृत्युमविद्यया' इत्याद्यनेकवाक्यानुसारादित्यर्थः।

'हतं ज्ञानं क्रिया हीनं हता चाज्ञानिनां क्रिया' इत्यादौ क्वचित्समुच्चयोऽपि प्रतीयत इत्यत्राह कर्मेति। अङ्गतया कर्मापेक्षाभिप्रायेणैव तत्र समुच्चित्य वाद इत्यर्थः। तत्रानेनैकवाक्यानुरोधादितिहेतुर्भवितुमर्हति ॥ ३३ ॥

इति कर्मणां विद्योपकारकत्वप्रकारः

संस्कारः कर्मकर्तुर्न भवति विहितं मुक्तये ज्ञानमन्य-
न्नाप्येतत्कर्मणोऽङ्गं न च सकृदसकृत्त्वाप्रयाणानुवृत्तम्।
अङ्गं तस्यासनाद्यं प्रणिधिसमुचितौ देशकालप्रभेदा-
वित्याद्यं साङ्ख्ययोगप्रकरणविततं सूत्रभाष्यादिषूक्तम् ॥ ३४ ॥

सर्वा०—एवं केचिदूचुः—कर्मानुष्ठाता जीवः स्वाध्यायसाध्येन स्वविषयज्ञानेन संस्क्रियते; त एव ज्ञानज्ञेयेवेदान्तेषु प्रशस्येते इति; तन्निरस्यति—संस्कार इति। विहितं मुक्तयेऽन्यदिति हेतुत्रयपरम्; नहि वाक्यजन्यं ज्ञानं विधीयते; तस्य विधानमन्तरेण रागप्राप्तविचारसिद्धत्वात्। न च वाक्यजन्यज्ञानान्मोक्षः, निरसिष्यमाणत्वात्। अन्यदेव हि वाक्यार्थज्ञानाद्विहितमुपासनाद्यात्मकं ज्ञानम्; जीवातिरिक्तविषयतया चान्यत्वं भाव्यमिति। तथाऽपि *तत्प्राप्तिहेतुर्ज्ञानं च कर्म च इति सहपाठाविशेषे कर्म चेत् ज्ञानाङ्गं विपरीतं किं न स्यादित्यत्राह—नापीति। न हि सहोक्तिमात्रात्तादर्थ्यं शिष्मः; किं तु अन्यथासिद्धैर्विनियोजकैरिति भावः। कर्तृसंस्कारत्वविरोधव्यक्त्यर्थमन्यविध्यर्थं च पूर्वोक्तमेवाह - न च सकृदिति। असकृदावृत्तमपि ज्ञानमेकदिनेऽशक्यमित्यत्राह —असकृदिति। *प्रायणान्तमोङ्कारमभिध्यायीत, *सखल्वेवं वर्तयन् यावदायुषम् इत्यादिश्रुतिसिद्धमाप्रयाणत्वम्। सदा चिन्तनविधानाद्गमनादावपि स्यादित्यत्राह—अङ्गमिति। निरन्तरस्मृतिरासीनस्यैव स्यात्, गमनादौ तु तद्विधिस्सान्तरविषयः। आदिशब्देन समकायशिरोग्रीवत्वादिसंग्रहः। प्रणिधिः—चित्तैकाग्रचम्। आद्यशब्देन प्रशान्तात्मकत्वविगतभीतित्वादि गृह्यते। सूत्राण्यत्र *आवृत्तिरसकृदुपदेशादित्यादीनि। ३४।

आनन्द०—ननु ज्ञानस्य कर्माङ्गत्वमित्ययुक्तं वेदान्ते प्रशस्यमानं ज्ञानं वाक्यजन्यज्ञानं तदपि कर्माङ्गभूतकर्तृसंस्कारार्थमेवेत्याक्षेपसङ्गत्याऽऽह—एवं केचिदिति। कर्मानुष्ठातेति। कर्मशेषभूतकर्तृसंस्कार[ज्ञानेने] ज्ञानमित्यर्थः।

ननु कर्तृसंस्कार[परा]त्मकात् वाक्यात् तद्ज्ञानस्याभावे विधिः कथमित्यत्राह —अत एवेति। वेदान्तेषु न ज्ञानविधिर्नाप्यतिरिक्तविषयप्रतिपादानमर्थवादमात्रत्वादिति भावः। ननु विहितत्वमात्रस्यैव साधकत्वेन विशिष्टहेतूपादानं व्यर्थमित्यत्राह हेतुत्रयपरमिति। नन्वर्थवादमात्रपरमिति चेन्न ध्यायीतेत्यादीनां श्रवणेनार्थवादत्वायोगात् अन्यथा कर्मविधावपि का प्रत्याशा विधिलिङ्गानां तुल्यत्वात्। नन्वन्यत्वेऽपि वाक्यार्थज्ञानात् संस्कारत्वमस्त्विति चेत् अन्यत्वं हि स्वरूपेण विषयतश्च। ततश्च कर्तुरन्यस्यैव वेद्यत्वे उपयुक्तोपयोक्ष्यमाणसंस्कारत्वायोगात् न संस्कारत्वमिति। तदाह—जीवातिरिक्तेति। ननु ज्ञानं प्रति कर्मणोऽङ्गत्वस्य वक्तुमशक्यतया ज्ञानस्य कर्तृसंस्कारत्वमेव वक्तव्यमन्यत्सर्वं यथाकथञ्चित् नेयमित्यत्राह—तथापीति। किं त्विति यज्ञेन दानेनेत्यादिश्रुत्यादिविनियोजकैरिति भावः। आप्रयाणादनुवर्तनीयत्वे कर्तृसंस्कारपूर्वककर्मानुष्ठानमशक्यमिति विरोध इत्यत्राह - कर्तृसंस्कार इति। विरोधपरिहारमाशङ्कते न चेति। प्रयाणं - मरणम्। ननु प्रायणान्तमोङ्कारमभिध्यायीतेनि न विधिरशक्यत्वात् तस्मादर्थवादमात्रत्वमित्यत्राह—सदा चिन्तनेति। यावज्जीवमग्निहोत्रं जुहोतीत्यग्निहोत्रविधौ सायं जुहोति प्रातर्जुहोतीति कालविध्यनुरोधेन न सदा होमस्तथाऽत्राप्यासनाद्यङ्गविध्यनुरोधेन न गमनादावपि विधिप्रसङ्ग

इति नाशक्यविधानं दोष इति भावः। ननु गमनादावपि गच्छन् भुञ्जन् इत्यादिना तद्विधिरस्तीति चेत् तत्राह—गमनादौ त्विति। आदिशब्देननासाग्र न्यस्तलोचनइत्यादि गृह्यते। द्वितीयादिशब्देन मैत्र्यादिग्रहः—'आप्रयाणात् तत्रापि हि दृष्टमित्यर्थः॥ ३४॥

अक्ष०—इह वेदान्तजन्यमात्मज्ञानं यागादिकर्मानुष्ठातृविषयकतया कर्तृ-संस्कारकं सत् यागादिकर्माङ्गमित्याक्षेपं प्रतिक्षिपति। संस्कार इति। वेदान्तेषु मुक्तये विहितं विहितत्वादेव वाक्यजन्यज्ञानादन्यत् ज्ञानं जीवातिरिक्तपरमात्मो-पासनात्मकं कर्मकर्तुस्संस्कारो न भवतीत्यर्थः। मोक्षार्थं विहितत्वादेव जीवाधिक-विषयत्वादेव कर्माङ्गमपि न भवतीत्याह—नापीति। एतत्—परोपासनमित्यर्थः। तदाह—'पुरुषार्थोऽतश्शब्दात्' इति बादरायणः। न च सकृदिति—सकृत्कृतश्शा-स्त्रार्थं इति न्यायो नात्र प्रवर्तते ध्यानरूपत्वोक्तेरिति भावः। तदुक्तं 'आवृत्तिरस-कृदुपदेशात्' इति आवृत्तिरूपमसकृत्त्वमपि न पक्षमासादिमात्रेणेत्याह—असकृ-त्त्विति। आप्रयाणेति। अन्तिमशरीरवियोगपर्यन्तमावर्तनीयमित्यर्थः। "आप्रया-णात्तत्रापि हि दृष्टमिति" ह्युक्तमिति भावः। अस्याङ्गमाह—अङ्गमिति। तस्य—मोक्षसाधनस्य उपासनात्मकज्ञानस्य। आसनादीति। आसीन (उपविष्ट) स्यैव निरन्तर ध्यानसंभवादिति भावः। आदिना समकायशिरोग्रीवादिसंग्रहः। प्रणिधिसमुचितौ चित्तैकाग्र्यसमुचितौ। देहकालविशेषौ तदुक्तं—यत्रैकाग्रता तत्रा विशेषा"दिति। आदिशब्देन शमदमादिकं गृह्यते। साङ्ग्योगप्रकरणे विततं विस्तृतं, सूत्रभाष्यादिषु 'आसीनस्संभवात्—

"शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरं॥
तत्रैकाग्रं मनःकृत्वा यत चित्तेन्द्रियक्रियः।
उपविश्यासने युंज्यात् योगमात्मविशुद्धये॥

इत्यादिषूक्तमिति भावः। वर्णाश्रमधर्माणां विद्याङ्गतायाः पूर्वमुक्तत्वान्न पुनरिहोक्तिः॥ ३४॥ इति विद्यायाः कर्मकर्तृसंस्कारत्वभङ्गः

ब्रह्मण्यैकान्त्यभाजां मुहुरनुकथितो मोक्षधर्मेऽपवर्ग-
स्तस्मान्नानाऽमरेज्या न भवति परभक्त्यङ्गमित्यप्ययुक्तम्।
ऐन्द्रीप्रातर्दनादिप्रथितनयविदामन्तरात्मैकलक्ष्ये-
ष्वग्नीन्द्रादिप्रयोगेष्वखिलमपि विभुः कर्म भुङ्क्ते स एकः॥३५॥

सर्वा०—वर्णाश्रमधर्माणामङ्गित्वाभिमतविद्याविरुद्धत्वमाशङ्क्य परिहरति—ब्रह्मणीति॥ ऐकान्त्यभाजाम्—अनन्यदेवताकानामित्यर्थः। *तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदेवता। इति स्थापनात्। तत्रैव च *प्रतिबुद्धस्तु मोक्षभाक्

इति नियम्यते । *ब्रह्माणम् इत्यारभ्य, *प्रतिबुद्धा न सेवन्ते इत्यन्तेन चैतत्सिद्धम् । यागादयस्त्वग्नीन्द्रादिनानादेवताकाः । अङ्गाङ्गिविरोधे च न्याय्योऽङ्गत्याग इति, एतदपि न युक्तम्, कुत इत्यत्राग्न्यादिशब्दानां ब्रह्मणि वृत्तिद्वयेन विरोधं परिहरति—ऐन्द्रीति । यथा *ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति विनियोगादिन्द्रशब्दः कयाचिद्वृत्त्या गार्हपत्यार्थः । एवं *स्वकर्मणा तमभ्यर्च्य इत्यादिभिस्तत्तद्देवताशब्दानां क्वचिदवयवशक्त्या ब्रह्मणि वृत्तिः, क्वचित्तु प्रतर्दनविद्योक्तन्यायेन प्रसिद्धचिदचिल्लिङ्गानन्यथासिद्धौ तत्तद्विशिष्टविश्रान्तिरिति अग्न्यादिशब्दानामन्तरात्मविषयतया प्रतिबुद्धैः प्रयोगादेक एव सर्वकर्मसमाराध्यः । ऐकान्त्यं च तेषामक्षतम् । अव्यवहितार्चने लभ्ये किं व्यवहितेनेति चेन्न—अधिकारव्यवस्थितेरक्षोभ्यत्वादिति ॥ ३५ ॥

आनन्द० प्रधानविरोधादङ्गत्वं नोपपद्यत इत्याक्षेपसङ्गतिं दर्शयति—वस्त्रादिधर्माणामिति । एकान्तिकशब्दस्यैकस्मिन् परिसमाप्तिः निश्चयो वा स्यात् कथं देवतान्तरभजनविरोध इत्यत्राह—अनन्यदेवताकानामिति । तस्मिन्नर्थे प्रमाणं दर्शयति । तेषामिति । यागादयस्त्विति । कर्मनिष्ठानां नैकान्त्यमिति भावः । क्वचिदवयवशक्त्येति । साक्षादप्यविरोधं जैमिनिरित्युक्तरीत्येत्यर्थः । क्वचिदिति अवस्थितेरिति काशकृत्स्न इत्युक्तरीत्येत्यर्थः । उभयोरव्यवस्थां परिहरति—प्रसिद्धेति । नन्वव्यवधानेनैव भगवदर्चनलाभे किं क्लिष्टगत्येत्याह—अव्यवहितेत्यादिना । अधिकारीति । उभयथा विधानादिति भावः । मूलस्यायमर्थः मोक्षधर्माख्यभारतभागे एकान्तिनस्सदा ब्रह्मध्यायिन इत्यादिना कथित इत्यर्थः । नानामरेज्या—नानादेवतायजनकर्माणीत्यर्थः । परभक्तिः— मोक्षसाधनभक्तिः । ऐन्द्री प्रतर्दनादीति—प्रतर्दनो हवै दैवोदासिरिन्द्रस्य प्रियं धामोपजगामेत्युक्तविद्यायां परमात्मपर्यन्तोक्तन्यायं जानतामनुष्ठातॄणां प्रयोगेषु—अनुष्ठानेषु नारायणादन्यो नेज्यो भवतीति नैकान्त्यविरोध इत्यर्थः ॥ ३५ ॥

अक्ष०—अत्र वर्णाश्रमधर्माणामग्नीन्द्रादिदेवतान्तरोद्देश्यकत्वात् मोक्षसाधनब्रह्मविद्याङ्गत्वमयुक्तमित्याक्षेपं प्रतिक्षिपति ब्रह्मणीति । ऐकान्त्यभाजां एकस्मिन् ब्रह्मण्येव अन्तः उपास्यत्वनिश्चयः यस्यास्ति स एकान्ती तस्य भाव ऐकान्त्यं तद्भजन्तीति तेषामैकान्त्यभाजां अनन्यदेवताकानामित्यर्थः । मोक्षधर्मे—

"तेषामेकान्तिनः श्रेष्ठाः ते चैवानन्यदेवताः" इत्यारभ्य प्रतिबुद्धस्तु मोक्षभाक् ।

ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः ।
प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् ॥

इत्यादिना देवतान्तरत्यागिनामेव असकृत् मोक्ष उक्त इत्यर्थः । अतोऽग्नीन्द्रादिनानादेवताकयागादिवर्णाश्रमधर्मः न मोक्षसाधनपरभक्त्यङ्गं परभक्ते

रैकान्त्यमावश्यकं धर्माणांचानैकान्त्यमवर्जनीयं अङ्गाङ्गिविरोधे च न्याय्योऽङ्गत्याग इत्याक्षिपति तस्मादिति। विरोधं परिहरति ऐन्द्रीति। ऐन्द्रीन्यायः पूर्वतन्त्रोक्तः। ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति गार्हपत्योपस्थाने ऐन्द्र्या ऋचो वाचनिके विनियोगे तत्र इन्द्रशब्दस्य वृत्यन्तरेण गार्हपत्यपरत्व मुक्तं, तन्न्यायविदां—स्वकर्मणा तमभ्यर्च्य' 'वर्णाश्रमाचारवता पुरुषेण परः पुमान् विष्णुराराध्यते' इत्यादिना विष्णोराराधने वर्णाश्रमधर्माणां विनियोगात् तत्तद्देवतावाचिशब्दानां वृत्यन्तरेण भगवत्परत्वं सुगमम्। प्रतर्दनो न्यायः शारीरकस्थः हिततमार्थिने प्रतर्दनाय 'मामुपास्व' इति इन्द्रेणोक्ते इन्द्रबोधकशब्दस्य तदन्तरात्मपरत्वं मोक्षसाधनोपासनविषयपरत्वेनोक्तं तद्वदिह मोक्षसाधनपरभक्त्यङ्गत्ववचनानुरोधेन देवतान्तरशब्दानां तदन्तरात्मपरत्वावगमेनापि सर्वकर्मसमाराध्यो विष्णुर्भगवानेक एवेति ऐकान्त्यस्य भङ्गाभावात् न विरोधगन्ध इति भावः॥ ३५॥

इति वर्णाश्रमधर्माणामैकान्त्यविरोधपरिहारः

त्यागत्रैविध्यमुक्त्वा स्वमतमिह जगौ सात्त्विकं त्यागमीश-
स्तस्माद्वर्णाश्रमादित्यजनमपदृशां तामसं मोहमूलम्।
योगारूढस्य कर्मच्यवनमपि तदा सह्यमङ्गयर्थवाक्यै-
र्योगं त्वत्याश्रमिभ्यः परममिति वचो वक्ति मोक्षाश्रमेण॥३६॥

सर्वा०—परेष्टभङ्गाय त्यागविशेषं निष्कर्षति—त्यागत्रैविध्यमिति॥ स्वमतम्—*एतान्यपि च कर्माणि इति श्लोकोक्तम्। *कार्यमेव इति श्लोकोऽपि तदर्थः। तत्फलितमाह—तस्मादिति। *मोहात्तस्य परित्यागस्तामस इत्यस्यार्थोऽपदृशामित्यादिना दर्शितः। ननु योगदशायां कालादिकमजानतः कर्तव्यलोप स्यादेव, अतः कर्मत्यागोऽत्र न तामस इति; तत्राह—योगारूढस्येति। योगदशायां वहिरप्रवृत्तमनसो न धीपूर्वकर्मत्यागः। अबुद्धिपूर्वकं तूत्थानकालेऽपि न लिम्पतीति नियमितम्, किमुत समाधौ। अङ्गयर्थवाक्यैः--कर्मणां समाधिरूपाङ्गिशेषत्ववाक्यैरित्यर्थः। ततश्चाङ्गप्रधानविरोधेऽङ्गिनाऽङ्गोपमर्दो न दोषाय। ❀अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच इत्यत्रातिशयिताश्रमियोगो विवक्षित इत्याह—योगं त्विति। अन्यथा मत्वर्थीयवैयर्थ्यादिति भावः॥ ३६॥

आनन्द०—ननु ब्रह्मनिष्ठस्य कर्मत्यागोक्तेः कथमङ्गत्वमिति शंकासङ्गत्या त्यागशब्दार्थं निरूपयतीत्याह—परेति। त्यागस्यापि स्वसम्मतत्वात् परेष्टभङ्गये-त्यक्तिः, परेष्टत्यागशब्दार्थभङ्गायेत्यर्थः। तदर्थं इति - स्वमत प्रतिपादनार्थं इत्यर्थः उत्थानकाले—योगप्रारम्भदशायामित्यर्थः। अन्यथेति अतिशयित आश्रमी अत्यश्रमी नत्वाश्रममतिक्रान्त इति तदा मत्वर्थीयस्य व्यर्थत्वमिति भावः। मोक्षाश्रमेणेति मूलस्य मोक्षार्थत्वेन य आश्रमस्तेनातिशयितेनेत्यर्थः॥३६॥

अक्ष०—त्यागेनैके अमृतत्वमानशुरिति कर्मत्यागस्यैव मोक्षसाधनत्वोक्त्या कथं कर्मणां मोक्षसाधनविद्याङ्गत्वमित्यत्राह—त्यागेति ।

"त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः"

इति त्यागत्रैविध्यमुक्त्वेत्यर्थः । स्वमतमिह जगौ ।

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥
एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥

इत्यादिना सात्त्विकमेव त्यागमीश्वरोऽगायदित्यर्थः । अतो वर्णाश्रमधर्मं स्वरूपत्यागस्तामस इत्याह—तस्मादिति । आश्रमेति—आश्रमधर्मादित्यर्थः । अपदृशामिति विवेकरहितानामित्यर्थः तथा च गीतं—

"मोहात्तस्य परित्यागः तामसः परिकीर्तितः ।" इति ।

तर्हि योगानुष्ठानदशायां मनसो बहिरप्रवृत्त्या कालापरिज्ञानेन कर्मत्यागस्यापि संभवात् तामसत्यागो योगिनामपि स्यादित्यत्राह—योगेति । तदा सह्यमिति । योगकाले अबुद्धिपूर्वकः कर्मत्यागो न दोषायेत्यर्थः । उत्थितानामपि योगिनामबुद्धिपूर्वकपापानामश्लेषे सति योगानुष्ठानकाले किमुतेति भावः । अङ्ग्यर्थवाक्यैरिति—अङ्गिशेषत्वबोधक वाक्यैः अङ्गाङ्गि भावबोधकवाक्यैरित्यर्थः । कर्मणां योगार्थत्वेन 'अङ्गगुणविरोधे च तादर्थ्यात्' इति न्यायेन अङ्गिना योगेन अङ्गानां—कर्मणां विरोधे अङ्गानां कर्मणामुपमर्दो न दोषायेति भावः ।

ननु "अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच" इत्यादौ आश्रमधर्मातिलङ्घिनामपि परमपवित्रोपदेशः कथमुपपद्यत इत्यत्राह—योगमिति । अत्याश्रमिभ्य इति अतिशयिताश्रमवत्त्वेन मोक्षाश्रमिणः संन्यासिनः उच्यन्ते नत्वाश्रमत्यागिनः । तेषा मुक्तौ मत्वर्थीयवैयर्थ्यादिति भावः ॥ ३६ ॥ इति वर्णाश्रमादिधर्मस्वरूपत्यागभङ्गः

तुर्यो निष्कृष्य मोक्षाश्रम इति कथितस्तेन नान्येषु विद्या
शान्त्यादिव्याहतेश्चेत्यसदिह गुणिनां सर्वतो मुक्त्यधीतेः ।
यावज्जीवं द्वितीयाश्रमवति पुनरावृत्त्यभावोऽप्यधीतः
स्मृत्याद्यैश्चैवमुक्तं भवति तु चरमे योग्यताधिक्यमात्रम् ॥ ३७ ॥

सर्वा०—प्रव्राजिनामेव मुक्तिस्तत्साधनी विद्या चेति पक्षमनूद्य प्रतिक्षिपति—तुर्य इति ॥ विशेषविधौ परिसङ्ख्यया शेषनिषेधः सिध्येदिति भावः । अतस्तदन्येषु त्रिषु तत्साधनी विद्या नेत्याह—तेनेति । अधिकारिविरोधादप्याह—शान्त्यादीति । प्रवृत्तिरूपा वेदानुवचनयज्ञादयः, शमादयस्तु निवृत्तिरूपाः, ते

कथमेकत्र स्युरिति भावः। अत्र बाधकमाह—गुणिनामिति *दया सर्वभूतेषु क्षान्तिरित्याद्युक्तगुणवतामित्यर्थः।

*त्रयो धर्मस्कन्धाः इत्यत्र बह्वाश्रमप्रस्तावे *ब्रह्मसंस्थोऽमृतत्वमेति इत्युच्यते। संभवति चाधीतवेदेषु सर्वेषु ब्रह्मनिष्ठा; सा च गृहस्थानामेवोषस्तियाज्ञवल्क्यप्रमृतीनामुपनिषत्सु प्राचुर्येण दृश्यते। न च प्रवृत्तिनिवृत्त्योर्विरोधः, भिन्नविषयत्वात्, नित्यनैमित्तिकेषु प्रवृत्तिः निषिद्धकाम्यनिरर्थकेषु निवृत्तिरिति। अन्यथा प्रव्राजिनां स्वाश्रमधर्मेणापि विरोधः स्यात्। अपि च छान्दोग्यान्ते *कुटुम्बे शुचौ देशे इत्यादिना गृहस्थं प्रक्रम्य, *स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यत इत्युक्त्वा *नच पुनरावर्तते इति चोक्तम्। तदाह—याज्जीवमिति। अत्रोपबृंहणभूयस्त्वमाह—स्मृत्याद्यैरिति। *गृहस्थोऽपि हि मुच्यते इति स्मर्यते। जनकदिलीपादयश्च गृहस्था एव मुक्ता इतीतीहासादिषूक्ताः। अत एव न सोपानवत्क्रमनिर्बन्धः। कस्यचिन्मोक्षाश्रमत्वोक्तिः किंनिमित्तेत्यत्राह—भवतीति॥ ३७॥

आनन्द०—ननु तुर्याश्रमे यज्ञादीनामभावात् कथं कर्मणां विद्याङ्गत्वमित्याक्षेपसङ्गतिमभिप्रेत्याह—प्रव्राजिनामिति। प्रसङ्गसङ्गतिरित्यन्ये। अत्याश्रमिभ्य इत्यत्रातिशयित आश्रमोऽत्याश्रम इति संन्यासाश्रम एव विवक्षित इति भावः। तत्र हेतुमाह—तत्साधनेति। साधनाभावे साध्याभावादिति भावः। ननु तुरीयाश्रमस्य मोक्षाश्रमत्वव्यपदेशमात्रेण कथमाश्रमान्तरे मोक्षाभाव इत्यत्राह—विशेषविधाविति 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यत्र मन्त्रस्य गर्दभरशनातोव्यावृत्तिवत् आश्रमान्तरान्मोक्षतदुपायव्यावृत्तेरिति भावः। अधिकारीति शान्त्यादेर्यद्यप्यङ्गत्वं नाधिकारिविशेषणत्वं, तथापि शान्तो दान्त इतिवचनात् शान्त्यादिमतो विद्यासाध्येति भावः। ननु शान्त्यादीनामङ्गत्वे कथं कर्मानुष्ठानविरोध इत्यत्राह—प्रवृत्तिरूपस्येति। त्रयो धर्मस्कन्धा इत्यादिनेति। तथा च तेष्वेव ब्रह्मसंस्थात्वोक्तेरित्यर्थः। ननु ब्रह्मसंस्थोऽमृतत्वमेतीत्यत्र ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाच्चेति वचनानुसारेण त्रयोधर्मस्कन्धा इति प्रकान्ताश्रमेषु यः प्रव्रज्यां प्राप्तस्सोऽमृतत्वमेतीत्यर्थः कुतो न स्यादिति चेन्न, ब्रह्मसंस्थशब्दस्य प्रव्राजके रूढ्यभावात् ब्रह्मणिसंस्थामात्रं तु सर्वसाधारणं न च सामान्यस्य विशेषपरत्वं लिङ्गदर्शनविरोधादिति भावः। लिङ्गदर्शनमेव दर्शयति गृहस्थानामेवेति। अधिकारविरोधं परिहरति—न चेति। नन्वेवं व्यवस्थायां किं नियामकमित्यत्राह—अन्यथेति भिक्षाचर्यादीनां व्यापाररूपत्वादिति भावः। ननु उषस्तिप्रभृतयोऽपि पश्चात् प्रव्राजिता भवन्ति तथा च नायं लिङ्गदर्शनइत्यत्राह—अपि चेति। वाक्यत एवेति। गार्हस्थ्यप्रतीतेरिति भावः। मध्ये आश्रमान्तरस्य प्रसक्तिशंका परिहरति 'स खल्वेवमित्यादिना। ननु गृहस्थोऽपीत्यनेन प्राशस्त्यमात्रं प्रतिपाद्यते न तु तत्र तात्पर्यमित्यत्राह—जनक-

विलोपादयश्चेति ततश्च नार्थवादमात्रत्वमिति भावः। गृहस्थानां मुक्तिवचनं उत्तरोत्तराश्रमद्वारेणास्तु यथा कर्मणां ज्ञानद्वारा इत्यत्राह—अत एवेति। नान्यः पन्था इति ज्ञानातिरिक्तस्य मोक्षसाधनत्वनिषेधात् कर्मादौ सद्वारकत्वं युक्तं नात्र तथा निषेध इति भावः। नन्वत्रापि परिसंख्यारूपनिषेधोऽस्तीत्यत्राह—कस्यचिदिति। मोक्षाश्रमत्वव्यपदेशबलात् न परिसंख्या परिकल्पना युक्ता 'य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते' इत्यादि पौर्णमास्यमावास्यादिव्यपदेशवत् प्राप्तानुवादत्वेन निषेधविधिकल्पनानुपपत्तेः। इमामगृभ्णन्नित्यादौ तु श्रूयमाण विधिप्रत्ययानुरोधात् त्रिदोषदुष्टाऽपि परिसंख्या युक्तेनि भावः।

किञ्च यज्ञेनेत्यादिवाक्ये विद्याङ्गतया यज्ञादिविधानानुरोधादाश्रमान्तरे विद्यायोगोऽस्त्येव। न च यज्ञाद्यनुष्ठानमाश्रमान्तरेणेति युक्तमङ्गाङ्गिनोरेकाधिकारकत्वेन विद्यायामनधिकृतस्य तदङ्गेऽप्यनधिकारात्। एतेन संन्यस्य श्रवणं कुर्यादित्यादिना संन्यासस्य श्रवणाङ्गत्वविधानात् शान्तो दान्त उपरतिस्तितिक्षुरिति साधनचतुष्टयान्तर्गतत्वेन श्रवणात् पूर्वाभावात् तस्माद् ब्राह्मणं पाण्डित्यं निर्विद्येत्यादिश्रुत्या प्रागथ भिक्षाचर्यं चरन्तीति वाक्यानुरोधेन च संन्यासाधिकारित्वप्रतीतेः 'सहकार्यन्तरविधिरिति सूत्रोक्तेश्चेति निरस्तं, अङ्गत्वे प्रमाणा भावात् संन्यस्येत्यादेरश्रुतित्वात् शान्तो दान्त इति वाक्ये संन्यासस्यानुक्तेः, भिक्षाचर्यं चरन्तीत्येतावन्मात्रस्य पक्षप्राप्तानूक्तिमात्रेणाप्युपपत्तेः तस्मादित्यनेन संन्यासाधिकारप्रतीत्यसिद्धेः, सूत्रस्यापि त्वदुक्तार्थपरत्वाभावस्य भाष्योक्तेश्चेति।

किं च संन्यासस्य किमङ्गत्वमभिप्रेत मुतनियोज्यविशेषणत्वं नाद्यः। यज्ञादीनामेव; विनियोजकाभावात्। न च शान्तो दान्त इत्यादे विनियोजकत्वं, तद्विरुद्धव्यापारोपरतिमात्रपरत्वात्। न च उपरतेश्चतुर्थाश्रम एव सम्भवात् तदाक्षेपः, आश्रमान्तरेऽपिसम्भवात्।

वस्तुतस्तु श्रवणं प्रति न कस्याप्यङ्गत्वेन विधिः तस्याविहितत्वेन तदङ्गविध्ययोगात्। न च जबानबन्ध नवदविहितं प्रत्यङ्गविधानं युक्तं, अक्षामवदित्यादिवत् नैमित्तिकत्वेन तस्याङ्गत्वासिद्धेः। न द्वितीयः—मुमुक्षाया विशेषणत्वेन जातेष्टिवत् संवलन मन्यथासिद्धवचनेन तत्कल्पनायोगादिति ॥ ३७ ॥

इति सर्वाश्रमिणां ब्रह्मविद्याधिकारः

अक्ष०—मोक्षाश्रम इति चतुर्थाश्रमस्यैव प्रसिद्धया तत्रैव विद्या—तत्फले स्यातामित्यत्राह—तुर्य इति। चतुर्थाश्रम इत्यर्थः। निष्कृष्य—आश्रमेषु पृथक्कृत्य तुरीयाश्रमः मोक्षाश्रम इति स्मृतः। तदाह—दत्तात्रेयः—

मोक्षाश्रमे स्मृतं वस्त्रं रक्तं यद्धातुरञ्जितम्।
कार्यं यज्ञोपवीतं तु सितं नवगुणान्वितम् ॥ इति।

तेन सन्यासाश्रमस्यैव मोक्षाश्रमत्वस्मरणेन अन्येषु—आश्रमान्तरेषु मोक्षाभावात् तत्साधनभूता विद्याऽपि नास्तीत्यर्थः। शान्त्यादीति विद्यायाः शमदमाद्यङ्गकत्वेन शमादीनां सर्वकर्मनिवृत्तिरूपत्वेनाश्रमान्तरेषु कर्मवत्सु शमाद्यङ्गासंभवाच्च न विद्यातत्फलमोक्षयोः सम्भव इति भावः। निरस्यति—इत्यसदिति। गुणिनां ज्ञानवैराग्याद्यात्मगुणपूर्णानां इत्यर्थः। सर्वतः—सर्वाश्रमेषु अपि मुक्तेः श्रवणादित्यर्थः। त्रयो धर्मस्कन्धा इति प्रस्तुत्य ब्रह्मसंस्थोऽमृतत्वमेतीति श्रूयते। तथा गृहस्थेष्वेव रैक्वादिषु मोक्षसाधनविद्या श्रूयते। एवं कुटुम्बिनः गृहस्थाश्रमधर्मानुष्ठानसहकृतविद्याभ्यासेनैव यावदायुषं वर्तमानस्य ब्रह्मलोकप्राप्त्यपुनरावृत्ती छन्दोगास्समामनन्ति। यावज्जीवमिति। अधीत इति—स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यत इति वाक्येनेत्यर्थः। नित्यनैमित्तिकेषु प्रवृत्तेः, निषिद्धकाम्यादिषु निवृत्तेश्च न मिथो विरोध इति भावः। अत्रोपबृंहणानि सन्ति भूयांसीत्याह स्मृत्याद्यैश्चेति। गृहस्थोऽपि हि मुच्यते' इत्यादिकमिह भाव्यम्। तर्हिमोक्षाश्रम इति विशेषाभिधानस्य क आशय इत्यत्राह चरम इति। आन्यपर्याभावेन मोक्षोपाय (यत्न) योग्यताधिक्येन मोक्षाश्रम इति व्यपदेश इति भावः॥ ३७॥

यन्नित्यं तन्न काम्यं तदपि न तदिति स्थापिते कर्मभेदे-
ऽप्येकं विद्याश्रमाङ्गं भवति हि विनियुक्त्यन्तरेणोपपत्तेः।
तत्रानुष्ठानतन्त्रं विदुषि तु घटते कर्तृकालाद्यभेदात्
प्राजापत्यादिलोकार्थिनि च तदितरोऽनर्थरोधाय तद्वान्॥ ३८॥

सर्वा०——कथं नित्यकर्मणां विद्याङ्गत्वम्? नित्यत्वे ह्यकरणे दोषः, काम्याङ्गत्वेऽसौ न स्यात्। अतो नित्यकाम्ययोरभेदायोगात्प्रकृतं विरुद्धमित्येतदनूद्य परिहरति—यन्नित्यमिति॥ हिशब्दः संभवप्रसिद्धिपरः—

ज्जोतिष्टोमाग्निहोत्रादौ विनियोगपृथक्त्वतः।
नित्यकाम्यस्वरूपत्वं दृष्टं तद्वदिहास्तु नः॥
विध्यैक्येऽपि क्वचिदृष्टा काम्यनैमित्तिकात्मता।
विधिभेदे तु किं न स्यादत्र कैमुतिकी गतिः॥

एवं त्रिरूपत्वमपि क्वचित् ग्राह्यम्। तर्हि विद्यार्थमाश्रमार्थं च द्विरनुष्ठानं प्रसज्यत इत्यत्राह—तत्रेति। तन्त्रम्—उभयार्थं सकृत्करणम्, तच्चैकादशे स्थापितम्। नित्यस्य विद्यानङ्गतयाऽपि काम्यत्वे तन्त्रमुदाहरति—प्राजापत्यादीति। उक्तव्यतिरिक्तेषु निष्फलतया नित्यकर्मनिवृत्तिप्रसङ्ग इत्यत्राह—तदितर इति॥ ३८॥

आनन्द०—प्रसङ्गसंगत्या निरूपयतीत्याह—कथमिति। काम्याङ्गस्व इति। विद्याया मोक्षार्थतया काम्यत्वात् तदङ्गस्यापि काम्यतया तदकरणस्य प्रत्यवायपरत्वं न स्यादित्यर्थः। विनियोग पृथक्त्वत इति। यावज्जीवमग्निहोत्रं जुहोति, अग्निहोत्रं जुहुयात् स्वर्गकामः, यावज्जीवं दर्शपूर्णमासाभ्यां यजेत दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'यादि विनियोजकवाक्यभेदादित्यर्थः। इहास्तीति एकस्यैव नित्यत्वं विद्यार्थत्वं चेत्यर्थः। विनियोजकवाक्यभेदाभावेऽपि वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रेजाते पूत एव तेजस्वी अन्नाद इन्द्रियावी पशुमान् इति वाक्यविहितजातेष्टेः काम्यनैमित्तिकत्वदर्शनाद् वाक्यभेदे सुतरां विरोधो नास्तीत्याह—विध्यैक्येत्यादिना। एवं त्रिरूपत्वमिति। ग्रहणस्नान-दान-श्राद्धादावित्यर्थः। एकादशे जैमिनीये तन्त्राध्याये इत्यर्थः।

ननु प्राजापत्यादिलोकार्थिन्यपि कर्तृकालाद्यैक्येनाश्रमकर्मणां तन्त्रत्वेन सिद्धत्वात् तस्य पृथगुदाहरणं व्यर्थमिति तत्राह—नित्यस्येति। विद्यार्थत्वानभ्युपगमेऽपि नित्यस्योभयार्थत्वदर्शनात् विद्यार्थत्वे विरोधदूषणं नोद्भाव्यमित्यर्थः। उक्तेति यत्र विनियोजकाभावस्तत्र केवलं नित्यत्वमेवेत्यर्थः। नित्यं यत् काम्यं न भवतीति तदपि तच्चोद्यमपि न सम्यक्। कर्मभेदे-नित्यनैमित्तिककाम्यभेदे-स्थापितेऽपि तदेकं कर्म विद्याङ्गमाश्रमाङ्गं च भवति विनियोजकभेदात्। तत्रोभयात्मकत्वे सत्यपि विद्यानिष्ठस्य सकृदेवानुष्ठानं एवमन्यत्रापि तदितरः—उभयार्थकर्मननुष्ठाता। तद्वान्—केवलनित्यमात्रानुष्ठाता प्रत्यवायपरिहारायानुतिष्ठतीति मूलार्थः॥ ३८॥

अक्ष०—आश्रमधर्माणां नित्यकर्मतया मोक्षफलकविद्याङ्गत्वं न संभवतीत्याशङ्क्य परिहरति—यन्नित्यमिति। अकरणे प्रत्यवायावहंनित्यमित्युच्यते। तन्न काम्यं। न फलजनकं यत् काम्यं तन्न नित्यं अकरणे प्रत्यवायावहं न भवति इति नित्यकाम्यकर्मणोः मिथो वैधर्म्येण भेदे स्थापिते कथमेकस्यैव कर्मण आश्रमधर्मत्वेन नित्यत्वं विद्याङ्गत्वेन काम्यत्वं चेत्याशङ्कां अपिना व्यञ्जयन् परिहारमाह—एकमिति। विनियोजकशास्त्रभेदेन एकस्यैव नित्यकाम्यात्मकत्वं अग्निहोत्रज्योतिष्टोमादाविव उपपन्नमेवेत्यर्थः।

तर्हि आश्रमाङ्गतया विद्याङ्गतया च द्विरनुष्ठानं स्यादित्यत्राह—तत्रेति। उभयाङ्गभूते कर्मणि। अनुष्ठानतन्त्रं अनेकार्थं सकृदनुष्ठानमेव विदुषि—विद्यावति घटते—प्राप्नोति कर्तृकालाद्यभेदात् कर्तृकालाद्यभेदे दर्शपूर्णमासयोरनेकप्रधानाङ्गानां प्रयाजादीनां सकृदनुष्ठानस्य पूर्वतन्त्रे स्थापितत्वादिति भावः। नित्यस्य विद्यानङ्गतयाऽपि फलान्तरार्थतया काम्यत्वे तन्त्रमुदाहरति प्राजापत्येति। सन्ध्यावन्दनादिनित्यकर्मणां प्राजापत्यादिफलप्राप्तावपि विनियोगात् तत्रापि सकृदनुष्ठानमेवेति भावः। उक्तफलेच्छारहितोऽपि प्रत्यवायपरिहाराय वर्णाश्रमधर्मवानेव स्यादित्याह—तदितर इति॥ ३८॥

इति नित्यकर्मणां विद्याङ्गत्वाश्रमाङ्गत्वादि।

मन्दस्यापि प्रवृत्तिः किमपि फलमनुद्दिश्य कस्यापि न स्यात्
नित्येऽनर्थोपरोधप्रभृति फलमतः काम्यतैवेति चेन्न ।
नित्येष्टोऽनर्थरोधस्तदितरदतथा किंच शिष्टो विधीना-
माज्ञानुज्ञाविभागस्सुगम इह निरुक्त्यैव नैमित्तिकांशः ॥ ३९ ॥

सर्वा०—सर्वचेतनप्रवृत्तीनां यत्किंचित्प्रयोजनान्वयान्नित्यादिविभागो न स्यादित्याशङ्क्य परिहरति—मन्दस्येति ॥ प्रभृतिशब्देन "पापेभ्यो रक्षन्ताम् इत्यादिप्राप्तदुरितक्षयसंग्रहः । अतः—कर्त्रभीष्टफलवत्त्वादित्यर्थः । काम्यतैव, नित्यनैमित्तिकयोरिति शेषः । सफलत्वाविशेषेऽपि नित्ये तावत्फलविशेषापेक्षया विभागाभिप्रायमाह—नित्येष्ट इति । अनर्थपरिहारस्य सर्वेषां सर्वदाऽभीष्टत्वात्तदर्थे कर्मणि अकरणानर्हतया नित्यत्वेन विभागः । तदितरत्—सुखम् । अतथा—सर्वदाऽभीष्टं न भवति; सुखरहितायास्सुषुप्तेराकाङ्क्षणात् । अतस्सुखार्थे काम्यतोक्तिः । उक्तमेव विभागं मुखभेदेन द्रढयति—किं चेति । राजादिनयादीश्वराज्ञानुज्ञारूपविधिभेदाद्विधेयविभागस्सिद्ध इत्यर्थः । ननु द्विविधं नैमित्तिकम्; तत्र प्रायश्चित्तमुपात्तानर्थहेतुनिरासार्थम्; अन्यदप्यकरणनिमित्तानर्थपरिहाराय; अतस्तयोरपि नित्यराशिप्रवेशप्रसङ्ग इत्यत्राह—सुगम इति ॥ ३९ ॥

आनन्द०—आक्षेपसंगतिमाह— सर्वेति । प्रसङ्गसङ्गतिरित्यन्ये । विभागो न स्यादिति प्रयोजनसाधनत्वादिति भावः । आदिशब्देन 'आपः पुनन्त्वि'त्यादिसंग्रहः । ननु फलवत्त्वमस्तु, तस्य विपरीतत्वे तस्य काम्यत्वाभावात् काम्यसाधनत्वरूपकाम्यत्वं न स्यादित्यत आह—कर्त्रभीष्टेति । नित्यमात्रस्य प्रकृततया नित्यस्येति लाभेऽपि नैमित्तिकग्रहणं न स्यादित्यत्राह—नित्यनैमित्तिकयोरिति । सफलत्वेति—नित्यापेक्ष्यफलसाधनेऽपि नित्ये कर्मणीत्यर्थः ।

ननु 'स स्वर्गः' इति स्वर्गादीनामपि नित्यापेक्षितत्वात् स्वर्गार्थकर्मणोऽपि नित्यताप्रसङ्ग इत्यत आह—सर्वदाऽभीष्टो भवतीति तत्रयुक्तिमाह सुखरहिताया इति । दुःखमिश्रं सुखं परित्यज्य सुखाभावकालीन दुःखाभावस्य सुषुप्तिकालीनस्यापेक्षणात् सर्वदा न काम्यमित्यर्थः ।

ननु भाविदुःखमपि तिरस्कृत्यागम्यागमनादिप्रसक्तेः बह्वायाससाध्येसुखेऽपि प्रवृत्तेश्च दुःखाभावोऽपि न सर्वदाऽपेक्ष्य इति वैपरीत्यमपि भवतीति चेन्न—यत्र सुखदुःखयोर्वर्तमानता तत्र दुःखाभावस्यैवापेक्षितत्वात् न तुल्यमिति भावः । राजादीति । आज्ञारूपं कर्म नित्यनैमित्तिकात्मकमनुज्ञारूपं कर्म काम्यमिति—विभाग इत्यर्थः । नित्यराशिप्रवेशप्रसङ्ग इति दुरितपरिहारताविशेषादिति भावः । सुगम इति । उत्तरश्लोक इति भावः ॥ ३९ ॥

अक्ष०—प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इति प्रसिद्धमतो नित्यकर्मणां निष्प्रयोजनत्वे तत्र न कश्चिदपिप्रवर्तेत—प्रत्यवायपरिहारादिफलकत्वोपगमे च काम्यतैव स्यादित्याशङ्कते—मन्दस्येति। नित्यकाम्यविभागोऽनुपपन्न इति भावः। परिहरति—नित्येष्ट इति। सर्वदा सर्वेषामिच्छाविषयः अनर्थरोधः—प्रत्यवायपरिहारः तदिच्छायास्सार्वदिकत्वेन तत्साधनकर्मणामकरणानर्हत्वेन नित्यं करणीयतया नित्यत्वव्यपदेशः, न तु निष्फलत्वेनेति भावः। तदितरत्—सुखादिकं। अतथा—न नित्येष्टं स्वापे प्रवर्तमानस्य सुखादावनिच्छादर्शनात्। तदिच्छाभावे तत्साधनकर्मणामकरणात् कामनान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकशालित्वेन काम्यत्वव्यपदेश इति भावः।

अनयोर्मुखभेदेन विभागमाह—किंचेति। राजनीत्या भगवतः आज्ञानुज्ञारूपेण नित्यकाम्ययोरेव विभागः तदुक्तं–'आज्ञानुज्ञाविभागेन द्विधा शास्त्रीयपद्धतिः' इति। अकरणेऽनर्थावहतया आज्ञारूपं नित्यकर्म,। अकरणे फलाभावेऽपि अनर्थानावहत्वात् अनुज्ञारूपं काम्यकर्म। नित्यकर्मवत् नैमित्तिकस्यापि ग्रहणस्नानादेरकरणेऽनर्थावहत्वात् नित्य एवान्तर्भाविन कथं नित्यनैमित्तिकविभाग इत्यत्राह—सुगम इति। निरुक्त्येति। निमित्तेभवमिति नैमित्तिकपदनिर्वचनेनेत्यर्थः। ग्रहणादिनिमित्ते सत्येव करणीयत्वात् नित्यात् भेदव्यपदेश इति सुग्रहमिति भावः। नैमित्तिकांश इत्यनेन अकरणे प्रत्यवायानावहमपि पापक्षयफलकं प्रायश्चित्तरूपं नैमित्तिकमस्तीति सूचितम्॥ ३९॥

इति नित्यकाम्यादिविभागः

कर्तव्यं यन्निमित्ते सति तदुभयथा पापशान्त्यर्थमेकं
तत्स्यात्काम्येन तुल्यं परमकरणतो दोषकृन्नित्यतुल्यम्।
सत्यां कामश्रुतौ संवलितमपि भवेत्तद्वलादेतदेव
त्यागे च प्रत्यवायस्त्वनधिकृतिमुखस्तत्रतत्रावसेयः॥ ४०॥

सर्वा०—काऽत्र निरुक्तिः कीदृशश्च नैमित्तकांश इत्यत्राह—कर्तव्यमिति॥ एकं—प्रायश्चित्तरूपम्, तस्याकरणनिमित्तप्रत्यवायाभावात्काम्यतुल्यत्वं। परं—केवलनैमित्तिकम्, तस्याकरणे दोषान्नित्यतुल्यत्वम्। जातेष्टेर्नैमित्तिकत्वेऽपि पुत्रगतपूतत्वादिसाधनतया संवलिताधिकारत्वमुक्तम्। तदाह—सत्यामिति। नित्ये केवलनैमित्तिके चाकरणे दोषोऽधिकारभ्रंशादिरूपस्तत्तत्प्रकरणेषु ग्राह्य इत्याह—त्यागे चेति॥ ४०॥

आनन्द०—प्रसङ्गसङ्गतिरित्याह—काऽत्रेति। अधिकारभ्रंशादिरूप इति। 'सन्ध्याहीनोह्यशुचिर्नित्यमनर्हस्सर्वकर्मस्वित्यादि श्रवणादिति भावः। "नित्यं नैमित्तिकं त्यक्त्वा नरकं प्रतिपद्यत" इत्यादिः[प्रसङ्गसङ्गतिरित्यारभ्य]ग्राह्यः।४०।

अक्ष०—पूर्वश्लोके सूचितं नैमित्तिकद्वैविध्यं तन्निरुक्तिं च दर्शयति—कर्तव्यमिति। निमित्ते सति कर्तव्यमिति नैमित्तिकनिरुक्तिः, तत् द्विविधं तत्र पूर्वसिद्धानां पापानां नाशकृदेकं प्रायश्चित्तरूपं पापे निमित्ते कर्तव्यत्वात् तत् काम्यतुल्यं अकरणात् न प्रत्यवायः। अपरंतु सङ्क्रमणस्नानादि अकरणे प्रत्यवायकृत् नित्यतुल्यं सङ्क्रमणादिनिमित्ते सति कर्तव्यत्वात् नैमित्तिकमेव। अत्रैव विशेषमाह सत्यामिति। एतदेव—नित्यतुल्यं नैमित्तिकमेव कामश्रुतौ सत्यां काम्यफलश्रवणे सति तद्बलात् संवलिताधिकारमपि भवेदित्यर्थः। पुत्रजननादिनिमित्तकजातेष्टयादिकमकरणे प्रत्यवायावहमपि करणात् पूतत्वादिफल जनकमपीति भावः। अकरणे प्रत्यवायः किं रूप इत्यत्राह त्याग इति। वैदिककर्मानधिकार, पापान्तरारम्भादिकमेव तत्र तत्रावधेयमित्यर्थः॥ ४०॥

निष्कामं चेन्निवृत्तं तदिह न घटते मुक्तिकामाधिकारात्
स्वप्रीतिस्पर्शहीना न च भवति परप्रीतिरिष्टेति चेन्न।
युक्ता यस्मान्निवृत्तिर्बहुभयशबलात्तन्निवृत्तं निवृत्तं
सूते यत्र प्रवृत्तिस्त्वभिमतमहितं तत्प्रवृत्तं प्रवृत्तम्॥ ४१॥

सर्वा०—यस्तु मन्वादिभिरुक्तो विभागः—इह वाऽमुत्र वा काम्यं प्रवृत्तम्, निष्कामस्य ज्ञानपूर्वं तु निवृत्तमिति, स कथं घटते? सर्वेषामपि धर्माणां यत्किंचित्फलकाममधिकृत्यैव विधेः। यद्यपि निराशीःकर्मकारिणां परमात्मप्रीतिरेवोद्देश्या, तथाऽपि तत्कामत्वं सिद्धम्। परप्रीतेरुद्देश्यत्वं च तस्याः स्वप्रीतिपर्यन्तत्वमभिसन्धातॄणामेव। अतस्तेषामपि स्वप्रीतिकामत्वं दुस्त्यजमित्याक्षेपमनूद्य प्रत्याचष्टे—निष्काममिति॥ नात्र निष्कामशब्दः इच्छामात्रनिवृत्त्यर्थं इति निषेधाभिप्रायः। कुतस्तर्हि विभाग इत्यत्राह—युक्तेति। अनर्थाविनाभूतसुखकामनातो निवृत्तं कर्म निष्कामं निवृत्तमिति चाहुः, अनेवंविधं तु काम्यं प्रवृत्तमिति च इति भावः॥ ४१॥

आनन्द०—प्रसङ्गसङ्गतिरित्यभिप्रेत्याह—यस्त्विति। प्रवृत्तिधर्मो निवृत्तिधर्मश्चेति विभाग इति भावः। ननु 'निराशी'रिति गीतादिषूक्तेः कामनारहितमप्यस्तीत्यत्राह—यद्यपीति। सर्वत्र स्वगतप्रीतिरुद्देश्येति कथं परप्रीतिरुद्देश्येत्यत्राह—परप्रीतेरिति। पश्वादिवत् स्वप्रीतिसाधनत्वादिति भावः। [प्रत्याक्षेपः परिहारः] अनर्थाविनाभूतेति।

"आब्रह्मभवनाल्लोकाः पुनरावृत्तिनोऽर्जुन।"
"स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः"

इत्यादिभिस्स्वर्गादेस्स्वसमानाधिकरणभाविदुःखादिव्याप्तत्वादित्यर्थः। आहुरिति मन्वादय इति शेषः।

मूलस्य निवृत्तं निवृत्तिधर्मं, निष्कामं-कामनाविरहेण कृतमिति लक्षणं चेन्न घटते, असंभवात्, निवृत्तिधर्माणां मुमुक्षुकर्तव्यत्वात् ।

न च स्वप्रीतिस्वर्गहीनतया फलकामनारहितत्वात् युज्यत इति वाच्यं, स्वप्रीतिसाधनत्वाभावे परप्रीतेरिष्टत्वायोगादिति पूर्वः पक्षः, सिद्धान्तस्तु बहुभय-शबलादधिकदुःखकरंबितात् यस्मान्निवृत्तिर्यस्य कर्मणस्तन्निवृत्तं कर्म, निवृत्तिधर्मः । यत्र फले प्रवृत्तिरभिमतफलं अभिमतसुखाद्युदर्ककं जनयति तत्र फले—प्रवृत्तं कर्म प्रवृत्तिधर्मं इत्युच्यते ।। ४१ ।।

अक्ष०—प्रवृत्तिनिवृत्तिभेदेन कर्मद्वैविध्यमाक्षिपति—निष्कामं चेदिति । कस्यापि कर्मणः स्वतो निवृत्तिरूपत्वं न संभवति, फलकामनानिवृत्त्या निवृत्ति-रूपत्वमपि दुर्घटं, मुक्तिकामानामेव तत्राधिकारात् भगवत्प्रीत्यर्थमेव तदनुष्ठानं न तु मुक्त्यर्थमिति चेत् तर्हि भगवत्प्रीतेरेव काम्यत्वेन निष्कामत्वं न स्यात्, परप्रीतिसत्वेऽपि स्वप्रीतिनिवृत्त्या निवृत्तिरूपत्वमित्यपि दुर्वचं, स्वप्रीति सम्बन्धाभावे परप्रीतेरिष्टत्वा (रुदया) योगादिति अर्थः ।

अनर्थमिश्रफलकामनानिवृत्त्या निवृत्तिरूपत्वमिति समाधत्ते—नेति । यस्मात्—स्वर्गादिफलात् बहु भयशबलात्—'स्वर्गेऽपि पातभीतस्य' इत्याद्युक्तभय-बहुलात् निवृत्तिः युक्ता उचिता तन्निवृत्त तादृशफलनिवृत्तिमत् तत्कामनारहित-मिति यावत् निवृत्तं—निवृत्तिकर्म इत्यर्थः । प्रवृत्तिकर्म निर्वक्ति सूत इति । यत्र फले प्रवृत्तिस्तु अहितमनर्थाविनाभूतमेव अभिमतं प्रियं सूते जनयति तत्प्रवृत्तं तत्फलेच्छाकृतं प्रवृत्तं प्रवृत्तिकर्मेत्यर्थः ।। ४१ ।। इति प्रवृत्ति निवृत्ति विभागः ।

पुंभिः सिद्धाधिकारैः क्रतव इव निराकाङ्क्षभावं भजन्त्यः

प्रोक्तास्त्रैवर्णिकार्हाश्श्रुतिनयवशतो यद्यपि ब्रह्मविद्याः ।

अस्तेयाद्यैः प्रपत्त्या परिचरणमुखैरप्यधीतैः स्वजातेः

सर्वेऽपि प्राप्नुयुस्तां परगतिमिति तु ब्राह्मगीतादिसिद्धम् ।। ४२ ।।

सर्वा०—यदि यज्ञादिभिरेव विद्योपकारः, तर्ह्याश्रमान्तराणां सा न स्यात् । अथ यथार्हं स्ववर्णादिधर्मैः, तदा शूद्रस्यापि स्यात्; ततश्च काण्डद्वयोक्तापशूद्र-नयविरोधः; तत एवानधिकारे—

*मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ।।

इति शरण्योक्तिविरोध इत्यत्राह—पुंभिरिति ।। सिद्धाधिकारैः—अधीत-वेदतयाऽनुष्ठानोपयुक्तज्ञानवद्भिरपेक्षितमन्त्रविद्भिश्चेत्यर्थः । श्रुतिनयवशतः—अध्ययनविधिसिद्धन्यायसामर्थ्यात् । तथा हि—अग्निविद्यासापेक्षाः क्रतुविधयो

यथाधीतवेदैरग्न्याधानार्हैर्निराकाङ्क्षाःस्वसिद्ध्यै नान्येष्वन्यतोऽधिकारं प्रयुञ्जते। एवं विद्याविधयोऽपि *शुगस्य इत्यधिकरणे यद्यपि प्रोक्ताः, तथाऽपि—

*शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम्॥

इति ब्राह्मवचनात्।

*स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः इति चातुर्वर्ण्यविषय-भगवदुक्त्या च शूद्रस्यापि शास्त्रसिद्धैः फलसङ्गत्यागवद्भिर्निवृत्तिधर्मैर्योगो न विरुद्धः। स च मुक्तिपर्यन्त एव स्यादिति भावः॥ ४२॥

आनन्द०—आक्षेपसंगत्याऽऽह—यदीति। आश्रमान्तराणां—संन्यासब्रह्मचर्यादीनामित्यर्थः। शूद्रस्यापीति। अस्तेयादीनां वर्णधर्माणां सत्वादित्यर्थः। काण्डद्वयेति। यद्यपि पूर्वकाण्डे क्रतुष्वनधिकारश्चिन्तितस्तथाऽपि अध्ययनसाध्यज्ञान-साध्यत्वाविशेषात् स नयस्सर्वसाधारण इति भावः। उत्तरकाण्डे तु चिन्ताप्रयोजनं भाष्ये वक्तव्यम्। तथाऽपीति। शरणं त्वामिति।

नन्वनेन ब्रह्मविद्याऽधिकारः प्रतीयते, तत्र किं सा ब्रह्मविद्या प्रपत्तिरुत विद्यान्तरं? नाद्यः, शूद्रस्यापि भृत्यवाक्यविरोधात्। न द्वितीयः, शरणं त्वामिति वचनस्य प्रपत्तिपरत्वात्। अन्यथाऽपशूदनयविरोधादिति चेत्—

अत्र केचित्—प्रपत्तौ विद्याविशेषेचाधिकारः "येऽपि स्युः पापयोनयः, स्त्रियोवैश्यास्तथाशूद्रा' इत्यादिवचनात्। अत एव न्यायसिद्धाञ्जने 'स्त्रीविधुराणामपि जपोपवासाद्यङ्गाधिकृतानां ब्रह्मविद्याधिकारोऽस्त्येवे'त्युक्तम्। तत्र शूद्रस्यापि तुल्यन्यायादुक्तप्राय एव, अध्ययनसाध्यज्ञानाभावस्य तुल्यत्वात्।

न चापशूद्रनयविरोधः, रथकारादिन्यायेन विरोधाभावात्। न चैवं तदधिकरणवैयर्थ्यं, विद्यासामान्यविषयत्वादिति वदन्ति।

अन्ये तु—न साक्षाद्विद्यायामधिकारः, किं तु निवृत्तिधर्माधिकारमात्रं, स च धर्मो जन्मान्तराधिकारमापादयति। न च कर्मयोगाधिकारवत् तुल्यता, तस्य कर्मयोगत्वाभावात्। न च विशेषाभावः, 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशा' वित्युक्तविषयवत्वात्। न च 'स्त्रियो वैश्या' इति वचन विरोधः, तस्य शरणागतिविषयत्वात्।

यद्वा निवृत्तिधर्मपरतयाऽप्युपपत्तेरन्यथा अपशूद्रनयविरोधादित्याहुः।

परे तु—'स्त्रियोवैश्या इत्यादिवचनं (स्य ?) जन्मान्तरे विद्याधिकारिणां कर्मवशेन तादात्त्विकहीनजन्मवतां मोक्षप्राप्तिपरत्वात्, अत एव स्त्रीविधुराणामपीत्यादिन्यायसिद्धाञ्जनवाक्यमपि निर्व्यूढं; प्रक्रान्तयोगस्याहरहरनुष्ठीयमानकर्मभिराधेयातिशययोग्यस्य जपोपवासकर्माधिकारपरत्वात्। अत एव 'ननु

गोपिकादेरपि मोक्षः श्रूयते तत्कथं त्रैवर्णिकत्वनियमः ; इत्थं, न हि तेषां तत्तच्छरीरेष्वेवोपायानुष्ठानं—किं तु प्राचीनेष्वेव ब्राह्मणादिजन्मसु, प्रागेव प्राप्तोपायानामपि तेषां प्रारब्धकर्मविशेषादिना निकृष्टशरीरप्रवेशः, अन्तिमशरीरं तु यत्किमपीति न दोषः। प्रारब्धावधिकत्वात् बन्धस्य ; एवं विदुरादयश्च भवान्तरीय संस्कारोद्बोधजनितज्ञानेनेति नापशूद्राधिकरणविरोधः। स्मरन्ति च—

धर्मव्याधादयोऽप्यन्ये पूर्वाभ्यासाज्जुगुप्सिते।
वर्णावरत्वे संप्राप्तास्संसिद्धिं श्रमणी यथा ॥

इत्याद्युत्तरग्रन्थोऽपि संगच्छते। प्रपत्तिव्यतिरिक्तविद्यायां त्रैवर्णिकानामेवाधिकारः। यद्यपीत्यादिग्रन्थस्तु कथंचिदुत्तरानुगुणो नेय इत्याहुः। (मूलं) परिचरणमुखैरिति शिश्रूषा शूद्रस्येत्युक्तेरित्यर्थः। परगतिः-मुक्तिः। विद्येत्येके।

पशुर्मनुष्यः पक्षी च ये च वैष्णवसंश्रयाः।
तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम् ॥

इत्युक्तेः साक्षात् मोक्षप्राप्तिस्तदुक्तन्यायसिद्धाञ्जने वैष्णवसंश्रयाणां तु पुंसां उपासनशेषतयोपादानात् यजमानेन सह पश्वादीनां स्वर्गादिगमनवद्वा मोक्षसिद्धिः। उक्तं महाभारते—'यजमानेन सहितास्स्वर्गं यान्ति नराधिप' इति।

नचैवं 'नान्यः पन्था' इति श्रुतिविरोधः ज्ञानभिन्नत्वादिति वाच्यं ; यजमानकृतयागस्येव गुरोरनुष्ठितभक्त्यादेरेव मोक्षहेतुत्वात्—तस्याः ज्ञानत्वादिति वाच्यं ; न चैवं तस्यो [स्याउ ?] पायत्वानुपपत्तिः ; उपायत्वाभावेऽपि तत्संबन्ध्यापादकत्वादिति ॥ ४२ ॥

अक्ष०—इहात्रैवर्णिकानामपि मुक्त्युपायानाह—पुंभिरिति। सिद्धाधिकारैः विध्यन्तरसिद्धाधिकारैः। अधिकारः—अग्निविद्यादिमत्वं। निराकाङ्क्षभावं—स्वसिद्धये अधिकार्याकाङ्क्षाऽभावं क्रतव इव क्रतुविधय इव। यथाक्रतुविधयः विध्यन्तरसिद्धाधिकारान् पुरुषानेव स्वानुष्ठानाय परिगृह्णन्तः अन्येषामधिकारं नाक्षिपन्ति तथा ब्रह्मोपासनविधयोऽपीति ब्रह्मविद्याः क्रतव इव त्रैवर्णिकानामेवार्हा इति—

यद्यपि शुगस्येत्यधिकरणे निर्धारिताः श्रुत्या न्यायेन च सिद्धान्तिता इत्याशयः। तथाऽपि अस्तेयाद्यैः—आद्येत्यनेन अहिंसादिग्रहणं। परिचरणमुखैः—परिचरणं पूर्ववर्णपरिचर्या। मुखैरिति स्ववर्णधर्मान्तर ग्रहणं। स्वजातेः अधीतैरित्यर्थः। इयं च परम्परया तज्जन्मनिजन्मान्तरे वा मुक्तिसाधनतया उक्तं। साक्षादुपायमाह—प्रपत्त्येति। प्रपत्तेस्सर्वाधिकारत्वात् नात्र ब्रह्मविद्यान्तरोक्तन्यायप्रसर इति भावः। अतस्सर्वेऽपि—अत्रैवर्णिका अपि। तां त्रैवर्णिकप्राप्यां परगतिं परममुक्तिं प्राप्नुयुरिति भावः। किमत्र प्रमाणमित्यत्राह ब्राह्मेति।

शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः ।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम् ॥

इति ब्राह्मपुराणवचनात् ध्यानयोगानधिकारिणामप्यत्रैवर्णिकानां शरणागत्या विष्णुपदप्राप्त्यवगमात् 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति वर्णधर्मस्य मुक्तिहेतुत्वं प्रतीयत इति भावः ॥ ४२ ॥

इति त्रैवर्णिकाधिकारसर्वाधिकारविभागः

ध्यानादृष्टेन साक्षात्कृतिरुपजनिता बाधते चेत्प्रपञ्चं
तत्तुल्यार्थैव शाब्दी प्रमितिरपि न किं बाधते पूर्वमेव ।
ज्वालैक्यादौ परोक्षादपि हि निजगदुर्बाधमध्यक्षबुद्धे-
र्नाप्यन्नादृष्टरूपामहितविमथनीं शक्तिमङ्गीकरोषि ॥ ४३ ॥

सर्वा०—अद्वैतिनः केचिदाहुः—*तत्त्वमस्याद्युपदेशलब्धब्रह्मात्मभावावबोधस्य तदेकध्यानसाध्यादृष्टजन्यसाक्षात्कारेण विश्वभ्रमबाध इति; तदनूद्य दूषयति—ध्यानेति ॥ अयं भावः—ध्यानजनकं वाक्यजन्यं ज्ञानं ध्यानादृष्टजन्यं च समानविषयं न वा ? आद्ये किमन्येन, वाक्यजन्यज्ञानादेव मुक्तिस्यात् ? उत्तर ब्रह्मणि सविशेषत्वं स्यात्, वेद्याकारवैषम्यात् । आकारभेदः कल्पित इति चेन्न; तयोर्भ्रान्तित्वप्रसङ्गात्, *तत्त्वज्ञानान्मोक्ष इति चाङ्गीकारात्, अन्यथा त्वत्यन्तवैयर्थ्यात् ।

अस्तु प्रागेव बाधः, बाधितानुवृत्तिपरिहाराय तु साक्षात्कार इति चेन्न; साक्षात्क्रियमाणेऽपि तत्त्वे दोषानुवृत्तौ बाधितानुवृत्तेर्लोके बहुलमुपलम्भात् । दोषनिवृत्तौ तु बाधितानुवृत्तेरेवाभावात् । सदेहानां च यावज्जीवं सा दुर्वारा । देहनिवृत्तौ चक्रभ्रमन्यायात्स्वयमेव निवर्त्स्यतीति किं तद्बाधकेन ? ननु प्रत्यक्षभ्रमस्य परोक्षं कथं बाधकमित्यत्राह—ज्वालैक्यादाविति । अनुमानतोऽप्यत्र ज्वालैक्यप्रत्यक्षं बाध्यते, देहात्मभ्रमश्चानुमानतश्शास्त्रतो वा, तथेहापि स्यात्; अन्यथा कथमद्वैतवाक्यार्थविस्रम्भपूर्वकध्यानादिसिद्धिः ? ध्याननियोगजन्यज्ञानस्य गरुडादिदृष्टिन्यायादनिष्टनिवर्तकत्वमिति चेत्, तत्राह—नापीति । विरुद्धविषयावगाहनशक्त्या बाधितस्य हि मिथ्यात्वसिद्धिः, विषहरणधीन्याये तु विषादिवदेव निवर्त्यसत्यत्वप्रसङ्गादिति भावः ॥ ४३ ॥

आनन्द०—अथ प्रसङ्गात् परपक्षं निराकरोतीत्याह—अद्वैतिन इति । ननु ध्यानादृष्टजन्या साक्षात्कृतिर्निवर्तिकेत्युक्ता । कथं शाब्दज्ञानस्य निवर्तकत्वं ? कथं वा तस्य विषयत्वमिति ? अत आह— अयं भाव इति । वाक्यजन्य इति । अविशेषादिति भावः । ब्रह्मणि तु विशेषं विना भिन्नविषयत्वायोगादिति भावः । आकारभेद इति । तथा च पारमार्थिकविशेषाभावस्य सत्त्वात् न निर्विशेषत्व-

विरोध इति भावः। तयोरिति। ध्यान-साक्षात्कारयोरित्यर्थः। शाब्दज्ञान-साक्षात्कारयोरन्यतरस्य कल्पितविषयत्वेन हि सविषयत्वं वाच्यं, तथा चान्यतरस्य भ्रान्तित्वं स्यादित्यर्थं इत्यप्याहुः। इष्टापत्तिं परिहरति—तत्त्वज्ञानादिति। नायं नियमः विरोधिज्ञानं हि भ्रमनिवर्तकं तद् भ्रान्तिः? प्रमा वा? भूदलने सर्पज्ञानस्याम्बुधारा भ्रमनिवर्तकत्वादित्यत आह—अन्यथेति। तथा सति वेदान्तप्रामाण्यसमर्थनं व्यर्थं-प्रमाणभूतवाक्यादपि उत्पन्ननिर्विशेष-ज्ञानादविद्यानिवृत्तिसंभवात् तदध्यासहेत्वविद्यासत्त्वस्यावश्यकतया निश्शेषाविद्या-निवृत्तिर्नस्याच्चेति भावः।

किं दोषसत्त्वेऽपि बाधितानुवृत्तिपरिहार उत दोषाभाव इति विकल्प्य आद्यं दूषयति—दोषेति। ननु दोषनिवृत्त्यर्थं एव साक्षात्कार इति चेन्न; दोषस्या-विद्यारूपत्वे आद्यज्ञानेनैव निवृत्तिसंभवात् तदन्यत्वेप्यविद्याकार्यत्वे तन्निवृत्त्यैव निवृत्तेः, तदन्यत्वेऽपि भ्रान्तित्वे साक्षात्कारादप्यनिवृत्तेः, सेतुदर्शनात् पापनिवृत्ति-वत् निवृत्तौ तु सत्यतापत्त्या ब्रह्मस्वरूपत्वे न च कथंचिदपि निवृत्तिरिति भावः।

बाधकत्वमप्रामाण्यापादकत्वमुतउत्पत्तिप्रतिबन्धनिवृत्त्यन्यतरप्रयोजकत्वं वेति विकल्पमभिप्रेत्याह—अनुमानत इति। द्वितीय आह—देहात्मभ्रमश्चेति। ननु तत्रोत्पत्तिप्रतिबन्धो नासीदिति चेत् तर्हि अपरोक्षस्यापि मम शरीरमित्यस्य सत्त्वेन तस्यापि निवर्तकत्वं न स्यादिति समस्समाधिरिति भावः॥ ४३॥

अक्ष०—अथाद्वैतमते मुक्त्युपायविमर्शः—तत्र ध्यान नियोगमादौ निरस्यति ध्यानेति तत्त्वमस्यादि वाक्यजन्यज्ञानानन्तरं तदर्थध्यानजन्यादृष्टेन वाक्यार्थं प्रत्यक्षं जायते तेन च प्रपञ्चनिवृत्तिरूपा मुक्तिरिति केचिदद्वैतिनो वदन्ति।

तत्र प्राथमिकस्य वाक्यजन्यस्य शाब्दज्ञानस्यानन्तरभाविनः प्रत्यक्षस्य च विषयभेदाभावेन समानविषयकत्वात् प्रत्यक्षस्य बाधकत्वे शाब्दस्यापि बाधकत्वं स्यात् तदा ध्यानमपि विफलं स्यात्, तस्याबाधकत्वे प्रत्यक्षमपि बाधकं न स्यादिति भावः।

शाब्दज्ञानस्य परोक्षत्वेन प्रात्यक्षिकप्रपञ्चबाधकत्वं न सम्भवतीत्यत्राह—ज्वालेति। ज्वालैक्यादिविषये सेयं दीपज्वालेत्यादिप्रत्यक्षस्यापि परोक्षात् ज्वाला-भेदाद्यनुमानात् बाधं निजगदुः। परीक्षका इति शेषः। अतो बाधं प्रति प्रत्यक्षत्वं प्रयोजकमिति न वक्तुं शक्यं, किन्तु विरुद्धविषयकत्वमिति भावः। ध्याननियोग-जन्यज्ञानस्य समानविषयकत्वेऽपि गरुडादिदृष्टिन्यायेन अनिष्टनिवर्तकत्वमित्यत्राह नापीति। गरुडध्याने विषहरणशक्तिरङ्गी क्रियते न तथा त्वं तत्त्वमसीतिज्ञाने प्रपञ्चनिवर्तनशक्तिमङ्गीकरोषि? अङ्गीकारे शक्तिमज्ज्ञाननिवर्त्यस्य प्रपञ्चस्य गरुडदृष्टिनिवर्त्यविषवत् सत्यत्वापत्तिः। विरुद्धविषयावगाहितया बाधितस्य हि मिथ्यात्वम्॥ ४३॥ इति ध्याननियोगवादभङ्गः

निर्दिष्टो निष्प्रपञ्चीकरणविधिरसौ गौडमीमांसकाप्तै-
र्दृष्टो न क्वापि दुर्निर्वहमपि करणाद्यत्र साध्याविशेषात् ।
मुक्तिर्नैयोगिकी चेज्जगदपि न मृषा नश्वरी सापि ते स्यात्
ध्वंसात्मत्वेऽपि तस्या न च वदसि भिदां ब्रह्मणस्तच्च नित्यम् ।४४।

सर्वा०—अन्ये तु वर्णयन्ति—नित्यशुद्धमप्यद्वितीयं ब्रह्म गगनमिव गन्धर्व-नगरवत्तया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चीकुर्यादिति विधिविषयानुष्ठान-जनितनियोगविशेषेण विश्वविद्यानिवृत्तिरिति; तान्प्रत्याचष्टे—निर्दिष्ट इति ॥ अनधीतमधीतविरुद्धं च कल्पयन्तीति व्यक्त्यै गौडमीमांसकाप्तत्वोक्तिः । क्वापि—श्रुतिषु स्मृतिषु चेत्यर्थः । न क्वापि दृष्ट इत्ययुक्तं *न दृष्टेर्द्रष्टारं पश्येः इत्यादि-दर्शनादिति चेत्, न ह्यत्र वाक्ये द्रष्ट्रादिप्रध्वंसं कुर्वीतेति विधीयते, किंतु जीवस्यौ-पाधिकं रूपं नानुसन्धत्स्वेति वा, करणायत्तज्ञानं जीवं परत्वेनापश्यन् स्वतस्सर्वज्ञं पश्येरिति वा, प्रकारान्तरेण वा नेतुं शक्यत्वात् । निषेधश्रुतयश्चान्यपराः न च विधिप्रसङ्गवत्यः ।

दूषणान्तरमाह—दुर्निर्वहमिति । नियोगस्य हि करणेतिकर्तव्यतादि वक्तव्यम् । यदि प्रपञ्चध्वंसेन नियोगं भावयेदिति करणक्लृप्तिः, तदा नियोग-साध्यसाधनयोरविशेष इत्यन्योन्याश्रयः । अथ नियोगमजागलस्तनीकृत्य निष्प्रपञ्च-भावनैव निष्प्रपञ्चीकरणं, तदाऽऽत्माश्रयः । इतिकर्तव्यता च करणानुपपत्त्यैव निरस्ता । प्रयोक्ता चासौ द्रष्टा न स्वावसानाय नियोगकृत्यामुत्पादयेत्, तदा च *शास्त्रफलं प्रयोक्तरीति न स्यात् । अथ शुद्धस्य ब्रह्मणः फलम् । तन्न, तस्य भ्रमाध्यासशून्यत्वाङ्गीकारात्, तदर्थित्वाभावाच्छास्त्रार्थप्रयोक्तृत्वायोगाच्च । अस्मिन्पक्षेऽपसिद्धान्तापत्तिमाह— मुक्तिरिति । यस्यादृष्टसाध्यो नाशस्तस्य ज्ञान-बाध्यत्वाभावात् प्रपञ्चमृषात्वं न स्यात् । नियोगसाध्यं च सर्वं काल्पनिकत्वाद-नित्यमिति मन्यसे, अतो मुक्तिरपि नश्वरीति बन्धोन्मज्जनप्रसङ्गः; अभावाभावस्य भावत्वात् । ध्वंसस्य च ध्वंसप्रवाहापत्तिः । न च ते तत्क्लृप्तौ हेतुरस्ति ।

ननु ध्वंसो ह्युत्तरावधिरहितः; प्रायश्चित्तनियोगात्पापध्वंसवत् मुक्तेरन-श्वरत्वं स्यादित्यत्राह—ध्वंसात्मत्वेऽपीति । ध्वंसरूपा मुक्तिर्ब्रह्मणोऽन्याऽनन्या वा ? नाद्यः, कार्यस्य सर्वस्य घटतद्ध्वंसादेः स्वप्नप्रपञ्चतद्ध्वंसादेरिव बाध्यत्वा-नभ्युपगमात् । अबाधे च मुक्तावपि भेदसिद्धिप्रसङ्गात् । भावाद्वैतपक्षश्च न युक्तः, क्वचिन्निर्बाधितभेदसद्भावेऽन्यत्रापि तदविरोधात् । तत्र चोक्तानां बाधकानां त्वदिष्टेऽपि संचारयितुं शक्यत्वात्; न द्वितीयः, ध्वंसस्य साध्यत्वात् ब्रह्मणस्तु नित्यत्वात् तयोस्तादात्म्यायोगात्; तदिदमभिप्रेत्याह— तच्च नित्यमिति ॥ ४४ ॥

आनन्द०—पूर्वसङ्गत्याऽऽह—अन्येत्विति। अनधीतमिति। गौडमीमांसकानां वेदाध्ययनशून्यत्वात् वेदावेदपरिज्ञानाभावादिति भावः। न ह्यस्मिन्निति। तथा च निष्प्रपञ्चीकरणं प्रपञ्चप्रध्वंसकरणं तत् विधिं विना उपपद्यत इत्यर्थः। ननु निष्प्रपञ्चीकरणं नाम [निष्प्रपञ्चानुवृत्त्यनुमितिः] निष्प्रपञ्चीकरणविधिरस्तीत्यत्राह—करणायत्तेति। दृष्टेर्द्रष्टारं—करणायत्तज्ञानं जीवं न पश्येः किं त्वीश्वरमेव पश्येरित्यादिभिर्नेतुं शक्यत्वात्। अनेनेदं प्रकरणं जीवाद्भिन्नमीश्वरं प्रतिपादयतीति भेदपरमिति व्यज्यते। ननु 'नेह नानाऽस्ति किंचन' मृत्योस्स मृत्युमाप्नोति नेतिहोवाच इत्यादि वाक्यानि निष्प्रपञ्चीकरणविधायकवाक्यानीत्यत्राह—निषेधेति। ब्रह्मानानात्वनिषेध-वैलक्षण्यादिपरत्वात् न त्वदुक्तपरा इत्यतः विधिप्रत्ययाभावाच्च न विधिपरत्वमित्यत्राह—न चेति। निष्प्रपञ्चीकरणेननियोगं भावयेदिति निष्प्रपञ्चीकरणविषयकं निष्प्रपञ्चीकरणनियोगकामनियोज्यकं कार्यमित्यर्थः। भावयेदिति—कार्यमिति जानीयादित्यर्थः नियोगवादिमते भावनाया अभावात्।

यद्वा भाट्टमतानुसारेण भावनामङ्गीकृत्य भाव्यत्वं नियोगस्य, विवक्षितत्वात् प्रवृत्तमिति। अत्र किं नियोगभावनापेक्षया नियोगकरणस्य करणत्वमुत निष्प्रपञ्चीकरणभावनापेक्षयेति विकल्पमभिप्रेत्याद्यं दूषयति—यद्वीति। निष्प्रपञ्चीकरणेन नियोगसिद्धिः, नियोगेन निष्प्रपञ्चीकरणरूपप्रपञ्चनिवृत्तिसिद्धिरिति भावः। द्वितीयं प्रतिवक्ति—अथेति। निष्प्रपञ्चभावनयैव निष्प्रपञ्चीकरणमिति भावः। इति कर्तव्यतेति। करणमस्येति वेतिकर्तव्यतावत्त्वादिति भावः। अधिकाभावाच्च न निष्प्रपञ्चीकरणविधिरिति वक्तुमत्र किमहमर्थोऽधिकारी उत शुद्धं ब्रह्मेति विकल्प्य आद्यं दूषयति प्रयोक्तेति। अधिकारीत्यर्थः। द्वितीयं चोदयति अथेति। दूषयति तन्नेति। उपहितस्यैवाध्यासाधिष्ठानत्वादिति भावः। ननूपहितस्य प्रयोक्तृत्वमस्तु तस्यैवानुपहितस्य फलं चेति न शास्त्रफलं प्रयोक्तरीत्यस्य विरोधः। उपहितेऽनुपहितांशस्यापि प्रवेशादिति चेन्न देवदत्तादावप्यनुपहितांशस्य सत्त्वेन यज्ञदत्तानुष्ठितकर्मणा तस्य फलप्रसङ्गात्। तथा च स्वेनानुष्ठितेन स्वस्यावश्यंफलवत्त्वनिश्चयाभावात् प्रवृत्तिनियमो न स्यात्। अपसिद्धान्तेति प्रपञ्चमिथ्यात्वस्य सिद्धान्तसिद्धत्वात्। किं च 'एवमेवामुत्र पुण्यचितो लोकःक्षीयत इति श्रुतेः पुण्यसाध्यमानस्यानित्यत्वमिति भवदीयैर्व्याख्यानात् मोक्षस्याप्यनित्यता स्यादित्याह—नियोगसाध्यं चेति। इष्टापत्तिं परिहरति-बन्धोन्मज्जनप्रसङ्गः। तस्य ततोऽन्यत्वादित्यत आह—ध्वंसस्य चेति। तथाचानवस्था स्यादित्यर्थः। ननु ध्वंसपरम्परासत्त्वे को दोष इत्यत्राह—न च त इति। अप्रमाणमूलत्वाद्गौरवमिति भावः।

ननु ध्वंसो नाभावः, किं तु उत्पत्तिमच्चरमो भावविकारः, अन्यथा उत्तरावधिरहिताभावत्वे घटध्वंसोत्पत्तिकाल इव चिरध्वस्तेऽपि घटे ध्वंसत इति

व्यवहारः स्यात्-धात्वर्थस्य वर्तमानतया आख्यातस्य तद्गतवर्तमानत्वाभिधायकत्वात्। न च तदनुकूलव्यापारवर्तमानताया एवाख्याताभिधेयत्वं, तथासति उत्थानानुकूलव्यापारवति आर्द्रवातजडीकृतकलेवरे पुरुषे उत्तिष्ठतीति व्यवहारप्रसङ्गात्। तस्माच्चरमभावविकारे क्षणिके सति अविद्यात्यन्ताभावरूपब्रह्मावतिष्ठत इति न संसारोन्मज्जनमिति चेदुच्यते 'जयति'धात्वर्थरूपारिभङ्गस्य हेतुभूतव्यापारवर्तमानतायां जयतीति प्रयोगात् शुद्धेऽपि धात्वर्थोपहिततदनुकूलव्यापारवर्तमानत्वादिकमेवार्थः। शेत इत्यादावपि यावच्छयनादि तावत्कालं तदनुकूलयत्नादिव्यापारोऽप्यस्त्येव, अत एव महाभाष्ये 'मुखं व्यादाय स्वपिति' 'संमील्य हसति' इत्यादौ उत्तरस्वापाद्यपेक्षया व्यादानादेर्भास इति नत्वा ? (का) नुपपत्तिः। उत्तरस्वापाद्यनुकूल व्यापाराभावे उत्तरं स्वापादेर संभवात्।

किं चाविद्याविकारभूतचरमावस्थाया अविनाशो वक्तव्यः। तथा च तथाभूतचरमावस्थापरम्पराश्रयत्वेन अविद्यासत्त्वनियमादनिर्मोक्षप्रसङ्गः।

किं च मुक्तिदशायां अविद्यायाश्चरमावस्थाया अभावेऽपि अविद्या कुतो न स्यात् ? स्वविरोध्यभावकाले स्वस्यावश्यंभावात्। न च तदा कालस्याप्यभावात् न दोष इति वाच्यं, तदपि कुतः ? तद्विरोधिनो ब्रह्मणस्सत्त्वादिति चेन्न ; तस्य कालतो विरोधाभवात्। तथाचावश्यंभावादनिर्मोक्षप्रसङ्गः।

ननु पापध्वंसस्य नियोगजन्यत्वेऽपि नानित्यता, नियोगजन्यमपि भाववस्त्वेवानित्यमिति संकोचः क्रियत इति शङ्कते—नन्विति। ब्रह्मणोऽन्यत्वपक्षे मिथ्या सत्यावेति विकल्पमभिप्रेत्याह—कार्यस्य सर्वस्येति। तथा चाविद्यानिवृत्तेरपि निवृत्तौ अविद्याजननप्रसङ्गेन मोक्षस्यानित्यता स्यात्। निवृत्तिदशायामपि निवृत्त्यध्यासार्थमविद्यायास्सत्त्वेऽनिर्मोक्षश्च स्यादितिभावः। द्वितीयं दूषयति—**अबाधेचेति**।

ननु अपसिद्धान्तो नास्तीत्याशङ्क्यनिराकरोति—**भावाद्वैतेति**। 'एकमेवाद्वितीयं' नेह नानाऽस्ति किंचने'त्यादेस्संकोचस्यावश्यकत्वे प्रपञ्चस्याप्यबाधितप्रमाणेन सत्यतावलात् ततोऽपि संकोचस्स्यादविशेषात् भावाभावरूपवैषम्यम किंचित्करमिति भावः। तादात्म्यायोगादिति। ब्रह्मणो नित्यता वा न स्यात् मोक्षस्यानादिता वा स्यादिति शास्त्रवैयर्थ्यमिति भावः ।। ४४ ।।

अक्ष०—पूर्वश्लोके ध्याननियोगवादो निरस्तः। इह निष्प्रपञ्चीकरणनियोगवादं निरस्यति—**निर्दिष्ट इति**। निष्प्रपञ्चीकरणविधिरिति—अविद्यया सप्रपञ्चं प्रतीयमानं ब्रह्मनिष्प्रपञ्चं कुर्यादिति विधिरित्यर्थः। एकस्मिन् चन्द्रे तिमिरदोषकृतानेकचन्द्रप्रपञ्चवत् अविद्याकृतो ब्रह्मणि नामरूपप्रपञ्चः विद्यया प्रविलापयितव्य इति भाव। उपनिषत्सु क्वाप्यदृष्टः विधिरसौ कैर्निर्दिष्ट इत्यत्राह—**गौडेति**।

अध्ययनाभावेन पौरुषेयवाक्यमपि वेदत्वेन मन्यमानैः कैश्चित् जरन्मायावादिभिरिति भावः ।दृष्टो न क्वापीति । स्मृतिष्वपि न दृश्यत इति भावः । न च न दृष्टेर्द्रष्टारं पश्येः इत्युपनिषद्येव दृश्यत इति वाच्यं, तत्र द्रष्टृविनाशं कुर्वीतेत्यनभिधानात् करणायत्तज्ञानं जीवं न पश्येः स्वत एव सर्वज्ञं परमात्मनमेव पश्येः इत्येव पूर्वापरानुगुण्येन प्रतीतेः । दूषणान्तरमाह—दुर्निर्वहमपीति । नियोग इति कार्यमपूर्वमुच्यते तस्य नियोज्यतद्विशेषणविषयकरणेतिकर्तव्यतादिकं यजेत स्वर्गकाम इत्यादाविव वक्तव्यं, तत्सर्वमिह निर्वोढुं न शक्यमिति भावः । कुत इत्यत्राह—साध्याविशेषादिति । करणफलयोः भेदाभावादित्यर्थः । प्रपञ्चनिवृत्तिरेव हि नियोगफलभूता मुक्तिः, प्रपञ्चनिवृत्तेरेव करणत्वे प्रपञ्चनिवृत्त्या नियोगः, नियोगात् प्रपञ्चनिवृत्तिरित्यन्योन्याश्रयादिप्रसङ्गस्स्यादिति भावः ।

एवं नियोज्यः प्रयोक्ता द्रष्टा न-स्वविनाशाय नियोगकृत्यामिमामुत्पादयेत् नियोज्यनाशे निराश्रयो नियोगोऽपि नोत्पद्येतेत्यादिकमत्र भाव्यम् । अत्रापसिद्धान्तापत्तिमाह—मुक्तिरिति । नैयोगिकीति । अपूर्वजन्या चेदित्यर्थः । न मृषेति । नियोगात्मकादृष्टविनाश्यत्वे प्रपंचस्य ज्ञानबाध्यत्वाभावेन विषादिवत् सत्यत्वप्रसङ्गादिति भावः । नश्वरीति नियोगजन्यस्वर्गादिफलस्य नश्वरत्वोपगमादिति भावः । प्रपञ्चनिवृत्तिरूपमुक्तेः ध्वंसरूपत्वात न नश्वरत्वमित्यत्राह—ध्वंसेति । तस्याः प्रपञ्चनिवृत्तिरूपमुक्तेः ब्रह्मणो भेदं न वदसि' ब्रह्मभिन्नत्वे कार्यस्य सर्वस्य घटतद्ध्वंसादेः स्वाप्नप्रपञ्चतद्ध्वंसादेरिव बाध्यत्वोपगमात् । तर्हि ब्रह्माभेद एवास्त्वित्यत्राह—तच्चनित्यमिति । सादिप्रध्वंसस्य अनादिब्रह्मणश्च नाभेदस्संभवतीति भावः ॥ ४४ ॥

इति निष्प्रपञ्चीकरणनियोगवादभङ्गः

वाक्यार्थज्ञानमात्रादमृतमिति वदन्मुच्यते किं श्रुतेऽस्मिन्
बाढं चेन्मानबाधस्स यदनुभवति प्रागिवाद्यापि दुःखम् ।
ध्यानादीनां विधानं भवति च वितथं तन्न युक्तं न चेष्टं
ध्यानाद्यङ्गाढ्यशब्दोदितचरममतेर्नाधिकं वः प्रकाश्यम् ॥ ४५ ॥

सर्वा०—यस्त्वाह किं ध्याननियोगेन नियोगान्तरेण वा, तत्त्वावेदकवाक्यजन्यज्ञानादेव कल्पितबाधोपपत्तेः; दृष्टश्च दृढप्रतीतस्यापि वाक्यतो बाधः । ज्ञानमात्रादेव च मुक्तिश्श्रूयते, भवति च वाक्याददैतधीः; अतस्सैव द्वैतनिवर्तिकेति, सोऽयमनुयोक्तव्यः—किं श्रवणजन्यज्ञानमात्रात्प्रतिष्ठापितान्मुक्तिः ? उताद्वैतज्ञानजनितविकल्पवैमुख्यस्य तेनैव वाक्येन जनिताद्विशदज्ञानादिति । तत्राद्यं निरस्यति—वाक्यर्थेति ॥ बाधकज्ञाने सति बाधः कथं न स्यादिति शङ्कते—बाढं चेदिति । अत्र प्रमाणत्रयविरोधमाह—मानबाध इति । स्वात्मनि प्रत्यक्षेण स्वस्मिन् परत्रानुमानागमाभ्याम् ।

ब्रह्मविदोऽप्यमुक्ताश्चिरजीविनः श्रुतिस्मृतिसिद्धाः। बुद्धे क्षेमप्रमाणं तच्छास्त्रैर्विप्रतिषिद्धम् *बुद्धे चेत् क्षेमप्रमाणमिहैव न दुःखमुपलभेत इत्यापस्तम्बोक्तं प्रसङ्गमभिप्रेत्याह—स इति। प्रसङ्गान्तरमाह—ध्यानादीनामिति। बहुवचनम् उपासनात्मकत्वदर्शनरूपत्वादिविशेषणभेदात्। अत्र वेदोदितत्वान्नैतथ्यं मोक्षार्थविद्यानां नान्यार्थत्वमित्यभिप्रायेणाह—तन्न युक्तमिति। अपसिद्धान्तत्वमप्याह—न चेष्टमिति। साधनस्य भेदवासनानिरासार्थत्वं हि ब्रूथ। द्वितीयं दूषयति—ध्यानेति। अयं भावः—पश्चात्तनं वाक्यार्थज्ञानं पूर्वविशिष्टविषयम्? अधिकविषयं वा? उभयत्र प्रागेव दूषणमुक्तमिति॥ ४५॥

आनन्द०—पूर्वाक्षेपेण सङ्गतिमाह—यस्त्वाहेति। ननु प्रत्यक्षस्य कथं वाक्यजन्यज्ञानाद्बाध इत्यत्राह—दृष्टश्चेति। देहात्मभ्रमस्य शास्त्रेण निवृत्तिदर्शनादिति भावः।

ननु 'द्रष्टव्यो मन्तव्यः श्रोतव्य इति श्रुतिविरोधः स्यादित्यत्राह—ज्ञानमात्रेति। ब्रह्मवेद ब्रह्मैव भवति तमेवं विद्वानमृत इह भवति तमेव विदित्वाऽतिमृत्युमेति ज्ञात्वा देवं मुच्यते सर्वपापमिति वाक्येषु ज्ञानमात्रस्यैव मोक्षहेतुत्वश्रवणात् श्रोतव्यादिवाक्यं श्रवणार्थतया स्मृतिमात्रपरमिति भावः।

ननु निर्विशेषज्ञानं निवर्तकमिष्यते, न च वाक्यं निर्विशेषज्ञानजनकमित्यत आह—वाक्यादिति। अखण्डार्थत्वेन वाक्यस्य निर्विशेषज्ञानजनकत्वमिति भावः। अनुमानागमाभ्यामिति। दैन्यादिदर्शनादनुमानबाधः। आगमबाधमाह—ब्रह्मेति। रैक्व-जनक-याज्ञवल्क्यादि वृत्तान्तप्रतिपादकश्रुति स्मृतिपुराणादिष्वित्यर्थः। यदि वाक्यार्थज्ञानमात्रान्मुक्तिस्तदा कुतो वेदान्तश्रवणानां संसारो निवर्तेत, न च निवर्तते तस्मान्न मुक्तिरिति प्रसङ्गाभिप्रायेणाह—बुद्धे क्षेमेति।

ननु वेदनं ध्यानविश्रान्तमित्यादिना ध्यानोपासन वेदनादिरूपेणैकत्वस्यैव विधानात् बहुवचनानुपपत्तिमाशङ्क्य परिहरति—बहुवचनमिति। उभयत्रेति। ननु पूर्वज्ञानादनधिकविषयमेव। न चैवं पूर्वत एवाविद्यानिवृत्तिप्रसङ्गः विशदत्वाभावात् विशदत्वाभावोऽपि भेदवासनातः प्रतिबन्धोऽनवधारणत्वं वा? तथा हि ऊर्ध्वत्वाग्रता साक्षात्कारे विद्यमाने तीरस्थवृक्षे ऊर्ध्वोऽग्रताप्रतिबिम्बभ्रमदर्शनात्, तथा नभसि चन्द्रसाक्षात्कारे विद्यमान एव कश्चन्द्र इति प्रश्नदर्शनात् तत्र प्रतिबन्धानव धारणयोरन्यतरावश्यकतायां विशदत्वावश्यम्भावात् तन्न्यायेन ब्रह्मज्ञानेऽपीति न पूर्वोक्तदोष इति चेत् अत्रायमाशयः—न तावदत्रानवधारणत्वं वक्तुं शक्यं शब्दस्य निर्णयं प्रत्येव जनकत्वात्। न च विप्रतिपत्तेस्संशय इति शब्दस्यापि तज्जनकत्वं युक्तमितिवाच्यम्। विप्रतिपत्तेः मानसिक संशय जनककोटयुपस्थितिमात्रजनकत्वेन संशयजनकत्वाभावात् विचाररूप श्रवणादिसह-

कृतस्य शब्दस्य कथञ्चिदपि संशयजनकत्वायोगात्। किञ्च कोटिद्वयगोचरत्वाभावान्न संशयत्वमिति वक्ष्यते।

यच्च प्रतिबन्ध इति तन्न विशेषादर्शनजन्यभ्रमत्वावच्छिन्नस्य विशेषदर्शनेननिवृत्तिसत्त्वात् न प्रतिबन्धः। न च वृक्षादौ ऊर्ध्वाग्रत्वभ्रमः विशेषा दर्शनजन्यः किं तूपाधिजन्यः। स चोपाधिनिवृत्तावेव निवर्तते। नन्वत्रापि उपाधिजन्यत्वं वक्तुं शक्यं तथा सति उपाधिनिवृत्तौ तन्निवृत्तेः किं निवर्तकज्ञानेन ? यद्युपाधिनिवर्तनार्थमेव तदपेक्षा ? तर्हि तन्निवृत्तिः प्रथमत एव स्यात्, न च तत्रैव प्रतिबन्धकोपाधेः सर्वदा निवृत्तिर्नस्यात् तेनैव प्रतिबन्धादित्यादि द्रष्टव्यम् ॥ ४५ ॥

अक्ष०—अथ वाक्यजन्यज्ञानमात्रात् मुक्तिरिति पक्षं दूषयति—वाक्येति। वाक्यार्थज्ञानमात्रात् अमृतं मोक्ष इति वदन् पृच्छयते अस्मिन् वाक्यार्थे श्रुते किं मुच्यते मुक्तो भवतीति। बाढंचेदिति। तथैव प्रतिज्ञातं चेत् अभ्युपगतं चेदिति यावत्। तदा दोषमाह—मानबाध इति। प्रत्यक्षादिप्रमाणबाध इत्यर्थः। शतकृत्वः श्रुतवतामपि चिरजीविनां नाहं मुक्त इति प्रात्यक्षिकप्रतीतेः। कथं न मुक्त इत्यत्राह सइति। श्रुतवाक्यार्थः वाक्यार्थश्रवणानन्तरमपि प्रागिव यतो दुःखमनुभवति तत एव न मुक्त इत्यवैति। तदुक्तमापस्तम्बेन "बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धं बुद्धे चेत् क्षेमप्रापणं इहैव न दुःखमुपलभेत" इति।

'तस्य तावदेव चिरं यावन्नविमोक्ष्ये' इति श्रुतिरपि विशदं निध्यातुरपि विलम्बमेव ह्युपदिशति किमुत आपाततः श्रुतवताम्। वाक्यार्थश्रवणमात्रेण मुक्तिसंभवे ध्यान-उपासन-दर्शनादिविधीनामानर्थक्यमित्याह—तन्नयुक्तमिति। भेदवासनानिरासार्थं भवदीयैरपि ध्यानस्याप्युपगमात् तन्नैरर्थक्यं भवतामप्यनिष्टमेव इत्याह—न चेष्टमिति। अपसिद्धान्तः स्यादिति भावः। मुक्त्यर्थमेव ध्यानादिविधीयते सा यदि श्रवणमात्रात् भवति तदा तद्वैयर्थ्यमिति प्रसङ्गाभिप्रायः। ध्यानेन भेदवासनानिरसनानन्तरं वाक्यार्थज्ञानात् मुक्तिरित्युक्तावाह—ध्यानाद्यङ्गेति। ध्यानाद्यनन्तर भाविज्ञानस्य पूर्वज्ञानादधिकविषयकत्वाभावात् भूयसीनां भेदवासनाना मल्पीयसा ध्यानेन निवृत्त्यसंभवाच्च न मुक्तिसाधनत्वमिति भावः ॥ ४५ ॥ इति वाक्यार्थज्ञानस्य मोक्षोपायत्वभङ्गः।

उद्देश्यांशं त्वमाद्यं स्फुटमनुभवतां सम्यगध्यक्षवित्त्या
प्रत्यक्षत्वभ्रमोऽयं त्वमसि दशम इत्यादिवाक्यार्थबोधे।
शब्दात्प्रत्यक्षबोधे प्रसजति शिथिलता तद्व्यवस्था ततोऽर्थे
साक्षात्कारं न शब्दो जनयति विमतस्सिद्धवच्छब्दभावात् ॥४६॥

सर्वा०---प्रत्यक्षभ्रमस्य प्रत्यक्ष एव बाधक इति निर्बन्धो नेत्युक्तं, तत्सद्भावेऽपि शब्दः प्रत्यक्षरूपबाधकधीजनक इति न शक्यं कल्पयितुम्; अन्यथा क्वचिदनुमानेऽपि तत्क्लृप्तिः। न च कोद्रवबीजस्य स्वाभीष्टकलमाङ्कुरजनकत्वक्लृप्त्या तत्सिद्धिः। ननु दग्धवेत्रबीजस्य रम्भाङ्कुरारम्भकत्वं दृश्यते। यदि दृश्यते कस्तन्निषेधेत् ? अथ नेदं निदर्शनं, वाक्येष्वपि दशमस्त्वमसि, संवित् स्वप्रकाशा इत्यादिषु प्रत्यक्षधीजनकत्वं दृष्टमिति चेत् कथमेतत् ? दशमोऽहमस्मि, मम संवित् स्वप्रकाशा इति श्रोतुरपरोक्षा धीरिति चेन्न; सेयं वाक्यश्रवणानन्तरजन्या ? तन्मूलस्वयंपरीक्षणजन्या वा ? आद्ये धर्मिप्रत्यक्षत्वेऽपि दशमत्वविशिष्टवेषो न प्रत्यक्षः, अन्यथा धर्मवांस्त्वमसीति केनचिद्दैवज्ञेनोक्ते तादृशोऽहमिति बुद्धेरप्यापरोक्ष्यं स्यात्; धर्मस्यातीन्द्रियत्वान्न तथेति चेन्न; अयं पर्वतः परभागे वह्निमानित्याद्युपदेशे प्रसङ्गात्। स्वतोऽपरोक्षार्थविषयतयाऽत्र तादृशो विशेष इति चेन्न, नियमाकाभावात् दशमत्वादिविशिष्टाकारेण स्वतोऽपरोक्षत्वासिद्धेश्च। तदिह वाक्यतो दशमत्वादिबोधे त्वमर्थस्य स्फुटप्रत्यक्षगृह्यमाणतया केषांचिद्दशमत्वादिविशिष्टाकारग्रहेऽपि प्रत्यक्षत्वभ्रान्तिमात्रमित्याह—उद्देश्यांशमिति ॥

एतेन विगीतं वाक्यं स्वार्थापरोक्षधीजनकं स्वतोऽपरोक्षार्थविषयत्वात् दशमस्त्वमसीत्यादिवाक्यवदित्यनुमानमपि निरस्तम्, दृष्टान्ताद्ययोगात्। ननु घटं पश्यतोऽयं घट इति वाक्यप्रयोगेऽपि प्रत्यक्षधीर्जायत इति चेन्न, युगपत्प्रमाणद्वयेन प्रमितिद्वयोत्पत्त्ययोगात्; संभूयैकप्रमाणीभावस्यातिप्रसङ्गित्वादनभ्युपगमाच्च। क्रमे तु प्रत्यक्षज्ञानसमनन्तरभाविनि शाब्दज्ञाने प्रत्यक्षशिरस्के माषराशिप्रविष्टमषीन्यायेन तज्जातीयताभ्रमः। दशमस्त्वमित्यादावपि कदाचिदेवमेव।

प्रतिकूलतर्कमप्याह—शब्दादिति। ज्ञातकरणानां हि परोक्षधीनजनकत्वव्यवस्था शब्दप्रमाणस्याप्यन्यत्र व्याप्ताऽङ्गीकृता; तस्याः शैथिल्यं स्यात्। इष्टप्रसङ्गोऽयमिति चेन्न, तुल्यन्यायतयाऽन्यत्रापि तत्तन्नियतिविरुद्धकार्यानुमानप्रसङ्गस्यानिष्टत्वात्। विपक्षे बाधकाद्विशेष इति चेन्न, शब्दजन्यप्रत्यक्षाभावेऽपि विरोधप्रसङ्गाभावात्। *तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः इति उपदेशादपरोक्षधीः श्रूयत इति चेन्न, दृशेः प्रत्यक्षविशेषरूढत्वात्। अनुपपत्त्या साक्षात्कारसामान्यपरत्वं कल्प्यमिति चेत्, तर्हि विरुद्धक्लृप्तित्यागेन वैशद्यार्थत्वक्लृप्तिर्युक्ता। प्रतिप्रयोगमप्याह—तत इति। व्याप्तिबलादित्यर्थः। अर्थे—स्वप्रतिपाद्ये। एतेन स्वविषयसाक्षात्कारजनकतया बाधप्रसङ्गोऽपास्तः। अत्र तु विपक्षे बाधकः प्रदर्शित एवातिप्रसङ्गः।

प्रत्यक्षज्ञानहेतुत्वं यत्त्वयाऽत्र प्रसाध्यते।
निषेध्यमिदमस्माकं न नस्तच्छोधनं भरः॥ ४९॥

आनन्द०—ननु चरमज्ञानं यद्यपि नाधिकविषयं तथाप्यपरोक्षमुत्पद्यते, आद्यन्तु परोक्षमिति तन्निवर्तकं न भवतीति शङ्कासम्भवतीत्युत्थापयति—प्रत्यक्षभ्रमस्येति। तत्सद्भावे ऽपीति। तथा निर्बन्धेऽपि परस्य सुतरामनुपपत्तिरिति भावः।

अन्यथेति। तथासत्यविशेषात् अपरोक्षकार्यानुमानेनाप्यपरोक्षधीजननानुपपत्त्याऽपशूद्रनयविरोध इति भावः। अतिप्रसङ्गान्तरमप्याह—न चेति। वस्तुसामर्थ्यकल्पनस्यासम्भवादिति भावः। ननु वस्तुसामर्थ्यमेव तथा न तु तत्कल्पनमिति शङ्कते—नन्विति। यदीति। वेत्रबीजे प्रत्यक्षसिद्धत्वात्तथाऽस्तु। प्रकृते तु न प्रमाणमिति भावः। अत्रापि प्रत्यक्षमस्त्विति शङ्कते—अथेति। नेदं निदर्शनं—न इदमेव निदर्शनमित्यर्थ इत्याहुः। अन्ये तु यदीदं निदर्शनं न भवति तदाऽन्यदस्त्वित्यर्थ इत्याहुः। केचित्तु अथ इदं निदर्शनमिति पठन्ति। वाक्यं चापरोक्षज्ञानजनकमिति कथमेतन्निदर्शनमित्याह—। कथमिति।

नन्वनुभवसिद्धे कथन्ता नोपपद्यत इति दशम इति। तन्मूलपरीक्षणजन्यत्वे शब्दजन्यापरोक्ष्ये नेदमुदाहरणमिति द्वितीयविकल्पस्य स्फुटदूषणत्वात् तदुपेक्ष्य प्रथमं दूषयन् अपरोक्षाद्यविषयत्वेनापरोक्ष्यं त्वया वाच्यं, तत्र यत्किंचिदपरोक्षार्थविषयकत्वमात्रेण न ज्ञानस्य सर्वांशेऽप्यपरोक्षत्वं विवक्षितमुत यदवच्छेदेनेति विकल्पमभिप्रेत्य द्वितीयं दूषयति—आद्य इत्यादिना। दशमत्वांशेऽपि आपरोक्ष्याभावेन! परोक्षार्थविषयत्वाभावात् अन्यथा उपदेशवैयर्थ्यादिति भावः। प्रथमं दूषयति—अन्यथेति।

ननु सर्वांशापरोक्ष्यमित्यत्र योग्यसर्वार्थापरोक्ष्यं विवक्षितमिति नोक्तदोष इति शङ्कते—धर्मस्येति।

ननु स्वतोऽपरोक्षार्थविषयत्वमेवापरोक्ष्यप्रयोजकमिति न च वह्निविशिष्टप्रत्यक्षप्रसङ्ग इति शङ्कते स्वत इति। अत्र स्वतश्शब्देन ज्ञानान्तरनैरपेक्ष्यंविवक्षितमुत उद्भूतत्वे सति प्रमातृचैतन्यतादात्म्यं; नाद्य इत्याह—नियामकाभावादिति। अपरोक्षार्थविषयत्वेन ज्ञानस्यापरोक्ष्यं ब्रूथ तत्र यदि स्वत एवापरोक्ष्यं विषयस्य विवक्ष्यते, तर्हि घटादिसाक्षात्कारो न स्यात् ज्ञानापरोक्ष्यनियामकस्य स्वत आपरोक्ष्यस्याभावात् देवदत्तादिगोचरयज्ञदत्तादिज्ञानस्यापरोक्ष्यापाताच्चेति भावः। न द्वितीय इत्याह—दशमत्वादीति। वृत्तिद्वारा प्रमातृचैतन्यतादात्म्यस्य पूर्वमभावादिति भावः। ननु दशमस्त्वमसीति वाक्यजन्यज्ञाने साक्षात्वानुभवानुरोधेन किञ्चिन्नियामकं कल्प्यमित्यत्राह—तदिहेति। संसर्गाग्रहात् तत्र तथा व्यवहारो नानुभव इत्यर्थः।

ननु वाक्यस्यापरोक्षज्ञानजनकत्वे मानात्सिद्धे नासंसर्गाग्रहात् व्यवहारः कल्प्यः इत्यत्राह—एतेनेति। अपरोक्षज्ञानं प्रति विषयतया जनकत्वात् शब्दो

वाक्यमित्यादेः पक्षत्वे अंशतः सिद्धसाधनं स्यादित्यत आह—विगीतमिति। सिद्धतादृशस्यापरोक्षार्थत्वमिति भावः। स्वगोचरापरोक्षज्ञानजनकत्वात् सिद्धसाधनमित्यत्राह—स्वार्थेति। व्यवहितघटादिगोचरशब्दे व्यभिचारपरिहाराय—स्वत इति। अपरोक्षत्वं प्रत्यक्षयोग्यत्वं, स्वतस्त्वं च पूर्ववद्विवक्षितमिति भावः। व्याप्यत्वासिद्धिमाह—दृष्टान्तेति। स्वप्रतिपाद्यत्वं स्वार्थत्वं, तच्च वृत्त्या स्वजन्यज्ञानविषयत्वं, तत्त्वमसीत्यादेरपि स्वरूपलक्षणया स्वार्थत्वात् सिद्धसाधनं, शक्त्या स्वार्थत्वविवक्षायां तव मते बाधः तत्त्वमस्यादेः स्वरूपे शक्त्यभावादित्यादिकमादिशब्दार्थः। ननु अयं घट इत्यादिवाक्यमेव दृष्टान्त इत्याशङ्कते—नन्विति। तत्रापि दृष्टान्तासिद्धिरिति वक्ष्यन् किमत्र प्रत्यक्षसमानकालमेव शाब्दज्ञानमुत्पद्यते यद्वा उभाभ्यामेकज्ञानं, आहोस्वित् प्रत्यक्षानन्तरमिति विकल्पमभिप्रेत्य आद्यं दूषयति—युगपदिति। द्वितीयं दूषयति—संभूयेति। प्रत्यक्षानुमानयोरपितथाप्रसङ्गादित्यर्थः। इष्टापत्तिमाशङ्क्याह—अनभ्युपगमाच्चेति। तृतीये दूषणमाह—क्रमेत्विति। प्रत्यक्षजातीयताभ्रान्तिः। तुल्यन्यायतयेति। लोकसिद्धनियमात् क्रमे प्रमाणादप्रमाऽपिस्यात्, त्वदुक्तानुमानात् साध्याभावसिद्धिस्स्यात्, परोक्षविषयेइन्द्रियात् परोक्षज्ञानं स्मृतिविषये अनुमानादिभिः स्मृतिः, अनुभवविषये संस्कारादनुभवोऽपि स्यादिति भावः। शब्दजन्येति—विपक्षे बाधकतर्को नास्तीत्यर्थः। ननु श्रुतिरेव शब्दापरोक्षे प्रमाणमिति शङ्कते—तस्मा इति। दर्शयतीति। शब्देन प्रत्यक्षमुत्पादयतीत्यर्थः। दृशेर्विशदज्ञाने-लक्षणेति नेदं प्रमाणमित्याह—नेति। लक्षणाबीजमाह—प्रत्यक्षेति चाक्षुषज्ञान इत्यर्थः। अन्तरङ्गत्वात् साक्षात्वे लक्षणा अस्त्विति शङ्कते—अनुपपत्त्येति। तर्हि मुख्यार्थ एव सर्वापेक्षयाऽन्तरङ्गत्वात् स्वीक्रियतां, यदि बाधात् त्यागः; कैमुतिकन्यायेन साक्षात्कारस्य सुतरां त्याग इत्यभिप्रायेणाह—तर्हीति। तच्छ शब्दस्य शैथिल्यपरत्वे प्रतिपक्षानुमाने नोपयोग इत्यत आह—व्याप्त्यादीति। व्यवस्था शब्दादुपस्थितेरिति भावः।

ननु शब्दशब्दस्य स्वगोचर साक्षात्कारजनकत्वात् व्यभिचारः, स्वस्यापि शब्दस्य स्वप्रतिपाद्य स्वरूप गोचर साक्षात्कार जनकत्वात् बाधश्चेति चेन्न वृत्त्या (शब्द-अर्थ)गोचर साक्षात्कारजनकः न विषयतातिरिक्ताकारजनकत्वेन स्वगोचर साक्षात्कारजनको नेत्यर्थत्वात् न तु अपरोक्षज्ञानजनकत्वमात्रं किंतु वृत्त्या ऽपरोक्षज्ञानजनकत्वं, तथा च सिद्ध्यसिद्धिव्याघात इति चेत् तत्राह—प्रत्यक्षेति। तच्छोधनं—तन्निर्वचनम्। भवतोऽपि सिद्धसाधनाप्रसिद्धिवारणाय शाब्दवृत्तिरपरोक्षज्ञानजनिका शाब्दवृत्तिजन्यज्ञानमपरोक्षमिति वा वक्तव्यमिति तदभावसाधनं सुकरमिति भावः।

संवित् स्वप्रकाशेत्यादिदृष्टान्तासिद्धिस्तु शतदूषण्यादौ व्यक्तेति इह तदनुक्तिः। मूलं उद्देश्यतावच्छेदकं, स्फुटं प्रत्यक्षं यथा तथा अन्वभूतां, सम्य-

गध्यक्षवित्त्या—मुख्यप्रत्यक्षमिति यत् ज्ञानं दशमस्त्वमसीत्यादिवाक्यजन्यज्ञाने वर्तते तत् भ्रम एव; शब्दात् प्रत्यक्षबोध(क)स्योत्पत्तौ तद्व्यवस्था—ज्ञातकरणत्वावच्छेदेन परोक्षज्ञानजनकत्वनियमः। शिथिला प्रसजति—भग्ना भवति। ततो व्याप्तेस्सत्त्वात् विमतः तत्त्वमस्यादिशब्दः—न स्वप्रतिपाद्य वाक्यार्थापरोपक्षज्ञानजनकः शब्दभावात्—शब्दत्वात् सिद्धवत्—ज्योतिष्टोमवाक्यवदिति प्रतिरोधश्चेत्यर्थः॥ ४६॥

अक्ष०—अथ ध्यानादनन्तरभाविनः तत्त्वमसीत्यादिवाक्यजन्यवाक्यार्थज्ञानस्य पूर्वतनज्ञानात् विषयतो विशेषाभावेऽपि अपरोक्षत्वेन विशेषात् अपरोक्ष एव साधकत्वमुपपन्नमिति प्रत्यवस्थाने साधकत्वे अपरोक्षत्वमकिञ्चित्करमिति प्रागेवोक्तत्वादेव शाब्दापरोक्षमेवाप्रसिद्धमिति साधयितुं तत्रतदुक्तदृष्टान्तस्य प्रथमतोऽन्यथासिद्धिमाह—उद्देश्येति। तत्त्वमसीति वाक्यादपरोक्षं जायत इत्यत्र निदर्शनतया परैः दशमस्त्वमसीति वाक्यादपरोक्षं सिद्धवन्निर्दिश्यते तत्र—दशमस्त्वमसीति वाक्यार्थबोधे उद्देश्यांशस्य त्वमर्थस्यात्मनः स्वयंप्रकाशतया प्रत्यक्षत्वेन तत्र भातस्य दशमत्वस्यापि माषराशिप्रविष्टमषीन्यायेन प्रत्यक्षजातीयत्वभ्रम एवेत्यर्थः।

आद्यमित्यनेन संवित् स्वयंप्रकाशा इत्यत्र संविदो ग्रहणं। अनेन तत्त्वमसीतिवाक्यं—अपरोक्षधीजनकं स्वत एवापरोक्षार्थविषयकत्वात् दशमस्त्वमसीति वाक्यवत् इत्यनुमानं निरस्तम्। दृष्टान्तासिद्धेः। तत्र प्रतिकूलतर्कमाह—शब्दादिति। शब्दादपरोक्षे ज्ञातकरणानां परोक्षधीजनकत्वनियमभङ्गप्रसङ्ग इत्यर्थः। न चेष्टापत्तिः अनुमानादप्यपरोक्षापत्तेरनिष्टत्वात्। प्रत्यनुमानमप्याह— तत इति। तत्त्वमसिवाक्यं न स्वार्थसाक्षात्कारजनकं शब्दत्वात् घटोऽस्तीति शब्दवत् इत्यर्थः। अत्र पूर्वोक्तः प्रसङ्ग एव विपक्षे बाधक इति भावः॥ ४६॥

इति शाब्दप्रत्यक्षभङ्गः

शिष्यो जीवस्त्वसिद्धिः किमु तव यदि वा भ्रान्तिसिद्धो मितो वा
नासिद्धायोपदेशो भ्रमविषयमितौ नोपदेशार्हताऽस्य।
भेदेनैक्येन वाऽन्यः कथमुपदिशतु ज्ञातभेदोऽप्यभेदं
तादात्म्ये जागरूके सति किमुपदिशेत्स्वात्मने तद्विदे सः॥ ४७॥

सर्वा०—उपदेशो न प्रत्यक्षधीजनक इत्युक्तम्, स एव परस्य न घटत इति वक्तुं विकल्पयति—शिष्य इति॥ त्वन्मते वक्तुं श्रोता किमप्रतीतः, प्रतीतो वा भ्रान्तिसिद्धः, प्रमितिसिद्धो वेति विकल्पः। अत्राद्यं निरस्यति—नासिद्धायेति। अप्रतीत्य शिष्यं कस्मै उपदिशेत्? द्वितीयं दूषयति—भ्रमेति। यदि शिष्यं भ्रान्तिसिद्धत्वेन न जानाति, स्वयमतत्त्ववित्कथं तत्त्वोपदेष्टा? अथ तथा प्रमिणोति,

तथाऽपि तस्मै कथमुपदिशेत् ? न ह्यसावुपदेशग्रहणार्हः, स्वयमपि नोपदेष्टृत्वार्हः। अस्येत्युभयार्थम्। एतेन प्रतिबिम्बवद्बाधितानुवृत्त्या प्रतीयमानेऽस्य उपदेश इत्यपि निरस्तम्; तद्वदेवोपदेशानर्हत्वात्। न चानुन्मत्तः प्रतिबिम्बाय प्रब्रूते। तृतीयं विकल्पयति—भेदेनेति। आद्ये विरोधमाह—कथमिति। भेदप्रमितावभेदमुपदिशन् कुहकः स्यात्। द्वितीयेऽपि प्राग्वदसंभवमाह—तादात्म्य इति। अद्वैतप्रमितिदशायां स्वभ्रान्तिसिद्धशिष्यो हि बाधितः, स्वतादात्म्येन वा भातः; तस्मै चेदुपदिशेत् स्वात्मानं प्रति नित्यमुपदिशेत्; शिष्यस्य हि स्वतादात्म्यं पश्यन् तस्यापि तत्त्ववित्त्वं पश्यति; तथा च तस्य किमुपदिशेदिति भावः ॥ ४७ ॥

आनन्द०—प्रसङ्गसङ्गतिरित्याह—उपदेश इति। अप्रतीत्येति। अनुन्मत्त इति शेषः। भ्रान्तिसिद्ध इत्यत्र भ्रान्तिसिद्धत्वेन प्रतीतमुताप्रतीतमिति विकल्पभिप्रेत्य प्रथमं दूषयति—यदीति। तथा चाद्वैतज्ञानाभावेन किमुपदिशेदिति भावः। द्वितीयं दूषयति—अथेति। मिथ्यावस्तुनोऽर्थक्रियायोगाभावादुपदेशवैयर्थ्यात् तज्जानतः कथं तत्र प्रवृत्तिरितिभावः। उभयार्थमिति। अस्योपदेष्टुस्तदर्हता न स्यात् तस्य शिष्यस्योपदेश्यता न स्यादिति शिष्याचार्योभयार्थमित्यर्थः। प्रब्रूतइति तथा सति प्रयोजनमनुद्दिश्येति न्यायेन लोकोत्तरत्वं स्यादिति भावः। कुहकः—विप्रलम्भकः। प्राग्वदिति। मिथ्यात्वेन प्रमितावुपदेशानुपपत्तिवदित्यर्थः। असम्भवमुपपादयति—अद्वैतेति। अन्तःकरणस्य बाधितत्वात् चैतन्यांशस्य स्वाभिन्नत्वान्नोपदेश इति भावः॥ ४७॥

अक्ष०—परमते उपदेशानुपपत्तिमाह—शिष्य इति। शिष्यः किमज्ञातः अथवा भ्रान्तिसिद्धः आहोस्वित् प्रमितोवेति विकल्प्य आद्ये दोषमाह नासिद्धयेति नह्यनुन्मत्तः कश्चित् अज्ञाताय उपदिशेदित्यर्थः भ्रान्तिसिद्ध इति कल्पेऽपि अयमेव दोष इत्याह भ्रमेति। न हि भ्रमविषयस्य प्रतिबिम्बस्य (तत्प्रत्यक्षस्य ? वा कस्यचित् प्रेक्षावतः उपदेशार्हताऽस्तीति भावः। चरमकल्पं विकल्प्य दोषमाह—भेदेनेति। भिन्नत्वेन प्रमितत्वे अभेदोपदेशो न सङ्गतस्स्यात् अभेदेन प्रमितो यथा स्वस्मैनोपदिशेत् तथा शिष्यायापि नोपदिशेत् स्वस्येव स्वाभिन्नशिष्यस्याप्यभेदज्ञानस्य सिद्धत्वादिति भावः॥ ४७॥ इत्यात्मऽद्वैतिन उपदेशानुपपत्तिः।

नैवालं भ्रान्तिबाधे परमपि तदिदं तत्त्वमस्यादिवाक्यं
भ्रान्तोक्तिर्यद्वदादौ श्रुतिकृतनिखिलभ्रान्तिमूलत्वबोधात्।
रज्जौ सर्पभ्रमे किं जनयति विदितभ्रान्तवाक्सर्पबाधं
स्वप्नेऽहिः स्वप्नबुद्धया किमु गलति यदा तत्र च स्वाप्नताधीः॥४८॥

सर्वा०—यदपि वर्ण्यते—अद्वैतवाक्यजन्यधीरेवाविद्यातत्कार्यंकृत्स्नाध्यास-बाधिका, प्रत्यक्षादेर्भेदवासनामूलतया भेदस्वरूपमात्रबोधकत्वात् *तत्त्वमस्यादीनां तु तत्त्वावेदकत्वात्। पूर्वा च भेदबुद्धिः परा त्वद्वैतबुद्धिः, अतः अपच्छेदनयात्पूर्वं-बाधः; आहुश्च *पूर्वबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यति इति। एवं तत्त्व-ज्ञानादज्ञानबाध एव मुक्तिरिति। तन्निरस्यति—नैवेति ॥ तदिदमित्यविद्या-मूलत्वाभिप्रायम्। न हि भवति पौर्वापर्यमात्राद्बाधकाभावः; अतिप्रसङ्गात्, उपक्रमनये च वैपरीत्यात्, अद्वैतवाक्यनामपि माध्यमिकवाक्येन बाधप्रसङ्गात्। करणदोषतदभावाभ्यां विशेष इति चेन्न, प्रत्यक्षादिष्वपि तदभावात्। प्राचुर्येण दोषमूलत्वदर्शनादन्येष्वप्यनाश्वास इति चेन्न, वाक्येऽपि समत्वात्, अविद्या-भेदवासनामूलत्वस्य चाविशेषात्। समानदोषेष्वपि भ्रमेषु परं बाधकं दृष्टमिति चेन्न; तथात्ववेदने तदयोगात्तत्र सन्देह एव स्यात्। नित्ये वेदवाक्ये कारणदोष एव नेति चेन्न; वक्तृदोषाभावेऽप्यविद्यादोषमूलत्वस्य त्वयैवोक्तेः। अत्र प्रसङ्गे दृष्टान्तमाह—भ्रान्तेति। भ्रान्तोक्तेरबाधकत्वं भ्रान्तिमूलत्वेन ज्ञातत्वादिति चेन्न, अविशेषात्—आदाविति। प्रथममेव प्रयोजकशिक्षया ब्रह्मव्यतिरिक्तं कृत्स्नं मिथ्येति श्रवणात्। ततश्च प्रत्यक्षधीजननार्थः प्रयासः; तज्जनने कुहक-शक्तिजनितप्रत्यक्षबुद्धाविव विश्वासश्च न स्यात्। भ्रान्तिसिद्धवाक्यादपि पूर्वभ्रान्तिनिवृत्तिस्तत्फलनिवृत्तिश्च दृष्टेत्यत्र तदुभयमिह न संभवतीत्याह—रज्जावित्यादिना पादद्वयेन। भ्रान्तोऽयमिति विदितेन नायं सर्प इत्युक्तेऽपि न विस्रम्भः; स्वप्नसर्पभ्रमजनितं साध्वसं नायं सर्प इति स्वप्नभ्रमेण न शाम्यति यदा स्वप्नसर्पनिषेधेऽपि स्वाप्नबुद्धिर्जायेत, अतो न वाक्याद् भ्रमनिवृत्तिः; तत्फलनिवृत्तिश्चात्र वक्तुं न शक्यत इति।

भ्रान्तिसिद्धं च धूमादिस्वरूपा सिद्धिदोषतः।
यदृच्छयाऽर्थसद्भावेऽप्यमानमनुमन्यसे ॥ ४८ ॥

आनन्द०—प्रसङ्गसङ्गतिरित्यभिप्रायेणाह—यदपीति। अद्वैतेति। तत्त्व-मस्यादिवाक्यार्थज्ञानं मोक्षस्य साधनमिति भवदुक्तेरित्यर्थः। ननु प्रत्यक्षप्रमाण-सिद्धस्य परोक्षं कथं बाधक मित्यत्राह—प्रत्यक्षादेरिति। दोषमूलत्वेनाप्रमाणत्वात् त्रिकालाबाध्यत्वरूपसत्त्वाद्यविषयत्वाच्चेति भावः। तत्त्वमस्यादीनामिति। प्रमाणत्वादित्यर्थः। अपच्छेदनयादिति। ज्योतिष्टोमबहिष्पवमानं प्रसर्पतां उद्गात्रपच्छेदे 'यदि उद्गाताऽपच्छिद्येत अदक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेत' इत्यनेन जातोद्गात्रपच्छेदे निमित्तकर्तव्यता बुद्धिः, पश्चात् प्रतिहर्त्रपच्छेदे सति 'यदि प्रतिहर्ताऽपच्छिद्येत सर्ववेदसं दद्यात्' इत्यनेन जातया तद्विरुद्ध प्रतिहर्त्र-पच्छेदनिमित्तप्रायश्चितकर्यव्यताबुद्धया बाध्यते। एवं घटादिभेदप्रत्यक्षं अद्वैत-वाक्यजन्मबुद्धया बाध्यत इत्यर्थः। आहुश्चेति। मीमांसका इति शेषः।

नन्वेवमपि वाक्यजन्यज्ञानान्मुक्तिरिति भवन्मतं न साधितं स्यादित्यत्राह—एवमिति। अविद्या मूलत्वेति। तच्छब्दस्य प्रसिद्धार्थकत्वादिति भावः। अतिप्रसङ्गादिति। रज्जौ रज्जु ज्ञानानन्तरसर्पभ्रमादपि तत्प्रमाबाधप्रसङ्गादित्यर्थः। उपक्रमनये चेति। 'त्रयो वेदा अजायन्त' 'अग्ने ऋग्वेदः' वायोर्यजुर्वेदः' 'आदित्यात् सामवेदः' इत्युपक्रम्य उच्चैर्ऋचा क्रियते 'उपांशु यजुषा' 'उच्चैस्साम्ना' इति वाक्ये उपक्रमानुरोधात् मन्त्रवाचकानां ऋगादिशब्दानां स्वार्थपरित्यागेन वेदपरत्वमिति सिद्धान्तः। तत्र परस्तात् पूर्वस्य प्राबल्यं सिद्धमिति श्रुत्यपेक्षया प्रत्यक्षं बाधकं स्यादित्यर्थः।

ननु वाक्य एवोपक्रमन्यायः अत्र कथं प्रवर्तत इति चेत् तस्यापच्छेदनस्यापि तद्विषयत्वेन तुल्यत्वमिति भावः। यदि तथा निर्बन्धस्तदा दोषमाह—अद्वैतवाक्यानामिति। माध्यमिक सर्व[निषेधक प्रतियोगि]प्रतियोगिक निषेधवाक्यस्य प्रतियोगि समर्पकाद्वैतवाक्यतोऽपि परत्वादीति भावः। तर्हि पौर्वापर्यस्याप्रयोजकत्वा न्नापच्छेन्यायावसर इति दोषस्य स्फुटत्वात् दोषान्तरमाह—प्रत्यक्षादिष्विति।

ननु प्रत्यक्षत्वस्य बहुशो दोषमूलत्वस्य साहचर्यदर्शनेन सर्वत्राप्यनुमीयत इति शङ्कते—प्राचुर्येणेति। दूषणान्तरमाह—अविद्ये ति।

ननु समानत्वेऽपि भूदलनाम्बुधाराभ्रमानन्तरं तत्रैव सर्पभ्रमेणाम्बुधाराभ्रमबाधो दृष्ट इति शङ्कते—समानेति। तत्र मूलदोषत्वेनोभयज्ञानमस्ति न वेति विकल्प्य आद्यं दूषयति तथात्वेति। भ्रमत्वेन ज्ञातपरामर्शद्वयवदिति भावः। द्वितीयं दूषयति तत्रेति। सत्प्रतिपक्षस्थलवदिति भावः।

ननु दोषमूलत्वेन ज्ञातो यो बाध्यबाधकभावः मास्तु सः। प्रत्यक्षस्य दोषमूलत्वसंदेहात् आगमस्य तदभावत्वनिश्चयात् तद्बाधकमस्त्विति शङ्कते—तत्रेत्यादिना। वक्तृदोषेति। नह्येकदोषाभावमात्रं प्रयोजकमतिप्रसङ्गादिति भावः। अविशेषादिति। दोषमूलत्वेन ज्ञातत्वस्याविशेषादित्यर्थः। प्रयोजकशिक्षा—गुरुमुखाधीनश्रवणं प्रत्यक्षेति। तदर्थं निदिध्यासने प्रवृत्तिस्स्यादित्यर्थः। ततश्च प्रत्यक्षज्ञानस्य जनने—उत्पत्तौ। एवमप्यैन्द्रजालिकत्वेन कुहकत्वेन ज्ञातशक्तिजनितप्रत्यक्षभ्रमइव तत्प्रत्यक्षे विश्वासाभावात् ततो भेदनिवृत्तिर्न स्यादित्यत्राह—तज्जनन इति। भ्रान्तिसिद्धेति। भूदलने सर्पत्वेन भ्राम्यतः त्रस्यतः पलायमानस्य विमर्शाभासेन रज्जुरिति भ्रान्तवाक्यान्निवृत्तेरनुभवसिद्धत्वादिति भावः। स्वप्ने सर्पभ्रमेति। स्वपतः स्वप्नएव सर्पभ्रमतो नायं सर्प इति स्वाप्नपुरुषोदीरितेन स्वप्न एव स्वप्नत्वेन ज्ञातेन वाक्येन भ्रमनिवृत्तिः नास्तीत्येतस्यानुभवसिद्धत्वादित्यर्थः। भ्रमनिवृत्तिः—प्रपञ्चाध्यासनिवृत्तिः—तत्फलनिवृत्तिः—रागद्वेषादिनिवृत्तिः।

ननु दोषजन्यत्वेऽपि विषयाबाधेन प्रमात्वात् प्रमाणत्वमेव बाधकत्वे न प्रयोजकमित्यत्राह—भ्रान्तिसिद्धं चेति। यथा यादृच्छिकसम्वाद्यनुमानस्य विषयाबाधेऽपि दोषमूलत्वादप्रमाणकोटिनिवेशस्तथा शब्दोऽपि न प्रमाणमेवेति भावः॥ ४८॥

अक्ष०—तत्त्वमसीति वाक्यजन्यधिया परोक्षरूपया वाऽपरोक्षरूपयापि वा भेदप्रपञ्चभ्रमो न बाधितुं शक्य इत्याह—नैवेति। तदिदमविद्यामूलकं तत्त्वमस्यादिवाक्यं अद्वैतबोधकं द्वैतप्रमाणापेक्षया परमपि पश्चात्तनमपि द्वैतभ्रमबाधे समर्थं नैव भवेदित्यर्थः। पौर्वापर्यमात्रेण बाध्यबाधकभावोपगमे माध्यमिकवाक्येन ब्रह्मैक्यवाक्यस्यापि बाधः प्रसज्येतेति भावः। अत्र दृष्टान्तमाह—भ्रान्तोक्तिरिति। तत्त्वमस्यादिवाक्यस्य वेदवाक्यत्वात् भ्रान्तोक्तित्वं नेत्यत्राह—आदाविति। प्रथममेव ब्रह्मव्यतिरिक्तं कृत्स्नं मिथ्येति श्रवणात् ब्रह्मव्यतिरिक्तत्वस्य मिथ्यात्वप्रयोजकस्य वेदवाक्येऽपि सत्त्वावगमादिति भावः।

क्वचित् भ्रान्तवाक्यादपि पूर्वभ्रमनिवृत्तिर्दृश्यत इत्यत्राह—रज्जाविति। भ्रान्तोऽयमिति विदितस्य पुंसः नायं सर्प इति वाक्यं सर्पबाधं न जनयतीत्यर्थः। तत्र दृष्टान्तमाह—स्वप्नेति। सर्पस्वप्ने सति नायं सर्प इत्यनन्तरजातेन स्वप्नान्तरेण स्वप्नत्वेन ज्ञातेन प्रथमस्वप्नजातभयादिकं न निवर्तत इति भावः। एतदुक्तं भवति बाध्यबाधकभावे दोषमूलत्व-तदभावावेव प्रयोजकौ, प्रपञ्चप्रत्यक्षादेः संप्रतिपन्नदोषमूलकत्वाभावात् न बाध्यत्वं भवदुक्तदोषमूलकत्वस्य शास्त्रस्याप्युपगमात् न बाधकत्वमिति॥ ४८॥ इति तत्त्वमस्यादेःप्रपञ्चबाधभङ्गः

छायादिर्न त्वसत्यस्सदवगतिकरस्तत्र हेतुर्हि तद्धी-
स्साध्यज्ञप्त्यादिवत्सा स्वयमिह न मृषा नास्ति धीरित्यबाधात्।
सत्येनैव प्रसूता घट इव विमता शेमुषी कार्यभावा-
द्धेतुत्वालीकभावौ कथमिव विहतावेकमेवाश्रयेताम्॥ ४९॥

सर्वा०—ननु व्यावहारिकमर्यादातिक्रमाल्लिङ्गविभ्रमे प्रामाण्यानादरः, इह तु न तथा; प्रागद्वैतबोधाच्छास्त्रे सत्यत्वाध्यवसायात्। असत्याच्च सत्यधीर्दृष्टा यथा दर्पणादिस्थया छायया मुखादेस्सिद्धिः, भूतलस्थया, च गृध्रादेः। सन्ति चैवं बहून्युदाहरणानि। असत्यादपि भयविस्मयादि सत्यं कार्यं दृश्यते। अतो मिथ्याभूतादपि *तत्त्वमस्यादिवाक्यात्तत्त्वप्रतीतिर्मुक्तिश्च युज्यत इति। तत्राह—छायादिरिति॥ न हि मिथ्याभूतं प्रतिबिम्बादि मुखादिधीजनकम्, दर्पणे मुखप्रतीतेर्दोषमूलत्वात्। परमार्थमुखप्रतीतेस्तु मुकुरविहितमिहिरकिरणन्यायेन प्रतिफलितनायनकिरणजन्यत्वात्। स्वरूपच्छायया गृध्राद्यनुमानेऽपि नासत्यात्सत्यधीः। छायास्वरूपस्य सादृश्यस्य च निर्बाधत्वात्। मिथ्याभूतस्य च छायागृध्रस्य कार्यकरत्वे शुक्ति-

रूप्यादेरपि रजतादिकार्यं किं न स्यात्? युष्मद्दृष्टया च विमृशामः—किं प्रतिबिम्बादिस्वरूपमेव सत्यधीहेतुः? उततद्धीः? नाद्यः, प्रातिभासिकसतोऽर्थक्रियाहेतुत्वानभ्युपगमात्। न द्वितीयः, तद्बुद्धेस्सत्यत्वेन सत्यादेव सत्यसिद्धेः। तदिदमभिप्रेत्याह—तत्रेति। एतेनासत्यात्सत्योत्पत्तिरपि निरस्ता। कस्तर्हि भयादिहेतुरिति? तत्राप्येतदेवोत्तरम्—तत्रेति—यत्रासत्यात्सत्योत्पत्तिं वदसि तत्रेत्यर्थः।

ननु यदि धीः स्वरूपमात्रेण कार्यविशेषहेतुस्स्यात् बुद्ध्यन्तरेऽपि तत्प्रसङ्गः, अविशेषात्। अथ विषयविशिष्टो हेतुस्तदा विषयस्यापि हेतुत्वं दुस्त्यजम्; तत्राह—साध्येति। यथा साध्यघटादिबुद्ध्या तन्निर्माणे बुद्धेरेव कारणत्वं न तद्विषयस्य, सिद्धत्वे साध्यत्वस्य असिद्धत्वे हेतुत्वस्यायोगात्, अन्यथाऽऽत्माश्रयोच्छेदप्रसङ्गात्, तद्वदिहापि विषयस्यासिद्धत्वान्न हेतुत्वम्। आदिशब्देनातीतज्ञप्तिः। कामना च गृह्यते। नष्टधीरपि यथाहं तत्तत्कारणम्, न तु नष्टम्; पूर्वत्वेऽप्यनन्तरपूर्वत्वाभावात्। स्वर्गादिकामनाऽपि तदुपायनिष्पत्तिहेतुः न तु काम्यम्, चक्रकापत्तेः। तद्वदिह भ्रान्तिसिद्धस्याहेतुत्वेऽपि तद्धियस्तदुत्पत्तिः।

अथ स्यात् विषया हि बुद्धिरध्यस्यते; अतः कथं विषयस्य मिथ्यात्वे विषयिणस्सत्यत्वमिति? तदेतत्स्वाभीष्टं विश्वसाक्षिणं पृच्छ। अथ सोऽपि मिथ्याभूतः; तन्न, स्वतस्सिद्धौ तदयोगात्; अन्यथा तत्साक्ष्यन्तरापेक्षणेऽनवस्थादिप्रसङ्गात्। विषयमिथ्यात्वे च व्यवहारसत्यत्ववद्धीसत्यत्वं चाविरुद्धम्। एतदभिप्रेत्याह—सेति इह—अन्यस्मिन्नन्यथा बुध्यमाने। सा—धीः स्वयं न मृषा—विषयतस्तु कदाचित्तथात्वोपचारः। तदेतद्बाधकवृत्तान्तेन व्यनक्ति—नास्तीति। धीर्नास्तीत्येवंरूपस्य बाधस्याभावादित्यर्थः। आरोपितं हि नञाऽन्वेति, न त्वारोपः। नास्तिधीविषयत्वाभावे ह्यसद्व्यवच्छित्तिस्स्यात्, न त्वनिर्वचनीयत्वहानिरिति चेन्न; ब्रह्मण्येवं प्रसङ्गात्। अथास्तिधिया तत्सत्त्वं, प्रकृतेऽपि समम्। माभूदसत्यात्सत्यसिद्धेः साधनम्, त्वदिष्टस्य किं साधकमित्यत्राह—सत्येनेति। अन्तःकरणादिभिस्सिद्धसाधनत्वमवधारणेन व्युदस्यते। अत्र व्यवच्छेद्यसिद्ध्यसिद्ध्योर्विरोध इति चेन्न; स्वोत्पादकतयाऽवधृतसामर्थ्यसंप्रतिपन्नसत्यवर्गातिरिक्तजन्यत्वनिषेधे प्रतियोगिसिद्धेः। तथाऽप्यस्मदिष्ट शृङ्गग्राहिकया न निषिद्धमिति चेत्, त्वयाऽपि वा किं तथा विहितम्? तथा हि—असत्यात्सत्यसिद्धिं वदद्भिरप्यसत्यमिथ्यालीकादिशब्दाः किं क्वचिद्व्युत्पन्नाः प्रयुज्यन्ते? अव्युत्पन्ना वा? पूर्वत्र स्वदेशादिषु सतामेवान्यत्रारोप्यमाणतया बाध्यमानतया चासत्यादिशब्दवाच्यत्वमिति नासत्यात्सत्यसिद्धिः। उत्तरत्र परानभीष्टं न किंचित्कारणमुक्तं स्यात्।

यद्वा प्रतीतप्रतियोगिकनिषेधस्य त्वदिष्टत्वात् त्वद्वाक्यप्रतीतं व्यवच्छेद्यं त्वया चैवमनुमातुं शक्यमिति प्रसङ्गे तात्पर्यम्; यक्षानुरूपो बलिः; पिशाचानां

पिशाचभाषयैवोत्तरं देयमिति न्यायाच्च। प्रातिभासिकसतश्च हेतुत्वाभ्युपगमे कथमसतोऽपि न हेतुत्वम् ? तदपि हि कुतश्चित्प्रतिभासते। न ह्यस्ति खपुष्पं दर्पणमुखमित्यनयोर्विशेषः। अत्र व्याघातं च विपक्षे बाधकमाह—हेतुत्वेति। अनर्थक्रियाकारित्वात् प्रातिभासिकानामसत्यत्वम्। तानि चेद्धीरूपार्थक्रियां कुर्युः, कथं तेषामलीकत्वम् ? ननु सर्वस्यापि सत्यानृतमिथुनादुत्पत्तौ साध्यनिकलो दृष्टान्तः। मैवम्, घटाद्युत्पादकमृदादेर्व्यावहारिकसत्यत्वाभ्युपगमात्। तदपेक्षया *मृत्तिकेत्येव सत्यम् इत्यादिश्रुतिनिर्वाहाच्च। अनुमानमप्यत्र तावता निष्प्रतिघमिति

सत्यधीर्मम सत्येन तवासत्यादसत्यधीः।
सत्यादसत्यधीर्वेति क्वासत्यात्सत्यधीर्भवेत्॥ ४९॥

आनन्द०—आक्षेपसङ्गतिं दर्शयति—नन्वित्यादिना। व्यावहारिकेति व्याप्तिमत्वेन प्रामाण्यमिति नियमात्तदतिक्रमादित्यर्थः।

ननु भ्रमादिमूलत्वाभावेऽप्यसत्यताबुध्या बोधकत्वं न स्यादित्यत्राह—प्रागिति एवञ्च प्रमाणत्वाद्बाधकत्वं युक्तमिति भावः।

ननु वस्तुतो मिथ्यात्वात्कथं सत्यधीजनकत्वमित्यत्राह—असत्याच्चेति। यथेति दर्पणादिमुखच्छायया प्रतिबिम्बेन सत्यमुखज्ञानमित्यर्थः। भूतलेति गृध्रच्छायया नभस्स्थगृध्राद्यनुमितिरित्यर्थः। बहूनीति बाष्पधूमस्यासत्यस्य वह्निसाधकत्वं यथाऽतथाऽसत्यस्फटिकलौहित्यादेर्जपादिसन्निधानरूपदोषसाधकत्वमित्यादीनीत्यर्थः। किञ्च न केवलमसत्यात्सत्यविषयिणी बुद्धिरेवापि त्वसत्यात्सत्यमप्युत्पद्यत इत्याह—असत्यादपीति मिथ्यासर्पाद्भयमैन्द्रजालिकनगरादितोऽपि विस्मयः शङ्काविषान्मरणं विषहरणादिरादिशब्दार्थः। अत्र किं लोकमर्यादयोच्यते यद्वा भवन्मतरीत्या ? नाद्य इत्याह नहीति। किमत्र सत्याम्बुद्धिमुत्पादयत्युत सत्यगोचराम् ? नाद्य इत्याह—मिथ्याभूतमिति। तत्र हेतुर्दर्पण इति दोषस्यासत्यत्वादिति भावः। द्वितीयं दूषयति—परमार्थेति करणस्य सत्यत्वादिति भावः।

ननु लिङ्गकरणतापक्षे छायया गृध्राद्यनुमितावसत्यविषयकधीरुत्पद्यत इत्यत्राह—स्वरूपेति वस्तुतो लिङ्गस्य हेतुत्वं तद्धेतुत्वेऽपि न दोष इति भावः। द्वितीयन्दूषयति—युष्मदिति सत्यविषयकधीः सत्यधीः। तत्सिद्धिरिति सत्यगोचरबुद्धिसिद्धिरित्यर्थः। एतेनेति मुक्तिश्च युज्यत इत्येदपि निरस्तमित्यर्थः। एतदेवोत्तरमिति सर्पादिबुद्धेः सत्याया हेतुत्वमित्येतदित्यर्थः। प्रसिद्ध्यभिप्रायेणाह—यत्रेति। बुध्यन्तेरऽपीति सर्पबुद्धिवत्साध्यादिबुद्धावपीत्यर्थः। अथेति सर्पादिविषयोपलक्षितेत्यर्थः। अतीतज्ञप्तिरतीतज्ञानम्। कामना स्वर्गादिफलेच्छा। तस्याः प्रवर्तकत्वादिति भावः।

ननु पूर्ववृत्तित्वाभावाद्भाविनो हेतुत्वं दृष्टमित्यतः कथं न तद्धेतुत्वमित्यत्राह—पूर्वभावेऽपीति अन्यथा चिरध्वस्तस्य वह्न्यादेर्दाहापत्तिरिति। चक्रकापत्तेरिति स्वर्गादिर्यागादिस्तस्मादपूर्वन्ततः स्वर्गादीति चक्रकमित्यर्थः। तद्वदिति तद्विषयकबुद्धेर्हेतुत्वान्नातिप्रसङ्ग इत्यर्थः।

नन्वत्र ज्ञानं वृत्तिरेव। सा च विषयमिथ्यात्वे मिथ्यैवेति तद्धेतुत्वेऽप्यसत्यात्सत्यसिद्धिरस्त्येवेति शङ्कते—अथ स्यादिति अर्थाध्यासो हि सविषयकज्ञानाध्यास एवेति भावः। स्वाभीष्टमिति नार्थाध्यासो ज्ञानाध्यासनियतस्तथात्वे विश्वाद्यध्यासे तत्साक्षिणोऽप्यध्यासापत्तिरिति भावः। सोऽपि साक्ष्यपि स किं स्वेनैवाध्यस्तोऽन्येन वा? नाद्य इत्यत्राह—स्वतः सिद्धावपीति द्वितीयन्दूषयति अन्यथेति अध्यासस्याध्यासान्तरापेक्षायां तस्यापि तथेत्यनवस्थेत्यर्थः। अप्रयोजकत्वञ्चाह—विषयेति।

ननु तत्र मिथ्यात्वव्यवहारः कथमित्यत्राह—विषयतस्त्विति ननु धियो मिथ्यात्वाभावे किम्प्रमाणमित्यत्राह—तदेतदिति वाधाभावादिति भावः।

नन्वेवमपि सत्ये प्रमाणं नास्तीत्यत्राह—बाधकवृत्तान्तम्बाधस्वरूपमित्यर्थः।

ननु रजतं नेति रजतबुद्धेरपि वाधोऽस्त्वित्यत्राह—आरोपितमिति पदार्थस्य पदार्थेनान्वयाद्धियः पदादनुपस्थितेरिति भावः।

नन्वेवमपि सत्ये प्रमाणं नास्तीति शङ्कते—नास्तीति। असद्व्यवच्छित्तिरिति तुच्छव्यावृत्तिः। ब्रह्मणः सत्यत्वे प्रमाणमेवात्रापि प्रमाणमिति ग्रन्थाभिसन्धिरित्याह—ब्रह्मण्येवमिति। अभिसन्धिमुद्घाटयति—प्रकृतेऽपीति असत्यात्सत्यत्वस्य व्यवच्छेद्यत्वादिति भावः।

नन्वसत्यादेवेत्यत्र सत्यत्वं व्यवच्छेद्यमस्तु, न चासिद्धिसिद्धिव्याघातोऽसत्यस्य सिद्धत्वेऽपि तज्जन्यत्वस्यासिद्धेरिति चेन्न। तत्सिद्धौ तज्जन्यत्वस्याप्यवर्जनीयत्वादिति तात्पर्यम्। अत एव स्वकरण[वाग्भेद]वाग्धेतुसाधनं विहाय परिहारान्तरमाह—स्वोत्पादकतयेति निषेध्यमन्यसामग्र्या प्रसिद्धमिति भावः। तथाऽपीति भवत्साधनेऽसत्यात्सत्यसिद्धिरिति तत्प्रकारकप्रतीतिर्नास्तीति भावः। त्वया यत्प्रकारेण साध्यते तत्प्रकारेण निषिध्यत इति समाधत्ते—त्वयापीति सम्प्रतिपन्नकारणवर्गातिरिक्तजन्येति साधनीयमिति भावः।

नन्वसत्यात्सत्यं सिध्यतीति साध्यते निषेध इव विरोधाभावादित्यत्राह—उत्तरत्रेति निरर्थकपदघटितप्रतिज्ञावाक्यघटितप्रतिज्ञादिवाक्यप्रयोगे निरर्थकादिदोषश्च स्यादित्यर्थः। त्वत्पक्षानुसारेण तथासाधने दोषाभावाभिरनुयोज्यानुयोगोऽपीत्याह—यद्वेति।

ननु, तत्र सत्यताप्रसङ्गादसतो ज्ञानाभावादित्यत आह—**त्वयेति** तव व्याप्यद्वयज्ञाने सत्प्रतिपक्षो बाधो वा स्यादिति भावः। परपक्षानुसारेण किमर्थमेवं क्लिश्यत इत्यत्राह—**तथा हीति**। **यक्षेति**।

नन्वसतोऽप्रीतत्वान्नकारणताग्रहकमस्तीति न तथ्य कारणत्वमित्यत्राह—**तदपि हीति** 'खपुष्प' मिति वाक्यादित्यर्थः। **न ह्यस्तीति** निषेध्यस्य 'तुल्यत्वा-दित्यर्थः। **अनर्थक्रियाकारित्वादर्थ** क्रियाकारित्वाभावात्। **कथमिति** अर्थक्रिया-कारिणः पारमार्थिकभिन्नस्य व्यावहारिकत्वनियमादिति भावः। **अलीकत्वं**-प्रातिभासिकमनृतमित्यर्थः। **तदपेक्षयेति** तथाचापसिद्धान्त इति भावः।

ननु तथाऽपि पारमार्थिकत्वाभावादसत्यात्सत्यसिद्धिरस्तीति कथं दृष्टान्ता-सिद्धिरित्याह—**तावतेति** परं प्रति हि त्वया साधनीयम्। तत्र त्वद्रीत्या मृदसत्या चेत्तद्रीत्यैव घटस्याप्यसत्यतेति कथमसत्यात्सत्यसिद्धिः? यदि पररीत्या घटस्य सत्यता तदा मृदपि सत्येति नानुमानसिद्धिरिति भावः। किंचासत्यात्सत्य-साधनं वादिमतानुसारेणाहोस्वित्स्वन्मतानुसारेणेति विकल्प्याद्यं दूषयति—**सत्यधीरिति**। द्वितीयन्दूषयति **तवासत्यादिति** असत्यबुद्धिं प्रत्यपि सत्यमेव कारणम्। किं पुनः सत्यबुद्धिम्प्रतीत्यभिप्रायेणाह—**सत्यादिति**।

नन्वसत्यादपि सत्यसिद्धिर्दृष्टा। स्वाप्नजलावगाहात्सुखस्य सत्यस्योत्पत्तेः। तथा स्वाप्नेन वह्निस्पर्शेन दुःखस्य, तथा स्वाप्नगजादिदर्शनेन विस्मयादेः, तथा स्वाप्नमन्त्रोपदेशान्मन्त्रसिध्यादेः। न च तत्र ज्ञानं कारणमिति वक्तुं शक्यं; जलादिसंयोगस्यैव हेतुत्वेन तज्ज्ञानस्याहेतुत्वात्। स्वाप्नगजादिज्ञानस्य हेतुत्वेऽपि तस्य चाक्षुषादिवृत्तित्वेनाध्यस्तत्वात्तदानीञ्चक्षुरादेर्निर्व्यापारत्वात्तदातनचक्षुषोऽ-प्यध्यासवृत्तेः सुतरामसत्यता। किं चापवरकान्मध्याह्ने गृहं प्रविष्टस्य कल्पित-तमसा ज्ञानप्रतिबन्धादेर्दर्शनादसत्यात्सत्यसिद्धिरित्यत्राह—**क्वासत्यादिति**। अयम्भावः—तत्रापि जलसंयोगज्ञानेन शैत्यादिज्ञानं जायमानं हेतुर्न तु संयोगः। न च सत्यस्थले तथा दर्शनात्तथेति वाच्यम्। तथा सति क्लेदादिप्रसङ्गात्। यदि सत्यसंयोगत्वेन क्लेदादिहेतुत्वं तदा तद्वारकसुखमपि तथैवान्यथाऽतिप्रसङ्गात्। न च चाक्षुषादिवृत्तेः कल्पितत्वादसत्यात्सत्यसिद्धिः। तत्रापि साक्षात्कारस्यैव हेतुत्वात् चाक्षुषत्वस्य प्रयोजकत्वादन्यथा सत्यस्य ज्ञानस्यैवाभावेनाध्यासस्यैवा-योगात्। मन्त्रादावपि तज्ज्ञानमेव हेतुस्तच्च सत्यमेव। यदपि किञ्चेत्यादि तत्रापि सौरालोकदर्शनादिदोषेण चाक्षुषरश्मीनां विशीर्णानां संहत्यावृत्तेः रूपाद्यग्रहणमिति न तत्र प्रतिबन्धकत्वम्। यदि तत्रावश्यम्प्रतिबन्धकस्तदा तमोऽध्यासहेतुदोषस्यैव प्रतिबन्धकत्वमिति नात्रासिद्धिरिति॥ ४९॥

अक्ष०— शास्त्रस्य भ्रान्तिसिद्धत्वेऽपि तेन मिथ्याभूतेन दर्पणादिस्थेन प्रतिविम्बादिना सत्यभूतमुखादेरिव सत्यभूतस्याद्वितीयब्रह्मणः सिद्धौ ततः द्वितीयभेदप्रपञ्चबाधो निराबाध इति परेषां प्रत्यवस्थाने असत्यात्सत्यसिद्धिः क्वचिदपि नास्तीत्याह छायादिरिति। असत्यः छायादिः न सत्यप्रतीतिहेतुः यतः तत्र तद्धीः छायादिप्रतीतिरेव हेतुरिति भवताऽपि वक्तव्यं निमीलिताक्षस्याप्रतीतेः न तु तद्विषयोऽपि; घटादीच्छया घटादिकृतौ घटादिप्रतीतिरेव हि हेतुः न तु घटादिरपि तस्य साध्यत्वेन तदानीमभावात्। तद्वत् प्रकृतेऽपि धीरेवहेतुः सा च न मृषा, नास्ति धीरिति बाधाभावात् इत्यर्थः। एवं यत्रासत्यात् सत्यसिद्धिरिति परे वदन्ति तत्र तदभिमतरीत्यैव सत्यादेव सत्यसिद्धिरुपपादिता। अथ तत्र प्रयोगमाह सत्येनेति। विमता शेमुषी स्वमुखादिसाक्षात्कृतिः सत्येनैव हेतुना उत्पन्ना कार्यत्वात् घटवदित्यर्थः। अत्र विपक्षे बाधकमाह –हेतुत्वेति। प्रातिभासिकरजतादेरर्थक्रियाकारित्वानुपगमात् अलीकस्यहेतुत्वं, हेतोरलीकत्वं च व्याहतमेवेति तयोरेकत्र समावेशोपगमे व्याघातप्रसङ्ग एव बाधक इति भावः। अत्र दर्पणादिप्रतिहतनायनरश्मिभिरेव सत्यैः मुखादिप्रतिभास इति स्वमतं प्रपञ्चितमन्यत्र। तस्मात् असत्यात्सत्यसिद्धेरप्रसिद्ध्या न तत्त्वमस्यादि वाक्यज्ञानात् अद्वितीयब्रह्मसिद्धिः न वा विश्वबाध इत्युक्तं भवति॥ ४९॥ इत्यसत्यात् सत्यसिद्धिभङ्गः

ज्ञानस्याशेषभेदोदयविहतिकृतो न स्वनाश्यत्वयुक्ति-
र्वाताद्यैरेव सद्यश्शममधिकुरुते दग्धदाह्योऽपि वह्निः।
तस्मात्तस्यान्यदेव प्रशमकमपरं तस्य चेत्यव्यवस्था
तच्चेच्छान्तिं न गच्छेत्कथमिव भविता सर्वमेवोपमर्दः॥ ५०॥

सर्वा० विश्वबाधकमद्वैतज्ञानं कारणानुपपत्त्या दूषितम्। अथ स्वप्रध्वंसकारणाभावाच्च दूष्यते। यत्तदविद्याध्वंसकमन्तिमं ज्ञानम्, तत्केन विनाश्यम्? न तावत्तद्विषयेण ब्रह्मणा, शुद्धस्य तस्य किंचित्प्रति हेतुत्वानभ्युपगमात्. अशुद्धेश्च निश्शेषध्वंसात्। अत एव नानिर्वचनीयान्तरेण। एवं तत्प्रध्वंसेनेत्यपि दुःस्थम्, तस्य सदन्यत्वानन्यत्वसत्यमिथ्यात्वादिविकल्पक्षोभात्। ज्ञानध्वंसस्याहेतुकत्वे च कादाचित्कत्वव्याघातः। अनादित्वापाताच्चकथं प्रतियोगिसम्भवः? परिशेषात्स्वेनैव स्वस्य नाश इत्यायातम्। तच्चायुक्तम्, न हि प्रतियोगिमात्रात्प्रध्वंसः क्वचिदपि दृष्टः। एतत्सर्वमभिप्रेत्याह—ज्ञानस्येति॥

वह्नेर्दाह्यं विनाश्यानुविनाशवत्तद्विनाश इति चेन्न, तत्रापि हेत्वन्तरादेव विनाशदृष्टेः। निर्वाप्यते हि कदाचिद्वातेन दीपः, कदाचिच्छलभादिभिः। यदाऽस्य स्वयं विनाश इति मन्यसे, तदाऽप्यदृष्टप्रेरितवेगवदवयवकर्मणा मिथोविभागात्सङ्घातशैथिल्यमात्रम्। न तु क्वचिदपि द्रव्यनाशः। अवस्थान्तरापत्त्या चादर्शनम्।

कतकरजोनिदर्शनं च बालप्रलोभनम्। न हि पयसि पङ्कः कतकरजसा नाश्यते, विश्लेषमात्रदृष्टेः। न च स्वयं तन्नश्यति, असंश्लेषमात्रसिद्धेः। अस्तु तर्हि ज्ञानान्तरेण तन्निवृत्तिरित्यत्राह तस्मादिति। ज्ञाननिवर्तकस्यापि ज्ञानस्य तुल्यतया ज्ञानान्तरेण निवृत्तावुपर्युपरि तथेत्यनवस्था। उक्तदोषपरिहाराय निवर्तकज्ञानस्य स्वतोऽन्यतश्च नाश्यत्वं नेति शङ्कते—तच्चेदिति। परिहरति—कथमिवेति। ज्ञानं तावत्तिष्ठति, तदनुबन्धादहङ्कारदेहानुबन्धश्च दुर्वार इति भावः॥ ५०॥

आनन्द०—प्रसङ्गसङ्गतिरिति दर्शयति—विश्वेति अथेति तथा च तस्य विश्वबाधकत्वं न स्यादिति। चरमज्ञान ध्वंसः किं शुद्धब्रह्मजन्य उताशुद्धब्रह्मजन्यो यद्वाऽनिर्वचनीयान्तरजन्य आहो चरमज्ञानजन्यप्रपञ्चध्वंसजन्य अथाहेतुक उतचरमज्ञानमात्रहेतुको ज्ञानान्तरहेतुको वेति विकल्पमभिप्रेत्य क्रमेण दूषणमाह—यत्तदित्यादिना। एवन्तत्प्रध्वंसेनेति स्वनिवर्त्यविश्वरूपानिर्वचनीयान्तरप्रतियोगिकध्वंसेनेत्यर्थः। तस्येति चरमज्ञाननिवर्तकं तत्किं ब्रह्मानन्यदुत तदन्यत्, तदन्यदपि सत्यं मिथ्या वा? नाद्यः, अद्वैतहानेः, न द्वितीयः, मिथ्याभूतस्याविद्यामूलकत्वेन तत्सत्वे निश्शेषाविद्यानिवृत्ययोगात्। नापि प्रथमस्तस्य ब्रह्मणोऽनादित्वे शुद्धमशुद्धं वेत्यादि विकल्पक्षोभादिति भावः। कादाचित्कत्वेति अध्यात्मादिवदव्ययसमुदायाट्ठक्, अनित्यत्वाट्टिलोपाभावः। कथमिति ध्वंसप्रतियोगिनोः समानकालीनत्वविरोधादिति भावः। न ह्येति अविद्याया एव दृष्टविरुद्धकल्पनाविशेषात् स्वनाशकत्वङ्कदाचित्कल्प्यताङ्क्विन्निवर्तकाद्वैतभावकल्पनयेति भावः।

ननु स्वेनैव स्वनाशोऽपि दृष्ट इति न दृष्टविरोध इति शङ्कते-वह्नेरिति। असिद्धिमाह तत्रापीति तत्र किं वह्निशब्देन प्रातिपदिकमुच्यते उत काष्ठादिनिष्ठाभारावस्थेति विकल्प्याद्य आह—निर्वाप्यत इति द्वितीय आह—यदास्येति तत्राप्यदृष्टावयवक्रियादीनामपेक्षणादिति भावः। किंचाविद्यानाशो न स्यादद्रव्यत्वात्। अद्रव्यस्य क्वचिदपि नाशाभावादित्यभिप्रायेणाह—सङ्घातशैथिल्यमात्रमिति।

ननु तर्ह्यं द्रक्ष्यतेत्यत्राह—अवस्थान्तरेति अवयवावस्थापत्येत्यर्थः।

ननु कतकरजः स्वयम्पङ्कन्नाशयित्वा पश्चात्स्वयं नष्टं दृष्टं दृष्टान्त इति चेत्तत्राह—कतकेति। ज्ञाननिवर्तकस्येति।

ननु सुन्दोपसुन्दन्यायेन परस्परन्नाशकत्वमिति चेन्न। तज्ज्ञानविरुद्धार्थविषयकन्तदविरुद्धार्थविषयकं वा? नाद्यो धारावाहिकज्ञानादिवदनिवर्तकापातात्। न द्वितीयस्तस्यानुत्पत्तिप्रसङ्गादुत्पत्तौ रजतभ्रमस्थलवदुत्तरस्यानिवृत्तिस्स्यादिति। तदनुबन्धादिति जन्यज्ञानस्य त्वद्रीत्याध्यस्तत्वाद्भेदरीत्या शरीरादिसापेक्षत्वाच्चेत्यर्थः। सर्वभेदोपमर्द इति मूलम्। सर्वप्रपञ्चनिवृत्तिः कथं स्यादित्यर्थः॥ ५०॥

अक्ष०—तत्त्वमस्यादिवाक्यजन्यज्ञानस्य स्वेतरप्रपञ्चबाधकत्वोपगमेऽपि स्वबाधकाभावान्न विश्वभेदसिद्धिरित्याह—ज्ञानस्येति। तत्त्वमस्यादिवाक्यजन्यस्येति भावः। अशेषेति। कृत्स्नभेदप्रपञ्चसाधकत्वेन भवदभिमतस्येति भावः। स्वत एव नाशस्स्यादित्यत्राह नेति। प्रतियोगिन एव स्वनाशं प्रति निरपेक्षहेतुतायाः कुत्राप्यदर्शनेन अयुक्तत्वात् अन्यथा क्षणभङ्गापत्तेरिति भावः।

इन्धनदाहे सति वह्नेः स्वयमेव नाशो दृश्यत इत्यत्राह वाताद्यैरिति। आद्यैरिति संघात-विभागजनकक्रियादिपरिग्रहः। तस्मादिति स्वनाश्यत्वस्यायुक्तत्वादित्यर्थः। तस्य तत्त्वमस्यादिवाक्यजन्यज्ञानस्य अन्यदेव प्रशमकं नाशकं तस्य चापरं नाशकमितिरीत्या अनवस्था स्यादित्यर्थः। उक्तदोषप्रसङ्गपरिहाराय तस्य नाशो नाभ्युपेयत इत्यत्राह तच्चेदिति। तस्य नाशाभावे ब्रह्मभिन्नस्य तस्यैव सत्त्वेन विश्वभेदनिवृत्तिरूपमुक्तिरेव भवन्मते न स्यादिति भावः॥ ५०॥ इति निवर्तकज्ञाननिवर्तकानुपपत्तिः

बोधस्यान्त्यस्य वेद्यं किमु तव विशदं ब्रह्म मायान्वितं वा
किं वा भेदप्रपञ्चः किमु तदनृतता किन्तु वेद्यं न किञ्चित्।
आद्ये स्याद्ब्रह्म दृश्यं तदुपरि युगले मोहसत्ताऽथ तुर्ये
सूते द्वैतं सती सा स्वविहतिमनृता पञ्चमे स्यान्न धीत्वम्॥ ५१॥

सर्वा०—अथ निवर्तकज्ञानं सविषयं निर्विषयं वा? सविषयत्वे ब्रह्मविषयं तदन्यविषयं वा? ब्रह्मविषयत्वेऽपि शुद्धब्रह्मविषयं वा मायान्वितब्रह्मविषयं वा? अन्यविषयत्वे प्रपञ्चविषयं तन्मिथ्यात्वविषयं वेति विकल्पयति—बोधस्येति॥ आद्यं दूषयति—आद्य इति। ब्रह्म दृश्यं स्यात्। शुद्धस्य दृग्विषयत्वेऽपसिद्धान्तः; त्वदुक्ता च दृग्दृश्यसम्बन्धानुपपत्तिः; दृश्यत्वानुमानस्यानैकान्त्यम्, ब्रह्मणोऽपि वा मिथ्यात्वाभ्युपगमप्रसङ्गश्चेति भावः। द्वितीयतृतीयौ दूषयति—तदुपरीति। मायान्वितब्रह्मप्रतिभासः प्रपञ्चप्रतिभासश्च मोह एवेति भावः। चतुर्थे प्रपञ्चस्यानृतता सत्याऽसत्या वेति विकल्पे पूर्वत्राद्वैतभङ्गप्रसङ्गमाह—सूत इति। उत्तरत्र स्वव्याघातमाह—स्वविहतिमिति।

मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत्।
सत्यत्वस्य तु सत्यत्वे सत्यत्वं साधितं भवेत्॥

निर्विषयत्वे दोषमाह—पञ्चम इति। वृत्तिज्ञान सर्वं सविषयमित्यभ्युपगच्छतां कथमस्य निर्विषयत्वम्? तथात्वे वा कथं वृत्तिधीत्वमिति भावः॥ ५१॥

आनन्द०—पूर्वसंगतिरित्यभिप्रायेणाह—अथेति। अपसिद्धान्तेति—अवेद्यत्वमेव स्वप्रकाशत्वमिति भावः। तद्भङ्गस्स्यादितिभावः। त्वदुक्ताचेति—अध्यस्तत्वमेव दृश्यस्य सम्बन्धः तदन्यस्य दुर्वचत्वादित्यवोचः, तथा च ब्रह्मणो दृश्यध्यासापात इति भावः।

ननु दृग्दृश्ययोरन्यतरस्यान्यतराध्यास एव सम्बन्धः। तथा च ब्रह्मणि वृत्तिरूपदृशोऽध्यासोऽस्तीति नानुपपत्तिरिति चेन्न। तदा प्रपञ्च एव साक्ष्यध्यास-प्रसङ्गात्गतं प्रपञ्चमिथ्यात्वेन। तावता दृक्दृश्यसम्बन्धसिध्या तदन्यथानुपपत्त्या मिथ्यात्वसिद्धिर्न स्यादिति भावः। दृश्यत्वानुमानस्येति। चैतन्यविषयत्वं दृश्यत्व-मित्यादि तु दृश्यत्वानुमानभङ्गे निरसिष्यत इति भावः। मायान्वितेति। तव ज्ञानादेरेव मुक्तिरिति नियमाभावात्ब्रह्मणो मिथ्यात्वेऽपि मुक्तिः स्यादिति भावः। मिथ्यात्वस्य चेति।

ननु मिथ्यात्वं व्यावहारिकं तिष्ठतु नाम तावता कथम्प्रपञ्चसत्यत्वमिति चेन्न। मिथ्यात्वं हि स्वाधिकरणे स्वात्यन्ताभावः, उत तदन्यः कश्चित्स्वाधिकरण-निष्ठात्यन्ताभावोऽपि प्रतियोगिसमानसत्ताकस्तदन्यो वा? नाद्यः, तादृशमिथ्यात्वं स्वाभाववति कथं स्यात्? समानसत्ताकयोर्विरोधात्। प्राथमिकमिथ्यात्वस्यापि व्यावहारिकत्वे तस्य प्रपञ्चाभावतया तेन विरोधात्कथमवस्थितिः? न द्वितीयः, अभावरूपमिथ्यात्वाभावस्य प्रतियोगिरूपतया पारमार्थिकत्वं प्रपञ्चस्य स्यादन्यथा मिथ्यात्वस्य मिथ्यात्वाभावेन तत्र तत्साधकानुमानस्य व्यभिचारप्रसङ्गात्। न द्वितीयः, रूपादिवत्तदाश्रयसत्यत्वविरोधाभावादिति भावः॥ ५१॥

अक्ष०—निवर्तकतया पराभिमतस्य ज्ञानस्य वेद्यं विकल्प्य दूषयति—बोधस्येति। अन्त्यस्य चरमसाक्षात्कारस्य वेद्यमिति—विषय इत्यर्थः। तत् ज्ञानं सविषयं निर्विषयं वा? सविषयत्वे ब्रह्मविषयं अन्यविषयं वा? ब्रह्मविषयत्वे शुद्धविषयं मायान्वितब्रह्मविषयं वा? अन्यविषयत्वे प्रपञ्चविषयं तन्मिथ्यात्व-विषयं वा? निर्विषयमिति पञ्चमकल्पः। तत्राद्यकल्पे दूषणमाह—ब्रह्मेति। दृश्यमिति। ब्रह्मणो दृग्विषयत्वेन मिथ्यात्वप्रसङ्गः अन्यथा दृश्यत्वानुमान-स्यानैकान्त्यप्रसङ्गो वेति भावः। तदुपरीति। मायान्वितब्रह्मविषयत्व-प्रपञ्चविषयत्वकल्पद्वयेऽपि मोहसत्तेति। उभयोरप्यसत्यत्वात् भ्रमात्मकमेव तत्स्यादिति भावः। विश्वमिथ्यात्वविषये दोषमाह—अथेति। तत्रापि मिथ्यात्वं सत्यं मिथ्यावेति विकल्पे तत्सत्यत्वपक्षे दोषमाह—सूत इति। सती-सत्यभूताचेत्। सा-प्रपञ्चानृतता चैतं भेदमेव सूते साधयेदित्यर्थः। तत्प्रतीत्या भेदनिवृत्तिरूप मुक्तिर्न भवेदिति भावः। तन्मिथ्यात्वकल्पे दूषणमाह—स्वेति। स्वव्याघात इत्यर्थः। अनृतताया अनृतत्वे अनृतत्वं बाधितं भवेदिति भावः। यथाऽऽहुः—

मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत्।
सत्यत्वस्य तु सत्यत्वे सत्यत्वं साधितं भवेत्॥ इति

निर्विषयत्वे दोषमाह—पञ्चम इति। वृत्तिज्ञानं सर्वं सविषयमित्यभ्युपग-च्छतां वः कथमियं निर्विषया वृत्तिधीर्भवेदिति भावः॥ ५१॥

इति निवर्तकज्ञानवेद्यानुपपत्तिः।

साध्या वस्सर्वमायाविरतिरपि परं ब्रह्म तस्मात्परा वा
पूर्वत्र प्रागपि स्यात्परमपि न भवेदुत्तरत्राभ्युपेते ।
साऽपि स्याच्चेन्निवर्त्या पुनरपि विलगेत्पूर्व एव प्रपञ्चो
नो चेत्सत्येव सा स्यात्प्रसजति च ततो ब्रह्म तत्सद्वितीयम् ॥५२॥

सर्वा०—बाधकज्ञानसाध्यं विकल्पयति—साध्येति ॥ ब्रह्मस्वरूपत्वेऽनादित्वान्न साध्यत्वमित्याह—पूर्वत्रेति । स्वरूपादन्यत्वे सर्वभेदनिवृत्त्यसंभवमाह—परमपीति । निवृत्तिरपि निवर्त्येत्यविरोधं शङ्कते—साऽपीति । परिहरति—पुनरिति । लब्धस्वरूपस्य भावस्य ध्वंसो यदि न स्यात्, स्वरूपं तदवस्थमेव स्यात् । प्रागभावस्य तु प्रध्वंसः भावश्च तत्प्रध्वंसश्च, उत्तरत्वे सति विरोधित्वाविशेषात् । प्रध्वंसस्य च प्रागभावः भावश्च तत्प्रागभावश्च, पूर्वत्वे सति विरोधित्वाविशेषात् । इहापि प्रध्वंसस्तन्निवृत्तिश्च भावस्य प्रध्वंसः स्यातामिति चेत्, तर्ह्यनवस्थितप्रध्वंसपरम्पराक्लृप्तिप्रसङ्गः तत्प्रध्वंसकज्ञानक्लृप्तिश्च । अस्मन्मते त्ववस्थापरम्परा प्रमाणसिद्धाऽङ्गीक्रियत इति न विरोधः । निवृत्तेरनिवृत्तौ सत्यत्वप्रसङ्गः; ततश्चाद्वैतभङ्गमाह—नो चेदिति । सत्याभावसाहित्यमदोष इत्येतच्च दूषितमेव ॥ ५२ ॥

आनन्द०—प्राक्तन्येव सङ्गतिरित्यभिप्रायेणाह—बाधकेति उपरिचेति क्वचिन्मूले पाठः तदोत्तरत्र द्वितीयपक्षे । उपरिच निवर्तकज्ञानोत्तरकालमपि न मुक्तिस्स्यात् निवृत्तिरूपभेदस्य सत्त्वादित्यर्थः । परमपीति पाठेऽपि एवमेवार्थः । लब्धस्वरूपस्येति ध्वंसप्रागभावकाले प्रतियोगिनस्सत्त्वनियमादिति भावः । प्रागभावध्वंसरूपस्य प्रतियोगिनः ध्वंसकाले प्रागभावाभावादित्यत्राह—प्रागभावस्य त्विति प्रध्वंसस्य भावध्वंसोऽपीत्यर्थः । उत्तरत्वेति स्वानन्तरोत्पत्तिकत्वे सति स्वाभावाभावत्वादित्यर्थः । तथा चाश्रयनाशजन्यगुणादिध्वंसेऽत्यन्ताभावे च नाति प्रसङ्गः । एव प्रध्वंसेऽपि न नियमभङ्ग इत्याह प्रध्वंसस्येति एवञ्च घटप्रागभावकाले न ध्वंसप्रसङ्ग इति भावः । प्रागभाववत्त्वमुपपादयति पूर्वत्वेति स्वसमानकालीनोत्पत्तिकपदार्थासमानकालीनत्वे सति स्वभावाभावत्वादित्यर्थः ।

ननु प्रकृतेऽपि निवृत्तेः निवृत्तावपि न प्रपञ्चसत्त्वं स्यादिति शङ्कते इहापीति । तर्हीति । तथाचानिर्मोक्षप्रसङ्ग इति भावः । तद्ध्वंसकेति मिथ्यावस्तुनो ज्ञाननिवर्त्यत्वनियमादिति भावः ।

ननु भवन्मते भावान्तरमेव ध्वंस इति जन्यभावस्यावश्यं विनाशादनवस्था स्यादिति समो दोष इति चेत्तत्राह—अस्मन्मतेत्विति । न विरोध इति । द्वैतविरोधो वास्तीत्यर्थः ।

ननु भावाद्वैतपक्षे ध्वंससत्वं न दोषायेति चेत्तत्राह—सत्याभावेति नेह नानेत्यादेर्यदि न सङ्कोचस्तदा भावाद्वैतमपि न स्यादित्यर्थः। क्वचित्सत्याभाव-साहित्यं दोष इति पाठः ॥ ५२ ॥

अक्ष०—मायानिवृत्तिस्वरूपमपि विकल्प्य दूषयति—साध्येति—तत्त्वावेदक वाक्यजन्यज्ञानबाध्या। वः—अद्वैतिनां सर्वमायानिवृत्तिः—ब्रह्मरूपा वा ततोऽन्या वेति विकल्पे प्रथमकल्पे दोषमाह—पूर्वत्रेति। ब्रह्मणोऽनादित्वात् साधनज्ञानात् प्रागपि स्यात् कदापि भेदोपलम्भो वा तन्निवृत्तिसाधनानुष्ठानं वा न स्यादिति भावः। द्वितीयकल्पोपगमे दोषमाह—परमपीति—साधनज्ञानानन्तरमपीत्यर्थः। न भवेदिति—ब्रह्मातिरिक्ताया विश्वनिवृत्तेस्सत्वात् कृत्स्ननिवृत्तिर्न भवेदित्यर्थः।

अथ निवृत्तिरपि निवर्तत इत्यभ्युपगमे दोषमाह—साऽपीति। लब्धस्व-रूपस्य प्रपञ्चस्य ध्वंसो यदि न स्यात् तदा प्रपञ्च एव स्यात् न तु तन्निवृत्तिरिति भावः। अतो निवृत्तेः निवृत्त्यनभ्युपगमेऽपि दोषमाह—नोचेदिति। सत्यैवेति। मिथ्याभूतस्य निवृत्त्यभावे सर्वमायानिवृत्तेः विरोधादिति भावः। सत्यभूतनिवृत्ति सत्त्वे तया सद्वितीयमेव ब्रह्म स्यात् नत्वद्वितीयमिति भावः ॥ ५२ ॥

इति प्रपञ्चनिवृत्त्यनुपपत्तिः।

अन्त्यज्ञानस्य जीवः स्थितिपदमथवा केवलं ब्रह्म ते स्या-

दाद्ये तेनैव बाध्यो न तदुपजनयेद्धीस्थितौ किं ततोऽस्य।

अन्त्ये सत्याऽनृता वा तदधिकरणता नाद्य इष्टः परस्मिन्-

तत्कल्पत्यादेरयोगस्तदिह विमृशतां किं न दुष्टं त्वदिष्टम् ॥५३॥

सर्वा०—विश्वबाधकबुद्धेराधारं विकल्पयति—अन्त्यज्ञानस्येति। न हि बाह्यवद्देहेन्द्रियमनसां ज्ञातृत्वं युष्माभिरिष्यते। तुल्यन्यायतयाऽहङ्कारस्य महतो वा ज्ञातृत्वं निरस्तमेव। परिशेषादहङ्कारोपहितो जीव एव ज्ञातेति कोटिः प्रथम-मिहोद्घाटिता। केवलं—सर्वोपाधिरहितमित्यर्थः। बाधकज्ञानस्य बाध्यजीवाधि-करणत्वे बाधकमाह—आद्य इति। अयं भावः—बाधकेन जीवो नश्यति न वा ? आद्ये स्वनाशकधीसिद्ध्यै भेदवासनानिरासादौ न प्रयस्येदिति, न ह्यात्मनाशः परमः पुमर्थ इत्यौपनिषदपक्षः। उत्तरत्राहमर्थविनाशे कथं जीवस्थितिः ? स्थापितं चाहमर्थस्यैवात्मत्वम्। जीवत्वे नष्टेऽपि ज्ञप्त्यात्मा तिष्ठेदित्यत्राह—धीति। न हि अहं विनङ्क्ष्यामि मदन्या धीर्मद्विधुरा तिष्ठत्विति मत्वा मुमुक्षुः प्रवर्तते। तथा च भाषितं—

*मयि नष्टेऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता।

इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥ इति।

शुद्धस्य निवर्तकज्ञानाधारता सत्याऽसत्या वेति विकल्पयति- **—अन्त्य इति** । सत्यत्वेऽपसिद्धान्तमाह— **नाद्य इति** । मिथ्यात्वेऽनुपपत्तिमाह— **परस्मिन्निति** । असत्यस्य ज्ञानाधिकरणत्वस्य क्लृप्तिर्हि कल्पकाविद्याहङ्कारादिसापेक्षा । अतो निवर्तकज्ञानतदाधारत्वतत्प्रतिभासा यावत्स्युः, तावदविद्याऽनुवृत्तेति न ततस्तन्निवृत्तिः । अविद्यायाः तत्कल्पितस्य ज्ञानस्य च सुन्दोपसुन्दविषनाशकविषन्यायेन युगपद्ध्वंसादविरोध इति चेत्, तदिदमन्योन्यध्वंसकत्वं दृष्टं कल्प्यं वा ? नाद्यः, असिद्धेः । न द्वितीयः, कल्पकाभावात् । गतिशून्यत्वं कल्पकमिति चेत्, अस्ति सतां गतिः, तामेवानुवर्तस्व । एवं परपक्षे दूष्यान्तराणि दूषणान्तराणि च सूचयन्निगमयति **—तदिति** । बहुश्लोकोक्तबहुविधदोषप्रस्थानादित्यर्थः ॥ ५३ ॥

आनन्द०—आश्रयानुपपत्तिं प्रसङ्गसङ्गत्या दर्शयति **विश्वबाधकेति** ननु देहादेराश्रयस्य प्रत्यक्षत्वान्न विकल्पावकाश इत्यत्राह—**नहि बाह्यवर्गिति** । ज्ञातृत्वं ज्ञानाश्रयत्वम् **तुल्यन्यायतयेति** जन्यत्वादिनेत्यर्थः । **अहङ्कारोपहितो जीव इति** अहङ्कारशवलं चैतन्यं जीव इत्यर्थः । **बाधकज्ञानस्य** सर्वप्रपञ्चनिवर्तकत्वादद्वैतज्ञानबाध्येति **प्रपञ्चान्तगतत्वात्प्रपञ्चनिवर्तकनिवर्त्यइत्यर्थः** ।

ननु बाध्यस्यापि काष्ठादेर्वह्निजननादिष्टमिति चेत्तत्राह—**अयंभाव इति स्वनाशकेति** स्वनाशकेति वचनस्य स्वानर्थेप्रवृत्तिर्न स्यादिति भावः । **नहीति**— "आत्मनस्तु कामाये"त्यादिना परमप्रेमास्पदतया अहमर्थस्य सिद्धेरिति भावः । **अहमर्थेति** संवलितस्य जीवत्वाज्जीवभावनिवृत्तौ जीवनाश एव, तदनिवृत्तावनिर्मोक्षप्रसङ्ग इति भावः । वस्तुतस्त्वहमर्थएव जीवइति तन्निवृत्तिरेव जीवात्मनां नाश इत्याह—**स्थापितञ्चेति जीवत्व इति** एकदेशस्थित्या प्रवृत्तिरुपपद्यत इति भावः ।

नह्यहमहमिति नाशधियोप्यहमर्थात्मत्वमस्तीति मदन्यत्वं कथमिति चेन्न । विशिष्टस्यैव भोक्तृत्वात्तस्याभावे केवलधियो विशिष्टादन्यत्वात् अन्यथा स्थूलोऽहमित्याद्यनुसाराच्छरीरविशिष्टमेव चैतन्यं जीवोऽस्तु । न च पारलौकिकप्रवृत्त्याद्यनुपपत्तिः तदेकदेशस्य चैतन्यस्य सत्त्वात् । किञ्च भवन्मतेऽन्तःकरणमेव (मात्रमेव) जीवोऽस्तु । नचैवं प्रवृत्त्यनुपपत्तिः । तदधिष्ठान तद्ध्वंससत्तामात्रेणापि तदुपपत्तेः । तत्तत्सम्बन्धित्वाविशेषादहंफलार्थं करिष्यामीति प्रतिसन्धानानुभवस्सर्वविशिष्ट इति भावः । अत्राहमर्थार्थसमर्थनभाष्यं संवादयति—**तथाच भाषितमिति** ।

तत्प्राप्तये=तस्य फलप्राप्तय इत्यर्थः । **असत्यस्येति** अन्यथा आविद्यकाध्यासोऽपि तथा स्यादिति किमविद्ययेति तात्पर्यम् ।

नन्वस्त्वविद्यानुवृत्तिः को दोष इत्यत्र आह—**न तत इति** । निवर्तकज्ञानास्थितौ निवृत्त्यसम्भवात्तदर्थमविद्यानिवृत्तेरावश्यकत्वादिति भावः ।

नन्वविद्यास्थितिरस्तु ज्ञानान्तरं (च) उभयोरपि नाशोऽस्त्विति शङ्कते—अविद्याया इति। कल्पकाभावादिति—ननूपादाननिवृत्युपादेयनिवृत्योर्व्याप्तिरेव कल्पिकेति चेन्न। यद्भ्रमरूपं ज्ञानं तत्स्वजनकदोषानिवर्तकमिति व्याप्तेरपि दर्शनादविद्यानिवृत्तिरपि न स्यादिति भावः।

ननु मोक्षशास्त्रप्रामाण्यान्यथानुपपत्या कल्प्यत इति शङ्कते—गतिशून्यत्वमिति। तर्हि सत्यत्वमङ्गीकृत्य बोधायन-नाथादि(नाथमुनि)प्रदर्शितां गतिं गच्छेत्याह—अस्तीति। अन्यथा सर्वोऽपि यत्किञ्चिन्न्यायविरुद्धमेव कल्पयेदिति व्यवस्था न स्यादिति भावः। बहुश्लोकेति—बहुस्रग्धराप्रतिपादितबहुदोषाणामागमनार्हं त्वदुक्तमित्यर्थः। किं न दुष्टं त्वदिष्टमिति—त्वत्कल्पितं विचार्यमाणे बहुदोषग्रस्तमिति मूलस्यार्थः॥ ५३॥

अक्ष०—निवर्तकज्ञानस्याश्रयानुपपत्तिमाह—अन्त्य इति। निवर्तकज्ञानस्य जीवः—स्थितिपदं स्थानं आश्रयः अथवा शुद्धं ब्रह्मेति विकल्पः तत्राद्येऽनुपपत्तिमाह—तेनैवेति। न हि स्वनाशाय कश्चित् धीमान् धीपूर्वकं किमपि कुर्यादित्याशयः। अहमर्थस्यैव जीवत्वात् निवर्त्यप्रपञ्चे तस्याप्यन्तर्गतत्वाभ्युपगमादिति भावः। अहमर्थविनाशेऽपि ज्ञप्त्यात्मा विद्यत इत्यत्राह—धीति। ज्ञप्तेः स्थितावपि ततः अस्य अहमर्थस्य जीवात्मनः किं प्रयोजनं? स्वप्रयोजनाभावात् मुक्त्यै न कश्चिदपि प्रयतेतेति भावः। तथा च भगवता भाषितं—

मयि नष्टेऽपि मत्तोऽन्या काचित्ज्ञप्तिरवस्थिता।
इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति॥

इति। शुद्धं ब्रह्मैवाश्रय इति कल्पं विकल्प्य दोषमाह—सत्येत्यादिना। निवर्तकज्ञानाधिकरणता ब्रह्मणः सत्या वा अनृता वेति विकल्प्यते—तत्राद्यकल्पः नाद्वैतिनामिष्टः, अद्वैतभङ्गप्रसङ्गात्। द्वितीयकल्पेप्यनुपपत्तिमाह—परस्मिन्नित्यादिना। अविद्यादिविनाशात् कल्पकाभावेन मिथ्येति कल्पोऽपि न युज्यत इत्यर्थः। आदिना-तत्प्रतिभासादिपरिग्रहः। मिथ्येतिपक्षे तत्कल्पनतत्प्रतिभासादिपर्यन्तं निवर्तकज्ञानानन्तरमप्यविद्याद्यनुवृत्तेरावश्यकतया तावत्पर्यन्तमनिवर्तयता ज्ञानेन पश्चादपि निवर्तनं च न युज्यत इति भावः। एवमद्वैतिपक्षे दूषणीयान्यन्यान्यपि बहूनि सन्तीति व्यञ्जयन्नुपसंहरन्ति—तदिति। दशभिः श्लोकैरनेकदोषप्रदर्शनादित्यर्थः। विमृशतामिति। परोक्तं सर्वमापातरमणीयमिति भावः। किं न दुष्टमिति सर्वमपि विमर्शे दुष्टमेव भायादिति भावः॥ ५३॥

इति निवर्तकज्ञानाधारानुपपत्तिः।

नाभुक्तं कल्पकोटयाऽप्युपशमनमियात्कर्म निष्कृत्यभावे
विद्यातस्तद्विनाशश्रुतिरिह तदसौ तत्प्रशंसेति चेन्न ।
तादृग्विद्यैव तन्निष्कृतिरिति हि विदांचक्रुराम्नायवृद्धाः
नान्यद्ब्रह्मानुभूतिप्रतिभटदुरितध्वंसतस्साध्यमत्र ॥ ५४ ॥

सर्वा०—यथा मृषावादिमते न बोधान्मुक्तिसंभवः ।
त्वन्मतेऽपि तथेत्येवमपन्यायेन शङ्कते ॥

नाभुक्तमिति । स्मर्यते हि ।

*अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥

इति । तर्हि प्रायश्चित्तशास्त्रवैयर्थ्यं स्यादित्यत्रोक्तम्—निष्कृत्यभाव इति । ननु *तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते इति श्रूयते । *तदा विद्वान्पुण्यपापे विधूय *तत्सुकृतदुष्कृते धूनुते इत्यादि च ।

*न कर्मणां क्षयो भूप जन्मनामयुतैरपि ।
ऋते योगात्कर्मकक्षं योगाग्निः क्षपयेत्परम् ॥

*यथाऽग्निरुद्धतशिखः इत्यादि च स्मर्यते । अतः फलभोगाभावेऽपि ज्ञानात्कर्मनिवृत्तिः स्यादित्याह—विद्यात इति ।

न च*तत्त्वज्ञानान्निश्श्रेयसाधिगम इत्याद्यसूत्रविरोधः, *दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायात् इति द्वितीयसूत्रे ज्ञानस्य मिथ्याज्ञाननिवृत्तिद्वारा कर्मानारम्भार्थत्वस्य स्थापितत्वात् । कृतं तु कर्म स्वफलत एव नश्यतीत्यविरोधः । अत्र कर्मणामवश्यभोक्तव्यत्ववचनमकृतप्रायश्चित्तविषयमित्यभिप्रायेण प्रत्याह—नेति अत्रापि तर्ह्यकृतप्रायश्चित्तत्वाद्भोक्तव्यत्वमित्यत्राह—तादृगिति । अत्यन्तविहितपरब्रह्मध्यानरूपेत्यर्थः । आम्नायवृद्धाः—स्मर्तारः; ते चेश्वरदर्शनं सर्वप्रायश्चित्तमित्याहुः ।

*इज्याचारदमाहिंसा, *प्रायश्चित्तान्यशेषाणि, *प्रायश्चित्तं तु तस्यैकम् इत्यादि च । ब्रह्मप्राप्तिहेतुतया विहितस्य योगस्य कथं नैमित्तिकत्वमित्यत्राह—नान्यदिति । स्वतःप्राप्ता हि संसरतामपि ब्रह्मानुभूतिस्सूरिवत्, तत्प्रतिबन्धकनिवृत्त्यै योग इति निष्कृतिरूपत्वं तस्य युज्यत इति भावः । अत्र दुरितशब्देन बन्धकं पुण्यमपि संगृहीतम्, प्रतिबुद्धं प्रत्यनिष्टफलप्रदत्वाविशेषात् । *एते वै निरयास्तात स्थानस्य परमात्मन इति स्वर्गादीनां निरयत्वस्मृत्या तत्साधनस्य

पापत्वोपपत्तेः। न *सुकृतम् इत्यारभ्य, *सर्वे पाप्मानोऽतो निवर्तन्ते इति सुकृतस्यापि पापत्वेन सङ्कलय्याम्नानाच्च। तदेवं धीसङ्कोचकर्मध्वंसे धीविकास एव ब्रह्मानुभूतिरिति तत्कामनाव्यपदेशोऽपि न विरुद्धः। अन्यत्र च प्रतिबन्धकनिरासवृत्तान्ते एवं प्रतिसन्धेयम् ॥ ५४ ॥

आनन्द०—आक्षेपेण सङ्गमयति—यथेति। अपन्यायेति वैषम्यादितिभावः। निष्कृत्यभाव इति प्रायश्चित्ताविनाश्यं कर्म भोगं विना न नश्यतीत्यर्थः।

ननु शास्त्रैकसमधिगम्ये यथाशास्त्रं ग्राह्यमिति प्रायश्चित्तात्कर्मनाशो यज्ज्ञानादपि तदभ्युपगम्यतामिति शङ्कते—नन्विति। विद्या इति अनन्यथासिद्धं शास्त्रं नास्तीत्याशयः।

नन्वक्षपादो ज्ञानान्मोक्षमाह। मुक्तिर्बन्धविनाशः। बन्धश्च कर्मेति सिद्धम्। तस्मा"त्तद्यथे" त्यादिवचनानि न प्रशंसापराणीति तत्तात्पर्यमवगतमिति ऋष्यभिप्रायविरुद्धं त्वया कथं दृष्टमिति शङ्कते न चेति। मिथ्याज्ञानस्य=भ्रान्तिज्ञानस्याभावे रागद्वेषादिरूपदोषाभावः। अत एव सुकृतदुष्कृतजनकयागब्रह्मस्वहरणादिप्रवृत्त्यभावः। ततः शरीरपरिग्रहरूपजन्माभावः। ततो दुःखकारणाभावाद्दुःखाभाव इति वदतां तेनैव ज्ञानस्य न कर्मनाशकत्वमिति स्वाभिप्रायस्याविष्करणान्नतात्पर्यविरोध इति परिहरति—दुःखेति। अत्रापीति, तर्हीति—अत्रापि ज्ञानं न प्रायश्चित्तमिति भावः। त्र्यन्तेति—ज्ञानस्य पापानिवर्तकत्वे ज्ञानविधिशास्त्रमनर्थकं स्यात् न कारणोच्छेदकतया न्यासार्थं शक्यम्(त्वात्)। तथा हि—कर्म फलं जनयत्प्रवृत्तिमपि जनयेदेव। पूर्वपूर्वकर्मणामुत्तरोत्तरकर्मारम्भकत्वोक्त्या तस्यापि फलत्वात्। न च सुख-दुःखानुभवरूपभोगस्यैव फलत्वं तज्जन्यत्वाविशेषात्। अस्तु वा भोग एव फलशब्दार्थं इति, तथापि सुख-दुःखाद्युपादानयोग्योत्तरोत्तरकर्मोत्पादादविरतिप्रसङ्गात्। न च रागाद्यभावात्पापाद्यनारम्भः, सुखादिगोचरेच्छादेरेवरागादित्वात्। न च प्रागभावाभावाद्रागाद्यनुपपत्तिः, तर्हि तत एवानुपपत्तौ रागाद्यभावोपपादनवैयर्थ्यात्। सरागप्रवृत्तावपि तदभावादेव पापानुत्पत्तेस्तस्मादभुक्तमेव कर्म सफलव्यापारात्प्रागेव ज्ञानान्नश्यतीति न कर्मपरम्परेति वक्तव्यम्। पापनिवर्तकमेव प्रायश्चित्तम्। ज्ञानमपि प्रायश्चित्तमेवेति भावः ज्ञानस्य प्रायश्चित्तत्वे वचनमपि वदतीत्याह—ते चेति।

ननु काम्यत्वे न ज्ञानविधिचोदनाविरोध इति शङ्कते—ब्रह्मप्राप्तीति। स्वत इति—अनादिकर्मप्रवाहेन तत्प्रतिबन्धान्न प्राप्तिः। तन्निवृत्तौ स्वत एव सा सर्वेषां भवतीति भावः।

ननु ज्ञानात्पापमात्रनिवृत्तिः स्यान्न पुण्यस्यापि निवृत्तिस्तदनुवृत्तौ न मुक्तिः-स्यादित्यत्राह - अत्र दुरितेति। अनिष्टफलत्वमाह—एत इति। अस्तु वा सुकृतस्य पापत्वं तथाऽपि ज्ञानं पापमिव सुकृतमपि नाशयेदितिनदोष इत्याह—न सुकृतमिति। चोदनाविरोधं परिहरति तदेवमिति। तदन्यतरावश्यम्भावित्वा-त्तदनुवाद इति भावः।

नन्वेवं सति दाहप्रतिबन्धकमण्यादिनिरसनव्यापारस्य दाहहेतुत्वं न स्यादि-त्यत्राह—अन्यत्र चेति। तत्रेष्टापत्तिरिति भाव इत्याहुः। अन्ये तु विधिवाक्ये ब्रह्मानुभवहेतुत्वावगमात्कथं प्रतिबन्धकाभावमात्र उपक्षय इत्यत्राह—अन्यत्र चेति। "यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणे" रित्यादिस्थले तथा दर्शनादन्यथासिद्धत्वाच्च श्रुतेर्यथाप्राप्तार्थकत्वादिति नानुपपत्तिरिति भाव इत्याहुः॥ ५४॥

अक्ष०—एवमद्वैतिमते ज्ञानात् मुक्त्यसंभवे प्रतिपादिते भवन्मतेऽपि तथैवेति नैयायिकानुयायी शङ्कते नाभुक्तमिति। ब्रह्मप्राप्तिरूपमुक्तिः निश्शेषकर्मनिवृत्ति-मन्तरा न संभवति, कर्माणि च फलभोगमन्तरा प्रायश्चित्तेऽप्यसति न भक्तियोगेन निवर्तेरन्। 'नाभुक्तं क्षीयते कर्मकल्पकोटिशतैरपि' इति हि स्मर्यते। अतो विद्यया तद्विनाशश्रुतिः विद्वान् पुण्यपापे विधूयेत्यादिः विद्याप्रशंसार्था तस्मात् तत्त्व-ज्ञानात् निःश्रेयसवचनं, अव्यवधानेन विद्यया मुक्तिरित्युक्तं चायुक्तमेवेति शङ्कितु-राशयः। परिहरति—तादृगिति। वेदान्तोदितभक्तिप्रपत्तिरूपा ब्रह्मविद्यैव तन्नि-ष्कृतिः—कर्मणां प्रायश्चित्तरूपेति आम्नायवृद्धाः—स्मृतिकाराः, विदांचक्रुः—सस्मरुः। तथा च स्मर्यते—

'प्रायश्चित्तं तु तस्यैकं'
"अयं तु परमोधर्मः यद्योगेनात्मदर्शनम्"
"धर्मेण पापमपनुदति"
"कर्मकक्षं योगाग्निः क्षपयेत् परम्"
प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम्॥ इत्यादि।

ब्रह्मप्राप्तिसाधनतया विहितस्य योगस्य कथं प्रायश्चित्तरूपत्वं पापनिवर्तक-तया चोदितस्यैव तथात्वात् इत्यत्राह—नान्यदिति। अस्य योगस्य ब्रह्मप्राप्ति-प्रतिबन्धकपापनिवृत्तिरेव फलं, प्रतिबन्धक निवृत्तौ ब्रह्मानुभवः स्वत एव भवतीति न तस्य योगसाध्यता। अतो योगस्य प्रायश्चित्तरूपत्वमुपपन्नमेवेति तेन कर्मणां विनैवानुभवं विनाशात् व्यवधानमन्तरैव मुक्तिरिति नास्मन्मते दोषसाम्यापत्त्य-वकाश इति भावः॥ ५४॥

इति विद्यायाः पापनाशकत्वोपपत्तिः।

प्रायश्चित्तं न पुण्ये न च सुकृतमनुश्रूयते धर्मबाध्यं
नाधर्मत्वं विधानान्न यदि सुचरितं त्वङ्गमस्याश्च न स्यात् ।
मैवं धर्मोऽप्यधर्मो भवति हि बहुधाऽधिक्रियादेर्विशेषात्
धर्मं त्रैवर्गिकं तु स्वयमिह निगमः पाप्मकोटौ पपाठ ॥ ५५ ॥

सर्वा०—ननु पुण्यस्य दुरितशब्देन संग्रहो न युक्तः, विरुद्धत्वात्; क्वचित् प्रयोगश्छत्रिन्यायादित्यभिप्रायेण शङ्कते—प्रायश्चित्तमिति ॥ न हि पुण्योद्देशेन क्वचिन्निष्कृतिविधिः, *धर्मेण पापमपनुदति इति च श्रूयते, न तु धर्ममिति। काम्यमपि अधर्मत्वाद्धर्मेणापनुद्यत इति चेन्न, फलोद्देशेन विहितत्वात्। न चात्र श्येनादिनयः, स्वरूपतः फलतो वा निषेधानाघ्रातत्वात्। धर्मेष्वपि च यद्यधर्मत्वं तदा तदङ्गत्वं विद्याया न घटते। एषां चतुर्णां हेतूनामन्यथासिद्धिमभिप्रेत्य प्रत्याचष्टे—मैवमिति। अधिकारिभेदेन पापत्वापत्तौ तं प्रति निष्कृतिविधिर्युक्तः, *धर्मेण पापम् इत्यत्र च यथार्हं पापशब्द उभयग्राही। विहितत्वं च कंचित्प्रति धर्मत्वं साधयेत्, नान्यं प्रत्यधर्मत्वं निरुन्ध्यात्। तेषामेव च कर्मणां फलसङ्गादित्यागवतां निवृत्तिधर्मतापत्त्या विद्याङ्गत्वोपपत्तिः। एतत्सर्वं व्यनक्ति—धर्मोऽपीति। स्मर्यते हि—

*स एव धर्मस्सोऽधर्मस्तंतं प्रति नरं भवेत्।
पात्रकर्मविशेषण देशकालावपेक्ष्य च ॥

इति ॥ एवं सति,* न सुकृतम् इत्यादौ सुकृते पाप्मशब्दो न भाक्त इत्यभिप्रायेणाह—धर्ममिति। अत एव हि* त्रैवर्गिकांस्त्यजेद्धर्मानिति मुमुक्षुं प्रत्यनुशिष्यते ॥ ५५ ॥

आनन्द०—आक्षेपसङ्गतिं दर्शयति—नन्विति। विरुद्धत्वादिति दुरितशब्दप्रवृत्तिनिमित्तं पापत्वं सुकृतशब्दप्रवृत्तिनिमित्तेन पुण्यत्वेन न समानाधिकरणं भवितुमर्हतीति भावः।

ननु तर्हि सुकृतदुष्कृतयोर्कथं "सर्वे पाप्मानो निवर्तन्ते" इति दुरितशब्दपर्यायेण पाप्मशब्देनाभिधानमित्यत्राह—क्वचिदिति। छत्रिष्वच्छत्रिषु च गच्छत्सु छत्रिणो गच्छन्ती"तिवत् अजहल्लक्षणेत्यर्थः। न हि पुण्योद्देशेनेति। पुण्यनिवृत्यर्थमित्यर्थः। तत्र हेतुमाह— धर्मेणेति। नन्विदमेव वचनन्तत्र प्रमाणमित्याशङ्कते—काम्यमपीति। पापत्वं स्यादित्याह—नेति। तत्र हेतुं वक्ति—फलेति। विहितत्वं श्येनादौ व्यभिचारीत्याह—न चात्रेति। अनिषिद्धत्वं धर्मत्वाभावव्याप्यं विहितत्वसहितन्तु धर्मत्वसाधकमिति न व्यभिचार इति भावः। निषिद्धत्वाभावमुपपादयति—स्वरूपत इति। स्वरूपतोऽगम्यागमनादेः फलतः श्येनादेर्निषेध इवात्र निषेधो नास्तीत्यर्थः। सुकृतानामधर्मत्वाङ्गीकारे

बाधकमाह—धर्मेण्विति। तदङ्गत्वं—कर्माङ्गत्वं विद्याया न घटत इति भावः। एषाञ्चतुर्णामिति—विरुद्धत्वं; प्रायश्चित्तविधानाभावः; विहितत्वं; विद्याङ्गत्वञ्चेति चत्वारो हेतवः। तत्राद्यन्निरस्यति—अधिकारीति—प्रतियोगि-भेदाद्धर्मत्वाधर्मत्वयोर्नविरोध इति भावः। द्वितीयं परिहरति—धर्मेणेति। तृतीयन्दूषयति—विहितत्वमिति। श्येनाग्निष्टोमवैषम्यं-तु वक्ष्यत इति। चतुर्थं परिहरति—तेषामेव चेति। कामनयाऽनुष्ठाने विद्याविरोध इति भावः। तन्तन्नरं-प्रति—तत्तदधिकारिणं प्रति। पात्रम्—अधिकारी। सोमयाजिनः पर्वणि वपनं-धर्मः। तथा कर्मविशेषमादाय पश्वालम्भनं क्रतुमध्ये धर्मः ततो बहिरधर्मः। धर्म इति—अन्यथा निषेधशास्त्रवैयर्थ्यंश्च स्यादित्याह—अतएवेति। ननु सुकृतस्य पापत्वे "सुकृत दुष्कृते विधूये"ति श्रुतौसुकृतेति किमर्थ मितिचेन्न। मुमुक्षुपुरुषाभिप्रायेण तथानुवादात्। पाप्मकोटौ पपाठेति मूलस्य न सुकृतं इत्यादि-वाक्य इत्यर्थः॥ ५५॥

अक्ष०—भक्तियोगस्य प्रायश्चित्तरूपत्वेऽपि पापनाशकत्वं स्यात् न तु पुण्य-नाशकत्वमित्याशङ्कते—प्रायश्चित्तमिति। पुण्ये प्रायश्चित्तं क्वापि न विहित-मित्यर्थः। धर्मेण पापमपनुदतीत्येव श्रूयते न सुकृतमिति इत्याह—न चेति। पुण्यस्यापि पापत्वमधिकारिभेदेऽस्त्येवेत्यत्राह—नाधर्मत्वमिति। पापत्वेविधानं न संभवति, न हि मातापितृसहस्रेभ्योऽपि वत्सलतरं शास्त्रमनर्थकरं पापं विदध्यात् इति भावः। अन्यथा ब्रह्मविद्याङ्गतयाऽपि विधानं न स्यादित्याह—न यदीति। अतः पुण्यस्यानुभवेनैव नाशस्स्यादित्याशयः।

प्रतिवक्ति—मेवमिति। धर्मोऽप्यधर्म इति बहुधा वर्णाश्रमावस्थाद्यधिका-रादिभेदात् कस्यचिद्धर्मोऽप्यन्यस्याधर्मो भवतीति प्रसिद्धमेवेत्यर्थः। स एव धर्म-स्सोऽधर्मस्तं तं प्रतिनरं भवेदिति स्मरणादिति भावः। त्रैवर्गिकसुकृतस्य मुमुक्ष्व-पेक्षयाऽनिष्टफलत्वेन पापरूपत्वात् न सुकृतमिति निगमे पापकोटौ पाठः श्रूयते इत्याह—धर्ममिति। अत एव—

त्रैवर्गिकान् त्यजेत् धर्मानि'ति मुमुक्षुं प्रति निषेधः श्रूयते। तस्य तत्करणे प्रायश्चित्तमपि स्मृतम्। धर्मेण पापमित्यत्र पापशब्दोऽधिकारिविशेषे पापरूपस्य काम्यपुण्यस्यापि वाचकः। फलसंगादित्यागे निवृत्तिकर्मरूपस्य तस्यैव विद्यानु-कूलतया विद्याङ्गत्वमिति सर्वमुपपन्नम्। अतो विद्यया काम्यपुण्यस्यापि नाश-संभवात् न मुक्तेरनुपपत्तिरिति ध्येयम्॥ ५५॥

इति त्रैवर्गिकसुकृतस्यापि विद्यानाश्यत्वम्।

अश्लेषः पाप्मभिश्चेत्प्रसजति वितथा दुश्चरित्रान्निवृत्ति-
स्तेषु प्रमादिकेष्वप्ययमतिकनिपतद्बीजवत्स्यात्प्ररोहः ।
मैवं शास्त्रैकवेद्ये फलफलिविषये युक्तयो ह्यस्वतन्त्राः
शास्त्राद्बाधस्तु तिष्ठेन्मतिकृतविषये शब्दशक्त्यादिभिर्नः ॥५६॥

सर्वा०—अस्तु विद्याऽपि प्रायश्चित्तान्तरवदुपात्तदुरितनाशिका; उत्पत्स्यमाननिष्कृतिर्न स्यात्, निमित्तानुदयोऽपि नैमित्तकप्रवृत्तावतिप्रसङ्गात् । उदितत्वशङ्कयाऽपि क्वचिन्निष्कृतिः, पाक्षिकोऽपि दोषः परिहार्य इति न्यायात् । न तूत्पत्स्यमानत्वशङ्कया, तदवस्थस्य निमित्तत्वेन प्रायश्चित्तशास्त्रैरनुद्देशात् । *एवंविदि पापं कर्म न श्लिष्यते *तस्यैवात्मा पदवित्तं विदित्वा, न कर्मणा, लिप्यते पापकेन इत्यादयस्तु विद्यां प्रशंसन्ति; अर्थायोगात् । ब्रह्मविदाम्, *बाल्येन तिष्ठासेत् इति विधौ कृत्स्नबालकृत्योपादाने कामचारप्रसङ्गाच्च । अस्त्विति धाष्टर्च्यं *नाविरतो दुश्चरितात् इति श्रुतिरुपरुन्धे । *सर्वान्नानुमतिश्च प्राणात्यये हि तद्दर्शनात् इति च सूत्रम्; जडवद्भावयतामपि योगिनां *सतां वर्त्म न दूषयन् इति प्रवृत्तिनियम उक्त इति; एतत्सर्वमभिसन्धायाह—अश्लेष इति ॥ प्रामादिकैरश्लेषे श्रुत्यादिविरोधो नेत्यत्राह – तेष्विति प्ररोह :—यथार्हकार्यारम्भः; अन्यथा कथमकामकृतेषु प्रायश्चित्तविधिरिति ?

अत्र श्रुतस्याश्लेषस्य किं न्यायतो बाध उत वचनत इति विकल्पमभिप्रयन्प्रत्याह—मैवमिति । आद्यं दूषयति—शास्त्रैकवेद्य इति । फलफलिविषये—साध्यसाधनभावेन मिथस्संबध्यमानेऽर्थे इति यावत् । अस्वतन्त्राः—न हि वचनविरोधे न्यायः प्रभवति, तथा सत्यतिप्रसङ्गादिति भावः । द्वितीये विषयभेदाद्विरोधं परिहरति—शास्त्रादिति शब्दशक्त्यादिभिः *नाविरतो दुश्चरितात् इत्यत्र ह्यविरतिः बुद्धिपूर्वचर्यानुवर्तनम्; तत्प्रसक्तस्य प्रतिषेधः । उषस्तिश्च प्राणधारणार्थमिभ्योच्छिष्टं चखाद । अनुपानप्रतिग्रहमिभ्येनाभ्यर्थितस्सन्नाह—*न वा आजीविष्यमिमानखादन् कामो म उपादानम् इति । ब्रह्मविदोऽपि मे कामतो निषिद्धकरणं परिहार्यमित्यर्थः ।

*अपि चेत्पातकं किंचिद्योगी कुर्यात्प्रमादतः ।
योगमेव निषेवेत नान्यं यत्नं समाचरेत् ।

इति च स्मर्यते । अश्लिष्टस्य पातकस्य किं योगरूपेणापि प्रायश्चित्तेनेति चेन्न; तत्र तद्विधौ तात्पर्याभावात् । अन्यप्रायश्चित्तप्रसक्त्या योगं न विच्छिन्द्यात् इत्येव हि तात्पर्यम् । यद्यपि जीवितात्ययमापन्नः *प्राणसंशयमापन्नः इत्यादिवचनानि विद्वदविद्वत्साधारणानि, तथाऽप्यत्रानापद्दशायां प्रामादिकेष्वपि विद्यामाहात्म्यादश्लेष उच्यत इति सार्थत्वम् । अतः पापानां विनाशवदश्लेषोऽपि विद्यासाध्यं फलमिति ॥ ५६ ॥

आनन्द० प्रसङ्गसङ्गतिमाह—अस्त्विति। नन्वेवमप्युत्पत्स्यमानानामनपायाद-निर्मोक्षः स्यादित्याक्षेपसङ्गतिरित्यन्ये। निमित्तानुदयेऽपीति काम्यतुल्यत्वेऽपि पापध्वंसस्य फलतया तदभावे बाधितफलतया प्रवृत्तिर्नस्यादिति भावः। अतिप्रसङ्गादिति–प्रायश्चित्तान्तरेष्वप्येवमतिप्रसङ्गेन व्यापारान्तराप्रवृत्तिप्रसङ्गा-दिति भावः।

ननु सन्देहेऽपि "द्वयं कार्यं" मित्यादौ क्रियाभावेऽपि नैमित्तिकमुपदिष्ट-मित्यत्राह—उदितेति। तथाऽप्युदितत्वज्ञानमावश्यकमिति तदभावनिष्कृतये कथं प्रवृत्तिरिति भावः। इष्टस्यापि यदि न स्यादिति न्यायेन करणं दृश्यते चेत्किं पुनः स्वरूपहानिकरस्यास्यानिष्टस्य (अ ह्यानिष्टस्य) निवर्तनमिति न्यायेन प्रवृतिः सम्भवतीत्यभिप्रायेणाह—पाक्षिकोऽपीति। तदवस्थस्य = उत्पत्स्यमानावस्थस्यापि निमित्तत्वं शास्त्रैर्बोध्यत इत्यत्राह—एवंविदिति। पापकेन = पापेनेत्यर्थः। अर्थायोगादिति अशेषविषयपापस्य तुच्छतया अशेषशास्त्रस्यापि तुच्छत्वादित्यर्थः।

नन्वर्थायोगादित्ययुक्तं कामचारविधेरित्यत्राह—बाल्येनेति। तिष्ठासेदिति, "नाविरितो दुश्चरितान्नाशान्तो नासमाहितः" इत्यादिना निषेधेनाप्रसक्तेरिति भावः। इति च सूत्रमिति—ननु विदुरसम्वर्तवृषभभरणादिषु कामचारो दृष्ट-इत्यत्राह—जडवद्भावयतामिति। तेषामप्यनिषिद्धा वृत्तिरिति भावः। अश्ले-षोक्तिः प्रामादिकपरेत्यत्राह—प्रामादिकैरिति।

अन्यथेति अकामकृतामश्लेषे प्रायश्चित्तेन न किञ्चित्प्रयोजनमिति भावः। अतिप्रसङ्गादिति। ज्योतिष्टोमादेरपि स्वर्गादिसाधनत्वं न स्यादिति भावः। तत्प्रसक्तस्य तत्रैव प्रसक्तस्य, तेन सकृत्प्रवृत्तेरश्लेष इति भावः। उषस्तिप्रभृतेरप्यु-च्छिष्टादिभक्षणं न कामकृतमित्याह—उषस्तिश्चेति। ब्रह्मविदोऽपीति। "शब्दं चक्रादेःकामकाट" इति सूत्रेणायमर्थं उपपादित इति भावः।

ननु प्रामादिकस्याश्लेषशास्त्रविषयत्वमयुक्तं शास्त्रविरोधादित्याशङ्कते—अपि चेदिति। तद्विधाविति प्रायश्चित्तविधावित्यर्थः। तर्हि किमपरमित्यत्राह—अन्येति। अश्लेषविषयत्वाद्योगनिष्ठेन न भोक्तव्यमिति तात्पर्यम्॥ ५६॥

अक्ष०—ननु विद्यायाः प्रायश्चित्तरूपत्वेन पूर्वाघविनाशकत्वसंभवेऽपि उत्तराघाश्लेषकरत्वं न संभवति उत्तराघस्यासिद्धत्वात् सिद्धे हि निमित्ते नैमित्तिकं प्रायश्चित्तं प्रवर्तेत न त्वसिद्धेऽपि। अन्यथाऽतिप्रसङ्गात्, नाविरतो दुश्चरितादिति शास्त्रवैयर्थ्यंप्रसङ्गाच्चेत्याशङ्कते अश्लेष इति। विषयभेदेन शास्त्रविरोधं परि-जिहीर्षतामनिवार्यो विरोधोऽप्यस्तीत्याह तेष्विति। प्ररोहशक्तियुक्तस्य बीजस्य यथा भूमौ अबुद्धिपूर्वकपतनेऽपि प्ररोहस्स्यात् तथा अबुद्धिपूर्वकादपि दुश्चरिताद् दुरदृष्टमनर्थावहमस्मिन् श्लिष्येतैवेति भावः। परिहरति मैवमिति। प्रथमं

युक्तिविरोधं प्रतिवक्ति—शास्त्रेति। पापं कर्म न श्लिष्यतीत्यादिवचनविरोधे शास्त्रैकवेद्ये साध्यसाधनविषये युक्तयो न स्वतन्त्राः शास्त्रमननुसृत्य यत्किंचिदर्थ-साधिका न स्युरित्यर्थः। न हि वचनविरोधे न्यायः प्रवर्तेत इति भावः। शास्त्र-विरोधं प्रत्याह —शास्त्रादिति। बुद्धिपूर्वकदुश्चरितविषये तद्बाधकं नाविरतमिति शास्त्रं व्यवस्थितमित्यर्थः। कथमिदमवगम्यत इत्यत्राह— शब्देति। अविरतशब्द-शक्त्या बुद्धिपूर्वककर्मानुवृत्तिरेव हि प्रतीयते तद्वतः ब्रह्मप्राप्तिर्नेति प्रतिषिद्धयते। आदिशब्देन उषस्त्यादिब्रह्मविदः निषिद्धपरिहरणपरिग्रहः। अतः प्रामादिकोत्तराघं प्रति विद्यायाः प्रायश्चित्तरूपत्वासंभवेऽपि नित्यकर्मणा प्रत्यवायपरिहार इव विद्यया निरुद्धस्य प्रामादिकाघस्य प्रत्यवायजननशक्त्यनुत्पादोऽपि वचनबलात् सिद्धयतीत्यु-पगमे न काप्यनुपपत्तिः ॥ ५६ ॥

इति प्रामादिकोत्तराघाश्लेषोपपत्तिः।

श्लिष्टं विद्याङ्गपुण्यं स्वफलवितरणान्नेतरार्थं विरागे
रागादारभ्यमाणं फलवदमतिकं संभवेन्नैव पुण्यम्।
पुण्याश्लेषस्ततोऽस्मिन्न घटत इति चेन्नोपयुक्तातिरिक्तै-
र्विद्याङ्गैस्तस्य योगादमतिकृतमपि ह्यामनन्त्येव पुण्यम् ॥ ५७ ॥

सर्वा०—यद्यपि पापस्याश्लेषः, तथाऽपि कथम् *इतरस्याप्येवमसंश्लेषः पाते तु इति सूत्रोक्तः पुण्याश्लेष इति विकल्पानुपपत्त्या शङ्कते—श्लिष्टमिति॥ अत्र हि पुण्यस्याश्लेषः किं बुद्धिपूर्वस्य, तदन्यस्य वा? आद्ये विद्याङ्गस्य तदनङ्गस्य वा? अनङ्गत्वे विरक्तकृतस्य अन्यकृतस्य वेति विकल्पः। तत्र विद्याङ्गस्याश्लेषो न सम्भवति, स्वफलभूतविद्याप्रदानात्। वीतरागस्य न फलान्तरार्थप्रवृत्तिः, यतस्तदश्लेषोक्तिः स्यात्। सरागकृतं तु स्वफलं दद्यादेव धीपूर्वस्याश्लेषायोगात्। अधीपूर्वं तु सुकृतं न सम्भवत्येव, चोदितानुष्ठानरूपत्वात्; निषिद्धे त्वधीपूर्वत्व-सम्भवः; चोदनानपेक्षानुष्ठानत्वात्। अतो ब्रह्मविदि पुण्याश्लेष उक्तो न संभवती त्याक्षेपः। एवमाक्षिप्तेषु कंचिदंशं विशेषयिष्यन्नाह—नेति। हेतुमाह—उपयुक्तेति। उपायविरोधिशमनेषु कर्मसु कानिचिदधिकानि संभवन्ति, अन्यैर्विद्यापूर्तेः; न च निष्फलत्वं युक्तम्; अतस्स्वानुगुणं फलान्तरं दातुमर्हन्तीति शङ्कायामश्लेषसूत्र्यते। निष्कामानुष्ठितानां ह्येतेषां न फलान्तरसंभव इति। यच्चाधीपूर्वकाम्यं न संभवतीति तदपि न, विष्णवायतनदीपाद्युपाख्याने तद्दृष्टेः। स्वप्ने च विद्वानपि वासनाविशेषान्निषिद्धमिव काम्यमप्यनुतिष्ठेत्। पित्रादयश्च निरपेक्षं प्रति हित-बुद्धया काम्यमाचरेयुः, तच्च प्रामादिकप्रायं सर्वं विदुषि न संश्लिष्यत इत्यभि-प्रायेणाह—अमतिकृतमिति॥ ५७ ॥

आनन्द०—पूर्वसङ्गतिरेवेत्यभिप्रायेणाह—यद्यपीति। ननु पापाश्लेषएव-सिद्धान्तः नतु पुण्याश्लेषोऽपीति चेत्तत्राह—तथापीति। उत्तरस्यापि पुण्यस्यापि अनिष्टफलवत्त्वसाम्यादेवमश्लेषविनाशौ। विद्याननुगुणस्य वृष्टयन्नारोग्यादिफलस्य शरीरपातादूर्ध्वमनिष्टत्वादश्लेष इति सूत्रोक्तत्वादिति भावः।

अन्यथा विद्यानिष्पत्तिर्नस्यादिति भावः। बुद्धिपूर्वस्यापीति—अन्यथा तुल्यन्यायतया पापस्याप्यनिष्टप्रसङ्गेन प्रायश्चित्तोपदेशनैरर्थक्यप्रसङ्गादिति-भावः। चोदितानुष्ठानेति—फलकामनां विनाऽधिकाराभावेन निष्कामत्वे तस्या-चोदितत्वान्न पुण्यत्वमित्यर्थः। चोदनापेक्षेति—तस्याविहितत्वाज्जीवनमात्रा-धिकारत्वाच्चेतिभावः। अत इति—अश्लेषविषयपुण्यस्यैवासम्भवादितिभावः। स्वानुगुणमिति—यत्फलं प्रति यस्य चोदना तत्तदनुगुणफलमित्यर्थः। विष्णवा-तयनेति बुद्धिपूर्वकेतरसुकृतसिद्धिरित्यर्थः। निरपेक्षमिति—मुमुक्षुमित्यर्थः। प्रामादिकप्रायमिति ॥५७॥

अक्ष०- इह इतरस्याप्येवमसंश्लेष इत्युक्तः, पुण्याश्लेषो न घटत इत्या-शङ्कते—श्लिष्टमिति। पुण्यस्य अश्लेषः किं विद्याङ्गस्य उतान्यार्थस्य इति विकल्पं हृदि निधाय नाद्य इत्याह—विद्याङ्गेति। विद्याङ्गपुण्यं विद्यारूपस्व-फलवितरणादेव श्लिष्टमेवेत्मर्थः। द्वितीयेऽपि विरक्तस्य सरागस्य वेति विकल्पे नाद्य इत्याह—नेति। वैराग्ये सति अन्यार्थपुण्यमेव न क्रियेतेत्यर्थः। तत्रापि द्वितीये बुद्धिपूर्वकस्य अबुद्धिपूर्वकस्य वेति विकल्पे प्रथमं प्रत्याह—रागादिति। बुद्धिपूर्वकस्य काम्यफलसिद्धया श्लेष एव स्यात् नाश्लेषः। द्वितीयं प्रत्याह—अमतिकमिति। अधीपूर्वकं पुण्यमसिद्धमेव चोदनानुसारेणैवानुष्ठेयत्वात्। अतो ब्रह्मविदि उक्तः पुण्याश्लेषः न घटत इति शङ्कितुराशयः। समाधत्ते—नेति। विद्याङ्गतया बुद्धिपूर्वकं कृतेष्वेव पुण्येषु विद्योपयुक्तेभ्योऽधिकानि पुण्यानि येषां स्युस्तेषामश्लेषस्स्यात्, विष्णवायतनदीपाद्युपाख्याने अमतिकृतमपि पुण्यं पुराणा-दिष्वामनन्ति। पित्रादयोऽपि निरपेक्षं प्रति हितबुद्धया काम्यमाचरेयुः। विरक्त-स्यापि विदुषः स्वप्ने प्राचीनवासनावशात् काम्यानुष्ठानं कदाचित् स्यात् तेषा-मप्यश्लेष इह संभावित एवेति न किंचिदिह दुर्घटमिति भावः॥ ५७॥

इति पुण्याश्लेषः।

कर्माश्लेषप्रणाशौ तदुपधिभगवन्निग्रहादेर्निवृत्ति-
र्नष्टाश्लिष्टातिरिक्तं न च किमपि ततः संक्रमः कस्य मैवम्।
तत्तत्कर्मप्रसूतौ स्वभजनशमितौ निग्रहानुग्रहौ यौ
तत्तुल्यावेव देवः प्रयति विदुषि तच्छत्रुमित्रेषु धत्ते॥ ५८॥

सर्वा०—अत्र कश्चिच्चोदयति—कर्मेति। द्विविधं हि कर्म बन्धकं, विद्योत्पत्तेः पूर्वमुत्तरं च। पूर्वं च द्विविधम् आरब्धकार्यमन्यच्च। तत्राद्यं चरमदेहा-

वधिभोगनाश्यम्, *भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते इति सूत्रोक्तेः। द्वितीयं विद्यया नाशितम्। उत्तरं च द्वेधा—प्रामादिकराशिप्रविष्टमन्यच्च। प्रथममिहाश्लिष्टम्। अन्यच्च निष्कृत्या भोगेन वा निश्शेषितम्। अत्र मुक्तिविलम्बमनिच्छतां निश्शेषकर्मनिर्वेशार्थं युगपद्बहुसंग्रहोपयोगः। एवं स्थिते विदुषश्चरमदेहादुत्क्रान्तिकाले, *तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्याम् * अस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतं तत्सुकृतदुष्कृते धूनुते

*प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम्।
विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम्॥

इत्यादेः को विषय इति? तदेतत्संक्रमश्रुतितात्पर्यानभिज्ञतामूलमित्यभिप्रायेण प्रतिवक्ति—मैवमिति। श्रुतितात्पर्यं विवृणोति—तत्तदिति।

अयं भावः—न ह्यत्र मुख्यकर्मणां संक्रान्तिः, असंभवात्। अतः—

*आदाय सुकृतं सर्वं तस्य गच्छेदरक्षितः।
शपता यत्कृतं पुण्यं शप्यमानमुपैति तत्॥
शप्यमानस्य यत्पापं शपन्तमधिगच्छति॥

इत्यादिन्यायात् अक्षिरोगादिसंक्रमणवादवच्छत्रावपि तादृशफलोत्पादने तात्पर्यमिति॥ ५८॥

आनन्द०—ननु नाशाश्लेषौ न युज्येते—सुहृदसुहृत्संक्रमणोक्तेरित्याक्षेपसङ्गतिमाह—अत्र कश्चिदिति। प्रारब्धेष्वेव केषाञ्चित्संक्रान्तिरस्तीत्याह—भोगेनत्विति। द्वितीयं प्रारब्धं। प्रामादिकराशिप्रविष्टम् पित्रादिभिरनुष्ठितस्य विद्या (र्थस्यापि) तदधिकस्य प्रामादिकस्य तुल्यत्वमित्यर्थः। भोगेनैव क्षये उपष्टम्भकान्तरमाह—अत्रेति—अन्यथाऽवश्यभोक्तव्यत्वाभावे अनेकशरीरपरिग्रहवैयर्थ्यमिति भावः। एवं स्थित इति—सुकृतदुष्कृतसत्व एव तदुपपत्तिरिति तदभावान्न तदुपपत्तिरितिभावः।

नन्वेवमपि दुष्कृतसुकृतयोः सङ्क्रमः श्रूयमाणो नोपपद्यते। निग्रहानुग्रहयोस्तदन्यत्वादित्यत्राह—अयं भाव इति। सुकृतदुष्कृतशब्दौ तत्फलीभूतानुग्रहनिग्रहपरौ। तयोः सङ्क्रमः उपपद्यत इत्यर्थः। आदाय सुकृतमिति—सुकृतदुष्कृतयोर्नैयायिकाभिमतचेतनगुणत्वे तदादानायोगात्। नाप्यस्मन्मतसिद्धनिग्रहानुग्रहपरत्वे तदुपपत्तिः। भगवत्सङ्कल्परूपस्याप्यादानायोगात्। तस्मात्फलतस्तत्फलपरत्वं वाच्यं तद्वदत्रापीति भावः॥ ५८॥

अक्ष०—क्षणिकानां पुण्यपापकर्मणां अश्लेषविनाशौ नाम तत्फलप्रदभगवन्निग्रहानुग्रहनिवृत्तिरूपाविति वक्तव्यं। तौ च 'तत्सुकृतदुष्कृते धूनुते' इतिश्रुत्या उत्क्रान्तिदशायां आम्नायेते। प्रारब्धं च भोगेन विनष्टं, अतः उत्क्रान्तिदशायां कर्मसामान्याभावात् 'तस्य पुत्रादायमुपयन्ति' सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यां इत्यत्र कस्य कर्मणः शत्रुमित्रेषु संक्रमणमुच्यते इत्याशङ्क्ते—कर्मेति। प्रतिक्षिपति—मैवमिति। विद्वद्विषये भगवतः तत्तत्कर्मजनितौ यौ निग्रहानुग्रहौ स्वभजनेन शमितावभूतां—तत्सदृशावेव निग्रहानुग्रहौ तच्छत्रुमित्रेषु भगवान् विदधाति उभयोरत्यन्तसादृश्यनिबन्धनैक्यारोपेण संक्रमणोपचार इति भावः॥ ५८॥

इति प्रियाप्रिययोः शत्रुमित्रयोः संक्रमः

अन्यश्चेदन्यकर्मप्रजनितफलभुक् शास्त्रवैयाकुली स्याद्-
　ब्रह्मज्ञैरुज्झितानां क्वचिदपि न ततः कर्मणां संक्रमः स्यात्।
उद्वेलस्स्याच्च धातेत्यसदविषमताद्यन्वितेनैव धात्रा
　विद्यानिष्ठोपकाराद्युचितफलमिदं दीयते वर्गयुग्मे॥ ५९॥

सर्वा०—पुनरनिर्धारितश्रुतितात्पर्यश्चोदयति—अन्य इति॥ अन्यस्यान्यकृतकर्मफलभोगे * शास्त्रफलं प्रयोक्तरीति व्यवस्थाभङ्गाच्छास्त्रस्य व्याकुलता स्यात्; ऋत्विक्कृतं हितैषिकृतं चान्यार्थमेव करणात्परत्र फलतीति युक्तम्; अभिचारकर्म च भ्रातृव्यस्य पूर्वदुष्कृतोत्थापितत्वात्तत्पीडाहेतुः। अभिचरिता च स्वकृतफलं भ्रातृव्यमरणं स्वयं भुङ्क्ते। इह तु नैवं सम्भवः। अतः परवित्कर्मणामश्लेषविनाशसंभवेऽपि नान्यत्र स्वरूपत इव फलतोऽपि संक्रमस्संभवतीति ईश्वरस्य च स्वमर्यादातिक्रमः स्यादित्याह—उद्वेल इति। उक्तं चोद्यद्वयं स्वकर्मफलभोगव्यवस्थयैव परिहृतमित्यभिप्रायेण प्रत्याह—इत्यसदिति। हार्दं विवृणोति—अविषमतेति। एतेन ब्रह्मविदुपकारापकारयोरपरिमितफलत्वं च सिद्धं भवति॥ ५९॥

आनन्द० - श्रौतेऽर्थेऽत्र का कथंतेत्यत्राह—पुनरिति। आक्षेपिकी सङ्गतिरिति भावः। व्याकुलता स्यादिति—अकृताभ्यागमादिदोषः स्यादित्यर्थः।

ननु शास्त्रफलं प्रयोक्तरीति नायं नियमः ऋत्विक्कर्मादौ तदभावादित्यत्राह—ऋत्विगिति। यन्निष्ठफलकामनया यच्चोदितं तत्कर्म तत्र फलं जनयतीति नियमः। निषिद्धं तु न तथेति नियमः।

ननु नायं नियमः, निषिद्धस्याभिचारस्य भ्रातृव्यव्यसनजनकत्वादित्यत्राह—अभिचारेति। अस्त्यभिचारस्य द्वैविध्यं चोदितत्वन्निषिद्धत्वञ्च। तत्र चोदितत्वस्य भ्रातृव्यशरीरविशेषः फलमिति यदुद्दिश्य यच्चोदितं तत्तस्य जनयतीनि नियमस्य

न भङ्गः। यन्निषिद्धत्वं तस्य तु प्रयोक्तुरेव फलं भविष्यति। यच्च भ्रातृव्यव्यसनं दृश्यते तत्तु तत्कर्मफलमेवेति न कस्यापि नियमस्य हानिरिति भावः। **स्वमर्यादातिक्रम इति**—ईश्वरस्य स्वकृतमर्यादातिक्रमण उन्मत्ततुल्यतया परविदोऽपि कांश्चिन्नमोचयेन्मोचयेच्चापरविदोऽपीत्यतिप्रसङ्गः स्यादिदि भावः। **उक्तञ्चोद्वयं** शास्त्रफलं प्रयोक्तरीति नियमः। स्वमर्यादानतिक्रमश्चेति द्वयमित्यर्थः। शास्त्रत एव प्रयोक्तुः फलमिति व्यवस्यते। तत एवेमे सुकृतदुष्कृते गच्छतश्चेत्यवगम्यते। तथा चापवादशास्त्राभावे प्रयोक्तृनियम इति न दोष इति भावः। यस्य कस्यचिदुपकारात्तस्य फलवत्त्वे सिद्धेब्रह्मविदुपकारस्यापरिमितफलपरत्वं कैमुत्ययन्यायसिद्धमित्याह—**एतेनेति**।

ननूपकारापकारयोरेतत्फलञ्चेत्कथम्पुण्यपापसङ्क्रम इति चेन्न। लोक उपकारापकारयोर्यत्किञ्चित्फलजनकत्वेऽपि ब्रह्मविद्विषययोस्तदीयसुकृतदुष्कृतफलोपबृंहितफलजनकत्वमिति नियमात्सङ्क्रमोक्तिरिति भावः। **अविषमतेति** अविषमत्वानतिक्रमः॥ ५९॥

अक्ष०—पुनरपि पुण्यपापकर्मफलस्यान्यसंक्रमणेऽनुपपत्तिमाशंकते **अन्य इति**। ब्रह्मविदा कृतानां पुण्यपापकर्मणां फलं यदि अन्योऽनुभवेत् तदा 'शास्त्रफलं प्रयोक्तरि' इति शास्त्रस्य वैयाकुली स्वोक्तविपर्ययात् स्यादित्यर्थः।

न च ऋत्विगादिकृतेन कर्मणा फलं यजमानः कथमाप्नुयात् इति वाच्यं, ऋत्विगादिभिः यजमानार्थमेव कर्मकरणात् युक्तं यजमानस्य फलं, न तथा शत्रुमित्रार्थं विदुषा कर्म क्रियते इति प्रकृते न तत् युक्तम्। शास्त्रफलं प्रयोक्तरीत्यस्य परगतफलोद्देशरहितकर्मविषयत्वादिति भावः। अतो विदुषा परित्यक्तानां कर्मणां स्वरूपतः फलतो वा क्वचिदपि न संक्रमस्स्यादित्याह—**ब्रह्मज्ञैरिति**। अन्यथा ईश्वरस्य कर्म तादृशमकृतवतामपि फलदाने वैषम्यादि प्रसज्येतेत्याह—**उद्वेल इति**। परिहरति—**असदिति**। वैषम्यनैर्घृण्यादिदोषरहित ईश्वरः न विना कर्म कस्मैचित् फलं ददाति। किं तु ब्रह्मविद्विषये मित्रादिभिर्यान्युपकारादिकर्माणि कृतानि तेषामेवानुगुणं फलमिदं मित्रशत्रुवर्गद्वयेऽपि ददातीति न कश्चित् दोष इति भावः॥ ५९॥

इति प्रियाप्रिययोर्विद्वत्कर्मफलसमानसृष्टेः स्वकर्मफलत्वम्।

अर्चिर्घस्रोऽथ पक्षस्सित उदगयनं वत्सरो मातरिश्वा
मार्तण्डस्तारकेशस्तडिदपि वरुणामर्त्यनाथप्रजेशाः।
आदिष्टो विश्वनेत्रा स्वयमतिवहने देवयानाध्वगानां
यः प्रोक्तोऽमानवाख्यस्स तदिदधिपतिर्विश्रुतो मानसोऽपि॥ ६०॥

सर्वा० - अथ विधूतपुण्यपापस्य विदुषः स्थूलशरीरान्मूर्धन्यनाड्या निष्क्रान्तस्यार्चिरादिपादोक्तमातिवाहिकक्रममाह-अर्चिरिति ।। *तत्पुरुषोऽमानवः, स एनान्ब्रह्म गमयति इत्यव्यवहितब्रह्मगमयितृत्वेन निर्दिष्टस्य प्राधान्यसूचनार्थं वरुणादिषु तृतीया । अमानवः किमिह नोक्त इत्यत्राह—य इति । वैद्युतपुरुष इह तटित्पतित्वात्तटिच्छब्दोक्त इति भावः । तथाऽपि *वैद्युतात्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति इत्युक्तस्येह नोपादानमित्यत्राह—विश्रुत इति । शेषं भाष्यादौ । अत्रैवं तत्त्वसारे संगृहीतम्—

*अर्चिरहस्सितपक्षा नुदगयनाब्दमरुदर्केन्दून् ।
अपि वैद्युतवरुणेन्द्र प्रजापतीनातिवाहिकानाहुः ।। इति ।

अन्ये त्वाहुः—

*अर्चिर्वासरशुक्लपक्षषडुदङ्मासांश्च संवत्सरं
वायुं भास्करचन्द्रविद्युदुदपान् सेन्द्रं प्रजानां पतिम् ।
गत्वाऽथो विरजां विमुच्य च तनुं सूक्ष्मां ततोऽमानव
स्पर्शात्क्षालितवासनास्सुकृतिनो गच्छन्ति विष्णोः पदम् ।। इति ।

अत्र वासनाशब्देन फलप्रदानरहितनष्टाक्लिष्टकर्मराशेरनुप्रवृत्तौ धीसङ्कोचकशक्त्यंशस्तन्नियतसूक्ष्मप्रकृत्यंशो वा विवक्षितः ।

अपरे तु ब्रुवते—

*भूलोकेशाग्नयोऽष्टौ प्रथममहरतः पूर्वपक्षस्सितात्मा
मासाष्षड्वत्सरोऽथो दशतनुपवनस्सैक आदित्यवर्गः ।
चन्द्रो विद्युज्जलेशस्समरुदधिपतिस्सप्रजानामधीशः
ते मार्गस्यार्चिरादेरतिवहनविधौ विश्वनेत्रा नियुक्ताः ।।

इति । अत्र सैक इति पवनविशेषणम्, *अथ वायोरेकादश पुरुषस्य इत्यादिश्रुतेः ।। ६० ।।

आनन्द० —प्रियाप्रिय[योः] विद्वत्कर्मसंक्रमणस्य स्वकर्मफलत्वं प्रसङ्गादाह—अथेति अवसरसङ्गतिरित्यर्थः । मूर्धन्यनाड्येति—"शतञ्चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका तयोर्ध्वमायन्नमृतत्वमेति" "तदेकोग्रज्वलनन्तत्प्रकाशितद्वारोविद्या सामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया" इतिश्रुतिसूत्राभ्यामुक्तत्वादित्यर्थः । अर्चिरादीति—"वायुमब्दादविशेषविशेषाभ्या"मित्यादिनेत्यर्थः ।

ननु अमानवस्यापि कस्यचिदातिवहिकस्य सत्वात्तदपरिगणने न्यूनतेत्यत्राह—तत्पुरुषइति ।

ननु शब्दभेदस्यार्थभेदकत्वं शब्दान्तराधिकरणसिद्धमितिचेत्तत्राह—शेषमिति—स्थानप्रमाणात् ब्रह्मगमयितृत्वलिङ्गाच्च एकैकस्यैव सिद्धेः। न च ब्रह्मलोकानिति बहुवचनान्तलोकशब्देन देशप्रापकत्वमेवावगम्यते न ब्रह्म गमयितृत्वमिति वाच्यम्। ब्रह्मैव लोक इति कर्मधारयस्य मुख्यत्वात् बहुवचनस्य पाशबहुत्ववदप्रयोजकत्वादितिभावः। स्वोक्तार्थे संवादमाह—अत्रैवमिति।

नन्वश्लेषविनाशाभ्यां सुहृदसुहृद (सुकृतदुष्कृता) पनयाच्च कर्ममात्रस्याऽभावात्कथं वासनाशब्दाभिधेयकर्मांशस्याऽमानवकरस्पर्शान्निवृत्तिरित्यत्राह—अत्र वासनाशब्देनेति। संग्रहान्तरविरोधमाशङ्क्य परिहरति- अपरेत्विति—"अष्टधाग्निर्भवमाविवेश" इति श्रुते f]रुष्टत्वन्नतदग्निराचंरि त्यर्थः। "शुक्लकृष्णे सृती ह्येते" त्याद्युक्तोत्तरायणमासानां सितत्वम्। नन्वस्मिन् संग्रहे अग्नीनामष्टानामातिवाहिकांशप्रवेशात्तत्रार्चिरित्येकस्योक्तेः कथमविरोध इत्यत्राह—आदित्यवदिति—द्वादशत्वेऽपि यथाऽत्र एकत्वेन निर्देशस्तथेत्यर्थः। एवं "दशतनुःपवन" इत्यत्रापि बोध्यम्। आदित्यविशेषणत्वे समुदायैकदेशाभ्यां वैयर्थ्यमित्यभिप्रायेणाह—सैक इति। मूले—देवयानाध्वगानामिति- मुक्तिगन्तॄणामतिवहने प्रापणे यो अमानवाख्यः तटिदधिपतिर्मानस इत्यपि श्रुतइति योज्यम्॥ ६०॥

अक्ष०—अर्चिरादिगतावातिवाहिकक्रममाह—अर्चिरिति। अर्चिः—अग्निः, घस्रः—अहः, पक्षस्सितः—शुक्लपक्षः, उदगयनं उत्तरायणं, वत्सरः—वर्षः, मातरिश्वा—वायुः, मार्ताण्डः—सूर्यः, तारकेशः—चन्द्रः, तटित्—विद्युत्पुरुषः वरुणेति—वरुणेन्द्रप्रजापतिभिस्सहापीत्यर्थः। अर्चिरादेः पूर्वोक्तस्य स्वोत्तरातिवाहिकस्थानपर्यन्तमेवातिवहनं, वैद्युतस्य तु स्वोत्तरवरुणाद्यनन्तरमपि ब्रह्मप्राप्तिपर्यन्तं प्राधान्येनातिवहनमिति भावः। एतेषामातिवाहिकत्वं प्रत्येकमीश्वरादेशात् देशविशेष - व्यवस्थितमित्यभिप्रायेणाह—आदिष्ट इति। देवयानाध्वगानां देवयानमार्गगामिनामित्यर्थः।

अत्र तत्पुरुषोऽमानवस्स एनान् ब्रह्मगमयतीत्युक्तः अमानवः, वैद्युतात् पुरुषात् 'मानस एत्य ब्रह्मलोकान् गमयती'त्युक्तो मानसश्च कुतो नोक्तइत्यत्राह—य इति। वैद्युतपुरुष एवेह तटित्पतित्वात् तटिच्छब्देनोक्तः। स एवामानवो मानसोऽपीति भावः॥ ६०॥

इत्यातिवाहिकक्रमक्लृप्तिः

बुद्धेर्योऽसौ विकासः कबलितनिखिलोपस्कृतब्रह्मतत्त्वः
स प्राक्चेन्नित्यमुक्तिर्नं यदि कथमसौ नश्वरत्वं न गच्छेत्।
मैवं प्रध्वंसवत्ते स खलु मम तथा शौनकाद्युक्तनीत्या
शान्ताशेषापराधे न च भवति पुनरत्र सङ्कोचहेतुः॥ ६१॥

सर्वा०—एवं देवयानेन गतस्य यस्सर्वविशिष्टब्रह्मानुभवलक्षणो धीविकासः; तत्र विकल्पतः पराभीष्टमाक्षेपमनुवक्ति—बुद्धेरिति ॥ स प्राक् चेत्-स धीविकासः प्रागप्यस्ति चेत्, अनादिश्चेदित्यर्थः। तत्र बाधकमाह—नित्यमुक्तिरिति। बद्ध एव न स्यादित्यर्थः। आगन्तुकत्वकोटिमनुभाषते—न यदीति। तत्रापि जातानां विनाशध्रौव्यात् बाधक इत्याह—कथमिति। स्वपरसिद्धान्तविवेकविक्लबोऽसीत्यभिप्रायेण प्रत्याह—नैवमिति। तद्विवृणोति—प्रध्वंसवदिति। पूर्वावधिमानपि प्रध्वंस उत्तरावधिरहित इति मन्यसे। एवं भावोऽपि कश्चित्तथा स्यात्। अनुपपत्त्या तत्र तथात्वमिति चेत्, अत्राप्यस्ति श्रुतिभङ्गानुपपत्तिः। भावान्तरमेव च वयमभावं ब्रूमः। निश्शेषविरोधिनिवृत्तौ हि ज्ञानस्य परसङ्कल्पसिद्धसर्वगोचरविकासवत्तया सदाऽभिव्यक्तिः स्मर्यत इत्याह—शौनकादीति। मुक्तविषयश्रुतिषु च *परात्परं पुरुषमीक्षते, * सर्वं हि पश्यः पश्यतीत्यादिनिर्देशस्य सङ्कोचकादर्शनात्। ईक्षणस्य सदानुवृत्तिर्हि स्वतः प्राप्तेति भावः। ननु यदि मुक्तोऽपि चेतयते, पुनरपि सङ्कोचकमारभेतेत्यत्राह—शान्तेति। सङ्कोचहेतुकरणमपि हि कर्ममूलं, निश्शेषितकर्मणः कथं तत्स्यादिति ॥ ६१ ॥

आनन्द०—प्रसङ्गेन निरूपयति—एवमित्यादि। पराभीष्टमितिउत्तरावधिराहित्याददुष्टत्वेन दुःखध्वंस एव मोक्ष इत्यङ्गीकार्य इति भावः। पूर्वावधिमानपीति यथा जन्यत्वमात्रं विनाशित्वे तन्त्रम्, तथाभावत्वविशेषितमपीति भावः। अनुपपत्त्येति भावोन्मज्जनप्रसङ्गादित्यर्थः अत्रापीति प्रत्यक्षागोचरे श्रुतिभङ्गो न कार्य इति भावः। प्रध्वंसरूपत्वाङ्गीकारेऽपि मदिष्टसिद्धिरित्याह—भावान्तरमिति। अस्तु वोपपन्नं भावस्य विनाशित्वं, पूर्वसजातीय नैरन्तर्यात्परम्परानित्यत्वमित्याह—निःशेषेति।

"यथा न क्रियते ज्योत्सना मलप्रक्षालान्मणेः
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा"

इत्यादिस्मृतेरिति भावः। ईक्षते=पश्यतीति वर्तमाननिर्देशादप्ययमर्थः सिध्यतीत्याह—मुक्तविषयेति न च बर्हिर्देवसदनं दामीतिवदन्यथासिद्धं, तस्याप्यनुष्ठानकालाभिप्रायस्वीकारादत्रापि मुक्तिकालाभिप्रायस्वीकारे उत्तरस्य सर्वकालस्यापि तत्कालतयोत्तरवधिराहित्यसिद्धिरिति भावः। "कवलितनिखिलोपस्कृतब्रह्मतत्व" इति मूलस्य सकलचेतनाचेतनविशिष्टब्रह्मविषय इत्यर्थः ॥ ६१ ॥

अक्ष०—देवयानेन पथागतस्य मुक्तस्य उभयविभूतिविशिष्टब्रह्मानुभवरूपो यो धीविकासः स चानादिरागन्तुकोवेति विकल्प्य परेष्टं दोषमनुवदति—बुद्धेरिति। प्रथमकल्पे दोषमाह—नित्यमुक्तिरिति। बद्ध एव न स्यादिति भावः। द्वितीयकल्पे दोषमाह—न यदीत्यादिना। जातत्वे विनाशध्रौव्यात् नश्वर एव स धीविकासस्स्यादिति भावः। परिहरति—नैवमिति। जातस्यापि भवन्मते प्रध्वंसस्येव

अनश्वरत्वं ममाप्युपपन्नमित्यर्थः। त्वदुक्तव्याप्तिः प्रध्वंस एव भग्नेति भावः। सर्वपापनिवृत्त्यनन्तरं भगवत्संकल्पजनितः धीविकासो नित्य एवेति स्मर्यत इत्याह— शौनकादीति। यथोक्तं—

तथा हेयगुणध्वंसादवबोधादयो गुणाः।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते॥

इति। अत्र आदिना सर्वविषयविकासशक्तिरपि गृह्यते, हेयगुणप्रतिबन्धेन प्राक्-विकासानुत्पादेऽपि तन्नाशानन्तरमुत्पन्नस्य तस्य न विनाशो भवतीति भावः।

पुनरपिहेयगुणेन प्रतिबन्धे संकोचस्स्यादित्यत्राह शान्तेति। संकोचहेतुरेव पश्चात् न संभवतीति भावः॥ ६१॥

इति मुक्तधीविकासस्य नित्यत्वम्।

मुक्तौ देहाद्यभावे मुकुलितविषयो जक्षदादिप्रवाद-
स्तत्सत्त्वे चाशरीरश्रुतिविहतिरतः का चिकित्सेति चेन्न।
इच्छातस्स्यादवस्थाद्वयमुभयविधश्रुत्यबाधाद्विमुक्तौ
कर्मायत्तैर्वियोगः परमिह कथितस्तस्य देवोपमस्य॥ ६२॥

सर्वा०—मुक्तस्य ज्ञानं चिन्तितम्। अथ तस्य चिकीर्षाप्रयत्नशक्तिविषया चिन्ता। तत्र मुक्तो देहप्राणतद्व्यापारैर्मुक्तो न वेति विकल्पं भावयन् क्रमादाक्षि-पति—मुक्ताविति॥ आद्ये मुक्तमधिकृत्य प्रवृत्तः *जक्षत्क्रीडन् इत्यादिप्रवादो निर्विषयः स्यात्। द्वितीये *धूत्वा शरीरम् *अशरीरं वाव सन्तम् इत्यादिश्रुति-विरोधः स्यादिति। अत्र *द्वादशाहवदुभयविधं बादरायणोऽतः इति सूत्रोक्तप्रकारेण स्वेच्छाकर्मकृतदेहादियोगायोगाभ्यामवस्थाद्वयवानिति मन्वानः प्रत्याह - नेति। प्रथमचोद्यपरिहारतयाऽभिप्रेतं प्रथयति—इच्छात इति। श्रुतिविरोधं तु विषय-व्यवस्थातश्शमयति—कर्मायत्तैरिति। यत्र विषयभेदसंभवः, तत्र क्वचिद्बाधेऽति-प्रसङ्ग इति भावः। देवोपमस्य—ईश्वरेण साम्यं प्राप्तस्येत्यर्थः। एतेन परविषय-शरीरविधिनिषेधश्रुत्योरिवात्रापि व्यवस्थोपपत्तिर्व्यज्यते॥ ६२॥

आनन्द०—प्रसङ्गसङ्गत्यभिप्रायेणाह—मुक्तस्येति उत्तरपद्यद्वय इति शेषः। मुक्तः देहप्राणतद्व्यापाररहितः। "जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वे" त्यादि श्रुतिस्वारस्यानुसारि भावं जैमिनि विकल्पामननादित्युक्तं मतमनुसृत्याह— आद्येति। "अभावं बादरिराहह्येवं" इत्युक्तमतानुसारेण प्रतिक्ति द्वितीय इति। द्वादशाहवदिति "यथा ऋद्धिकामाः सत्रमासीरन्द्वादशाहेन प्रजाकामं याजयेत्" इत्यादिविनियोगभेदाद्द्वादशाहः सत्रात्मकाहीनस्तथा मुक्तोऽपि शरीर-तदभावप्रतिपादकवाक्यभेदात्कर्माधीनशरीररहित इच्छधीनशरीरोऽपीत्यर्थः।

केचित्तु कालभेदेन शरीरतदभाववानित्याहुः। श्रुतिविरोधम् "अशरीरं वाव सन्त" मित्यादि श्रुतिविरोधमित्यर्थः। परविषयेति "अपाणिपादो जवनः अचक्षुःश्रोत्रमपाणिपादमादित्यवर्णं तमसः परस्तात्, आप्रणखात्सर्व एव सुवर्ण, एको ह वै नारायण आसीत्। इच्छागृहीताभिमितोरुदेह" इत्यादिवाक्याना-मित्यर्थः। मूलं कर्मायत्तैरिति कर्मकृतदेहैरित्यर्थः॥ ६२॥

अक्ष०—मुक्तस्याशरीरत्वं सशरीरत्वं वेति विकल्प्य क्रमादाक्षिपति—मुक्ताविति। अशरीरत्वे जक्षणादिबोधकस्य जक्षत्क्रीडन् इत्यादिश्रुतिसन्दर्भस्य निर्विषयत्वं स्यादित्यर्थः। जक्षणादेः भोजनाद्यात्मकस्य शरीरसाध्यत्वादिति भावः।

सशरीरत्वोपगमे 'अशरीरं वाव सन्तं' इत्यादि श्रुतिविरोध इत्याह—तत्सत्व इति। का चिकित्सेति। एवं पक्षद्वयेऽपि दोषे कः परिहार इत्यर्थः। परिहारमाह—इच्छात इति। सङ्कल्पभेदादित्यर्थः। अशरीरस्स्यामिति संकल्पे अशरीरत्वं, सशरीरस्स्यामिति संकल्पे सशरीरत्वं चेति अवस्थाद्वयमपि क्रमात् भवतीति भावः। कुत इत्यत्राह—उभयेति। स एकधा भवति त्रिधा भवति इति विकल्पामननात् अशरीरं वावेत्यशरीरत्वश्रवणाच्चेति भावः।

"न ह वै सशरीरस्य प्रियाप्रिययोरुपहतिरस्ति"

इति श्रुतिविरोध इत्यत्राह—कर्मायत्तैरिति।

कर्माधीनशरीरवियोगस्य अकर्मकृतशरीरयोगस्य च न विरोध इति भावः। देवोपमस्य परब्रह्मणा साम्यमापन्नस्य मुक्तस्य ब्रह्मवत् सशरीरत्वाशरीरत्वोभय-मप्युपपन्नमेवेति भावः। तथा च सूत्रितं—

"द्वादशाहवदुभयविधं बादरायणोऽतः" इति॥ ६२॥

इति मुक्तस्यैच्छिकशरीरयोगानियमः

स्यान्मुक्तो विश्वदेहो यदि भवति जगद्व्यापृतौ तस्य शक्तिः
स्वातन्त्र्यं वाप्यशक्तौ विगलति स च नः स स्वराडित्यधीतः।
धत्तेऽनुच्छेद्यसारा तदियमुभयतःपाशतां तर्करज्जु-
र्मैवं देवस्तदिच्छां क्वचिदपि न विहन्त्येवमस्तु स्वराड् सः॥६३॥

सर्वा०—इच्छागृहीतदेहत्वं देवोपमत्वं च मुक्तस्य प्रसक्तम्, तस्य च शारीर-कान्ते जगद्व्यापारवर्जमैश्वर्यं साधितम्। स किं शक्तोऽप्यनिच्छया जगत्सृष्ट्यादौ न व्याप्रियते, उताशक्त एवेति विकल्पे पूर्वं यदीत्यादिनाऽनूद्य तत्र बाधक-माह—स्यान्मुक्त इति॥ विश्वदेही स्यात् अन्यथा कथं *बहु स्यामिति सङ्कल्पा-र्हत्वम्? विश्वदेहत्वं चानेकेषां निष्प्रमाणकं प्रमाणतर्कप्रत्यूढं च। अत एव शक्तोऽपि प्राप्त्यभावान्न व्याप्रियत इति पक्षोऽपि प्रत्यादिष्टः। उत्तरस्योत्तरमाह—

स्वातन्त्र्यमिति। क्वचिदशक्तौ *पारतन्त्र्यं परे पुंसि प्राप्य निर्गतबन्धनः। स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदते॥ इत्यादिप्रसिद्धंनिस्सीमस्वातन्त्र्यं विगलेत्। श्रुतिविरोधमप्याह स चेति। *स स्वराड्भवति इति ह्याम्नायते। द्वयोरपि दुरतिक्रमतया संशयडोलाकेलिसान्तत्यमित्यभिप्रायेणाह—धत्त इति। उत्तरकोटिपरिग्रहाभिप्रायेण प्रत्याह—मैवमिति। श्रुतिविरोधमुपशमयति—देव इति। अकर्मवश्यस्याप्रतिहतेच्छत्वमिह स्वातन्त्र्यम्। ईश्वरो हि बद्धानां यथाकर्म क्वचित्क्वचिदिच्छां विहन्ति, मुक्तस्य तु न क्वचिदपि परिमिते पराधीनस्वदेह-सृष्ट्यादावित्यर्थः॥ ६३॥

आनन्द०—पूर्वसङ्गत्याऽऽह—इच्छेति। तस्य चेति। "जगद्व्यापारवर्जं-प्रकरणादसन्निहितत्वाच्चे"ति सूत्रेणेत्यर्थः। विश्वदेहेति। समस्तचेतनाचेतन-शरीरीत्यर्थः। अस्तु को दोष इत्यत्राह—विश्वदेहित्वञ्चेति।

ननु परत्वाच्छ्रुतिरेव प्रमाणमित्यत्राह—प्रमाणतर्केति। प्रमाणंतावत् "एकमेवाद्वितीयं, एको ह वै नारायण आसी"दित्यादि। अनेकेषां सर्वशरीरत्वेऽनेकाधिष्ठितत्वप्रसङ्गात्तत्वे च यदेकेन प्रेर्यते तदपरेण प्रतिरोधप्रसङ्गेन जगत्सृष्ट्यादिर्नस्यात्। यदेकशरीरं न तदन्यजीवशरीरमित्यादि (व्याप्तय-स्तर्काः)

ननु लक्ष्म्या अपि जगदुपादानत्वपक्षेऽनेकशरीरत्वं विश्वस्य सृष्टमिति चेन्न। उभयोरपि तुल्यव्याप्तिकत्वात्तुल्याभिप्रायकत्वात्स्वरूपेण सर्वसम्बन्धात्स्वरू-पाविनाभावाच्च तदुक्तम्। जीवे तु ज्ञानद्वारा सम्बन्धः कल्प्यत इति वैषम्या-दित्याहुः।

केचित्तु "अहन्ता ब्रह्मणस्तस्य सा·····सनातनी" इति स्वरूपनिरूपकतया ब्रह्मण्येवान्तर्भावमाहुः। अत एवेति—यत एव विश्वदेहित्वाभाव अत एवेत्यर्थः। जगच्छरीरकत्वाभावे तदाकारे परिणतिशक्तिर्नास्तीति भावः। प्राप्त्यभावादिति। स स्वराडिति स्वयमेव स्वस्य राजा=नियन्तेत्यर्थः। तथा नियाम्यत्वनिषेधा-दितिभावः। संशयडोलेति। सिद्धो विकल्पाभावादिति भावः। उत्तरकोटिः= अशक्तेति पक्षः। अकर्मेति। कर्मपारतन्त्र्याभाव इत्यर्थः। स्वातन्त्र्यशब्दाभिप्रेत इति भावः। स्वशक्य इच्छायां सत्याम्प्रतिहत्यभावो वा स्वातन्त्र्यमित्यभिप्रा-येणाह—अप्रतिहतेति। एतदेवोपपादयति—ईश्वरो हीति। पराधीनस्वदेहसृष्टिः— ईश्वरपरतन्त्रस्वदेहसृष्टिः पित्रादिलोकसृष्टिराद्यर्थः। यत्तदित्यादिमूलस्योभयतः पाशा रज्जुरित्यर्थः॥ ६३॥

अक्ष०—मुक्तस्य शारीरकान्ते जगद्व्यापारवर्जमैश्वर्यं साधितम्। किं तत्र शक्तिसत्वेऽप्यनिच्छया तद्व्यापारविरहः उतततच्छक्तिरेव नास्तीति विकल्प्य पक्ष-द्वयेऽपि दोषमाह—स्यान्मुक्त इति। यदि मुक्तस्य जगद्व्यापारे शक्तिरस्ति तदा

विश्वशरीरकत्वप्रसङ्ग इत्यर्थः। अन्यथा जगद्व्यापारोपयिकबहुभवन सङ्कल्पानुपपत्तेः। बहुभवनादेव ह्युपादानत्वनिर्वाह इति भावः। विश्वशरीरकत्वं च "एष सर्वभूतान्तरात्मेति नारायणस्यैकस्यैव श्रुतम्। द्वितीयकल्पमुपादत्ते—स्वाप्यश-क्ताविति। स्वातन्त्र्यहानिप्रसङ्गस्तत्र दोष इत्यर्थः। 'स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदते' इति वचनविरोध इति भावः। श्रुतिविरोधमप्याह—सचेति। स स्वराड्भवतीति हि श्रूयत इति भावः।

सेयं दोषप्रसङ्गरूपतर्करज्जुः व्याप्त्यादिबलवती पक्षद्वयेऽप्यनिष्टापादन-ग्रन्थिकतया दुर्मोचेत्याह—घत्तइति। अत्र द्वितीयपक्षावलम्बनेन प्रतिवक्ति—मैवमिति। देवः—ईश्वरः। तस्य मुक्तस्येच्छां क्वचिदपि न विहन्ति। एतदुक्तं भवति—मुक्तस्य जगद्व्यापारे इच्छैव नोदेति। यत्र पितृलोकादिसृष्टाविच्छाऽस्ति न सा देवेनापि विहन्यत इति। एवमप्रतिहतेच्छत्वेनैव मुक्तः स्वराडित्याम्नायत इति भावः॥ ६३॥

इति पराधीनस्यापि मुक्तस्येच्छाविहतिराहित्यम्

आविर्भूतस्वरूपा निरवधिकसुखब्रह्मभुक्तिस्तु मुक्तिः
सेवात्वाद्दुःखकृत्सा भवति यदि न तद्धर्मिमानेन बाधात्।
पाप्मा चास्मिन्नुपाधिस्स च न खलु तदा पुण्यपापव्यपाया-
दात्मानो विष्णुशेषा इति च सुखमयी सा स्वरूपानुरूप्यात्॥६४॥

सर्वा०—अत्र कश्चित्सिद्धान्त्यभिमतायां मुक्तौ दोषं विवक्षुस्तामनुभाषते—आविर्भूतेति॥ परशेषतैकरसस्वरूपाविर्भावयुक्तेत्यर्थः। वाढमित्यत्र बाधकं शङ्कते—सेवात्वादिति। अयमाशयः; स्वामिभृत्यभावबुद्ध्यनुवृत्तिस्सेवात्मा प्रसिद्धा। सा च दुःखात्मतया तद्धेतुतया वा व्याप्ता। तदत्राऽपि तथा स्यादिति। अत्र धर्मिण्यप्रसिद्धे हेतोराश्रयासिद्धिमभिप्रेत्याह - न तदिति। प्रमिते तद्ग्राहकेण बाधमाह—धर्मीति। श्रूयते हि *रसो वै सः; रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति इति। आनन्दं ब्राह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इति। स्मर्यते च *तदस्य त्रिविधस्यापि इत्यारभ्य—

*निरस्तातिशयाह्लादसुखभावैकलक्षणा।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता॥

इति। सोपाधिकत्वमप्याह—पाप्मेति। नित्यानामनित्यानां वा दुःखकृत्त्वं हि सहकारिणि पापे सत्येव; अनित्यानां तु पापजन्यतयाऽपि। एवं साध्यव्यापकत्वं सिद्धम्। साधनाव्यापकत्वमप्याह—स चेति। पुण्यपापव्यपायादित्यनेन श्रुति-

स्मृतिसूचनम् । अस्तु तर्हि सुखरूपत्वाभावे सेवात्वं हेतुः इत्यत्रापि धर्मिसिद्ध्यसिद्धिविकल्पदौःस्थ्यस्य तदवस्थत्वादव्यक्तमप्रयोजकत्वं व्यनक्ति—आत्मान इति ।

अयं भावः—कर्मोपाधिकसेवा हि कर्मवैचित्र्यात्प्रतिकूला उदासीना किञ्चिदनुकूला च स्यात् । इयं तु निरुपाधिकस्वामिसेवा यथागमं निरवधिकसुखरूपेति । एतेन प्रसङ्गोत्थानमपि निरस्तम् । श्रुतिविरोधे व्याप्तिशैथिल्ये च तस्याप्ययोगात् । ये च मुक्ते ज्ञानचिकीर्षाप्रयत्नसुखदेहादियोगा दुःखादिसाधकाः प्रयोगाः, तेऽपि यथोक्तप्रकारेण प्रतिषेध्याः, ब्रह्मणा चानैकान्ता इति । अथापि यदि मुक्तौ सुखम्, तदा सुखरागान्मुमुक्षुः प्रवर्तत इति कथं वीतरागाधिकारः । रागाच्च प्रवृत्तः प्रागिव बध्येत । हन्त यदि रागस्सर्वो बन्धहेतुरिति मन्यसे ? तद्विशेषो वा ? आद्ये सर्वाभीष्टस्संसारनिवृत्तिरागोऽपि तथा स्यात् । द्वितीये कोऽसौ विशेषः ? सुखविषयत्वमेवेति चेन्न; तादृशस्यापि पापानारब्धत्वादेव दुःखहेतुत्वायोगात् । अथ तदप्यत्र शङ्क्येत, तदा आगमबाध इति एवं मुक्तस्य स्वदेहसृष्ट्यादिरागोऽपि व्याख्यात इति ॥ ६४ ॥

आनन्द०—प्रसङ्गतिरित्यभिप्रायेणाह—अत्र कश्चिदिति । ननु स्वरूपाविर्भावः = स्वरूपप्रकाशः । स च परपक्षेऽप्यस्तीत्याह—परशेषतेति ।

ननु शेषत्वाविर्भावस्य न सेवात्वमित्यत्राह—अयमाशय इति । स्वामिभृत्यभावः शेषत्वम् । तदाविर्भावे सति सेवानुवृत्तिः स्यादिति भावः । प्रतिकूलव्यापार एव दुःखमिति पक्षावष्टम्भेनाह—दुःखात्मतयेति । व्याप्तेति । दुःखेनेति शेषः । परसेवा प्रमाणतःसिद्धा न वेति विकल्प्याद्य आह—अत्रेति । द्वितीय आह—प्रमित इति ।

ननु "रसो वै स" इत्यादिष्वानन्दप्राप्तिः प्रतिपाद्यते । न तावता दुःखात्यन्ताभाव इत्यत्राह—स्मर्यते चेति । भेषजत्वं संसारदुःखनिवर्तकत्वं, न च तस्यां दशायां दुःखव्याप्तिसंभवः, नापि दुःखाजनकत्वं, प्रतियोगिनोऽतिरिक्तनिवर्तकस्य निवर्तकस्वरूपत्वायोगादिति भावः ।

ननु सेवा, दुःखं तद्व्याप्या वेत्यत्र पाप्मोपाधिरित्ययुक्तं यत्र दुःखं तद्व्याप्यता वा तत्र पाप्मेति व्याप्त्यभावादित्यत्राह—नित्यानामिति । प्रतिकूलानामेव दुःखत्वमिति पक्षे नित्यानामपि प्रतिकूलानां संभवादिति नित्यदुःखसंभव इति भावः । तत्र पापसम्बन्धित्वमुपाधिः तच्च तत्सहकारिकत्वात्तज्जन्यत्वं वा विवक्षितमिति न दोषः । श्रुतिस्मृतिसूचनमिति । "सर्वे पाप्मानः प्रदूयन्तेऽस्वइव रोमाणि विधूय पापन्तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपै"तीति श्रुतिः, "ऋते योगात्कर्मकक्षं योगाग्निःक्षपयेत् पापं यथाऽग्निरुद्धतशिखे" त्यादिस्मृतिः । उपाधिरहितत्वादिदं साध्यं भवत्वित्यत्राह—अस्तु तर्हीति । सुखरूपत्वाभाव

इत्युपलक्षणम्। सुखादावव्याप्यत्व इत्यपि बोध्यम्। पापसंबन्धित्वं न साध्यव्याप्तमिति भावः। अव्याप्तत्वादेवाह—अयं भाव इति। सेवायां वैचित्र्यमनुभवसिद्धं यथा निर्घृणस्य सेवा दुःखात्मिकैव, यथा वा युवतिकामिनः सेवा सुखात्मिकैव, यथा वा मृदादेः स्वामिनः सेवाऽनुभयात्मिकेति, न तावद्दुःखाद्यात्मकत्वे सेवात्वं प्रयोजकं तस्माद्व्यवस्थितं प्रयोजनान्तरमन्वेषणीयम् तदन्वेषणे कर्मैव स्यादिति भावः।

ननु सुखरूपत्वेऽपि कर्मैव कारणमिति तदभावे कथं तत्वमित्यत्राह - यथागममिति। आनुकूल्यं न कर्माधीनमपि तु स्वभावायत्तम्। संसारिणस्तु प्रतिकर्मकृतं वैचित्र्यमिति भावः।

ननु सिध्यसिद्धिव्याघात इत्ययुक्तं तर्के दोषाभावादित्यत्राह—एतेनेति। एतच्छब्दार्थमाह—श्रुतिविरोधेति। श्रुत्या सेवाविशेषस्य सुखरूपत्वे निश्चिते व्याप्तिरूपाङ्गवैकल्यमिति भावः।

ननु मुक्तो दुःखी. ज्ञानादिभ्योऽस्मन्मतवदिति चेत्त्राह—ये चेति। आदिशब्देन जक्षणादयः। दुःखादीत्यादौ आदिशब्देन मोहादि गृह्यते। यथोक्तप्रकारेणेति। सिध्यसिद्धिव्याघातः। श्रुत्यादिविरोधोऽप्युपाधिरित्यर्थः। ज्ञानचिकीर्षाप्रयत्नहेतूनां व्यभिचारमप्याह—ब्रह्मणा चेति। रागाच्चेति। रागाधीनप्रवृत्तेर्बन्धकत्वादिति भावः। सर्वाभीष्टस्तवापि सम्मतः।

ननु तत्र रागान्न प्रवृत्तिरपि तु संसारद्वेषादिति चेत्, हन्त! तर्हि सुतरां तादृशप्रवृत्तेर्बन्धहेतुत्वमिति भावः। तादृशस्यापीति। पापारब्धत्वमुपाधिरिति भावः। तदप्यत्रेति। पापारब्धत्वमपीत्यर्थः। आगमबाधेति। "तदा विद्वान्पुण्यपापे विधूये" त्यागमबाधेत्यर्थः। आदिशब्देन जक्षणादयो गृह्यन्ते।। ६४।।

अक्ष०—अत्र कश्चित् सिद्धान्त्यभिमतमुक्तिमनूद्य तत्र दोषमाविष्करोति—आविर्भूतेत्यादिना। अपहतपाप्मत्वादिविशिष्टयथावस्थितस्वस्वरूपं यस्यामाविर्भूतं सा निरतिशयसुखब्रह्मानुभूतिरेव मुक्तिरित्युच्यते। तत्र दुःखकृत्त्वं-सेवात्वेन हेतुना साध्यते। लोके परसेवायाः दुःखहेतुत्वदर्शनात् इति भावः। परिहरति—न तदिति। उक्तानुमानस्य बाधमाह—धर्मिमानेनेति। "रसोवैसः' रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति"

निरस्तातिशयाह्लादसुखभावैकलक्षणा।
भेषजं भगवत्प्राप्तिरैकान्त्यात्यन्तिकी मता।।

इत्यादिमुक्तिस्वरूपधर्मिग्राहकश्रुतिस्मृतिप्रमाणबलात् बाधसंभवादुक्तानुमानं बाधितमसाधकमिति भावः। सोपाधिकत्वमप्याह—पाप्मेति। पापजन्यत्वमुपाधिः इति भावः। अयोग्यसेवायां साध्यव्यापकत्वं स्पष्टम्। साधनाव्यापकत्वमाह—स च न

खल्विति । तदा मुक्तिकाले इत्यर्थः । पुण्येति—तदानीं सुकृतदुष्कृतधूननश्रवणात् इति भावः । तदानीं सुखाभावसाधनं प्रत्याह—आत्मान इति । स्वाभाविकशेषत्वज्ञानवतां निरुपाधिकस्वामिसेवा यथागमं सुखप्रचुरैव स्यात् आत्माभिमानानुगुणत्वात् पुरुषार्थव्यवस्थाया इत्यर्थः । अत्रापि कर्मोपाधिकत्वं स्वाभाविकशेषत्वज्ञानाप्रयोज्यत्वं वा उपाधिः स्यादिति भावः ॥ ६४ ॥

सर्वस्याप्यानुकूल्यं स्वत इह जगतो वासुदेवात्मकस्य
व्यक्तिं तन्मुक्तिकाले भजति भवकृतज्ञानसङ्कोचहानेः ।
प्राचीनप्रातिकूल्यक्रमविषयधिया नैष दुःख्येत्तदानीं
प्रागप्येतत्स्वकर्मोपधिकृतभगवन्निग्रहैकप्रयुक्तम् ॥ ६५ ॥

सर्वा०—ननु यदि मुक्तस्सर्वज्ञः, स कथं न दुःख्येत् ? विषयविशेषसंदर्शनं हि बद्धस्यापि दुःखहेतुः, अबुद्धिपूर्वकदुःखोत्पत्त्यसंभवात् । न चानुकूलमात्रविषया मुक्तधीः, *सर्वं हि पश्यः पश्यति इति श्रुतेस्सङ्कोचानभ्युपगमात् । *न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् इति पूर्वोक्त्या सोढव्यस्सङ्कोच इति चेन्न; सङ्कोचकानां निश्शेषक्षीणत्वात् । न चात्र, *काणतां जनयेद्दीपो निम्बवृन्दाकरेणुमान् इतिवत्किञ्चिन्निमित्तमन्तरेण स्वतःप्राप्तप्रकाशैकदेशभङ्गः स्यात्; *मण्डूकवसयाऽक्ताक्षा वंशानुरगबुद्धिभिः इतिवद्वा केनचिद्धेतुना प्रागनुकूलेषु प्रतिकूलबुद्धिर्युक्ता । इदानीं तु प्रतिकूलेष्वनुकूलधीर्यदि तादृशोपाधितस्स्यात्, तथा सति भ्रान्त्यनुवृत्त्या कर्माद्यनुवृत्तिरपि दुर्वारा । एतेन नित्यानां मुक्तानां च क्वचिदस्थानभयशङ्कावादोऽप्यन्यपरतया नेतव्यः । एवं मुक्तबुद्धेस्सङ्कोचासङ्कोचविकल्पासहतयाऽत्र पाषाणकल्पपक्ष एव ज्यायानिति । तत्राह—सर्वस्येति । यदि स्वतोऽनुकूलस्वामिभूतितया दृश्यमानं हि सर्वमपि स्वतोऽनुकूलमेव भायात्, तर्हि बद्धदशायामपि तथा भासेतेत्यत्राह—व्यक्तिमिति । तादृक्त्वं प्रतिबन्धकविगमे हि प्रकाशेत; अनुकूलस्वभावं ब्रह्मवत्तदात्मकं सर्वं कथमिदानीं कैश्चित्प्रतिकूलतया गृह्यत इति चेत्, इत्थं—कर्मसंवृतधियां यथाकर्म भानभेदोपपत्तेः । यथाऽऽहुः—

वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च ।
कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः ॥ इति ।
*तदेव प्रीयते भूत्वा पुनर्दुःखाय जायते ।
तदेव कोपाय यतः प्रसादाय च जायते ॥ इति च ।

अत उपाधिविगमे स्वतःप्राप्ताभिव्यक्तिर्युक्ता । ननु संसृत्यवस्थासिद्धं निरयाणां प्रातिकूल्यं स्वानुभूतं च दुःखं मुक्तः पश्यति वा ? न वा ? आद्ये, *गन्धाश्मरजसा स्पृष्टो नष्टो दीपः पुनर्ज्वलेत् इति न्यायेन पुनरपि दुःखसन्ततिरुदियात् । उत्तरत्र धीसङ्कोचाभ्युपगमप्रसङ्गः, तथाऽपि दुःखित्वं स्यात्तस्य तद्व्याप्त्यङ्गीकारादित्यत्राह—प्राचीनेति । क्रमशब्दः तदातनसन्तानसूचनार्थः,

कर्मानन्तर्यपरो वा। तदानीं—मुक्तिकाले। न हि प्राप्ताभिषेकं प्राचीनकारागृहवासधीर्दुःखाकरोति। स्वाधारवर्तमानसुखादिसाक्षात्कारं च भोगमाहुः। प्रसिद्धं च—*प्राप्तानि दुःखान्यपि दण्डकेषु संचिन्त्यमानानि सुखीबभूवुरिति। पूर्वमपि प्रातिकूल्यं प्रत्युक्तम्, तन्निवृत्तौ कथं तत्स्यादित्यभिप्रायेणाह—प्रागपीति ॥ ६५ ॥

आनन्द०—आक्षेपसङ्गतिमाह—नन्विति। विषयविशेषः प्रतिकूलरूप इत्यर्थः। अन्त्यहेतुक एवास्त्वित्यत्राह—अबुद्धीति। प्रतिकूलरूपा बुद्धिरेव दुःखमिति तदावश्यकं तदन्यत्वेऽपि तज्जनकतयाऽपि आवश्यकमिति भावः।

ननु प्रतिकूलविषयज्ञानाभावान्न दुःखमित्यत्राह—न चेति। हेतुमाह—सर्वंहीति।

ननु पूर्ववाक्यमेव सङ्कोचकमिति शङ्कते—न पश्य इति। अर्थविरोधान्न-सङ्कोचः। कर्तुं शक्यो न ह्यागमास्सहस्रमपीति न्यायादित्यत्राह—न सङ्कोचकानामपीति। कर्मणां हि धीसङ्कोचकत्वम्। कर्माणि च निश्शेषं नष्टानीत्यर्थः।

ननु दीपः सर्वप्रकाशकोऽपि निम्बादितैलविशेषवर्तिश्छादयत्यप्रकाशयति, तथा प्रतिबन्धकाभावेऽपि प्रतिकूलप्रकाशो न। यद्वा वंशोरगन्यायेन प्रतिकूलस्याप्यनुकूलतया प्रकाशो भवेदिति परिहरति न चेति।

नन्वनुकूलरूप भ्रान्त्यनुवृत्त्यैव तदनुगुणकर्मानुवृत्तिरप्यस्तु। कर्मनिवृत्तिशास्त्रमपि मुमुक्षुप्रतिकूलकर्मपरम्। अत एव नित्यानां मुक्तानाञ्चास्थानभयहेतुभ्रान्तिरित्यत्राह—एतेनेति। अयमाशयः, यदि भ्रान्तिरेवानुकूला वर्तेत तदा ब्रह्मणो निर्गुणत्व जडत्वादिकमस्तु। न च सगुणश्रुत्यादिविरोधः, तासां भ्रान्तिसिद्धगुणपरत्वसम्भवात् सर्वतत्त्वव्यवस्थाऽपि न स्यादनुकूलभ्रान्तिप्रतिपादकत्वेनाप्युपपत्तेः। अत एव न कर्मानुवृत्तिः न च नित्यमुक्तादौ भ्रान्तिसम्भवः। तद्वचनानां स्नेहातिशयपरत्वादिति भावः। पूर्वपक्षमुपसंहरति—एवमिति। तर्हीति विद्यमानस्य भाननियमादिति भावः। ननु प्रतिबद्धमस्त्वनुकूलतया भानं, प्रतिकूलतया भाने को हेतुरित्याशङ्कते—अनुकूलेति– तदात्मकं सर्वमनुकूलस्वभावमित्यन्वयः। कर्मेति शुक्तिभानप्रतिबन्धकदोषस्य रजतभ्रमहेतुत्ववदानुकूल्यप्रकाशप्रतिबन्धकस्यैव प्रातिकूल्यभानहेतुत्वादिति भावः।

ननु प्रातिकूल्यं क्वचिद्वस्तुनि वर्तते न वा, यदि वर्तते तदा तत्साक्षात्काराद्-दुःखापत्तिः। न च प्रातिकूल्यज्ञानेऽपि कर्माभावाद्दुःखानुत्पादः कर्मणामपि प्रातिकूल्यबुद्धिद्वारा दुःखहेतुत्वादन्यथा सर्वस्याप्यानुकूल्यं स्वभाव इति कल्पनं व्यर्थम्। प्रातिकूल्येऽपि कर्मविरहाद्दुःखानुत्पत्तेः। न द्वितीयः, क्वचिदपि प्रातिकूल्याभावे तदध्यासायोगात्। किं चानुकूल्यमपि दुर्वचम्, न तावत्सुखात्मकत्वमसिद्धेः, नापि तज्जनकत्वं सुखादावव्याप्तेः। नाप्यनुकूलतया बुद्धिविषयत्वमात्माश्रयान्योन्याश्रयादिप्रसङ्गादिति चेत्,

अत्र वदन्ति—प्रातिकूल्यं क्वचिद्वर्तत एव। किन्तु तत्कर्मकृतं सप्रतियोगिकं स्यादिति चेदस्तु को दोषः। आत्ममात्रप्रतियोगिकं तदिति दोषाभावात्। न च संसारदशायामपि तत्प्रतीतिप्रसङ्गः, संसारदशायां प्रतिबन्धस्योक्तेः। अत एव न द्वितीयइत्यादिकमप्यपास्तम् । औपाधिकसप्रतियोगिकप्रातिकूल्यस्याप्यङ्गीकारात्। यदपि किं चेति, तदपि न। सुखदुःखाभावतत्साधनान्यतमत्वस्य तत्समकालनियतस्य कस्यचिद्धर्मस्य वा तत्त्वादिति।

अन्येत्विच्छाविषयताप्रयोजकधर्मत्वेनानुगतीकृतानां सुखत्वादीनामेव तत्त्वम्। यथा सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेनानुगतीकृतानां शब्दत्वादिव्याप्यजातीनां तारत्वमित्याहुः।

अपरे त्वत्र विवक्षितमानुकूल्यं सुखजनकज्ञानविषयसुखजनकत्वमेव। प्रातिकूल्यमपि तादृशदुःखजनकत्वमेव। अत एव "वस्त्वेकमेवे"त्यादि निदर्शनञ्च। किंच सुखादावव्याप्तिरीदृशानुकूल्याभावेऽप्यहानेः तत्र हीतरव्यावृत्तमानुकूल्यमित्याहुः। गन्धाश्मेति—भञ्जकद्रव्यविशेषः। तस्येति—धीसङ्कोचस्य दुःखव्याप्तत्वादित्यर्थः। प्राचीनानां प्रातिकूल्यानामनुवृत्तौ तदापि दुःखप्रसङ्गादाह—कर्मानन्तर्यपरो वेति। तच्छब्दस्य प्राक्परत्वं वारयति—मुक्तिकाल इति। न हीति—अतीतसर्पादिवन्न दुःखकरीति भावः।

ननु सुखसाक्षात्कारस्य सुखानुभवत्ववत् दुःखसाक्षात्कारस्यापि दुःखानुभवत्वात्कथं मुक्तो न दुःख्येदित्यत्राह—स्वाधारेति। स्वाधारेत्यन्यगतस्य व्यावृत्तिः। वर्तमानेत्यतीतस्य व्यावृत्तिः। नापीश्वरस्य सर्वदुःखाश्रयत्वात्स कथं न दुःख्येत् न च स्वकर्मकृतस्वगतवर्तमानदुःखसाक्षात्कर्तृत्वं दुःखभोक्तृत्वमिति वाच्यम्। सुखेऽपि तथेश्वरनित्यमुक्तानां ब्रह्मानन्दानुभवो न स्यान्न च दुःखानुभव एव स्वकर्मकृतत्वादिविशेषणम् तथा सति स्वाधारेत्यादिवैयर्थ्यापातादिति चेत्,

अत्राहुः—दुःखेन न साक्षात्संबन्धः, चेतनद्वारकत्वात्तत्संबन्धस्य। साक्षात्संबन्धनैव तदाश्रयत्वस्य दोषत्वादत एव प्रपञ्चाश्रयस्य तद्गतदोषासंस्पर्श इति।

ननु नित्यमुक्तयोर्भगवदानन्दानुभवो न स्यात्स्वगतत्वाभावादिति चेन्न। तद्गोचरसाक्षात्कारान्महत्तरं सुखं भवति। तदनुभव एव ब्रह्मानन्दानुभव इत्युच्यते तन्मूलकत्वादिति।

अन्ये तु स्वगतत्वं साक्षात्स्वापृथक्सिद्धत्वं, तच्च द्वेधा। धर्मितया, धर्मतया च। ब्रह्मणोऽपृथक्सिद्धानन्दत्वात्तदनुभव उपपद्यते। न च ब्रह्मधर्मानन्दाननुभवप्रसङ्गः। तेनाप्यपृथक्सिद्धत्वादित्याहुः।

आदिशब्देन दुःखपरिग्रहः। वर्तमानत्वविशेषणप्रयोजनमाह—प्रसिद्धं चेति। सुखीभूतत्वं प्रतिकूलत्वाभावः। इदमुपलक्षणम् सुखस्याप्यतीतस्य दुःखीभावस्य। पूर्वमपीति तत्तत्पुरुषं प्रति प्रातिकूल्यस्य पापाधीनत्वात्तन्निवृत्त्याऽपि निवृत्तिरिति भावः॥ ६५॥

अक्ष० —मुक्तस्य सर्वज्ञत्वोपगमेन प्रतिकूलविषयदर्शनस्याप्यावश्यकत्वात् ततस्संसारदशायामिव दुःखयोगो दुर्वारस्स्यादित्यत्राह—सर्वस्येति। स्वस्वामि-वासुदेवविभूतित्वात् जगत्सर्वमपि अनुकूलतयैव तदा भासत इति भावः। कथं तर्हि संसारदशायां प्रातिकूल्यदर्शनमित्यत्राह—व्यक्तिमिति। मुक्तिकाल एव कर्मा-धीनज्ञानसंकोचात्यन्तनिवृत्त्या सर्वानुकूल्यमभिव्यक्तं भवतीति भावः। संसार-दशानुभूतप्रातिकूल्यस्मरणात् दुःख्येदित्यत्राह—प्राचीनेति। प्राप्ताविषयकस्य राजकुमारस्य प्राचीनस्वनिरोधककारागृहस्मरणात् न दुःखमुत्पद्यत इति भावः। मुक्तिकालेऽनुकूलतया भासमानानां कथं प्राक् प्रातिकूल्यमित्यत्राह—प्रागपीति। स्वकर्माधीनभगवन्निग्रहात् प्राक्दुःखं मुक्तिदशायां कर्मनिश्शेषक्षयात् न दुःखमिति भावः ॥ ६५ ॥

इति निरुपाधिकब्रह्मानुभवस्य दुःखरहितनिरतिशयानन्दत्वम्

अन्ये चानादिशुद्धाः श्रुतिसमधिगतास्सूरयस्सन्त्यसङ्ख्याः
कर्माभावादनादेर्न तु भवति कदाप्येषु संसारबन्धः।
शेषाणां शेषिणश्च स्फुरति सुखतया सर्वदा सर्वतत्त्वे
नित्यानां मुक्तिभाजामपि भुवनकृता भोगमात्रं समानम् ॥६६॥

सर्वा० —यत्तु तन्त्रान्तरस्थैरुच्यते—*मुक्तात्मानोऽपि शिवाः किं त्वेते यत्प्रसादतो मुक्ताः। सोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनुः॥ इति तत्र श्रुतिविरोधमभिप्रेत्याह—अन्य इति॥ श्रुतिसमधिगताः—*सदा पश्यन्ति इति श्रुत्या निर्बाधमधिगता इत्यर्थः। नह्यसौ श्रुतिर्मुक्तविषया, मुक्तानामेकैकशस्सदा दर्शनाभावात्। इयं हि दर्शनं सदेति विशिषत्यपि सदादर्शनविशिष्टान् सर्वान् स्वरसतोऽवगमयति। न त्वादिमद्दर्शनप्रवाहसातत्यम्, तत्र बहुवचनस्य सङ्कोच-कादृष्टेः। उपबृंहणतश्च कपिञ्जलन्यायानवतारादसंख्या इत्युक्तम्।

ननु परतन्त्रचेतनानामस्मदादिवत्संसृतिरवर्जनीया। अथ कथमनादिसिद्ध-त्वमित्यत्राह—कर्माभावादिति। उक्तहेतुना कर्माप्यवर्जनीयमिति चेन्न, सदादर्शन-श्रुत्यैव मिथ्याज्ञानादिपूर्वकस्य कर्मणः प्रत्यासेधात्। अन्यथा कथमीश्वरोऽ-प्यङ्गीक्रियते ? मा भूदिति चेत्, श्रुतिबाध इति शेषं पठ। सर्वप्रशासितुश्शास्त्र-वश्यत्वाभावान्न कर्मवश्यत्वमिति चेन्न, पारतन्त्र्येऽप्यनादिसर्वज्ञानामपि तदभावं पश्य।

अथापि कर्माभावो न तावदन्योन्याभावः, संसृत्यभावं प्रत्यप्रयोजकत्वात्। न प्रागभावः, तस्य भावशिरस्कत्वात्। न प्रध्वंसः, भावपूर्वकत्वात्। न संसर्गा-भावः तस्यापि प्रागभावादिविकल्पदोःस्थ्यादिति चेत्; तन्न कर्मात्यन्ताभावस्य विवक्षितत्वात्, अन्यथा ईश्वरेऽप्येवं विकल्पप्रसङ्गात्। नित्येषु च नाशकारणा-

भावान्नाशाभाव इत्यभ्युपगमस्य भङ्गप्रसङ्गात्। कस्य चिदनादिसिद्धत्वे को हेतुरिति पृच्छन्तस्त्वहेतुविद्भिरनुग्राह्याः। अत एव कथमीश्वरस्य क्वचिदिच्छा नित्या क्वचिदनित्येति वैषम्यानुयोगश्च विधूतः। न चाधिकारवैचित्र्यादनन्तादिष्वक्षेत्रिष्विन्द्रादिवत् क्षेत्रित्वानुमितिश्शक्या, स्वच्छन्ददेशावतारवत्। यदपि मुक्तानां शिवत्वमुक्तम्, तत्किमीश्वरतादाम्यं तज्जातीयत्वं वा तद्गुणसाम्यं वा? नाद्यः, हेतुमुक्तस्यानादिमुक्ततादात्म्यासंभवात्। न द्वितीयः, *न तत्समश्चाभ्यधिकश्च, *न त्वत्समोऽस्तीत्यादिविरोधात्। न तृतीयः, पारतन्त्र्येऽपि शुद्धिमाङ्गल्यसार्वज्ञ्यादिमात्रेण तत्सिद्धेः। अथ नित्यानां मुक्तानामनीश्वरत्वे तद्भोगसाम्यं न स्यादिति मन्वीथाः, तत्र ब्रूमः—शेषाणामिति। स्वतन्त्रपरतन्त्रयोर्यथादृष्टि भोग्यसाम्याद्भोगसाम्यं युज्यते। सूत्रितं चैतत्—*भोगमात्रसाम्यलिङ्गाच्चेति ॥ ६६ ॥

आनन्द०— प्रसङ्गसङ्गतिमाह—यस्त्विति। तन्त्रान्तरस्थाः शैवाः सर्वेषां शिवत्वे किमुपास्यमित्यत्राह—सोऽनादीति। एकस्स शिवस्तेष्वनादिमुक्तसिद्ध एव पञ्चमन्त्रतनुः पञ्चाक्षरप्रतिपाद्यतयोपास्य इत्यर्थः। "अनादिमुक्तः स एक" इत्युक्त्या नित्या न सन्तीति भावः। श्रुतिः सदा पश्यन्तीत्यादिश्रुतिः।

ननु मुक्तप्रवाहदर्शनसान्तत्यमादाय मुक्ता एव प्रतिपाद्या इत्यत्राह—इयं हीति। ननु "वसन्ताय कपिञ्जलानालभेते" त्यत्रेव सङ्कोचे नित्यानन्त्यं न स्यादित्यत्राह—उपबृंहणतश्चेति प्राजापत्यविधाविव वचनविरोधान्न न्यायप्रवृत्तिरिति भावः।

ननु योग्यार्थतया श्रुतिर्मुक्तविषयेत्याशङ्कते नन्विति। हेत्वसिद्धिमाशङ्कते—उक्तहेतुनेति। बाधितत्वान्न कर्मानुमितिरिति नासिद्धिरित्याह—नेति।

ननु मानविरोधाच्छ्रुतिर्बाधितेति चेत्तर्ह्यात्मत्वात्कर्मवश्यत्वापत्त्या जगत्कर्तापि न सिध्येदित्यत्राह—अन्यथेति। न्यायागतेऽर्थे किं कुर्म इत्याशङ्कते—मा भूदिति। श्रुतित एवानुमानबाध इत्यत्राह—श्रुतिबाधमिति।

नन्वात्मत्वमात्रमप्रयोजकम्। किन्तु शास्त्रवश्यत्वविशेषितमिति शङ्कते—सर्वेति। तर्हि पारतन्त्र्यं न प्रयोजकमपि तु शास्त्रवश्यत्वविशेषितं पारतन्त्र्यं तदेव वा प्रयोजकमिति पश्येत्याह—नेति।

नन्वभावविकल्पे क्षोभान्ननित्येति शङ्कते—अथेति। संसृतीति तस्मिन्सत्येव बद्धे संसारदर्शनादिति भावः। भावशिरस्कत्वादिति प्रतियोगिव्याप्ततया नित्यशुद्धयभावप्रसङ्गादिति भावः। भावपूर्वकत्वादिति। अनादिसिद्धत्वाभावेन मुक्तत्वप्रसङ्गादिति भावः। तस्यापीति विशेषातिरिक्तसामान्यानभ्युपगमादिति भावः।

ननु कर्मात्यन्ताभावः कर्मकारणाभावे; सति तस्मिन् स चेत्यन्योन्याश्रय इति चेत्तत्राह—नित्येषु चेति ।

ननु सर्वेषाम्पारतन्त्र्याविशेषेऽपि कस्यचिदेव नित्यत्वमन्यस्य नेति कुत इत्याशङ्क्यां पदार्थत्वाविशेषेऽपि कस्य चिच्चेतनत्वं, कस्यचिदेव दण्डादिजन्यत्वमिति तद्ग्राहकप्रमाणसिद्धमिति परिहरति—कस्यचिदिति । क्वचिदिति नित्यपदार्थेषु नित्यसूरिषु चेश्वरस्येच्छा नित्यैव वैरूप्याभावेन तन्नानात्वे प्रमाणाभावादनित्यजगत्सृष्टिमुक्त्यादिष्विच्छाऽनित्येति भावः । अधिकारेति शयनवहनादिरूपाधिकारवैषम्यादिति भावः । क्षेत्रित्वं कर्मवश्यत्वम् । अनन्तगरुडविष्वक्सेनादयः क्षेत्रिणः । नियताधिकारवत्वादित्यनुमाने व्यभिचार इत्याह—स्वच्छन्देति सङ्कर्षणानिरुद्धादिवदित्यर्थः । हेतुमुक्तस्येति सादित्वानादित्वयोर्विरोधादिति भावः ।

ननु परतन्त्रस्य स्वातन्त्र्येण भोगसाम्यमयुक्तमिति शङ्कते—अथेति । भोगसाम्ये भोग्यसाम्यं तन्त्रम् । न स्वातन्त्र्यादिति परिहरति—स्वतन्त्रेति ।

नन्वत्र कथम्भोगसाम्यम्पारतन्त्र्यवैषम्यदर्शनादित्यत्राह—सूत्रितञ्चेति । "सोऽश्नुते सर्वान्कामान्त्सह, ब्रह्मणा विपश्चितेति" मुक्तस्य ब्रह्मानुभवभोगमात्र ब्रह्मसाम्यवचनाल्लिङ्गाच्चावगम्यत इत्यर्थः ॥ ६६ ।

अक्ष०-निरतिशयसुखब्रह्मानुभवशालिनः मुक्तेभ्योऽन्ये च नित्यसूरयस्सन्तीति आह—अन्ये चेति । अनादीति —कर्मकृतज्ञानसकोचादिरूपाशुद्धचत्यन्ताभाववन्तः । श्रुतीति—सदा पश्यन्ति सूरयः इत्यादिश्रुतिसमधिगता इत्यर्थः । असंख्या इति बहुवचनस्य संकोचकादृष्टेरिति भावः । तेषु कुतो न संसार इत्यत्राह—कर्माभावादिति । स एव कुत इत्यत्राह अनादेरिति । नित्यत्वेनाहेतुक इत्यर्थः । आगन्तुकत्वे सति निर्हेतुकत्वं न स्यादिति भावः । तेषां मुक्तानां ईश्वरस्य च भोगमात्रे साम्यमाह—शेषाणामिति । सर्वेषां सर्वतत्वस्यानुकूलतया स्फुरणादिति भावः । भुवनकृता—जगद्व्यापारकृता—जगदीश्वरेणसहेत्यर्थः । नित्यादीनां जगद्व्यापाराभावेऽपि पितापुत्रभावेन भोगमात्रसाम्यमुपपन्नमिति भावः ॥ ६६ ॥

इति नित्यसूरिसिद्धिः, नित्यमुक्तेश्वराणामपि भोगसाम्यं च

सालोक्याद्याः प्रभेदा ननु परिपठिताः क्वापि मोक्षस्य मैवं
सायुज्यस्यैव तत्त्वात्तदितरविषये मुक्तिशब्दस्तु भाक्तः ।
तस्मिंस्ते च त्रयस्स्युस्तदपि च सयुजोर्भाव इत्यैकरस्यं
युक्तसाम्यं [लोक]योगसाम्यादिवदपटुधियां तावतैक्यमोहः॥६७॥

सर्वा०—नन्वग्निहोत्रदर्शपूर्णमासादिसाधनविशेषात्तत्साध्यस्वर्गे तारतम्यमङ्गीकुर्मः, तथा मोक्षोऽपि स्यात्; अन्यथा कथमाप्तशास्त्रे क्वचित्सालोक्या-

दिमुक्तिभेदकथनमिति शङ्कते—सालोक्येति ॥ तेषु मुक्तिशब्दो न मुख्य इत्यभिप्रायेणाह—मैवमिति । मुख्यं मुक्तिशब्दविषयमाह—सायुज्यस्येति । अन्यत्र प्रयोगः कथमित्यत्राह– तदितरेति । तथा च नियम्यते—

*लोकेषु विष्णोर्निवसन्ति केचित्समीपमिच्छन्ति च केचिदन्ये ।
अन्ये तु रूपं सदृशं भजन्ते सायुज्यमन्ये स तु मोक्ष उक्तः ॥ इति ।

तर्हि सायुज्ये सालोक्यादिभोगाभावात् भोगसाम्यसूत्रं परिमितविषयं स्यादित्यत्राह—तस्मिन्निति । सायुज्ये हि सहस्रे शतादिकमिव सालोक्यादित्रिकमन्तर्भवतीति एकस्मिन्वाक्ये ब्रह्मसायुज्यसालोक्ययोस्सपाठोऽप्येवमन्तर्भावविवक्षया मुख्यगौणमुक्त्यपेक्षिपुरुषभेदानुरोधाद्वा यथार्हं निर्वाह्यः । ननु यदि सायुज्यमेव मोक्षः, तदा पूर्वोक्तं भोगसाम्यं न स्यात् । ऐक्यापत्तिरेवहि सायुज्यम् । अतः कस्य केन भोगसाम्यमित्यत्राह—तदपीति । नन्वेकीभूतयोर्भावो हि सयुजोर्भावः । तत्र परं प्राचीनब्रह्मानन्दानुवृत्तिमात्रमेव स्यात् । *अन्यूनश्चाप्यवृद्धिश्चेत्ति स्थापनात् । अतो भोक्तृद्वित्वाभावाच्चोद्यं तदवस्थमित्यत्राह—युक्साम्यमिति । अत्र सालोक्यादिनयाद्भुज्यमानं युक्छब्दार्थः । तेन भोगसाम्यमाक्षिप्यते । सायुज्यसार्ष्टितासहपाठे तु कण्ठोक्तम् । न हि सयुक्शब्दएकशब्द पर्यायः; तथा क्वचिदपि प्रयोगाभावात् । *द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते इति द्वयोरेव प्रयोगाच्च । *तयोरन्यः इत्युत्तरवाक्ये च स्पष्टमेतत् । *एतासामेव देवतानाँ सायुज्यम् इत्यत्र बहुदेवतासायुज्यं युगपत् ? क्रमेण वा ? नाद्यः, भिन्नैरेकस्य युगपदेकतापत्त्ययोगात् । न द्वितीयः, विभागाविभागविकल्पदौःस्थ्यात् । विभागयोग्यत्वे हि संयोगविशेषमात्रं स्यात् । तदभावे तु क्रमेणोत्तरोत्तरतादात्म्यादेकपरिशेषः स्यात्; न चैतत्क्वचिद्दृष्टमिष्टं वा । यदि कश्चिन्नैघण्टुकः ऐक्यं सायुज्यमिति पठेत् तत्तस्य स्वपक्षाभिनिवेशेन शब्दशक्तिग्रहणापरिबुद्धतया वा प्रयुक्तमित्युपेक्षणीयम् । द्वित्वे स्थितेऽपिसरित्समुद्रसलिलयोरिव संभेदविशेषकृतमेकराशित्वं वा विवक्षितम् ॥ ६७ ॥

आनन्द०—ननु सर्वेषाम्भोगसाम्यकथनमयुक्तं सालोक्यादिभेदेन मोक्षस्य भिन्नत्वादिति पूर्वाक्षेपेण सङ्गतिरित्यभिप्रायेणाह - नन्विति । अत्रापि दहरविद्यादिभेदेन साधनानाम्भिन्नत्वादिति भावः ।

ननु तृणारणिमण्यादिवत्साधनभेदो न साध्यभेदकोऽप्रयोजकत्वादित्यत्राह–अन्यथेति—

मोक्षं सालोक्यसारूप्यं प्रार्थयेत नराधमः ।
इच्छाम्यहं महाबाहो ! सायुज्यन्तव सुव्रत ! ॥

इत्यादावित्यर्थः । तेष्विति तथा चाप्रयोजकमिति भावः ।

नन्वत्रामुख्यत्वे को हेतुरित्यत्राह—तथा चेति। सायुज्यस्यैव मोक्षशब्द-मुख्यार्थत्वमन्येषाममुख्यत्वमिति नियम्यत इत्यर्थः। सायुज्ये हीति सालोक्यादि-कन्नान्तरीयकमिति भावः।

ननु "ब्रह्मणः सायुज्यङ्गच्छति सार्ष्टितां—समानलोकतामाप्नोति" इति सहपाठः कथम्? तदन्तर्भावे च पृथगभिधानवैयर्थ्यादित्याशङ्क्य तदन्तर्भाव-द्योतनार्थमेवेत्याह—एकस्मिन्वाक्य इति।

ननु स्वगतान्तर्भावाभावे सहपाठोऽपि नान्तर्भावकः। तदन्तर्भावे च पृथग-भिधान(वैयर्थ्यादित्याशङ्क्य)व्यर्थमित्यभिप्रायेणाह—मुख्येति। यो यदिच्छया ब्रह्म उपास्ते स तत्प्राप्नोतीति न वैयर्थ्यमिति भावः। नन्विति तथा च भोगसाम्य सालोक्यादावेवेति सालोक्यादिकमेव भवत्पक्षे मोक्ष इति भावः। नन्वेकीभूतयोरिति समानौ युजौ; सामानाधिकरण्यमित्यादिप्रयोगादेकपर्यायस्य समानस्य सज्यो-तिरितिवत्सभावः ततो भावप्रत्ययेनैक्यमित्यर्थः। अत्र किं सायुज्यशब्दोऽवय वशक्त्यैक्यं बोधयति, रूढ्या वेति विकल्प्याद्यं दूषयति अत्र सालोक्येति—सालोक्यादिशब्दानां बहुव्रीहिसमासतया तत्साहचर्यात्सायुज्यशब्दोऽपि तादृशः। तत्र युक्छब्दः कर्मणि क्विबन्तो युज्यमानार्थतया भोग्यपरः। तथा च भोग्यसाम्यं लक्ष्यत इत्यर्थः। भोग्यसाम्ये भोगसाम्यं सिध्यतीत्याह—तेनेति। कण्ठोक्तमेवेति अर्ष्टिशब्दस्य अश भोजन इत्यनेन व्युत्पन्नत्वादिति भावः। द्वितीयं दूषयति - न हीति। अत्र किं प्रयोगबलादैक्यशक्तिग्रह उत नामानुशासनादिति विकल्प्य दूषयति—तथेति।

ननु श्रौतप्रयोग एवास्त्वित्यत्राह—द्वा सुपर्णेति। यद्वा प्रयोगश्च विपरीत इत्याह—द्वा सुपर्णेति। तत्र द्विवचनबलादैकार्थ्याभावस्य निश्चितत्वादत्रापि तथेति भावः।

नन्विमावेकीभूताविति वद्द्विवचनमन्यथासिद्धमित्यत्राह · तयोरस्य इति। भूयस्सहचारं दर्शयति—एतासामिति विभागाविभागेति एकदैव तयैक्यापन्नस्य पुनस्तया विभागोऽन्ययैक्यमित्यत्यन्तविरुद्धं कल्प्यमित्यर्थः। तदभावेत्विति पूर्वपूर्वविभागाभाव इत्यर्थः। शङ्कते—यदि कश्चिदिति तन्नास्तीति भावः।

ननु शङ्कराकृतो निघण्टुरस्तीति प्रवाद इति चेत्तत्राह—तत्तस्येति। विप्रलिप्सामूलत्वान्नप्रमाणमिति भावः। किञ्चास्त्वेकशब्दपर्यायत्वन्तथाऽपि सरित्समुद्रजलैक्यन्यायेन भेदे स्थित एव संसर्गविशेषरूपैक्यपरत्वमिति ॥ ६७ ॥

अक्ष० —ननु सालोक्य-सामीप्य-सारूप्य-सायुज्यरूपेण मुक्तिवैविध्यामननात् सर्वेषां मुक्तानां भोगसाम्यमनुपपन्नमित्याशङ्कते—सालोक्याद्या इति। परिहरति—मंवमिति। तत्त्वात्—मोक्षरूपत्वात्। कथं तर्हि सालोक्यादौ मुक्तिशब्द इत्यत्राह—भाक्त इति। औपचारिक इत्यर्थः। तथा चाहुः—

लोकेषु विष्णोर्निवसन्ति केचित् समीपमृच्छन्ति च केचिदन्ये ।
अन्ये तु रूपं सदृशं भजन्ते सायुज्यमन्ये स तु मोक्ष उक्तः ॥

इति । सायुज्ये सालोक्याद्यभावे भोगसाम्यं न स्यादित्यत्राह – तस्मिन्निति— सायुज्य इत्यर्थः । ते च त्रयः सालोक्य-सामीप्य-सारूप्यरूपास्त्रयः स्युः – अन्तर्गतास्स्युः । सायुज्यस्य ऐक्यरूपत्वेन तत्प्राप्तौ भेदाभावात् कथं भोगसाम्यमित्यत्राह—तदपीति । तत्र युक्शब्दः भुज्यमानपरः । लोकसाम्यादिवत् भोगसाम्यं सायुज्यशब्दार्थः । अत्र ऐक्यभ्रमः मतिमान्द्यनिबन्धन इत्यर्थः ।

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्य" इत्यत्र भिन्नयोर्द्वयोरपि सायुज्याम्नानादिति भावः ॥ ६७ ॥

इति मुक्तानुभवस्य समानभोगत्वलक्षणसायुज्यैकरूपत्वम्

विश्वाधारस्य लक्ष्मेत्यभिहितमखिलं संभवेन्नापवृत्ते
तन्निष्ठत्वादि सर्वं न हि विलयमियात्तच्छरीरस्य तस्य ।
तन्निघ्नत्वेऽपि मुक्तो न भवति पुनरावृत्तिशङ्काकलङ्की
तादृक्सौहार्ददृष्टेर्वयमिह तदनावृत्तिशास्त्रेण विद्मः ॥ ६८ ॥

सर्वा०—यदि मुक्तोऽपि परतन्त्रः, तर्हि स्वच्छन्दप्रवृत्तपरबुद्ध्या पुनरपि बन्धः किं भवेदिति नित्यं शङ्काकलङ्कितः स्यात् । अतः पारतन्त्र्यादिपरिहारेण परब्रह्मसाम्यसिद्धिरवधार्या । अन्यथा *निरञ्जनः परमं साम्यमुपैति इति परमत्वविशेषणं व्यर्थं स्यादित्यत्राह—विश्वाधारस्येति ॥

अयं भावः—ईश्वरस्य यल्लक्षणत्वेनोक्तं तत्सर्वं मुक्ते न स्यात्, लक्ष्येतरगामित्वे लक्षणत्वायोगात् । *एकस्सर्वशरीरीति च शास्त्रसिद्धम् । अतो मुक्तस्याप्याधेयत्वादिनियमो न निवर्तेत । परमत्वविशेषणं तु तुलाधृतसुवर्णपाषाणयोरिव न सर्वाकारसाम्यं साधयितुमर्हतीति अतिशङ्कामपाकरोति—तन्निघ्नत्वेऽपीति । मुक्तस्य शङ्कानिवृत्तिहेतुमाह—तादृगिति । स्वतन्त्रेऽपि स्वाभाविकसौहार्ददर्शनादित्यर्थः । मुमुक्षूणां मुक्तावर्तनशङ्का केन निवर्त्येत्यत्राह वयमिति । श्रुतिस्मृतिचक्षुषो वयं त्रैविद्याः, तस्मादस्माकमपि परसौहार्ददर्शनं सिद्धमिति भावः । *सर्वेषु लोकेषु कामचारो भवति, *इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्, *यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ति इत्यादिशास्त्रदृष्ट्या च पुनरावृत्तिं वयं शङ्केमहीति चेन्न; ईदृशवाक्यानां विधूतपुण्यपापस्य स्वच्छन्दवृत्तौ तात्पर्यात् । अन्यथा महावाक्यविरोधात् ।

ननु *एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते इति सविशेषणश्रवणादावर्तान्तरेष्वावृत्तिश्शङ्क्येतेति चेन्न; अहेतुकावृत्त्ययोगाद्बहुश्रुतिविरोधात्

विशेषकोक्तेश्च घोरत्वानुवादपरत्वेन सफलतयाऽन्यत्रावृत्तावौदासीन्यात्; अन्यथा उपबृह्मणशतं च प्रकुप्येत् ।

गीयते च—आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।। इति ।

*इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।। इति ।

एतत्सर्वमभिप्रेत्य सूत्रम् *अनावृत्तिश्शब्दादिति ।। ६८ ।।

आनन्द०—पूर्वाक्षेपेण सङ्गतिरित्याह—यदीति । शङ्काकलङ्कितस्स्यादिति तथा च प्रवृत्तिर्नस्यादिति भावः । अत इति । पारतन्त्र्यपरित्यागे स्वातन्त्र्यसिद्धिरिति भावः । युक्त्यन्तरमप्याह—अन्यथेति । यत्किञ्चिदाकारेण साम्यस्य वस्तुमात्रसाधारण्यात्तत्र साम्यशब्देनैव विशेषलाभात्परमत्वविशेषणम्पारतन्त्र्यम्पराकरोतीति भावः । प्रतिज्ञामात्रेण नार्थसिद्धिरित्याह—अयम्भाव इति । लक्ष्येतरेति "यतो वे" त्यादिश्रुत्युक्तं जगज्जन्मादिकारणत्वम्ब्रह्मलक्षणन्न परित्याज्यन्तस्य मुक्तगामित्वेऽतिव्याप्त्यादिदोषः स्यादिति न मुक्तानान्तद्धेतुत्वलक्षणं स्वातन्त्र्यमिति भावः ।

ननु तदभावेऽप्यनियाम्यत्वलक्षणस्वातन्त्र्यमस्त्वित्यत्राह—एक इति । सर्वशरीरत्वाभावे सर्वकारणत्वन्न स्यादित्यसम्भवश्च स्याल्लक्षणस्येति भावः । परमत्वेति न च तद्विशेषणवैयर्थ्यं, यद्धर्ममादाय साम्यम्प्रतिपिपादयिषितं तद्धर्ममादाय न्यूनसाम्यव्यवच्छेदार्थत्वादेकधर्ममादायापि साम्यतारतम्यम्प्रतिनिधिपेटिकायां सिद्धमिति भावः ।

ननु पारतन्त्र्ये प्रवृत्तिर्नस्यादित्युक्तमित्यत्राह—अतिशङ्कामिति । स्वतन्त्रेऽपीति तथा च न निवर्तयतीति भावः ।

ननु स्वरूपसति सौहार्देऽपि तज्ज्ञानाभावान्न शङ्कनिवृत्तिरित्याह—मुमुक्षूणामिति । तिस्रो विद्या अधीयते वदन्ति वेत्यर्थतया वेदत्रयज्ञानवन्त इत्यर्थः ।

ननु त्रैविद्यत्वमेव शङ्काहेतुरितिशङ्कते सर्वेष्विति । स्वतन्त्रस्य स्वच्छकल्पकत्वावगमादिति भावः । ईदृशेति अस्येति मुक्तपरामर्शान्न भगवत्परत्वमिति भावः । अन्यथेति अनावृत्तिप्रतिपादकमहावाक्यविरोधादित्यर्थः । नन्विति एतच्छब्देन निर्दिष्टान्मार्गान्तिरगमनस्य व्यावृत्तिलाभादिति भावः । अहेतुकेति कर्महेतुत्वात्संसारस्येति भावः ।

ननु कर्महेतुकत्वमेव मास्त्वित्राह—बहुश्रुतीति "एतेन प्रतिपाद्यमाने"ति श्रुत्या न मार्गान्तरगमनमावृत्तिर्वा गम्यत इत्याह—विशेषकेति । स्थालीपुलाकरीत्या दर्शयति—आब्रह्मेति ।। ६८ ।।

अक्ष०—मुक्तस्य परमसाम्यश्रुत्या सर्वांशेऽपि साम्यं प्रतीयत इत्यत्राह—विश्वाधारस्येति। विश्वशरीरकस्य भगवतः लक्षणतयाऽभिहितं कारणत्वादिकं किमपि अपवृक्ते मुक्ते न संभवति अलक्ष्यवृत्तित्वे लक्षणत्वासंभवात् अतस्तद्व्यतिरिक्ताकारेणैव साम्यं सुवचं न तु सर्वाकारेणेति भावः।

मुक्तस्य तदानीमपि भगवच्छरीरत्वेन तन्निष्ठत्व-तन्निघ्नत्वादिसर्वं तथैवावतिष्ठते इत्याह—तन्निष्ठत्वादीति। तदानीमपि पारतन्त्र्य-पुनरावृत्तिशङ्कया दुःखमपि स्यादित्यत्राह—तन्निघ्नत्वेऽपीति। कुत इत्यत्राह—तादृगिति। स च मम प्रिय इत्यादाविति भावः। न केवलं सौहार्दातिशयात् अनुमिनुमः किं तु श्रुति-स्मृतिकण्ठोक्त्याऽपि निश्चिनुमः इत्याह—अनावृत्तिशास्त्रेणेति। 'न च पुनरावर्तते' 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इत्यादिशास्त्रेणेत्यर्थः। तथा च सूत्रितं 'अनावृत्तिश्शब्दादिति'। अतो मुक्तस्य श्रूयमाणं परमसाम्यं तुलाधृतगुञ्जासुवर्णयोरिव न सर्वांशेनेति भाव्यम् ॥ ६८ ॥

इति पुनरावृत्तिप्रसङ्गपरिहारः

विश्वैर्वैशेषिकैस्तैर्भवति विरहितो नाशितादृग्गुणत्वा-
ज्जीवात्मा जन्मकाले घटवदिति यदि स्याद्विहाम्नायबाधः।
दृष्टान्तस्साध्यहीनः क इव निगमविल्लिप्सते मुक्तिमेतां
धीर्नित्येच्छादयस्तत्परिणतय इति स्याच्च हेतोरसिद्धिः॥ ६९ ॥

सर्वा०—अथ वैशेषिकादिपठितं प्रस्तरप्रायमोक्षं पराचिकीर्षुस्तदुक्तं प्रयोगमनुवदति—विश्वैरिति॥ जीवाः पार्थिवपरमाणव आकाशश्च कदाचिदशेषविशेषगुणशून्याः, अनित्यविशेषगुणवत्त्वात्, उत्पत्तिक्षणे घटवत्। न चात्र दृष्टान्तस्साध्यविकलः; कार्यद्रव्यगुणानां तद्धर्म्युपत्त्यनन्तरभावित्वनियमात्, सहोत्पत्तावुपादानोपादेयभावायोगात्। न च भावस्समवायिकारणेन विना कश्चिदुत्पद्यते।

ननु जीवः सर्वदा विशेषगुणवान् आत्मत्वात् ईश्वरवत् इति प्रतिप्रयोगः स्यात् तन्न; निरीश्वरवादिनां दृष्टान्तासिद्धेः। भूषणस्य तु मुक्तिदशायां ज्ञानं कार्यमकार्यं वा? आद्ये करणसापेक्षत्वान्नश्वरत्वादिप्रसङ्गः। उत्तरत्र इदानीमप्युपलभ्येत। एकदा चैकस्य ज्ञानद्वयमयुक्तम्।

किंच नित्यज्ञानं मुक्तौ भासते न वा? आद्ये स्वतो भानेऽपसिद्धान्तः; परतो भाने ज्ञानान्तरक्लृप्तिगौरवं, तदपि कार्यमकार्यं वेति विकल्पदौःस्थ्यं च। उत्तरत्र निर्विषयं स विषयं वा? नाद्यः तादृशख्यात्यनभ्युपगमात्। द्वितीये तु सर्वविषयं नियतविषयं वा? आद्येऽनेकानादिसर्वज्ञवादप्रसङ्गः। मुक्तिदशायां सर्वज्ञत्वं भवत्विति चेन्न, तथाऽपि तादृशत्रय्यन्तवादानङ्गीकारात्। नियतविषयत्वं त्वीश्वरज्ञानस्येव मुक्तज्ञानस्यापि नित्यस्य दुस्साधम्। सामग्रीभेदतो हि सर्वत्र

धियां विषयनियमः । विषयश्च तस्य कः ? आनन्द इति चेत् स किं कार्योऽकार्यो वा ? नाद्यः, अनभ्युपगतेः, हेतुनिरूपणायोगाच्च । न द्वितीयः, अद्याप्युपलब्धिप्रसङ्गात् । विषयविषयित्वानुपपत्त्याऽनुपलब्धिरिति चेत्; तन्न, किं तयोः स्वरूपमतिरिक्तं वा ? आद्येऽनाद्युपलब्धिप्रसङ्गः । उत्तरत्र भावस्योत्पन्नस्य ध्वंसित्वं स्यात् । उत्पन्नोऽपि कश्चिद्भावो न नश्यतीति चेन्न, अदर्शनात् कल्पकाभावात् । *आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इति श्रुत्या तथाऽङ्गीकुर्म इति चेन्न, अयमानन्दशब्दो जीवविषयः परविषयो वेत्यनिर्धारणात् । स्वानन्दश्च साक्षात्क्रियमाणस्साधारो निराधारो वा भाति ? पूर्वत्रानन्दमात्रविषयत्वव्याघातः । परत्र अहं सुखीति भानाभावादानन्दाभिव्यक्त्याऽपि न पुरुषार्थभोक्तृत्वसिद्धिः । सुखादेस्स्वसमवेततयाऽनुभवो हि भोग इत्यास्तामेतत् ।

यदि कश्चित्कौमारिल एवं प्रयुञ्जीत—देवदत्तमुक्तिकालः एतज्ज्ञानवान्कालत्वादिति, तस्य देवदत्तसुषुप्त्यादिकालैरनैकान्त्यम् । तेषामपि पक्षीकरणे तदातनज्ञानस्य निर्विषयत्वसविषयत्वादिविकल्पक्षोभः । अत एव—

*निजं यत्त्वात्मचैतन्यमानन्दोऽध्यक्ष्यते च यः ।
यच्च नित्यविभुत्वादि तेनात्मा नैव मुच्यते ॥

मनःकरणकेनात्मा प्रत्यक्षेण प्रतीयते । इत्युपदेशोऽप्यश्रद्धेय ।

यच्च कैश्चित्चिन्मात्ररूप आत्मा चेतयितृत्वादिरहितः प्रकाशत इत्यनुशिष्यते, तदपि निष्प्रमाणकम् ।

अतस्समस्तविशेषगुणशून्यात्मानुमानं निष्कम्पमिति । तत्राह—स्यादिति । यद्यत्र कदाचिज्जीवः स्वधर्मभूतज्ञानरहित इति साध्यं, तदा तन्नित्यत्वश्रुतिविरोधः । अथ तद्विकारविशेषरहित इति, तत्राव्यवहिताधारत्वनिषेधे सिद्धसाधनम् । व्यवहिताधारत्वनिषेधे तु शास्त्रबाधः, स्वमतेन साध्याप्रसिद्धिश्च । उत्पत्त्यवस्थघटदृष्टान्तश्च साध्यविकल इत्याह—दृष्टान्त इति । प्रागसद्द्रव्योत्पत्तेर्निरस्तत्वेनाश्रयहान्या तन्निदर्शनायोगात् नित्यस्य तु त्रिगुणस्य द्रव्यस्य नित्यं यत्किंचिद्विशेषगुणवत्त्वादिति शेषः । अनुमानस्य बाधकतर्कमाह—क इवेति ।

अत्रेदमाकूतम्—केवलं दुःखनिवृत्त्यर्थी न क्वचिदपि कस्यचिदपि प्रवृत्तिर्दृश्यते । उत्तरसुखमभिसन्धायैव सर्वेषां दुःखनिरासप्रवृत्तिरिति लोकवादविदः । अन्यथाऽपि ब्रमः—सुषुप्त्यवस्थजीवमुपदिष्टवति प्रजापताविन्द्रः प्राह—*न ह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि इति । ततः प्रजापतिरपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणकं ब्रह्मसमं मुक्तमुपदिदेश, अतः केवलं दुःखनिवृत्तिर्न मुक्तिरिति जानन् कथं त्वदुक्तमुक्तिकामः प्रवर्त्स्यतीति । हेतावपि विकल्पाक्षमत्वं मत्वाऽऽह—धीरिति । अनित्यविशेषगुणवत्त्वादिति वदता किं धीस्वरूपं

तत्परिणतयो वा आत्मगुणत्वेन कथ्यन्ते ? स्वसिद्धान्तदृष्टया पुरुषगुणभूतागन्तुकचैतन्यादयो वा ? तत्राद्यस्य दूषणम्—**धीर्नित्येति** । अनित्यविशेषगुणवत्त्वमसिद्धमित्यर्थः । द्वितीये त्वात्मनस्तद्वत्त्वं नेति । मतद्वयेऽपि स्वरूपासिद्धिमाह—**इच्छादय इति** । तृतीयेऽपि त्र्यय्यन्तविद्भिरनङ्गीकारादसिद्धिस्सुगमेति तस्य पृथगनुद्धारः ।

एवं दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवत् इत्यनुमानमपि निरस्तम्; आगमसिद्धाभिर्नित्यसन्ततिभिरनैकान्त्यात्, प्रदीपावयविसन्ततेश्चास्मान्प्रति निदर्शनायोगात्, अवस्थासन्ततेश्चोच्छेदाभावात्, दीपत्वावस्थासन्ततिवदिति त्वया निदर्शयितुमयुक्तत्वादिति ॥ ६९ ॥

आनन्द०—प्रसङ्गदाह—**अथेति** जीवान्पक्षीकृत्य प्रयोगे पार्थिवपरमाण्वादौ व्यभिचारशङ्काम्पक्षसमत्वेन परिहरति– **पार्थिवपरमाणव इति** । सिद्धसाधनपरिहारायाह—**कदाचिदिति** एककालावच्छेदेनाशेषगुणप्रतियोगिकसंसर्गाभाववदित्यर्थः । विशेषगुणवत्वं जलपरमाण्वादौ व्यभिचारीत्याह - **अनित्येति** । अनित्यगुणवत्वमपि तादृशसंयोगादिमति तत्रैव व्यभिचारीत्याह—**विशेषेति** । इति विशेषणप्रयोजनं योज्यम् ।

ननु पटरूपम्प्रति तन्तुरूपस्यासमवायित्ववत्तन्तूनामेव समवायिकारणत्वमस्त्विति चेन्मैवम् । तथासति तन्तुसमवेतत्वप्रसङ्गः पटे रूपाभावप्रसङ्गादिति भावः । भूषणकारादिमतनिराकरणव्याजेनाप्रयोजकत्वन्निराकरोति—**भूषणस्य-त्विति** । पूर्वत्र—**कार्यमिति** पक्षे । द्वितीयेऽपि पक्षे किमुपलम्भःस्वत उतान्येनेति विकल्पमभिप्रेत्याद्य आह—**करणसापेक्षत्वादिति** । द्वितीय आह—**एकदेति** । किं मुक्तौ भानमपि स्वत उत परत इति विकल्प्याद्यं दूषयति—**पूर्वत्र स्वतो भानेति** । इदमुपलक्षणमेकदा ज्ञानद्वयापत्तिश्चेति द्रष्टव्यम् । **पूर्वत्रानेकानादीति** तथाचापसिद्धान्त इति भावः ।

ननु नित्यमेव ज्ञानं मुक्तौ सर्वविषयम्भवतीति शङ्कते—**मुक्तिदशायामिति** । तद् विशिष्टाद्वैतिमतं न भवन्मतमिति परिहरति - **नेति** ।

ननु स्वभावादेव विषयनियम इत्यत्राह—**विषयश्च क इति** ।**अनभ्युपगमादिति** भूषणकारमत आनन्दस्य नित्यत्वादिति भावः ।

अन्ये तु कार्योऽपि निर्हेतुकः स हेतुको वा ? आद्य आह—**अनभ्युपगमादिति** द्वितीय आह –**हेतुनिरूपणात** । हेतोरभावादिति भावः ।

ननु तदा विषयत्वं विषयित्वं वानन्दनज्ञानयोर्नास्तीति नोपलब्धिरिति शङ्कते—**विषयेति** । **पूर्वत्रानादीति** आनन्दतज्ज्ञानयोरनादित्वादितिभावः । अतिरिक्तत्वेऽपि तत्किं कार्यमकार्यं वेति विकल्पे पूर्वस्य दत्तोत्तरत्वात् परं दूषयति- **भावस्येति** ।

नन्वयत्रादर्शनेऽप्यभिव्यक्तिदर्शनान्यथानुपपत्या कल्प्यत इति शङ्कते—आनन्दमिति। असिद्धस्य कथङ्कल्पकत्वमिति परिहरति—अयमिति। आनन्दमात्रेति मास्त्वानन्दमात्रविषयत्वं काहानिरिति चेन्न। सविषयत्वस्य हानेः। एकसर्वविषयकान्यज्ञानस्य हेत्वधीनत्वनियमादानन्दत्वादिकन्तु स्वरूपान्नातिरिच्यत इति भावः।

नन्वानन्दसाक्षात्कार एव भोग इति पुरुषार्थभोक्तृत्वञ्चेत्यत्राह—सुखादेरिति स्वसमवेतसुखानुभवो भोगः पुरुषार्थश्च। न तु स्वसमवेतत्वेनापि गौरवादित्यत्राह—इत्यास्तामिति। न वस्तुगत्या स्वसमवेतसुखानुभवो भोगो दुःखाभावे सुखत्वारोपेण तदनुभवस्याननुभवत्वप्रसङ्गादिति भावः।

भाट्टपक्षं दूषयितुमनुवदति—यदि कश्चिदिति स्वात्मानन्दानुभवो हि मोक्ष इति तन्मतम्। तथा च ज्ञानं मुक्तिकालेऽस्तीति सिद्धमिति भावः। तेषामपीति सविषयत्वे सुषुप्ति व्याघातः निर्विषयं तु नास्तीति भावः। अनुमाननिरासादेव तन्मूलस्तदुपदेशोऽपि निरस्त इत्याह—अत एवेति। आत्मनश्चैतन्यं ज्ञानम्। ज्ञेयानन्दश्च निज स्वभावसिद्धं यथा नित्यविभुत्वादिना व्याप्त इत्यर्थः। तच्च ज्ञानं मनाकरणकमित्याह—मन इति।

केचित्तु स्वप्रकाशचैतन्यं तदेवानन्दलक्षणं तज्ज्ञानं मनसेत्याहुः।

मायिमतमपि दूषयति—यच्च कैश्चिदिति। यद्यत्रेति यद्यप्यशेषविशेषगुणशून्यमिति साध्यं तदिष्टम्। तथाऽपि तज्ज्ञानाभावं विना न पर्यवस्यतीति तद्विकल्पेन दूषयतीति भावः। अथ तद्विकारेति ज्ञानद्रव्यस्य नित्यत्वाद् घटं जानामीत्यादेस्तद्विकारत्वादिति भावः। स्वव्यवधानेन ज्ञानविकाराश्रयत्वस्य परमते ह्यप्रसिद्धेरिति भावः। नित्यस्येति सत्त्वरजस्तमसां कालाद्यवृत्तितया विशेषगुणत्वान्महदादेः प्रकृतिद्रव्यत्वादिति भावः।

ननु निगमविदो लिप्सामात्रान्नार्थनिवृत्तिरतिप्रसङ्गादिति कथम्बाध इत्यत्राह—अत्रेदमिति। मुक्तौ त्वदुक्तानुमानेनाशेषविशेषगुणशून्यतासाधने मुक्तिशास्त्रमप्रवर्तकं स्यादिति भावः।

ननु नित्यकाम्यविभागे निवृत्तेः स्वतः काम्यत्वोक्तेस्तद्विरोध इत्यत्राह—अन्यथापातेत। सुषुप्त्यवस्थस्य जीवस्याशेषविशेषगुणाभावदशायान्नाहमत्र भोग्यं पश्यामीति भोग्यरूपानन्दाभावे पुरुषार्थाभावनिर्णयान्नतन्मात्रात्मुमुक्षुप्रवृत्तिरिति भावः। आसाद्धःसुगमति–अन्यतरासिद्धिरित्यर्थः। आगमसिद्धाभिरिति कालप्रकृत्यादिपरिणतिभिरित्यर्थः। प्रदीपावयवात द्रव्यनाशाभावादिति भावः।

नन्ववस्थासामान्यसन्तत्युच्छेदाभावेऽपि प्रदीपरूपावस्थासन्तत्युच्छेदोऽस्त्वित्यत्राह—दीपत्वात तव मतऽसिद्धेरिति भावः।

ननु दीपाकृतिसन्ततिरस्तीति चेन्न, जात्यन्याकृतौ मानाभावात् भावे वा श्रुतिसिद्धाभिर्नित्यसन्ततिभिर्व्यभिचार इति भावः॥ ६९॥

अक्ष०—अथ वैशेषिकोक्तं पाषाणकल्पमोक्षसाधकं प्रयोगं निरसितुमनुवदति—विश्वैरिति। जीवात्मा समस्तविशेषगुणशून्यः नाश्यविशेषगुणवत्वात् उत्पत्तिकालावच्छिन्नघटवदिति ते प्रयुञ्जत इति दूषयति—यदि स्यादिति। आम्नायबाध इति। न विज्ञातुर्विज्ञाते विपरिलोपो विद्यते इत्यादिश्रुतिबाध इत्यर्थः। दृष्टाते साध्यवैकल्यमाह—दृष्टान्त इति। असद्द्रव्योत्पादानभ्युपगन्तृणामस्माकं मते आद्यक्षणावच्छिन्नघटस्यैवासिद्धेरिति भावः। उक्तानुमाने बाधकतर्कमाह—क इवेति। मुक्तौ सकलविशेषगुणनाशे न कश्चिदपि प्रवर्तेतेति भावः। निगमविदिति। वेदोक्तदुःखासंभिन्नसुखतत्साधनसद्भावनिश्चयवानित्यर्थः। कर्मफलस्वर्गाद्यपेक्षया पुरुषार्थभूयस्त्वे सत्येव हि मुक्तौ प्रवर्तेत। न च दुःखाभावमात्रं पुरुषार्थकोटौ निविशेत सुषुप्तौ दुःखावेऽपि नाहमत्र भोग्यं पश्यमीति मघवताऽभिधानादिति भावः। हेतोरसिद्धिमाह—धीरिति। नाशिगुणेत्यत्र ज्ञानग्रहणे तस्य नित्यत्वेन नाशित्वाभावादसिद्धिः। इच्छादिग्रहणे तेषां ज्ञानावस्थारूपत्वेन साक्षादात्मन्यभावादसिद्धिरिति भावः॥ ६९॥

इति पाषाणवन्मोक्षभङ्गः

आत्मा चिन्मात्ररूपो विकृतिमति जडे बिम्बितो बुद्धितत्त्वे
तच्चास्मिंस्तद्विवेकाग्रहणविरचितः पुंसि संसारमोहः।
अन्त्या विज्ञानवृत्तिः प्रकृतिपुरुषयोरन्यतां गाहमाना
तादृक्संसारभेत्त्री पुरुष इह सदा मुक्त एवेति साङ्ख्याः॥ ७०॥

सर्वा०—अथ सांख्योक्तं चिदचिद्विवेकं संसारं तन्निवृत्तिप्रकारं च संगृह्णाति—आत्मेति॥ चिन्मात्ररूप इति पुरुषस्वरूपशोधनम्, नासावचित्स्वभावः, न ज्ञातेत्यर्थः। विकृतिमति जड इत्यचेतनधर्माणामुपलक्षणम्। एवं हि विविच्यते—*मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥

*त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि। व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥ इति। बिम्बित इत्यादिना प्रकृतिपुरुषयोरितरेतरधर्माध्यासे हेतुविशेष उच्यते। अप्रकाशमाने कथं तद्धर्माध्यास इत्यत्रोक्तम्—तच्चास्मिन्निति। स चाध्यास एवं कथ्यते—*तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः॥ इति। फलितमाह—तदिति। विवेकः—भेदः। तदग्रहणशब्देन सामग्र्येकदेशोपादानम्॥

*ज्ञानेन चापवर्गो विपर्ययात्तद्विपर्यासः। वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात्॥ इति कारणान्तरमपि हि संगृह्यते। कृपाणप्रतिफलितमुखमलिनतान्यायसूचनाय मोहशब्दः। अस्य किं निवर्तकमित्यत्राह—अन्त्येति।

विज्ञानवृत्तिः—विज्ञानरूपान्तःकरणवृत्तिः, विज्ञानस्य वा बुद्धितत्त्वस्य विवेकख्यातिरूपा परिणतिः। *विवेकख्यातिपर्यन्तमज्ञानं चित्तचेष्टितम्। *एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्। अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्। तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम्। प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितस्सुस्थः॥ प्रकृतेस्सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति॥ या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य॥ इति। स्फटिकरागनिवृत्तिन्याय-सूचनाय तादृक्छब्दः। यद्यपि संसारः पुरुषस्यारोपितः, तथाऽपि तद्भ्रमो दुस्त्यज इत्यत्राह—पुरुष इति। इह—संसारे वर्तमानेऽपि, पुरुषस्तु भ्रान्त्याऽप्यनाघ्रात-स्सर्वदा पुष्करपलाशवन्निर्लेप इत्यर्थः। तथा चाहुः—*तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्। संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥ इति॥ ७०॥

आनन्द०—प्रसङ्ग एव सङ्गतिरित्यभिप्रायेणाह—अथेति। अचेतनधर्मा-णामुपलक्षणमिति—ज्ञातृत्वादयो धर्मा अचेतनगता इति भावः। तत्कृतं चिद-चिद्विवेकमुदाहरति एवं हीति। वाचस्पतिनेत्थं व्याख्यातम्। सङ्क्षेपतो हि शास्त्रस्य चतस्रो विधाः कश्चिदर्थः प्रकृतिरेव, कश्चित्प्रकृतिविकृतिः, कश्चिद्विकृ-तिरेव। कश्चिदनुभयः। तत्र प्रकृतिरविकृतिः=विकारो न भवतीत्यर्थः। सर्वकारणत्वान्मूलम् प्रकृति—विकृतयः कियन्त इत्यत्राह—प्रकृतिविकृतय इति। उत्तरविकारगाङ्कारणमूर्त्तेषाङ्कार्यम्महत्तत्वं, अहङ्कारस्य प्रकृति-मूलप्रकृतेः विकृतिः अहङ्कारः इन्द्रियतन्मात्राणाम्प्रकृतिर्महतो विकृतिः। पञ्चतन्मा-त्राणि भूतानाम्प्रकृतयः अहङ्कारस्य विकृतयश्च। अथ का विकृतयः कति चेत्यत्राह—षोडशकस्त्विति। षोडशसंख्यापरिमाणकगण इत्यर्थः। अनुभयरूपः पुरुष इत्याह—न प्रकृतिरिति। त्रिगुणमिति इदमपि व्याख्यातम्। पूर्वं व्यक्ता-व्यक्तयोर्वैपम्यमुक्तम्। सम्प्रति तयोः साधर्म्यम्पुरुषाच्च वैषम्यमाह त्रिगुणमिति। त्रयो गुणाः सुखदुःखमोहा अस्येत्यर्थः। तेन सुखदुःखादीनान्नात्मगुणत्वम्। अविवेकीति यथा प्रधानं महदादिभ्यो न विविच्यत एवम्महदादयोऽपि प्रधानान्न विविच्यन्ते तदात्मकत्वात्। यदाहुः—विज्ञानमेव विषयि विषयश्च शब्दाद्यात्मको न पुनरन्य इत्यत्राह—विषय इति। ग्राह्यो विज्ञानाद्भिन्न इत्यर्थः। अत एव सामान्यं साधारणम्। विज्ञानाकारत्वे तु विज्ञानानामसाधा-रण्यादेकस्मिन्नर्तकीभ्रूलताभङ्गे बन्दिनाम्प्रतिसन्धानं न स्यादिति भावः। अचेतनम् बुध्यादयो न चेतनाः। वैनाशिकत्वात् बुध्यादेरचेतनत्वमिति भावः। प्रसवधर्मि सरूपविरूपविकारवदित्यर्थः। कर्माधारवद्धियां नित्ययोगो लभ्यते। व्यक्तमिति। तथा प्रधानमिति अस्यां पुरुषस्य वैधर्म्यमाह—तद्विपरीतस्तथा च पुमानिति। अप्रकाशमान इति अधिष्ठानस्याध्यस्तत्वात्तद्ग्रहे च स्वरूपातिरिक्त-

विशेषाभावेन विशेषग्रहादध्यासो न स्यादिति भावः। स चेति अधिष्ठानं नाध्यासहेतुरिति भावः। तस्मादिति। इदमपि व्याख्यातम्।

ननु कर्तव्यमर्थम्प्रमाणेनावगम्यचेतनोऽहञ्चिकीर्षन्करोमिइति कृतिचैतन्ययोः सामानाधिकरण्यमनुभवसिद्धम् [देत]तदस्मन्मते नावकल्पते। चैतन्यस्य कर्तृत्वात्कर्तुश्चाचेतनत्वादित्यत आह—तस्मादिति। यस्माच्चैतन्यकर्तृत्वयोर्भिन्नाधिकरणत्वमतो, लिङ्गम्=प्रकृत्यनुमितिलिङ्गं महदादि। तच्चेतनसन्निधानात् अचेतनम्=चैतन्यरहितमपि। चेतनावदिव=चैतन्यवदिव भातीत्यर्थः। गुणस्य महदादेः कर्तृत्वे सति तत्संयोगादुदासीनोऽपि कर्तृत्वरहितोऽपि कर्तेव भवति। सामग्र्येकदेशेऽतिरागादेरपि हेतुत्वादिति भावः। तदुक्त्यैव सामग्र्येकदेशत्वं दूषयति—ज्ञानेति। विवेकख्यात्या प्रकृतिविमोको भवति। विपर्ययादतत्वज्ञानाद् बन्धः। वैराग्यात् प्रकृतिलयः। संसारो भवति राजसाद्रागादिति कारणान्तरं रागाख्यमुक्तमिति भावः। विवेकख्यातीति साङ्ख्यस्मृतिवचनम्। चित्तस्य व्यापाररूपमज्ञानं विवेकख्यातौ निवृत्तं इत्यर्थः। एवमिति तत्त्वशब्दस्तत्त्वज्ञानपरः। तदभ्यासादद्रव्यकाले सत्वसेवनात्सत्वपुरुषान्यतरसाक्षात्कारो भवति। अविपर्ययात्संशयविपर्ययादसौ ज्ञानस्यास्वच्छः। तद्रहितं शुद्धं प्रमात्मकम्। कारणाभावेन पुनर्भ्रमादिसंवलनाभावेन केवलमित्यर्थः। तत्स्वरूपमाह—नास्मीति। अत्र भवत्यस्तीनाङ्क्रियासामान्यवाचितयाऽध्यवसायाभिमानसङ्कल्पालोचनादिक्रियाहीन इत्यर्थः। अस्मदुक्तमसामानाधिकरण्येन कर्तृपरत्वात्कर्तृत्वाभावान्नस्वामित्वमपीत्याह—न मे इति। एवंच सकलविकारशून्य इति लभ्यते।

नन्वपरिशेषो यथा भवति यथा शेषरहितसर्वतत्वसाक्षात्कारेण किं सिध्यतीत्याह—तेनेति तेन तत्त्वसाक्षात्कारेण भोगादिकं न पुनः प्रसूते। अतो निवृत्तिप्रसवादर्थवशाद्विवेकज्ञानसामर्थ्यादतत्त्वज्ञानपूर्वकाणि धर्मवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्याणि निवृत्तानीतिसप्तरूपविनिवृत्तावस्थितो, निष्क्रियः स्वस्थः रजस्तमोवृत्त्या रहितः प्रेक्षकवन्नृत्तादिव्यापारासंसृष्टान्नृत्तदृष्टवत्प्रेक्षत इत्यर्थः। तत्त्वज्ञानात्प्रकृतिर्निवर्तत इति भावः।

ननु निवृत्तापि प्रकृतिः पुनः पुनः प्रपत्स्यत इत्यत आह—प्रकृतेरिति सुकुमारतयाऽत्यन्तपेशाला परपुरुषदर्शनासहेति यावत्। असूर्यम्पश्या हि कुलवधूरतिमन्दाक्षवैलक्ष्यमन्थरा प्रमादाद्विभाषेत वसना परपुरुषेणालोकिता चेत्पुनरप्रमत्ता सती परपुरुषं यथा न पश्यति तथा वर्तते। एवम्प्रकृतिविवेकतो द्रष्टा पुनः स्वतादात्म्याध्यासहेतुर्नभवतीत्यर्थः इदम्पद्यं "एवन्तवाभ्यासादित्यतः प्राक्तनमप्यर्थवशात्पश्चादुपात्तम्।

भ्रान्त्यापि नाघ्रात इति तस्मादपि बुद्धिधर्मतया पुरुषधर्मत्वादिति भावः। तर्हि बन्धमोक्षौ पुरुषस्य न स्यातामित्यत आह—सर्वदेति। तावपि प्रकृतिगतावेवेति

भावस्तत्र सममतिः। तस्मादिति यस्माद्विकाराद्यभावस्तस्मादित्यर्थः। कश्चिदपि पुरुषो न संसरति न मुच्यते च। प्रकृतिरेव तु नानापुरुषाश्रया संसरति मुच्यते चेत्यर्थः। यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते तथा भोगापवर्गावपि विवेकाग्रहादुपचर्येतामिति भावः ॥ ७० ॥

अक्ष०—सांख्योक्तं संसारमोक्षादिस्वरूपं निरसितुमनुवदति—आत्मेति। चिन्मात्रेति। अचिद्विलक्षणः ज्ञातृत्वादिरहितश्चेत्यर्थः। विकृतिमिति—अहङ्कार-तन्मात्रादिपरिणामिनि जडे परेणैव प्रकाश्ये बुद्धितत्त्वे महति विम्बितः दर्पण इव प्रतिफलितः। तच्च—बुद्धितत्त्वं च अस्मिन्नात्मनि बिम्बितमिति परिणामे-नानुषङ्गः तस्मादेव विवेकाग्रहणं—भेदाग्रहः। तेन कृतः पुरुषे संसारभ्रमः। वस्तुतः संसाराभावेऽपि भेदाग्रहकृतपरस्परधर्माध्यासेन बुद्धिगतसंसारस्य आत्मनि भ्रम एवेति भावः। प्रकृतिपुरुषयो र्भेदविषयिणी अन्त्या विज्ञानरूपा अन्तः-करणवृत्तिः तादृक् संसारभेत्री अचिद्धर्माध्यासरूपसंसारनिवृत्तिकरी पुरुषस्तु इह संसारमोहे सत्यपि वस्तुतः सर्वदा मुक्त एव पुष्करपलाशवन्निर्लेपः न कदाऽपि संसारीति भावः। तथा चाहुः तस्मान्न वद्धयतेऽद्धा न मुच्यते नापि संसरति कश्चित् संसरति बद्धयते मुच्यते च नानाश्रयाप्रकृतिः। इति सांख्याः कापिलाः संसारं तन्निवृत्तिप्रकारं आहुरिति शेषः। अनन्तरं चेदं निरसिष्यते ॥ ७० ॥

इति समोक्षोक्तसंसारानुवादः

नीरूपे विम्बितत्वं ननु भवति कथं रूपशून्यस्य तस्या-

न्निर्लेपे संसृतिः का कथमतिविशदो निष्क्रियश्चैष मुह्येत्।

नित्यं वा किं न मुह्येदुपधिभिरितरैर्वेत्तु भेदं कथं वा

को वा मोक्षोऽद्य पुंसः प्रथममपि न खल्वस्य दुःखादिगन्धः ॥७१॥

सर्वा०—एवमनूदितेष्वर्थेषु चिन्मात्ररूपत्वस्य प्रागेव ज्ञातृत्वसाधनेन निरस्तत्वात्तदनन्तरोक्तं विम्बितत्वं दुदूषयिषुस्तन्मुख्यममुख्यं वेति विकल्पं भाव-यन्मुख्यं दूषयति—नीरूप इति ॥ मुकुरादीनां मुखादीनां च रूपवत्त्वनियमादा-त्मान्तःकरणयोस्तदुभयस्थानीयत्वं न घटत इति वाक्यद्वयाभिप्रायः। दृक्छक्तिरूपः संसरन् [आत्मा] पुरुषस्स्वभोगार्थं स्वनिष्ठां बुद्धिं व्यनक्ति, तेनाबोद्धाऽपि सन् बोद्धेव भवति, बुद्धिरपि सलिलादिवत्स्वच्छस्वभावतया स्वनिष्ठां चिच्छक्तिं व्यनक्ति, तेन स्वयमबोद्ध्री सती बोद्ध्री भवति। एतावतैव बिम्बितत्ववाचोयुक्ति-रित्यमुख्यपक्षेऽपि संसरन्नात्मेति विशेषितम्। न तावदिदं निरर्थकम्, वाक्येऽनन्व-यापत्तेः। मुक्तबुद्धयोरपि परस्पराभिव्यञ्जकत्वप्रसङ्गाच्च। सार्थकत्वे निर्लेपत्व-समर्थन विरोध इत्यभिप्रायेणाह—निर्लेप इति।

एतेन शास्त्रारम्भहेतुभूता मुमुक्षा दुःखत्रयाभिघातकजिज्ञासा च न संभवती-

त्यपि सूच्यते। संसृतिहेतुं भेदाग्रहं तन्मूलं भ्रममपि निरस्यति—कथमिति। चिद्रूपस्यात्मनो भेदः स्वरूपं धर्मो वा ? आद्ये चिद्रूपतयैवातिविशदो भातीति कथं भेदस्याग्रहः, तस्य तत्त्वात् ? द्वितीये ज्ञातृत्वकर्तृत्वभोक्तृत्वादिधर्मस्तवयैवात्मन्यपोढ इति न तादृशधर्माग्रहः। प्रकृतिपुरुषसाधारणयोस्तु नित्यत्वविभुत्वयोरग्रहो न ते भेदाग्रहः। कार्यप्रकृतौ तयोरभावाद्वैधर्म्यरूपत्वमिति चेन्न, कार्यकारणप्रकृत्योस्तादात्म्याभ्युपगमात्, कार्येऽपि तयोरङ्गीकर्तव्यत्वात्। अन्यथा कथं नासत्कार्यवादः ? धर्मधर्मितादात्म्यवादे च धर्मिभाने धर्मोऽपि भायादेवेति कथंचिदपि न भेदाग्रहसंभवः। अत एवात्मा न मुह्येत्। निष्क्रियत्वाच्च ज्ञानमेव क्रियेति भीत्या जहतः कथं तद्विशेषग्रहः ? अमुह्यन्नप्यन्यमोहं स्वस्मिन्नध्यवस्यतीति चेत्, तदिदं शतमदित्सतश्शतार्द्धद्वयदानमिति।

ननु विकृतिविशेषवदुपाधिसंनिधानमेवास्य मोहोऽस्त्वित्यत्राह—नित्यमिति। ईदृशोपाधिसन्निधानस्य कालान्तरेऽपि सुलभत्वात् कदा मुक्तिः ? निरधिकारप्रकृतिदशायामिति चेन्न, सर्वनित्यत्ववादिभिरधिकारस्यापि ध्वंसपरिग्रहायोगात्। अनभिव्यक्तिश्च तस्य दुर्वचा; अभिव्यक्तेरपि निवृत्त्यसंभवादेवेति मोहनिवृत्त्यर्थो भेदग्रहश्च न स्यादित्याह—वेत्त्विति। प्रकृतिधर्माध्यासश्च प्रत्यूढ इति भावः। क्रियावती प्रकृतिरेव चिच्छायापत्तिमती वेत्त्री भवतीति चेन्न, छायापत्तेर्निरस्तत्वात्। पुरुषस्य भेदग्रहाभावे च स्ववाक्यविरोधः; यदात्थ *प्रकृतिं पश्यति पुरुषः, *दृष्टा मयेत्युपेक्षते एक इत्यादि। भाक्तमिदं दृष्टत्वमिति चेत्तर्हि प्रागिव भेदाग्रह एव।

अस्तु वा प्रकृतिरनुपकारिणः पुंस उपकारिणी, तदर्थं भेदग्राहिणी; तथाऽप्यनया तस्य न किंचिदुपकर्तव्यमित्याह—को वेति। संसारनिवृत्तिरिति चेत्तत्राह—प्रथममिति। पूर्वमित्यर्थः। मा भूदुपकर्तव्यम्, का हानिरिति चेत्तस्यार्थमपार्थकं चरति। *पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य *कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति इति स्वोक्तहानिः। *रूपैस्सप्तभिरेवं बध्नात्यात्मानमात्मना प्रकृतिः। सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण॥ इत्यप्युक्तमिति चेत्, तथाऽपि स्वोक्तहानिरेव। पुरुषार्थं प्रतीत्यपि व्यर्थं वचः। सृष्टिप्रळयबन्धमोक्षादयश्च त्वन्मते कथं पौर्वापर्यं भजेरन् ? सर्वनित्यत्ववादिनस्तत्तद्धेतुभूतगुणवैषम्यादेरपि क्रमभावित्वायोगादिति ॥ ७१ ॥

आनन्द०—पूर्वसङ्गत्याऽऽह एवमिति सामान्यव्याप्त्या फलितमाह—मुकुरादीनामित्यादिना। मुख्यपक्षं शङ्कते—दृक्छक्तिरित्यादिना। अत्र संसरन्नात्मेति पाठो युक्तः। उत्तरत्र तथाऽनुवदात्। पुरुषशब्दार्थानुवाद इत्यपरे। दूषयति—अमुख्यपक्षेऽपीति। संसरन्निति विशेषणं व्यर्थं, सार्थकं वा ? आद्य आह—न तावदिति। निरर्थकत्वमयोग्यार्थकत्वम्। तर्हीति अस्त्वत इत्यत्राह—मुक्तबुध्योरपीति।

तथा च निर्मोक्षः शास्त्रवैयर्थ्यञ्चेत्यर्थः । द्वितीयं दूषयति–सार्थकत्व इति । एतेनेति दुःखत्रयमाध्यात्मिकाधिदैविकाधिभौतिकानि । निर्लेपस्य तदभिघाताभावान्मुमुक्षा तदपघातके तन्निवर्तके मोक्षसाधने जिज्ञासा च न स्यादिति "दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेता"विति तदुक्तमसङ्गतमित्यर्थः । चिद्रूपत्वेति स्वप्रकाशकत्वादिति भावः । ज्ञातृत्वकर्तृत्वेति ततोऽरिक्तभेदाभावादिति भावः ।

ननु ज्ञातृत्वादिधर्माभावेऽपि नित्यत्वादिको भेदोऽस्त्वित्यत्राह– प्रकृतीति ।

ननु बुद्ध्यात्मनोः परस्पराध्यासः संसारः परस्परभेदाग्रहाद्भवति । तद्ग्रहे च निवर्तते । तद्भेदश्च नित्यत्वादिकमेव । तदुभयवृत्तित्वाभावेनासाधारण्यादित्याशङ्कते—कार्येति पुनरपि साधारण्यमाह– नेति । अन्यथेति सत्कार्यवादार्थं तादात्म्यस्यावश्यकत्वादिति भावः । किं च धर्मधर्मिणोस्तादात्म्यस्याङ्गीकारपक्षे धर्मिग्रहे भेदग्रहोऽपि नियत इत्याह—धर्मधर्मीति । अत एवेति विशेषग्रहाद्भ्रान्तिरूपसंसारो न स्यादिति भावः । किं च क्रियाहीनत्वाच्च न स्यादित्याह—निष्क्रियत्वादिति । अस्तु निष्क्रियत्वं, भ्रान्तिरूपः संसारः कुतो न स्यादित्यत्राह—ज्ञानमेव क्रियेति तद्विशेषाग्रहस्तद्भ्रान्तिरित्यर्थः । तदविशेषग्रह इति पाठस्तु लेखकदोषादिति केचित् ।

अन्ये तु तद्विशेषग्रहस्तत्त्वज्ञानं क्रियारूपं, कथं स्यात्तदर्थं शास्त्रं व्यर्थमित्यर्थ इत्याहुः ।

अमुह्यन्नपीति बुद्धिनिष्ठ एव मोहः स्वनिष्ठ इव भासत इत्यर्थः । तदिदमिति अन्यनिष्ठमोहस्यापि स्वस्मिन्नध्यासो मोह एवेति भावः । नन्विति तथा च निष्क्रियत्वविरोध इति भावः । तर्हि विशेषदर्शनेन निवृत्तिर्न स्यादित्याह– ईदृशेति अधिकारः प्रसवः, तन्निवृत्तिरनधिकारः । स एव प्रकृतिनाश इत्यर्थः ।

नन्वनभिव्यक्तिरेव ध्वंस इत्यत्राह—अनभिव्यक्तिश्चेति । युक्तिमाह—अभिव्यक्तेरपीति अभिव्यक्तेरपि नित्यत्वात्तन्निवृत्तेरप्यनभिव्यक्तत्वे तस्याअपि तथेत्यनवस्थेति भावः । मोहनिवृत्त्यर्थ इति तत्त्वज्ञानार्थं शास्त्रं विफलमित्यर्थः ।

ननु पुरुषसंबन्धाभावेऽपि प्रकृतिगतबन्धनिवृत्त्यर्थमेव तद्गततत्त्वज्ञानमित्यवैयर्थ्यमिति शङ्कते—क्रियावतीति । पुरुषस्येति तथा चापसिद्धान्त इति भावः । तद्वाक्यमाह—यदात्स्येति । प्रकृतिरिति पूर्वमेव व्याख्यातम् । दृष्टा मयेति इदमपीत्थं व्याख्यातम् । निवृत्तिप्रसवामित्यनुपपन्नं "साङ्ख्ययोगे कुतः सर्गं" इत्युक्तेः । योग्यता च संयोगश्च ततः पुनः शब्दादीन्प्रसूय बन्धयतीत्यत्राह—दृष्टा मयेति ।

विकाराद्याश्रयत्वेन विवेकख्यात्या दृष्टेत्यपुरुषार्थबुत्या पुरुषो विरतो भवतीति संयोगे सत्यपि सर्गं न करोति प्रयोजनाभावादत एव उपेक्षतैक इति

सञ्जातवैराग्यान्न प्रवर्तत इत्यर्थ इति । भाक्तमिति तथा च दृष्टत्वादिकं वस्तुतो नास्तीति न विरोध इति भावः । तर्हीति विवेकख्यातेरभावादिति भावः ।

ननु "नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः" इत्युक्तं शङ्कते—अस्तुवेति । भेदग्राहिणी विवेकख्यातिमती । तस्यार्थमिति निर्गुणस्य प्रयोजनाय निष्प्रयोजनाऽपि प्रकृतिः प्रवर्तत इत्यर्थः । पुरुषविमोक्षमिति कथमचेतनस्य प्रवृत्तिरिति शङ्कासमाधानपूर्वकं वत्सवृध्यर्थं क्षीरस्येव पुरुषमुक्त्यर्थम्प्रधानस्य प्रवृत्तिरित्यर्थः । कृत्स्नमिति । करणानि पुरुषप्रयोजनम्प्रकाश्य बुद्धौमहत्त्वे प्रयच्छन्ति बाह्येन्द्रियव्यापारसहितेन महत्तत्वेन पुरुषप्रवृत्त्यादिप्रयोजकाध्यासो जायत इत्यर्थः ।

ननु प्रकृतेरेव बन्धमोक्षाविति शङ्कते—रूपैः सप्तभिरिति तत्वज्ञानरहिता सती धर्मादिसप्तरूपैः पुरुषार्थं स्वयमेव स्वात्मानं बध्नाति प्रापयतीति यावत् । एकरूपेण तत्वज्ञानात्मकैकभावेन भोगं न करोतीत्यर्थः । नैतावतापि स्ववचनव्याघातपरिहार इत्याह—तथाऽपीति ।

दूषणान्तरमाह—पुरुषार्थमिति । पुरुषस्यार्थः पुरुषार्थ इति व्युत्पन्नत्वात्पुरुषार्थशब्दस्येति भावः । तद्धेतुभूतेति गुणवैषम्यक्रमादेव तत्क्रम इतिभावः ॥७१॥

अक्ष०—सांख्योक्तेषु आत्मस्वरूप-संसार-मोक्षेषु चिन्मात्रस्वरूपं पूर्वमात्मनो ज्ञातृत्वादिसाधनेन निरस्तमिति बिम्बितत्वमत्र निरस्यति—नीरूप इति रूपवत्येव दर्पणादौ रूपवतो मुखादेः बिम्बितत्वं बिम्बाधिकरणत्वं च स्यादिति भावः । अत एव पुष्करपलाशवन्निर्लेपे बुद्धिधर्माध्यासासम्भवेन का नाम संसृतिस्स्यात् निर्लेप इति । अत्यन्तविशदस्वप्रकाशो निष्क्रियश्चेत्यभ्युपगतोऽयमात्मा कथं भ्रान्तिक्रियाश्रयस्स्यादित्याह—कथन्त्विति । विकृतिविशेषवत् उपाधिसन्निधानात् मुह्यतीति चेत् तत्सन्निधानस्य सर्वदा सम्भवात् नित्यं मोहः स्यादित्याह—नित्यमिति । मुक्तिरेव न स्यादिति भावः । भेदग्रहात् मोहनिवृत्तिस्स्यादित्यत्राह—वेत्त्विति । निष्क्रियत्वाभ्युपगमेन भेदग्रहरूपक्रियाया अपि असम्भावादिति भावः ।

पुरुषस्य कदाऽपि वस्तुतः दुःखाद्यनभ्युपगमेन को वा इदानीं मोक्षो भवतीत्युच्यत इत्याह—को वा मोक्ष इति । पूर्वं दुःखसद्भावे हि अधुना दुःखनिवृत्तिरूपो मोक्षो भवतीति वक्तुं युक्तं अतस्सर्वमनुपपन्नमिति भावः ॥ ७१ ॥

व्यापिन्येकाऽपि सांख्यैः प्रकृतिरभिहिता सर्वसाधारणी सा
व्याप्ता जीवाश्च सर्वे प्रकृतिपरिणतिर्भोग एषामभीष्टः ।
सर्वे सर्वस्य भोगाः स्युरिह तत इमे संनिधानादिसाम्यात्
बुद्ध्यौच्छाद्यं च सर्वं प्रकृतिगतमतो न व्यवस्था ततोऽपि ॥ ७२ ॥

सर्वा०- अत्र *नित्यं वेति वाक्ये बद्धमुक्तव्यवस्था न स्यादित्युक्तम्। अथ *जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ।। इति पुरुषबहुत्वसाधकतयोक्ता च व्यवस्था न सिध्यतीत्याह—व्याप्नोति ।। एकत्वं सत्त्वरजस्तमोरूपद्रव्यसङ्घातात्मकतया। शेषं तु पूर्वार्धं सूहम्। ततः किमित्यत्राह—सवं इति। इमे—प्रत्यक्षानुमानागमैस्सर्वेषामात्मसाक्षिकं प्रतिनियततया प्रख्याता इत्यर्थः। व्यवस्थापकानुपपत्तिमात्रे हेतुमाह- संनिधानेति। स्वरूपसनिधिस्तावत् सर्वत्र सर्वेषां समः। तद्विशेषो दुर्वचः। विशेषवतां संनिधिरेव संनिधिविशेष इति चेन्न, औलूक्यपठितविशेषस्यानादरात्; अङ्गीकारेऽपि तस्य भोगहेतुत्वाभावेन व्यवस्थापकत्वयोगात्। विहितनिषिद्धजनितादृष्टभेदैरेव हि भोगव्यवस्था, अन्यथा निर्निमित्तभोगवादप्रसङ्गात् अस्तु तर्हि तादृशनिमित्तोपश्लेषाद्व्यवस्था।

मैवम्, निष्क्रियस्य ज्ञानचिकीर्षाप्रयत्नानभ्युपगमेन कर्तृत्वाभावव्यवस्थापनात्। अकर्तुश्च न क्रियाजन्यादृष्टाश्रयत्वं तत्फलोभोक्तृत्वं वा समस्ति।

अस्वधर्मसमानीतैरन्यनिष्ठैरुपाधिभिः ।
यदि लिप्येत यः कश्चिन्न लिप्येरन् कथं परे ।।

प्रकृत्यंशगतैर्धर्मैर्यदि तादृग्व्यवस्थितिः ।
अजागलस्तनप्रायः पुमान् किमिति कल्प्यते ।।

तप्तायःपिण्डनीतिश्च नोदाहर्तुमिह क्षमा ।
तत्र संसर्गिसंसर्गभेदात् सर्वोपपत्तिः ।।

न सत् प्रच्यवते यस्य नासदात्मानमृच्छति ।
तस्य बन्धश्च मोक्षश्च कथं न सह तिष्ठतः ।।

तदेतत् सर्वमभिप्रेत्याह- बुद्धीति ।

प्रकृतिगतमित्यनेन बाह्यगतत्वं मूलप्रकृतौ नित्यस्थितत्वं चाभिसंहितम् ।।७२।।

आनन्द०—पूर्वशेषत्वान्नपृथक्सङ्गतिरित्यभिप्रायेणाह—अत्रेति। नित्यं वेति वाक्य इति मूले तथा तात्पर्यावगमादिति भावः। अथ जननेति एवकारो भिन्नक्रमः। पुरुषबहुत्वं सिद्धमेवेति प्रतिज्ञा। तत्र हेतुत्रयम्। तत्र प्रथमो हेतुर्जननम्। जननमरणकरणानांप्रतिनियमादिति देहादिसंबन्धो जननम्। तत्परित्यागो मरणम्। करणानि बुध्यादि त्रयोदश, तेषाम् व्यवस्था प्रतिनियमः। सर्वशरीरेष्वपि जीवस्यैक्ये व्यवस्था नोपपद्यत इति भेदसिद्धिरिति भावः। अयुगपत्प्रवृत्तेश्चेति द्वितीयो हेतुः। आत्मैक्य एकस्मिन्शरीरे प्रयतमाने सर्वशरीरेऽपि प्रवृत्तिः स्यादिति युगपत्प्रवृत्त्यभावोऽपि भेदक इति भावः। त्रैगुण्यविपर्ययाच्चेति तृतीयो हेतुः। त्रिगुणस्य त्रयोगुणास्त्रैगुण्यम्। तद्विपर्ययस्सत्त्वरजस्तमसामन्यथा भावः।

केचित्खलु सत्वबहुला यथोर्ध्वस्रोतसो देवाः। केचिद्रजोबहुला मनुष्याः। केचित्तमोबहुलास्तिर्यग्योनयः। बहुत्वं विनैतादृशव्यवस्था न स्यादिति भावः। सन्निधिमात्रम्प्रयोजकमुत तद्विशेष इति विकल्प्याद्यं दूषयति—स्वरूपेति। द्वितीयं दूषयति—तद्विशेषइति। विशेषशब्देन किं वैशेषिकपठितपञ्चमपदार्थो विवक्षित उतादृष्टमिति विकल्प्याद्यं दूषयति—औलूक्येति। भोगहेतुत्वाभावादिति सर्वानात्मनः प्रति विशेषस्याविशेषादित्यर्थः। यद्यपि विशेषाः प्रतिनियता एव। तथाऽपि यस्य विशेषस्य तादृशप्रयोजकत्वं तादृशो विशेषोऽन्येषामप्यस्तीति न तन्मात्रस्य व्यवस्थापकत्वमिति भावः। अन्यथेति अदृष्टस्य हेतुत्वाभावः स्यादित्यर्थः। द्वितीयमनुवदति—अस्तु तर्हीति। अकर्तुश्चेति अन्यथातिप्रसङ्गादिति भावः। किं च प्रकृतिमात्रगतैर्धर्मैर्व्यवस्थोच्यत उत तद्विशेषगतैरिति विकल्पं मनसि कृत्वाऽऽद्यं दूषयति—अस्त्विति। स्वव्यतिरिक्तप्रकृतिगतादृष्टादिधर्मजातैरेवोपाधिभिर्यदि कश्चिल्लिप्येत संबध्येत तदा सर्वेऽप्यदृष्टसंबद्धा भवेयुरिति वदति—न लिप्येरन्कथम्पर इति। भेदाङ्गीकारेऽप्यात्मनां व्यवस्था न स्यादिति भावः। द्वितीयं दूषयति—प्रकृत्यंशगतैरिति। प्रकृत्यंशानामेव बन्धमोक्षभाक्त्वात्तत एव सर्वव्यवस्थोपपत्तेस्तत एवात्मसिद्धिरेव न स्यादिति दूरे तद्भेदसिद्धिरिति भावः।

ननु साक्षात्सुखदुःखाभावेऽपि प्रकृत्यंशसंबन्धात्तप्तायः पिण्डवत्सुखादयस्तद्व्यवस्था च स्यादित्यत आह—तप्ताय इति। हेतुमाह—तत्रेतियुक्तं वह्न्ययः पिण्डयोः परिच्छिन्नत्वात्कस्यचित्पिण्डस्य वह्निसंपर्के तु तस्यैव लौहित्यादिसंबन्धो न पिण्डान्तरस्येति व्यवस्था। इह त्वात्मनां विभुतया प्रकृतितदंशसंबन्धस्य सर्वसाधारण्यादेकस्य तद्धर्मभाक्त्वे सर्वेषामपि तत्स्यादिति भावः। किं च सर्वथा बन्धमोक्षव्यवस्था न स्यादित्याह—न सदिति। यस्य मते सत्=विद्यमानं न प्रच्यवते न वर्तते। असत्सर्वमविद्यमानं नात्मानं प्राप्नोति नोत्पद्यते। तस्य साङ्ख्यस्य बन्धमोक्षौ कथं न सहतिष्ठतः तथा च व्यवस्था न स्यादिति भावः। बाह्यगतत्वमात्मान्यगतत्वम्। नित्यस्थितत्वमिति तन्मते सर्वस्य नित्यत्वाद्बुद्धावपि संसारतदभावयोर्भ्रमविशेषदर्शनयोरपि यौगपद्यं भवेदिति प्रकृत्यंशेऽपि न न व्यवस्थेति भावः॥ ७२॥

अक्ष०—इह सांख्यमते पुरुषबहुत्वसाधिका भोगव्यवस्था नोपपद्यते इत्युच्यते—व्यापिनीति। विभ्वी प्रकृतिरेकैव सर्वात्मसाधारणी इति सांख्यैरभिधीयत इत्यर्थः। तथा सर्वे च जीवा विभव इत्युच्यन्ते—सर्वेषां च जीवानां प्रकृतिपरिणतिविशेषेण भोग इष्यते। तत्र इमे प्रत्यक्षादिप्रमाणैरात्मसाक्षिकं प्रतिनियततया प्रतीतास्सर्वे भोगाः सर्वस्यापि स्युः प्रकृतिसन्निधानस्य सर्वत्राविशिष्टत्वात् इत्यर्थः। न चायं प्रसङ्गः ज्ञान-चिकीर्षा-प्रयत्नधर्मा-धर्मादिभिर्विशेषैर्वारयितुं शक्य इत्याह—बुद्धीति। आत्मनो निष्क्रियत्वोपगमेन ज्ञानप्रयत्नादृष्टाद्य-

सम्भवेन प्रकृतावेवाभिमतानां तेषां सर्वसाधारणत्वेन ततोऽपि (प्रतिनियत) भोगव्यवस्था न सम्भवतीति भावः।

तथा चाहुराचार्याः—

अस्वधर्मसमानीतैः अन्यनिष्ठैरुपाधिभिः।
यदि लिप्येत यः कश्चित्, न लिप्येरन् कथं परे ? ॥
प्रकृत्यंशगतैर्धर्मैर्यदि तादृग्व्यवस्थितिः।
अजागलस्तनप्रायः पुमान् किमिति कल्प्यते ॥
तप्तायःपिण्डनीतिश्च नोदाहर्तुमिह क्षमा।
तत्र संसर्गिसंसर्गभेदात् सर्वोपपत्तितः ॥
न स प्रच्यवते यस्य नासदात्मानमृच्छति।
तस्य बन्धश्च मोक्षश्च कथं न सह तिष्ठतः ॥ इति ॥ ७२ ॥

इति सांख्यसंसारमोक्षविविरासः

मुक्तिः प्राणाक्षदेहादिभिरुपधिभिरत्यन्तविश्लेषरूप
जीवद्भावोऽपि तैस्सङ्गम इति विहतेर्जीवतस्सा कथं स्यात्।
आपस्तम्बादयश्च श्रुतिगतिभिरिमां युक्तिभिश्च व्युदासु-
र्जीवन्मुक्तादिशब्दः क्वचिदुपचरितस्तत्समावस्थयैव ॥ ७३ ॥

सर्वा०—अथ मुख्यप्रयोगानभिज्ञकल्पितां जीवन्मुक्तिं दूषयति—मुक्तिरिति ॥ यदि कतिपयनिवृत्तिमात्रे मुक्तिशब्दः, तदाऽतिप्रसङ्ग इति भावः। नित्यसिद्धस्य पुरुषस्य जीवनमपि ह्युपाधिविशेषसंबन्ध इत्याह—जीवद्भाव इति। फलित-माह—विहतेरिति। अत्र महर्षिवाक्यविरोधमप्याह—आपस्तम्बादय इति। प्रागेवैतत् प्रदर्शितम्। *अमृत इह भवति, *जीवन्मुक्ता भवन्तीत्यादेः का गतिरित्यत्राह—जीवन्मुक्तादिशब्द इति। श्रुत्यादिष्वप्यगत्यामुपचारः स्वीकृत इति भावः ॥ ७३ ॥

आनन्द०—प्रसङ्गादाह—अथेति। ननु पूर्वमर्चिरादिना गतस्य मुक्तिरि-त्युक्तम्। तदयुक्तं जीवन्मुक्तिसद्भावादिति व्यवहिताक्षेपेणोत्थानमित्येके। "तमेवं विद्वानिह मुक्तो भवति," "जीवन्मुक्ता भवन्ती" त्यादिप्रतिपादकश्रुत्यादि-विरोध इत्यर्थः। मुक्तिर्हि कर्मकृतदेहाद्यभावः। संसारस्तत्संबन्धः। तौ परस्पर-विरोधाद्युगपन्न स्याताम्। आपस्तम्बादयोऽपि "बुद्धे चेत्क्षेमप्रापणं तच्छास्त्रैर्वि-प्रतिषिद्ध" मित्यादिभिः पराचिकीर्षुः। क्वचिज्जीवति मुक्तिशब्दप्रयोगोऽपि मुक्ति-समानानुभवावस्थतया भाक्तः। तस्माज्जीवन्मुक्तिरयुक्तेति मूलस्यार्थः ॥ ७३ ॥

अक्ष०—पराभिमतां जीवन्मुक्तिं निरस्यति—मुक्तिरिति। प्राणेन्द्रिय-शरीराद्यत्यन्तविश्लेषरूपाया मुक्तेस्तत्सम्बन्धरूपजीवभावेन विरोधात् तयोरेकदा समावेशो न निर्वोढुं शक्य इत्यर्थः। अत एव महर्षयश्च तां निरासुरित्याह—आपस्तम्बादयश्चेति। श्रुतिगतिभिरिति। बुद्धे क्षेमप्रापणं तच्छास्त्रैः विप्रतिषिद्धमित्यादिभिरित्यर्थः। युक्तिभिश्चेति "बुद्धे चेत् क्षेमप्रापणं इहैव न दुःखमुपलभेत' इत्यादिभिरित्यर्थः। तर्हि 'जीवन्मुक्तो भवति'—अमृत इह भवतीत्यादिशब्दानां को विषय इत्यत्राह—क्वचिदुपचरित इति। अग्निर्माणवक इतिवत् केनचिदाकारेण मुक्तसाम्यात् गौणार्थ एव विषय इत्यर्थः। तथा च वेदेऽपि यजमानः प्रस्तर इत्यादावनेकत्र गत्यामसत्यां गौणाः प्रयोगा उपेयन्त इति भावः॥ ७३॥

इति जीवन्मुक्तिभङ्गः

चन्द्रैकत्वादिबुद्धया न हि विलयमियाच्चक्षुरर्थादिदोषः।
स्याद्बाधेऽपि द्विचन्द्रप्रभृतिषु हि ततो भ्रान्तिमात्रानुवृत्तिः।
विस्रम्भाभावतः स्यात् फलमपि न तु ते जाघटीति द्वयं तद्
ब्रह्मान्याशेषबाधादनतिबलतया बाध्यतो बाधकस्य॥ ७४॥

सर्वा०—अद्वैतिनस्त्वाहुः—श्रवणमननाभ्यां भेदसत्यत्वविस्रम्भे निरस्तेऽप्यविद्याबाधकमद्वैतज्ञानं नोदेति, ध्यानेन तु निरस्तसमस्तभेदवासनस्याद्वैतवाक्याद विद्यानिवर्तकधीसंभवः; निवृत्ताविद्यस्यापि द्विचन्द्रादिदर्शनन्यायेन यावच्छरीरं बाधितानुवृत्तिः स्यात्, तादृश्यां दशायां ब्रह्मविज्जीवति च मुक्तश्चेत्यव्याहतिरिति। एतदपि दूषयति—चन्द्रैकत्वेति॥ तत्र तावल्लोके बाधितानुवृत्तिर्युज्यते, बाधकज्ञानेन भ्रमानुवृत्तिहेतोर्दोषस्याबाधितत्वात्। न हि चक्षुर्गतास्तिमिरादयः शुक्त्यादिगता वा दूरत्वसादृश्यादयो बाधकज्ञानेनापह्रियन्ते, सत्यत्वात्;, तत्प्रकाश्याकारविरोधित्वाभावान्न बाध्यन्त इति भावः। मात्रचाऽभिप्रेतं व्यनक्ति—विस्रम्भाभावत इति। एवं बाधितानुवृत्तिर्बाधकधीसाफल्यं च त्वन्मते न संभवतीत्याह—न त्विति। प्रथमस्यासंभवं विवृणोति—ब्रह्मान्येति। ब्रह्मव्यतिरिक्तं कृत्स्नं मिथ्येति हि बाधकप्रत्ययः। तत्र यदि महीयसी बलयसी च मूलाविद्या विलीयेज, कथं तदा तूलकल्पः तदेकदेशो विलयं न गच्छेत्? यदि चास्य ज्ञानादन्यद् बाधकम्, तदाऽपसिद्धान्तः सत्यत्वप्रसङ्गश्च स्यात्। अविद्याबाधकेनाबाधितं च कथमन्यदपि ज्ञानं बाधेत? अहेतुकनिवृत्तिश्च प्रागेव दूषिता। अन्त्यशब्दचरमसंस्कारादीनामपि हेतुविशेषत एव निवृत्तेरत्र बाधकफलस्याप्यसंभवमाह—अनतिबलतयेति।

अयं भावः—श्रवणमननदशायामेव हि निषेध्यप्रपञ्चज्ञानं निषेधकज्ञानं चाविद्यामूलमित्यध्यवस्यति, तथा सत्येकदोषप्रसूतत्वे परत्वस्याकिंचित्करत्वात्,

अन्यथा माध्यमिकविजयप्रसङ्गाच्च नोत्तरे बाधकत्वविस्रम्भः स्यात् अत एव न तदर्थंध्याने प्रवर्तेत, न च रागद्वेषादिभिरुज्झितः स्यादिति ॥ ७४ ॥

आनन्द० – पूर्वाक्षेपेण निरूपयति—अद्वैतिन इति । ध्यानेन त्विति भेदवासनायाः प्रतिबन्धकत्वादिति भावः । यावच्छरीरमिति अविद्याया निवृत्तत्वान्मुक्तिः । अविद्यांशस्यानुवृत्तत्वाज्जीवत्वमिति जीवन्मुक्तिशब्दार्थ इति ।

केचित्तु शरीरस्यानुवृत्तत्वाद्यावच्छरीरं जीवन्मुक्तिरित्यर्थं इत्याहुः । सर्वमिथ्यात्ववादिमते कथं दोषाननुवृत्तिरित्यत्राह—तत्प्रकाश्येति । चन्द्रद्वित्वं हि बाधकज्ञानेन बाध्यते । न तु दोष इति भावः । मात्रचेति भ्रान्तिमात्रेतिमूलस्य-मात्रचेत्यर्थः । प्रथमस्य बाधितानुवृत्तेः । तत्र यन्नीतिकैमुतिकन्यायादेव तूलकल्प तदेकदेशविलय इति भावः । तत्राविद्यैकदेशो निवर्त्यो न वा ? अन्त्ये सत्यमिथ्यात्व विकल्पेनाद्वैतहान्यनिर्मोक्षादिप्रसङ्गं मत्वा प्रथमेऽपि ज्ञानान्यनिवर्त्यं उत ज्ञाननिवर्त्यं आहोस्वित्स्वतो निवर्त्य इति विकल्प्याद्यं दूषयति—यदि चास्येति । ज्ञानेन निवर्त्यस्यैव मिथ्यात्वमित्यभिप्रायेणाह—सत्यत्वेति । द्वितीयं दूषयति अविद्येति । विरोधिविषयकस्याप्रयोजकत्वादिति भावः । तृतीयं दूषयति—अहेतुकेति । अन्त्यशब्दनिवृत्तौ पूर्वशब्दो वायुविशेषो वा हेतुविशेषः; चरमसंस्कारनिवृत्तौ च विद्यादयो हेतुविशेषाः ।

ननु प्रतिबन्धकत्वमसिद्धम् । दोषमूलत्वाभावस्य परत्वस्य वा सत्वादित्यत्राह—अयम्भाव इति । अन्यथेति माध्यमिकागमस्य सर्वशून्यताप्रतिपादकत्वेन सर्वापेक्षया परत्वादिति भावः । अत एवेति बाधकज्ञानोत्पत्त्यर्थम्प्रतिबन्धकभेदवासनानिरासकनिदिध्यासने प्रवृत्तिर्व्यर्थेति भावः । न चेति रागद्वेषादितुल्यत्वाच्छ्रवणादिजन्यज्ञानस्येति भावः ॥ ७४ ॥

अक्ष० —जीवन्मुक्त्युपपादनाय परोक्तां बाधितानुवृत्तिं निरस्यति चन्द्रेति । आप्तोक्तिसिद्धया चन्द्रैकत्वबुद्धया द्विचन्द्रभ्रमबाधेऽपि भ्रमहेतोश्चक्षुर्गततिमिरादिदोषस्य अर्थगतदूरस्थत्वादिदोषस्य च बाधाभावेन पुनरपि तन्मूलकद्विचन्द्रभ्रममात्रानुवृत्तिरनिवार्या भवति, तथाऽपि आप्तोपदेशरूपप्रबलप्रमाणबाधितत्वेन तद्विषये विस्रंभः परं न जायत इति बाधकफलमपीत्येतदुभयं तत्रोपपद्यतां नाम । प्रकृते तु ते तर्कद्वयमपि दुर्घटमेव भवतीति (वादत्रपार्थं) कुत इति चेदाह—ब्रह्मेति । ब्रह्माद्वैतविज्ञानेन ब्रह्मेतरकृत्स्नबाधोपगमे ब्रह्मातिरिक्तत्वेन भ्रमहेतुदोषस्यापि बाधोपगमावश्यंभावेन हेत्वभावान्न बाधितानुवृत्तिसम्भवः ।

नापिबाधकतयाऽभिमतस्याद्वैतवाक्यस्य भेदप्रमाणादधिकबलवत्वं, तस्यापि भेदवासनादोषमूलकत्वोपगमात् । अतो भेदमिथ्यात्वनिश्चयस्स्यादित्यपि न वक्तुं शक्यम् । तस्मात् द्विचन्द्रप्रभृतिषु दृष्टबाधितानुवृत्ति-बाधफलवत् भेदप्रपञ्चे

तदुभयोपपादनासम्भवात् तद्दृष्टान्तेन बाधितानुवृत्त्या जीवन्मुक्तिसाधनं डिम्भप्रलोभनमेवेति भावः ॥ ७४ ॥

इति परोक्तबाधितानुवृत्तिभङ्गः

स्वातन्त्र्यं ब्रह्मणैक्यं पशुपतिसमतां वासनोच्छेदमात्रं
धीसन्तानप्रणाशं निजमतिसुखयोर्नित्ययोस्सन्निकर्षम् ।
चित्तेन स्वात्मसौख्यानुभवमुपलवद्भावमूर्ध्वप्रयाणं
शून्याद्वैतं च मुक्तौ श्रुतिरुपकृतये कल्पतां जल्पतां वः ॥ ७५ ॥

सर्वा—अथ मुक्तिविषये वादिनां प्रलापान् संक्षेपेणोद्गृह्णन् प्रत्येकदोषः श्रोतृभिः स्वयमूह्य इति मत्वा साधारणं श्रुतिविरोधं तावत् सूचयति—**स्वातन्त्र्यमिति** ॥ सिद्धिवासनासितासितमनोभिरेतदिष्यते, न च तद्युक्तम्; सर्वेषां सर्वनियन्तृत्वायोगात् । ब्रह्मणैक्यं तु त्रय्यन्तैकदेशिनस्संगिरन्ते । तत्र साम्यसाधर्म्यसहशब्दादिभिर्बाधः । भेदसहं केवलं वा नित्यतादात्म्यमिच्छतां किमिदानीमैक्यं साध्यम् ? एकत्वनानात्वविभागाविभागशक्तिमत्त्वपक्षश्च न प्रमाणिकैः श्रद्धेयः । कल्पादावुत्पन्नाः कल्पान्ते ब्रह्मण्यैक्यं लभन्त इति पक्षे त्वकृताभ्यागमकृतविप्रणाशप्रसङ्गोऽप्यधिकः । पशुपतिसमतां तन्मतस्थाः प्राहुः ।

तत्रावान्तरभेदेषु विशेषश्च द्रष्टव्यः । प्रत्युक्तं तन्मतम् *पत्युरसामञ्जस्यादिति । वासनोच्छेदमात्रं तु बौद्धैकदेशिनः । तत्र सर्वज्ञानसन्तानैकतापत्तिः स्यान्न वेति विभागः । तत्र तत्प्रक्रियाप्रतिषेध एवोत्तरम् । धीसन्तानप्रणाशं तु प्रज्ञाकरमतस्थाः । तत्रान्तिमस्यार्थक्रियाविरहादसत्त्वे तत्पूर्वेषामपि तथेति शून्य[ता]वादावतारः । निजमतिसुखयोर्नित्ययोः सन्निकर्षं । तु न्यायैकदेशिनः इदं च मतं प्रागेवापास्तम् । चित्तेन स्वात्मसौख्यानुभवं भाट्टाः । उपलवद्भावं त्वौलूक्याः, न्यायमीमांसैकदेशिनश्च । अनयोरपि साधकासंभव उक्तः । ऊर्ध्वप्रयाणं तु जैनाः । तत्र भूम्यां नित्यपतनवन्नित्योर्ध्वगमनमेके । अन्ये तु लोकाकाशमतिक्रम्य सकललोकमस्तकस्थायिन्यलोकाकाशे देहमेकमनेकं वा परिगृह्य वसन्त इति । इदं तु तत्कथामात्रसिद्धम् । शून्याद्वैतं तु माध्यमिकाः । तत्र सर्वतोमुखी व्याहतिरूह्या । तथा च तत्प्रतिक्षेपसूत्रम्—*सर्वथाऽनुपपत्तेश्चेति । चकारोऽनुक्तान्मुक्तितारतम्यचिन्मात्रस्फुरणादिपक्षान् संगृह्णाति । एतत् सर्वं जल्पतां श्रुतिरुपकृतये कल्पतामित्युपालम्भकाक्वा बाधकत्वपरम्; सर्वभूतदयालुत्वस्मरणादिदं सानुग्रहवाक्यं वा । आयुर्वेदविद्भिरप्यन्वाख्यायते—

*आत्मद्रोहममर्यादं मूढमुन्मुक्तसत्पथम् ।
सुतरामनुकम्पेत नरकार्चिष्मदिन्धनम् ॥ इति ।

तदिह *परात्परं पुरुषमुपैति दिव्यमित्युपनिषत्सिद्ध एव मोक्ष इति भावः ॥ ७५ ॥

॥ इति श्रीसर्वार्थसिद्धिसमेते तत्त्वमुक्ताकलापे जीवसरः द्वितीयः ॥ २ ॥

आनन्द०—पूर्वसङ्गतिमभिप्रेत्याह—अथेति । "अणिमाद्यभवाअष्टौ सिद्धयः अहं योगिनाम्" इत्युपक्रम्येशत्वं सर्वजगतान्नियन्तृत्वमुदाहृतम् । सैव मुक्तिरनुच्छिन्नं पुनरावृत्तिवर्जितमिति योगशास्त्रोक्तपक्षं निराचष्टे—सिद्धिवासनेति । सिद्धिवासना तदनुभवेच्छा तया सितासितमनस्कस्तत्वनिर्णयविधुर इति यावत् । त्र्यन्तैकदेशिनः शङ्करादयः । यादवभास्करशङ्करमते मोक्षार्थप्रवृत्तिवैफल्यमाह—भेद ऽहमित्यादिना । भेदसहतादात्म्यं भास्करयादवयोर्मतम् । केवलतादात्म्यं शङ्करस्य । यादवभास्करयोरेव विभागाविभागशक्तिमत्वमिमि पक्षस्तत्र नानात्वं विभाग एकत्वमविभागो मोक्ष इत्यर्थः । प्रामाणिकैरिति नित्यनिरवयवनिर्विकारस्य तदयोगादिति भावः । पौराणिकपक्षं निराकरोति—कल्पादाविति । पशुपतिसमतामिति "मुक्तात्मानोऽपि शिवाः किन्त्वेते यत्प्रसादतो मुक्ताःसोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनु"रित्यादिनेति शेषः । तत्रावान्तरेति शिवाद्वैतपक्षे शिवैक्यापत्तिरस्येश्वरसिद्धान्ते कायसिद्धिर्मोक्षः शिवसालोक्यमित्यादि । बौद्धैकदेशिनस्त्विति धीसन्ताननाशपक्षस्यावान्तरपक्षस्यापि सद्भावादिति बोध्यम् । सर्वेति वासनाया भेदनियामिकाया नाशः । सर्वज्ञसन्तानेनैक्यं मोक्ष इत्येकम्मतम् । तदैक्यन्नास्तीत्यपरम्मतम् । तदुक्तम्बौद्धविलासे "मोक्षः सर्वज्ञसन्तानेनैक्यम्पूर्वैर्निरूपितम्परे तु मेनिरे चित्तसन्ततितिनिरुपप्लव" इति । तत्र तत्प्रक्रियेति "समुदायोभयहेतुकेऽपि तदप्राप्ति" रित्यादिनेति शेषः । प्रज्ञाकरो बौद्धैकदेशी । न्यायैकदेशिन इति भूषणमतानुसारिणः । चित्तेनेति "मनः करणकेनात्मा प्रत्यक्षेण प्रतीयत" इत्युक्तैरिति भावः । औलूक्या वैशेषिकाः । न्यायैकदेशिनः भूषणकारव्यतिरिक्ताः । मीमांसकैकदेशिनः प्राभाकरैकदेशिनः । जैनेषु द्वैविध्यमाह—तत्रेति आत्मनो नित्योर्ध्वगमनमित्यर्थः लोकाकाशेति आकाशद्वयं प्रागुक्तम्बोध्यम् । शून्याद्वैतं सर्वशून्यमित्यर्थः । सर्वतोमुखीति सर्वशून्यवादी स्वमतं साधयन् सर्वं सदिति मन्यतेऽसदिति वा ? नाद्यः, शून्यत्वस्य बाधितत्वबुद्धेःसाधनायोगात् । न द्वितीयः पक्षदृष्टान्तसाधनवादिप्रतिवादिभूषणदूषणादीनां सत्वनिश्चये कस्मिन्किङ्केन कस्मै साधयेदित्यादिबहुमुखी व्याहतिरित्यर्थः । तत्र वैयासिकसूत्रं संवादयति—तथा चेति आनन्दतारतम्यम्मुक्तावानन्दतीर्थीया वदन्ति । चिन्मात्रस्फुरणं साङ्ख्याः । आदिशब्देन सालोक्यादयः कैवल्यञ्च न मोक्षः । अनित्यत्वान्नित्यत्वे नित्यसंसारतया न मोक्षः शरीराभावेऽपि प्रलयादिवत्प्रकृतिसंबन्धात्संसारः संभवत्येव । न च प्रकृतिमण्डलात्परस्तात्स्थितिःमानाभावात् । न चार्चिरादिगतिरित्यादि द्रष्टव्यम् । विस्तरस्तु न्यायसिद्धाञ्जनतात्पर्यटीकादिषु परिश्रमवतां सुगम इति ।

इति किल निगमान्तदेशिकेन्द्रप्रचितकृपापरिणद्धधीप्रबन्धः ।
गुरुजनवचनात्तथैवरीत्या व्यवृणुत सिद्धिं नृसिंहदेवः ॥

इति कुशिककुलकलशजलधिसुधाकरस्य निगमशिखरविद्याकुमुदिनीसम्मोदकरस्य वेदान्ताचार्यस्य भागिनेयेन वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन नृसिंहदेवेन विरचितायामानन्ददायिन्यां सर्वार्थसिद्धिटीकायां जीवसरो द्वितीयः समाप्तः ।

अक्ष०—अथ मुक्तिविषये वादिनां मतभेदानुद्‌गृह्य सर्वत्र श्रुतिविरोधं निगूढभङ्‌ग्या व्यनक्ति—स्वातन्त्र्यमिति। योगसिद्धिमतामिदं, ब्रह्मणैक्यं वेदान्त्येकदेशिनां,—पशुपतिसमतां पाशुपतानां, वासनोच्छेदमात्रं, बौद्धैकदेशिनां धीसन्तानप्रणाशं प्रज्ञाकरमतस्थानां, निजमतीति। इदं न्यायैकदेशिनां, चित्तेनेति। एतत् भट्टानां,। उपलेति। औलूक्यानां, ऊर्ध्वेति। जैनानां, शून्याद्वैतं माध्यमिकानामिदं मतं, इत्येवं मुक्तौ स्वेच्छया वदतां वादिनां 'परात्परं पुरुषमुपैति दिव्यं' इत्यादिश्रुतिः मातापितृसहस्रेभ्योऽपिवत्सलतरा यथावस्थितधियमुत्पाद्यानुगृह्णातु इत्याशयः ॥ ७५ ॥

इति परमते विरुद्धानामर्थानां मोक्षविरुद्धत्वप्रतिपादनम्।

इति नावल्पाकं अय्या श्रीदेवनाथताततयार्य महादेशिकविरचिते अक्षरार्थनाम्नि व्याख्याने जीवसरस्समाप्तः।

तत्त्वमुक्ताकलापश्लोकानुक्रमणिका

शुद्धाशुद्धपट्टिका

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१	८	शैली	शैलो
१	१९	जीवानामीश्वरा	जीवानामीश्वरा
२	११	स्तन्भादु	स्तम्भादु
२	२८	करोभ्यानन्द	करोम्यानन्द
३	२६	लसाये	लसा ये
४	१७	स्वतएग्व	स्वत एव
४	२८	हृयवद्न	हृयवदन
५	५	संम्प्रदाय	सम्प्रदाय
५	१६	यज्ञानुष्ठानष्य	यज्ञानुष्ठानस्य
५	१७	स्वस्याऽपि	स्वस्यापि
६	५	माहप्र ज्ञेति	माह-प्रज्ञेति
६	२२	सम्यङ्ग्निर्धा	संयङ्निर्धा
६	२६	तथान्वेष्यणेऽपि	तथाऽन्वेषणेऽपि
६	२७	बाघ	बाध
६	३१	वैधर्यस्य	वैधुर्यस्य
७	२६	इति तत्व	इति । तत्त्व
८	१२,१६	शकय	शक्य
८	१९	वा सर्व	वा । सर्व
८	२४	सांख्यगसौतादि	सांख्यसौगतादि
८	२५	परमपरया	परम्परया
८	२७	द्वयाख्यायाः	द्वधाख्यायाः
८	३३	द्वाटन	द्घाटन
९	३२	शकय	शक्य
१०	१७	विघमिति	विधमिति
११	२३	धर्मो	धर्मौ
१२	४	ज्ञातुर्ज्ञया	ज्ञातुर्ज्ञेया
१२	१९	ग्रृह्यते	गृह्यते
१३	७	र्धमिम्यां	र्धमिभ्यां
१३	७	कारणाम्या	कारणाभ्या

१३	१२	तश्चायुक्तं	तच्चायुक्तम्
१३	२५	प्रत्यक्तादि	प्रत्यक्त्वादि
१३	३०	प्रावभाग	प्रागभाव
१४	२३	न्यत	न्यत्
१६	१८	यधा	यथा
१८	३२	मतं	मतम्
१८	३३	सौत्रान्त्रिक	सौत्रान्तिक
१९	१३	स्पृष्ठस्येदानी	स्पृष्टस्येदानीं
१९	२३	रुपत्व	रूपत्व
२२	२३	इत्युच्यतेः	इत्युच्यते
२३	१	कर्मिश्चित्	कस्मिश्चित्
२३	२	कश्चिग्वृल्लानि	कश्चिद्गृल्लाति
२३	६	संम्भवात्	सम्भवात्
२३	११	लङ्ख्ना	लङ्घना
२३	२२	विपययैः	विपर्ययैः
२९	४	प्रह्नणा	ग्रहणा
२९	१७	सिद्धयतीति	सिद्ध्यतीति
२९	१८	चेत्क्रथ	चेत्कथ
२९	३०	तेपां	तेषां
३०	३	धर्मणां	धर्माणां
३०	१४	द्येकयोः	द्व्येकयोः
३०	२९	यधा	यथा
३०	३५	द्योयति	द्योतयति
३१	२	दूषणोद्वारः परपक्षद्षण	दूषणोद्धारः परपक्षदूषण
३१	१६	श्लोकेस युक्तिकं	श्लोके सयुक्तिकं
३२	७	निर्गछ	निर्गच्छ
३३	४	चेन्नं	चेन्न
३३	५	केषां चिद्धमीणां	केषाञ्चिद्धर्माणां
३४	२०	रोघात्	रोधात्
३४	२७	धमन्तिरं	धर्मान्तरं
३५	२८	स्वात्मानपि	स्वात्मानमपि
३६	३२	सामाधिकरण्यं	सामानाधिकरण्यं
३७	८	लब्धियोरिति	लब्ध्योरिति
३७	२०	प्रामाण	प्रमाण

३७	३०	बिभेम्यहम्	बिभेम्यहम्
३८	२३	वारययि	वारयति
३८	३०	न्यदियि	न्यदिति
३९	१०	सामग्र्यैक्यात्	सामग्र्यैक्यात्
३९	१३	भावानकिकरण	भावानधिकरण
४०	८	प्रथमोद्दिष्टं	प्रथमोद्दिष्टं
४०	२७	स्वाच्छद्यम्	स्वाच्छन्द्यम्
४१	२०	तादात्म्यम्	तादात्म्यम्
४२	१०	निश्वास	निश्वास
४२	२३	लम्भा	लम्भा
४४	३२	वह्न्यंशो	वह्न्यंशो
४५	३३	थोगात्	योगात्
४६	१	वफल्य	वैफल्य
४६	२	बुद्धिद्दृष्टान्त	बुद्धिदृष्टान्त
४६	१०	द्वव्य	द्रव्य
४६	१९	प्रतिन्नन्धी	प्रतिबन्धी
४७	६	स्वाच्छन्द्य	स्वाच्छन्द्यम्
४७	७	नाध्यक्षणेति	नाध्यक्षेणेति
४७	९	गमरिति	गमैरिति
४७	१८	महत्त्तत्वस्य	महत्तत्त्वस्य
४७	२५	कथमित्त्राह	कथमित्यत्राह
४८	३०	न्तरुमाह	न्तरमाह
४८	३१	शङ्क्यम्	शङ्क्यम्
५०	२	तथावं	तथात्वं
५०	५	हिंसा	हिंसा
५०	११	मानतन्तराण्यपि	मानान्तराण्यपि
५१	१५	प्रयत्ननैव	प्रयत्नेनैव
५४	१३	भावः	भावः
५४	२७	विपक्ष	विपक्ष
५५	९	सिद्धरि	सिद्धिरि
५६	१२	सांख्यां	सांख्याः
५७	४	तत्तदेश	तत्तद्देश
५८	३	सिद्धयसिद्धि	सिद्ध्यसिद्धि
६१	[illegible]	प्रकारश्च	प्रकारश्च

६१	८	सिद्धयती	सिद्ध्यती
६१	२५	सिद्धया	सिद्ध्या
६१	३०	महद्भ्यः	महद्भ्यः
६२	१५	कल्प्ति	क्लृप्ति
६३	६	बहूवचनं	बहुवचनं
६३	१०	भाव	भावः
६४	२५	निमित्ति	निमित्त
६५	८	च्छूति	च्छ्रुति
६५	१५,१६,२३	अद्भयो	अद्भ्यो
६५	२१	कल्प्नं	कल्पनं
६६	८	लम्भि	लम्बि
६६	३०	अवस्स्था	अवस्था
६७	१२,२०	लाधवं	लाघवं
६७	१३	पथ्व्या	पृथ्व्या
७१	८	मनुरुद्धय	मनुरुद्ध्य
७१	१३	लिङगं	लिङ्गं
७३	३२	ततस्से	ततस्ते
७३	३३	नाशन्कुवन्	नाशक्नुवन्
७५	१७	चात्यन्नतभिन्त्वं	चात्यन्तभिन्नत्वं
७५	३२	अययविनाशे	अवयविनाशे
७८	६	अभाप्यतेति	अभाष्यतेति
८०	१३	काल्पानिकांशस्य	काल्पनिकांशस्य
८२	२२	त्र्यसरेणुः	त्रसरेणुः
८३	२७	परमग्गोर्नं	परमाणोर्नं
८४	२४	नु	तु
८९	१३	दोप	दोष
९०	१७	झडिति	झटिति
९१	१	एकपल	एककपाल
९२	३१	सृप्ट्युप	सृष्ट्युप
९२	३१	अणुप्वेव	अणुष्वेव
९३	२२	देशावष्टम्म्भेन	देशावष्टम्भेन
९३	३०	संगहः	संग्रहः
९४	१४	संक्ष्लेष	संश्लेष
९५	९	सम्भ्बन्धस्य	सम्बन्धस्य

९५	२४	लाधवा	लाघवा
९६	३३	वत्य	वृत्य
९७	१६	मूलस्यामर्थः	मूलस्यायमर्थः
९८	८	धन	घन
९८	२३	सर्वावययेवष्वव	सर्वावयवेष्वव
१००	२५	त्र्यस	त्रस
१०३	१९	द्वयणु	द्व्यणु
१०५	४	व्ययस्था	व्यवस्था
१०५	६	संधात	संघात
१०५	३१	ईदृक्	ईदृक्
१०६	१४	चतुर्विध	चतुर्विध
१०९	२	व्वक्ता	व्यक्ता
१०९	३२	तथाः	तथा
११०	३१	पङ्ग्वन्ध	पङ्ग्वन्ध
११२	९	तग्द्गतं	तद्गतं
११३	२८	यधा	यथा
११४	३०	वैययिकरण्य	वैयधिकरण्य
११५	१२	धानाम्यां	धानाभ्यां
११५	१४	स्वरूपाद्धटा	स्वरूपाद्घटा
११६	७	गाह्या	ग्राह्या
११७	१५	भिक्चेति	भिश्चेति
११८	१३	सम्मवा	सम्भवा
११९	२	तत्वं	तरत्वं
१२१	१३	सूल	मूल
१२१	३०	सार्‌या	सामग्र्या
१२३	११	असस्वात्	असत्त्वात्
१२३	२७	देशाख्येन	देशाख्येन
१२८	१३	नकस्मि	नैकस्मि
१२९	१८	भेकत्व	मेकत्व
१०३	३१	रजतस्सृतिः	रजतस्मृतिः
१३३	२९	सिद्धयेदिति	सिद्ध्येदिति
१३३	३८	तत्त्वेदं हि	तत्त्वेदन्त्वे हि
१३७	३	रूप्प	रूप
१३७	१२	प्रत्क्षेणैव	प्रत्यक्षेणैव

१३९	६	सिद्धयति	सिद्ध्यति
१४०	२०	सिर्द्धिः	सिद्धिः
१४१	२१	मुग्द	मुद्ग
१४२	२५	सिद्धया	सिद्ध्या
१४२	३०	सिद्धयति	सिद्ध्यति
१४३	१	षोडा विकलप्य	षोढा विकल्प्य
१४४	१	पृथक	पृथक्
१४६	७	युष्मामिरिव	युष्माभिरिव
१४६	७	ग्रस्ति	अस्ति
१४७	३	स्वरूपणैव	स्वरूपेणैव
१५१	२	माभूत	मा भूत्
१५१	८	ताट्टशत्वं	तादृशत्वं
१५३	१	जातनाम्	जातानाम्
१५४	१५	विषतया	विषयतया
१५४	२४	सिद्धया	सिद्ध्या
१५४	२५	सिद्धयेत्	सिद्ध्येत्
१५५	१४	प्रार्प्ति	प्राप्ति
१५५	३२	द्वयप्ययुक्तम्	द्वयमप्ययुक्तम्
१५६	१०	शिद्धेः	सिद्धेः
१५७	१०	पत्तयस्युः	पत्तयः स्युः
१५७	१४	कारास्युः	काराः स्युः
१५७	२०	प्रसङ्गश्च	प्रसङ्गश्च
१५९	९	शिप्यादि	शिष्यादि
१६३	२२	सिद्धयेत्	सिद्ध्येत्
१६६	१	अन्यय	अन्वय
१६६	३०	साध्स्यस्य	साध्यस्य
१६७	१७	किंश्चिन्न	किञ्चिन्न
१६९	२४	निर्हेतुकेत्वेऽपि	निर्हेतुकत्वेऽपि
१७१	७	व्यञ्कत्वा	व्यञ्जकत्वा
१७१	१३	तदृष्टान्तेन	तद्दृष्टान्तेन
१७२	१०	हेतावमि	हेतावभि
१७२	२०	ममिप्रेत्य	मभिप्रेत्य
१७२	२४	तेपामेव	तेषामेव
१७२	२७	मावः	भावः

१७४	२०	नैच	नैव
१७५	२८	बोघकत्वेन	बोधकत्वेन
१७७	१३	बृंह्वण	बृंहण
१७८	१६	युंक्तं	युक्तं
१७९	२३	विशेपः	विशेषः
१८१	४	विशेणा	विशेषणा
१८२	६	आयुर्घृंतम्	आयुर्घृतम्
१८३	२३	प्रकरणाम्यां	प्रकरणाभ्यां
१८३	२९	ज्योतिरदि	ज्योतिरादि
१८४	२८	विशिष्टष्य	विशिष्टस्य
१८५	१७	क्लुप्ति	क्लृप्ति
१८७	१५	भोयायतना	भोगायतना
१८८	५	प्राथस्योक्तिः	प्राथम्योक्तिः
१८८	३३	विभत्वं	विभुत्वं
१९०	२७	यनुष्य	मनुष्य
१९१	२६	दृष्टेति	दृष्टेति
१९२	२९	वाग्ध	वाग्घ
१९४	१०	त्कामतीश्वरः	त्क्रामतीश्वरः ।
१९७	८	स्याम्	स्यात्
१९८	८	सम्बन्ध	सम्बन्ध
१९९	२९	स्वरूपात्ति	स्वरूपाति
२०१	१०	दिगन्त व्यात्ति	दिगन्तव्याप्ति
२०१	२४	निरस्त	निरस्तम्
२०५	११	दारत्र्य	दारभ्य
२०६	१३	शब्दनाम्	शब्दानाम्
२०६	२६	मघ्य	मध्य
२०८	२०	व्योम प्रत्यक्षेणैव	व्योमप्रत्यक्षेणैव
२०८	२४	कूपोऽसा विति	कूपोऽसाविति
२०८	२५	परिहृति	परिहरति
२०८	२९	द्वयणुकस्य	द्वचणुकस्य
२०८	३१	निदिस्य	निर्दिश्य
२०९	१३	चक्षुषत्वादि	चाक्षुषत्वादि
२१०	१४	नभः—प्रतीति	नभःप्रतीति

२१३	१	द्रव्व	द्रव्य
२१३	२५	सिद्धयेदिति	सिद्धयेदिति
२१३	२८	तत्रयाऽसा	तत्र या सा
२१३	२९	वन्योयं	वन्योन्यं
२१३	३०	वान्येयु	वान्येषु
२१३	३१	स्वप्रभादात्	स्वप्रभावात्
२१५	३	तात्पर्यम्‌ह्यम्	तात्पर्यंमूह्यम्
२१७	१५	निरुप्य	निरूप्य
२१७	२३	निषेधस्नु	निषेधस्तु
२१७	२६	स ह्यसिद्ध	स ह्यसिद्ध
२२०	९	इर्ति	इति
२२०	२८	नास्तीत्येर्थः	नास्तीत्यर्थः
२२१	२२	मनभ्युगभे	मनभ्युपगमे
२२२	१	सबन्धि	सम्बन्धि
२२३	१०	सिद्धि	सिद्ध
२२४	२	भावस्यैवाऽकाशत्वे	भावस्यैवाकाशत्वे
२२४	२२	रैनैकान्त्यम्	रनैकान्त्यम्,
२२४	१८	वैशेर्षिका	वैशेषिका
२२५	१२	तथाच	तथा च
२२५	१५	निस्स्पन्दत्वं	निष्पन्दत्वं
२२८	११	सम्भीवात्	सम्भवात्
२२९	२४	च्छिनो	छिन्नो
२३०	१४	तेर्त्यः	तेत्यर्थः
२३०	२६	ग्राहक मानसिद्धं	ग्राहकमानसिद्धम् ।
२३१	३१	दानानोति	दानानीति
२३२	८	पङ्क्ति	पङ्क्ति
२३४	१०	अतोऽवादि	अतोऽबादि
२३४	११	निगन्ध	निर्गन्ध
२३६	७	समूछन	सम्मूर्छन
२३८	३३	सम्भवात्	सम्भवात्
२४२	२	चिच्छुका	चिच्छङ्का
२४५	२४	अनन्भूंते	अन्तर्भूते
२४७	३१	तात्पयमिति	तात्पर्यमिति
२४८	२६	दिपादिषु	दीपादिषु

२५६	२५	अन्घकार	अन्धकार
२५७	४	मित्थर्थः	मित्यर्थः
२५७	२४	परस्याऽपि	परस्यापि
२५७	२४	भौभं	भौमं
२५८	१८	क्वचिद्श्य	क्वचिद् दृश्य
२५८	३०	व्यज्जितम्	व्यञ्जितम्
२६०	२५	सामग्र्यां	सामग्र्यां
२७२	३१	विष्णुमन्वादयः	विष्णुर्मन्वादयः
२७८	११	कालय	कालस्य
२८१	२१	तत्रोपाघयः	तत्रोपाधयः
२८२	२१	श्रूचते	श्रूयते
२८३	३२	घटस्येव	घटस्येव
२८६	१२	साथंकत्वं	सार्थकत्वं
२९०	२३	जानमिति	जानामीति
२९०	२७	चिशेषः	विशेषः
२९३	२८	बोधतन	बोधन
२९६	५	दुरूपह्लव	दुरपह्नवः
२९६	९	सयुक्तिर्कं	सयुक्तिकं
२९६	१८	द्वयतिरेक	द्वचतिरेक
२९६	२३	युक्तमिमि	युक्तमिति
२९७	१७	देहातिक्तत्वे	देहातिरिक्तत्वे
२९९	१	नतु	न तु
२९९	११	अनुवददि	अनुवदति
२९९	१५	स्वामी	स्वामि
३००	३,४	अधिष्ठातृत्वं	अधिष्ठेयत्वं
३०१	१५	प्रमाण्य	प्रामाण्य
३०१	२१	सुषुप्तवापि	सुषुप्तावपि
३०१	२४	व्यहार	व्यवहार
३०२	१३	प्रत्ययावि	प्रत्ययवि
३०५	८	कर्तंरिति	कर्तुरिति
३०५	१८	इत्येदपि	इत्येतदपि
३०७	२२	स्थिरिति	स्थितिरिति
३०९	१७	सस्कारः	संस्कारैः
३०९	१८	प्रतिसधान	प्रतिसन्धान

३०९	१६	वेकल्येपि	वैकल्येऽपि
३०९	२४	परावल	परविल
३०९	२७	सिद्ध	सिद्धे
३१३	१३	स्पश	स्पर्श
३१३	१८	द्रष्ट्रृत्व	द्रष्टृत्व
३१३	२२	अधिष्ठानभपि	अधिष्ठानमपि
३१५	८	दवोध	दवबोध
३१५	८	गुणः	गुणाः
३१५	२४	स्वान्येति	स्वस्येति
३२३	२४	परागर्थंत्	परागर्थात्
३२३	२९	पराक्व	पराक्
३३५	६	सजति	प्रसजति
३३५	६	तदैक्पं	तदैक्यं
३३५	१९	तात्पर्यँ	तात्पर्ये
३३९	७	परिहरित	परिहरति
३४०	२६	ज्ञाता	ज्ञाना
३४१	७	व्याच्यम्	वाच्यम्
३४२	१५	स्वस्थ	स्वस्य
३४२	२०	नाद्येविति	नाविद्येति
३४३	१२	शुद्ध	शुद्धं
३४४	१८	वृत्त्यानु	वृत्त्यनु
३४७	३१	जीपोत्पत्त्यादि	जीवोत्पत्त्यादि
३४९	६	आमा	आत्मा
३४९	७	इति । केचित् ।	इति केचित् ।
३४९	२४	प्रवृत्तिस्तु	प्रवृत्तिरस्तु
३५२	१६	त्क्रण	त्क्रमण
३५२	२७	पश्चग्नीति	पश्चाग्नीति
३५४	११	संयुक्तमपि	संयुक्तत्वमपि
३५६	१९	भ्रातृव्य	भ्रातृव्य
३५७	५	प्रतियत	प्रतिनियत
३५८	२३	पथगिह	पृथगिह
३६१	७	व्याप्युक्तेः	व्याप्त्युक्तेः
३६२	२५	यतनागुण	यतनानुगण
३६४	१८	गुणत्वं	गुणवत्त्वं

३६५	३	पुसि	पुंसि
३६५	१८	उभयधा	उभयथा
३६५	३०	नित्योध्व	नित्योर्ध्वं
३६६	३३	निषोधो	निषेध
३६८	२०	व्याघाभावात्	व्याघाताभावात्
३७०	२१	पाटः	पाठः
३७१	५	स्वर्गादि खम	स्वर्गादिकम
३७१	२७	त्वत्मंनि	वर्त्मनि
३७१	३१	प्रवतंतेति	प्रवर्ततेति
३७३	१३	विज्ञातु ः	विज्ञातुः
३७७	८	विविशिष्टं	विशिष्टं
३८२	८	रूपसंपद्य	रूपसम्पद्य
३८२	१७	कथसङ्गी	कथमङ्गी
३८३	१७	कमति	कर्मेति
३८३	२४	विग्रहैवा	विग्रहैर्वा
३८५	३	नक	नैक
३८५	५	श्रुतेश्च	श्रुतेरश्च
३८५	२९	मृत्यु	मृत्यु
३८६	४	परतमे	परमते
३८६	२१	वृद्धयुदितया	वृद्धयुदितया
३८६	२२	नकेति	नैकेति
३८६	३०	अङ्ग	अङ्गं
३८७	२	त एव	अत एव
३८७	९	व्यक्यत्थं	व्यक्त्यर्थं
३८७	३१	घ्यायीतेनि	ध्यायीतेति
३८८	३२	मोक्षभाव्	मोक्षभाक्
३८९	१२	वस्त्रादि	वर्णाश्रम
३९०	२८	भङ्ग्ये	भङ्ग्याये
३९०	२९	त्यक्तिः	त्युक्तिः
३९०	३१	अत्यश्रमी	अत्याश्रमी
३९२	२६	प्रकान्ता	प्रक्रान्ता
३९४	२५	क्वचिदृष्टा	क्वचिद्दृष्टा
३९५	१८	कर्मननुष्ठाता	कर्मानुष्ठाता
३९९	१६	तन्निवृत्त	तन्निवृत्तं
३९९	२५	ततश्च	ततश्च
३९९	३०	पोक्षत	पेक्षित

४०१	१७	गुरोरनु	गुर्वनु
४०५	२०	अधिकाभावा	अधिकाराभावा
४०६	१०	नत्वा	मत्वा
४०८	१,२	प्रमाणं	प्रापणं
४१०	२२	धीनजनक	धीजनक
४११	१५	परोक्षाद्य	परोक्षार्थं
४१२	२३	शब्दस्य	ब्दस्य
४१४	१२	विकल्पभिप्रेत्य	विकल्पमभिप्रेत्य
४१४	२७	आत्मऽद्वैतिनः	आत्माद्वैतिन
४१६	१२	परत्वादीति	परत्वादिति
४१६	१३	नापच्छेन्याय	नापच्छेदन्याय
४१९	१७	यथाऽतथा	यथा, तथा
४१९	२९	बुध्यन्तेरऽपीति	बुद्धयन्तरेऽपीति
४२१	४	असतोऽप्रीतत्वात्	असतोऽप्रतीतत्वात्
४२१	४	ग्रहक	ग्राहक
४२१	२०	चक्षरादेः	चक्षुरादेः
४२२	१६	सिह्वि	सिद्धि
४२८	२२	नह्यह्लहमिति	न ह्यहमिति
४३३	१७	विशेषण	विशेषेण
४३३	३२	श्चेनादे	श्येनादे
४३५	१२	धाष्टच	धाष्टचं
४३५	१३	त्यये हि तद्दर्श	त्यये तद्दर्शं
४३५	२७	न्नान्यं	नान्यं
४३५	२९	योग	योगं
४३६	१४	नाविरितो	नाविरतो
४३६	१७	प्रामादिकरिति	प्रामादिकैरिति
४३७	२७	पूर्वकाभ्यं	पूर्वकाद्यं
४४०	३२	जनयतीनि	जनयतीति
४४१	३	तुलतया	तुल्यतया
४४१	४	स्यादिदि	स्यादिति
४४१	८	कैमुत्यय	कैमुत्यन्याय
४४४	२७	उत्तरवधि	उत्तरावधि
४४७	२४	स्ययमेव	स्वयमेव
४४९	१४	प्रसङ्गति	प्रसङ्गसङ्गति

४५१	२७	प्रीयते	प्रीतये
४५४	६	प्राप्ताविषयकस्य	प्राप्ताभिषेकस्य
४५९	१३	शङ्ककलङ्की	शङ्काकलङ्की
४६०	२३	शङ्कनिवृत्तिः	शङ्कानिवृत्तिः
४६२	१०	स्वमवेत	स्वसमवेत
४६४	१	नन्वयत्र	नन्वन्यत्र
४६४	३०	प्रदापावयवात	प्रदीपावयवावित्ति
४६४	३२	दीपत्वात	दीपे त्विति
४६५	१०	दुःखावे	दुःखाभावे
४६५	१८	साङ्ख्या	साङ्ख्याः
४६५	२६	तद्धर्भाध्या	तद्धर्माध्या
४६५	३२	कि	किं
४६६	१७	कियन्त	कति
४६७	१६	मित्वर्थः	मित्यर्थः
४६९	३१	अनुवदात्	अनुवादात्
४७०	३२	पुरुषार्थबुत्या	पुरुषार्थश्रुत्या
४७१	१५	गुणवैषम्य	गुणवैषम्य
४७१	२१	कथसतीति	कथमतीति
४७२	९	स्थापकत्वयोगात्	स्थापकत्वायोगात्
४७३	११	अस्वति	अस्वेति
४७३	१४	गतरिति	गतैरिति
४७३	१८	तस्यैब	तस्यैव
४७४	१६	स्थयेव	स्थयैव
४७५	२७	विलीयेज	विलीयेत
४७७	१	जडद्रव्यसरः	जीवसरः
४७७	१	दृप्टातेन	दृष्टान्तेन
४७७	२१	भभं	भवं
४७८	६	भेदनह	भेदसह
४७८	७	मिमि	मिति
४७९	८	गृहल्लातु	गृह्लातु

एवं कृतेऽपि संशोधने मदीयदृष्टिदोषेण, मुद्रणालये कर्म कुर्वतामनवधानेन च काश्चनाशुद्धयस्संजाताः। यथा कतिपयस्थलेषु ` ^ ' ि ो इत्यादयो रेखाः नैव स्पष्टतया संलग्नाः। अतो वाचकमहाशयान् प्रार्थयेऽवर्जनीयापतितामेतां न्यूनतां कृपया क्षमन्तामिति।

❀ ❀ ❀